Akṣapāda Gotama and
Vācaspatimiśra

# Nyāyasūtra

— Tātparyaṭīkā

## SARIT

SARIT

# Contents

Contents i

I न्यायवार्त्तिकतात्पर्यटीका ३

१ प्रथमाध्यायः ५
१.१ प्रथमाध्याये प्रथमाह्निकम् . . . . . . . . . . . ५
१.२ प्रथमाध्याये द्वितीयाह्निकम् . . . . . . . . . . . २०१

२ द्वितीयाध्यायः २३०
२.१ द्वितीयाध्याये प्रथमाह्निकम् . . . . . . . . . . . २३१
२.२ द्वितीयाध्याये द्वितीयाह्निकम् . . . . . . . . . . . २८६

३ तृतीयाध्यायः ३३१
३.१ तृतीयाध्याये प्रथमाह्निकम् . . . . . . . . . . . ३३१
३.२ तृतीयाध्याये द्वितीयाह्निकम् . . . . . . . . . . . ३६२

४ चतुर्थाध्यायः ४००
४.१ चतुर्थाध्याये प्रथमाह्निकम् . . . . . . . . . . . ४००
४.२ चतुर्थाध्याये द्वितीयाह्निकम् . . . . . . . . . . . ४३९
५.१ पञ्चमाध्याये प्रथमाह्निकम् . . . . . . . . . . . ४६४

५ पञ्चमाध्यायः ४६५
५.२ पञ्चमाध्याये द्वितीयाह्निकम् . . . . . . . . . . . ४८६

1/tha

# Part I

[

न्यायवार्त्तिकतात्पर्यटीका]न्यायवार्त्तिकतात्पर्यटीका

# १ प्रथमाध्यायः

## १.१ प्रथमाध्याये प्रथमाह्निकम्

विश्वव्यापी विश्वशक्तिः पिनाकी
विश्वेशानो विश्वकृद् विश्वमूर्तिः ।
विश्वज्ञाता विश्वसंहारकारी
विश्वाराध्यो राधयत्वीहितं नः ॥§ 4

नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने ।
निधये वाग्विशुद्धीनामक्षपादाय तायिने ॥§ 6

ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा ।
न्यायवार्त्तिकतात्पर्यटीकास्माभिर्विधास्यते ॥§ 8

इच्छामि किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानाम् ।
उद्योतकरगवीनामतिजरतीनां समुद्धरणात् ॥§ 10

### १.१.१ अभिधेयप्रयोजनसम्बन्धप्रकरणम्

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानांतत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ । १ । १ ॥ § 11

अथ भगवताऽक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते, व्युत्पादिते च भगवता पक्षिलस्वामिना, किमपरमवशिष्यते यदर्थं वार्त्तिकारम्भ इति शङ्कां 2/tha निराचिकीर्षुः *सूत्रकारोक्तशास्त्रप्रयोजनानुवादपूर्वकं वार्त्तिकारम्भप्रयोजनं दर्शयति—यदक्षपाद इति ॥ § 12

यद्यपि भाष्यकृता कृतव्युत्पादनमेतत्, तथापि दिग्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेनाच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्योतकरेण *स्वनिबन्धोद्योतेन तदपनीयत इति प्रयोजनवानारम्भ इति । सूत्रोक्त-

४ शास्त्रे ] प्रतिपादितेnvt-J
६ *] रोक्तप्रयोnvt-C
१० *] स्वेति नास्तिnvt-J

प्रयोजनानुवादश्च प्रयोजनवच्छास्त्रव्युत्पादनेन स्वनिबन्धस्य प्रयोजनवत्तां प्रेक्षावत्प्रवृत्त्यङ्गं दर्शयितुम्, व्युत्पादनमात्रस्य च काकदन्तपरीक्षाग्रन्थसाधारण्येन प्रेक्षावत्प्रवृत्त्यनङ्गत्वात् । अत्र चैकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यन्तिकी निवृत्तिः शमः, तस्मै । कस्य ? जगतः । परमकारुणिको हि भगवान् मुनिः जगदेव दुःखपङ्कमग्नमुद्दिधीर्षुः शास्त्रं प्रणीतवान् । तत्र यदि कश्चिन्न प्रवर्तेत, किमायातं शास्त्रस्य ? न चानधिकृतपुरुषव्युत्पादनेनास्य तपोनिधेः कश्चिदस्ति दोषः । तथा च विश्वामित्रस्त्रिशङ्कुं याजयामास, वशिष्ठश्चाधमयोनिजामक्षमालामुपयेमे । तपःप्रभाव एव हि तादृशस्तेषां यत एवंविधाः पाप्मानो विलीयन्त इति । न चास्मदादीनां मन्दतपसामयं प्रसङ्गः । न हि गजानामुदर्यं तेजो वटकाष्ठमशितं पचतीत्यस्मदादीनामप्युदर्येण तेजसा तथा भवितव्यम् । कुतार्किकैर्दिग्नागप्रभृतिभिराहितमज्ञानं कुतार्किकाज्ञानमिति । § 13

अविगीतशिष्टाचारपरम्पराप्राप्तः परमशिष्टेन वार्त्तिककारेण कृतोऽपीष्टदेवतानमस्कारो न शास्त्रे निवेशितः । न खल्वन्यदपि मङ्गल्यं शास्त्रे निवेशितम्, प्रसिद्धतरतया तु मङ्गल्यान्तरवच्छिष्या अवगमिष्यन्तीति सर्वमवदातम् । § 14

तत्र संक्षेपतः प्रथमसूत्रमनूद्य तस्य तात्पर्यमाह—प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिसूत्रम् । तस्य शास्त्रस्य अभिसंबन्धवाक्यम् । आदिग्रहणेन क्रमप्राप्तस्यैव प्रथमं व्याख्यानं युक्तम्, न द्वितीयादेरिति दर्शितम् । अभिमतः संबन्धोऽभिसंबन्धः, शास्त्रनिःश्रेयसयोर्हेतुहेतुम-
3/tha द्भावः । तस्य इदं सूत्रवाक्यमभिसंबन्धवाक्यम् । प्रमाणादिपदार्थतत्त्वज्ञानादित्यत्र हि ज्ञायतेऽनेनेति ज्ञानमिति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमुच्यते । पञ्चम्या च तस्य हेतुत्वम् । न हि विषघ्नमन्त्रवत् स्वरूपमात्रेण तदविवक्षितार्थं निःश्रेयसहेतुरिति पदार्थतत्त्वावगमकरणतया शास्त्रमपदिशति, न तु स्वरूपेण, तेन शास्त्रस्य निःश्रेयसे कर्तव्ये प्रमाणादितत्त्वावगमोऽवान्तरव्यापार इत्युक्तं भवति । तथा च प्रमाणादिपदार्थतत्त्वं प्रतिपाद्यम्, प्रतिपादकं च शास्त्रमिति शास्त्रप्रमाणादिपदार्थतत्त्वयोर्ज्ञाप्यज्ञापकभावश्च प्रमाणादिपदार्थतत्त्वज्ञाननिःश्रेयसयोः कार्यकारणभावलक्षणश्च संबन्धः सूचितो भवति । तदिदमभिधेयसंबन्धप्रयोजनप्रतिपादनार्थत्वं प्रथमसूत्रस्य । *पत्पदार्थतत्त्वज्ञानस्य च यथा निःश्रेयसाधिगमं प्रत्युपयोगस्तथाग्रे निवेदयिष्यते । विनिश्चिताप्तभावाश्च मुनेराप्तत्वेन तद्वाक्यात् प्रयोजनादि विनिश्चित्य प्रवर्त्स्यन्ति, आप्तत्वाविनिश्चये त्वर्थसंशयात् । न खलु कृष्यादावपि विनिश्चितसस्याद्यधिगमानां प्रवृत्तिः, अन्तरावग्रहादिप्रतिबन्धेन फलानुत्पादस्यापि संभवात् । न च प्र-

५ मुनिः ] हि मुनिःnvt-C
१४ शास्त्रे ] ग्रन्थेnvt-C
२० इदं ] सूत्रं वाक्यम्nvt-C
२१ हि ] तत्त्वं ज्ञायते…तत्त्वज्ञानम्nvt-C
२२ त् ] स्वान्वयमा°nvt-C
२३ ति ] उपदि°nvt-C
२६ श्च ] चकारो नास्तिnvt-C
२८ * ] यत् nvt-Cnvt-J अत्र पदार्थकः पच्छब्दोऽभिप्रेतः ।
३१ यात् ] °सन्देहात्nvt-C

योजनादिवाक्याभावेऽपि संशयस्य साधकबाधकप्रमाणाभावेन न्यायप्राप्तत्वेन तदभिधानमनर्थकमिति साम्प्रतम्, विशेषस्मृत्यनपेक्षस्य संशयस्यानुत्पादात् । वाक्यात् तु विशेषस्मृतिरिति नानर्थक्यम् । § 15

तदेवं प्रथमसूत्रतात्पर्यमुक्त्वा भाष्यस्यादिवाक्यतात्पर्यमाह—प्रमाण-तोऽर्थप्रतिपत्तावित्येवमादि । तस्यानुसन्धानवाक्यम् । तस्य शास्त्रस्य निःश्रेयसाधिगमेन सह सूत्रेण घटितस्य । कुतश्चिन्निमित्ताद् विघटनशङ्कायाम् अनु सूत्रघटनायाः पश्चात् सन्धानं घटनं अनुसन्धानम्, तस्य वाक्यमनुस-न्धानवाक्यमिति । § 16

एवं किलात्र शङ्क्यते—यदशक्यानुष्ठानोपायोपदेशकं तदनर्थकम्, यथा ज्वरहरतक्षकचूडारत्नालङ्कारोपदेशकं वचनम् । तादृशं चेदं शास्त्रमिति । त-था हि प्रमेयादीनां तावत्पदार्थानां तत्त्वज्ञानं प्रमाणतत्त्वज्ञानाधीनम् । न हि 4/tha प्रमाणं तत्त्वेनानवधारितं बोधकत्वमात्रेण स्वगोचरावधारणायालं तावन्मात्रस्य तदाभाससाधारण्यात्, अपि तु बोधकत्वैकार्थसमवेतेनाव्यभिचारित्वेन । तदेव हि प्रामाण्यम् । तच्चाशक्यावधारणम् । तदनवधारणाच्च प्रमेयादयो दुरवधार-णाः । तथा हि विज्ञानस्य तावत्प्रामाण्यं स्वतो वा निश्चीयते परतो वा ? न तावत् पूर्वः कल्पः । न खलु विज्ञानमनात्मसंवेदनमात्मानमपि गृह्णीयात्, प्रागेव तत्प्रामाण्यम् । नापि विज्ञानान्तरम्, तद्विज्ञानमित्येव गृह्णीयात् । न पुनरस्याव्यभिचारित्वम् । ज्ञानत्वमात्रं च तदाभाससाधारणमिति न स्वतः प्रामाण्यावधारणम् । एतेन स्वसंवेदननयेऽपि अव्यभिचारग्रहणं प्रत्युक्तम् । नापि परतः । परं हि तद्गोचरं वा ज्ञानमभ्युपेयेत, अर्थक्रियानिर्भासं वा ज्ञानम्, तद्गोचरनान्तरीयकार्थान्तरदर्शनं वा । तच्च सर्वं स्वतोऽनव-धारितप्रामाण्यमाकुलं सत् कथं पूर्वं प्रवर्तकं ज्ञानमनाकुलयेत् ? स्वतो वास्य प्रामाण्ये किमपराद्धं प्रवतर्कज्ञानेन, येन तस्मिन्नपि तन्न स्यात् । न च प्रामाण्यं ज्ञायते स्वतः इत्यावेदितम् । यदा च संवेदनप्रामाण्यमुक्तेन क्रमेण दुरधिगमं तदा कैव कथेन्द्रियादीनामव्यभिचारिसंवेदनकार्यव्यङ्ग्यप्र-माणभावानाम् ? तदेवं दृष्टार्थाः प्राणभृतां व्यवहारा भवन्तु सन्देहादपि यथा तथा, अदृष्टार्थास्तु बहुवित्तव्ययायाससाध्या वैदिका व्यवहारा दत्तजलाञ्जल-यः प्रसक्ताः । तस्मात् प्रमाणादिपदार्थतत्त्वज्ञापनद्वारेण न शास्त्रं निःश्रेयसेन संबध्यत इति । सेयमाशङ्का प्रामाण्यज्ञानोपायकथनेनादिवाक्येन भाष्य-कृता निराकृता । तथा हि प्रमाणमर्थव-दिति नित्ययोगे मतुप् । नित्यता चाव्यभिचारिता । तेनार्थाव्यभिचारीत्यर्थः । इयमेव *चास्याव्यभिचारिता प्र-माणस्य यद्देशकालनरावस्थान्तराविसंवादोऽर्थस्वरूपप्रकारयोस्तदुपदर्शितयोः । अत्र हेतुः प्रवृत्तिसामर्थ्यात् सफलप्रवृत्तिजनकत्वात् । यदि पुनरेतद-

१ दिवाक्याभावेऽपि ] °संशयाभावे°nvt-C
३ म् ] नानर्थकम्nvt-C
५ मादि ] °वित्यादिnvt-C
१० म् ] रत्नाहरणोपवाक्यम्nvt-C
२८ द्वारेण ] °ज्ञानद्वा°nvt-C
३१ * ] चार्थाव्य°nvt-C
३२ स्य ] °कालान्तरावस्था°nvt-C

र्थवन्नाभविष्यत्, न समर्थप्रवृत्तिमकरिष्यत्, यथा प्रमाणाभास इति व्यतिरेकी हेतुः। अन्वयव्यतिरेकी वा। अनुमानस्य स्वतः प्रमाणतया अन्व-
5/tha यस्यापि संभवात्। प्रवृत्तिजनकत्वं तु प्रमाणस्य न साक्षात्, किं त्वर्थप्रतिपत्तिजननद्वारेणेत्याह—प्रमाणतोऽर्थप्रतिपत्ताविति। सर्वस्य चास्योपपत्तिं वार्त्तिकव्याख्यानावसरे निवेदयिष्यामः। § 17

स्यादेतत्। भवन्तु प्रमाणादयः पदार्थाः शक्यज्ञानाः शास्त्रेण तु ते नाभिधीयन्त इति न निःश्रेयसेन संगतिः शास्त्रस्येत्यत आह—शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वात्। यद्यपि श्रेयो दुःखनिवृत्तिमात्यन्तिकीं वक्ष्यति, तथापि सोपायैव सा अत्र श्रेयःशब्देन विवक्षिता, तन्मात्रस्य शास्त्राविषयत्वात्। तदयमर्थः। शास्त्रं तावदेतत् पुरुषश्रेयः सहोपायेनाभिधत्त इत्यनुभवसिद्धं सदशक्यानुष्ठानतयापवदितव्यम्। सा चेदशक्यानुष्ठानोपायोपदेशतापनीता प्रमाणत इत्यादिना। संहितं निःश्रेयसेन सह शास्त्रमिति। शास्त्रस्येत्यादि ग्रहणकवाक्यं विवृणोति—शास्त्रं पुनरित्यादिना उपभोगात् प्रक्षयेणेत्यन्तेन। प्रमाणादिवाचकपदग्रहणेन तल्लक्षणानि च तत्परीक्षाश्चोपलक्षयति। तथा च पञ्चाध्यायी शास्त्रमित्युक्तमित्यविरोधः। पञ्चाध्यायीत्यनेन व्यूहः समूहिनामुचितानुपूर्वी। उपलक्षकपदस्वरूपमाह—पदं पुनरिति। एकस्मृतिसमारूढा वर्णा एकार्थप्रतिपादनावच्छिन्नाः समूहः। एवं स्वार्थस्मृत्यवान्तरव्यापाराणां सूत्रपदानां नानापदार्थविशिष्टैकपदार्थरूपवाक्यार्थप्रत्यायनकार्यावच्छिन्नानां समूहो वेदितव्यः। एवं च क्वचित् केनचिदर्थेनैकेन सूत्रवाक्यानामेकवाक्यत्वं समूहः प्रकरणम्। प्रकरणानामपि कयाचित् स्वार्थसंगत्या समूह आह्निकम्। एवं तत्र तत्र वेदितव्यम्। एताश्च प्रकरणाह्निकाध्यायार्थसंगतीस्तत्र तत्र लेशतो दर्शयिष्यामः। § 18

तदेवं शास्त्रस्वरूपं दर्शयित्वा नान्तरेण तदर्थकथनं पुरुषश्रेयोऽभिधायकत्वमस्य सिध्यतीति तदर्थं कथयति—तत्पदार्था इति। ननु प्रमाणादीनां प्रतिनरमानन्त्येन दुर्ज्ञानत्वमिति तदवस्थमेवानर्थक्यं शास्त्रस्य प्रसक्तमित्यत
6/tha आह— षोडशात्मानः। आत्मा स्वभावः प्रमाणादीनां प्रमाणत्वादिसामान्यविशेष इति यावत्। एतदुक्तं भवति। आन्तर्गणिकभेदादानन्त्येऽपि स्वसामान्यविशेषैः संगृहीता न दुर्ज्ञाना इति यतोऽस्य पदार्थाः प्रमाणादयः, तत्तस्मात् शास्त्रं पुरुषश्रेयोऽभिधत्ते। § 19

स्यादेतत्। प्रमाणादयः पदार्थाः प्रमाणिका अप्रामाणिका वा? अप्रमाणिकत्वे कल्पनामात्रनिर्मिताः कथं निःश्रेयसाय कल्पन्ते? न च षोडशात्मानः कल्पनाः कोशस्यानन्तप्रसरत्वात्। प्रामाणिकत्वे वा प्रमाणादेव तत्सिद्धेः शास्त्रस्य वैयर्थ्यमित्यत आह—प्रत्यक्षेति। प्रत्यक्षानुमानाधिगत-

---

१० त्त ] °श्रेयोऽभि° nvt-C
११ सिद्धं ] तदशक्यानुष्ठानोपायोपदेशतया nvt-J
१२ नीता ] °नुष्ठानताऽप° nvt-C
१९ च्छिन्नानां ] °ष्टैकार्थप्रत्ययैककार्या° nvt-C
३२ त्वात् ] °प्रसव nvt-J

ग्रहणेनाप्रामाणिकत्वं निषिद्धम् । अत+एव वस्तुतत्त्वमिति । प्रमाणादयः पदार्था नोपमानविषया इति नोपमानमुपन्यस्तम् । यद्यपि प्रमेयमात्माद्यप-वर्गान्तलक्षणमागमिकं तथाप्यागमस्याप्तप्रणेतृकतया तत्रापि मूलभूतमनुमानं प्रत्यक्षं वास्तीति प्रत्यक्षानुमाने एव दर्शिते । ननूक्तं प्रामाणिकत्वे शास्त्रवैय-र्थ्यमित्यत आह—तस्य विषय इति । व्यवहरमाणा अपि प्रमाणैर्लौकिका वैनयिकबुद्धिविरहिणो नैतान् पदार्थान् विविञ्चते । अविविक्ताश्चैते न निःश्रेय-साय कल्पन्त इति अनधिगतेत्युक्तम् । आध्यात्मिकी शक्तिः शुश्रूषादिः । पुरुषेत्युक्तम् । तत्र विवक्षितं पुरुषविशेषं ग्रहीतुं संभविनः पुरुषप्रकारान् दर्शयति— पुरुषः पुनरिति । हेयं दर्शयति—तत्रेति । उपादेयानाह—इतर इति । अपेक्षा जिज्ञासा । सा सन्दिग्धस्य तावदस्ति शिष्यस्य । विप्रतिपन्नस्य तु साक्षिणां पुरतो जल्पवितण्डाभ्यां शिष्यमाणस्य विगलितेऽहङ्कारे सन्दिग्ध-स्य सञ्जातजिज्ञासस्य सापेक्षस्य सतः । अप्रतिपन्नस्यापि केनचित् प्रकारेण सन्देहमापाद्य सापेक्षीकृतस्य प्रतिपाद्यता । तदिदमुक्तम्—इतरे सापेक्षाः सन्तः प्रतिपाद्या इति । असन्दिग्धोऽपि तत्त्वप्रतिपादनाय कारुणिकेन स-न्दिग्धः कृत्वा प्रतिपाद्यत इति । तत् किं सापेक्षमधिकृत्य शास्त्रं प्रवृत्तम् ? तथा च प्रमातॄणां न प्रमाणान्तरे प्रवृत्तिः स्यादित्यत आह—ते यदेति । कश्चिद् विषयं जिज्ञासवो यदेन्द्रियाद्यपेक्षन्ते, तदा प्रत्यक्षेण प्रतिपाद्याः । एवमुत्तरमपि योज्यम् । अयमभिसन्धिः, न दृष्टप्रयोजनोपयोगिवस्तुजिज्ञासा इहा पेक्षाभिमता । किं तु निःश्रेयसोपयोगिपदार्थजिज्ञासा । सा चास्मिन्नेव 7/tha शास्त्रे प्रवृत्तिहेतुः, नान्यत्र । तदिदमुक्तम्—यदा पुनरिति । परमपुरुषार्थ-साधनं तु जिज्ञासव इति शेषः । इहाभिमतं श्रेयो निर्धारयितुं श्रेयोमात्रप्र-कारानाह—श्रेयः पुनः सुखमहितनिवृत्तिश्च । तत्राप्यवान्तरप्रकारानाह—त-च्छ्रेयः सुखं दुःखनिवृत्तिश्च भिद्यमानं द्विधा व्यवतिष्ठते । तदाह दृष्टादृष्टभेदेन । न व्यासज्य किं तु प्रत्येकमित्याह—दृष्टं सुखं स्रक्चन्दनवनितादिभोगज-न्म । अदृष्टं सुखं स्वर्गादि । एवं च दुःखनिवृत्तिरपि श्रेयो दृष्टमदृष्टं चेति योजनीयं चकारलोपात् । अहितनिवृत्तेः श्रेयस आत्यन्तिकानात्यन्तिक-त्वेन दृष्टादृष्टस्य भेदमाह—अहितनिवृत्तिरपीति । अभिमतं श्रेयो निर्धार-यति—आत्यन्तिकीति । पुनरिति निर्धारणमेव द्योतयति । आत्यन्तिकत्वं निवृत्तेर्निवृत्तस्य पुनरनुत्पादः । स च कार्यकारणतदनुषङ्गिनिवृत्त्या लक्ष्यते । न ह्यकारणं कार्यं जायते । तदिदमुक्तम्—एकविंशतिप्रभेदभिन्नदुःखहान्येति । गौणमुख्यभेदेन चैकविंशतेः शरीरादीनां दुःखत्वे प्रकारानाह—एकविंश-तीति । षष्ठमिन्द्रियं मनः । तस्य विषय इच्छाद्वेषप्रयत्नाः । यद्यपि विष-यः शरीरमपि तथाप्यन्यथास्य दुःखहेतुभाव इत्याह—शरीरमिति शरीराव-च्छिन्न आत्मप्रदेशो दुःखायतनमिति शरीरं दुःखायतनमुक्तम् । इन्द्रियविष-यबुद्धीनां दुःखत्वोपचारे कारणमाह— इन्द्रियाणीति । तत्रेन्द्रियाणि तावद्

५ अपि ] °माणाभावेnvt-C
८ कारान् ] संभाविनः पुरुषान्nvt-C
२७ त्वेन ] °त्यन्तिकत्वानात्यन्तिकत्वे तद्nvt-C

गन्धादिविषयबोधनात्, विषया बोध्यत्वात् । बुद्धयस्तु साक्षाद् दुःखसाध-
नानीति दुःखत्वेनोपचर्यन्ते । *सुखस्य दुःखत्वोपचारबीजमाह—सुखमिति ।
साधनपारतन्त्र्यं क्षयित्वं काम इति दुःखहेतवः सकलसुखानुषङ्गिनः, तस्मात्
सुखमपि दुःखानुषङ्गि । उक्तप्रकारदुःखहानिसाधनमाह—तस्य हानिरिति
। संशयादितत्त्वज्ञानपरिशोधितपरमन्यायमार्गः खलु हेयोपादेयभूतद्वादशविध-
प्रमेयतत्त्वपरिभावनभुवा प्रसंख्यानेन निर्मृष्टनिखिलप्रवृत्तिहेतुदोषानुषङ्गोऽप्र-
8/tha वर्तमानो न शरीरेन्द्रियादिहेतुमपूर्वधर्माधर्मप्रचयमातनोति अनादिभवप-
रम्परोपात्तं च धर्माधर्मप्रचयमनन्तमप्यनियतविपाकसमयमपि प्रसंख्यान-
परिपाकप्रभावात् परितस्तत्तदुपभोगभागिनः कायान् निर्माय तत्तत्फलोप-
भोगात् प्रक्षिणोति । अचिन्त्यसामर्थ्यातिशयो हि समाधिः । यथाहुरत्रभवन्तः
§ 20

को हि योगप्रभावादृते अगस्त्य इव समुद्रं पिबति, स इव च दण्डकारण्यं सृजतीति । सेयमात्यन्तिकी दुःखनिवृत्तिः श्रेयः । तदिदमुक्तम्—
§ 21

शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वादिति ॥§ 22

स्यादेतत् । केवलस्य दुःखस्यात्यन्तिकी निवृत्तिः श्रेयः पुरुषप्रवृत्त्यङ्गम् । इयं तु दुःखवत् सुखस्याप्यात्यन्तिकी निवृत्तिरिति कथं श्रेयः, कथं च प्रेक्षावत्प्रवृत्त्यङ्गमित्यत आह—पुरुषा रागादिमन्त इति । यद्यपि रागादिमतां पृथग्जनानामेतन्न प्रवृत्त्यङ्गम्, ते हि मधुविषसंपृक्तमप्यन्नं मधुरतया आपातरमणीयं विषविषङ्गात्तु मारयतु मा वा मीमरदुपयुञ्जहे तावदापाततः सुखम्, को हि हस्तगतं पादगतं करोतीति विचिन्त्योपभुञ्जते । विवेकिनस्तु आयतिमालोचयन्तः स्वर्गमपि कुपितफणिफणामण्डलच्छायप्रतिम इत्यपजहति । तेन मा भूदेतद् रागादिमतां प्रवृत्त्यङ्गम्, विवेकिनां तु भविष्यति । अविवेकिनामपि चाप्रतिपन्नविप्रतिपन्नानां विवेकाधानोपायः पूर्वमावेदितः । शास्त्रप्रवृत्त्यङ्गमात्रमेव चेह विवेको वैराग्यमभिमतमिति । प्रवृत्तेर्द्वैविध्यम् ऐकरूप्यं द्वैरूप्यं च । *पुरुषभेदो रागवैराग्याभ्याम्, प्राप्तव्यस्य सर्वस्य सुखस्य दुःखसंभेदेनानिष्टपक्षनिक्षेपादनिष्टप्रतिषेधायैव प्रवृत्तिर्विवेकिनामेकरूपैव । अविवेकिनां तु प्रवृत्तिर्द्विरूपेत्युक्तम् । § 23

तदनेन प्रपञ्चेन प्रमाणतोऽर्थप्रतिपत्तावित्यादिवाक्यस्य तात्पर्यमभिधाय
तदवयवं प्रवृत्तिसामर्थ्यादिति विवरीतुं भूमिमारचयति—प्रवृत्तेरपीति । दृष्टं
9/tha प्रवृत्ति सामर्थ्यं हेतुरिति रागादिमत्प्रवृत्तिसामर्थ्यमुपन्यस्तम्, न तु वीत-

२ *] सुखे दुःखत्वोपचारेnvt-C
७ नोति] °माचिनोतिnvt-C
१० न्तः] °भवन्तः पतञ्जलिपादाःnvt-C तत्तु न सम्यक् योगसूत्रेष्वस्य संदर्भस्यादर्शनात् तु° व्यासभाष्ये ४. १०
२० णीयं] °षङ्गान्मार°nvt-C
२० हे] °दुपभुञ्जतेnvt-C
२२ तिम] °भोगिफणा…च्छायाप्र°nvt-J
२६ *] पुरुषेnvt-C
३० रीतुं] °मिरचनां करोतिnvt-J

रागाणाम् न हि तत्प्रवृत्तेर्निःश्रेयसाधिगमलक्षणफलसंबन्धो दृष्टो निःश्रेयसस्यालौकिकत्वात् । प्रमाणस्यार्थवदनर्थकत्वाद् इत्ययुक्तम्, प्रमाणमनर्थकमिति हि विप्रतिषिद्धमित्यत आह—प्रमाणं तावदिति । न ह्यप्रमाणमप्रमाणमिति गृहीतं प्रवृत्त्यै कल्पते । किं तर्हि ? प्रमाणमिति । न चाप्रमाणे प्रमाणाभिमानो विना प्रमाणादिसाधर्म्यादिति तत्साधर्म्यं पृच्छति—किं पुनरिति । उत्तरम्—सामान्यपरिच्छेदकत्वम् । तद्विवृणोति—प्रमाणेनापीति । रजतविज्ञानमपि पुरोवर्तिशुक्लं भास्वरं सद्द्रव्यं परिच्छिनत्ति, शुक्तिज्ञानमपि । केवलमेकस्मिन्नेव विषये रजतसमारोपापवादाभ्यां बुद्ध्योर्बाध्यबाधकभाव इति भावः । तदेवमुभयतः प्रवृत्तिः समर्थात् प्रमाणादेव, नाप्रमाणादर्थव्यभिचारिण इत्याह—सोऽयं प्रमातेति । ततश्च सिद्धः समर्थायाः प्रवृत्तेरनर्थवद्व्यतिरेक इत्यभिसन्धिः । तथा च समर्था प्रवृत्तिरनर्थवद्व्यतिरेकसंपन्नप्रमाणस्यार्थवत्त्वे हेतुरित्याह—तस्याः समर्थायाः प्रवृत्तेर्हेतोः पुनः प्रमाणस्यार्थवत्त्वमर्थाव्यभिचारित्वम् । असमर्था त्वनन्तरापि न संबध्यते योग्यताविरहात् । § 24

संप्रत्यादिवाक्यमाक्षेप्तुमनुवदति—प्रमाणत इति । आक्षिपति—परस्परेति । समाधत्ते—नेति । आक्षेपवाक्यं विभजते—यदि प्रमाणत इति । न तावदर्थप्रतिपत्तिः प्रवृत्तिहेतुरपि तु तद्विनिश्चयः । न च तन्मात्रम् अपि तु तदर्थजातीयस्य श्रेयोहेतुतामसकृदुपलभ्य संप्रत्युपलभ्यमानस्यार्थस्य तज्जातीयतया श्रेयोहेतुभावानुमानसहितो विनिश्चयः प्रवृत्तिहेतुः । सेयं श्रेयःसाधनतानुमानसहिता प्रमाणतोऽर्थप्रतिपत्तिर्विनिश्चितिः समर्थप्रवृत्तिनिमित्तमुक्ता । न चार्थविनिश्चयः प्रामाण्यावधारणमन्तरेण, प्रामाण्यावधारणं चार्थश्रेयोहेतुतानुमाननिमित्तव्याप्तिग्रहणं च न समर्थां प्रवृत्तिं विना, न च समर्था प्रवृत्तिस्ताभ्यां विनेति परस्पराश्रयता । तदिदमुक्तम्, यदि पूर्वं प्रमाणतोऽर्थप्रतिपत्तिर्विनिश्चितिरपेक्षितोपायतानुमानसहिता प्रवृत्तिसामर्थ्यमन्तरेण किमिति प्रतिपद्यते निश्चिनोत्यपेक्षितोपाय एवेति च तोय मेवेति 10/tha चेति ? समाधानं विभजते—तच्च नैवमिति । यत् तावदुक्तम्, प्रमाणस्य दुरवधारणत्वादर्थविनिश्चयाभावान्न प्रवृत्तिसामर्थ्यमिति, तत्र ब्रूमः—सत्यं न स्वतः प्रामाण्यं शक्यावधारणम् । परतस्तु दृष्टार्थेष्वनभ्यासदशापन्नेषु प्रवृत्तिसामर्थ्यादेव तद् गम्यते । अर्थप्रतीत्यधीना तु प्रवृत्तिर्नार्थावधारणाधीना, अर्थसन्देहादपि प्रेक्षावतां प्रवृत्तेः । नो खलूपायताविनिश्चयेनापि प्रवर्तमाना न अनागतफले सन्दिहते । तदमी संशयाना अपि प्रवर्तमानाः प्रवृत्तिसामर्थ्यात् प्रमाणस्य तत्त्वं विनिश्चित्य तज्जातीयस्यान्यस्याभ्यासदशाप-

५ माणे ] °णमित्य°nvt-C
१२ त्वे ] °संपन्नाप्रnvt-J
१८ तु ] तज्जातीयस्यnvt-J
१८ स्य ] °हेतुतयाऽसकृदुपलभ्यमान°nvt-C
१९ यः ] °सहिता विनिश्चितिःnvt-C
२२ णं ] च श्रेयो°nvt-C
२४ हिता ] °रपेक्षितानु°nvt-C
३० पि ] °देवnvt-J
३० वृत्तेः ] प्रवृत्तिःnvt-C

न्नस्य प्रवृत्तिसामर्थ्यात् प्रागेव तज्जातीयत्वेन लिङ्गेन प्रामाण्यावधारणात् अर्थविनिश्चयेन प्रवर्तन्ते । एवं च दृष्टार्थमन्त्रायुर्वेदप्रामाण्यं प्रवृत्तिसामर्थ्येनावधार्य तज्जातीयस्याप्तोक्तस्यादृष्टार्थस्य वेदस्य विनापि प्रवृत्तिसामर्थ्यं प्रामाण्यावधारणमाप्तोक्तत्वेन निवेदयिष्यते । न च फलज्ञानं परीक्ष्यते प्रेक्षावद्भिः, तस्य यादृशतादृशस्यापीष्टत्वादिष्टलक्षणत्वाच्च फलस्य तत्साधनत्वं ते परीक्षन्ते । तथा हि तोयज्ञानम्, पिपासोस्तत्र प्रवृत्तिः, प्रवृत्तस्य तदाप्तिः, आप्तस्य पानम्, पानेन चोदन्योपशान्तिरित्येतावतैव प्रमाता कृती भवति । न पुनरुदन्योपशममपि परीक्षते, तस्य यादृशतादृशस्यापीप्सितत्वादिति केचित् । वयं तु ब्रूमः, फलज्ञानमप्यभ्यासदशापन्नतया तज्जातीयत्वेन लिङ्गेनावधृताव्यभिचारमेव । एवं तत्पूर्वं तत्पूर्वतरं तत्पूर्वतममिति । न च संप्रतितनस्य फलज्ञानस्य प्रामाण्यावधारणायेदानीमेव पूर्वस्य फलज्ञानस्य तज्जातीयत्वेन प्रामाण्यावधारणे सत्यनवस्थेति वाच्यम् । पूर्वतरसाधर्म्येण पूर्वमेव पूर्वस्यावधृतप्रामाण्यत्वात् । एवं पूर्वतमसाधर्म्येण पूर्वतरस्य । एवं तत्पूर्वसाधर्म्येण पूर्वतमस्येत्यनादितयैवात्र परिहारः । एतेषु च मध्ये यत्फलज्ञानं स्वप्नाद्युपभोगतुल्यतया शङ्कितव्यभिचारं तदनभ्यासदशापन्नम् । अतः प्रवृत्तिसामर्थ्यं तत्र प्रामाण्यावधारणाय विनिवेशनीयमित्यर्थप्रतिपत्तिप्रवृत्तिसामर्थ्ययोरनादित्वमुक्तम् । 11/tha अनुमानस्य तु प्रवृत्तिसामर्थ्यं लिङ्गजन्मनोऽन्यस्य वा निरस्तसमस्तव्यभिचारशङ्कस्य स्वत एव प्रामाण्यमनुमेयाव्यभिचारिलिङ्गसमुत्थत्वात् । न हि लिङ्गाकारं ज्ञानं लिङ्गं विना, न च लिङ्गं लिङ्गिनं विनेति स्वत एव गृहीताव्यभिचारलिङ्गसमुत्थं निष्कम्पमुपपद्यते ज्ञानम् । प्रत्यक्षज्ञानं त्वर्थादुत्पद्यमानमपि न गृहीताव्यभिचारात् अपि तु सत्तामात्रेणावस्थितात् । न च कारणान्तराण्यपीन्द्रियादीनि अस्यार्थेन गृहीताव्यभिचाराणि न चार्थेनाव्यभिचाराणि । शाब्दं तु ज्ञानं नार्थादुत्पद्यते तदभावेऽपि सति शब्दे भावात् । नापि लिङ्गस्येव शब्दस्यार्थाव्यभिचारः, किं तु सङ्केतग्रहणमात्रात् पदार्थप्रत्यायनेन *वाक्यार्थमधिगमयति शब्दः । तस्मात् प्रत्यक्षशाब्दविज्ञानयोर्न स्वतोऽव्यभिचारग्रह इति । प्रवृत्तिसामर्थ्यं तज्जातीयत्वं वा लिङ्गमर्थाव्यभिचारायानुसरणीयम्, ज्ञानगततज्जातीयत्वलिङ्गग्राहिणश्च ज्ञानस्य मानसप्रत्यक्षस्य तादृशस्यादृष्टव्यभिचारतया परितो निरस्तसमस्तविभ्रमाशङ्कस्य स्वतः प्रामाण्यमिति नानवस्था । एतेनोपमानं व्याख्यातम् । संवेदनस्य चार्थाव्यभिचारिताकथनेन तत्कारणानामिन्द्रियादीनामपि प्रमाणत्वमुक्तं वेदितव्यम् । न ह्यव्यभिचारिविज्ञानजनकत्वादन्यदेषां प्रामाण्यम् । न चार्थव्यभिचारिणामिन्द्रियादीनां कथमर्थाव्यभिचारिविज्ञानजनकत्वमिति सांप्रत-

३ स्य ] °ज्ञातीयस्यादृष्टा°nvt-C
४ ते ] द्रः २।१।६८
५ ते ] °धनं त्वेतेnvt-J
१० मेव ] °नावधारितव्य°nvt-C
१३ त्वात् ] °प्रमाणत्वात्nvt-C
१६ णाय ] °मित्यर्थः । प्रतिपत्ति°nvt-C
२० एव ] विनेति । अत°nvt-C
२५ * ] °र्थमवग°nvt-C
२८ या ] ग्राहिणश्च मानस° तादृशादृष्ट°nvt-J
३१ म् ] °दन्यत्प्रा°nvt-C

म्, कारणस्वभावनियोगपर्यनुयोगयोरशक्यत्वात् । तस्मादर्थसन्देहादनभ्यासदशापन्नात् प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यसंभवात् प्रवृत्तिसामर्थ्यज्ञानस्य चाभ्यासदशापन्नस्य तज्जातीयत्वेन प्रामाण्यानुमानादनभ्यासदशापन्नस्य तु प्रवृत्तिसामर्थ्यान्तरज्ञानेन प्रामाण्यानुमानादनादित्वान्नार्थप्रतिपत्तिप्रवृत्तिसामर्थ्ययोः परस्पराश्रयत्वमस्तीति । अर्थस्यापेक्षितोपायतानुमानप्रवृत्तिसामर्थ्ययोः परस्परापेक्षित्वमवशिष्यते । तत्राप्यनादितापरिहारः । उत्पन्नमात्रकस्य हि बालकस्य स्तनं दृष्टा प्राग्भवीयस्तज्जातीयापेक्षितानुभवजनितः संस्कार आविरस्ति । *ततश्च स्मरणम् । ततोऽपेक्षितोपायतानुमानम् । ततः प्रवृत्तिः । ततस्तस्याः 12/tha
सामर्थ्यम् । एवं पूर्वस्मिन् पूर्वस्मिन् जन्मनीत्यनादितया न बीजाङ्कुरवत् परस्परापेक्षितेति । अर्थप्रतिपत्तिरिति अर्थप्रतिपत्तिश्चार्थस्यापेक्षितोपायताप्रतिपत्तिश्चेत्यर्थः । तस्मात् सर्वमवदातम् । § 25

तदनेनोक्तेन क्रमेण प्रमाणतोऽर्थप्रतिपत्तावित्यस्य शास्त्रानुसन्धानवाक्यत्वं *तात्पर्यं च समाहितम् । इदानीमस्यैव तात्पर्यान्तरमाह—प्रमाणप्रवृत्त्योर्वेति । तत्रेदमाशङ्क्यते मुनिर्हि प्रत्यक्षसंशयादिव्युत्पादनद्वारेण साक्षाद्यानेन शास्त्रेणान्वीक्षिक्या हेयोपादेयभावावस्थितद्वादशविधप्रमेयव्युत्पादकं न्यायमनुमानापरनामानं निःश्रेयससिद्धये व्युत्पादयांबभूव । न च न्यायतः प्रमाणात् प्रमेयतत्त्वनिश्चयमात्रान्निःश्रेयसाधिगमः । अपि त्वाद्यन्तवर्ज्यं दशानां प्रमेयाणां दुःखसंज्ञाभावनम्, आत्मनश्च याथात्म्यभावनमित्यादिभ्यः प्रवृत्तिभ्य आत्मतत्त्वसाक्षात्कारवैराग्यपरिपाकक्रमेणापूर्वयोर्धर्माधर्मयोरनुत्पादेनोत्पन्नयोश्चोपभोगात् प्रक्षयेणेति । तथा च निःश्रेयसं प्रत्यन्तरङ्गत्वात् प्रमाणान्न्यायात् प्रवृत्तिरेव बलीयसी, न न्यायः । तस्मात् प्रवृत्तिरेव व्युत्पादनीया न प्रमाणं निःश्रेयसहेतुरपि प्रवृत्तेरन्तरङ्गत्वात् । तत्रेदमुपतिष्ठते प्रमाणतोऽर्थप्रतिपत्तौ सत्यां प्रवृत्तेः सामर्थ्यं फलेनाभिसंबन्धो, न तु प्रमाणतोऽसत्यामर्थप्रतिपत्तौ । तस्मादर्थवत् प्रयोजनवत् प्रमाणमपि प्रवृत्तिवदेव । एतदुक्तं भवति, यथान्तरङ्गतया प्रवृत्तिर्बलीयसी एवं मूलकारणतया प्रमाणमपि । *न ह्यप्रमाणात् प्रवृत्तिः फलेनाभिसंबध्यते । तस्मात् तुल्यमुभयमपि । तथापि प्रमाणव्युत्पादनेन प्रवृत्तिरपि व्युत्पादिता भवतीति प्रमाणस्य व्युत्पादनमकारि शास्त्रेण, न तु प्रवृत्तेः । सामान्याभिधानं च परमन्यायपरम्, तस्यैव प्रकृतत्वादिति । प्रामाण्यज्ञानोपायप्रतिपादनपरतयानुसन्धानवाक्यत्वमस्य पूर्वमुक्तम् । संप्रति परपर्यनुयोगमुखेनास्यानुसन्धानवाक्यत्वं प्रतिपादयति—लोकवृत्तेति । तथा हि प्रमाणप्रतिपत्त्युपायं प्रत्याचक्षाणक एवं प्रष्टव्यो जायते, किं भवान् प्रमाणेन प्रमाणज्ञानोपायं 13/tha

२ त्तौ ] °पन्नात् प्रवृत्तौ प्रमाणतो°nvt-C
३ तु ] र्थ्यानन्तर°nvt-C
८ * ] ततः तत्स्म°nvt-J
१३ * ] तात्पर्यं चnvt-C
१३ स्यैव ] तात्पर्यमाहnvt-C
१७ अपि ] °न्तवर्तिनांnvt-C
१९ वृत्तिभ्य ] प्रवृत्तिभिःnvt-C
२१ त्वात् ] °यसप्राप्तेः कारणत्वात्nvt-C
२२ न ] न्यायोnvt-C
२६ * ] न त्व°nvt-C

प्रत्याचष्टे, अप्रमाणेन वेति ? यदि ब्रूयात् प्रमाणेनेति स प्रतिवक्तव्यः, प्रमाणज्ञानोपायमविद्वान् कथं भवानेवमाहेति ? अप्रमाणेनेति चेदनुज्ञया वर्तितव्यम् । अथ प्रमाणेनागृहीतप्रामाण्येनेति, वाङ्मनसयोर्विसंवादः । तस्मादनिच्छतापि त्वया लोकवृत्तमनुसरणीयम् । अन्यथा नासि लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीयः स्या इति । तदिदं लोकवृत्तमाक्षेप्तारं बोधयितुमनेन **भाष्ये**णानूद्यते **प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणं** यतोऽतः सर्वः प्रमाता प्रमाणेनावगतार्थवत्त्वेनार्थमवधार्य प्रवर्तमानः फलमुपलभत इति लोकवृत्तम् । तत् प्रमाणत इत्यादिना वाक्येन कारणप्रदर्शनद्वारेणानूद्यते । § 26

अस्यैव **भाष्यस्य** तात्पर्यान्तरं वक्तुं भूमिमारचयति—**हेयहानेति** । अर्थोऽर्थशब्दः प्रमाणतोऽर्थप्रतिपत्तावित्यत्र स्थितः पदं वाचकं येषां तानि तथा । एत**द्वार्तिक**ग्रन्थस्यैतादृशं व्याख्यानम्, भाष्यगतस्य त्वन्यथा भविष्यति । **उपायः शास्त्रमिति** । शास्त्रशब्दस्तदर्थपरः, अर्थस्यापि शब्दवच्छास्त्रशरीरत्वात् । अत्र च हेयहानाधिगन्तव्यपदैः प्रमाणप्रमेययोरुपादानाद् गोबलीवर्दन्यायेन संशयादिषु निग्रहस्थानान्तेषु शास्त्रपदं प्रवर्तते । तेनोपायपदेन संशयादयो निग्रहस्थानान्ता एवोक्ता इति । ग्रहणकवाक्यं विवृणोति—**हेयमिति** । तात्पर्यमाह—**एतस्मिंश्चेति** । चेन प्रमाणप्रमाप्रमातृप्रमेयरूपं चतुर्वर्गान्तरमपि सूचयति । तत्र हेयादिचतुर्वर्गे *चार्यमाणतयार्थपदसूचिते प्रमाणादिचतुर्वर्गे च प्रमाणस्य प्राधान्यप्रदर्शनार्थमिदं भाष्यम् । यद्यपि चतुर्वर्गद्वयतत्त्वावगमो निःश्रेयसाधिगमहेतुः, तथापि प्रमाणमेव प्रधानम्, तन्मूलत्वादितरसिद्धेः । तदिदमुक्तम्—**अर्थवदिति** । अतिशायने मतुप् । प्रमात्राद्यपेक्षया हेयाद्यपेक्षया चातिशयेन प्रयोजनवत् प्रमाणम् । कस्मात् ? प्रमाणतोऽर्थप्रतिपत्तौ सत्यां प्रवृत्तस्य प्रमातुस्तदितरप्रतिलम्भात् । प्रमायाश्च तत्कार्यत्वात् । तदिदमुक्तम्—**प्रवृत्तिसामर्थ्यादिति** । तदेतस्मात् प्राधान्याद् विवक्षाभेदेन त्रिवर्गद्वयात् प्रागुद्देशः प्रमाणस्येति । एतेन यदाहु**रेके** यदि प्राधान्यात् प्राथम्यं तत् प्रमेय-
14/tha स्यैव । अथोपायत्वात् तत् संशयादीनाम्, तेषां प्रमाणोपायत्वात् । कस्माच्च प्रमात्रादिभ्यः प्राथम्यं प्रमाणस्येति ? तन्निरस्तं भवति, प्रमाणोपायानामपि संशयादीनां प्रमाणाधीनत्वादिति । नन्ववगतम्, अर्थपदतया हेयादिचतुर्वर्गो दर्शित इति; प्रमाणादिचतुर्वर्गस्तु कथं दर्शित इति पृच्छति—**कथं पुनरिति** । उत्तरं **प्रमाणप्रमेयाधिगतय** इति । § 27

तदेवं तात्पर्यं व्याख्यायावयवार्थं व्याख्यातुमुपक्रमते—**तदिदं वाक्यमवयवश उपन्यस्य वर्ण्यते** व्याख्यायतेऽवयवश इति । *तत्रास्यावयवेषु व्याख्यातव्येषु प्राथम्यात् प्रमाणत इति विवृणोति—**तत्रेति** । विभजते—**प्रमाणत इतीयं निमित्तपञ्चमी** । *निमित्तपञ्चमी चेत् कस्मात् प्रमाणादिति

१८ *] चार्य्यमान° nvt-C
२५ म्यं] ततः nvt-J
२६ त्वात्] ततः nvt-C
२६ स्माच्च] कस्मात् nvt-C
३२ *] तत्रावयवेषु nvt-C
३४ *] निमित्तपञ्चमीति पतितम् nvt-C

नाभिहितमित्यत आह—अस्येति । प्रमाणत इत्येवंरूपस्याभिधानं वचनव्याप्त्यर्थं विभक्तिव्याप्त्यर्थं चेति । वचनव्याप्त्यर्थमिति मृष्यामहे न तु विभक्तिव्याप्त्यर्थमिति, पञ्चमीव्यतिरेकेण तसेरभावादित्याह—कथं पुनरिति ? परिहरति—लभ्यत इति । व्याप्तेः प्रयोजनं पृच्छति—किं सिद्धं भवतीति । उत्तरं वचनव्याप्त्या संप्लवो व्यवस्था च । तदुभयं विभजते—प्रमाणेनेति । यत्र द्वयोर्बहूनां वा संप्लवः प्रमाणानां तत्रैकैकस्याप्यस्ति प्रतिपत्तिसाधनत्वं प्रमाणस्येति कथयितुं संप्लवावसरेऽपि प्रमाणेनेत्युक्तम् । अत एव व्यवस्थायामेवकारः प्रमाणेनैवेति । विभक्तिव्याप्तेः प्रयोजनमाह—विभक्तिव्याप्त्या हेतुकरणभावः । गम्यते इत्यनुषज्यते । तद्विभजते—प्रमाणादर्थाधिगतिर्भवतीति हेतुत्वं गम्यते । प्रमाणेनार्थाधिगतिर्भवतीति करणरूपोऽर्थो गम्यत इति संबन्धः । कस्मात् पुनः करणार्थो गम्यत इत्यत आह—प्रमाणेनेति । अर्थमर्थाधिगतिं साधयतीति साधकतमत्वात् । अत्र च करणभावनान्तरीयकस्य हेतुभावस्य पञ्चम्या अभिधानं प्रमाणफलयोस्तादात्म्यप्रतिषेधार्थम्, भेदाधिष्ठानत्वाद्धेतुफलभावस्य । न खलु परशुरेव छिदेति । प्रमाणप्रातिपदिकलब्धकरणत्वानुवादश्च प्रमाकारका न्तरेभ्योऽभ्यर्हितत्वेनास्य व्युत्पाद्यत्वं 15/tha च प्राथम्यं च युक्तमिति दर्शयितुम् । संप्लवमाक्षिपति—संप्लवेति । समाधत्त—नेति । § 28

आक्षेपं विभजते—स्यान्मतिरिति । विशिष्टो भिन्नो विषयो येषां तानि तथा । बहुवचनमान्तर्गणिकभेदाभिप्रायम् । अर्थसामर्थ्यसमुत्थं हि प्रत्यक्षमर्थगोचरम् । स एवार्थः । प्रत्यक्षगोचरो यो ज्ञानप्रतिभासमात्मनोऽन्वयव्यतिरेकावनुकारयति । न च सामान्यं निरस्तसमस्तार्थक्रियासामर्थ्यमेवं भवितुमर्हति । स्वलक्षणं तु स्यात् । *तदेव हि परमार्थसत्, अर्थक्रियासामर्थ्यलक्षणत्वाद् वस्तुनः । एतदेवास्य स्वमसाधारणं लक्षणं यद्देशतोऽननुगमेनादेशात्मकस्य परमाणुत्वम्, कालतोऽननुगमेन च क्षणिकत्वम् । तस्मात् स्वलक्षणविषयं प्रत्यक्षम् । न च स्वलक्षणमनुमानस्यापि गोचरः । तद्धि गृहीतप्रतिबन्धलिङ्गहेतुकम् । प्रतिबन्धश्च तादात्म्यतदुत्पत्तिलक्षणः स्वलक्षणविषयोऽशक्यग्रह इति सामान्यधर्मावाश्रयते । न च सामान्यमेकमनेकदेशकालावस्थासंसर्गि भवितुमर्हति । तदिदमनादिवासनोद्भूतविकल्पाधिष्ठानं विकल्पाकारस्य वा अलीकस्य वा बाह्यत्वमनुमानगोचरोऽभ्युपेयम् । तच्च भावाभावसाधारण्याच्च बाह्यसादृश्याच्च नियतप्रतिभासत्वाच्चान्यव्यावृत्तिनिष्ठम् । यत् खलु भावाभावसाधारणम्, तदन्यव्यावृत्तिनिष्ठमेव यथा अमूर्तत्वम् । तद् विज्ञानादौ भावे शशविषाणादौ चाभावे साधारणम् । भावाभावसाधारणश्च विकल्पगोचरोऽस्ति *घटो नास्ति घट इति । यदि पुनरसाधारणो भावो भवेद् अस्तिशब्दो न प्रयुज्येत, पुनरुक्त-

---

२२ *] °देव परमा°nvt-C
२४ स्व] परमार्थत्वम्nvt-C
२९ वा] स्वमनुमा°nvt-C
३१ म्] °त्तिरूपम्nvt-J
३३ *] घटोऽस्ति नास्तिnvt-C

त्वात् । नास्तीत्यपि न वक्तव्यं विरोधात् एवमभावासाधारण्येऽपि वाच्यम् । न चालीकस्य सर्वसामर्थ्यविरहिणः परमार्थसत्ता स्वलक्षणेन सादृश्यं मन्यतेऽन्यव्यावृत्तेः । न च गौरिति नियतौ बुद्धिव्यपदेशौ विनाश्वादिव्यावृत्तिम् । तस्मात् सामान्यमन्यव्यावृत्तिरूपमबाह्यं बाह्यभेदाग्रहाद् बाह्यत्वेनावगाह्यमानमनुमानं बाह्ये प्रवर्तयति । पारम्पर्येण च बाह्यप्रतिबन्धाद् बाह्यं प्रापयत्
16/tha संवादकं सद् भ्रान्तमपि प्रमात्राश्रयवशात् प्रमाणम् । तदस्य न स्वलक्षणं गोचरः । प्रत्यक्षमपि न सामान्यगोचरमित्यावेदितम् । न चाभ्यामन्यत् प्रमाणमस्ति, प्रमाणस्य सतोऽत्रैवान्तर्भावात् । अनन्तर्भावे वा प्रमाणत्वानुपपत्तेः । न च सामान्यविशेषाभ्यामन्यदस्ति प्रमेयान्तरं यत्रैते संप्लोष्येते इत्यर्थः ।

§ 29

समाधानवाक्यं विवृणाति—एतच्च नेति । यथा चैतत् तथा तत्र तत्र निवेदयिष्यते । विशेषो व्यवच्छेदकः । स च वक्रकोटरादिरन्त्यश्च । व्यवस्थासङ्करोदाहरणान्याह—इन्द्रियवदिति । संप्लवममृष्यमाण आह—अधिगतत्वादिति । समाधत्ते—नान्यथेति । आक्षेपं विवृणोति—यदीति । स्यादेतत् । नास्ति वैयर्थ्यमधिगतीनामाशुतरविनाशितया तद्गोचराधिगत्यन्तरोत्पादं प्रति प्रमाणान्तरस्यार्थवत्त्वादित्यत आह—अधिगतं चार्थमधिगमयता प्रमाणेनेति । यद्यप्यधिगतय आशुतरविनाशिन्य स्तथाप्येकतरप्रमाणजनितार्थाधिगतिलब्धजन्मनः संस्कारादेव स्थायिनस्तदर्थस्मृतिसन्ततिसंभवाद् अधिगतमर्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यादिति । समाधिवाक्यं विवरीतुमनुवदति—नान्यथेति । विवृणोति— न ब्रूम इति । अयमभिसन्धिः, न हि प्रमाणकारणानि प्रेक्षावन्ति, येनैवमालोचयेयुः—*जनितमेव प्रमाणमन्यतमेनास्मासु, वयमिहोदास्मह इति । नापि स्वकारणबललब्धजन्मानि प्रमाणानि दर्शितोऽयमर्थोऽन्यतमेन चास्मासु प्रमाणेन । कृतमस्माभिरिति विरन्तुमर्हन्ति । प्रमातुश्चेतनत्वादयमनुयोग इति चेत्—न, प्रियतमस्य वस्तुनोऽनेन भूयो भूयः प्रमित्सितत्वात् । अप्रमित्सितस्यापि च दुर्जनवचनादेः प्रमेयस्यानेन प्रमीयमाणत्वात् । तस्मान्न प्रमात्रभिसन्धानात् प्रमाणस्य प्रवृत्तिरप्रवृत्तिर्वार्थे किं तु सामर्थ्यात् । अन्यथाग्निदाहादिदुःखस्याप्रत्यक्षत्वप्रसङ्गः ।

§ 30

यत्तु प्रमाणं प्रमित्साधीनप्रवृत्ति तद्यदि प्रमाता न व्यापारयेत् किमायातं प्रमाणस्य ? न हि तोयमपि पिपासुना न पीयत इति, तस्य पिपासोप-
17/tha शमनशक्तिर पैति । तस्मात् प्रत्युत्पन्नकारणसामग्रीजनिता बुद्धिः प्रमा । तज्जनकानि च प्रमाणानि समानविषयाण्यपि । स एव चानेन सामग्रीभेदः प्रदर्शितः । *अन्यथा तु प्रत्यक्षेणेत्यादिना । यद्यपि साक्षात्कारासाक्षात्कारादिरपि प्रकारभेदोऽस्ति, तथाप्यसौ प्रकृतानुपयोगान्नोक्तः । यदि च द्रव्यं त्वचा

१ न ] स्यात्nvt-J
७ रः ] स्वलक्षणगोचरत्वम्nvt-J
१४ विवृणोति ] विभजतेnvt-C
२१ * ] यज्जनित°nvt-C
२२ नापि ] °कारणलब्धजन्मा°nvt-C
३१ स्मात् ] प्रत्यक्षका°nvt-C
३३ * ] अन्यथा प्रत्य°nvt-J

गृहीतमिति कृतं चक्षुषा, चक्षुषा वा गृहीतमिति कृतं त्वचेत्युच्येत, न रूपविज्ञानं वा स्पर्शविज्ञानं वोपजायेत । *तेन तदर्थं चक्षुर्वा त्वग्वाभ्युपेतव्यम् । तथा च संप्लववैयर्थ्येऽपि व्यवस्थायां न वैयर्थ्यमित्याह— विषयान्तर इति । प्रकृतमुपसंहरति—तस्मादिति । § 31

विभक्त्यर्थं निरूप्य प्रातिपदिकार्थनिरूपणमवतारयति—प्रमाणेति । *अत्र चावधार्यतेऽनेनेत्यवधारणं विचार इति । विचारणाय भावभवितारौ पृच्छति—किं पुनरिति । *केचिदाहुः, अनधिगतार्थगन्तृ प्रमाणमिति । विषयसारूप्यं साकारस्य विज्ञानस्येत्यन्ये । विज्ञानस्यैवानाकारस्यात्मानात्मप्रकाशनसामर्थ्यमित्यपरे । उपलब्धिसाधनमिति वृद्धाः । तस्माद् विप्रतिपत्तेः संशयात् प्रश्नः । भावप्रश्नव्याख्यानेन भवितृप्रश्नो व्याख्यातः । उत्तरम्—उपलब्धिहेतुः प्रमाणम् । न च संशयविपर्यासरूपोपलब्धिकारणयोः प्रसङ्गः, अर्थवदित्यधिकारात् । तयोश्चोपदर्शितार्थव्यभिचारेणानर्थवत्त्वात् । नो खलु विकल्प्यमानं वस्त्वस्ति, अर्थक्रियासु वोपयुज्यते । § 32

स्यादेतत् । स्मृतिहेतोरपि प्रामाण्यप्रसङ्गः । न ह्यसौ नोपलब्धिहेतुः ।
न चार्थसहकारि प्रमाणमिति संस्कारस्यार्थसहकारिताविरहादप्रमाण्यमिति
साम्प्रतम्, नदीपूरस्य पिपीलिकाण्डसंचरणस्य चातीतानागतवर्षलिङ्गस्य श-
ब्दस्यातीतानागतगोचरस्यार्थसहकारिताविरहिणोऽप्रमाणत्वप्रसङ्गात् । ज्ञाप-
कत्वेन कार्यत्वेन वा कथञ्चिदर्थसंबन्धे संस्कारस्यापि तत् समानमिति त-
स्यापि स्मृतिरूपोपलब्धिहेतोः प्रामाण्यं प्रसक्तम् । मैवम्, प्रमाणशब्देन त-
स्यापास्तत्वात् । प्रमासाधनं हि प्रमाणं न च स्मृतिः प्रमा । लोकाधीनावधार-
णो हि शब्दार्थसंबन्धः । लोकश्च संस्कारमात्रजन्मनः स्मृतेरन्यामुपलब्धिम- 18/tha
र्थाव्यभिचारिणीं प्रमामाचष्टे । तस्मात् तद्धेतुः प्रमाणमिति न स्मृतिहेतौ प्रसङ्गः
। अनधिगतार्थगन्तृत्वं च धारावाहिकविज्ञानानामधिगतार्थगोचराणां लोकप्र-
सिद्धप्रमाणभावानां प्रामाण्यं विहन्तीति नाद्रियामहे । न च कालभेदेनान-
धिगतगोचरत्वं धारावाहिकानामिति युक्तम्, परमसूक्ष्माणां कालकलाभेदानां
पिशितलोचनैरस्मादृशैरनाकलनात् । न चाद्येनैव विज्ञानेनोपदर्शितत्वादर्थ-
स्यप्रवर्तितत्वात् पुरुषस्य प्रापितत्वाच्चोत्तरेषाम्, अप्रामाण्यमेव विज्ञानानामिति
वाच्यम् । न हि विज्ञानस्यार्थप्रापणं प्रवर्तनादन्यत्, न च प्रवर्तनमप्यर्थप्र-
दर्शनादन्यत् । तस्मादर्थप्रदर्शनमात्रव्यापारमेव ज्ञानं प्रवर्तकं प्रापकं च ।
प्रदर्शनं च पूर्ववदुत्तरेषां विज्ञानानामभिन्नमिति कथं पूर्वमेव विज्ञानं प्रमाणं
नोत्तराण्यपि पुरुषापेक्षया तु प्रामाण्ये चन्द्रतारकादिविज्ञानस्य पुरुषानपेक्षित-
स्याप्रामाण्यप्रसङ्गः । न चातिदवीयस्तया तदर्थस्य हेयतया तदपि पुरुष-
स्यापेक्षितम्, तस्योपेक्षणीयार्थविषयत्वात् । न चोपेक्षणीयमप्यनुपादेयत्वाद्धेय-

२ *] तदर्थं॰ चक्षुस्त्वक् चाभ्युपेतेnvt-C
६ *] अत्र चेति नास्तिnvt-C
७ *] मीमांसकाः
७ न्तृ] ॰तार्थबोधनं॰nvt-J
८ न्ये] सौत्रान्तिकाः
९ रे] वैभाषिकादयः
९ वृद्धाः] नैयायिकादयः ।
१२ त्वात्] ॰कत्वात्nvt-C

मिति निवेदयिष्यते । उपलब्धिहेतुं च प्रमाणं वदता अनधिगतार्थगन्तृत्वं चार्थसारूप्यं चात्मानात्मप्रकाशनशक्तिश्च प्रमाणमिति निरस्तानि भवन्ति, उपलब्धिमात्रस्यार्थाव्यभिचारिणः स्मृतेरन्यस्य प्रमाशब्देनाभिधानात् । हेतुग्रहणेन सारूप्यशक्त्योः फलादभिन्नयोरपाकरणात् हेतुहेतुमद्भावस्य तादात्म्येऽनुपपत्तेरिति । उपलब्धिहेतुत्वं च प्रमाणत्वम् । भवितृव्याख्यानेन भावो व्याख्यातः । तदेवं ज्ञानमज्ञानं वा उपलब्धिहेतुः प्रमाणम् । तस्य भावस्तत्त्वमिति स्थितम् । § 33

तदेतदतिव्यापकत्वेनाक्षिपति—समानत्वादिति । समाधत्ते—अयं विशेष इति । अयमर्थः, सर्वः कर्ता करणगोचरव्यापारो न तु साक्षात् फले व्याप्रियते । करणं च द्विधा सिद्धमसिद्धं च । तत्र सिद्धं परश्वादि दारुद्वैधीभावायोद्यम्योद्यम्य दारुणि निपातयन् दारु च्छिनत्तीत्युच्यते, न तु साक्षात् कर्तृव्यापारगोचरो दारुद्वैधीभावः, किं तु स्पर्शवद्वेगवतः करणीभूतस्य परशोः संयोगस्योद्यमननिपातनलक्षणस्तु कर्तृव्यापारः परशुगोचर एव । 19/tha एवं स्वर्गकामोऽपि कर्ता न साक्षात् स्वर्गे व्याप्रियते, किं तु तत्करणं यागमसिद्धं साधयति । स्वर्गस्तु यागव्यापारादेवापूर्वाभिधानात् चेतनाश्रयाद् देशकालावस्थाभेदासादितपरिणतिविशेषात् साक्षादुत्पद्यते । तद्वदिहापि प्रमाणसिद्धमिन्द्रियादि, असिद्धं च तत्सन्निकर्षादि व्यापारयन्नुत्पादयन् वा करण एव चरितार्थः । करणं त्विन्द्रियादि तत्सन्निकर्षादि वा नान्यत्र चरितार्थमिति साक्षादुपलब्धावेव फले व्याप्रियते । प्रमेयस्य तु प्रत्यक्षादन्यत्रोपलब्धिहेतुभाव एव तावन्नास्ति, केवलं प्रमाणविषयभावमात्रेणोपयुज्यते । यत्राप्यस्य हेतुभावः प्रत्यक्षेऽभिप्रेयते, तत्रापीन्द्रियसंबन्धमात्रे उपयुज्यते प्रमेयम् । इन्द्रियमेव तु तत्सन्निकर्षादि वा साक्षात् प्रमाहेतुः । ततः सिद्धमेतत् न प्रमाता साक्षात् प्रमाहेतुः कर्तृत्वात् । यो यः कर्ता स सर्वो न साक्षात् फलहेतुः, यथा व्रश्चनयजमानादिः तथा चायम् । तस्मात् तथा । तथा प्रत्यक्षं प्रमेयं न साक्षात् प्रमाहेतुः प्रमेयत्वात् । यद् यत् प्रमेयं तत्तत् सर्वं न प्रमाहेतुरनुमेयादिवत् । तथा चैतत् । तस्मात् तथेति । तदिदं प्रमातृप्रमेययोः प्रमाणे चरितार्थत्वमचरितार्थत्वं च प्रमाणस्य, तस्मात् तदेव फलहेतुः । प्रमातृप्रमेये तु फलोद्देशेन प्रवृत्ते इति तद्धेतू कथञ्चिदिति । चोदयति—अकरणेति । नाकरणः कर्ता प्रमाणमपि व्याप्तुमर्हतीत्यर्थः । परिहरति—न, इन्द्रियार्थेति । *यदा ज्ञानं प्रमाणं तदा ज्ञानस्य प्रमाणस्योत्पत्तावित्यर्थः । पुनश्चोदयति—यदि तर्हीति । परिहरति—तस्मिन्नपीति । चोदयति—यदि प्रमातृप्रमेयाभ्यां सद्भ्यां प्रमाणमिति । प्रमाणमन्तरेण प्रमाया अभावात् प्रमातृप्रमेययोरसिद्धिरित्यर्थः । पृच्छति—कथमिति । उत्त-

१७ च ] वाnvt-J
१८ वा ] वेति नास्तिnvt-C
२२ वा ] °र्षादिनाnvt-C
२४ था ] व्रश्चनः । यथा वा यज°nvt-C
२४ था ] चायमिति नास्तिnvt-C
२५ क्षं ] प्रमेयेnvt-C
२६ थेति ] चैतत्तथाnvt-C
३० * ] यदिnvt-C

रं—प्रमाणमितीति । अथ स्वरूपमात्रमेव कारकं कस्मान्न भवति, तच्च क्रियासंबद्धस्य पुरस्तादप्यस्तीत्यत आह—न च द्रव्यमात्रमिति । अस्तु तर्हि तदीयोऽवान्तरव्यापारः प्रधानक्रियायां साध्यायां कारकम्, तस्यापि प्रधान-क्रियायां निमित्तत्वादित्यत आह—न च क्रियामात्रम् । न हि स्वरूपेण देव 20/tha दत्तो व्रश्चनः, नापि तदीयो व्यापार उद्यमननिपातनादिर्लोष्टाद्याश्रयः । क्व तर्हि कारकशब्दः प्रवर्तत इत्यत आह—कारकशब्दो हीति । प्रधानक्रियासाधने हेतौ अवान्तरक्रियाविशेषयुक्ते कारकशब्दः प्रवर्तते । *द्वैधीभावे हि फले प्रधानव्यापारे कर्तुः करणगोचर उद्यमननिपातनादिरवान्तरव्यापारः । क-र्मणश्च दारुणः स्पर्शवद्वेगवत्तीक्ष्णतरकुठारसंयोग एवावान्तरव्यापारः । तेन हि दारु स्वावयवपरिस्पन्दलब्धजन्मनोऽवयवविभागाद् द्वैधीभावमनुभवति । *तस्मादवान्तरप्रधानव्यापारसंपन्नं कारकमिति सामान्यतः प्रसाध्य प्रकृते योजयति—प्रमातृप्रमेयशब्दौ चेति । तावन्तरेण क्रियां प्रधानक्रियामित्यर्थः । परिहरति—न, पाचकादिशब्दवदिति । लोकाधीनावधारणः खल्वयं शब्दार्थ-संबन्धः । लोकश्चातीतानागतवर्तमानक्रियासंबन्धमात्रविवक्षया कारकशब्दान् प्रयुङ्क्ते, पाचकमानय पक्ष्यतीति च, पाचकोऽयमपाक्षीदिति च, पाचकोऽयं पचतीति च तुल्यवत् त्रैकाल्यविषयप्रयोगदर्शनम् । तत् कस्य हेतोरपचत्यपि पाकसंबन्धं प्रत्यस्ति स्वरूपशक्तिर्देवदत्तादाविति ? द्वयी हि शक्तिः कार-काणां कार्यजननं प्रति स्वरूपं च सहकारिग्रामसमवधानं च । तत्रासत्यपि सहकारिग्रामसमवधाने कारकशब्दानां प्रवृत्तेः, सत्यपि च स्वरूपे त्रैकाल्य-व्यापिनि त्रैकाल्ययोगिकार्यासंभवेऽप्रवृत्तेः त्रैकाल्ययोगिकार्योपहितमर्यादमेव स्वरूपं कारकशब्दानां प्रवृत्तौ निमित्तमिति । असत्यपि प्रत्युत्पन्नप्रमाहेतुप्र-माणसंबन्धे प्रमातृप्रमेयशब्दयोः प्रवृत्तिरिति उपपन्नं प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति । तत् प्रमाणमुपलब्धिसाधनं साक्षात्, न प्रमातृप्रमेये इति सिद्धम् । § 34

सत्यपि चोपलब्धिसाधनत्वे प्रमातृप्रमेययोरुपलब्धिहेतुरित्यत्राप्रसङ्गः, साधकतमासाधकतमयोः साधकतमे कार्यसंप्रत्ययात् सातिशयत्वेनोद्भूतत्वात् तस्येत्याह—साधकतमत्वाद् वेति । साधकतमार्थं पृच्छति—कः पुनरिति ।

उत्तरम्—प्रमाणस्य भावाभावयोः प्रमायाः कार्यस्य तद्वत्ता । भावाभावव- 21/tha त्ता साधकतमार्थः । लक्ष्यलक्षणयोरभेदविवक्षया सामानाधिकरण्यम्, न तु प्रमातृप्रमेयान्वयव्यतिरेकानुविधानमप्यस्ति प्रमाया अन्वयव्यतिरेकयोरित्यत आह—न प्रमातरीति । प्रमातृप्रमेयाभ्यां सह प्रमोत्पादस्यान्ययोगव्यवच्छेदेन संबन्धः । प्रमाणेन तु संबन्धः प्रमोत्पादस्यायोगान्ययोगव्यवच्छेदाभ्यामित्य-

१ अथ] °पमेवnvt-C
३ म्] क्रियायां कारणम्nvt-C
७ *] °भावो हि फलं प्रधानंnvt-C
८ र] °निपातनेnvt-C
१० विभागाद्] °स्पन्दजन्मनावयवविभागंnvt-C
११ *] °वान्तरव्या°nvt-C
१९ पि] °कारिसमव°nvt-J
२० वृत्तेः] °वे प्रवृ°nvt-C
२५ ङ्गः] °रित्यप्र°nvt-C
२६ यात्] °तमे संप्र°nvt-J
३० माया] °मप्यप्र°nvt-C
३२ माणेन] सह प्रमो° शयः ।nvt-C

तिशयः प्रमाणस्य । प्रमातृप्रमेये हि प्रमाणोपक्षीणवृत्तिनी न प्रमायां व्याप्रियेते । तेनान्तरायसंभवान्नावश्यं प्रमातृप्रमेयव्यापारे सति प्रमा भवति । प्रमाणस्य व्यापारे तु प्रमा भवत्येवेति कल्पान्तरमाह—यद्वान् वा प्रमिमीते सोऽतिशयः । प्रमिमीत इति स्वतन्त्रं कर्तारं दर्शयति प्रतिपाद्यात् करणाद् व्यवच्छेत्तुम् । यद्वानेवेति च सावधारणम् । तत्र यद्वानिति कर्त्रन्तरं व्यवच्छिनत्ति । न हि कर्ता कर्तृमान्, किं तु प्रमाणवान् । स्वतन्त्रो ह्याश्रयः परतन्त्रेणाश्रीयते । कर्त्रधीनं हि करणमित्यावेदितम् । प्रमाता प्रमेयवानपि क्वचिद् भवेत् तत्तन्त्रत्वात् प्रमेयस्य न तु प्रमेयवानेव, अनुमानादिषु प्रमेयस्यातीतत्वादिना तद्वत्ताविरहात् । न तु लिङ्गादिज्ञानवान् न कदाचिदित्यवधारणफलम् । सोऽयं विशेषः प्रमातृप्रमेयाभ्यां प्रमाणस्य । अस्यैव च विशेषस्यातिशयत्वमन्वयव्यतिरेकाभ्यामादर्शयति—प्रमाणे सतीति । कल्पान्तरमाह—सतोर्वेति । पूर्वेण भावप्रधानोऽतिशयो यादृशस्य दर्शितः, तादृशस्यैवेह व्यतिरेकप्रधानोऽतिशय इति विशेषः । अकर्तृत्वमहेतुत्वमित्यर्थः । कल्पान्तरमाह—संयोगवच्चरमभाविता वा । *सेतिकर्तव्यताकं हि व्याप्रियमाणं करणम्, न तु चक्षुरादिस्वरूपम् । करणादिशब्दप्रवृत्तिनिमित्तमात्रं तु स्वरूपं स्यादिति पूर्वमावेदितम् । तच्च सिद्धमसिद्धं वा प्रमातृप्रमेयव्यापारस्य पश्चादेव तथात्वेन संपद्यत इति चरमभावीत्युच्यते । सोऽयमस्य चरमभावितातिशयः । यथा तन्तूनां पटे जनयितव्येऽन्त्याः संयोगभेदा यदनन्तरं पट उत्पद्यत एवेति । कल्पान्तरमाह—प्रतिपत्तेरानन्तर्यं वा । यत एव प्रमाणं चरमभावि, अत एव
22/tha तदनन्तरं प्रतिपत्तेः प्रमाया भावात् । प्रतिपत्तेरानन्तर्यमेव प्रमाणस्यातिशयः । स चेति । चोऽवधारणे । इदमपि लक्ष्यलक्षणयोरभेदविवक्षयोक्तम् । कल्पान्तरमाह—असाधारणकारणता वा । चतस्रः खल्विमाः प्रत्यक्षादिप्रमितयो भिन्नबुद्धिव्यपदेशभाजोऽनुभूयन्ते । न च प्रमाता तद्भेदहेतुः, तस्य साधारण्यात् । न च प्रमेयमेकस्यापि प्रमेयस्य संप्लवे सर्वप्रतिपत्तिसाधारण्यात् । प्रमाणानि तु यथायथं चतसृष्वपि प्रमितिष्वसाधारणानीति भिन्नबुद्धिव्यपदेशनिबन्धनानि । तदिदमसाधारण्यमतिशयः अशेषः पुरुषः प्रमातात्र विवक्षितः । कल्पान्तरमाह—प्रमाकारणेति । प्रमाया असमवायिकारणं खल्वात्ममनःसंयोगः । स च सर्वप्रमासाधारणः । नासौ प्रमात्रा प्रमेयेण वा शक्यो विशेष्टुम्, तयोरपि तद्वदेव साधारण्यात् । असाधारणं तु प्रमाणं यथायथमात्ममनःसंयोगमवच्छिनत्ति । एवं सुखादिप्रमेयाणामपि मन एवसाधारणं व्यवच्छेदकं द्रष्टव्यम् । सोऽयमस्यातिशयः अतिशयातिशयिनोरभेदविवक्षया अतिशयशब्दवाच्यम् इत्युक्तम् । § 35

क्रमप्राप्तमर्थग्रहणं तात्पर्यतो व्याचष्टे—अर्थग्रहणमिति । कस्मात् पुनर्निषिध्यते प्रमाणविषया प्रतिपत्तिरित्यत आह—यतो न प्रमाणविषयेति,

१४ *] इतिक°nvt-C
१५ तु] कारणादि°nvt-C
२५ थं] °ष्वसाधार°nvt-C
२६ क्षितः] क्षित इतिnvt-J
२८ णः] संयोगः सर्व°nvt-C

इतिकर्तव्यता अनुष्ठानम्, तस्मिन् । अर्थ्यत इत्यर्थः, तोयकण्टकादिः ।
तस्य तथाभावोऽर्थनीयत्वम् । तच्च सुखदुःखसाधनत्वम् । सुखसाधनं स्व-
रूपादेयत्वेन दुःखसाधनं च हेयत्वेनार्थ्यते । तात्पर्यान्तरमाह—उपेक्षणीयेति
। उपेक्षणीयविषये प्रमाणे प्रवृत्तिसामर्थ्यं नास्तीति तत्प्रतिषिध्यते । न च
तदप्रमाणमिति । *तस्यापि दृष्टप्रमाणसाधर्म्येण लिङ्गेन प्रामाण्यानुमानादिति
। चोदयति—प्रमाणाग्रहणमिति । समर्थप्रवृत्तिजनिका हि प्रतिपत्तिर्नाप्र-
माणाद्भवतीत्यर्थादेव प्रमाणादिति गम्यत इत्यर्थः । परिहरति—न प्रमाण-
विशेषज्ञापनार्थत्वात् । अयमभिसन्धिः, प्रवृत्तिसामर्थ्येन हि कार्येण प्रमाण-
स्यार्थवत्त्वमनुमातव्यम् । न चैतत् साक्षात् प्रमाणस्य कार्यम्, किं त्व- 23/tha
र्थप्रतिपत्तेः । तदनन्तरं हि समर्था प्रतिपत्तिरुपजायते । अर्थप्रतिपत्तिस्तु
प्रमाणकार्येति समर्था प्रवृत्तिः प्रमाणकार्या सती प्रमाणस्यार्थवत्त्वमनुमापय-
ति । तस्मादर्थगम्यमपि प्रमाणमर्थप्रतिपत्तिकरणत्वेन द्योतनीयम् । अन्यथा
प्रमाणमर्थवदर्थप्रतिपत्तेः समर्थप्रवृत्तिजनकत्वादिति किं केन संगतम् ? प्र-
माणस्य विशेषः प्रमाणाभासाद् व्यावृत्तिः । तस्य ज्ञापनम् । स एवार्थो
यस्य प्रमाणग्रहणस्य तत् तथोक्तम् । तस्य भावस्तत्त्वम् । तस्मादेतदुक्तं
भवति—प्रमाणकार्याया अर्थप्रतिपत्तेः प्रवृत्तिसामर्थ्यं न तदाभासकार्यायाः ।
तस्मात् प्रमाणस्यार्थवत्त्वं गम्यत इति । तदिदमुक्तम्—तद् येह प्रमाणेन
प्रतिपत्तिः सा प्रवृत्तिसामर्थ्यं प्रतिपादयति प्रमाणम् । अयमर्थः । प्रमाणं
कर्तृ, प्रवृत्तिसामर्थ्यं प्रतिपद्यमानं प्राप्नुवत् तत् प्रतिपादयति प्रापयति प्र-
माणकार्यार्थप्रतिपत्तिरिति । इदमपि प्रमाणग्रहणस्य प्रयोजनमित्याह—न
च प्रमाणग्रहणमिति । एकदेशिव्याख्यानमुपन्यस्यति—सुखेति । न केव-
लं सुखदुःखहेतुत्वादर्थ्यमानत्वात्, ज्ञायमानत्वाच्च । दूषयति—नेति । सर्वस्य
सुखदुःखतद्धेतुत्वेन हेयपक्षनिक्षेपात् । उपादेयानां प्रमाणशास्त्रापवर्गाणाम-
भावप्रसङ्गाद् व्याघातः । अविवक्षितत्वाच्चेति । चशब्दसमुच्चितमशक्यहानत्वं
हेत्वन्तरमादर्शयति—न च प्रमाणादिहानमिति । सुखदुःखतद्धेतवो हि हेयाः
सन्तो हानोपायमपेक्ष्यन्ते । न च प्रमाणादेरन्यस्तदुपायः संभवति । न
च प्रमाणादिः स्वोच्छेदाय पर्याप्तः । न चास्मादपवर्गो नाधिगम्यते । त-
स्मान्न शक्यं प्रमाणादिना प्रमाणहानमिति । न चैतन्निःश्रेयसहेतुं शास्त्रं
प्रणयतः सूत्रकारस्य तदनुवर्तिनो वा भाष्यकारस्य विवक्षितमित्याह—न
च प्रमाणादिहानं विवक्षितम् । तस्मादस्मद्व्याख्यानमेव शोभनमित्याह—
किं त्विति । *प्रवृत्तिसामर्थ्याधानयोग्यत्वमधिकारः । तस्मात् सुखदुःखत-
द्धेतुरूपार्थप्रतिपत्तिरेव हि समर्था प्रवृत्तिमाधत्ते । न त्वर्थमात्रप्रतिपत्तिरित्यर्थः

३ ते] °नार्थ्यंnvt-J
५ *] समर्थस्यापिnvt-C
१२ ति] °वत्त्वं प्रमापयतिnvt-C
१५ स्य] °माण ग्रहणस्येत्याद्यर्थप्रतिपत्तेरित्यन्तो भागो भ्रष्टःnvt-J
२२ त्वात्] °दर्यमाण°nvt-J
२२ त्वाच्च] ज्ञायमान°nvt-C
३१ *] वृत्तिसा°nvt-C

। न केवलं व्याघाताशक्यहाना विवक्षितत्वैरर्थपदेन न सर्वसंग्रहोऽशक्य- 24/tha त्वादपि न सर्वसंग्रह इत्याह—न संविद इति । सुखदुःखतद्धेतुतया न संविद ग्रहणं संग्रहः सर्वमध्यपतितायाः अपि । कुतः ? अनधिकारात्, सुखदुःखतद्धेतुयोग्यताविरहात् । नाप्यर्थ्यमानत्वेन संग्रह इत्याह—अकर्मत्वाच्च । न तावत् सर्वा एव संविदः संविद्गोचरा मनोयोनयः संवेद्या भवितुमर्हन्ति । एकनीलविषयसंवित्परम्परामात्र एव पुरुषायुषसहस्रपर्यवसानात् विषयान्तरसंचाराभावप्रसङ्गाच्च । तस्मादनवस्थाभयादन्ते कस्याश्चित् संविदोऽसंवेद्यतया फलमात्रत्वमभ्युपेयम् । तथा च सा नार्थ्यते । न च सुखदुःखे तद्धेतुरिति न सर्वसंग्रहः संविदोऽसंग्रहादित्यर्थः । § 36

तदेवमादिवाक्यं व्याख्याय भाष्यव्याख्यान्तरमवतार्य तत्रैकदेशिव्याख्यानं दूषयितुमुपन्यस्यति—सोऽयं प्रमाणर्थ इति । दूषयति—न उभयस्यापि परिसंख्यातत्वात्, अर्थस्तु सुखमित्यादिना भाष्यग्रन्थेन । कार्यकारणाभ्यामुभयत्वम् । प्राणभृद्भेदस्यापरिसंख्येयत्वादिति च हेतुः, श्वेतः प्रासादः काकस्य कार्ष्ण्यादितिवन्न प्रतिज्ञार्थेन सङ्गच्छत इत्याह—प्राणभृद्भेदस्य चेति । तदेतदेकदेशिमतदूषणमस्मिन् व्याख्याने नास्तीत्याह—नार्थशब्दस्येति । चन्दनादिविषयं प्रमाणं सुखप्रयोजनमेव । कण्टकादिविषयं च प्रमाणं दुःखोत्पादप्रयोजनमेवेत्येतदुभयं परिसंख्यातुं नियन्तुमशक्यमित्यर्थः । § 37

एवं किलात्र शङ्क्यते—सुखदुःखहेतुभावो वस्तूनां स्वाभाविको भवेन्न वा । स्वाभाविकत्वे नील इव सर्वान् प्रत्यर्थः सुख इति करभवन्मनुष्याणामपि कण्टकः सुखः स्यात् । एवं निदाघेऽपि कुङ्कुमं सुखं स्यात् । चन्दनं च हेमन्तेऽपि सुखं भवेत् । एवं तृष्णज इवापां सुहितस्यापः सुखाः प्रसज्येरन् । अस्वाभाविकत्वे त्वनादिवासनावैचित्र्यलब्धजन्मपुरुषधर्मकल्पनानुपातिनः सुखदुःखादयो न प्रमाणप्रयोजनं भवितुमर्हन्तीति । तत्रेदमुपतिष्ठते—सोऽयं प्रमाणार्थ इति । निवेदयिष्यते हि क्षणभङ्गाधिकारे यथा स्थेमभाजामपि 25/tha वस्तूनामक्रमाणामपि क्रमवत्सहकारि कारणसमवधानवशादुपजनापायधर्माणः क्रमवन्तो धर्मा भवन्तीति, तदिहापि । यद्यपि न जात्या सुखदुःखहेतुभावो भावना भवति, तथापि जातिदेशकालावस्थापुरुषभेदसहकारिसमवधानादुत्पत्स्यते सुखदुःखहेतुभावोऽव्यवस्थयेति भावः । § 38

तत् सिद्धमेतत्, प्रमाणार्थोऽनियतः अनियतप्राणभृद्भेदहेतुकत्वात् । यद्यदनियतकारणकं कार्यं तत्सर्वमनियतमेव, यथा अनियतकालमेघोदयनिबन्धनं वर्षम् । तथा चायम् । तस्माद् अनियत इति । कस्मात् पुनः प्रमात्रादिचतुर्वर्गे प्रमाणस्यैव अर्थवत्त्वमुच्येत न प्रमात्रादीनामपीति

१ देन] पदेन सर्व°nvt-C
७ ङ्गाच्च] °राभावात्nvt-J
८ ते] नार्यतेnvt-J
१० मादिवाक्यं] अनुसन्धिवाक्यंnvt-C
१३ हेतुः] °दिति हेतुःnvt-C
१५ व्याख्याने] °मस्मद्व्या°nvt-C
१९ इव] सर्व एवnvt-C
२४ ङ्गाधिकारे] न्या° सू° ३.२.१०-७
२७ ना] भावानां इति नास्तिnvt-C
३२ मुच्येत] °स्यैवार्थ उच्यतेnvt-C

आशङ्कानिवारणार्थं भाष्यमनुवदन्नेव व्याचष्टे—अर्थवति च समर्थे सम्यगर्थेऽर्थाव्यभिचारिणीति यावत्। प्रमाणेऽर्थवन्ति भवन्ति समर्थानि सम्यगर्थानि प्रमात्रादीनि। अर्थस्य तु सम्यक्त्वमिदमेव यद् यादृशः प्रमाणेनोपदर्शितस्तस्य तथात्वं न पुनरन्यथाभाव इति। यदात्वादिभाष्यवाक्येऽर्थशब्दः प्रयोजनवचनः तदैवं व्याख्यानम्—अर्थवति च प्रयोजनवति च यतःसमर्थं शक्तं प्रमाणं प्रतिपत्त्यादिक्रमेण पूर्वोक्तेन प्रयोजनं प्रति, अतः समर्थे प्रमाणे प्रमात्रादीनि अर्थवन्ति प्रयोजनवन्ति भवन्ति, यतस्तान्यपि प्रमाणवदेव समर्थानि शक्तानि प्रयोजनं प्रतीति। अत्र हेतुः अन्यतमापाय इति। तस्यार्थं व्याचष्टे—अन्यतमत्वार्थ इति। नन्वन्यतमशब्दो बहुष्वनिर्धारितविशेषमेकमाह, न तु साधकतममित्यत आह—प्रकरणात् इति। साधारणशब्दो हि प्रकरणाद् विशषे वर्तते। तद् यथा शिविकावाहनप्रक्रमे पुरुषमानयेति पुरुषशब्दो विष्टौ, तद्वदिहापि प्रमात्रादिपरिहाण्या प्रमाणस्यार्थवत्त्वाभिधाननियमप्रक्रम इति प्रमात्रादिभ्य प्रमाणस्य विशेषो वाच्य इति तत्रैवान्यतमशब्दो वर्तते। यद्यप्यर्थप्रतिपत्त्यर्थाव्यभिचारद्वारेण प्रमाणस्याव्यभिचारो गम्यते दृष्टे विषये, तथाप्यदृष्टे विषये न तज्जनितप्रतिपत्त्यव्यभिचारेणाव्यभिचारः शब्दस्य प्रमाणस्य शक्यो विज्ञातुम्, प्रतीत्यव्यभिचारस्य प्रमाणाव्यभिचारग्रहणमन्तरेणाशक्यज्ञानत्वात्। तस्माद् दृष्टा र्थस्य मन्त्रायुर्वेदस्य प्रवृत्तिसामर्थ्यावधृतार्थाव्यभिचारस्य साधर्म्यादाप्तप्रणीतत्वादग्निहोत्रादिवाक्यानां प्रमाणानामव्यभिचारग्रहणपुरःसरमेव त्रिवर्गस्याव्यभिचारग्रहणम्। न पुनरत्र त्रिवर्गस्याव्यभिचारः शक्योऽन्यतः परिच्छेत्तुम्। अदृष्टार्थविषयस्य च चतुर्वर्गस्येहार्थवत्त्वेन प्रयोजनं दृष्टार्थे सन्देहादपि व्यवहारसिद्धेः। तदिदं चतुर्वर्गे प्रमाणस्य प्राधान्यमिति। § 39 26/tha

चतुर्वर्गविभागपरे भाष्ये प्रमाता प्रथमं दर्शितः। *ततस्तस्य लक्षणमाह—प्रमाता स्वतन्त्र इति। स्वातन्त्र्यं पृच्छति—किं पुनः स्वातन्त्र्यम्, यस्याभिसंबन्धात् स्वतन्त्र इति। तत्र भाष्यकृता *प्रमातोपलक्षितो न लक्षितः। न खल्वीप्साजिहासयोर्वा प्रवृत्तौ वा स्वातन्त्र्यं प्रमातृत्वम्, अपि तु प्रमायाम्। ईप्सादिस्वातन्त्र्येण तु तदुत्तरकालभाविना प्रमायां स्वातन्त्र्यं पूर्वकालभाव्युपलक्षितम्। तेन तच्चरितमनुवर्तमानो वार्त्तिककृदुपलक्षणान्तरं कर्तृत्वोत्तरकालभाव्याह—कारकफलोपभोक्तृत्वम्। न हि सर्वः कर्ता समस्तकारकजन्यं स्वर्गादि वौदनादि वा भुङ्क्ते ऋत्विक्पाचकादिषु च व्यभिचारदर्शनात्। कारकस्य तु सतः कर्तृत्वोत्तरकालभाविनी फलोपभोक्तृता

---

५ तः ] यत्nvt-C
९ माह ] °र्धारितमेक°nvt-J
१२ रिहाण्या ] परिहारायnvt-C
१४ द्वारेण ] °पत्त्यव्यभि°nvt-C
१८ स्य ] सामान्याद्nvt-C
१९ भिचारः ] त्रिवर्गव्यभि°nvt-C
२३ * ] तत्रास्यnvt-C
२५ * ] प्रमातृत्वोप°nvt-C
२८ न्त्र्यं ] पूर्वभाव्यु°nvt-J
२९ रं ] कृत्वोत्तर°nvt-C
३० र्गादि ] °जन्यसुखादिnvt-C
३० दिषु ] ऋत्विक्षु सूपकारादिषुnvt-J
३१ नात् ] °चारात्nvt-C

कर्तृत्वनान्तरीयकतया तदुपलक्षयति, यजमानस्य राज्ञश्च प्रेषादिना तत्तद्व्यापारे कर्तृत्वात् । यथाहुरत्रभवन्तः, तदभिसन्धिपूर्वकं प्रेषणमध्येषणं वा युक्तं यत्सर्वं पच्यर्थः महाभाष्ये ३।१।२६ इति । स्वातन्त्र्यलक्षणमाह—तत्समवायो वा कारकाभिधानेन सन्निधापितां क्रियां तदितिसर्वनाम्ना परामृशति । यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वाभिधत्ते स स्वतन्त्रः कर्ता । तथा हि विक्लिद्यन्तीत्यत्र तण्डुलादयः कर्तारः, पचन्तीत्यत्र देवदत्तादयः । 27/tha तत् कस्य हेतोः ? एकत्र तण्डुलादेर्व्यापार उपात्तोऽपरत्र देवदत्ता देरिति । प्राधान्येन चाशेषकारकनिवर्त्यत्वं प्रधानक्रियायाः अवान्तरव्यापारभेदेऽपि प्रधानक्रियोद्देशेन समस्तकारकप्रवृत्तेरिति । पुरुष इति प्रकृतक्रियापेक्षम्, प्रमायाः पुरुषाश्रयत्वादिति । लक्षणान्तरमाह—तत्प्रयोक्तृत्वमितराप्रयोज्यता वा । तस्य चेतनस्य सर्वकारकाणि प्रति प्रयोक्तृत्वम्, तैश्च कारकैरप्रयोज्यता वा । अचेतनस्य तु भाक्तं कर्तृत्वं न स्वाभाविकमिति भावः । परिसमाप्तिपदार्थं व्याचष्टे—तत्त्वपरिसमाप्तिरिति । तत्त्वं हि प्रमाणव्याप्यत्वं प्रमाणव्यापारविषयत्वम् । तच्च हानोपादानोपेक्षाभिः पर्यवस्यति । पर्यवसानं परिसमाप्तिः । विनियोज्यतेति वक्तव्ये योग्यताग्रहणमीप्सितेऽपि दृष्टे वस्तुनि कुतश्चित् प्रतिबन्धात् पुरूषेणानुपात्ते मा भूत् तत्त्वापरिसमाप्तिरिति । यद्यपि हि तत् पुरूषेणानुपात्तं तथाप्युपादानयोग्यताप्रदर्शनादस्ति तत्त्वपरिसमाप्तिरिति । तत्प्रतिषेधश्चेत्यत्र तच्छब्देन हानोपादानलक्षणं विनियोगं परामृशति । § 40

किं पुनस्तत्त्वमित्यादि भाष्यं व्याचिख्यासुस्तत्त्वप्रत्ययप्रकृतेस्तदोऽर्थं पृच्छति—किं पुनरिति । उत्तरं—सदसती तत् । प्रश्नं विभजते—तस्य भावस्तत्त्वमित्यत्रेति । उत्तरं विभजते—सदसती तत् । अथ कस्मात् प्रकृतिपुरुषौ वा, पञ्चस्कन्धा वा, परं ब्रह्माद्वैतं वा, जीवाजीवास्रवादयो वा सप्त, पृथिव्यापस्तेजोवायुरिति वा चत्वारि भूतानीत्यादीनि तदो वाच्यानि न भवन्तीत्यत आह—प्रमाणविषयत्वेनाधिकारात् । सूत्रभाष्यवाक्यतद्विवरणेषु प्रमाणं प्रमाणविषयश्चाधिकृतः । न च साङ्ख्यादिसिद्धान्तभेदानुपातिनोऽर्थाः प्रमाणविषयाः । यथा चैतत् तथात्रैव निवेदयिष्यते । उपसंहरति—तस्मादिति । § 41

प्रकृत्यर्थं व्याख्याय प्रत्ययार्थं व्याचष्टे—तद्भाव इति, सदसतोर्यथासंख्यं विधायकप्रमाणविषयता सतो भावः, तत्प्रतिषेधश्चासतो भावः । सदिति विधायकप्रमाणविषयतां परामृशति । तत्प्रतिषेधेन च प्रतिषेधकं 28/tha प्रमाणमुप स्थापितम् । तेन प्रतिषेधकप्रमाणविषयत्वमेव तत्प्रतिषेध इत्य-

---

३ युक्तं ] तत्सर्वंnvt-C
८ क्रियायाः ] °क्रियाया इतिnvt-C
१२ वा ] वेति नास्तिnvt-J
१५ मीप्सितेऽपि ] दृष्टे कुत°nvt-C
२१ त् ] इतिnvt-C
२४ वा ] चत्वारीत्या°nvt-J
२६ श्चाधिकृतः ] °कृतम्nvt-C
२७ थात्रैव ] तत्रैवnvt-C, १।१।९ सूत्रं दृष्टव्यम्
३२ मेव ] तदिति नास्तिnvt-C

नेनोक्तं भवति । एतद् विभजते—तयोः खल्विति । शङ्कते—प्रमाणविषयत्वादिति । सर्वसामर्थ्यविरहेण त्वसत् सतो व्यावर्तते । यदि चासदपि प्रमाणविषयः, तर्हि नासमर्थम् । तथा च सदसतोरभेद इत्यर्थः । निराकरोति—न, अनेकान्तात् । न वयमसामर्थ्येनासतो भेदमाचक्ष्महे येनैवमुपालभ्येमहीति भावः । शङ्कां विभजते—तत्र भवेदिति । निराकरणं विभजते—तच्च नेति । गवादि चेतनम्, अचेतनं घटादीति । यदि सदसती समर्थे कुतस्तर्हि तयोर्भेद इत्यत आह—स्वतन्त्रेति । असदुपलब्धिरेव सदुपलब्धेरन्यानुपलब्धिः । ननु संयोगविभागादिषु सत्स्वपि परतन्त्रोपलब्धिकारणत्वमस्ति, तेषां संयुज्यमानविभज्यमानाद्यधीननिरूपणत्वादित्यत आह—प्रतिषेधमुखेन प्रतिपद्यते प्रतीयते । सतां केषाञ्चित् पारतन्त्र्येऽपि न निषेध्यनिषेधाधिकरणपारतन्त्र्यमित्यर्थः । § 42

संप्रति सदुपलम्भकस्य प्रमाणस्यासदुपलम्भकत्वं प्रतिपिपादयिषता भाष्यकारेण प्रदीपो दृष्टान्त उपन्यस्तः । स तु साध्यसमः, तस्यापि प्रमाणसामग्रीनिवेशादिति शङ्क्यमानोऽत्यन्तलोकप्रसिद्धतयास्य दृष्टान्तत्वं समर्थयते—प्रदीपवदिति । गोपालाङ्गना अपि हि किमत्रास्ति स्तेनोऽस्मद्धनं वा अपवरके न वेति सन्दिहानाः प्रदीपमुपादाय समन्तादवलोक्यापवरकमस्तीहास्मद्धनं नास्ति स्तेन इति सममेव निश्चिन्वन्ति, न तु स्तेनाभावनिश्चयायोपायान्तरमुपाददते । *तेनागोपालाङ्गनमा च पण्डितरूपेभ्यः सिद्धः प्रदीपो दृष्टान्तः । तदिदमुक्तम्—न ह्यसत्प्रतिपत्तावुपायान्तरमास्थीयते लोकेन । अनाश्रयणे हेतुमाह—प्रदीपेन दृश्यमाने हि घटादिकेऽर्थे स्वतन्त्रे नानेन समानजातीयं तुल्योपलम्भयोग्यतं दृश्यान्तरमस्ति । नीलपीतौ हि परस्पराभाववन्तौ, तेन नीलनिषेधे नावश्यं पीतविधिः । भावाभावौ तु परस्पराभावात्मानौ, नो खल्वभावाभावो नाम कश्चिदन्यो भावरूपात् । नापि 29/tha
भावाभावोऽन्योऽभावात् । तेन समानजातीयं दृश्यान्तरं निषेधन् दृश्यान्तराभावमेव विधत्ते प्रदीपः । तदेवं प्रदीपोपायस्य प्रतिपत्तुः प्रतीतिक्रममुक्त्वा परीक्षकाणामुपपत्तिक्रममाह—यद्यभविष्यदिति । यदि कश्चिदाशङ्केत दृश्यतामभावः प्रदीपेन भावोऽपि भविष्यतीति, तत्रैष परीक्षकाणां तर्क उपतिष्ठते—यद्यभविष्यदिति । तदेवं लौकिकपरीक्षकसंमतं दृष्टान्तमुपपाद्य दार्ष्टान्तिके योजयति—एवं प्रमाणेनापि इन्द्रियादिना सति प्रमीयमाणे इति । पूर्ववद् व्याख्येयम् । उपसंहरति—तदेवमिति । सर्वं चैतदुपरिष्टादुपपादयिष्यते । ननु यदि सदसती प्रमाणविषयौ, कस्मात् सद्भेदा इवासद्भेदा अपि सूत्रकृता नोच्यन्त इत्यत आह— तत्र तेषु सदसद्भेदेषु मध्ये स्वातन्त्र्येणासद्भेदा न प्रकाशन्त इति नोच्यन्ते । निषेध्यनिषेधाधिकरणाधीननिरूपणत्वादसद्भेदानां भावभेदतन्त्रं प्रकाशनमिति भावभेदकथनेनैवाभावभेदा अपि गम्यन्त इति

१२ त्वं ] °प्रतिपादयिष्यताnvt-C
१६ वा ] °वरकंnvt-C
१८ * ] °गोपालम्nvt-C
२१ तं ] °योग्यंnvt-C
२३ रूपात् ] भावद्वयात्nvt-C

नोक्ता इत्यर्थः । अथ वा कथिता एव येषां तत्त्वज्ञानं निःश्रेयसोपयोगि, ये तु न तथा न तेषां प्रपञ्चः अनुपयुक्तभावप्रपञ्च इव वक्तव्य इत्याह—चतुर्वर्गानन्तर्भावाद्वा भावप्रपञ्चवदभावप्रपञ्च इति । निःश्रेयसानुपयोगिनि भावप्रपञ्चे यथा चतुर्वर्गानन्तर्भावः, एवमभावप्रपञ्चेऽपीति । अथ निःश्रेयसोपयोगाभावः कुतोऽवगन्तव्य इत्यत आह—भावोपदेशादेवाभाव उपदिष्टो भवतीति । द्विविधं प्रमाणं भावोऽभावश्च । यथा कारणाभावेन कार्याभावज्ञानं यतो द्वितीयसूत्रसमुत्थानम् । प्रमेयेषु चापवर्ग एव मूर्धाभिषिक्तः । एवं प्रयोजनादिष्वपीति तत्र तत्रोहनीयमिति । उपसंहरति—अतश्चेति । § 43

तदेवं तात्पर्यं व्याख्याय अवयवार्थं व्याख्यातुं भाष्यं पठति—सच्च खलु षोडशधा व्यूढमुपदेक्ष्यत इति । अत्र प्रथमे कल्पे चशब्दोऽवधारणे, खलुशब्दः स्पष्टार्थे । सदेव षोडशधा व्यूढमुपदेक्ष्यते नासत्, तस्य सदधीनप्रकाशत्वादिति । द्वितीये तु कल्पे पारमार्थिके चः समुच्चये, खलु अवधारणे । सति षोडशधैवोपदेक्ष्यमाणेऽसदप्युपदेक्ष्यत इत्यर्थः । प्रकृत्य-
30/tha र्थं व्याचष्टे—व्यूह इति । सूत्रस्य सप्रपञ्चं तात्पर्यं व्याख्याय अवयवार्थं व्याचिख्यासुना भाष्यकारेण तासां खल्वासां सद्विधानामिति भाष्येण सूत्रमवतार्य पठितं तदस्य वार्तिककृत् तात्पर्यमाह त एते सद्भेदा इति सूत्रम् । त एते प्रमाणादयः सद्भेदा निःश्रेयसोपयोगिनो न गङ्गाबालुकादयः । तस्मात् सत्सु प्रमाणादयः षोडशैवोद्दिष्टा लक्षिताः परीक्षिताश्च । न गङ्गाबालुकादयः सन्तोऽपि निःश्रेयसानुपयोगादिति भावः । § 44

द्वन्द्वस्वरूपमाह—सर्वपदेति । द्वन्द्वपरिग्रहे तात्पर्यमन्वयव्यतिरेकाभ्यामादर्शयति—सर्व एत इति । बहुव्रीहिकर्मधारययोरसंभवात् षष्ठीसमासपरिग्रहे निग्रहस्थानस्यान्त्यपदार्थस्य प्राधान्ये विवक्षितार्थहानप्रसङ्ग इत्यर्थः । निर्देशे यथावचनं विग्रह इत्यस्य भाष्यस्य तात्पर्यमाह—यथावचनमिति । अन्योन्यनिरपेक्षाणां प्रत्येकं प्रमाहेतुभावः प्रमाणानामिति हि बहुवचनप्रयोजनम् । प्रमेयेषु तु यद्यपि प्रमेयता वास्तवी प्रत्येकमस्ति तथाप्यपवर्गहेतुभावेन प्रमेयता समुदाये समाप्यते, न तु प्रत्येकम् । आत्मादीनामन्यतमस्याप्यतत्त्वज्ञाने संसारानतिवृत्तेरिति यदेव हि निर्देशे वचनभेदस्य प्रयोजनम्, तदेव चोद्देशेऽपि, तयोरेकवाक्यत्वादिति भावः । प्रमाणादीनामिति विभक्त्यर्थव्याख्यानपरं भाष्यं पठित्वा पृच्छति—कः पुनरिति । उत्तरं—कारकाणामिति । तद्विभजते—यत्रेति । कारकार्थः प्रधानक्रिया, यदुद्देशेन सर्वकारकप्रवृत्तिः । कारकग्रहणेन च तन्नान्तरीयकतया प्रधानक्रियाप्यानीतेति विवरणे सापि दर्शिता । यद्यपि स्वस्वामिभावादावपि संबन्धेऽन्तर्गतः क्रियाकारकसंबन्धोऽस्ति संबन्धमात्रस्य क्रियागर्भत्वात् तन्नान्तरीयकत्वाच्च कारकस्य,

५ व्य ] °वगम्यतेnvt-J
८ त्र ] °ष्वपि तत्रnvt-C
११ ष्टार्थे ] स्पष्टावधारणेnvt-C
१८ त्सु ] सन्तःnvt-C
१८ यः ] षोडशधा लक्षिताnvt-C
२२ स्य ] °स्योत्तरपदा°nvt-J
२७ हि ] रिति हि°nvt-C

तथाप्यसौ न विवक्ष्यते । संबन्धमात्रमेव तु विवक्ष्यत इत्यर्थः । तत्र चोद-
यति—तत्त्वस्येति षष्ठी चानर्थिका अव्यतिरेके तदनुपपत्तेरित्यपि द्रष्टव्यम्
। तत्रानियमवाद्येकदेशी परिहरति—न, उभयथापीति । भावस्य भवित्र-
धीननिरूपणत्वाद् भावनिरूपणमेव भवितृनिरूपणमाक्षिपति । अभेदेऽपीति
। इषुस्थित्या यथा तद्भावप्रतिषेध इषोर्भावो धर्मो गतिः, तस्य प्रतिषेधः 31/tha
स्थितिः, तिष्ठतेर्गतिनिवृत्त्यर्थत्वात् । एवमत्रापि न प्रमाणप्रमेयादिमात्रमुच्यते
तत्त्वग्रहणेनापि त्वर्थान्तरं तेष्वेव यत् समारोपितं रूपमन्यथात्वमिति यावत्
तत् प्रतिषिध्यते । गतिमदिति भावप्रधानो निर्देशः । यथा द्व्येकयोर्द्विवच-
नैकवचने पा. सू. १।४।२२ इति द्वित्वैकत्वयोरिति । संख्येयविवक्षायां
तु द्व्येकेष्विति स्यात् । तेन गतिमत्त्वमर्थान्तरमिषोर्न भवतीत्यस्मिन्नर्थे इषोः
स्थितिरिति वाक्यं प्रयुज्यत इत्यर्थः । तदेतदेकदेशिमतमर्थान्तरत्वनियमवादी
दूषयति—तन्नेति । प्रमाणादिभ्योऽनर्थान्तरस्य तत्त्वस्य च इषोरनर्थान्तरस्य
गत्यभावस्य चासिद्धे । यथा च भावातिरिक्तोऽभावस्तथा क्षणभङ्गाधिकारे
निवेदयिष्यते । प्रमाणाद्यतिरिक्तं च तत्त्वमनन्तरमेव दर्शयिष्यतीति । तत्त्वस्य
ज्ञानमित्यादिभाष्यं व्याचष्टे—तत्त्वं ज्ञायमानमिति । उभयं पृच्छति—किं पुन-
रिति । तत्त्वप्रश्नस्योत्तरम्—तत्त्वमिति । निमित्तत्वं शक्तिः प्रमाणादीनाम् । सा
च द्वयी स्वरूपलक्षणा सहकारिसाकल्यलक्षणा च, अतीन्द्रियस्य सामर्थ्यस्य
नैयायिकैरनभ्युपेतत्वात् । शक्तेश्च भावत्वेन भवितृनिरूपणाधीननिरूपणत्वाद्
भवितुरपि निरूपणं भवतीत्युक्तम् । § 45

अभिमतं निःश्रेयसं ग्रहीतुं निःश्रेयसद्वैविध्यमाह—निःश्रेयसं पुनरिति ।
तत्रादृष्टं निःश्रेयसं ग्रहीतुं दृष्टमतिप्रसङ्गापादनेन दूषयति—एवं च कृत्वेति ।
सूत्रकाराभिमतं निःश्रेयसमाह—परं त्विति । एतदुक्तं भवति, यद्यपि निःश्रेय-
सपदमभिमतमात्रवाचि प्रमाणादितत्त्वज्ञानस्य च दृष्टमपि निःश्रेयसं संभवति,
तस्यैव ततः साक्षादुत्पत्तेः । तथाप्यात्मादिवाचकप्रमेयपदसमभिव्याहाराददृष्ट-
मेव निःश्रेयसमभिप्रेतं सूत्रकारस्य । तत्र च प्रमाणादितत्त्वज्ञानस्यापि पार-
म्पर्येण हेतुभावोऽस्त्येवेति । चोदयति—दृष्टमिति । दृष्टे दर्शनमेव प्रमाणम्
। अदृष्टं तु निःश्रेयसमप्रामाणिकं दर्शनाभावादित्यर्थः । परिहरति—न, 32/tha
नास्ति अर्थस्य तथाभावात् । अर्थ आत्मादिः । तस्य आगमानुमानसह-
कारिणा कारणाभावेन कार्याभावानुमानमेवात्रार्थे प्रमाणमिति भावः । ये
तु वैयात्यान्मन्येरन् पदार्थतत्त्वज्ञानमात्रमेव परनिःश्रेयसहेतुरिति, यथाहुः—
§ 46

एको भावस्तत्त्वतो येन दृष्टः, सर्वे भावास्तत्त्वतस्तेन दृष्टाः इति, तान्
प्रत्याह—यदि पुनरिति । न हि भावानां तत्त्वमन्यदतः प्रत्यक्षविषयीकृताद्

५ इषुस्थित्या ] अभेदेपीषु°nvt-J
५ इषोर्भावो ] °षेधयोर्भावोnvt-C
११ त ] प्रसज्यतेnvt-C
१३ स्य ] प्रवृत्त्य°nvt-C
१३ ङ्गाधिकारे ] ३.२.१०-१७
२५ भिप्रेतं ] °भिमतंnvt-J
३० न् ] न पदार्थ°nvt-C

रूपादिति भावः । मोक्षमाणा इति, सनि मुचोऽकर्मकस्य गुणो वा पा. सू. ७.४.५७ इति गुणाभ्यासलोपौ । न केवलं वस्तुवृत्तिः, सूत्रकारस्यापि संमतमेतदित्याह—पृथगुपदेशाच्च प्रमेयस्य प्रमाणादिभ्यः । यदि च यत्किञ्चित् प्रमेयतत्त्वज्ञानान्निःश्रेयसस्य परस्य प्राप्तिः, किमर्थमात्मादिसूत्रेण द्वादशैव प्रमेयाणि नाधिकानि न न्यूनानि चेत्यवधार्यते सूत्रकारेण ? तस्मात् तदेव साक्षादुपयोगि निःश्रेयसे न पदार्थमात्रमित्याह—प्रमेयावधारणार्थायां चोत्तरसूत्रप्रक्रियायामकुशलः सूत्रकारः स्यात् । कुतः ? प्रमेयस्य विहितत्वादाद्येन सूत्रेणेति । तस्माद् यद्युपपत्तिः यदि च सूत्रकाराभिमतमुभयथापि प्रमेयतत्त्वपरिज्ञानं परस्य निःश्रेयसस्य हेतुः । तदनेन आत्मादेरिति भाष्यं व्याख्यातम् । § 47

अथ किं तत्त्वज्ञानस्यात्मादिविषयस्यादृष्ट एव कोऽपि सामर्थ्यातिशयो यतः परनिःश्रेयसोत्पादः, मैवम् । किं तर्हि ? दृष्टैव द्वारेत्याह भाष्यकारः—तच्चैतदिति निःश्रेयसहेतुभावाभिधानस्य अनु पश्चात् उद्यते अनूद्यते । तत्त्वज्ञानोत्पादे हि शास्त्रात् तद्विषयमिथ्याज्ञानादिनिवृत्तिक्रमेणापवर्गोत्पाद इति द्वितीयसूत्रेणानूद्यते । तदेतद् भाष्यं तच्चैतदित्याद्यधिगच्छतीत्यन्तमनूद्य व्याचष्टे—हेयमिति । मिथ्याज्ञानमात्मादिषु प्रमेयेषु अविद्या तन्मूलं तृष्णा । उपलक्षणं चैतत्, द्वेषोऽपि द्रष्टव्यः । तन्मूलौ च धर्माधर्मौ ।
33/tha तदेतद्धेयम् । हानं तत्त्वज्ञानं हीयते ह्यनेनैतत् सर्वम् । तस्य प्रमाणस्य । उपायःशास्त्रम् । अधिगन्तव्यो मोक्षः । एवमवयवान् विभज्य तात्पर्यमाह—एतानीति । एतानि चत्वार्यर्थपदानि पुरुषार्थस्थानानि, न केवलं हेयाधिगन्तव्यभेदेन द्वादशभेदं प्रमेयं दर्शयतः तद्विषयतत्त्वज्ञानाय च सोपकरणन्यायाभिधानप्रमाणव्युत्पादकं शास्त्रं प्रणयतः सूत्रकारस्य संमतमपि तु सर्वेषामेवाध्यात्मविदामाचार्याणामिति भाष्यतात्पर्यमित्यर्थः । § 48

तत्र संशयादीनां पृथग्वचनमनर्थकम् इत्यादिचोद्यभाष्यं व्याचष्टे—संशयाद्यग्रहणमिति । सत्यमिति परिहारभाष्यं व्याचष्टे—न विद्येति । चोद्यं विवृणोति—संशयादय इति । परिहारं विवृणोति—न विद्येति । प्रस्थानं व्यापारः । तेषां पृथग्वचनमित्यादिभाष्यं *व्याचष्टे—तस्याः संशयादीति । न च वाच्यमस्तु विद्यात्रयमेव, कृतमान्वीक्षिक्या विद्ययेति, तस्या एव समस्तविद्यावदातीकरणहेतुत्वात् । यथा वक्ष्यति—प्रदीपः सर्वविद्यानामिति । स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणज्ञानं संशय इति भाष्यम् । तद् व्याचष्टे—तत्र तेषु संशयादिषु । संशयस्तावदिति ज्ञानमवधारणं प्रत्यय इति पर्याय इति मन्वानश्चोदयति—अनवधारणात्मक इति । न ज्ञानमात्रपर्यायोऽवधारणशब्दः । अपि तु तद्विशेषनिश्चयवचनः । किंस्विदिति दोलायमानस्योभयकोटिस्पृशः प्रत्ययस्यार्थेऽनवधारणात्मकस्यापि प्रत्यात्मं मानसेन

५ देव ] तदतेत्nvt-C
१४ शास्त्रात् ] साक्षात्nvt-C
२१ भेदं ] °विधंnvt-C
२७ * ] तद्या°nvt-J

प्रत्यक्षेणावधार्यमाणत्वादिति । परिहरति—न व्याघात इति । तत् तस्मात् उभयमिति । तत्र नानुपलब्धे इत्यादि भाष्यमवतारयितुं पृच्छति—स कथं न्यायस्येति । यदि न्यायस्याङ्गं संशयो भवेत्, सोऽपि व्युत्पाद्येतेति भावः । उत्तरम्—यस्मादिति । एतदाक्षिपति—उपलब्ध इति । पञ्चरूपश्चतूरूपो वा हेतुर्न्यायः । प्रतिज्ञाद्यवयवसमूहो वा न्यायः । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति, तस्याश्रयो विषय उपलब्ध उच्यमानो निर्णीत एव वक्तव्यः । सन्दिग्धे हि तस्मिन् हेतुः सन्दिग्धाश्रयतया असिद्धः स्यात्, यथेह नगनिकुञ्जे मयूरः केकायितापातादिति । तदापातसन्देहे अतो न निर्णीतश्चेन्नोप लब्धः । 34/tha
ततश्चोपलब्धश्चानिर्णीतश्चेति व्याहतमित्यर्थः । परिहरति—नास्ति व्याघात इति । सामान्यतः पर्वतमात्रमुपलब्धं निर्णीतम्, तद्विशेषस्तु वह्निमत्त्वादिरनिर्णीत इति । पुनश्चोदयति—एवमपीति । उपलब्धो निर्णीत इति सामानाधिकरण्यात् समानविषयत्वं दर्शयति । तथा च व्याघातः । सामान्यविशेषभेदेन तु व्याघातं परिहरन् सामानाधिकरण्यं न समर्थस इति भावः । परिहरति—न, यथा तथेति व्यपदेशादिति । सामान्यविशेषयोः सामानाधिकरण्यात् । य एव सामान्यतो निर्णीतः, स एव विशेषतोऽनिर्णीतोऽपि संभवतीति न व्याघात इत्यर्थः । एवमर्थं न्यायप्रवृत्त्यर्थम्, असन्दिग्धे न्यायप्रवृत्तेरनुपपत्तेः । न हि करिणि दृष्टे चीत्कारेण तमनुमीमते प्रेक्षावन्त इति । § 49

प्रयोजनस्वरूपप्रतिपादनपूर्वकं प्रयोजनपदप्रयोजनप्रदर्शनार्थं भाष्यमनुभाषतेअथ प्रयोजनम् । व्याख्यातुं पृच्छति—किं पुनरिति । उत्तरम्—येनेति । स्फुटतरमेवैतदित्यर्थः । पुनः पृच्छति—केनेति । एकदेशिमतेनोत्तरमाह—धर्मेति । तत्र काम इतीच्छामात्रं वोच्यते, कामिनीविषयो वा रागः ? पूर्वस्मिन् कल्पे काम इत्येवास्तु कृतं धर्मादिभिः सर्वेषामेव काम्यमानत्वात् । उत्तरस्मिन्नव्याप्तिः सरकमृगयादीनां काम्यानामसंग्रहात् । धर्ममोक्षयोरपि नास्तिकान् प्रत्यप्रवर्तकत्वम् । तस्मादयुक्तमेतदिति मन्वान आह—वयं तु पश्याम इति । सुखस्यास्या दुःखस्य हान्या विषयेण विषयिणं प्रत्ययमुपलक्षयति । असत्योरकारणत्वात्, सत्योर्वा अनर्थकत्वात् प्रवृत्तेरिति । तथापि सुखदुःखाप्तिहान्योरेव कर्तुः प्रवृत्तिप्रसङ्गो न तत्साधने, न ह्यन्यद्विजानाति इच्छति च करोति चान्यदिति घटते, अतिप्रसङ्गात् । न च फलं पुरुषप्रवृत्तिगोचरः । तत्साधनं तु तद्गोचरः, तत्साधनत्वविज्ञानात् तत्साधन एव प्रवर्तते । तन्नातिप्रसङ्ग इति चेत् ? हन्त तर्हि तत्साधनत्वज्ञानमेव प्रवर्तयति, न फलज्ञानम्, ज्ञानेच्छाप्रवृत्तीनां कार्यकारणभूतानां सामानाधिकरण्येन संप्रतिपत्तेरित्यभिप्रायेणाह—सुखदुःखसाधनभावात्तु सर्वेऽर्थाश्चेतनं प्रयोजयन्तीति । तुशब्दः फलाद् व्यवच्छिनत्ति । 35/tha
अत्रापि विषयेण विषयिणं प्रत्ययमुपलक्षयति । एतदुक्तं भवति तोयमुप-

६ यो ] °स्याश्च योnvt-C
८ न्देहे ] °तोयमनि°nvt-C
१७ हि ] प्रत्यक्षेण करिणिnvt-C
२४ म् ] °कत्वात्nvt-C
३४ अत्रापि ] विषयेण प्रत्यय°nvt-C

लभ्य तज्जातीयस्यापेक्षितसाधनतां दृष्टचरीमनुस्मरति । अथ तज्जातीयतया लिङ्गेन दृश्यमानस्यापेक्षितसाधनभावमनुमिमीते । अनुमाय च पिपासुः प्रवर्तते । तेनोपायज्ञानस्य साक्षात् पुरुषप्रवृत्तिहेतुत्वम्, फलस्य त्वीप्सिततमस्योद्देश्यतयेति सर्वं सुन्दरम् । तदाश्रयश्च न्यायः प्रवर्तते इति भाष्यं व्याचष्टे—तदिदं प्रयोजनं न्यायस्येति । आक्षिपति—क इति । समाधत्ते—उपकारकत्वमिति । यथा राजाश्रितः पण्डित इति । उपकारकत्वमेव दर्शयति—तन्मूलत्वादिति । विधिः प्रवृत्तिः । न जातु निष्प्रयोजनां काकदन्तादौ परीक्षामारभन्ते प्रेक्षावन्त इत्यर्थः । आक्षिपति—का पुनरियमिति । न्यायाश्रयत्वं प्रयोजनस्य प्रतिज्ञाय परीक्षाश्रयत्वसमर्थनमसङ्गतमिति भावः । उत्तरम्—न्यायः । तस्मान्नासंगतमित्यर्थः । नन्वेवमपि नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्त्या प्रत्यक्षादि प्रत्येकं न्यायः । न चैतत् प्रत्येकं प्रयोजनमाश्रयते । अजिहासितानुपादित्सितानामप्यजिज्ञासितानामर्थानां प्रत्यक्षादिगोचरत्वदर्शनादित्याक्षिपति—कः पुनरयं न्यायः ? समाधत्ते—प्रमाणैरिति । प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञादयः पञ्चावयवाः प्रमाणानि । तैरर्थस्य लिङ्गस्य परीक्षणं परीक्षा । परीक्षितं तु लिङ्गं पञ्चावयवोपपन्नमनुमेयप्रत्ययफलं भावयत्येव, न त्वनुमेयार्थपरीक्षा । तस्य सन्दिग्धत्वेऽपि स्वरूपेण परीक्षानास्पदत्वादिति । नन्ववयवैश्चेदर्थपरीक्षणम्, न तर्हि प्रमाणैः कार्यकारणयोरभेदाभावादित्यत आह—किमुक्तं भवतीति । न साक्षात् प्रतिज्ञादयोऽवयवा अर्थपरीक्षायामुपयुज्यन्ते । अपि तु स्वकारणतत्प्रमाणसूचनेन । तस्मात् प्रमाणानामवान्तरव्यापारः प्रतिज्ञादय इत्युपपन्नं प्रमाणैरर्थपरीक्षणम् । तदिदमुक्तम्—प्रमाणव्यापारादितीति । तस्मात् नैकैकं प्रमाणमिति । समस्तप्रमाणोपकरणत्वादेव चास्य परमत्वमित्याह—
36/tha सोऽयमिति । पञ्चावयवोपपन्नतया च *प्रत्यक्षागमाश्रितत्वम् । न तद्विरोध इति प्रदर्शनार्थं भाष्यमनुभाष्य तात्पर्यं व्याचष्टे—प्रत्यक्षागमेति । कथं पुनरनेन भाष्येणैतदुच्यत इत्यत आह—यदिहानुमानेनेति । यत् पुनरनुमानमित्यादि भाष्यं व्याचष्टे—यत्र पुनरिति । यत्र हि विरोधस्तत्र प्रमाणमूलानामवयवानां प्रतिज्ञादीनामितरेतरप्रतिसन्धानमेकवाक्यता नास्ति । प्रमाणविरोधेन योग्यताविरहिणां तत्पदार्थानां पारमार्थिकान्वयाभावादिति । तीर्थं दर्शनं तस्य प्रतिरूपकः । अदर्शनमिव दर्शयतीति यावत् । स खलु तादृशः पञ्चावयवप्रयोगो लाभपूजाख्यातिकामैः पण्डितव्यञ्जनैरुपवर्ण्यमानः प्रत्यवायाय, प्रागेव त्वपवर्गायेत्यर्थः । तदेवं समुदायतो भाष्यं व्याख्यायावयवविभागाय पठतियत् पुनरनुमानमिति । *प्रत्यक्षविरुद्धोदाह-

३ स्य] फलज्ञानस्यnvt-C
४ म्] °तयेति सु°nvt-J
७ नां] °जनेnvt-C
११ न] °तत् प्रयो°nvt-J
२३ *] प्रत्यया च प्रत्य°nvt-J
२४ इति] तत्प्रदर्श°nvt-C
२९ मिव] °मेव दर्शनं प्रतिरूपयति दर्शनमिवnvt-C
३१ प्रागेव] °मानः न प्रत्यया प्रा°nvt-C
३२ *] °विरोधोदा°nvt-C

रणमाह—अनूष्णोऽग्निरवयवी कृतकत्वाद् घटवदिति । अत्र चोदयति—कः पुनरिति । इदमत्राकूतम् रूपत्रयसंपन्नमेतत् कृतकत्वं न वा ? न चेत् तत एव तर्हि तदनुमानाभासमिति कृतं प्रत्यक्षविरोधेन । अथान्वयव्यतिरेकपक्षधर्मतासंपन्नमपि बाधितविषयतयैतदप्रमाणम् ? तदयुक्तम्, रूपत्रयसंपत्त्यां खल्वेतत् स्वसाध्येनाविनाभूतं भवति । न च बाधाविनाभावयोः सह संभवः । बाधायामपक्षधर्मो भवेत्, अनैकान्तिकश्च हेतुः । जिज्ञासितधर्मणो धर्मिणः पच्यमानत्वेन पक्षत्वम्, न पुनः प्रत्यक्षावधृतसाध्यविरुद्धधर्मस्य । तस्याजिज्ञासितत्वेनापक्षतया तद्धर्मस्यापक्षधर्मत्वान्न चैकान्तिकः । साध्यधर्मिण्येव प्रत्यक्षोपस्थापितसाध्यधर्मविरुद्धधर्मवति दर्शनेन व्यभिचारात् । न च सपक्षासपक्षावेवान्वयव्यतिरेकगम्याविनाभावदर्शनविषयौ न पक्ष इति साम्प्रतम् । यदि हि पक्षं विहाय बहिरेव सपक्षासपक्षयोरविनाभावो गम्येत, तदा बहिर्व्याप्तिमात्रबलेन पक्षधर्मोऽपि हेतुर्न पक्षे साध्यं साधयेत् । असिद्धा हि तत्रास्य स्वसाध्येन व्याप्तिः । तदेतत् पण्डकमुद्वाह्य मुग्धायाः पुत्रप्रार्थनमिव । तस्मादन्तर्बहिर्वा सर्वोपसंहारेणाविनाभावोऽवगन्तव्यः । एवं च सिद्धः पक्षेऽपि व्यभिचारः साधनधर्मस्येत्यनैकान्तिकत्वम् । तथा च 37/tha
रूपत्रयसम्पन्नो हेतुर्बाधितविषयश्चेत्यसंभवः । तस्मात् सुष्ठूक्तम्—कः पुनरस्यानुमानस्य रूपत्रयसम्पन्नस्य विरोधः ? न ह्यस्ति संभवो रूपत्रयसम्पन्नं विरुद्धं चेत्यर्थः । *अत्र समाधिमाह—अनुमानाविषये प्रयोगः । *वक्ष्यति ह्यनुमानाधिकारे यथानौपाधिकः संबन्धो हेतुसाध्ययोरनुमानाङ्गम्, न तु कार्यकारणभावादिरव्यापकत्वादतिप्रसङ्गाच्चेति । स चैवं प्रवर्तते—यो यः कृतकः स सर्वोऽनुष्णो यथा घटादिरिति । न च वह्नेरिव धूमसंबन्धे आर्द्रेन्धनसंयोगो गुर्वन्तेवासिनोः साहचर्ये इव स्वाध्यायाध्ययनमुपाधिः कृतकत्वानुष्णत्वयोः संबन्धे उपलभ्यते । सोऽयं शङ्कितः समारोपितो वा प्रयत्नेन पुनःपुनरन्विष्यमाणोऽनुपलभ्यमानस्तत्र तत्र घटादावुपाधिर्नास्तीति प्रत्यक्षेण, यद्यभविष्यद् घटादिवदेव व्यज्ञास्यत, विज्ञानाभावान्नास्त्येवेति तर्कसहायेन निश्चीयते । सोऽयं रूपेणेव रसस्य, श्वस्तनेनेव सवितुरुदयेनाद्यतनस्य तदुदयस्य, समुद्रवृद्ध्येव चन्द्रोदयस्य समानकालस्य, कृतकत्वस्यानुष्णत्वेन स्वाभाविक औत्सर्गिकः संबंधः सामान्येन यो यः कृतकः स सर्वोऽनुष्ण इत्यवधारितः, न तु निर्विभज्य तेजोऽवयविनि । न हि सर्वोपसंहारवती व्याप्तिरेकदेशविषया भवितुमर्हति । एकदेशविषयत्वे यत्रैव न दर्शिता तेनैवानैकान्तिकत्वमाशङ्क्येत । तथा च तत्र तत्रैकदेशे प्रत्येकं व्याप्तिप्रदर्शनमशक्यम्, आनन्त्यात् । तस्मात् सर्वोपसंहारेणैव तदुपदर्शनम् । तदिह कृत-

३ मिति ] °भासत्वमितिnvt-C
७ र्मिणः ] पक्ष्यमाणत्वेनnvt-C
७ स्य ] °साध्यधर्मविरुद्धस्यnvt-C
८ चैकान्तिकः ] °र्मस्य पक्षधर्मत्वं न चैकान्तिकम्nvt-C
१८ * ] तत्रnvt-C
१८ * ] वक्ष्यतेnvt-C
२२ न्तेवासिनोः ] °चर्ये इवाध्ययन°nvt-J

कत्वमौत्सर्गिकसामान्यविषयव्याप्तिस्मरणसध्रीचीनं पक्ष धर्मतावशात् विशेषे तेजोऽवयविनि साधयितुमनुष्णतोन्मुखं यन्न साधयेत् तत् किं प्रत्यक्षेणापहृतविषयत्वात्, आहोस्विदनैकान्तिकत्वात् ? न तावदनैकान्तिकत्वम् प्रागेव सामान्यतोऽनौपाधिकसंबन्धस्यावधारणात् । *उष्णे तेजोऽवयविनि कृतकत्वस्य दर्शनादनैकान्तिकमपक्षधर्मो वा कृतकत्वमितिचेत्—न, अनुमानेन सामान्यतोऽवधृतव्याप्तिना तस्यानौष्ण्यसाधनात् । प्रत्यक्षेण तेजोऽवयविन
38/tha औष्ण्यग्रहणेन तत्र कृतकत्वस्य हेतोर्वृत्तावुत्पन्नमपि व्याप्तिविज्ञानं बाध्यते । ततश्चानैकान्तिकत्वादप्रवृत्तिरनुमानस्येति चेत्—न, अनुमानप्रवृत्तिविषये साध्यधर्मिणि हेतोर्व्यभिचारानुद्भावनात् । अन्यथा तद्गतसाध्यधर्मसन्देहे तत्रोपलभ्यमानः साधनधर्मः सन्दिग्धव्यतिरेकित्वादनैकान्तिकः स्यात् । सन्दिग्धसाध्यधर्मे दृष्टान्त इव साधनधर्मः । तथा चानुमानमात्रमुच्छिद्येत, प्रत्यक्षेण साध्यधर्मविपर्ययदर्शनात् । तेजोऽवयविनोऽनुष्णत्वेनासाध्यत्वम्, तथा चानैकान्तिकत्वमपक्षधर्मता वेति चेत् ? तर्हि प्रत्यक्षेण साध्यविपर्ययसाधनं बाधनमित्यनर्थान्तरम् । तदिदमुक्तम्—यस्मिन् विषये तेजसोऽनुष्णत्वे एतत् प्रयुक्तम्, स प्रत्यक्षेणापहृत इति । एवं चानुमाने दूषिते कृतमपक्षधर्मत्वव्यभिचाराभ्यां तदुपजीविभ्यामिति भावः । § 50

यत् पुनः दिङ्नागेन प्रत्यक्षविरुद्धमनुमानमुदाहृतं तदुपन्यस्यति—अपरेपुनरिति । अश्रावणः शब्दः कृतकत्वाद् घटादिवदिति ब्रुवाणः शब्दस्वरूपमेवापलपति । न हि श्रवणेन्द्रियादन्यदस्ति शब्दग्रहणकारणम् । न चागृह्यमाणः शब्दः सद्व्यवहारगोचरः । तस्मादेवंवादिनोऽभिप्रायव्याप्तमसत्त्वं शब्दस्य । तथा च प्रत्यक्षविरोध इति भावः । दूषयति—तैस्त्विति । सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामत इत्युत्सर्गः । क्वचित् पुनर्विशिष्टविधानमपि भवत्यनन्यगतित्वात् । तद्यथा—

लोहितोष्णीषा ऋत्विजः प्रचरन्ति ।
सति विभवे न जीर्णमलवद्वासाः स्नातकः स्यात् ।§ 53

इति । तद्वदिहापि अश्रावणः शब्द इति श्रुतिवाक्ययोः सामर्थ्यात् श्रावणत्वविशेषणोपसंक्रान्तो निषेधो न विशेष्येण शब्देन सह संबध्यते । नापि श्रावणत्वनिषेधादार्थः शब्दनिषेधो वाद्यभिप्रायव्याप्तः । वचनार्थाविरोधिनोऽर्थस्यार्थगम्यत्वान्न तद्विरोधिनः श्रावणत्वनिषेधस्य चाधिकरणं शब्द इति न शब्दाभावे तन्निषेधोऽवकल्पते । न चाभावस्तुच्छ इति तृतीय उपपादयिष्यते । न च श्रावणत्वं प्रत्यक्षगोचरः । तद्धि शब्दश्रोत्रयोः संबन्धः कृत्तद्धितसमासेषु संबन्धाभिधानं त्वतल्भ्याम् इति कात्यायनीयवचनात् । न च प्रत्यक्षाप्रत्यक्षवृत्तिः संबन्धः प्रत्यक्षः । तस्मात् श्रावणत्वमप्रत्यक्षमिति नात्र प्रत्यक्षविरोधः ।

२ त्] तत्र nvt-C
४ *] उष्ण इति नास्ति nvt-C
७ त्र] तस्य nvt-C
२५ स्यात्] गौतमधर्मसूत्रे १. ९. ४
२८ निषेधादार्थः] निषेधार्थः nvt-C
३० तृतीय] अध्याय इत्यर्थः

तदिदमुक्तम्—इन्द्रियवृत्तीनामतीन्द्रियत्वादिति । वृत्तिः स्वार्थे संबन्ध इत्यर्थः । § 54

आगमविरुद्धमुदाहरति—शुचीति । मन्वादिभिर्नरास्थिस्पर्शप्रतिषेधात्, स्पर्शे च प्रायश्चित्तोपदेशादशुचित्वं नरशिरःकपालादीनामिति । कापालिक आक्षिपति— कथमिति । नास्माकं वेदस्तन्मूला वा स्मृतयः प्रमाणमित्यभिप्रायः । उत्तरम्—शुचि नरशिरःकपालमिति ब्रुवता श्रुतिस्मृतीतिहासपुराणानपेक्षेणानुमानमात्रसहायेनात्र वस्तुनि त्वया शुचिरूपोऽर्थो वक्तव्यः । किमुक्तं भवति शुचीति ? यदि उच्येत स्प्रष्टुः प्रत्यवायाभावः ? सिद्धान्ती पृच्छति—स कस्येति वाच्यम् । यद्यात्मन इति ब्रूयात् कापालिकः, अविगीता हि व्यवहारपरम्परास्माकम् । कापालिकानां नरशिरःकपालस्पर्शतदवस्थितान्नपानोपयोगलक्षणा, दाक्षिणात्यानामिवाह्नैवुकादिलक्षणा क्रिया श्रेयस्करी । तस्मादस्माकमप्रत्यवायकरतया शुचि नरशिरःकपालमित्यर्थः । तत्र सोपहासमुत्तरमाह—तदागमानुष्ठानतात्पर्यावस्थानात् कापालिकस्यैवमेतत् । श्रुतिस्मृतीतिहासपुराणलक्षणागमविहितमर्थमाचरतां तन्निषिद्धं च परिहरतां दाक्षिणात्यानामाह्नैवुकाद्यनुष्ठानमनादि अद्य यावदनुवर्तमानमविगीतमाम्नायमूलतामनुमापयति आत्मनः श्रेयोहेतुभावेन, न खल्वागमानपेक्षः सहस्रणाप्यनुमानैरिममर्थमवगन्तुमर्हति । कापालिकानां त्वागमविहितमकुर्वतां कुर्वतां च तन्निषिद्धमर्थं प्रयत्नेनानादिरपि व्यवहारः शाक्यभिन्नकादीनामिव न वेदानुमाने मूलमिति भावः । अथ त्रयीविदां नरशिरःकपालमप्रत्यवायहेतुरिति ब्रूयात्, तदा त्रय्या वक्ष्यमाणेन न्यायेन प्रामाण्योपगमादागमविरोधः, तदीयस्पर्शस्य त्रय्यां निषेधेन प्रत्यवायहेतुत्वनिश्चयात् । अपि चागमानपेक्षोऽनुमानेन शौचं नरशिरःकपाले व्यवस्थापयन् प्रष्टव्यो जायते—शुचि नरशिरःकपालमिति कोऽर्थः ? ननु य एव 40/tha
वाक्यात् प्रतीयते स एवार्थः, तत् किं पृच्छ्यत इत्यत आह—विशेषस्य नरशिरःकपालस्य शौचविधानमेतत् । ततः किमित्यत आह—विशेषविधानं च *शेषप्रतिषेधपरं लोके दृष्टम्, यथा दक्षिणेन चक्षुषा पश्यतीति उक्ते न वामेनेति गम्यते । तदिह यदि शुचि नरशिरःकपालम्, किमन्यदशुचीति वक्तव्यम् । न हि नरोच्चारादीनामशुचित्वे प्रमाणमन्यदस्त्यागमात् । आगमप्रामाण्यं च न मन्यस इति भावः । अथ त्रयीविद्वेषादनुमानपक्षपातिना त्वया सर्वमेव नरविड्कपालादि शौचपक्षे निक्षिप्यत इत्याह—अथ सर्वमेव शुचि । परिहरति—दृष्टान्तो नास्ति । कुतः सर्वस्य पक्षीकृतत्वात् । चोदयति—अथानुमानविरुद्धं कस्मादनुमानं न भवतीति । न खलु प्रमाणत्वेन प्रत्यक्षागमाभ्यामनुमानस्य कश्चिद् विशेषो येन तौ बाधकावनुमानस्य

---

७ हायेनात्र ] °मानसहा°nvt-J
१३ स्थानात् ] तदा स्वागमार्थतात्पर्यावस्थानात्nvt-C
१८ हारः ] शाक्यमिल्लका°nvt-C
२१ निषेधेन ] °षेधात्nvt-J
२६ * ] शेषे प्रतिषेधविषयम्nvt-C
२७ न ] °तीति न वामे°nvt-J
२८ म् ] त्वया वक्त°nvt-C

नानुमानमिति भावः । परिहरति—एकस्मिन्ननुमानद्वयसमावेशाभावात् । अयमभिसन्धिः—यत् तावदनुमानं पूर्वप्रवृत्तं तेन बाधितविषयं तद्बलभावि पश्चात्तनमनुमानं न स्वकार्याय पर्याप्तम्, यथोक्तमश्रावणः शब्दः कृतकत्वाद् घटादिवदित्यस्यानुमानस्यानुमानविरोध इति । लब्धस्वरूपं हि वस्तु क्वचित् किञ्चिन्निषिध्यते, न तु ज्ञानाकारालीके बहिरिति तृतीये निवेदयिष्यते । तदिह श्रावणत्वं शब्दस्य निषेधता पूर्वं श्रवणमिन्द्रियमतीन्द्रियं तद्ग्राह्यत्वं च वस्तुनी अनुमातव्ये शब्दोपलम्भलक्षणेन कार्येण । तथा चैतेनैवानुमानेनापहृतविषयमश्रावणत्वानुमानं चरममन्वयव्यतिरेकसंपन्नमपि न स्वोचितं कार्यं जनयति । एवं तनुभुवनादीनां न कर्तेश्वरोऽशरीरित्वान्मुक्तात्मवत् प्रयोजनाभावादित्याद्यपीश्वरधर्मिग्राहिमूलानुमानेनापहृतविषयतया न्यायाभासं वेदितव्यम् । तस्मात् परस्परानपेक्षसमानकालप्रवृत्तिसमर्थानुमानद्वयसमावेशाभावाभिप्रायमेतदुक्तम् । न ह्यनयोरन्यतरद् बाध्यं बाधकं वा संभ- 41/tha वति, किं तु मिथः सत्प्रतिपक्षतया न प्रमां कुरुतः । कस्मात् पुनर्न समावेशोऽनुमानयोः ? असमावेशे वा कुतः सत्प्रतिपक्षतेत्यत आह—न ह्यन्वयव्यतिरेकसम्पन्ने इति । इहान्वयव्यतिरेकग्रहणेन समानबलयोरन्वयव्यतिरेकपक्षधर्मत्वासत्प्रतिपक्षत्वान्युपलक्षितानि । एतैः सम्पन्नयोर्यदि समावेश एकस्मिन् विषये भवेत् तत एकतरस्य बाध्यत्वं बाधकत्वं वा गम्येतापि । न त्वेतदस्ति, असत्प्रतिपक्षतासम्पत्तेरभावादिति । उपसंहरति—तस्मान्नानुमानविरुद्धम् अनुमानं तुल्यबलम्, अपि तु सत्प्रतिपक्षमित्यर्थः । प्रत्यक्षमप्युनमेयविरुद्धसाधनादनुमानस्य प्रतिपक्ष इति सत्प्रतिपक्षतयान्वयव्यतिरेकादिसम्पन्नस्यानुमानस्य न प्रत्यक्षेण तद्विरुद्धार्थोपसंहारिणा समावेश इति न बाध्यबाधकभाव इत्यमिप्रायेण चोदयति—प्रत्यक्षविरोध्यपीति । परिहरति—न नेति । तुल्यबलौ हि मिथः प्रतिपक्षौ भवतः न तु दुर्बलोत्तमबलौ । न हि भवति तरक्षुः प्रतिपक्षो हरिणशावकस्य, किं तु समरकण्डूनिघ्नविषाणकोटिसमुल्लिखितगण्डशैलस्य विपिनमहिषस्य । तस्मात् पूर्वभावि प्रत्यक्षमनन्यथासिद्धं सदसत्प्रतिपक्षमनुमानं समानविषयसमावेशाद् बाधत इति युक्तमित्यर्थः । § 55

चोदयति—अथोपमानविरुद्धमनुमानं कस्मान्न भवति ? गोसदृशो गवय इत्यारण्यकस्य वाक्यं श्रुत्वा यदा नागरको वनं गतो गोसदृशं पिण्डमुपलभते, तदास्य वाक्यार्थानुभवाहितसंस्कारप्रबोधजनितस्मृत्यपेक्षं गोसादृश्यज्ञानमुपमानं पुरोऽवस्थितस्य पिण्डस्य गवयशब्दवाच्यत्वज्ञाने प्रमाणम् । तत्र यदि कश्चित् प्रमाणयेत् नैष पिण्डो गवयशब्दवाच्यो गोपिण्डसादृश्याद् गोपिण्डान्तरवदिति, तदिदमनुमानमुपमानेन बाधितविषयमस्त्वित्यर्थः । संप्र-

१ मिति ] बाधकौ न त्वनु°nvt-C
३ नुमानं ] तद्बलवत् पश्चादनु°nvt-C
४ विरोध ] घटवदित्यस्यानु°nvt-C
५ हिरिति ] °कारालीकादिरितिnvt-C
६ तीन्द्रियं ] निषिध्यता श्रवणमिन्द्रियं तत्nvt-C
१५ न्ने ] °सम्पन्नयोःnvt-C
३० पेक्षं ] तत्स्मृत्य°nvt-C
३१ ज्ञाने ] वाच्यत्वेnvt-C

तिपत्तिरुत्तरम्—*नोपमानविरुद्धं न भवतीत्यनुषज्यते । अस्ति चेत् कस्मान्नोक्तमित्यत आह—पूर्वप्रमाणविरोधानुविधानान्नोक्तमिति शेषः । तद् दर्शयति—उपमानविरोध इति । स्वफलद्वारा शाब्दं प्रमाणं दर्शयति—आगमेति । स्वफलद्वारेव प्रत्यक्षं प्रमाणं दर्शयति— सारूप्यज्ञानमिति । 42/tha उपसंहरति—प्रत्यक्षागमयोर्विरोधात् विरोधाभिधानाद् उक्तं तद् उपमानविरुद्धमनुमानमिति ॥ § 56

भाष्यमनुभाष्याक्षिपति—तत्र वादजल्पाविति । प्रयोजनस्वरूपोपयोगाभिधानानन्तरं दृष्टान्तपदे व्याख्यातव्ये तदुल्लङ्घनेन वादजल्पयोः कोऽवसर इत्यर्थः । अवसरमाह—तेनानेनेति । प्रयोजनव्याख्यानाङ्गमेवेदं न वादजल्पव्याख्याङ्गमित्यस्त्यवसर इति भावः । तत्रशब्दार्थं व्याचष्टे—तस्मिन्न्यायाभासे इति । वादजल्पकथयोर्हि न द्वयोर्वादिप्रतिवादिनोः साधने समीचीने संभवतः, वस्तुनि विरुद्धधर्मद्वयसमावेशाभावात् । तस्माद् द्वयोरेकस्य न्याय एकस्य तु न्यायाभास इति वादजल्पाभ्यां विविच्यते । न्यायाभास इति तु सन्निधानादुक्तम्, सन्निहितार्थत्वात् सर्वनाम्न इति । वितण्डा तु परीक्ष्यते । सप्रयोजना निष्प्रयोजना वेति । तुशब्दः प्रसिद्धप्रयोजनाभ्यां वादजल्पाभ्यां व्यवच्छिनत्ति । प्रतिपक्षस्थापनाहीना हि वितण्डोच्यते । तत्र स्थापनाहीनत्वात् प्रतिपक्षहीनेति प्रतीयते । *न खलु स्थापनाभावे स्थाप्यसंभवः । तथा वितण्ड्यते व्याहन्यतेऽनया प्रतिपक्षसाधनमिति व्युत्पत्त्या परपक्षोपघातेन पारिशेष्यात् स्वपक्षसिद्धिरस्याः प्रयोजनं प्रतीयते । तदेवं सन्दिग्धप्रयोजना सती वितण्डा परीक्ष्यते, प्रयोजनवती न वेति । तत्र यदि निष्प्रयोजना ततो न सर्वा विद्याः, सर्वाणि कर्माणि, तन्मुखेन च सर्वे प्राणिनः प्रयोजनेन व्याप्ताः, वितण्डाया एव कर्मरूपाया विद्यारूपाया निष्प्रयोजनत्वात् । अथ प्रयोजनवती, तत उपपन्ना प्रयोजनव्याप्तिः । किं तावत् प्राप्तम् ? तत्र केचिद् ब्रुवते निष्प्रयोजना वितण्डेति । स्थापनाहीनतया तावत् स्थाप्यः पक्षो नास्ति । अवयवव्युत्पत्त्यापि परसाधनाविघातः प्रतीयते । न च तावन्मात्रेण स्वपक्षसिद्धिरस्ति । न हि पर्वतनितम्बवर्तिनि धूमे असिद्धत्वादिना दूषिते वह्नेस्तत्राभावो निश्चीयते । तदिदमुक्तम्—दूषणमात्रत्वादिति । तमिमं निष्प्रयोजनवितण्डावादिनं प्रत्याह—तच्च नैवमिति । परसाधनदूषणेनास्य पारिशेष्यात् स्वपक्षः सिध्यतु मा वा सैत्सीत् । 43/tha स तु स्वपक्षसिद्ध्यैव प्रयोजनेन प्रतिपक्षसाधनमाहन्तीति भावः । तदनेन स यदि प्रयोजनमनुयुक्त-इत्यादि भाष्यं व्याख्यातम् । अथ न प्रतिपद्यत इत्यादि भाष्यं व्याचष्टे-अथ पक्षमपीति । अथापीत्यादि भाष्यं व्याचष्टेअथ परपक्षेति नास्तिको हि सदसदुभयानुभयरूपतया न विचारं सहन्त इति प्रमेयाणि सर्वथा दूषयति । तदयं परपक्षप्रतिषेधमात्रप्रयुक्तः प्रवर्तते । न

१ *] नोपमानं नnvt-C
५ विरोधाभिधानाद्]
°गमयोर्विरोधाभिधाना°nvt-C
१७ *] न खलु स्थाप्य°nvt-C
२६ न्मात्रेण] तन्मात्रेणnvt-J
२९ क्षः] °नास्य स्वप°nvt-C
३३ न्त] सहतेnvt-J

त्वस्यास्ति पक्षो न च स्थापना । तयोरपि प्रमेयपक्षपातितया दूष्यत्वादित्यर्थः । एतदपीत्यादि भाष्यं व्याचष्टे—तादृगेवैतत् । एतद्विभजते—एतस्मिन्नपि पक्षे चतुर्वर्गं चेत् प्रतिपद्यते सोऽस्य पक्षः । प्रतिपत्तिरभ्युपगमः । यद्यपि स्थाप्य एव पक्षः, तथापि तन्नान्तरीयकतया अभ्युपगममात्रेण चतुर्वर्गोऽपि पक्ष उक्तः । कश्चतुर्वर्ग इत्यत आह—चतुर्वर्ग इति । एष साधनवादी ज्ञापयति—अहं वैतण्डिको जाने अनेन पञ्चावयवेन साधनवाक्येनेदं साध्यं ज्ञाप्यत इति चतुर्वर्गः । तत्प्रतीत्या खल्वस्य वैतण्डिकस्य परपक्षनिषेधः प्रयोजनं सिध्यति । तथा च न निष्प्रयोजनोऽयं वैतण्डिक इत्यर्थः । द्वितीयं कल्पं दूषयति—अथ न प्रतिपद्यत इति । चतुर्वर्गनान्तरीयकत्वाद् दूषणमपि न प्रतिपद्यते इत्युन्मत्तवदुपेक्षणीय इत्यर्थः । अपरमपि नास्तिक वैतण्डिकं प्रति दोषमाह—प्रतिपक्षेति । असिद्धविरुद्धादिदोषो वाक्यस्य वैतण्डिक प्रयुक्तस्यार्थः । तं यदि प्रतिपद्यते सोऽस्य पक्षः । अथासिद्धविरुद्धादीनां सद्भावाभ्युपगमेप्रमेयमध्यपातिनां प्रमेयमात्रविचारासहत्वाभ्युपगमो विघटत इति स्ववाक्याभिहितमेवासिद्धविरुद्धादि न प्रतिपद्यते, पूर्ववद्दोषः । नायं लौकिको न परीक्षक इति । तस्माद् वितण्डापि प्रयोजनवतीति नाव्यापकं प्रयोजनमिति सिद्धम् । सोऽयं प्रसक्तानुप्रसक्तिवादः प्रयोजनव्याख्याङ्गमित्याह—उक्तं प्रयोजनमिति । § 57

दृष्टान्तपदव्याख्यानपरं भाष्यमनुभाषते—प्रत्यक्षविषय इति । आक्षिपतिकिमुक्तं भवतीति । न तावद् यो यः प्रत्यक्षविषयः, स सर्वो दृष्टान्तः, 44/tha अदृष्टान्तस्यापि प्रत्यक्षविषयत्वात् । नापि यो दृष्टान्तः स सर्वः प्रत्यक्षविषयः, आगमादिविषयस्यापि दृष्टान्तत्वात् । तस्मादयुक्तमेतदित्याक्षेप इति । तत्समाधानभाष्यम्—यत्रेति । तद्व्याचष्टे—लौकिकपरीक्षकाणं दर्शनविघातहेतुरिति । एतच्च क्वचिल्लौकिकपरीक्षाकाणाम् क्वचित् परीक्षकाणामिति मन्तव्यम् । अन्यथा यदप्रसिद्धं लौकिकानां केवलं पण्डितरूपवेदनीयं परमाण्वादि तस्यादृष्टान्तता स्यात् । अत्र च यो दृष्टान्तः स एवम्, न तु य एवं स दृष्टान्त इति द्रष्टव्यम् । एवंभूतव्याख्यानस्य प्रयोजनं दर्शयति—एवं चेति । तद् विभजते—दर्शनाविघातेति । न केवलं प्रमेयविरोधः सूत्रविरोधश्चेत्यत आह-ततश्चोदाहरणसूत्रं व्याहन्यते । यत् तेषु तेषु शास्त्रप्रदेशेष्वतीन्द्रियोदाहणसूत्रं सिद्धान्ते पूर्वपक्षे वा यथा, मन्त्रायुर्वेदप्रामारण्यवत् २।१।६८ अणुश्यामतानित्यत्ववत् ३।२।७१ इत्येवमादि, तद् व्याहन्यते । न तूदाहरणलक्षणसूत्रम् । तद्धि प्रत्यक्षविषयदृष्टान्तत्वेऽप्युपपद्यत एव । तस्माद् भाष्ये प्रत्यक्षवचनं दृष्टान्तविषयप्रमाणदार्ढ्यं लक्षयति । प्रत्यक्षमूलत्वाद् वा प्रत्यक्षो

१ ना] पक्षोऽनवस्थापनात्nvt-C
२ र्थः] °पातिदूष्य°nvt-C
६ वाक्येनेदं] अहो वैतण्डिको जाने अनेन पञ्चावयववाक्येन°nvt-C
१० ते] °नान्तरीयकं स्वदूषणमपि प्रति°nvt-C
१३ मे] प्रमेयपक्षपा°nvt-C
२३ रीक्षाकाणाम्] क्वचिल्लौकिकानां क्व° nvt-C

दृष्टान्तः, अन्यथानवस्थाप्रसङ्गादिति । सोऽयं दृष्टान्तः प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुक्त इत्याह—सोऽयमिति । न्यायस्य पञ्चावयवात्मकस्य वचनसमूहस्य दृष्टान्तो मूलम्, अतस्तस्य पृथगुपदेशः । अतश्चास्य पृथगुपदेशो यत्—सति तस्मिन्निति । अनुमाननिमित्तत्वमाह—पूर्वं प्रत्यक्षेति । दृष्टान्तधर्मिणि दृढतरप्रमाणावधारितमित्यर्थः । शाब्दमूलतां दृष्टान्तस्य दर्शयति—पूर्वं ज्ञातं चार्थमिति । संबन्धग्रहणविषयोऽर्थो दृष्टान्तः, *संबन्धग्रहणं च शाब्दस्यापि ज्ञानस्य निमित्तं प्रथमश्राविणः शब्दादर्थज्ञानाभावात् । तस्मादस्ति शाब्देऽपि दृष्टान्तस्योपयोग इति । अपरमपि पृथगुपादानप्रयोजनमाह—नास्तिकस्येति । अप्रपञ्चने हेतुमाह—तदुक्तं भाष्य इति ॥ § 58

45/tha

सिद्धान्तपदविवरणभाष्यं व्याचष्टे—अभ्युपगमेति । तद्विभजते—अभ्युपगम इदमित्थम्भूतं चेति । तद्विभजते—इदमितीति । इदमिति हि धर्मिविषयं सिद्धान्तं दर्शयति, धर्मी सर्वतन्त्रसिद्धान्तविषयः । इत्थमिति प्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तविषयं दर्शयति । व्यवस्थायामुपलक्षणतया प्रतितन्त्रसिद्धान्तमात्रमुदाहरति—इदं सांख्येष्वेवेति । उपलक्षणतामुदाहरणस्याजानानश्चोदयति—सर्वतन्त्रेति । परिहरति—योऽयमिति । अभ्युपगमव्यवस्थितिरनभ्युपगमाद् व्यवच्छिनत्ति । न तु पुरुषविशेषे व्यवस्थापयतीति भावः । अस्यापि प्रमेयान्तर्गतस्यापि सतः पृथगुपादानप्रयोजनमाह—तस्य प्रमेय इति । तत्र सर्वतन्त्रसिद्धान्तसिद्धस्तावद् विप्रतिपन्नानामपि वादिनां धर्मी, तस्य सर्वतन्त्रसिद्धान्तसिद्धस्य विशेषेषु प्रतितन्त्रसिद्धान्ताः प्रवर्तन्ते । तथा हि यदि घटो नाम न सर्वतन्त्रसिद्धान्तसिद्धः, किमाश्रया अवयवी वा परमाणुसमूहो वा ज्ञानाकारो वा प्रधानपरिणामो वा ब्रह्मपरिणामो वा तद्विवर्तो वेति प्रतितन्त्रसिद्धान्ताः प्रवर्तन्ते ? कथं च प्रतितन्त्रसिद्धान्ताश्रया वादजल्पवितण्डाः प्रवर्तन्ते ? किमाश्रयश्च न्यायः स्यात् ? तथा यद्यधिकरणसिद्धान्तो न भवेत्, कथं साध्यसामान्यव्याप्तं साधनसामान्यमिति साधनविशेषात् साध्यविशेषो गम्येत ? तस्मादस्ति प्रमेयस्यापि सिद्धान्तस्य पृथगुपादानप्रयोजनम् । अभ्युपगमसिद्धान्तं चोपरिष्टाद् विचारयिष्यति वार्त्तिककृदिति तत्प्रयोजनमिहास्माभिर्नोक्तमिति ॥ § 59

क्रमप्राप्तानवयवानाह—अथावयवाः । ननु यथा तन्तवः पटस्य समवायिकारणं किं तथैवैते प्रतिज्ञादयो वाक्यस्य ? नो खलु गगनगुणा वर्णाः समवायिकारणतां प्रतिपद्यन्त इत्याह—वाक्यैकदेशा इति । अवयवा इवावयवाः, न पुनः समवायिकारणम् । यथा ह्यवयवाः समुदायिन एकस्मिन्नवयविनि कार्ये धारयितव्ये च, एवमेकस्मिन् विवक्षितार्थप्रतिपादने प्रतिज्ञादयोऽवयवा वाक्यस्य समुदायस्य समुदायिन इति । ननु व-

---

१ ङ्गादिति ] °प्रसङ्ग इति nvt-C
६ *] दृष्टान्तः सं° nvt-C
७ श्राविणः ] शब्दार्थ° nvt-C
१७ भावः ] °पयतीत्यभिप्रायःnvt-C
३३ ने ] °तव्ये, एवमेक…विवक्षितार्थेnvt-C

46/tha र्णानामाशुतरविनाशिनां क्रमवतामेककालत्वाभावे समुदायाभावात् कुतस्तत्समुदायो वाक्यम्, कुतश्चैकदेशतेत्याशयवानाक्षिपति—किं पुनर्वाक्यम् ? उत्तरम्—पूर्वपदस्मृत्यपेक्षोऽन्त्यपदप्रत्ययः स्मृत्यनुग्रहेण प्रतिसन्धीयमानो विशेषप्रतिपत्तिहेतुर्वाक्यम् । विशिष्यत इति विशेषः पदार्थ एकः, क्रिया वा कारकं वा प्रातिपदिकार्थो वा पदार्थान्तरविशिष्टो वाक्यार्थः । यथा सोमेन, यजेत गोदोहनेन पशुकामस्य, यस्य पिता पितामहो वा सोमं न पिबेत् स व्रात्य इति । तस्य विशेषस्यैकस्य प्रतिपत्तिहेतुः । *तदेवं समूहनिबन्धनं पदानामेककार्यत्वं सूचयति । को विशेषप्रतिपत्तिहेतुरित्यत उक्तम्—अन्त्यपदप्रत्ययः । अन्त्यं विशेष्यं विशेषणपूर्वकत्वात् । तस्य पदम् । न च तदविदितं सत्तामात्रेण चक्षुरादिवद् विशेष्यं प्रतिपादयतीत्यत उक्तम्—प्रत्यय इति । प्रतीयमानं विशेष्यवाचि पदं विशेष्यं बोधयति । प्रतीतिश्च नानुभवः, अपि तु स्मृतिः । न हि क्रमवद्वर्णसमुदायः पदं श्रवणेन्द्रियानुभवगोचरः संभवति, संभवन्ति तु प्रत्येकं वर्णाः । न चैते प्रत्येकं पदम् । न च पूर्ववर्णस्मृतिनिचयसहितोऽन्त्यवर्णानुभवः श्रोत्रज इति युक्तम्, स्मृतीनां स्वकार्यसंस्कारविरोधिनीनामसहभावात् । विनश्यदविनश्यदवस्थयोस्तूपान्त्यान्त्यवर्णस्मृत्यनुभवयोः स्यात् । न चैतावतार्थप्रत्ययः पूर्ववर्णस्मृतीनां तिरोभावात् । न च पूर्ववर्णानुभवजनितसंस्कारसहकारिणः श्रवणादेव लब्धजन्मनः प्रत्ययस्यैकस्याध्यस्ततत्स्मृत्यनुभवरूपवैचित्र्यस्य सदसद्वर्णावगाहिनो विषयभावमापन्ना वर्णा अर्थधियमादधतीति साम्प्रतम्, संबन्धसंवेदनाहितसंस्कारोद्बोधसमयजन्मना *स्वजनितेन संस्कारेण संबन्धस्मृत्युत्पत्तिसमये विनाशात् पदार्थावबोधकत्वानुपपत्तेः । तस्मात् स्मृतिरेव प्रत्ययः । अत+एवाध्ययनसमये गुरुमुखाद् गृहीतो वेदराशिर्वेदाङ्गोपाङ्गज्ञानसंस्कृतेन स्मर्यमाण एव तस्यार्थं बोधयति । एवं च यदा पदार्थप्रत्यायन एव पदानुभवो न कारणम्, तदा वाक्यार्थज्ञाने नानापदार्थस्मरणाकांक्षायोग्यतासन्निधानावधारणादिव्यवहिते कैव कथेति । यदि तर्हि विशेष्यपदमेव स्मर्यमाणं विशिष्टमर्थमवगमयति कृतं पदान्तरैः, तत एव वाक्यार्थप्रतिपत्तेरित्यत
47/tha उक्तम्—पूर्वपदस्मृत्यपेक्षः । पूर्वं विशेषणं तत्पूर्वकत्वाद् विशेष्यप्रतीतेः । तस्य पदं स्मर्यमाणपूर्वपदापेक्षः । यद्यपि स्मरणानि न सह संभवन्ति तथाप्येकस्मृतिसमारूढानि वा पदानि निरन्तरस्मृतिसंतानसमारूढानि वा परस्परापेक्षाणि । तथा च स्मर्यमाणं विशेष्यपदं विशेषणपदापेक्षं विशिष्टमर्थमवगमयतीति । § 60

स्यादेतत् । पदमाला चेत् स्मर्यमाणा वाक्यार्थबोधनी, कृतं तर्हि पदार्थबोधनेन कृतं च पदतदर्थसंबन्धबोधनेनेत्यत उक्तम्—स्मृत्यनुग्रहेणेति

७ *] तदनेनnvt-J
१३ मुदायः] पदश्रवणेnvt-C
१७ च] पूर्वपूर्वानु°nvt-C
२० *] स्वजातेनnvt-C
३३ नेन] °बोधनnvt-J
३३ त] °बोधने°nvt-J

। प्रत्येकं पदेभ्यो याः पदार्थस्मृतयस्तदनुग्रहेण । एतदुक्तं भवति यद्यपि वाक्यार्थबोधनाय पदमाला प्रवृत्ता, तथापि पदार्थस्मृतिरवान्तरव्यापारभूता अपेक्षते काष्ठानीव पाकप्रवृत्तानि ज्वलनमवान्तरव्यापारम् । न च पदान्यगृहीतसङ्केतानि पदार्थान् स्मारयन्तीति उपपन्ना पदार्थस्मृतिसंबन्धसंवेदनयोरपेक्षेति । यदि हि पदार्थस्मृत्यपेक्षा पदमाला वाक्यार्थबोधनी, हन्त दश दाडिमानि षडपूपा भवन्तीत्येवमादीनामपि वाक्यार्थबोधकत्वं स्यादित्यत आह—प्रतिसन्धीयमानः । प्रतिपदं सन्धानं घटनं प्रतिसन्धानम् । तच्च स्वार्थद्वारेणाकांक्षायोग्यतासत्त्यधीनम् । न च दशदाडिमादिवाक्यादिषु तदस्तीति न ततो वाक्यार्थावबोध इत्यर्थः । तदेवमेकस्मृतिसमारोहेण एकार्थावच्छेदेन च पदानां समूहो वाक्यम् । तस्य भागा एकदेशा इति । यावतीत्यादि भाष्यमवतारयति—ते कियन्तः ? भाष्यव्याख्यानेनोत्तरम्—यावद्भिरिति । पृच्छति—केति । न हि समाप्तेर्निष्पत्तेरन्या सिद्धिरस्तीत्यभिप्रायः । उत्तरम्—पदार्थस्येति । धर्मिणः सिषाधयिषितधर्मविशिष्टत्वं वास्तवमित्यर्थः । *समाप्तिं पृच्छति—केति । उत्तरम्— विशेषेति । वास्तवो धर्मः सिद्धिः, तद्गोचरस्तु विनिश्चयः पुरुषधर्मो निष्पत्तिरिति विशेष इत्यर्थः । कियद्भिः किमभिधानैश्च विभागैः सिद्धिः परिसमाप्यत इत्याशङ्क्य भाष्यकृतोक्तम्—तस्य पञ्चेति । तद् व्याचष्टे—समाख्येति । भाष्यमनुभाष्याक्षिपति—तत्रागम इति । न ह्यागमवत् प्रतिज्ञावचनं निश्चायकम्, हेतुवचनादिवैयर्थ्यात् । 48/tha निष्पादितक्रिये कर्मणि साधनस्य साधनन्यायातिपातादिति । समाधत्ते—आगमाधिगतस्येति । आत्मादिप्रमेयप्रतिपादनोद्देशेन हि शास्त्रमेतत् प्रवृत्तम् । तन्नान्तरीयकतया न्यायं व्युत्पादयत् तमेव व्युत्पादयेत्, य आत्मादेः प्रमेयस्य साक्षान्निश्चायकः, तत्प्रतिपादकागमप्रामाण्यनिश्चायको वा । तस्य च न्यायविशेषस्याद्योऽवयवः प्रतिज्ञा, आगमार्थविषया साक्षात्, तद्विषयागमप्रामाण्यप्रतिपादकस्य च परम्परया । तस्मात् आगमः प्रतिज्ञा । आगमोपचारस्य च प्रयोजनमिदं यदर्थसंवादेनागमेनानुगृह्यते न्यायः सप्रयोजनश्च भवति, आगमार्थज्ञानस्य निःश्रेयसहेतुभावेन निरूढत्वात् । तस्माद् यद्यपि न न्यायमात्रवर्तिनी प्रतिज्ञा आगमः, तथापि प्रकृतन्यायाभिप्रायेणैतद् द्रष्टव्यम् । तथा चागमार्थसंबन्धेन प्रतिज्ञायाः कल्पितविषयत्वमपि पराकृतं वेदितव्यम् । यदाहुरेके—सर्वोऽयमनुमानानुमेयव्यवहारो बुद्ध्यारूढेनैव धर्मधर्मिभावेन न बहिःसदसत्त्वमपेक्षत इति । § 61

तथानुमानस्य न्यायानुग्राहकत्वं हेतुवचनस्यानुमानत्वोपचारेण भाष्यकारेणोक्तम्—हेतुरनुमानमिति । तत् खल्वनुमानप्रतिपादकं वचनं विषयतयानुमानेनानुग्रहीतव्यम् । न च लिङ्गदर्शनमात्रमनुमेयप्रतिपत्तिहेतुः, अपि तु

८ म्] °तासन्निधानम्nvt-C
१० दानां] °देन पदा°nvt-C
१४ *] पृच्छतिnvt-C
२५ मिदं] पदार्थसं°nvt-C
२८ था] चागमानुसन्धानेनnvt-C
२९ र्मिभावेन] °रूढेन धर्मधर्मिन्यायेनेतिnvt-J
३२ त्] खलु हेतुवचनमनुमानप्रतिपादकं विषय°nvt-C
३३ त्तिहेतुः] °प्रत्ययहेतुःnvt-J

संबन्धस्मृतिसहकारि । न च हेतुवचनमात्रात् सहकारितावगम्यते । तस्मान्न लिङ्गवचनमनुमानप्रतिपादकमिति कथमनुमानत्वोपचार इत्यह आह—एवं लिङ्गदर्शनमात्रे दृश्यमाने लिङ्गरूपे संबन्धस्मरणरहिते हेतूपचारात् अनुमानत्वोपचारात् हेतुरनुमानमित्युक्तं भाष्यकृता । तदेव विभज्यते—यत्तु द्वितीयं लिङ्गदर्शनम् । संबन्धग्रहणसमये लिङ्गदर्शनं प्रथमम्, तदपेक्षया साध्यधर्मिणि लिङ्गदर्शनं द्वितीयम्, तत्संबन्धस्मृतिव्यक्तिहेतुभावात् । स्मर्यतेऽनयेति स्मृतिः संस्कारः । तस्य व्यक्तिः कार्याभिमुखीकरणम्, तत्र हेतुभावात् । क्वचित् पाठः—संबन्धस्मृतिहेतुव्यक्तिहेतुभावादिति । स तु सुगम एव । 49/tha अतो हेतुरित्युच्यते । एतदुक्तं भवति, यत् तद् द्वितीयं लिङ्गदर्शनं शुद्धमप्यापाततः संबन्धस्मृतिहेतुभावात् संबन्धस्मृतिसहकार्येव । तथा चानुमानम् । एवं च तत्प्रतिपादकस्य वचस उपपन्नोऽनुमानत्वोपचार इति सिद्धम् । एवं च वास्तवेन लिङ्गेन संबन्धात् तद्वचनस्य बुद्धिविकल्पितलिङ्गविषयत्वं परास्तं वेदितव्यम् । एवमन्येष्वप्यवयवेषु वक्ष्यमाणेष्वेतदेव प्रयोजनं योजनीयमिति । उदाहणं प्रत्यक्षमिति भाष्यम् । तद्व्याचष्टे—स्मृतिविषयस्येति । यत्र प्रत्यक्षे विषये पूर्वं व्याप्तिर्गृहीता तस्य स्मृतिरिति स्मृतिविषयस्य प्रत्यक्षतः पुनरुपदर्शनात् अविप्रतिपत्त्या पुनः स्मरणात् । तत्स्मारकं वचनमुदाहणं प्रत्यक्षम्, मूलभूतप्रत्यक्षप्रमाणसमुत्थत्वादिति । *कःपुनरुपमानार्थ इति । प्रत्यक्षमिव प्रत्यक्षमित्यत्रेवकारे तत्रोपमार्थः क इत्यर्थः । एतदेव विभजते—यस्मादिति । उपमानमुपनय इति भाष्यम् । तद् व्याचष्टे—यथा तथेत्युपमानैकदेश इति । उपनयो हि तथा चैतदिति प्रवर्तमान उदाहरणस्थं यथाशब्दार्थमपेक्षत इति यथा तथेति प्रवर्तत इति । किं पुनरुपमानं यस्यायमेकदेश इत्यत आह—उपमानं खलु यथा गौस्तथा गवय इत्युपदेशोपयोगे । उपयोगस्तदर्थविषयोऽनुभवः । तस्मिन् सति पश्चाद् वनं गतो नागरकः प्रत्यक्षेणादृष्टपूर्वं पिण्डं पश्यति । स्मरति चोपदेशार्थम् । पिण्डस्य च पुरोवर्तिनः स्मर्यमाणेन गवा सादृश्यं प्रत्यक्षेणैव पश्यति । तदेवंभूतं सारूप्यज्ञानं गवयशब्दवाच्योऽयं पिण्ड इति प्रतीतिहेतुरुपमानम् । तदेतस्योपमानस्योपदेशार्थस्मरणगवयपिण्डगोसारूप्याप्रत्यक्षरूपस्यैकदेशे सारूप्ये यो यथातथाभावः स उपनयेऽप्यस्तीत्येतावतोपमानत्वोपचार उपनय इत्यर्थः । सोऽयं सर्वप्रमाणविनिवेशेन परमो न्यायः स्तूयते । निगमनव्याख्यान भाष्यमनुभाष्याक्षिपति—कःपुनरिति । न खल्ववयवानां प्रमाणानां वा वाक्ये समवायः संबन्धः संभवतीति भावः । उत्तरम्—एकवाक्येति । अध्यारोपो बुद्ध्या प्रतिसन्धानम् । सामर्थ्यं पृच्छति—किं पुनरिति । उत्तरम्—इतरेतरेति । सामर्थ्यं हि पदार्थानां धर्मः । इह तु विभज्य- 50/tha मानानामवयवानां तन्मूलानां च प्रमाणानां साकांक्षत्वमेव धर्मः सामर्थ्यम् ।

९ ते] स सुगम एव हेतुरित्यु° nvt-J    पतितम् nvt-J
९ द्] यत्तु nvt-C
१७ *] कः पुन...क इत्यर्थ इति

तदत्र समस्तरूपसम्पन्नलिङ्गप्रतिपादनमेकं प्रयोजनं विभज्यमानसाकांक्षत्वं चास्तीति सिद्धमेकवाक्यत्वमवयवानामिति निगमनपदं व्युत्पादयति—निगम्यन्त इति । सोऽयमिति भाष्यमनुभाष्य पृच्छति—कः पुनः परमशब्दस्यार्थ इति । उत्तरम्—विप्रतिपन्नपुरुषप्रतिपादकत्वं पञ्चावयववाक्यस्य परमत्वमिति । एतदेव व्यतिरेकमुखेन प्रतिपादयति—एकैकश इति । यद्यपि लोके प्रत्यक्षादीनामेकैकशोऽपि विप्रतिपन्नपुरुषप्रतिपादकत्वं तत्र तत्रोपलभ्यते, तथापि यदेतद् वेदप्रामाण्यमात्मादिप्रतिपादनं च निःश्रेयसोपयोगि, न तत् पञ्चावयववाक्यादेतच्छास्त्रोपदिष्टोपकरणाद् विना सिध्यतीत्यनेनाभिप्रायेण द्रष्टव्यम् । अवयवानां पृथगभिधानमाक्षेप्तुं विकल्पयति—किं पुनरवयवा इति । विकल्पप्रयोजनं पृच्छति—किं चातः ? उत्तरम्—यदि प्रमाणान्तरमिति । समाधत्ते—न प्रमाणान्तरमिति । प्रयोजनान्तरमाह—त एत इति । यत एव वादादिप्रवृत्तिहेतवोऽत एव तत्त्वव्यवस्थायाश्चाश्रया भवन्तीति । पृच्छति—*क इति । न हि कुण्डमिव वदराणि तत्त्वव्यवस्थावयवानाश्रयतीत्यर्थः । उत्तरम्—विशेषप्रतिपादकत्वम् । धर्मिविशिष्टो धर्मो विशेषः । विशिष्यत इति व्युत्पत्त्या तत्प्रतिपादकत्वमवयवानां तत्त्वव्यवस्थाश्रयत्वमित्यर्थः । § 62

क्रमप्राप्ततर्कपदव्याख्यानार्थं भाष्यमनुभाषते—तर्को न प्रमाणसंगृहीतः । प्रमाणपदेन हि चत्वारि प्रमाणानि संगृहीतानि । न चैतेष्वन्यतमस्तर्क इत्यर्थः । अस्तु तर्हि प्रमाणपदसंगृहीतेभ्यः प्रमाणेभ्यः प्रमाणान्तरमसंगृहीतं प्रमाणपदेन प्रमेयपदेन वा संगृहीताः संशयादयः प्रमेया इत्यत आह—न प्रमाणान्तरम् । भाष्यमनुभाष्य हेतुमाह—अपरिच्छेदकत्वात् अनिश्चायकत्वात् । तदेव व्यतिरेकमुखेन दर्शयति—प्रमाणमिति । स्यादेतत् । अपरिच्छेदकत्वमसिद्धं तर्कज्ञानस्य संशया दिवद् गुणत्वेनात्मलिङ्गत्वात् । अन्यथा 51/tha
त्वकिञ्चित्करत्वादुपादानवैयर्थ्यमित्यत आह—प्रमाणविषयविभागात् त्विति । न हि वयं गुणत्वेनोत्पत्तिमत्त्वेन वा रूपेणानिश्चायकत्वं तर्कस्याचक्ष्महे, किं तु प्रमाणविषयविभागहेतुतया । न चैवमस्याकिञ्चित्करत्वमित्यर्थः । पृच्छति—कः पुनरिति । उत्तरम्—युक्तायुक्तेति । इदं युक्तमिदमयुक्तमिति । इतिकारेण युक्तायुक्तविषयं तर्कज्ञानं परामृशति । तदनेन तर्कस्य स्वरूपं दर्शितम् । तस्य व्यापारमाह—यत् तत्र युक्तं भवति संभवति तदनुजानाति, न त्ववधारयति तर्कः । एतदुक्तं भवति प्रमाणं तत्त्वावधारणाय प्रवृत्तं करणतया इतिकर्तव्यतामपेक्षते । तर्कश्च प्रमाणविषययुक्तायुक्तविचारात्मा प्रमाणं युक्ते तत्त्वे प्रवर्तमानमनुजानन् प्रमाणमनुगृह्णाति । तदनुगृहीतं प्रमाणं तत्त्वनिर्णयाय पर्याप्तम् । न च प्रमाणविषये चेत् तर्कः प्रवर्तते कृतमस्य

---

२ त्वं ] वास्तीतिnvt-C
४ स्य ] °वयवस्यnvt-J
५ श ] एकशःnvt-J
६ शोऽपि ] °मेकशोऽपिnvt-J
११ त्ते ] यदि प्रमाणान्तरमिति । समाधत्ते इति भागो भ्रष्टःnvt-J
१२ * ] किमितिnvt-C
१४ र्मो ] धर्मविशिष्टो धर्मीnvt-J
१९ वा ] °देनेवा°nvt-J
२१ ति ] तद्दर्शयतिnvt-C
२९ वृत्तं ] प्रयुक्तम्nvt-C
३२ म् ] °निश्चयाय कल्पतेnvt-J

प्रमाणानुज्ञया, नन्वयमेव निश्चायकः कस्मान्न भवतीति साम्प्रतम्, तस्य प्रसङ्गतया पारतन्त्र्येण स्वयमसाधनत्वात् । अस्ति हि प्रसङ्गो न प्रसङ्गो हेतुः । तथा हि प्रत्यक्षमेव तावद् भूतले प्रवर्तमानं तद्विशेषणतया घटाभावेऽपि प्रवर्तमानं यद्यत्राभविष्यद् घटो भूतलमिवाद्रक्ष्यत, तेन सह तुल्यदर्शनयोग्यत्वात् । न च दृश्यते । तस्मान्नास्तीति तर्केणानुज्ञायमानं घटाभावविशिष्टे भूतले प्रवर्तते केवलमेवेदं भूतलं नेह घट इति । एवं स्वर्गकामो यजेत इति शब्दोऽपि प्रवर्तमानः परमाप्तस्य भगवत ईश्वरस्य नियोगो नास्वर्गफलायां यागभावनायामवकल्पत इति समानपदेनोपात्तोऽपि दुःखतया धात्वर्थः साध्य इति न युक्तम् । भिन्नपदोपात्तोऽपि पुरुषविशेषणमपि स्वर्ग एव भावनाफलं युक्त इति तर्केणानुज्ञायमानः प्रवर्तते । न च यद्यभविष्यद्घट इति वा यद्यभविष्यद् धात्वर्थः साध्य इति वा क्रियातिपत्तिरस्ति, यदाश्रयानिष्टप्रसङ्गेनायुक्तत्वमितरथा तु युक्तत्वम्, तत् तर्केण निश्चीयते ।
52/tha तस्मान्न प्रमाणम् । निश्चयाय तु प्रवृत्तं प्रमाणं त द्विषयविवेचनेनानुगृह्णन्नितिकर्तव्यतात्वेनोपयुज्यते । यथोक्तम्—

मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः ।
सोऽतो वेदो रुमाप्राप्तकाष्ठादिलवणात्मवत् ॥§ 65

पूजितविचारवचनो हि मीमांसाशब्दः । अयुक्तप्रतिषेधेन युक्ताभ्यनुज्ञानं तर्कः (Edtext outside numbered paragraph) । प्रमाणेतिकर्तव्यतात्वेन च प्रमाणाद् वेदादभेद (Edtext outside numbered paragraph) उक्तः । सोऽतो वेद इत्यङ्गाङ्गिनोरभेदविवक्षया इतिकर्तव्यतात्वं चास्य साक्षाद् दर्शितम् ।

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥§ 67

इति सर्वमवदाम् । तस्योदाहारणं भाष्ये कर्मेति । कर्मकारणकमपूर्वं धर्माधर्माविति यावत्, कार्ये कारणत्वोपचारात् । एतदुपपादनाय पृच्छति—कथं पुनरिति । निकायविशिष्टाभिरपूर्वाभिः शरीरेन्द्रियबुद्धिवेदनाभिरभिसंबन्धो जन्म, तस्य कथं कर्मनिमित्ततेत्यर्थः । अत्र प्रमाणमनुमानमाह—भेदवत्त्वात्, विचित्रत्वादित्यर्थः । पृच्छति—कःपुनरिति । भेदमाह—सुगतिरिति । प्रमाणमुक्त्वा तस्येतिकर्तव्यताभूतं तर्कमवतारयति—सोऽयं भेद इति । यद्येकं निमित्तं स्याद् वैवित्र्यं न भवेत् । न ह्यभिन्नात् कारणात् कार्यवैचित्र्यमुपपद्यते, तस्याकस्मिकत्वप्रसङ्गात् । अत उक्तम्—अनेकमिति । नन्वनेकं यागादिब्रह्महत्यादिक्रियारूपं कारणमस्तु कृतम-

५ स्मान्नास्तीति ] तेन तर्केणnvt-C
९ म् ] साध्यो न युक्तःnvt-J
१३ वृत्तं ] प्रवर्तमानंnvt-C
२१ पूर्वाभिः ] °ष्टाभिः शरीरे°nvt-J

पूर्वैरित्यत उक्तम्—अवस्थितम् । यागादिका तु किया आशुतरविनाशिनी न चिरभाविने स्वर्गाय कल्पत इत्यर्थः । अवस्थितं चेद् यागाद्याहितमपूर्वं धर्मोऽस्तीति सदैव सुखिना भवितव्यम् । एवमधर्मोऽस्तीति सदैव दुःखी स्यादिति सुखदुःखयोः कादाचित्कत्वं व्याहन्येत । न ह्यवस्थितात् कारणाद-नवस्थितं कार्यमित्यत उक्तम्—अनित्यम् । *न ह्यवस्थानं नित्यतां ब्रूमः, किं तु तावदनेन स्थातव्यं न यावदन्त्यसुखदुःखसंविज्ञानं जनयति, अथ नश्यतीति । ननु भिन्नानि सत्त्वपूर्वाणि, तथापि सर्वाणि सर्वात्मसमवेतानि, यथावयवी स्वावयवेषु । तथा च सर्वसाधारण्यान्नोक्तवैचित्र्योत्पाद इत्यत उक्तम्—एकद्रव्यम् । एकद्रव्यं चेदस्तु तर्हि सर्वसाधारणे पृथिव्यादौ यत्र क्वचित् । तथापि वैचित्र्यानुपपत्तिरित्यत उक्तम्—प्रत्यात्मनियतम् । अथ पृथिव्यादेव कारणं जन्मवैचित्र्ये कस्मान्न भवतीत्याशयवान् पृच्छति—किं कारणमिति कस्मात् कारणादित्यर्थः । उत्तरम्—पृथिव्यादीनामिति । *मा भूत् पृथिव्यादि, पृथिव्यादिगतं किञ्चिद् भविष्यतीत्यत आह—पृथिव्यादिग-तस्येति । भाष्योक्तप्रमेयत्वे तर्कस्य हेतुमाह—उपलब्धिविषयत्वादिति । § 68

तर्कानन्तरं निर्णय उद्दिष्टस्तर्कहेतुकत्वात् । तस्य स्वरूपमाह—निर्णयस्त-त्त्वज्ञानमिति । *यद्येवमिन्द्रियापातजन्मप्रत्यक्षज्ञानमपि तत्त्वज्ञानमिति निर्णयः स्यादित्यत आह—प्रमाणानामिति । अनेन पञ्चावयववाक्यमुपलक्षयति । त-त्र सतर्काणां प्रमाणानां समवायात् । परमार्थतस्तु तर्कपूर्वकस्तत्त्वविनिश्चयो निर्णय इति प्रत्यक्षादीनामपि तर्कसहायानां निर्णयफलत्वमिति । स्यादेतत् । धूमादिगोचरेण तत्त्वनिर्णयेन वह्न्यादावनुमीयमाने प्रमाणमेव निर्णयो न फ-लमित्याशयवान् पृच्छति—कदा पुनरिति । विदिताभिप्रायस्योत्तरम्—यदेति । संकलय्य तर्कनिर्णयव्युत्पादनस्य प्रयोजनमाह—तावेताविति । परीक्ष-कोऽत्र लोको लोकशब्देनोच्यते, तदितरस्य तर्कासंभवात् । बुद्ध्वेति परीक्ष्य निर्णयं कृत्वेत्यर्थः । शेषं निगदव्याख्यातम् । § 69

निर्णयानन्तरं वादव्याख्यानार्थं भाष्यम्—वादः खल्विति । तद-नुभाष्योपपत्तिमाह—वाद इति । नाना प्रवक्तारो यस्मिन् स तथा । एक-स्यापि शास्त्रकर्तुः पूर्वपक्षोत्तरपक्षसाधनदूषणप्रतिपादको वचनसमूहो वादः स्यादिति नानाप्रवक्तृक इत्युक्तम् । सिद्धान्तभेदानुविधानेन हि द्वावपि स्व-सिद्धान्तानुरूपं साधनं दूषणं चाहतुरित्यर्थः । प्रत्यधिकरणेत्यादि भाष्य-मनुभाष्याचष्टे—प्रत्यधिकरणमस्य साधनम् । अधिक्रियत इत्यधिकरणं 54/tha
साध्यम्, तदधिकृत्य साधनप्रवृत्तेः । प्रत्यधिकरणं साधनं यस्मिन् वादे स तथोक्तः अस्यैवार्थं निष्कर्ष्टुं पृच्छति—किमुक्तं भवति ? निष्कर्षति—

४ स्यादिति ] सर्वदेव दुःखिना भाव्यमितिnvt-C
५ *] तद्यवस्थानं न नित्य°nvt-C
६ नेन ] स्थातव्यं याव°nvt-C
७ र्वाणि ] सर्वसम°nvt-J
१२ *] मा भूत्, पृथिव्यादिगतंnvt-C
१६ *] यद्येवमापात°nvt-J
१९ हायानां ] निर्णयः फलमितिnvt-C
२० येन ] गोचरेण निर्णयेनnvt-J

उभाभ्यां वादिप्रतिवादिभ्यां स्वस्वसाध्ये साधनं वक्तव्यम् । तथा च नानाप्रवक्तृकत्वेन तुल्यत्वेऽपि वादस्य वितण्डायाः प्रत्यधिकरणसाधनत्वेन भेदः सिद्धो भवति । वितण्डायाः प्रतिपक्षस्थापनाहीनतया प्रत्यधिकरणसाधनत्वाभावात् । तथापि जल्पादभेदो वादस्य, अस्ति हि जल्पस्य प्रत्यधिकणसाधनवत्वं च नानाप्रवक्तृकत्वं चेति । अत आह—अन्यतरस्मिन्नधिकरणे निर्णय इति । वादे हि तावद ब्रूते, न यावदन्यतरस्मिन् पक्षे निर्णयो जातः । तत्त्वभुभुत्सोर्वादिनोर्वादेऽधिकारात् । जल्पे तु पुरुषशक्तिपरीक्षालक्षणेऽप्रतिभादिनापि पराजयोपपत्तेर्नावश्यं तत्त्वनिर्णयः । तस्मादन्यतरनिर्णयावसानत्वेन जल्पाद् भेदो वादस्येति सिद्धम् । यथा चैतत्, तथोपरिष्टात् उपपादयिष्यते इत्याह तच्चेति । तस्य स्वरूपं पृच्छति—सोऽयमिति । उत्तरम्—वाक्येति । चोदयति—ननु चेति । वाक्यसमूहश्च ज्ञानं चेति विप्रतिषिद्धमेतदित्यर्थः । परिहरति—नेति । साधनोपालम्भग्रहणस्य शब्दविषयत्वादविरोध इत्यर्थः । § 70

युगपदेव जल्पवितण्डे व्याचष्टे—तद्विशेषाविति । विशिष्येते भिद्येते इति विशेषौ । तस्माद् वादाद् विशेषौ भिन्नौ । भाष्यनुभाष्य पृच्छति—कः पुनर्विशेषः । यद्योगाद् विशिष्टे वादात् जल्पवितण्डे इत्यर्थः । उत्तरम्—अङ्गाधिक्यमङ्गहानिश्च यथासंख्यम् । तदेव दर्शयति—छलेति । तत् किमिदानीं संशयादिभिरिवात्यन्तवैरूप्यं वादेन जल्पवितण्डयोः । नेत्याह—एतावता विशेषेण कथामार्गभेद इति । एतावानेव विशेषो न सर्वथा, कथात्वेन संशयादिव्यावृत्तेन सामान्यविशेषेण त्रयाणामप्यभेदादित्यर्थः । अपरमपि भेदहेतुमाह—विषयभेदाच्चेति । तद् विभजते—शिष्यादीति । शिष्यमाणोऽत्यन्तविपर्यस्तः दुर्ज्ञानावलेपदुर्विदग्ध इति यावत् । न त्वेवंभूतः शिष्यादिर्विपर्यस्तोऽप्यनवलिप्तत्वादिति भावः । § 71

55/tha

क्रमप्राप्तानां हेत्वाभासानां स्वरूपमाह—अन्यतमेति । पञ्चसु चतुर्षु वा लिङ्गरूपेष्वन्यतमं लिङ्गं धर्ममेकं द्वयं त्रयं वानुविदधाना अहेतवो हेतुवदाभासन्त इति हेत्वाभासा उक्ताः । निग्रहस्थानेभ्य इति भाष्यमवतारयितुमाह—ते च निग्रहस्थानमिति । अवतारयति—निग्रहस्थानेति । अवतार्य दूषयितुमेकदेशिमतेन व्याचष्टे—यस्मात् किलैत इति । किलशब्दोऽयमरुचौ । तदेतदेकदेशिव्याख्यानं दूषयति—न, उभयथाप्यसंबन्धात् । किं ये ये निग्रहस्थानेभ्यः पृथगुपदिश्यन्ते, ते सर्वे वादे चोद्यन्ते ? अथ ये ये वादे चोद्यन्ते ते सर्वे पृथगुपदिश्यन्त इति ? उभयथाप्यनैकान्तिकत्वात् नाविनाभावलक्षणः संबन्ध इत्यर्थः । तदेतद् विभजते—न वादे चोदनीयत्वमिति । कस्माद् उभयथाप्यविनाभावाभाव इत्यत आह—यदि तावदिति । तस्मात् नायमविनाभूतो हेतुर्वादे चोदनीयत्वं वा पृथगुपदेशो वा

८ तिभादिनापि ] °योत्पत्तेः nvt-J
९ रिष्टात् ] प्रतिपाद° nvt-C
२१ भेदाच्चेति ] °भेदाद्वेति nvt-C
३३ स्माद् ] कुतःnvt-C

भाष्यकारेणोक्त इत्युपसंहरति—तस्मादिति । वादे चोदनीयत्वादित्युपलक्षणम्, पृथगुपदेशादिति च द्रष्टव्यम् । तदेवमेकदेशिमतं दूषयित्वा स्वमतेन भाष्यं व्याचष्टे—एतदेव तु न्याय्यमिति । निग्रहस्थानेभ्यो हेत्वाभासानां पृथगुपदेशे प्रयोजनं यद् भाष्याक्षरेभ्यः साक्षात् प्रतीयते । सामान्योपदेशेन विशेष उपदिष्टे विशेषोपदेशः प्रयोजनाधिक्यं सूचयति । यथा ब्राह्मणान् भोजय कठं चेति कठभोजने विशषो गम्यते, तद्वदिहापि निग्रहस्थानोपदेशेनैव हेत्वाभासेषु लब्धेषु तेषां विशेषेणाभिधानप्रयोजनाधिक्यं सूचयति । एतावानेव सूत्रकृतो व्यापारो यत् सूत्रणं नाम । तत्र निग्रहस्थानविशेषाणां हेत्वाभासानां स्वरूपं वादस्य च तत्त्वनिर्णयावसानत्वमालोच्य वादे चोदनीया भविष्यन्ति निग्रहस्थानत्वेन हेत्वाभासा नाप्रतिभादय इति प्रयोजनं वर्णयांचकार भाष्यकारः । स्यादेतत् । भवन्तु वादे चोदनीया हेत्वाभासाः, मा च भूवन्नप्रतिभादयः । किमेवमपीत्याह—विद्याप्रस्थानप्रभेदज्ञापनार्थत्वात् । वादजल्पवितण्डा विद्याः परम्परया निःश्रेयसोपयोगात् । तासां प्रस्थानं 56/tha व्यापारः, तस्य भेदः, तज्ज्ञापनार्थत्वात् । अत+एव जल्पवितण्डयोस्तु इत्याह । चोदयति—अथ कस्मादिति । यदि वादे हेत्वाभासाः प्रयुज्येरन् ततो निग्रहस्थानत्वेन चोद्येरन्, न तु तेषामस्ति प्रयोगोऽप्रमाणत्वात् प्रमाणतर्कसाधनोपालम्भत्वाच्च वादस्य । तस्मात् निग्रहस्थानमात्रत्वं हेत्वाभासानाम् । *तथा च न पृथगुपदेशः, निग्रहस्थानोपदेशेनैव लब्धत्वादित्यर्थः । परिहरति—प्रमाणसामान्यादिति । न खलु हेत्वाभासान् तद्बुद्ध्या प्रयुञ्जाते वादिप्रतिवादिनौ, अपि तु हेतुबुद्ध्या । तथा चास्ति तेषां वादे प्रयोग इति, वादे निग्रहस्थानत्वेन हेत्वाभासाश्चोद्यन्ताम्, नाप्रतिभादीनीत्यर्थवान् पृथगुपदेशः । तदेतद् विकल्प्याक्षिपति—वादे कानिचिदिति । समाधत्ते—न, लक्षणपरतन्त्रत्वादर्थतथाभावस्येति ब्रूमः । लक्ष्यत इति लक्षणम्, समानासमानजातीयव्यावृत्तं रूपं वादस्य च निग्रहस्थानानां च । तदधीनो हि तेषां तथाभावो व्यवस्था, कानिचिदेव निग्रहस्थानानि वादे न तु सर्वाणीति सामान्यतोऽभिधाय तदेव लक्षणपरतन्त्रत्वमभिमते विशेषे योजयति—वादस्येति । उक्तमाक्षिपति—प्रमाणप्रतिरूपकत्वादिति । निश्चितौ हि वादं कुरुतः । निश्चयश्च प्रमाणफलमिति कुतोऽप्रमाणस्यावकाश इत्यर्थः । उत्तरम्—भ्रान्तेरिति । न निश्चयः सर्वः प्रमाणमूलोऽप्रमाणमूलस्यापि तस्य दर्शनात्, अन्यथा विपर्यासादप्रवृत्तिप्रसङ्गात् । वादिनोश्चाभ्रान्तत्वे वस्तुनो विरुद्धधर्मद्वयसमालिङ्गितत्वमेकदा स्यादिति भावः । पृच्छति—कः पुनः शिष्येति । उपास्योपासकयोः परस्परं न ध्वंसनं संभवतीति भावः । उत्तरम्—विवक्षितार्थाप्रतिपादकत्वमेव न खलीकार इति । हेत्वाभासानां च पृथक्करणं न वादे *तन्मात्रावधारणार्थम्, अपि तु

१ वादे ] देशनीयत्वा°nvt-C
२ च ] °दिस्यपिnvt-C
७ ति ] वाक्यमिदं भ्रष्टम्nvt-C
९ नीया ] देशनीयाnvt-C
१४ इत्याह ] भाष्यकार इति शेषः ।
१७ * ] तथा चापृ°nvt-C
३० स्तुनो ] °धर्मसमा°nvt-J
३३ * ] तावन्मा°nvt-C

यस्मिन्ननुद्भाविते ऽपि निग्रहस्थाने तत्त्वप्रतिपत्तिव्याघातो भवति, *तस्य सर्वस्य संग्रहार्थम् । एवं च न्यूनाधिकापसिद्धान्ता अपि संगृहीता भवन्ति ।
57/tha तत्र पृच्छति—न्यूनाधिकेति । उत्तरम्—प्रमाणेति । जल्पवितण्डयो स्त्विति भाष्यमनुभाष्यापपादयति—जल्पवितण्डयोस्त्विति । साहङ्कारो विजिगीषुरप्रतिभादिभिरपि निग्रहस्थानैस्तिरस्कृतो गलिताहङ्कारस्तत्त्वबुभुत्सुतां नीतः पश्चाद् वादेन व्युत्पाद्यत इत्यर्थः । § 72

छलजातिनिग्रहस्थानानां पृथगुपदेशप्रयोजनपरं भाष्यमनुभाषते—छलेति । *उपलक्षणार्थमिति भाष्यावयवं व्याचष्टे । परिज्ञानार्थमेव केवलम्, परिज्ञानस्य फलमुक्तम्—स्ववाक्ये परिवर्जनमप्रयोगः, परवाक्ये चोद्भावनमिति । चोदयति—छलजातिनिग्रहस्थानानीति । अत्र हि जातेः स्ववाक्ये परिवर्जनमुक्त्वा पुनः स्वयं प्रयोगो न युक्तः । कस्मात् ? व्याघातात् । एतद् विभजते—स्ववाक्य इति । परिहरति—न व्याघातः । *कुतः ? प्रश्नापाकरणार्थत्वात् । तद् विभजते—स्वयं च सुकरः प्रयोग इत्यनेन भाष्येण । किमुक्तं भवति ? परेण प्रतिवादिना जातौ प्रयुक्तायां वादी प्राश्निकान् सभ्यान् ब्रवीति—जातिरनेन प्रतिवादिना प्रयुक्तेति । ते प्राश्निका एनं पर्यनुयुञ्जीरन् हे वादिन् कथं केन प्रकारेण जातिः चतुर्विंशत्यां जातिषु कतमा जातिरिति । सोऽयं प्राश्निकानां प्रश्नः । तदपाकरणार्थं स्वयं सुकरः प्रयोग इत्यर्थः । प्रकृतमुपसंहरति—तस्मादेत इति । § 73

सूत्रकारेण शास्त्रस्यात्यन्तिकदुःखोपरमरूपनिःश्रेयसाधिगमः प्रयोजनमुक्तम् । भाष्यकारस्तु नास्त्येव तत् प्रेक्षावतां प्रयोजनम्, यत्रान्वीक्षिकी न निमित्तं भवतीत्याह—सेयमान्वीक्षिकीति । तदेतद् भाष्यं व्याचष्टे—सेयमान्वीक्षिकी न्यायविद्येति । यद्यपीतरा विद्याः प्रामाणिकमेवार्थमभिनिविशन्ते तथाप्येतद्विद्याप्रतिपाद्यमेव प्रमाणाद्युपजीव्य स्वे स्वे व्युत्पाद्ये तत्त्वे प्रवर्तन्ते, न तु प्रमाणाद्यपि व्युत्पादयन्ति । यथा प्रत्यक्षाद्युपजीव्य प्रवर्तमानमनुमानं न प्रत्यक्षादिविषयमपि तदानीमेव गोचरयति । तदनेन विद्योपकरणग्रहणेन व्यापार आन्वीक्षिक्या दर्शितः । संप्रति विद्यानां यानि कर्माणि प्र-
58/tha तिपाद्यानि सामाग्निहोत्रकृष्यादीनि तत्राप्यान्वीक्षिक्युपाय इत्याह—उपायः सर्वकर्मणां विद्याव्युत्पाद्यानाम्, न तु हालिकमृगव्यादिकर्मणामपि । न हि विद्यापदेभ्यो यावन्मात्रावगतिः, तावन्मात्रेण प्रेक्षावतां परितोषः । मा भूत् आदित्यो वै यूपः इत्यादिभ्यः आदित्यादीनां यूपादिता । तस्मात् संशयपरीक्षाप्रमाणविनिवेशद्वारेण तदर्थतत्त्वमवधार्य तत्र त्रयी विनिवेशनीया । एवं दण्डनीतिवार्तयोरनुगन्तव्यम् । *तस्मादान्वीक्षिकीपरिशोधितप्रमाणप्रकाशितं

१ *] तस्य संग्र°nvt-C
८ *] °र्थ इति भाष्यावयवार्थंnvt-C
८ मेव] °र्थमपिnvt-C
११ यं] प्रयोजनयुक्तःnvt-C
१२ *] कुत इति नास्तिnvt-J
१४ युक्तायां] यदिnvt-C
२३ त्वे] अथ तत्वेnvt-C
२८ तु] °मृगयादि°nvt-C
३२ म्] °रप्यवग°nvt-C
३२ *] यस्मात्nvt-C

सामादीतरा विद्याः कुर्वन्ति विषयमिति शेषः । अपि च द्रव्यगुणकर्मणाम-
भिमतानभिमतोपायताप्रज्ञापनेन यथायथं सर्वा विद्याः प्रेक्षावन्तः प्रवर्तयन्ति
निवर्तयन्ति वा । तत्र किमविशेषेण साध्यसाधनेतिकर्तव्यतासु प्रवर्तयन्तु,
आहोस्वित् साधनेतिकर्तव्यतामात्रे ? तत्र यदि साध्यांशोऽपि प्रवर्तनागोच-
रः, तदा श्येनादिसाध्याया हिंसाया विहितत्वेनानर्थत्वम् । अथ साध्यांशं
रागतः प्राप्तमनूद्य साधनेतिकर्तव्यते एव विधीयेते, ततः श्येनादिसाध्याया
हिंसाया अविहितत्वेन न हिंस्यात् सर्वाभूतानि इति प्रतिषेधादनर्थत्वम् । तदिह
साध्यांशेऽप्रवर्तनमान्वीक्षिकीगम्यम् । एवमनुष्ठानगताः प्रयोजकत्वाप्रयोजक-
त्वादय आन्वीक्षिकीगम्या । एवं वार्तादिष्वपीति । तदेवमान्वीक्षिकीमाश्रयन्ते
सर्वविद्या इत्याह—आश्रयः सर्वधर्माणाम् सर्वासां विद्यानां पुरुषप्रवर्तना
धर्माः, तेषामाश्रयः । वार्त्तिककारस्तु धर्मद्वारेण विद्यानामेवाश्रय इति व्याच-
ष्टे—सर्वविद्योपकारकत्वादाश्रयः, सर्वासां विद्यानामियमुपकरोति । विद्यया
प्रवर्तनायां कर्तव्यायामियं सहकारितयोपकरोतीत्यर्थः । § 74

स्यादेतत् । व्युत्पाद्याश्चेत् प्रमाणादयः सर्वविद्योपयोगिनः, न तर्ह्यात्य-
न्तिकी दुःखनिवृत्तिरान्वीक्षिक्याः फलं निःश्रेयसपदादवगम्यते । व्युत्पाद्यस्व-
भावालोचनया हि तद् गम्यते, स च विद्यान्तरसाधारण इति विद्यान्तराधिग-
म्येन निःश्रेयसेन सङ्करप्रसङ्ग इत्यत आह—तदिदं तत्त्वज्ञानं निःश्रेयसाधिग- 59/tha
मश्च यथाविद्यं वेदितव्यम् विद्यान्तराणि तावद् यत् तत्त्वज्ञानं कुर्वन्ति तत्स्व-
भावालोचनया हि तद्विद्यासाध्ये एव निःश्रेयसभेदे उपयुज्यन्ते नान्यत्र । इह
तु प्रमाणादि यद्यपि साधारणम् तथाप्यसाधारणात्मादिरूपप्रमेयसमभिव्याहृतं
सदभिमत एव निःश्रेयसेऽवतिष्ठत इति । विशुद्धेनार्जनेन होमसाधनस्य द्र-
व्यस्य प्राप्तिः स्वागतम् । आदिग्रहणेन क्रमपर्यन्ताङ्गग्रामसाकल्यं गृह्यते ।
श्वमार्जारादिभिरनुपघातोऽनुपहतत्वम् । आदिग्रहणाद् विशुद्धोऽभिसन्धिरिति
। शेषमतिरोहितम् । वादादीनां निग्रहस्थानान्तानामुपदेशः पराभिभवोपायत-
या मदमानादिहेतुत्वेन निःश्रेयसपरिपन्थीति मन्वानश्चोदयति—मदमानादीति
। परिहरति—न, सूत्रार्थापरिज्ञानात् । नायं सूत्रार्थः, सर्वेषां तत्त्वज्ञानं
साक्षान्निःश्रेयसोपयोगीति, किंत्वात्मादितत्त्वज्ञानम् । *तदितरत् तु पारम्प-
र्येण । तत्र जल्पादीनां पराहङ्कारप्रशमनमवान्तरव्यापार इति न निःश्रेय-
सपरिपन्थिता, किंत्वानुकूल्यमित्यर्थः । मदमानादिनिमितत्तत्त्वं च हेतुरसिद्ध
इत्याह—यच्चेदमिति । उपसंहरति—तस्मान्न निमित्तं वादादिपरिज्ञानं रागा-
दीनामिति । इतिः सूत्रसमाप्तौ ॥ १ ॥ § 75

२ थं ] यथास्वंnvt-C
५ दा ] ततःnvt-C
५ अथ ] साध्यंnvt-C
९ एवं ] °गम्या एव वार्ता°nvt-C
१५ ते ] °गम्येतnvt-C
१६ ते ] गम्येतnvt-C
१८ न्ति ] कुर्वन्तीतिnvt-C
१९ न्ते ] उपयुज्यतेnvt-J
२० म् ] तथाप्यात्माप्यसाधारणात्मादिरूप°nvt-C
२२ णेन ] क्रमप्राप्ताङ्ग°nvt-C
२३ म् ] अनुपहतम्nvt-J
२७ * ] तदितरेषां पार°nvt-C
२९ त्वं ] °नादिहेतुत्वंnvt-C

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ १ । १ । २ ॥ § 76

तदेवं प्रथमसूत्रेण शास्त्रस्याभिधेयप्रयोजनसंबन्धान् दर्शयता पदार्थाः
प्रमाणादय उद्दिष्टाः । तेषां च लक्षणमुक्त्वा तत्परीक्षा वर्तयिष्यते, अप-
रीक्ष्य तत्त्वज्ञाननिर्णयायोगात् । न चानिर्णीतप्रयोजनसंबन्धानां प्रमाणादीनां
लक्षणपरीक्षयोरवसरः । न च प्रयोजनसंबन्धनिर्णयः परीक्षां विनेति त-
60/tha त्परीक्षार्थं द्वितीयं सूत्रम् । तत्र प्रयोजनाभिधानस्य द्वैविध्यात् संशयः ।
द्विविधं हि प्रयोजनाभिधानं ग्रन्थकृतां दृष्टं समीचीनमसनीचीनं च, यथा
वार्त्तिकादिप्रयोजनाभिधानमायुर्वेदादिप्रयोजनाभिधानं च । तस्मादभिधान-
सामान्यादुभयथा दर्शनाच्च संशयः तत्रोत्सूत्रेण प्रयोजनाभिसंबन्धप्रतिपादन-
परं पूर्वपक्षभाष्यम्—तत् खलु वै निःश्रेयसमित्यादि । तद् विभजते—न
तत्त्वपरिज्ञानादपवर्गः । कुतः ? उभयथा दोषात् । तदत्यन्तविमोक्षलक्ष-
णोऽपवर्गो निःश्रेयसम् । तच्चेत् तत्त्वज्ञानानन्तरम्, सम्प्रदायोच्छेदो वात-
पुत्रीयता च शास्त्रस्य स्याताम् । तस्मान्न तत्त्वज्ञानानन्तरं निःश्रेयसम् ।
तथा सति प्रमाणदितत्त्वज्ञानान्निःश्रेयसमिति मिथ्या । न चान्यन्निःश्रेयस-
मित्यभिमानः पूर्वपक्षवादिन इति । अत्रेदं सिद्धान्तसूत्रमुपतिष्ठते—दुःखज-
न्मेति । तस्य तात्पर्यमभिधायावतारयति—न प्रयोजनानभिसंबन्धः । कुतः
? निःश्रेयसस्य परापरभेदात् । चतस्रो हि प्रतिपत्तयः प्रमेये आत्मादौ ।
प्रथमा तावदागमात् यामाचक्षते श्रवणमिति । द्वितीया तु श्रुतस्य *प-
रीक्ष्य न्यायेन व्यवस्थापनम् यामाहुर्मननमिति । सा चान्वीक्षिक्यामायतते ।
आन्वीक्षिकी च संशयादिः तत्त्वज्ञापनं प्रमाणतत्त्वज्ञापनायोपादत्ते । प्रमाणत-
त्त्वज्ञापनं च हेयोपादेयभेदव्यवस्थितप्रमेयतत्त्वपरिज्ञापनाय । *तत्राप्याद्यन्तव-
र्जितदशवर्गज्ञापनमाद्यन्तयोरेवात्मापवर्गयोरुपादेययोस्तत्त्वज्ञानस्योपकरोति ।
न चायमान्वीक्षिकीविद्यावधृतप्रमेयतत्त्वोऽपि परितुष्यति, पूर्ववदेवात्मादिग-
तंविपर्ययवासनानुवृत्तेः । नो खलु दिङ्मूढः सहस्रेणाप्यनुमानैर्विपर्ययसंस्कार-
मपनयति । तत्त्वसाक्षात्कारस्तु विपर्ययसंस्कारं निवर्तयति । तज्जनिता च
वासना *विपर्ययवासनामिति लोकसिद्धम् । तस्मादात्मादिसाक्षात्कारवतीं
चतुर्थी *प्रतीतिमशेषतद् गोचरवासनाविपर्यासशमनीमर्थयमानेनादरनैरन्त-
र्याभ्यां *ध्यानचिन्तादिशब्दवाच्या तृतीया प्रतीतिः साक्षात्कारफला दीर्घकाल-

४ रीक्षा ] वर्तिष्यतेnvt-J
६ रः ] °रवकाशःnvt-C
१० नाच्च ] °दयथार्थदर्शि°nvt-C
१० त्रोत्सूत्रेण ] प्रयोजनानभि°nvt-J
१४ स्याताम् ] वातपुत्रीयं वा शास्त्रं स्यात्nvt-C
१५ मिति ] °श्रेयसाधिगम इतिnvt-C
१६ भिमानः ] °भिसन्धिःnvt-C
१९ *] परीक्षा न्यायेनैवावस्था°nvt-C
२२ *] °वर्गज्ञापनेना°nvt-J
२३ रोति ] ज्ञापनस्यो°nvt-J
२६ ति ] विपर्याससं°nvt-J
२६ संस्कारं ] साक्षात्कारंnvt-J
२७ *] विपर्यासवास°nvt-J
२८ *] प्रमाम्nvt-C
२९ *] ध्यानार्चितादि°nvt-C
२९ वाच्या ] तज्ञा या प्रती°nvt-C

मुपासनीया । अथ परिनिष्पन्नध्यानोपायः साक्षात्कारवतीं प्रतिपद्य चतुर्थीं 61/tha प्रतीतिं निर्मुक्तसकलक्लेशजालोऽप्रवर्तमानो धर्माधर्मसाधनेषु निरुद्धानागत-धर्माधर्मप्रबन्धोत्पादो भूतेन्द्रियविजयी प्रज्ञाज्योतिर्जीवन्नेव मुक्त इत्युच्यते । न चैवमवस्थो वीतरागोऽपि सहसैव देहादिभिर्वियुज्यते, प्रागुपात्तस्य धर्माध-र्मप्रचयस्याभुक्तस्य भुज्यमानस्य *चाप्रक्षीणत्वात् । न च प्रायश्चित्तेनेवात्म-ज्ञानेनादत्तफलान्येव कर्माणि क्षीयन्त इति युक्तम्, नाभुक्तं क्षीयते कर्म । इति स्मृतेः । अत्यन्त सुखदुःखसंविज्ञानविरोधस्य कर्मणामवधारणात् । औत्सर्गिकस्य क्वचित् प्रायश्चित्तादौ विशेषवचनेनापवादात् । क्षीयन्ते चास्य कर्माणि । मुण्डक २. २. ८ इति श्रुतेः । योगर्द्धिवशाद् युगपदुत्पादितानेक-विधदेहोपभोगेनाप्युपपत्तेः ।

तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये ।
छान्दोग्योपनिषदि ६. १४. २ § 79

इति चाभुक्तोपभुज्यमानफलकर्मप्रक्षयावधित्वदर्शनम् । योगर्धिव-शाद्यानियतविपाककालान्यपि दीर्घकालफलान्यपि कर्माणि पिण्डीकृत्य भूतेन्द्रियविजयितया युगपदेव भुङ्क्ते । अचिन्त्यो हि समाधिप्रभाव इत्युक्त-म् । न चाचिन्त्यत्वाद् विनैवोपभोगेन कर्माशयान् प्रक्षयिष्यतीति युक्तम्, दृष्टानुसारेण कथंचिदुपपत्तौ अत्यन्तादृष्टकल्पनाया अयोगात् । तस्मादुत्प-न्नतत्त्वसाक्षात्कारस्य दोषाभावात् प्रवृत्त्युपरमे योऽनागतापूर्वानुत्पादस्तदपरं निःश्रेयसम् । तच्च तत्त्वसाक्षात्कारानन्तरं भवति । तादृशश्च मुनिस्तत्त्व-ज्ञानवान् शास्त्रस्य प्रणेतेति न वातपुत्रीयं शास्त्रमिति । परं तु निःश्रेयसं योगर्द्धिप्रभवसम्पदा युगपदुपभोगेनोपात्तकर्माशयस्य क्षयात् सर्वदुःखोपरम इत्युपपन्नं निःश्रेयसद्वैविध्यमिति भावः । § 80
62/tha

तदेतद् दर्शयति—यत्तावदिति । तत्त्वसाक्षात्कारः तत्त्वज्ञानम् । संहर्षः सुखम् । आयासो दुःखम् । तत्रानागताभ्यां तावत् प्रवृत्त्यभावादनुत्पादादेव-मुच्यते । विद्यमानकारणे अपि सुखदुःखेऽशक्तोऽद्विष्टश्च भुञ्जानो न सुख-दुःखतया मनुते न ह्यस्ति संभवो न तत्र तृप्यति तच्च तस्य सुखम्, न च तद् द्वेष्टि तच्च तस्य दुःखमिति । स्यादेतत् भवत्वेतदपरं निःश्रेयसम्, प्र-कृते किमायातमित्यत आह—अयं शास्त्रार्थः । अर्थशब्दो निमित्ते । अपरं निःश्रेयसं शास्त्रस्य निमित्तम् । अथापरनिःश्रेयसोत्पादसमय एव परनिःश्रेय-

५ *] वाभुक्तस्य वाक्षीयमाणत्वात् nvt-C
१३ इति] वाभुक्त° nvt-C
१३ म्] °वधित्वप्रदर्शकम् nvt-C
१४ पि] °द्यानियतनियतफला° nvt-C
१६ त्वाद्] °न्त्यप्रभावत्वात् nvt-C
१६ यान्] क्षेप्यतीति nvt-J
२१ सं] समाधिप्र° nvt-C
२४ ताभ्यां] तावद प्र°nvt-C
२५ ते] मुत्पत्तेःnvt-C
२५ श्च] °द्विषंश्चnvt-C
२६ नुते] अनुमन्यतेnvt-C
२६ ति] तृप्यतिnvt-J

सोत्पादोऽपि कस्मान्न भवतीत्याह—परं तुनिःश्रेयसं तत्त्वज्ञानात् क्रमेण भवति । नो खलूत्पन्नतत्त्वसाक्षात्कारः सवासनाविपर्यासज्ञानतत्कार्यदोषतत्कार्यप्रवृत्तीनां निवृत्त्यै प्रयतते, कारणनिवृत्त्यैवायत्नलभ्यत्वात् कार्यनिवृत्तेः । न हि कफोद्भवज्वरप्रशमनाय कफनिवृत्तौ सत्यां यत्नान्तरमातिष्ठते, तत एव तत्सिद्धेः । परं तु निःश्रेयसं न तावद् भवति, यावदुपभोगादुपात्तकर्माशयप्रचयो न क्षीयते । तस्मात् तत्त्वसाक्षात्काराधानप्रयत्नात्परस्तदुपभोगप्रयत्न आस्थेयः । तथा च न तुल्यकाल उत्पादः परापरयोर्निःश्रेयसयोः । तदिदमुक्तम्—क्रमेणेति । § 81

तदेवमर्थगतिं परिशोध्य सूत्रमवतारयति—क्रमेति । यद्यप्यपरस्मिन्नपि निःश्रेयसे मिथ्याज्ञानदोषप्रवृत्तीनामपि समुच्छेदक्रमोऽस्ति, तथापि जन्मदुःखोच्छेदक्रमो नास्ति, पूर्वोपात्तस्य कर्माशयप्रचयस्य तादवस्थ्यात् । तस्मात् जन्मदुःखोच्छेदक्रमसमभिव्याहृतो मिथ्याज्ञानाद्युच्छेदक्रमः परस्यैव निःश्रेयसस्य शास्त्रप्रयोजनस्य । तत्प्रतिपादनमर्थः प्रयोजनं यस्य तत् तथोक्तम् । इदं चावान्तरप्रयोजनम् । प्रधानप्रयोजनमग्रे वक्ष्यति । § 82

अत्र केचित् योगविभागमिच्छन्ति । कारणोच्छेदात् कार्योच्छेदोऽभिमतो, न चासौ दुःखादीनां मिथ्यज्ञानान्तानामप्रदर्शिते कार्यकारणभावे सिध्यति । 63/tha तस्माद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येको योगः । अत्र किल समासादेतेषामितरेतरयोगोऽवगम्यते । स च योग्यतया कार्यकारणभावः । कार्येण कारणं युक्तम्, कारणेन च कार्यमिति । अतः सिद्धे कार्यकारणभावे उत्तरोत्तरापाये तदनन्तरापायादपवर्ग इत्यनेन योगेन कारणोच्छेदक्रमेण कार्योच्छेदक्रमप्रतिपादनेनापवर्गः प्रतिपाद्यते । अत्र चोत्तरत्वं पाठापेक्षया कारणस्य । तदनन्तरत्वं च कार्यस्याव्यवहितादिपाठापेक्षया । मिथ्याज्ञाने कारणे तत्कार्याः दोषाः । एवं शेषेष्वपि योज्यम् । तमिमं सूत्रविभागममृष्यमाणो वार्त्तिककृदाह—इदं सूत्रम् । एकवचनेन भेदं व्यावर्तयति । न हि समुच्छेदक्रमप्रतिपादनेनापवर्गपरतयैकवाक्यत्वे संभवति वाक्यभेदो न्याय्यः । एकनिवृत्त्या अन्यनिवृत्त्यैव कार्यकारणभाव आक्षिप्त इति नासौ सूत्रे दर्शनीयः । न ह्यर्थाक्षिप्तं सूत्रकारा दर्शयन्ति । तदिदं सूत्रग्रहणप्रयोजनम् । तथा हि—

स्वल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ § 85

विष्णुधर्मोत्तरे ३. ५. १ इति । अस्तोभमनधिकम्, अर्थलभ्यप्रदर्शने त्वधिकं भवेदिति । तत्सूचनात् सूत्रं स्यात् । तथा ह्याहुः,

२ नो] खलु इत्यत्रnvt-C
६ त्व] प्रयत्नश्चnvt-C
११ च] तुnvt-J
२० र्ग] °राभावादप°nvt-J
२३ मिमं] तमेतंnvt-C
२६ सूत्रे] सूत्रकारेणnvt-C

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥§ 87

इति । इतरेतरयोगेनापि कार्यकारणभावः सूचनीय एव । स वरमेकनिवृत्त्यान्यनिवृत्त्यैव सूच्यतामेकवाक्यतानुरोधायेति । परमतात्पर्यमस्याह—एतत्संबन्धेनैव । शास्त्रस्य निःश्रेयसाधिगमलक्षणेन प्रयोजनेन यः संबन्धः पूर्वमाक्षिप्तः, तत्समाधानेनार्थेन अर्थवदेतत् सूत्रम् । संबन्धपदेन विषयवाचिना विषयिसमाधानं लक्षयति । तदेवं सूत्रतात्पर्यं व्याख्यायावयवव्याख्यानमवतारयति—पदार्थस्त्विति । यद्यपि सामभेदादौ हलशकटादौ च मिथ्याज्ञानमनेकप्रकारं संभवति, तथापि न तत् संसारहेतुरपि त्वात्मादिद्वादशविधप्रमेयविशेषविषयमिति सूत्रस्थं मिथ्याज्ञानं विशेष्टुमाह—तत्रेति । तदेतेन आत्माद्यपवर्गपर्यन्त इत्यादि भाष्यमवतारितम् । तदेतदाक्षिपति को वृत्त्यर्थ इति । न खलु यथा कुण्डे वदरं पटे वा शौक्ल्यम्, एवं प्रमेये मिथ्याज्ञानं प्रवर्तते, तस्य ज्ञातृसमवेतत्वादित्यर्थः । उत्तरम्—*विषयार्थः । यावदुक्तं भवति प्रमेयविषयं मिथ्याज्ञानमिति, तावदुक्तं भवति प्रमेये वर्तत इति । विषयत्वं चाग्रे निवेदयिष्यते । अनेकप्रकारम् इत्युक्तम् । तदाह—तत्रायं भेदः । तत्रात्मनि तावत् प्रधाने प्रमेये नास्तीति कथं पुनरेतन्मिथ्याज्ञानमित्यत आह—आत्मा तावदिति । अत्र शङ्कते—तस्यानुपपत्तिः । कुतः ? सदसतोः सारूप्याभावादिति चेत् ? सर्वत्र हि रजतोदकादिविभ्रमेषु शुक्तिरजतयोर्वा मरुमरीचिसलिलयोर्वा सारूप्यमेव निमित्तं प्रतीमः । न हि जातु रूपं रसादिषु हस्तिनं वा मशकादिषु आरोपयन्ति । असदृशेऽपि श्वेते पीतभ्रमः, मधुरे च तिक्तभ्रमः, पीतः शङ्खस्तिक्तो गुड इति च दृश्यत इति चेत्—न, तत्रापि सारूप्यसंभवात् । तथा हि बहिर्निर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तगतं पीतिमानमाश्रयरहितम्, शङ्खं च दोषाच्छादितसितिमानमनुभवन् पीतगुणस्य च तदसंबन्धमननुभवंस्तदसंबन्धाग्रहेण पीतचिरविल्वादिसामानाधिकरण्येन सारूप्यात् शङ्खः पीत इति विपर्यस्यति । एवं त्वगिन्द्रियोपनीतं गुडद्रव्यमननुभूयमानमाधुर्यमनुभवन् रसनाग्रवर्तिनश्च पित्तस्यास्वभावजाततिक्तस्य तिक्तत्वमनुभवन् तदाश्रयं च पित्तमननुभवन्नसंबन्धाग्रहसारूप्यात् तिक्तनिम्बसामानाधिकरण्येन तिक्तो गुड इति विपर्यस्यति । अतिशीघ्रतया चैष क्रमो न लक्ष्यते । न च ब्रूमो यत्र सारूप्यं तत्र भ्रम इति, *येनातिप्रसक्तिश्चोद्येत, अपि तु यत्र भ्रमस्तत्रावश्यं कथञ्चित् सारूप्यमिति । एवं द्विचन्द्रदिङ्मोहालातचक्रादिष्वपि किञ्चित् कथञ्चित् सारूप्यमूहनीयम् । न च सदसतोरत्यन्तविलक्षणयोः सारूप्यमस्ति । तत् कथमात्मनि नास्तितारोप इत्याक्षेपः । § 88

३ भावः ] °नीय एवं वरंnvt-C
६ माधानेनार्थेन ] °धानेनnvt-C
७ माधानं ] °सम्बन्धिनंnvt-C
१२ को ] वृत्तिशब्दार्थःnvt-C
१३ * ] विषयशब्दार्थःnvt-C
२५ हेण ] °भवन्नसंबन्धा°nvt-J
२७ न् ] पित्तस्य तिक्तत्वमनु°nvt-C
२८ च ] तिक्तम°nvt-C
३० * ] °तिप्रसङ्ग°nvt-J
३१ ञ्चित् ] सादृश्य°nvt-J

समाधत्ते—न, प्रमाणगम्यतोपपत्तेः । आक्षेपं विभजते—न हि सदसती इति । समाधानं विभजते—तच्च नैवमिति । यदि सदसतोः समानत्वं नास्ति, तर्हि भेदः । तथा च कस्य कुत्रारोप इत्यत आह—क्रियागुणेति । सोऽयमसद्धर्मान् क्रियागुणरहितत्वादीन् सत्यात्मनि समारोप्यासत्तया विपर्यस्यति नास्त्यात्मेति, न त्वात्मानं सर्वतोऽभ्यर्हिततमम्, यं पश्यन् तत्रासौ स्निह्यति । स्नेहाच्च तदुपकाराय घटते । एवं तत्परिपन्थिनं द्वेष्टि । द्वेषाच्च तदपकाराय घटते । ततश्च कर्माशयमाचिनोति । ततो जन्म । ततश्च दुःखमिति । एवमात्मनस्तादृशस्य मा भूत् तत्त्वज्ञानम् । अस्तु नास्तितासमारोप एव तावद् यतो न प्रवर्तते । यथाहुः,

सुखी भवेयं दुःखी वा मा भूवमिति तृष्यतः ।
यैवाहमितिधीः सैव सहजं सत्त्वदर्शनम् ॥ प्रमाणवार्त्तिके
१.२०२-३ § 91

अत्रोच्यते । यद्यपि रागादिनिवृत्तिहेतुर्नैरात्म्यदर्शनम्, तथापि नास्ति कर्म, नास्ति कर्मफलमिति दृष्टेः परमं निदानम् । एवं प्रेत्याभावाभावज्ञानस्य च । तथा च दुःखहेतोर्हेयवर्गस्याभावान्न तद्धानायानेन घटितव्यम् । न चाघटमानो हेयं हातुमर्हति । सोऽयं वृश्चिकभिया पलायमान आशीविषमुखे निपतितः । सेयमास्तिकत्वायात्मास्तितोपासनीया । *अभ्यर्हितता चात्मनोऽत्यन्तदुःखनिवृत्तावुपपद्यते । अयमेव चास्योपकारो यदात्यन्तिकदुःखशमनम्, सुखाधाने त्वस्य तदनुषङ्गिदुःखाधानादपकारप्रसङ्गात् । न हि जातु कश्चिच्चेतनः सुखमाप्स्यामीति मधुविषसम्पृक्तमन्नमुपभुङ्क्ते । तस्मान्नैरात्म्यदृष्टिः प्रयत्नेनोच्छेत्तव्या प्रेक्षावतेति सिद्धम् । § 92

अपरमपि संसारहेतुं मिथ्यादर्शनमाह—एवमनात्मनीति । पृच्छति—किं पुनरिति । उत्तरम्—अहङ्कारेति । विशेषमाह—इच्छादीति । पुनः
66/tha पृच्छति—कथं पुनरिति । उत्तरम्—शरीरेति । उपसंहरति—एवमिति । सामान्यधर्मोऽहंकारास्पदत्वम् । विशेषधर्म इच्छाद्याधारता । तां खल्वयं शरीरादिष्वारोप्य एत एवाहमिति शरीरादिष्वात्मभावमारोपयति । § 93

एवं सिद्धं कृत्वा विपर्ययं सर्वमुक्तम् । संप्रति सन्दिहानो विपर्ययस्वरूपं पृच्छति—कः पुनरयं विपर्ययः ? परीक्षकाणां विप्रतिपत्तेः संशयः । केचित् स्वाकारबाह्यत्वविषयं ज्ञानं विपर्यय इत्याचक्षते । *अन्येऽसद्विषयं ज्ञानम् । *अन्ये त्वनिर्वचनीयमेव ज्ञानम् । *अपरे त्वग्रहणमेव । अन्यथाख्यातिं तु वृद्धाः । उत्तरम्—अतस्मिंस्तदिति प्रत्ययः । § 94

---

१५ मानो] ह्ययंnvt-C
१६ *] °र्हितत्वादात्म...वुपयुज्यतेnvt-C
२५ रीरादिष्वारोप्य] तत nvt-C
२६ न्दिहानो] विपर्यास° nvt-J
२७ केचित्] आत्मख्यातिवादिनो योगाचाराः
२८ यं] स्वाकारं बाह्य° nvt-C
२८ *] असत्ख्यातिवादिनो माध्यमिकाः
२९ *] अनिर्वचनीयख्यातिवादिनोवेदान्तिनः
२९ *] अख्यातिवादिनः प्राभाकराः
२९ तु] °ख्यातिरिति तु nvt-C
३० वृद्धाः] नैयायिकाः ।

इदमत्राकूतम्—न तावत् स्वाकारं रजतादि बाह्यतया आलम्बन्ते विभ्रमाः । तथा हि ज्ञानाकारत्वं रजतादेरनुभवाद् व्यवस्थाप्येत, अनुमानाद् वा ? अनुभवोऽपि रजतप्रत्ययो वा स्याद् बाधकप्रत्ययो वा ? न तावद् रजतप्रत्ययः । स हीदमनहङ्कारास्पदं रजतमादर्शयति, न त्वान्तरम् । अहमिति तदा स्यात्, प्रतिपत्तुः प्रत्ययादव्यतिरेकात् । भ्रान्तं हि ज्ञानं स्वाकारमेव बाह्यतया आलम्बते । तथा चानहंकारास्पदमस्य विषयो ज्ञानाकारोऽपि । ज्ञानाकारता पुनरस्य बाधकज्ञानप्रवेदनीयेति चेत् ? हन्त चक्षुषी निमील्य वैतालिकपक्षपातं परित्यज्यालोचयत्वायुष्मान् किं पुरोवर्तिद्रव्याकारतामात्रं प्रतिषेधति रजतस्य, आहोस्वित् ज्ञानाकारतामप्यस्यादर्शयति बाधकप्रत्ययः ? तत्र ज्ञानाकारतोपदर्शनं व्यापारं बाधकप्रत्ययस्य ब्रूवाणः श्लाघनीयप्रज्ञो देवानांप्रियः । पुरोवर्तित्वनिषेधादर्थात् ज्ञानाकारतासिद्धिरिति चेत् ? *तन्निषेधो वणिग्वीथ्यादावुपलब्धस्य रजतस्य व्यवस्थापने हेतुः । आन्तरत्वं त्वस्यानुपलब्धचरं कुतस्त्यम् ? न चानुमानमत्र प्रभवतीति चतुर्थे निवेदयिष्यते । § 95

67/tha

सन्तु तर्हि बाधकप्रत्ययानुरोधादसत्प्रकाशनशीला एव मिथ्या प्रत्ययाः । तथा हि बाधकं विज्ञानं नेदं रजतमिति रजतज्ञानगोचरस्यासत्त्वं गृह्णाति । न चासतो विषयभावो नोपपद्यते । न हि विषयत्वं नाम कारणत्वं येनासति न स्यात्, किं तु स्वकारणाधीनः सामर्थ्यातिशयः । स तादृशो ज्ञानस्य, येन सन्तमिवासन्तमपि गोचरयति । न च विषयसामर्थ्यमत्रोपयुज्यते, ज्ञानस्य सामर्थ्यादेव तद्भावसिद्धेः । अत+एवासत्प्रकाशनसामर्थ्यमेव मिथ्याज्ञानानामविद्यात्वमनिर्वचनीयं केचिदास्थिषत । अत्रेदमालोचनीयम्—किमेतन्मिथ्याज्ञानमसत् सदात्मना गृह्णातीत्यसद्विषयमुपेयते, आहोस्वित् सदेव सदन्तरात्मना गृह्णाति, सतश्च सदन्तरात्मत्वेन असत्त्वादसद्विषयमुच्यते ? न तावत् पूर्वः कल्पः, रजतात्मना चेदसदालम्बेत, न सतीं शुक्तिकाम्, कथं पुनरसौ रजतार्थी शुक्तौ प्रवर्तते न पुना रजताभावे ? कस्माच्चेदमिति पुरोवर्ति द्रव्यमङ्गुल्या निर्दिश्य तस्य रजतत्वं निषेधति—नेदं रजतमिति, यदि तत्र न प्रसञ्जितं रजतत्वं पूर्वविज्ञानेन ? अथ शुक्तिरेव रजतात्मना असतीति तदाकारतया तामालम्बमानं मिथ्याज्ञानमसदालम्बनमुच्यते ? तत्रानुज्ञया वर्तामहे । न खल्वन्यथाख्यातिवादिनोऽपि सदन्तरं सदन्तरात्मना सदभ्युपगच्छन्ति । तथा सत्यन्यथेत्येव न स्यात् । यथाहुरन्यथाख्यातिवादिनः,

८ निमील्य ] वैज्ञानिक° nvt-C
८ त्वायुष्मान् ] °चयतु भवान nvt-C
१० स्य ] बाधकस्य nvt-J
१२ * ] न त्वस्या तन्नि° nvt-C
१३ त्वं ] त्वनुपलब्ध° nvt-C
१३ तुर्थे ] ४.२.३५
२१ नीयं ] °नीयत्वंnvt-C
२२ ते ] °मुच्यतेnvt-J
२३ श्च ] °रात्मनाnvt-C
२४ ल्पः ] पक्षःnvt-J

तस्माद् यदन्यथा सन्तमन्यथा प्रतिपद्यते ।
तन्निरालम्बनं ज्ञानमभावालम्बनं च तत् ॥§ 98

श्लोकवार्त्तिके निरालम्बनवादः ११७-८ इति । न च रजतात्मना पुरोवर्तिनो द्रव्यस्यानिर्वचनीयता, मिथ्याज्ञानसमये सत्त्वेन बाधकसमये चासत्त्वेन निर्वचनीयत्वात् । न चैवंभूतस्यासतः प्रथा नोपपद्यते, तस्य सदसद्भ्यामुपाख्येयत्वात् । यः पुनरद्वैतवादिनां प्रपञ्चो वैनाशिकानां वा सामान्यादिर्नो बहिः किं त्वलीकम् । तद्विषयं च ज्ञानं मिथ्याज्ञानमित्यपि न संभवति, तस्य सर्वोपाख्यारहितस्य केनचित् सारूप्याभावात्, तत्कारणकत्वाच्च भ्रान्तेः । कारणाभावे कार्याभावस्य सुलभत्वात् । तस्मात् प्रपञ्चश्च सामान्यादि च वस्तुसती नासमीचीनविज्ञानगोचरौ । तद्बाधकं चोपरिष्टादपाकरिष्यति । तस्मान्नानिर्वचनीयख्यातिरपि । स्यादेतत् । अन्यदन्यथा प्रकाशत इति संविद्विरुद्धम् । न तावत् सद्भावमात्रेणालम्बनत्वम् । तन्मात्रस्य सर्वप्रत्ययसाधारण्येन सर्वेऽर्था सर्वप्रत्ययविषया इति सर्वसर्वज्ञतापत्तिः । न च कारणत्वेनालम्बनत्वम्, रूपादिविज्ञानानां रूपादिवच्चक्षुराद्यपि कारणमिति चक्षुराद्यालम्बनत्वप्रसङ्गात् । अतीतानागतविषयत्वं च विज्ञानस्य न स्यात्, अतीतानागतयोरसत्त्वेनाकारणत्वात् । तस्मात् प्रतिभासमानमालम्बनम् । तथा च रजतप्रतिभासः शुक्तिकालम्बनमिति दुर्घटम् । अपि च चक्षुरादीनां समीचीनज्ञानोपजननसामर्थ्यमिति कथमेभ्यो मिथ्याज्ञानं भवितुमर्हति । न हि श्यामाकबीजं परिकर्मसहस्रेणापि कलमाङ्कुराय कल्पते । दोषसहाया लोचनादयो मिथ्याप्रत्ययमादधत इति चेत्—न, दोषा हि कारणानां सामर्थ्यं निघ्नन्ति, न पुनः कार्यान्तरोपजननसामर्थ्यमादधति । न खलु भृष्टं कुटजबीजं न्यग्रोधधानायै कल्पते, किं तु न करोति कुटजधानाम् । अपि च स्वगोचरे व्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः । तस्मात् सर्वमेव विज्ञानं समीचीनमास्थेयम् । तथा हि रजतमिदमिति द्वे ज्ञाने स्मृत्यनुभवरूपे । तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणम्, दोषवशात् तद्गतस्य शुक्तिकात्वसामान्यविशेषस्याग्रहणात् । तावन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति । सा च गृहीतग्रहणस्वभावापि दोषवशात् गृहीतांशप्रमोषेण ग्रहणमात्रमवतिष्ठते । तथा च रजतस्मृतेः पुरोवर्तिमात्रग्रहणस्य च मिथः स्वरूपतश्च विषयतश्च भेदाग्रहणात् सन्निहितरजतविषयविज्ञानसारूप्येणेदं रजतमिति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः । क्वचित् पुनर्ग्रहणे एव मिथोऽगृहीतप्रभेदे, यथा पीतः शङ्ख इति । अत्र हि विनिर्यन्नयनरश्मिवर्तिनः पित्तद्रव्यस्य काचस्येवातिस्वच्छस्य पीतत्वं

२ नं ] °मसदाल°nvt-C
५ ये ] इतः पत्राणि खण्डितानिnvt-J
७ हिः ] सामान्यादिबुद्धिर्नो न बहिःnvt-J
११ ति ] तद्बाधश्च° °ष्यतेnvt-C द्रः ४।२।३३-५
२० इति ] °धतीतिnvt-J
२१ लु ] दुष्टंnvt-J
२२ रोति ] कुटजबीजं कुटज°nvt-C
२७ शात् ] दोषात्nvt-C
३२ हि ] बहिर्निर्गच्छन्न°nvt-C

च गृह्यते, पित्तं तु न गृह्यते । शङ्खोऽपि दोषवशात् गुणरहितः स्वरूपमात्रेण गृह्यते । तदनयोर्गुणगुणिनोरसंसर्गाग्रहात् सारूप्यात् पीतचिरबिल्वफलप्रत्ययाविशेषणाभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च नेदं रजतमिति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते । तदुपपत्तौ च भ्रान्तत्वमपि लोकप्रसिद्धं सिद्धं भवति । तस्माद् यथार्थाः सर्वेऽपि भ्रमाः प्रत्ययत्वात् पटप्रत्ययवदिति प्राप्तम् । एवं प्राप्तेऽभिधीयते—अस्ति तावद् रजतार्थिनो रजतमिति ज्ञाने सति पुरोवर्तिद्रव्यप्रवृत्तिः सामानाधिकरण्यव्यपदेशश्चेति सर्वजनीनम् । तत् किं ग्रहणस्मरणयोस्तद्गोचरयोश्च भेदाग्रहाद् भवतु, आहोस्विदभेदग्रहात् ? न तावच्चेतनोऽज्ञानात् प्रवर्तते, अपि तु ज्ञानात् । पुरोवर्तिवस्तुग्रहणरजतज्ञानादगृहीतभेदं स्वरूपतो विषयतो वा रजतार्थिनं पुरोवर्तिद्रव्ये प्रवर्तयतीति चेत् ? हन्त भोः किमेतावता पुरोवर्तिवस्तुगोचरं ज्ञानं रजतगोचरं भवति, आहोस्वित् तन्मात्रगोचरमेव ? यदि रजतगोचरं पुरोवर्तिरजततयागृह्णात्, कथं नान्यथाख्यातिः ? अथ तन्मात्रगोचरम्, को भेदाग्रहस्योपयोगः ? न हि वृक्षमात्रदर्शनं निश्चयेन शिंशपार्थिनं प्रवर्तयति । न हि तत्र शिंशापाज्ञानमस्ति । अस्ति त्विह रजतविज्ञानम्, अगृहीतभेदमिदमिति ज्ञानेनेति चेत् ? ननु रजतविज्ञानं पुरोवर्तिनि द्रव्ये न वर्तते, पुरोवर्तिज्ञानं च न रजत इति तत्र पुरोवर्तिद्रव्यमात्रार्थी पुरोवर्तिनि प्रवर्तेत न रजतार्थी । एवं रजतार्थी यत्र क्वचन प्रवर्तेत न नियमेन पुरोवर्तिनि द्रव्ये । न हि तत्र तेन रजतत्वमवगतमिति । अथेदं रजतमिति द्वे ज्ञाने भेदाग्रहादिदं रजतमित्येकज्ञानसदृशे, तेन तदुचितं व्यवहारं प्रवर्तयतः ? यद्येवं तद्रजतम् इयं शुक्तिरिति भेदावभासिविज्ञानव्यवहारमपि कस्मान्न प्रवर्तयतः ? यथैव हि भेदाग्रहादभिन्नविज्ञानसादृश्यम्, एवमभेदाग्रहाद् भिन्नविज्ञानसादृश्यमपि । सोऽयमुभयतो भेदाभेदाग्रहसारूप्यात् प्रवृत्तिनिवृत्तिभ्यां युगपदाकृष्यमाणः प्रतिपत्ता कष्टां दशामावेशितः प्रज्ञाशालिभिरतिव्याख्यया । § 99

स्यादेतत् । विपर्ययज्ञानोत्पादेऽपि शुक्तिरजतयोर्भेदाग्रहेऽस्य व्यापार आस्थेयः अन्यथा गृहीतभेदानामपि विपर्ययोत्पादप्रसङ्गात् । तथा च शक्यं तत्रापि वक्तुम्— यथा भेदाग्रहाद् विपर्ययज्ञानोत्पाद एवमभेदाग्रहात् कस्मान्न समीचीनज्ञानोत्पाद इति । तत्र यस्तव परिहारः सोऽस्माकं व्यवहारव्यपदेशयोर्भविष्यतीति । यथाहुरख्यातिवादिनः—येषामपि विपरीतख्यातिस्तेषामप्यज्ञानवासनानिबन्धनो भ्रम इति । मैवम्, ज्ञानहेतूनामज्ञातरूपकार्यसंबन्धानां चक्षुरादीनां दर्शनात्, चेतनव्यवहाराणां त्वबुद्धिपूर्वकाणामप्रतीतेः, बुद्धिपूर्वकत्वे तु विवेकाग्रह उपयुज्यते न व्यवहारव्यपदेशयोरिति युक्तमुत्पश्यामः । यद्यविवेकग्रहोऽपि तत्परिपन्थी विद्यत इति

४ नाच्च ] °हारव्यवधानाच्चnvt-C
१३ गृह्णात् ] °तयाऽगृह्णन्nvt-J
१८ र्तिनि ] तत्र पुरोवर्तिनिnvt-C
२३ म् ] °दभेदज्ञान°nvt-C
२६ हेऽस्य ] ग्रहस्यnvt-J

कुतोऽन्यतरनिबन्धनो व्यवहारः ? तस्मात् समारोप एव भेदाग्रह इति । तत् सिद्धम् एतद्विवादाध्यासितं रजतादिविज्ञानं पुरोवर्तिवस्तुविषयम्, रजतार्थिनस्तत्र नियमेन प्रवर्तकत्वात् । यद् यदर्थिनं नियमेन यत्र प्रवर्तयति तद्विज्ञानं तद्विषयम्, यथोभयसिद्धं समीचीनरजतविज्ञानम् । तथा चैतत् । तस्मात् तथा । यच्चोक्तम्—अनवभासमाना शुक्तिरनालम्बनमिति, तत्र किं शुक्तिकात्वस्य रजतमिति ज्ञानं प्रत्यनालम्बनत्वं साध्यते, आहोस्विद् द्रव्यमात्रस्य सितभास्वरस्य पुरोवर्तिनः ? तत्र पूर्वस्मिन् कल्पे सिद्धसाधनम् । उत्तरस्मिन्ननवभासनमसिद्धम्, इदमिति पुरोवर्तिनो द्रव्यस्याङ्गुल्या निर्देशात् दृष्टं च दुष्टानामपि कारणानामौत्सर्गिककार्यप्रतिबन्धेन कार्यान्तरोत्पादकत्वम् । तद् यथा, वेत्रबीजानां दावाग्निदग्धानां कदलीप्रकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्यस्य तेजसो बहुतरान्नपानपाचकत्वम् । नेदं रजतमिति च 71/tha प्रत्यक्षबाधकप्रत्ययादपहृतविषयम्, प्रत्ययत्वेन विभ्रमाणां यथार्थत्वानुमानं नोदेतुमर्हति । यथा च प्रमाणाभासव्यभिचारेऽपि प्रमाणे आश्वासः, तथा प्रमाणतोऽर्थप्रतिपत्तौ इत्यत्रोपपादितम् । दिङ्मात्रमत्र दर्शितम् । प्रपञ्चस्तु तत्त्वसमीक्षायामस्माभिः कृत इत्युपरम्यते ॥ § 100

तदेवमात्मनि मिथ्याज्ञानं व्याख्याय शरीरादिष्वेकादशसु मिथ्याज्ञानं भाष्य एव दर्शितम् । तत्तु स्पष्टत्वादस्माभिर्न व्युत्पादितमित्याशयवानाह—शेषमिति । तत्र शरीरादिषु मनःपर्यन्तेषु यथायोगं मिथ्याज्ञानं दुःखे सुखम् इत्यादिना अप्रतिहातव्यम् इत्यन्तेन भाष्येणोक्तम् । प्रवृत्त्यादिषु शृङ्गग्राहिकयोक्तं प्रवृत्तौ इत्यादिना रोचयेत् इत्यन्तेन भाष्येण । एवं मिथ्याज्ञानस्य स्वरूपं दर्शयित्वा मिथ्याज्ञानदोषप्रवृत्तिजन्मदुःखानां कार्यकारणभावो दोषादीनां स्वरूपं चोक्तम्, एतस्मात् इत्यादिना *ताप इत्यन्तेन भाष्येण । संप्रति मिथ्याज्ञानाद्युच्छेदादपवर्ग इति वक्ष्यति । तच्चायुक्तम्, सत्यपि तदुच्छेदे संसारतादवस्थ्यात् । न ह्यन्योच्छेदेऽन्यस्योच्छेदः । तथा च नापवर्ग इति वक्ष्यमाणमर्थमुपपादयितुमुक्तं भाष्यकृता त इमे मिथ्याज्ञानादय इत्यादि । तद् वार्त्तिककारो व्याचष्टे—त इमे दुःखादय इति । भाष्यकारोक्तक्रमाद् विपरीतक्रमाभिधानं वार्त्तिककृतः । एवं सूत्रकारोक्तक्रमाद् विपरीतक्रमाभिधानं भाष्यकृतः । तद् दुःखादीनां मिथ्याज्ञानपूर्वकत्वेन मिथ्याज्ञानस्य दुःखादिपूर्वकत्वेनानादित्वं दर्शयितुम् । पृच्छति—कः पुनरिति । यद्येत एव संसारस्तर्हि सूत्रकारः प्रमेयसूत्रे कस्माद् दुःखादिभ्यः पृथक् प्रेत्यभावं संसारापरनामानमुपादत्ते ? तस्मादेभ्योऽन्य एव संसार इति भावः

२ म्] अत्र खण्डितपत्रे जपुस्तके पाठभेदः—विवेकाग्रहवदविवेकाग्रहोऽपि तत्परिपन्थी विद्यत इति कुतोऽन्यतरनि...ग्रह उपयुज्यते । न व्यवहारव्यपदेशयोरिति युक्तमुत्पश्यामः । तत् सिद्धम्
४ त्] तथा चैतद् न तथा चैतत्nvt-C
५ माना] शुक्तिका नालम्ब°nvt-C
७ त्र] °स्मिन् सिद्ध°nvt-J
८ म्] °भासमानत्वम°nvt-C
१४ म्] °पदर्शितम्nvt-C
१७ स्माभिर्न] उपपादितम्nvt-C
२२ *] तापपर्यन्तेनnvt-J

। उत्तरम्—दुःखादीनामिति । नैषां स्वरूपमपि तु कार्यकारणभाव इत्यर्थः । क्रमव्यतिक्रमतात्पर्यमाह—स चानादिरिति । अत्र हेतुमाह—पूर्वापरेति । दुःखजन्मप्रवृत्तिदोषाः विषयत्वेन तावन्मिथ्याज्ञानस्य कारणम् । एवमसति जन्मनि मिथ्याज्ञानस्यानुत्पत्तेरविषयोऽपि जन्म मिथ्याज्ञानस्य कारणम् । एवं विना प्रवृत्तिं जन्माभावात् जन्मद्वारेण प्रवृत्तेरपि मिथ्याज्ञानकारणत्वम् । प्रवृत्तिद्वारेण च दोषाणाम्, तथा मिथ्याज्ञानाद् दोषाः, दोषेभ्यः प्रवृत्तिः, प्रवृत्तेर्जन्म, जन्मनो दुःखम् । यद्यपि प्रवृत्तिरेव साक्षाद् दुःखहेतुः, त- 72/tha
थाप्यनायतनस्य तस्यानुत्पत्तेरन्तरा जन्म करोति । अथ सैव दुःखमिति ? अनादित्वाच्च नान्योन्याश्रयं चक्रकं वा बीजाङ्कुरसन्तानयोरिवेति । संप्रति बीजापाय इव तज्जन्याङ्कुरप्रवाहनिवृत्तिः, मिथ्याज्ञानापाये तज्जन्यदोषप्रवृत्तिजन्मदुःखमिथ्याज्ञानादिप्रवाहनिवृत्तिः, कारणनिवृत्तौ कार्यनिवृत्तेरिति कथनपरं भाष्यमनुभाष्याक्षिपति—यदा तु तत्त्वज्ञानादिति । अपायोऽपि तत्त्वज्ञानान्मिथ्याज्ञानस्य स्वरुपतो वा, विषयतो वा, फलतो वा स्यात्, न तावत् स्वरुपतः, तस्याशुतरविनाशिनः संस्काराद् वा ज्ञानान्तराद् वा अपायस्य तत्वज्ञानसाधारण्येन तस्यापि बाध्यत्वप्रसङ्गात् । नापि विषयतः, न हि शुक्तिकाज्ञानं रजतज्ञानस्य रजतविषयतामपहर्तुमुत्सहते जातं हि तद् रजतं विषयीकृत्य । यथाहुः

गृहीत्वार्थं गताश्चौराः कस्तानाच्छेत्तुमर्हति ।§ 102

इति । नापि फलमपहरति, उपदर्शितो हि तेनार्थः, प्रवर्तितश्च तत्र पुरुषः । तदिदमुक्तम्—कथमपाय इति । उत्तरम्—समानविषय इति । यस्मिन्नेव हि पुरोवर्तिनि द्रव्ये पूर्वेण रजतत्वमासञ्जितमत्रैवोत्तरं तद्विरुद्धशुक्तिकात्वं धर्ममुपनयति । तथा च पूर्वस्य विज्ञानस्य मिथ्यात्वमादर्शयत्तज्जनितां प्रवृतिं विघटयत् फलमस्यापहरतीति भावः । न तु समानविषयतामात्रेण विरोधः, मा भूदेकस्मिन्नात्मनि नित्यत्वविभुत्वज्ञानयोर्विरोध इत्यत आह—यस्मादिति । तत्त्वमिथ्यात्वकथनेन मिथो विरुद्धधर्मप्रसञ्जनं सूचयति । नित्यत्वविभुत्वज्ञानयोस्तु समानविषययोरप्यविरुद्धधर्मोपस्थापकतया तत्त्वज्ञानत्वादित्यर्थः । कस्माद् विरोध इत्यत आह— वस्तुन इति । परस्पराभावधर्मिणोरेकत्र समवाये नेदं स्वाभाविकं नानात्वं क्वचिदपीत्यद्वैतप्रसङ्ग इति भावः । उपसंहरति—तस्मादिति । § 103

अत्र देशयति—कथं पुनरिति । प्रथममुत्पन्नं मिथ्याज्ञानमनुपजातविरोधि, तेनापहृतविषयं पश्चात्तनं तत्त्वज्ञानमुदेतुमेव नोत्सहते, प्रागेव तु मिथ्याज्ञानं बाधितुमिति भावः । उत्तरम्—मिथ्याज्ञानस्येति । तत्र हि प्रथममुपजातेनानुप जातविरोधिना ज्ञानेनोत्तरं बाध्यते, यत्र पूर्वापेक्षमुत्तर- 73/tha

३ त्वेन ] विषयः । ते नnvt-C
१६ जातं ] गतंnvt-J
२२ स्य ] °मदर्शय°nvt-C
३० ति ] चोदयतिnvt-J

मुपजायते। तत् खलु पूर्वविरोधे न जायेत। अजातं सत् कथं पूर्वं बाधेत, यथा प्रत्यक्षादिविरुद्धमनुमानम्? इह तु द्वे अपि ज्ञाने दोषोपहतानुपहतेन्द्रियार्थसन्निकर्षजन्मनी परस्परानपेक्षे। तत्र पूर्वमनुपजातविरोधित्वात् किं बाधताम् अनागतस्याप्राप्तत्वेन बाधितुमशक्यत्वात्, स्वकारणबलादासाद्यमानजन्मनश्चोत्पत्तिविरोधस्य चाशक्यत्वात्? तदेवमुत्पन्नमुत्तरमुपजातविरोधितया पूर्वबाधात्मकं सन्नानुपमृद्य पूर्वमुत्पत्तुमर्हतीति बाधते। तत्तु न पूर्वेण नाप्यन्येन केनचिदिति भवत्यर्थसहायम्। अर्थासहायं च मिथ्याज्ञानम्। तदनेन बाध्यत्वाबाध्यत्वे मिथ्याज्ञानतत्त्वज्ञानयोरुपलक्ष्येते। तदिदमन्यैरप्युक्तम्—

पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम्।
अन्योन्यनिरेपेक्षाणां यत्र जन्म धियां भवेत्॥§ 106

इति। तथा चानुपजातविरोधित्वमत्र बाध्यत्वे हेतुः, उपजातविराधित्वं च बाधकत्व इति। § 107

यदुपलक्षणार्थं ससहायत्वाभिधानं तज्जिज्ञासुः पृच्छति—कस्मात्? उत्तरम्—तथात्वेनेति। अनेनाबाध्यत्वं तत्त्वज्ञानस्योक्तमिति। न केवलमबाध्यत्वम्, दृड्ध्रहमूलत्वमपि तत्त्वज्ञानस्येत्याह—प्रमाणान्तरानुग्रहाच्च। अन्तरशब्दो विशेषवचनः। आत्मादितत्त्वज्ञानं हि फलं प्रमाणविशेषैरागमानुमानप्रत्यक्षैरनुगृह्यते, तस्माद् दृढमूलत्वात् तदपि तत्वज्ञानं मिथ्याज्ञानं निवर्तयतीत्यर्थः। एतदेव विभजते—आगमेति। तदेव स्फोरयति—यदा हीति। आगममयेन हि ज्ञानेन प्रमेयं गृहीत्वा शास्त्रीयेण च न्यायविज्ञानेनानुमानापरनाम्ना व्यवस्थाप्य भावयतो यदात्मनः सन्निकर्षाद् योगजधर्मसहायादुत्पद्यते तत्त्वविषयः साक्षात्कारः प्रत्यक्षफलम्, तत्र त्रयाणामपि प्रमाणानां प्रतिसन्धानमस्तीति दृढमूलत्वात् तेन मिथ्याज्ञानं बाध्यते॥ § 108
74/tha

विषयं भावयतीति व्याचष्टे—समाहित इति। समाहितत्वेन चेतसो धारणां दर्शयति—अनन्यमना इति प्रत्याहारम्, चिन्तयतीति चेतसः तत्त्वविषयबुद्धिधारा, विपच्यमानत्वं ध्यानस्य, तत्त्वज्ञानस्य स्फुटाभत्वारम्भावस्था। ध्यानजनितभावनासंस्कारो ध्यानभावना, तस्या विवेको मिथ्याज्ञानवासनायाः। पूर्वं हि मिथ्याज्ञानवासना तत्त्वज्ञानवासनाया बलवत्यासीत्, अथाभ्यासवशात् तुल्यबलाभवत्, अथेयमेव बलीयसी तत्त्वज्ञानवासनासंभिन्ना मिथ्याज्ञानवासनया सहानुवर्तते। संप्रति तु तत्त्वज्ञानवासनाया अत्यन्तबलीयस्या समूलकाषं कषितत्वात् मिथ्याज्ञानवासनाया भवति विविक्ता तत्त्वज्ञानवासना तस्यामित्यर्थः। § 109

१ जायेत] जायते nvt-C
६ ते] पूर्वमुत्पन्नं भवतीति पूर्वं बाधते nvt-C
९ ताम्] °तीयते nvt-J
१८ येन] °गमजेन nvt-C
२४ सो] तत्त्वे चेत°nvt-J
२६ स्था] स्फुटतरार°nvt-C
२८ सी] तत्त्वध्यान°nvt-J
२९ तु] तु तत्त्वध्यान°nvt-J
३१ ना] तत्त्वध्यान°nvt-J

नन्वनेन क्रमेण निवर्ततां मिथ्याज्ञानम्, निवृत्तं तु तत्त्वसाक्षात्कारसमयेऽपि कस्मात् पुनः स्ववासनावशान्न जायते ? न खलु मिथ्याज्ञानवासना अनादिकालप्रवृत्ता आदिमता तत्त्वज्ञानेन तत्संस्कारेण वा शक्या निवर्तयितुमित्यत आह—निवृत्ते चेति । तावदेव पुंसां बुद्धयोऽस्थिराः भ्राम्यन्ति स्वोचितं च संस्कारजातमातन्वते, न यावद् भूतमर्थं साक्षात्कुर्वन्ति । अथ साक्षाकृत्य तत्र स्थिरपदा भवन्ति, क्षिण्वन्ति च सवासनान् मिथ्याप्रत्ययान् । भूतार्थपक्षपातो हि बुद्धेः स्वभावः । यदाहुर्बाह्या अपि—

निरुपप्लवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥
प्रमाणवार्त्तिके १.२१२-३ § 113

इति । तस्मात् मिथ्याज्ञानस्य न पुनरुत्पाद इति ॥ § 114

उक्तमेवार्थं स्मृतिदाढ्याय पृच्छति—कः पुनरिति । उक्तं स्मारयितुमुत्तरम्— सहेति । भवतु मिथ्याज्ञानस्य निवृत्तिः सवासनस्य, ततोऽपि किमित्यत आह—मिथ्या ज्ञानेति । अत्र पृच्छति—ये तावदिति । उत्तरम्— 75/tha
तेषामपीति । वैराग्यस्वरूपं पृच्छति—किं पुनरिति । रागाभावो हि वैराग्यम् । न च तस्मादेव रागादीनामभाव इति भावः । उत्तरम्—भोगानभिष्वङ्गलक्षणमित्युक्तम् । विषयदोषपरिभावनापरिपाकात् खलु विषयपरित्यागेच्छा भवति । तया विरोधिगुणेन विषयतृष्णा च तत्परिपन्थिनि विद्वेषश्च तदाधिकरणश्चेर्ष्यादयो निवर्तन्ते । असक्तिर्विषयपरित्यागेच्छा, वशितया च स्वयमुपनतेषु विषयेषु माध्यस्थ्यदर्शनम् । दोषाभावे किं भवतीत्यत आह—दोषाभाव इति । पृच्छति—का पुनरियमिति । यदि हि जन्मनः प्रवृत्तिः कारणं स्यात्, ततो जन्मनिवृत्त्यै तन्निवृत्तिरर्थ्येत । न पुनरसौ क्षणिका सती आमुष्मिकाय जन्मने कल्पते । अतः किमर्थं निवर्त्यत इति भावः । विदिताभिप्राय उत्तरमाह—धर्माधर्मौ । कस्मात् पुनरुपचार इत्यत आह—जन्मसाधनत्वात् । एतद्विभजते—नास्मिन्निति । उपचारे प्रयोजनं दर्शयित्वा निमित्तमाह—धर्माधर्मयोस्त्विति । वर्तमानानागतयोरविशेषेण दोषापायात् निवृत्तिरुक्तेति भ्रान्त्या देशयति—यौ तावदनागताविति । परिहरति— न, अनागतयोरिति । अनागताभिप्रायमेतदित्यर्थः । यद्येवम्, वर्तमानयोः कुतः प्रक्षय इत्यत आह—वर्तमानयोरिति । अस्तु प्रवृत्तेरभावः, ततः किमित्यत आह—प्रवृत्त्यभाव इति । उक्तं विवेकमिहापि योजयति—अत्रापीति । वर्तमाननिवृत्तिहेतुं पृच्छति—अथेति । उत्तरम्—संस्कारेति । श्रुतिः

तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये § 116

३ ज्ञानेन ] तद्वासनया शक्याnvt-C तत्त्वविवेचनया यावद्भूतमर्थंnvt-C
५ न्ति ] °स्कारजाः, न यावत्
८ स्य ] निरुपद्रवभू°nvt-C

छान्दोग्य ६.१४.२ इति । किं जन्माभावे सिध्यतीत्यत आह—जन्माभाव इति । अत्रैव वृद्धसंमतिमाह—एतच्च तदाहुरिति । तदेतच्चेति योजना । प्राणनस्य कालभेदावच्छेद आयुः । § 117

स्यादेतत्, महाप्रलयेऽपि मिथ्याज्ञानादिना दुःखान्तेनास्ति वियोग इति अत्रापि मुक्तिप्रसङ्ग इत्यत आह—सोऽयं मिथ्याज्ञानादिनेति । सर्वत इति
76/tha तृतीयार्थे तसिः सर्वेणेति । न च प्रलयावस्थायां सर्वेण वियोगः, कर्माविद्यावासनयोरविनाशात् । मुक्तौ तु तयोरपि विनाशः । कर्मवासना च सर्वकार्याणामुत्पादिका अवस्थापिका च । तन्निवृत्तौ शरीरादिवत् तत्त्वज्ञानसंस्कारस्यापि प्रलय इत्यशेषविशेषगुणविमुक्तो मुक्त इत्युच्यत इति सिद्धम् । § 118

स्यादेतत् । तत्त्वज्ञानात् मिथ्याज्ञानापाय इत्युक्तम् । किं पुनस्तत्त्वज्ञानमित्यत उक्तं भाष्यकृता—तत्त्वज्ञानं त्विति । तदनुभाष्य सर्वेषां ज्ञानानां भाष्योक्तानामनुगतमेकं स्वरूपमाह—स्वरूपतस्त्विति । चोदयति—कस्मादिति । नो खल्वयं प्रेक्षावतां समाचारो यद् दुःखभिया सुखपरित्याग इति, अपि तु सुखं दुःखाद् *विविच्योपाददते दुःखं च वर्जयन्ति । न हि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्त इति । उत्तरम्—विवेकहानस्येति । यद्यपि सुखदुःखे भिन्ने, तथाप्यनित्यत्वकृतकत्ववत् परस्परानुषक्ते इति न खलु सुखस्य केवलस्योपादानं दुःखस्य वा केवलस्य परिवर्जनं शक्यमित्यर्थः । कः पुनरयमनुषङ्गो यतो विवेकहानमशक्यमित्यत आह—अनुषङ्गोऽविनाभावः । तत्स्वरूपमाह—यत्रैकं सुखं वा दुःखं वा, तत्रेतरत् दुःखं वा सुखं वा । तदनेनानित्यत्वकृतकत्वयोरिव सुखदुःखयोरविनाभावो दर्शितः । न चाविनाभावो विना संबन्धादिति तत्सिद्धये संबन्धविकल्पानाह—समाननिमित्तता वा अनुषङ्गोऽविनाभावः, वाशब्दश्च वक्ष्यमाणसंबन्धान्तरापेक्षया, *न तु पूर्वापेक्षया । अत्र च शरीराद्यपेक्षया समाननिमित्तता, न तु धर्माधर्मापेक्षया तयोरसाधारण्यादिति मन्तव्यम् । तयोरविनाभावसिद्ध्यर्थं संबन्धान्तरमाह—समानाधारता वा । अपरं संबन्धान्तरमाह—समानोपलभ्यता वा । मनोगोचरत्वमुभयोः । ततश्च सिद्धोऽविनाभावापरनामा अनुषङ्ग इति । यत्रैकं तत्रेतरदिति वा । यत्र
77/tha यस्मिन्निमित्ते सतीति वा यत्राधार इति वा यत्रोपलब्धिसाधने सतीति व्याख्येयम् । इतिः सूत्रसमाप्तिं सूचयति ॥ २ ॥ § 119

॥ इति अभिधेयप्रयोजनसम्बन्धप्रकरणम् ॥

## १.१.२ प्रमाणलक्षणप्रकरणम्

२ अत्रैव ] °संप्रतिपत्तिम्nvt-C
१५ *] विभिद्योपा°nvt-C
१६ इति ] द्रः महाभाष्ये १.१.३९; ४.१.१; ६.१.१३

२२ योरिव ] °योः परस्परस्याविना°nvt-J
२४ *] न तु पेक्षयेति भ्रष्टम्nvt-C
२८ वा ] °दिति चnvt-J

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ १ । १ । ३ ॥ § 121

तदेवं प्रमाणादिपदार्थतत्त्वज्ञानस्य निःश्रेयससंबन्ध उक्तः परीक्षितश्च । तत्रैतत् स्यात् स्वपदेभ्यः प्रमाणदयः पदार्थास्तत्त्वतो ज्ञाता यथायथं मिथ्याज्ञानादिनिवृत्तिक्रमेणापवर्गे उपयोक्ष्यन्ते, कृतमुपरितनेन प्रबन्धेन इत्यत उक्तं भाष्यकृता—त्रिविधा चास्येति । न नामधेयमात्रात् प्रमाणादीनां तत्त्वज्ञानं भवति, अपि तु लक्षणपरीक्षणाभ्यामित्यस्ति प्रबन्धस्योत्तरस्योपयोग इति भाष्यार्थः । तदेतद्भाष्यमनुभाष्य पृच्छति—प्रवृत्तेरिति । यदि पुरुषकल्पनामात्रात् त्रैविध्यम्, अथानन्त्यमेव कस्मान्न भवति, सर्वत्र तस्य सुलभत्वादिति भावः । उत्तरम्— अर्थस्य तथाभावात् । अर्थस्य प्रयोजनस्य साक्षात् शास्त्रकार्यस्य तत्त्वज्ञानलक्षणस्य तथैव त्रिविधयैव शास्त्रप्रवृत्त्या भावात् । तथा हि, लक्षणं नाम व्यतिरेकिहेतुवचनम् । तद्धि समानासमानजातीयेभ्यो व्यवच्छिद्य लक्ष्यं व्यवस्थापयति । न चास्य धर्मिदर्शनमन्तरेण पक्षधर्मता सिध्यतीति तदुपदर्शनाय नामधेयमात्रेण धर्मिणामुद्देशः । यद्यपि च प्रतिलक्षणमुद्दिष्टा एव धर्मिणः, तथापि शास्त्राभिसंबन्धपरादपि वाक्यात् समधिगम्यन्त इत्युद्देशोऽप्युक्तः । न चापरीक्षितो हेतुर्व्यतिरेकी चतूरूपो भवतीति परीक्षाप्यवश्यं कर्तव्या । तस्मात् तत्त्वज्ञानस्यार्थस्य तथाभावात् त्रैविध्य मिति । तदेतद् विभजते—नामी पदार्था इति । किं त्विति । अर्थः 78/tha
तत्त्वज्ञानं तथाभूतम्, येनार्थेन हेतुना शास्त्रस्य प्रवृत्तिस्त्रेधा भवति ॥ § 122

उद्देशस्वरुपप्रतिपादनपरं भाष्यमनुभाष्याक्षिपति—नामधेयेनेति । परिहरति— मात्रग्रहणसामर्थ्यादिति । यद्यपि प्रमाणादिशब्दा अपि कारकशब्दा एव, तथाप्युद्देशसमये तदर्थानां सदपि कारकत्वमविवक्षितम्, अपि तु प्रातिपदिकार्थमात्रम् । घ्राणादिसूत्रे १. १. १२ तु लक्षणपरे कारकत्वं विवक्षितम्, अन्यथा लक्षणत्वायोगादित्यदोषः । अत्र यद्यपि सूत्रकारेण संशयप्रमाणप्रमेयेषु परीक्षा साक्षात् कृता न प्रयोजनादिषु, तथापि तत्करणादेव प्रयोजनादिपरीक्षापि सूचिता सूत्रकारेणेति त्रिविधेत्युक्तम् । अत एव भाष्यकारः सर्वत्र परीक्षामन्ववर्तयदिति ॥ § 123

स्यादेतत् । विभागपरमेतत् सूत्रमिति वक्ष्यति । न च विभागो न्यूनाधिकसंख्याव्यवच्छेदार्थमेकं किञ्चिदुपसंग्राहकमन्तरेण । न च प्रमाणत्वादन्यदत्रोपसंग्राहकम् । न चेदमलक्षितमुपसंगृह्णाति । न चैतत् सूत्रमस्य लक्षणम्, विभागपरत्वादिति शङ्कानिराकरणपरं भाष्यम्-तत्रोद्दिष्टस्येति । तस्यार्थः-यद्यपि विभागपरमेतत् सूत्रम्, तथापि प्रमाणपदसमभिव्याहृतं सत् सामर्थ्यात् प्रमाणत्वमपि लक्षयतीति । तथा हि, प्रमीयतेऽनेनेत्यस्य वाक्यस्यार्थे प्रमाणपदप्रयोगः । प्रमा च स्मृतेरन्या, अर्थाव्यभिचारी स्वतन्त्रः

२ स्य ] प्रमाणादयस्तत्त्वतोnvt-J
४ थं ] °ज्ञाननिवृत्ति°nvt-C
१० यैव ] °विधतयैवnvt-C
१२ क्ष्यं ] विभिद्य लक्षणंnvt-C
१७ द् ] तदेव nvt-C
२८ च ] °न्यत्तदुप° nvt-C

परिच्छेदः । तस्माद् विभागपरादपि सूत्रात् प्रतीयमानं *प्रमाणसामान्यलक्षणमपेक्षितं संगृहीतमिति प्रमाणत्वोपगृहीतानां प्रत्यक्षादीनां प्रमाणानां युक्तो विभागः । तथा च विभागपरत्वेन साक्षात् सामान्यलक्षणानभिधानाद् विभक्तस्य लक्षणमुच्यत इत्युक्तम् । तच्चेह विशेषलक्षणम् इन्द्रियार्थसन्निकर्षेत्यादि १.१.४ । तदेतद् भाष्यं व्याचष्टे—उद्दिष्टस्येति । लक्षणालक्षणमात्रविवक्षया लक्षितस्यालक्षितस्य इत्युक्तम् । तच्च छले सामान्यतः, प्रमाणेषु प्रमेयेषु च विशेषत इति गमयितव्यम् ॥ § 124

79/tha

अत्र भाष्यम्—अथोद्दिष्टस्यविभागवचनमिति । तस्यार्थः—उच्यतेऽनेनेति वचनं सूत्रं विभागस्य । अथेति त्रिविधप्रवृत्तिव्युत्पादनानन्तरं विविक्तानां प्रतिपादनं विभागवचनम् । न च विवेकः स्वरूपत उपयुज्यत इत्यत आह—अथोद्दिष्टविभागद्वारेणेति । नात्र विभागमात्रं विवक्षितम्, अपि तु तद्द्वारेण न्यूनाधिकसंख्याव्यवच्छेदस्तत्त्वज्ञानाङ्गमित्यर्थः ॥ § 125

अव्याख्याने हेतुमाह—सूत्रेति । चोदयति—*उद्दिष्टस्य विभागानर्थक्यम्, व्याघातात् । त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्यस्यानर्थक्यम् । अनर्थमर्थविपर्ययं कायति कीर्तयतीत्यनर्थकम् । तस्य भावस्तत्त्वम् । कस्मात् ? व्याघातात् । व्याघातमेव स्फोरयति—त्रिविधा चास्य शास्त्र्यस्येति । परिहरति—नोद्दिष्टेति । परस्परं विभक्ता नामधेयमात्रेणोद्दिश्यन्त इत्युद्देशेऽन्तर्भावः । तेनायमर्थो भवति, सामान्येनोदिष्टस्य विभागवचनं विशेषेणोद्देश इति । विभागप्रयोजनं पृच्छति—किं पुनरिति । उत्तरम्—नियमः । तद्विभजते—यदीति । पुनश्चोदयति—लक्षणत इति । प्रमाणलक्षणकरणप्रवृत्तो यत् चत्वार्येव लक्षयति तदवगम्यते न न्यूनान्यधिकानि वा प्रमाणानीत्यर्थः । परिहरति—लक्षणस्येति । आक्षेपं विभजते—स्यादेषेति । परिहारं विभजते—न, लक्षणस्येति । अन्यपरमपि वाक्यं तदेवार्थलभ्यं स्वीकरोति । यत् तेनापेक्षितम्, *तदेव च तेनापेक्षितम् येन विना तदर्थो नोपपद्यते । न च प्रत्यक्षादीनां समानासमानजातीयस्य व्यवच्छेदे पञ्चमाद्यभाव उपयुज्यते । लक्षणकरणप्रवृत्तस्य क्वचिदकरणं न तदभावे प्रमाणम्, सतोऽप्यनुपयोगेनाकरणोपपत्तेः । तदेतदाह—अन्यासंभवस्येति । विभागोद्देशस्य पुनरनन्यपरत्वादन्याभावनिश्चयो भवतीति । उपसंहरति—तस्मादिति । § 126

अक्षस्याक्षस्येति भाष्यमनुभाष्य तात्पर्यमाह—अयं च सूत्रविवक्षयेति । अक्षमक्षं प्रति वर्तत इति विगृह्याव्ययीभावे कृत सर्वेन्द्रियावरोधो भवति । 80/tha ननु यदीदृशो विग्रहः, कस्मात् पुनर्भाष्यकारेण अक्षस्याक्षस्येति विगृह्यत इत्यत आह—अन्यथा तु वस्तुनिर्देश इति । अर्थमात्रमनेन प्रतिपाद्यते, न

१ *] प्रमाणलक्षण° nvt-J
६ ले] तत् स्थले nvt-C
१० विविक्तानां] विभक्तानां प्रतिपादनम् न चnvt-C
१३ *] उद्दिष्टविभा°nvt-C
१७ र्भावः] °र्भावात्nvt-C
२४ *] तदेव चापे°nvt-C
२९ येति] अयं च सूत्रविवक्षायामितिnvt-C

पुनः समास इत्यर्थः । अथ कस्मात् समास एव तेन विग्रहेण न प्रतिपाद्यत इत्यत आह—समासे हि अक्षस्येति षष्ठी न श्रूयेतेति । यदि सूत्रगतस्य प्रत्यक्षपदस्याव्ययीभावः समासः, अन्यत्र पुनरस्य कः समास इति पृच्छति—कः पुनरिति । उत्तरम्—प्रादिसमास इति । तथा हि, *प्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गताप्रतिषेधादभिधेयलिङ्गोपादानात् प्रत्यक्षोऽर्थः प्रत्यक्षा बुद्धिः प्रत्यक्षं ज्ञानमित्यभिधेयलिङ्गता सिद्धा भवति । क्वचित् पाठः समासे हि प्रत्यक्षस्येति षष्ठी न श्रूयेतेति । सूत्रविवक्षयाव्ययीभाव इत्युक्तम् । तत्र शङ्कते—कस्मात् पुनः सूत्रविवक्षयेत्युच्यते यावता सर्वत्रैव कस्मादव्ययीभावो न भवतीति ? तत्रेदमुपतिष्ठते—समासे हि अवययीभावसमासे हि सर्वत्र प्रत्यक्षस्येति षष्ठी न श्रूयेतेति । व्युत्पत्तिनिमित्तमात्रं चेदं प्रत्यक्षशब्दस्य, न तु प्रवृत्तिनिमित्तम् । तस्मात् नेन्द्रियगतैर्गुणसामान्यादिभिर्व्यभिचारः, प्रवृत्तिहेतुस्त्वर्थसाक्षात्कारिज्ञानजनकत्वम् । तन्निमित्तः खल्वयं प्रत्यक्षशब्दस्तत्र तत्र लौकिकपरीक्षकैः प्रयुज्यते । यथा मयूरशब्दो मयूरत्वसामान्यनिबन्धनः कासुचिदेव पतत्रिव्यक्तिषु वर्तमानः, मह्यां रौतीत्यन्वाख्यायते । तदिदं प्रत्यक्षमुद्दिष्टमपि सत् प्रमाणतदाभाससंकीर्णमिति तद्विवेकाय लक्षणमुपयुज्यते । यदि तूद्देशपदं तद्विवेचयेत्, कृतं तर्हि लक्षणप्रणयनेन ॥ § 127

विग्रहवाक्यगता च वृत्तिर्भाष्यकृता व्याख्याता । वृत्तिस्तु सन्निकर्षो ज्ञानं वा । वृत्तिरिति हि व्यापारः । स तु व्यापार उच्यते, यः कारकैः फले जनयितव्ये चरमभावी धर्मभेदः फलोत्पादानुकूलोऽपेक्ष्यते । यथा पटे जनयितव्ये तन्तुभिश्चरमभाविनः संयोगभेदाः, स्वर्गे जनयितव्ये यागेनापूर्वमात्मधर्मः, तथेहापि इन्द्रियादिना प्रमाणेन प्रमायां फले प्रवृत्तेन तदुत्पादनानुकूलः सन्निकर्षो ज्ञानं वा चरमभावी धर्मभेदोऽपेक्ष्यत इति भवति व्यापारः । स एव वृत्तिरित्याख्यायते । व्यवस्थां दर्शयति—यदा 81/tha
सन्निकर्षो व्यापार इन्द्रियादेः प्रमाणस्य तदा ज्ञानम् आलोचनं वा सविकल्पकं वा साक्षात्कारवद्विज्ञानं प्रमितिः फलम्, उभयस्यापीन्द्रियव्यापारात् सन्निकर्षापराभिधानादुत्पत्तेः न चान्तरालिकेन निर्विकल्पकेनेन्द्रियव्यापारविच्छेद इति प्रत्यक्षव्याख्यानावसरे निवेदयिष्यते । यदा ज्ञानम् आलोचनं वा विकल्पो वा व्यापार इन्द्रियादीनां तदा हानोपादानोपेक्षाबुद्धयः फलम् । तत्रोपादेयमिदं सलिलमिति बुद्धिरनागतोपादानविशिष्टं सलिलमालम्बमाना न साक्षात्कारवती, सलिलमात्रसाक्षात्कारस्तु स्यात् । न च तन्मात्रमस्य फलम्, अपि तूपादेयता । सा च परोक्षा, अनागतत्वात् । तस्मादुपादीयतेऽनेनेत्युपादानम् । उपादानं चासौ बुद्धिश्चेत्युपादानबुद्धिः । *तत्र तोयालोचनमथ तोयविकल्पः, *अथ तज्जातीयस्य दृष्टचरपिपासोपशमनहेतुभावस्य स्मृतिबीजसंस्कारोद्बोधः, अथ तस्य स्मरणम्, अथ लिङ्ग-

४ *] °पन्नालं गति°nvt-J
१६ नेन] °प्रयत्नेनnvt-C
२५ द्विज्ञानं] °कारिज्ञानंnvt-C
३३ *] तत्तोया°nvt-C
३३ *] अथ च तज्जातीयेnvt-C

परामर्शः तज्जातीयं चेदमिति । तदिदं लिङ्गपरामर्शविज्ञानं साक्षात्कारवत् । लिङ्गे विनश्यदवस्थव्याप्तिस्मरणसहकारिदृश्यमानस्य सलिलस्य पिपासोपशमनहेतुतया अनुमानमुखेनोपादानबुद्धिरुच्यते । *अनुमाय खल्वयं तथाभावं *तदुपादित्सन्नीहमानः तदुपादत्ते । न च व्याप्तिस्मृतिविच्छिन्नमालोचनं वा विकल्पो वा न लिङ्गपरामर्शज्ञानहेतुरिति वाच्यम्, तदुद्बोधितसंस्कारद्वारेण व्याप्तिस्मरणे च परामर्शे च तस्य तदानीमसतोऽपि कारणत्वात् । न खलु कृषिकर्म शस्याधिगतिसमये समस्ति, न च यागादिकं स्वर्गाद्युत्पादसमये, न च त्रिवृत्कषायपानं विरेकसमये । आन्तरालिककार्यपरम्परया तु तत्साधनत्वं सर्वत्र समानम् ॥ § 128

स्यादेतत् । का पुनरियं पिपासोशमनशक्तिस्तोयस्य, या अनुमानगोचरः ? न तावन्मीमांसकवदतीन्द्रिया शक्तिर्युस्माभिरभ्युपेयते, किं तु कारणानां स्वरूपं वा सहकारिसाकल्यं वा । तत्र स्वरूपं हेतूनां प्रत्यक्षमेव । सहकारिणां प्रत्यक्षाप्रत्यक्षाणां साकल्यं कार्यसमुत्पादैकव्यञ्जनीयम्, न तु तत् 82/tha तोयरूपदर्शनमात्रात् शक्या नुमानम् । तत् किमपरमवशिष्यते यदनुमानस्य गोचर इति ? अत्रोच्यते न वयमतीन्द्रियं सामर्थ्यमातिष्ठामहे, नापि सहकारिसाकल्यानुमानमाचक्ष्महे, किं तु स्वरूपस्य कार्यसंबन्धिताम् । न चेयं स्वरूपमेव, इहस्थस्येव नारिकेलद्वीपादागतस्यापि वह्निदर्शनमात्राद् ग्राहकत्वावगमप्रसङ्गात् । तस्मात् कार्योपहितं स्वरूपमनुमेयम् । इदमेव चास्य कार्योपधानं यत् कार्योत्पादात् पूर्वमवश्यंभाव आनन्तर्यनियमः । न च तज्जातीयस्य दृष्टचरस्य तथाभावदर्शनेऽपि दृश्यमानस्य तोयस्य तद् दृष्टं भवति येन तत्र स्मर्येत । न खलूज्जयिन्यामुपलब्धस्य सौधस्य पाटलिपुत्रे स्मरन्त्यभ्रान्ताः । उपादानेन हानं व्याख्यातम् । न चोपेक्षानुपादानतया हानपक्षे निक्षिप्ता, अहानतयोपादानपक्षे निक्षेपप्रसङ्गात् । उपादानप्रयत्नाप्रसवहेतुतया नोपादानमिति चेत् ? किमियं हानप्रयत्नमपि प्रसूते यतो हानं स्यात् ? तस्माद् या नोभयप्रयत्नप्रसवहेतुः सोपेक्षाबुद्धिस्तृतीया लोकप्रसिद्धेति सिद्धम् ॥ § 129

प्रत्यक्षपदव्युत्पत्तिं दर्शयित्वा अनुमानादिपदेष्वपि व्युत्पत्तिगतिं दिशति—एवमनुमानादिष्वपीति । तत्रेदमनुमानपदव्युत्पत्तिभाष्यम्—मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानमिति । मितिर्मानम् । तथा च लिङ्गदर्शनोद्बोधितसंस्कारजा स्मृतिर्व्यवच्छिना, तस्या मितेरन्यत्वेन लोकसिद्धत्वात् । मितेनेत्यज्ञानसन्देहविपर्यासा लिङ्गविषया व्युदस्ता भवन्ति । तथापि

३ *] अनुमिमानः स्वरूपं तथा°nvt-C
४ *] °पादित्सुः समीहमानःnvt-C
९ तु] तत्तत्कार्यसा°nvt-C
११ तीन्द्रिया] °रस्माभिरभ्यु°nvt-C
१३ ल्यं] °समुत्पादव्यञ्ज°nvt-C
१४ मात्रात्] °रूपमात्रदर्शनात्nvt-C
१६ हे] °नुमानम् ।nvt-C
२७ पि] व्युत्पत्तिं दर्शयतिnvt-C
२८ म्] °त्पत्तिपरं भाष्यंnvt-C
३० च्छिना] °तिर्विभिन्नाnvt-C
३० त्वेन] °तेरितरत्वेनnvt-J
३१ स्ता] निरस्ताnvt-C

मितेनार्थस्य ज्ञानं शाब्देऽप्यस्तीत्यत उक्तम्—लिङ्गेनेति । अपक्षधर्मतां निवर्तयति—लिङ्गिन इति । तथापि धर्मिणः प्रत्यक्षगोचरत्वात् कृतमनुमानेनेत्यत उक्तम्—अर्थस्येति । अर्थ्यते साध्यत इत्यर्थः । न च धर्मी स्वरूपेणार्थ्यते, किं तु जिज्ञासितधर्मविशिष्ट इत्यर्थः । पश्चादित्यनुशब्दस्य व्याख्या । तदेतद्भाष्यमनुभाष्याक्षिपति—मितेनेति । कस्मादयुक्तमित्यत आह—फलाभावादिति । एतद् विभजते—एतस्मिन्निति । अनुमानज्ञानस्य फ- 83/tha
लावस्थायामेवार्थो मित इति मेयं नावशिष्यते, यत्रैतत् सिद्धं सत् प्रमाणं भवेदित्यर्थः । तत्र फलविशेषणपक्षमास्थाय यत इत्यध्याहृत्य समाधत्ते—नैष दोष इति । अनध्याहारेणाप्यदोष इति समाधानान्तरमाह—भवतु वेति । पूर्वोक्तं दोषं स्मारयति—ननु चेति । परिहरति—न दोष इति । अथ कस्मात् हानादिविषयं प्रमाणमुच्यते, न स्वगोचरं प्रतीत्यत आह—सर्वं च प्रमाणमिति । यद्यपि वह्निविज्ञानस्यानुमानस्य सतो हेयत्वादिकं विषयः, *तत्रैव व्यापारात् । अन्यथा प्रमाणफलयोर्विभिन्नविषयत्वेन विप्रतिपत्त्या प्रमाणफलभावायोगात् । न हि पनसविषयेण परशुना खदिरे द्वैधीभावो भवति । तथापि फलान्तरानपेक्षमुत्पत्तावेव विज्ञाने यत् प्रकाशते स तस्य विषयः । तत्र तु न तत् प्रमाणम्, फलान्तराजनकत्वादपि तु फलमेवेत्यर्थः । विषयान्तरं प्रति तु प्रमाणमित्याह—विषयान्तरमिति । चोदयति—यदीति । भावसाधनश्चेत् प्रमाणशब्दः फलमस्यार्थो न तु फलं स्वविषये करणम्, *तद्व्यापारस्य तज्जनकेनैव कृतत्वात् । न च स्वविषयादन्यद् विषयान्तरमस्य संभवति, अतिप्रसङ्गादिति भावः । परिहरति—उक्तं फलमिति । यद्यपि यत्र फलं सोऽस्यौत्पत्तिको विषयः, तथापि यत्रानेन प्रमाणेन सता हानादिबुद्धयो जनयितव्याः, सोऽपि व्यापारेण विषय इति भावः । फलत्व एव हेतुमाह—ज्ञात इति । परोक्षार्थावगाहितया हेयादिबुद्धयः प्रत्यक्षफलं न भवन्ति, भवन्ति त्वनुमानस्येति नियमवादिनां मतमुपन्यस्य दूषयति—केचित् त्विति । अनियमं रोचयमान आह—उभयं त्विति । § 130

अनुमानशब्दवत् फलेन निर्वचनीयत्वमुपमानशब्दस्येति मन्वान आक्षिपति सामीप्येति । समाधत्ते—नास्ति व्याघात इति । नेयमुपमानशब्दस्य फलेन निरुक्तिः अपि तु प्रमाणेन निरुक्तिरिति न व्याघात इत्यर्थः । § 131

84/tha

शब्दविषया प्रतिपत्तिः शाब्दं प्रमाणम् । यत् खलु चैत्र, गां बधानेति वाक्यमिदमित्यनुसन्धानात्मकं स्मार्तं विज्ञानमुपजायते, तत् पदार्थस्मरणसहकारिविशिष्टार्थविषयं विज्ञानं प्रसूते, तच्छाब्दं प्रमाणम् । प्रमाणमुक्त्वा

---

१ ज्ञानं ] शब्दे°nvt-C
२ र्मिणः ] इति । धर्मिणःnvt-C
३ ते ] अर्यतnvt-J
४ ते ] °णार्यतेnvt-J
८ मास्थाय ] °क्षमास्थी nvt-C
१३ * ] तत्रैव तस्य प्रामाण्यात् । अथ प्र° nvt-C
१७ तु ] तत् nvt-C
१९ * ] तज्ज्ञानस्य nvt-C
२६ त् ] फले nvt-J
२८ स्य ] फले nvt-J

फलमस्याह—फलं तदेव । यदा ह्येतत् प्रमाणं तदा वाक्यार्थविज्ञानं फलम् । *यदानुमानवद् वाक्यार्थविज्ञानं प्रमाणं तदा हानोपादानादिबुद्धयः फलमित्यर्थः । § 132

अत्र प्रत्यक्षादीनां क्रमोद्देशप्रयोजनं प्रति एकदेशिमतमुपन्यस्यति—केचित् त्विति । प्रत्यक्षपरा हि प्रमाणान्तरजन्याः प्रमितय इति प्रत्यक्षस्य प्राधान्यम् । यद्यपि *किञ्चिदनुमानमनुमानादिपूर्वकमपि, तथापि प्रायेण प्रत्यक्षपूर्वकम् । उपमानं तु प्रत्यक्षपूर्वकमपि शब्दपूर्वकमेवेत्यस्यानुमानादपकर्षः । स्मणसहकारिता चानुमानसादृश्यमुपमानस्यास्तीत्यनुमानानन्तरमुद्देशः । अल्पज्ञानाधीनं च बहुज्ञानमित्यल्पविषयप्रत्यक्षाद्युद्देशेभ्यः परो बहुविषयशब्दोद्देश इति । *तदेतद् एकदेशिमतमेकदेश्यन्तरमतेन दूषयति—तच्चायुक्तमित्यपर इति । अक्लिष्टो हि प्रथमं महाविषयमेव दुरवधारणत्वान्निरूपयति, अल्पविषयं तु क्लिष्टोऽपि शक्नोति निरूपयितुम् । अतो महाविषयत्वं प्राथम्य एव हेतुर्न चरमत्व इत्यर्थः । अनन्तरमतं दूषयति—एतच्चेति । एतावता क्रममात्रं भवेत्, न तु तद्विशेषनियम इत्यर्थः ॥ § 133

संप्रति विमर्शपूर्वकं स्वाभिमतक्रमनियमहेतुमवधारयन्नेव पूर्वैकदेशिमतमपाकरोति—तस्मादन्य इति विमर्शनिमित्तं विप्रतिपत्तिमाह—प्रत्यक्षं पूर्वं प्राधान्यात् इत्येकः । महाविषयत्वाच्चादौ शब्दोपदेश इत्यपरः । तत्र महाविषयत्वमनैकान्तिकं सन्नागमस्यैव पूर्वोपदेशं गमयतीत्याह—उभयमिति । पृच्छति— कथमिति । उत्तरम्—प्रत्यक्षेणापीति । महाविषयत्वलक्षणसाधारणधर्मदर्शननिमित्तं संदेहमाह—तत्रेति । स्वाभिमतेन हेतुना क्रमविशेषनिय-
85/tha ममवधारयति— प्रत्यक्षस्येतीति । यद्यपि प्रमितेः प्रत्यक्षपरत्वेन प्रत्यक्षस्य प्राधान्यम्, तथापि शास्त्रे व्युत्पाद्यत्वेनानुमानस्यापि तदस्तीति साधारणतया न हेतुरिति भावः । § 134

स्यादेतत् । व्यवस्थितविषयं प्रत्यक्षं नानुमानविषये प्रवर्तते, न चानुमानमगृहीतसंबन्धमुदेति । न च संबन्धग्रहः संबन्धिग्रहमन्तरेण । न चानुमानविषये सामान्यरूपे संबन्धिनि प्रत्यक्षं प्रवर्तते । अनुमानान्तरेण तु ग्रहणेऽनवस्था । तस्मात् कारणाभावान्नानुमानमस्ति । एतेन शब्दोपमाने अपि परास्ते, तयोरपि संबन्धसंवेदनाधीनजन्मत्वात् । तस्मात् नाप्रत्यक्षं प्रमाणमिति विभागवचनमनुपपन्नमिति शङ्कामपनेतुं विमर्शपूर्वकं विचारयति स्म भाष्यकारः—किं पुनः प्रमाणानीति । तदेतद्भाष्यमनुभाष्याव्याख्याने कारणमाह—किं पुनरेतानीति । § 135

---

२ *] यदा वाक्यार्थnvt-J
६ *] °नुमानपूर्व°nvt-C
१० *] तदेक°nvt-J
१२ क्नोति] क्लिष्टोऽपि शक्तोnvt-C
१७ निमित्तं] °मित्तांnvt-C
२१ निमित्तं] सहेतुमाहnvt-C
२१ तेन] अभिम°nvt-C
२२ ति] °वतारयतिnvt-C
३२ नुभाष्याव्याख्याने] हेतुमा° nvt-C

सा चेयं प्रमितिः प्रत्यक्षपरेति भाष्यम् । तदनुभाष्य हेतुमाह—सेयमिति । आकांक्षाभावप्रतिपादनाय प्रतीतिस्वरूपं क्रमं चाह—यथायमिति । आहित उत्पादितः प्रत्ययो निश्चयो यस्य, संसर्गोपधानं वह्निं प्रति स तथा । सन्दिग्धेन हि निश्चयाय प्रवर्तितव्यमेव । निश्चितस्तु विनिश्चयाय प्रमाणान्तरे प्रवर्तमानस्तदभ्यर्हिततरं मन्यते । धूमाङ्गत्वेनेति । अङ्गत्वं व्यापकत्वम् । व्याप्यं पुनर्व्याप्तिक्रियायां कर्मत्वेन प्रधानम् । तदनेन धूमव्यापकत्वोपधानेन धूमाद् गम्यमानो वह्निः परोक्ष इति दर्शितम् । अनुपहितप्रकाशस्तु प्रत्यक्षेणाव्यवहितवह्निस्वरूपप्रकाशः । स हि साक्षात्कार इति । तावदयं प्रमाता साकांक्षो यावदुपधानव्यवहितं स्वरूपमुपलभते । उपधानानपेक्षस्तु प्रत्यक्षेणाव्यवहितं साक्षाद् वह्निं विषयीकृत्य निराकांक्षो भवति धूमाङ्गत्वेन धूमविशेषणत्वेनेति केचित् । तत्तु प्रकृतानुपयोगितया अयुक्तमिति । उपसंहरति—अतः प्रधानमिति । सोऽयं गुणाप्रधानभावो भेदाश्रयो व्यवस्थायां नास्ति, व्यवस्थितानां प्रत्येकमेकत्वात् । तस्माद् व्यवस्थायां गुणाप्रधानभावो न चिन्त्य इति । इतिः सूत्रसमाप्तौ ॥ ३ ॥ § 136

॥ इति न्यायत्रिसूत्रीतात्पर्यटीका समाप्ता ॥ § 137

86/tha

## इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ १ । १ । ४ ॥ § 138

प्रत्यक्षादिप्रमाणविशेषलक्षणानामर्थाक्षिप्तसामान्यलक्षणविभागोद्देशहेतुत्वेन तदनन्तराभिधानमित्याह—अथ विभक्तानामिति । तत्र तेषु मध्ये प्राथम्यात् प्रत्यक्षलक्षणम् इन्द्रियार्थसन्निकर्षोत्पन्नम् इत्यादि सूत्रम् । अस्य तात्पर्यमाह— सूत्रार्थः सूत्रप्रयोजनम् । समानासमानजातीयविशेषकत्वम् । समानजातीयमनुमानादि, असमानजातीयं प्रत्यक्षाभासप्रमेयादि । तेभ्यो विशेषकत्वं विशेषः । तदस्य सूत्रस्य प्रयोजनम् । यः खलु कुतश्चिद् व्यामोहात् समानासमानजातीयव्यावृत्तं तद्रूपं न शक्नोति ग्रहीतुम्, सोऽनेन लक्षणेन बोध्यते, एवंलक्षणकं प्रत्यक्षमिति । तस्मात् सामान्यतः सिद्धविविक्तप्रत्यक्षमात्रानुवादेन लक्षणविधानपरमिदं सूत्रम् । इतस्त्ववगतलक्षणः तेनैव विविच्य प्रत्यक्षतत्त्वं गृह्णातीति समानासमानजातीयव्यवच्छेदः सूत्रार्थ उक्त इति । अत्र च यत इत्यध्याहृत्य यत्तदोर्नित्याभिसंबन्धात् तत् प्रत्यक्षमिति प्रमाणवाचि प्रत्यक्षपदं योजनीयम् । एवं च ज्ञानप्रामाण्यपक्षेऽपि यत् तद्विशेष्यज्ञानं प्रत्यक्षफलं लिङ्गपरामर्शो वा तदपीन्द्रियार्थसन्निकर्षोत्पन्नत्वाद्युपेतत्वेन भवति प्रमाणविशेषणमिति नाव्यापकत्वं लक्षणस्येति

२ रूपं ] °तीतिरूपं nvt-C
३ था ] सत्तया nvt-C
९ ते ] रूपमुपलभ्यते nvt-C
१० ति ] भवतीति धूमा° nvt-J
१३ स्थायां ] °स्थाया nvt-C
१४ चिन्त्य ] चिन्त्यत nvt-C
२९ च ] °ण्यमते° nvt-C

। सूत्रपदार्थं पृच्छति—अथेति । उत्तरम्—इन्द्रियेति । सन्निकर्षग्रहण-लभ्यं प्रकारभेदं परिसंचष्टे— सन्निकर्षः पुनरिति । पुनःशब्देन संयोग-समवायपदोपादानात् व्यवच्छिनत्ति । संयोगपदोपादाने हि न समवायो लभ्यते, समवायपदोपादाने वा न संयोगः । सन्तिकर्षपदोपादाने त्वभिम-तलाभः । अर्थग्रहणेनार्थ्यमाणतया ज्ञेयस्वरूपयोग्यता दर्शिता । न चासाव-ण्वाकाशादीनामस्तीति सत्यपि संयोगादौ नासावर्थसन्निकर्ष इति तद्व्युदासः । उत्पन्नग्रहणेन च सन्निकर्षस्योत्पादकत्वं सूचितम् । ततः सत्यप्यर्थस्व-रूपयोग्यत्वे संयुक्तसंयोगादेरनुत्पादकस्य सन्निकर्षस्य व्युदासः । अन्यथा
87/tha कुड्यादि संयुक्तेनेन्द्रियेण कुड्यादिव्यवहितस्य तत्संयुक्तस्य घटादेः तत्सम-वेतस्य च रूपादेरपि ग्रहणप्रसङ्गः । न चैतावता त्रिविध एव सन्निकर्षः संयोगः संयुक्तसमवायः समवायश्चेति सांप्रतम् । स्वतन्त्रव्याघातादनुभवव्याघाताच्च । ये हि द्रव्यगुणकर्माश्रयं सामान्यातिरिक्तं सादृश्यमर्थान्तरं रोचयन्ते, तेषां कथं रूपादिभेदानामन्योन्यस्य सादृश्यं प्रत्यक्षं भवेत् ? न हि तदिन्द्रियेण संयुक्तम् । नापीन्द्रियसंयुक्तसमवेतम् । तस्मात् चतुर्थः संयुक्तसमवेतसम-वायोऽभ्युपगन्तव्यः । इतरथा स्वतन्त्रव्याघातः अनुभवव्याघातश्च । अनुभूयन्ते हि रूपगन्धत्वादयः सामान्यविशेषा अनुगताः, तासु तासु व्यक्तिषु परस्पर-व्यावृत्तिमतीषु एते नानुभूयेरन् असति सन्निकर्षान्तरे । यदि तु वैयात्यादाहुः नानुभूयन्त एवेति, तदा प्रतिवक्तव्यं कुतस्त्योऽयमनन्तासु रूपगन्धादिव्यक्तिषु रूपमिति वा गन्ध इति वा व्यपदेशभेदः ? चाक्षुषत्वाद्युपाधिनिबन्धन इति चेत्-न, अननुसंहितोपाधेरुपहितप्रत्ययायोगात् । न खल्वननुसंहितदण्डश्चैत्रं दण्डीति व्यपदिशति । न चेन्द्रियाण्यतीन्द्रियाणीन्द्रियदर्शनविषयभावमनुभव-न्ति । तस्मादस्तीन्द्रियेण रूपत्वादिसामान्यानुभवो यन्निबन्धनाः कासुचिदेव व्यक्तिषु केचिदेव व्यदेशभेदा इति सिद्धं सन्निकर्षान्तरम् । विशेषणभावेन च संयुक्तविशेषणं समवेतविशेषणं च संगृहीतम् । § 139

यस्येन्द्रियेण यादृशः सन्निकर्षः तादृशं तत्र दर्शयति—तत्र चक्षुरिति । शब्दस्य आकाशगुणत्वम् । कर्णशष्कुल्यवच्छिन्नस्य नभोभागस्य श्रोत्रत्वम् । आद्यस्यैव शब्दस्य संयोगविभायोनिजत्वम् । सन्तानेन श्रोत्रे समुत्पादः सम-वाय इत्यादि द्वितीये निपुणतरमुपपादयिष्यते । अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिजातिमन्तौ च मिथः संबद्धावनुभूयेते नान्यथा, तन्तुषु पट इति च, शुक्लः पट इति च, पटः स्पन्दते इति च, पटो द्रव्यमिति च बुद्धिव्यपदेशौ स्याताम् । शुक्लः पट इत्यादि सामानाधिकरण्यज्ञानं न तु संबन्धज्ञानमिति चेत् ? किं पुनरिदं सामानाधिकरण्यम् ? तादात्म्यमिति
88/tha चेत्—न, द्वितीयबुद्धिव्यपदेशयोः पौनरुक्त्यात् । अपौनरुक्त्यं चाभिमन्यन्ते प्रतिपत्तारः, *यदन्यतरदुपलभ्यान्यद् बुभुत्सन्ते । न चैकं वस्तु द्व्यात्मकमिति

५ या ] अर्यमाणतयाnvt-J
१२ हि ] द्रव्य° *Om*nvt-C
१७ वैयात्यादाहुः ] ब्रूयात्nvt-C
२८ द्वितीये ] सू. २.२.३५
३४ * ] येनान्य°nvt-C

युक्तम् । भेदाधिष्ठानस्य तन्नान्तरीयकस्य द्वित्वस्यैकात्मनि विरोधेनासंभवात् । तस्माद् भिन्ने एव वस्तुनी संबद्धे सामानाधिकरण्येन भासेते, असंबन्धे गौरश्व इतिवत् तदनुपपत्तेः । संबन्धेऽपि कुण्डे दधीतिवद्वैयधिकरण्यप्रसङ्ग इति चेत्—न, शब्दवृत्तिभेदेन संबन्धाभेदेऽपि सामानाधिकरण्यवैयधिकरण्यव्यवस्थापनात् । न हि जातु दधिशब्दः कुण्डे वर्तते कुण्डशब्दो वा दध्नि । वर्तन्ते तु सुरभिमधुरशुक्लादिशब्दाः स्वाभिधेयं निमित्तीकृत्य पटादिषु, एवं पटादिशब्दा अपि जात्यादि निमित्तीकृत्य द्रव्ये प्रवर्तन्ते इति सामानाधिकरण्यम् । तेन सामानाधिकरण्येऽपि प्रवृत्तिनिमित्तानां नैकात्म्यं परस्परम् । नापि द्रव्येण, किंतु तैस्तैरन्वितमेकं द्रव्यं प्रतीयते । शब्दानां तु तत्रैकस्मिन् द्रव्ये प्रवृत्तेः तद्वाच्यानामैकात्म्यभ्रमः । अयुतसिद्ध्या तु कुण्डे दधीतिवन्न स्फुटतरो विवेकप्रकाशः । तदेवमस्ति संबद्धानुभवः, न चासौ संबन्धानुभवं विनेति संबन्धोऽनुभूयते, स चायुतसिद्ध्यादिसंपत्त्या समवायः, न चास्यान्यः समवायोऽनवस्थानात् । न चेन्द्रियेणास्य संयोगोऽद्रव्यत्वात् । न चासंबद्धस्य ग्रहणम्, इन्द्रियाणां प्राप्यकारित्वसमर्थनात् । तस्मात् विशेषणविशेष्यभावः परिशिष्यते । नन्वयं विशेषणविशेष्यभावोऽन्यत्र संबन्धान्तरपूर्वको दृष्टः । तत् किमत्र संबन्धान्तरं कल्प्यताम् ? तथा चानवस्था इत्युक्तम् । न चेन्द्रियासंबन्धस्य ग्रहणम् । तस्माद् विना संबन्धान्तरं विशेषणविशेष्यभाव एषितव्य इति सिद्धम् । एवमभावेऽपि यदिन्द्रियसंयुक्तं वा यद्वेन्द्रियसमवेतं यथा भूतले घटो नास्तीति वा नास्त्यकारेऽनुदात्तस्वर इति वा तस्य संयुक्तस्य वा विशेषणभावेन, समवेतस्य विशेषणभावेन चेन्द्रियप्रत्यासत्त्या ग्रहणम् । न च भूतलादिरूपमेव घटाभावो नार्थान्तरमिति सांप्रतम्, सत्यपि घटादौ भूतलस्य भावात् । न च कैवल्यं तस्य धर्मो घटभावविरोधी घटाभावादन्यः । न च दृश्ये घटादौ भूतलोपलम्भः कैवल्यमभावव्यवहारहेतुरिति युक्तम् । एवं हि घटसंसृष्टभूतलग्रहोऽपि कैवल्यमिति घटाभावव्यवहारं प्रवर्तयेत् । न 89/tha
ह्यदृश्यो घटस्तदानीं दृश्यमानः । दृश्येऽनुपलभ्यमान इति तु विषेषणे किमपराद्धमुपलभ्याभावेन येन तदपाकरणायोपलम्भाभावोऽभ्युपेयते । तस्मात् सदिवासदपि तत्त्वमभ्युपेयम् । तच्च प्रत्यक्षमक्षव्यापारे सति तत्प्रत्ययात् । न च प्रतियोगिस्मरणव्यवहित इन्द्रियार्थसन्तिकर्षो नालमभावधियमुपजनयितुमिति सांप्रतमित्यग्रे दर्शयिष्यामः । सविकल्पकस्य प्रत्यक्षत्वसिद्धौ यथा शब्दस्मरणपूर्वगृहीतपिण्डानुसन्धानादयो नेन्द्रियव्यापारं व्यवदधतीति, न च शब्दस्मरणादीनामनुयोगिता, भूतलविकल्पं प्रत्यङ्गत्वात्, स्वाङ्गमव्यवधायकमिति न्यायात् । घटस्य तु प्रतियोगितेति सांप्रतम् । कस्य पुनः प्रतियोगी घटः ? तदभावस्येति चेद् भवतु । घटाभावानुभवस्य तु घटस्मरणं हेतुरिति न प्रतियोगि, किंत्वनुयोग्येव । ननु स्वरूपमात्रं दृष्टं वेश्मादावर्थं स्मरन्नेव बहिर्निर्गतश्चैत्रो यदा पृच्छ्यते केनचित्-वयस्य तव गृहे तदा किमासीत् मैत्र

२ ण्येन ] प्रतीयेतेnvt-C

१८ वेतं ] यदिन्द्रियसंबद्धंnvt-C

इति । स चैत्रः प्रतियोगिस्मरणविरहात् पुर्वमप्रतिपन्नमैत्राभावोऽपि तत्प्रश्नजनितमैत्रस्मृतिः क्षणं ध्यात्वा तदभावमवगम्याह, मित्र, तत्र नासीत् मैत्र इति । तदीयमसतीन्द्रियार्थसन्निकर्षेऽभावबुद्धिर्भवन्ती प्रत्यक्षाद्यतिरिक्तमभावाख्यं प्रमाणं व्यवस्थापयतीति । नैतत्, संयुक्तविशेषणलक्षणेन मनःसन्निकर्षेण स्मर्तव्यस्य स्मरणाभावं मैत्रस्य गृहीत्वा तेन लिङ्गेन तदभावस्य तदानीमनुमानात् । तथा हि तद्गेहं तदा मैत्राभाववत्, ज्ञानार्हस्य मैत्रस्याज्ञाने गेहस्य ज्ञायमानत्वात् । यद् यस्य ज्ञानार्हस्याज्ञाने ज्ञायते तत् तदभाववत् । यथा घटाभाववद् भूतलम् । तथा च गेहम् । तस्मात् तथा । न च यत् कदाचिदानुमानिकं तेनेन्द्रियगम्येन न भवितव्यम्, प्रमाणसंप्लवव्यवस्थापनात् । तत् सिद्धं विशेषणाभावादभावस्येन्द्रियप्रमेयतेति । संयोगसमवायपदपरिहारेण सन्निकर्षपदोपादानस्य प्रयोजनमाह—सोऽयं सन्निकर्षशब्द इति ।

§ 140

90/tha

तदनेन प्रबन्धेन इन्द्रियस्यार्थेन सन्निकर्षाद् यदुत्पद्यते ज्ञानं तत् प्रत्यक्षमिति भाष्यं व्याख्यातम् । संप्रति न तर्हीति चोद्यभाष्यं व्याचष्टे—यदीन्द्रियार्थेति । *प्रत्यक्षज्ञानकारणाभिधानप्रवृत्तस्तदेकदेशं वदन्नकुशलः सूत्रकारः स्यादित्यर्थः । कारणान्तराणि दर्शयति—तद्यथेति । विषयसंयोगि चक्षुरालोकश्च । तत्स्थं रूपम् । आत्मीयेन हि रूपेणालोकचक्षुषी द्रव्यं दर्शयत इति स्थितिः । महत्त्वं वा अनेकद्रव्यवत्त्वं वा, अनेकद्रव्या अवयवाः, तद्वत्त्वमवयविनो महत एव न द्व्यणुकस्य । तस्मादन्योन्यनिरपेक्षत्वं महत्त्वानेकद्रव्यवत्त्वयोरिति विकल्प एव न्याय्य इति । सत्यप्येवंलक्षणकत्वे चक्षुरवयविनस्तैजसस्य न चाक्षुषत्वमित्यत उक्तम्—उपलब्धिफलः संस्कार इति । धर्माधर्मनिमित्त उद्भवसमाख्यातः संस्कारः उपलब्धिफलः न चासौ चक्षुषि तस्यादृष्टवशेनानुद्भूतरूपस्पर्शत्वादित्यर्थः । परिहरति—न वक्तव्यानि इति । प्रत्यक्षलक्षणकरणप्रवृत्तो हि सूत्रकारः तदेव ब्रूयात् यदस्यासाधारणं कारणम् । न तु सदपि साधारणमस्य कारणम् । न हि तत् तस्य लक्षणमतिव्याप्तेरित्यर्थः । तदनेन नेदम् इत्यादि भाष्यं व्याख्यातम् । असाधारणं कारणं चेत् प्रत्यक्षलक्षणायोपादेयम्, हन्त, अन्यदप्यस्यासाधारणमस्ति कारणमिति तदप्युपादेयमिति चोदयति—इन्द्रियमनःसंयोगस्तर्हीति । तदनेन मनसस्तर्हीत्यस्य भाष्यस्यार्थ उक्तो वेदितव्यः । परिहरति—न, अनेनैव इन्द्रियार्थसन्निकर्षेणैव । तस्य इन्द्रियमनःसन्निकर्षस्य उक्तत्वात् । तदुक्तिसाध्यं यत् तत् तेनैव कृतम् । तत् साध्यं त्विन्द्रियमनःसन्निकर्षो न शक्नोति साधयितुम् । न च सुखदिज्ञाने मानसे अस्तीन्द्रियमनःसन्निकर्षः । इन्द्रियार्थसन्निकर्षस्तु सर्वव्यापकः । वक्ष्यति हि मनस इन्द्रियत्वम् ।

११ रिहारेण ] परित्यागेन nvt-J
१५ * ] °ज्ञान° *Om*nvt-J
२४ वृत्तो ] °करण° *Om*nvt-C
२५ म् ] कारणं *Om*nvt-C
३३ म् ] द्रः मनसश्चेन्द्रियभावात्-भाष्ये १. १. ४.

सुखादेश्चार्थत्वं सिद्धमेवेति । संप्रति व्यापकत्वमभ्युपेत्य परीहारान्तरमाह—इन्द्रियार्थेति । यद्यपीन्द्रियमनःसन्निकर्षेऽपीन्द्रियमस्ति प्रत्यक्षज्ञानस्य विशेषकम् इन्द्रियेण व्यपदेशादिन्द्रियज्ञानमिति, तथापि मनसा व्यपदेशाभावात् 91/tha मनसस्तत्राविशेषकत्वम् । इन्द्रियार्थसन्निकर्षे तूभयमपि विशेषकम्, उभाभ्यां प्रत्यक्षज्ञानस्य व्यपदेशादित्ययमस्येन्द्रियमनःसन्निकर्षाद्विशेष इति । § 141

चोदयति—यदा त्विति । तुशब्दः पूर्वपक्षं व्यावर्तयति । युञ्जानस्य हि योगिनो यदात्ममनःसंयोगादात्मनि बुद्धयो भवन्ति ताः खल्वात्मना व्यपदिश्यन्ते आत्मबुद्धय इति । मनसा च व्यपदिश्यन्ते मनोबुद्धय इति । तस्मादुभाभ्यां व्यपदेशादुभयोर्विशेषकत्वमितीन्द्रियार्थसन्निकर्षवदात्ममनःसन्निकर्षो वक्तव्य इत्यर्थः । परिहरति—यद्येति । चोऽवधारणे । यदेवासाधारणं तद् व्यपदेशभाग्भवति, कारणत्वेन तेन व्यपदिश्यते इत्यर्थः । एतदुक्तं भवति—यथा चक्षुषा इन्द्रियत्वेन ज्ञानं व्यपदिश्यते चाक्षुषमिति, तथा मनसापीन्द्रियत्वेन व्यपदिश्यते ज्ञानं मानसमिति । एवं यथा रूपेणार्थेन व्यपदिश्यते ज्ञानं रूपज्ञानमिति, तथा आत्मनाप्यर्थेन व्यपदिश्यते आत्मज्ञानमिति । तत्र चासाधारणत्वमेव तयोः । यत्र त्विन्द्रियान्तरमेवासाधारणम्, लिङ्गादि वा तत्र चात्मा नार्थोऽपि तु प्रमातैव । *यथा रूपादिज्ञानेऽनुमानादिज्ञाने वा न तत्र ज्ञानं मानसमिति वा आत्मज्ञानमिति वा व्यपदेशः, स कस्य हेतोः ? तयोः साधारण्यात् । आत्ममनःसन्निकर्षस्त्विन्द्रियार्थसन्निकर्षेण संगृहीतो न त्विन्द्रियार्थसन्निकर्षस्यैष संग्राहकोऽव्यापकत्वादिति । § 142

एकदेशिनः परीहारमुपन्यस्यति—इन्द्रियमनःसंयोगस्य वा अग्रहणं भेदेऽभेदात् । यदा हि नगरयोषितः कुतूहलात् प्रणिहितमनसो विकसितनिःस्पन्दनयनोत्पलाः सौधमालागवाक्षकैरवनिपतिं सबलवाहनमतिचिरप्रोषितपरावृत्तं गोपुरेण निविशमानमालोकयन्ति, तदा खल्वासामेकेनैवेन्द्रियमनःसंयोगेन क्रमवदनेकेन्द्रियार्थसन्निकर्षसहकारिणा भिन्नानि क्रमवन्ति हास्तिकाश्वीयादिप्रत्यक्षज्ञानानि जायन्ते । तदिदमाह—यस्मादिति । चोदयति—यदीति । यदा हि मन्दं गच्छति गवि दूरतः संयुक्तसमवायेनेन्द्रियार्थसन्निकर्षेण शुक्लो गौरित्यज्ञासीत्, अथ प्रत्यासीदन् गच्छतीत्यपि विजानाति तेनैव संयुक्तसमवायेन सन्निकर्षेण, तेन प्रत्यक्षज्ञानस्य शुक्ल इति च ग- 92/tha च्छतीति च भेदेऽपीन्द्रियार्थसन्निकर्षो न भिद्यते । तस्मादिन्द्रियार्थसन्निकर्षे तुल्यत्वादिन्द्रियमनःसंयोगोऽपि तत्र वक्तव्य इत्यर्थः । परिहरति—न वक्तव्यः । कुतः—उक्तोत्तरत्वादिति । तद्विभजते—उक्तेति । ननु भवतूक्तमुत्तरं भेदेऽभेदादित्यस्याक्षेपः समाधातव्यः इत्यत आह—अनभ्युपगमाच्च । एकदेशिमतमेतदस्माभिर्नाभ्युपेयते । तस्मान्न समाधेयमित्यर्थः । तत् किमिदानीं भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यत इति समानत्वान्नोक्त इति भाष्यम् अनुपपन्नमेव ? नेत्याह—इन्द्रियमनःसंयोगस्य चाग्रहणं समानत्वात् ।

१३ त्वेन ] °पीन्द्रियेणnvt-C
१६ वा ] यत्र चा°nvt-J
१६ * ] तथाnvt-C

पृच्छति—केनेति । उत्तरम्—आत्ममन इति । पुनः पृच्छति—किं पुनः समानत्वम् ? उत्तरम्—व्यपदेशाभाव इत्युक्तम् । तेन भाष्यस्यायमर्थः । प्रत्यक्षज्ञानस्य रूपज्ञानस्य रूपज्ञानमिति वा चक्षुर्विज्ञानमिति वा व्यपदेशेन भिद्यमानस्य आत्ममनःसंयोग इव अयम् इन्द्रियमनःसंयोगो न भिद्यते । एवं हि स भिद्यते, यदि स्वसंबन्धिवाचकेन व्यपदेशेन स्वमन्यतो व्यावर्त्यते, न विशेषणेन विशिष्टं विशेष्यं ज्ञानमप्यन्यतो व्यावर्तयेत् । न त्वस्ति इन्द्रियमनःसन्निकर्षाधाराभ्यामिन्द्रियमनोभ्यां प्रत्येकमस्य व्यपदेशो यथेन्द्रियार्थसन्निकर्षाधाराभ्यामिन्द्रियार्थाभ्यां व्यपदेशो रूपज्ञानमिति चक्षुर्ज्ञानमिति वा । तस्माद् व्यपदेशाभाव आत्ममनःसन्निकर्षेण साम्यमिन्द्रियमनःसन्निकर्षस्य । तस्मात् समानत्वात् नोक्त इति । § 143

प्रकारान्तरं समानत्वे दर्शयति—अतीन्द्रियाधारता वेति । लक्षणं हि प्रसिद्धं भवति यथा धूमो वह्नेः । न चातीन्द्रियद्वयाधारसन्निकर्षस्तथा प्रसिद्धो यथेन्द्रियार्थसन्निकर्षोऽर्थस्य संबन्धिन एकस्य प्रसिद्धत्वात्, इन्द्रियमनसोस्तु द्वयोरतीन्द्रियत्वात् । आत्मा तु यद्यपि युञ्जानस्य शरीराद्यतिरिक्तः प्रत्यक्षः, तथाप्यस्मदादीनां न तथेत्यतीन्द्रिय उक्तः । तदनेनातीन्द्रियाधारत्वं स्वरूपेणोक्त्वा तदेवं विषयावृत्तित्वमनोवृत्तित्वाभ्यामतीन्द्रियाधारत्वं सामान्यमाह—विषयावृत्तित्वं वेति । उपसंहरति—तस्मादिति । समानत्वादिति
93/tha
भाष्योक्तो हेतुः चरितार्थत्वादिति स्वोक्तः । § 144

आक्षिपति—इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तमिति । सान्तरग्रहणादिति हेतुं विभजते—विप्रकृष्टेति । ननु नार्थो विप्रकृष्टः, चक्षुषस्तत्र प्राप्तेरित्यत आह— न तु चक्षुष इति । कस्मादित्यत आह—भूतविशेषस्येति । बाह्यो भूतविशेष आलोकः । तस्य प्रसाद इन्द्रियाव्यवधायकत्वम् कुड्यादिभ्यो विशेषः यः खलु काचाभ्रपटलादिषु स्वच्छेषु समस्ति । स्यादेतत् । अस्ति कृष्णसारलक्षणो भूतविशेषः प्रसन्नान्धस्यापि, अतस्तस्यापि रूपोपलब्धिः स्यादित्यत आह—तत्तृष्णापूर्वकेति । रूपोपभोगतृष्णा हि तत्साधनं कृष्णसारमपि विषयीकरोति । एतदुक्तं भवति— भूतविशेषः कर्मापेक्षो रूपं चष्ट इति चक्षुरित्युच्यते । कर्मक्षयात् तु प्रसन्नान्धस्य न रूपं चष्ट इति न चक्षुः । अस्तु गोलकमेव चक्षुः किमेतावतापीत्याह—न चेति । विच्छिन्नं हि गोलकमर्थादनुभूयत इत्यर्थः । तदेवं वस्तुनः सान्तरस्य ग्रहणमप्राप्यकारित्वे हेतुरुक्तम् । § 145

केचित् तु सान्तरमिति ग्रहणविशेषणं हेतुं ब्रुवते, तन्मतमुपन्यस्यति—अपरे त्विति । साध्यविपर्ययादस्य व्यतिरेकं दर्शयति—न हि प्राप्यकारिष्विति । पक्षधर्मतामाह—दृष्टं त्विति । यच्चोक्तमप्राप्यकारित्वे साधनं पृथुतरग्रहणादिति, तद्विभजते—पृथुतरेति । द्व्याश्रयो हि संयोगोऽल्पमेव संयोगिन-

६ विशिष्टं ] विशिष्टंnvt-J
१६ रूपेणोक्त्वा ] °णोक्तम्nvt-C
२१ तु ] चnvt-C
२३ विशेषः ] यतnvt-J
२६ र्मापेक्षो ] रूपं चक्षाणः चक्षु°nvt-C
३१ हेतुं ] कुर्वन्तिnvt-C

मनुरुध्यते, न महान्तम् । न जातु रथादिसंयोगा नभो व्यश्नुवते, मा भूत् सर्वत्र रथादीनां तत्संयोगादीनां चोपलब्धिः । तेन यावन्मात्रं राष्ट्रवनादेर्गोलकेन व्याप्तं तावन्मात्रस्य ग्रहणप्रसङ्गः । हेत्वन्तरमाह—दिगिति । अस्यापि व्यतिरेकमुखेन गमकत्वं दर्शयति— यदि प्राप्यकारीति । अपरमपि हेतुमाह—सन्निकृष्टेति । यद्यपि गतिक्षणानां प्रत्येकं स्वाश्रयस्य देशान्तरविभागसंयोगोपजननं प्रति क्षिप्रतया न विशेषः स्वाश्रयप्रत्या सत्तौ चाविशेषः 94/tha तथाप्या चापादानविभागात् आ च प्रापणीयदेशप्राप्तेरन्तरालवर्ती यावान् गतिक्षणप्रचयः पूर्वापरीभूतो गतिरिह विवक्षितः । तस्य सान्तरत्वं मन्दत्वं विलम्बः । नैरन्तर्यं तु पाटवं क्षिप्रता । तामिमां गतिमभिन्दद् नैरन्तर्येण कुर्वदपि सन्निकृष्टमाशु प्राप्नोति । न विप्रकृष्टेन तुल्यकालम्, किं तु विप्रकृष्टं चिरेणेति । यथोक्तं दिग्नागेन—

सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च ।§ 147

बहिर्वर्तित्वादिन्द्रियस्योपपन्नं सान्तरग्रहणमिति चेत् अत उक्तम्—

अधिष्ठानाद् बहिर्नाक्षं§ 148

किं त्वधिष्ठानदेश एवेन्द्रियम् कुतः ? § 149

*तच्चिकित्सादियोगतः ॥§ 150

सत्यपि च बहिर्भावे न शक्तिर्विषयेक्षणे ।
यदि च स्यात् तदा पश्येदप्युन्मील्य निमीलनात् ॥§ 152

यदि च स्यात् उन्मील्य निमीलितनयनोऽपि रूपं पश्येत्, उन्मीलनादस्ति बहिरिन्द्रियमिति ॥ § 153

तत्र वार्त्तिककारः सान्तरग्रहणादिति हेतुं विकल्प्य दूषयति—यत् तावदिति । सान्तरता खल्वप्राप्तिसाहचर्यात् । अप्राप्तिं लक्षयति—हेत्वर्थस्य प्रतिज्ञार्थेनाक्षिप्तत्वात् अभेदेन । तदुक्तम्—न प्रतिज्ञार्थाद् भिद्यत इति । हेतुप्रतिज्ञापदवाच्यत्वेन भेदमुपचर्याक्षेप्याक्षेपकभावो द्रष्टव्यः । तस्य व्यवधायकत्वादिति । रूपवतोऽप्रसादस्वभावस्य कुड्यादेरित्यर्थः । यत् तु प्रसादस्वभावं तेजः तन्न गृह्यते, किं तु तस्य रूपमात्रं विस्फारिताक्षेण दृश्यते । तदाश्रयं च द्रव्यं साधयिष्यते । न च गुणो द्रव्यस्यान्तरम् । मा भूद् गन्धादिभिरन्तरं द्रव्यस्य, मा न भूतां च निरन्तरे द्रव्ये, स्वगुणाभ्यामन्तरितत्वात् । न चापातजन्मालोचनं वा विकल्पो वा द्रव्यानुमानं प्रतीक्षते येन रूपज्ञानानुमितं द्रव्यमिन्द्रियार्थयोर्द्रव्ययोरन्तरं स्यात् । अपि च रूपमात्रम- 95/tha गृह्यमाणे द्रव्ये स्वतन्त्रं गन्धादिवद् गृह्यमाणं कथमन्तरा स्वाश्रयमनुमापयेत्,

---

६ विशेषः ] क्षिप्रतायामविशेषःnvt-C
९ तु ] तु*Om*nvt-C
१५ * ] तत्र चिकित्सादिप्रयोगात्nvt-C

आकाशादीनामाश्रयाणामग्रहणात् ? तस्माद् विषक्तावयवतेजोद्रव्याप्रत्यक्षत्वसमारोपमात्रेण दूषणं वक्ष्यमाणं त्वन्यथासिद्धत्वदूषणं पारमार्थिकं द्रष्टव्यम् । अथाभावोऽन्तरशब्दवाच्य इति, नास्माकं मूर्तद्रव्याभावादन्यदाकाशमस्तीति भावः । दूषयति—स स्वतन्त्रश्चक्षुर्विषयो न भवति । इन्द्रियं चार्थं चान्तरा अभावो ग्राह्यः, तेन सहार्थस्य ग्रहणं सान्तरग्रहणम् । न चेन्द्रियार्थयोर्मध्ये कस्यचित् संयुक्तस्य वा समवेतस्य वा ग्रहणमस्ति, यत्तन्त्रोऽयमभावो गृह्येत इति भावः । § 154

स्यादेतत् । मा भूदान्तरालिकं संयुक्तं वा समवेतं वा विशेष्यं गृह्यमाणमेव तु रूपादि विशेष्यमिति । तत्तन्त्रोऽयमभावस्तद्विशेषणत्वेन निरूपयिष्यते । ततश्च सान्तरग्रहणमुपपत्स्यत इत्यत आह—तेन सहोपलब्धाविति । प्रतीयते हि त्वगादिभिरपीन्द्रियैः प्राप्यकारिभिरौष्ण्याभावविशेषणं शिशिरतरं पाथः । न चेन्द्रियाणामत्राप्राप्यकारिता, तस्मादनैकान्तिकम् । अन्वयाभ्युपगमेनैतदुक्तम् । अन्वयाभावे तु विरुद्धमिति भावः । न च तैजसं रूपमन्तरम्, येन सान्तरग्रहणं स्यादित्याह—न चान्या गतिरिति । यथा चैतत् तथोपपादितमधस्तात् । ये तु सान्तर इति ग्रहणमिति हेतुमाहुः, तान् प्रति दूषणमाह—यैरपीति । अन्यथासिद्धत्वे हेतुमाह—शरीरेति । शरीरावच्छिन्नाः खल्वात्मानः शरीरायतनाः शरीरमेवात्मानमभिमन्यमाना अर्थाननुभवन्ति । तत्र य एव शरीरासंबद्ध इत्यनुभूयते, तमेव सान्तर इति मन्यते । इन्द्रियसंबन्धो भवतु, मा वा भूत्, शरीरसंबन्धेन तस्य स्पर्शादौ न सान्तरत्वाभिमान इत्यर्थः । हेत्वन्तरं दूषयति—यदपीति । संबन्धमात्रेणेति । मात्रग्रहणं संबन्धचतुष्टयव्याप्त्यर्थम् । तद् यथा इन्द्रियेणार्थस्य संबन्धः, इन्द्रियावयवैरर्थस्य, अर्थावयवैरिन्द्रियस्य, इन्द्रियावयवैरर्थावयवानाम् । न चैतत् निर्यता विना पृथ्वग्रतां भवतीति पृथ्वग्रता सूचिता । यथा वर्त्तिदेशे पिण्डितमपि तेजः प्रसर्पत् प्रासादोदरं व्याप्नोति तत् कस्य हेतोः ? पृथ्वग्रत्वादिति ।
96/tha स्वभावतः प्रसरदपि न स्वपरिमाणानुविधायिनं प्रत्ययमाधत्ते, किं तु विषयभेदानुविधायिनम् । विषयनिरूपणाधीननिरूपणा हि प्रत्यया नेन्द्रियनिरूपणाधीननिरूपणाः । तदिदमुक्तम्— विषयभेदानुविधायी प्रत्यय इति । § 155

अपरमपि हेतुं दूषयति—यत् पुनरिति । देहमर्थं चान्तरावस्थितस्य पृथिव्यादेः संयुक्तसंयोगाल्पीयस्त्वं भूयस्त्वं चापेक्षमाणस्येति । खगानां चोपर्युपरि संचरतां दूरान्तिकभावो बहुलतमालोकावयवभागानां संयुक्तसंयोगाल्पत्वभूयस्त्वाभ्यामवगन्तव्यः । स च तादृगालोकावयवी प्रत्यक्षोऽन्यथा न रूपमात्रेण तदनुमानं शक्यमित्युक्तम् । न च खगानामुपर्युपरि संचरतां दूरान्तिकप्रत्ययः स्यात् । न च पतति पतत्रिणीह प्राप्तो नेहेति भवेत् । तस्मादन्यथासिद्धिरेव सहान्तरेण ग्रहणादितिवदत्रापि दूषणमिति द्रष्टव्यम् । § 156

१ स्माद् ] विविक्ता° तेजोऽवयविद्रव्या°nvt-C

अपरमपि हेतुं दूषयति—यत् पुनरिति । युगपद्ग्रहणमसिद्धम् । तदभिमानस्त्वन्यथासिद्धः । अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यदुदयगिरिशिखरमारोहत्येव मार्तण्डमण्डले भवनोदरेष्वालोक इत्यभिमानो लौकिकानाम् । तादृशं चाक्षुषमपि तेज इति क्रमेणापि गच्छद् युगपत्तत्र तत्र प्राप्तमिति लक्ष्यते । न चैकस्मादेव कर्मणो युगपद् दूरान्तिकसंयोगा भवन्तीति युक्तम् । तद्धि स्वकार्ये जनयितव्ये स्वाश्रयप्रत्यासत्तिमपेक्षते । अन्यथा मधुरास्थस्य देवदत्तस्य कर्म पाटलिपुत्रेण देवदत्तं योजयेत् । वेगाख्यसंस्कारजमपि कर्म न सहसा शरमन्तरालदेशेन च लक्ष्येण च योजयति । तस्मात् मिथ्यैव यौगपद्याभिमान इति । चोदयति—कथं पुनरिति । अस्ति हि शाखाचन्द्रमसोर्ग्रहणे यौगपद्याभिमानः । न चायमसति बाधके मिथ्येति वक्तुं शक्यः । सोऽयमबाधितो बोधोऽवबोधयत्यप्राप्यकारितां चक्षुष इत्यर्थः । परिहरति—इदमिति । इन्द्रियं यद्यगत्वानागतमर्थं गृह्णीयात्, किमस्य कुड्यकटाद्यावरणमपकुर्यात् येन तदावृतं न गृह्णीयात् । गतौ तु स्पर्शवता प्रसादरहितेन सैवास्य प्रतिबद्धेति न प्राप्नोति विषयम्, अप्राप्तं च न गृह्णाति । प्रयोगस्तु, चक्षुःश्रोत्रे प्राप्य स्वविषये कार्यं कुरुतः, जनकत्वे 97/tha
सति तदप्राप्तावजनकत्वात् । यज्जनकं सद् यदप्राप्तौ यन्न जनयति तत् तत्प्राप्तावेव तज्जनयति, यथा कुम्भजनकः कुम्भकारो मृदोऽप्राप्तावकुर्वन् कुम्भं तत्प्राप्तावेव करोति । तथा चैतत् । तस्मात् तथेति ॥ § 157

युक्त्यन्तरमाह—दूरान्तिकानुविधानमिति । दूरे नोपलभ्यते, अन्तिके चोपलभ्यते । अप्राप्तेरविशेषेण दूरेऽप्युपलम्भः स्यात् । अनुपलम्भे वा अन्तिकेऽपि न स्यात् । प्राप्तौ तु दूरं गच्छत् प्रक्षीणं सत् प्राप्तमर्थं न गृह्णाति अतैजसम् । तैजसमप्यभिभूतं न गृह्णाति यथोल्काप्रकाशं मध्यान्दिने । अनभिभूतं तु मार्तण्डमण्डलं गृह्णात्येवेति । चोदयति—विषयीभावादिति । योग्यो हि तादृश इन्द्रियक्षणः स्वकारणादुपजातः परिणतो वार्थक्षणश्च, ययोरप्राप्तयोरेव ग्रहणग्राह्यभावः । व्यवहितविप्रकृष्टौ च न तौ तादृशौ । तत् किमप्रतीयमानप्राप्तिकल्पनयेत्यर्थः । परिहरति—तच्च नैवमिति । निषेत्स्येते हि क्षणभङ्गपरिणामौ भावानाम् । तेन स्थेमभाजां भावानां स्वरूपयोग्यता वा महत्त्वादिर्विषयीभावः सहकारिसाकल्यं वा ज्ञानोपजननं प्रति परिशिष्यते । तत्र स्वरूपयोग्यतामात्रं चेदास्थीयेत, तदा यदेवाव्यवहितं सन्निहितं सद् अजनयद् विज्ञानं विप्रकृष्टमपि व्यवहितमपि तदेवेति तथैव तेन ज्ञानं जनयितव्यम् । अस्ति हि तस्य तदापि स्वरूपयोग्यतेति सहकारिसाकल्यं तु प्राप्तिरेव । तस्मात् न संबन्धमन्तरेण विषयीभाव इति सूक्तम् । सन्दिग्धः पृच्छति—अथ प्राप्यकारित्व इति । अयमभिसन्धिः—कुलालादौ प्राप्यकारिणि दृष्टं यथा विप्रकृष्टो व्यवहितश्च न करोतीति अप्राप्यकारिणि

१० न ] अयम् *Om*nvt-J
११ क्तुं ] शक्यम् nvt-J
११ बाधितो ] बोधोऽव° *Om*nvt-C
२१ न ] स स्यात् nvt-C
३० द् ] सत् *Om*nvt-J

चायस्कान्तादौ दृष्टं यथा विप्रकृष्टो व्यवहितश्च लौहं मणिराकर्षति, तस्मात् तत्र प्रमाणं वक्तव्यमिति । उत्तरम्इन्द्रियत्वमेव प्रमाणम् । तदेव पञ्चावयवोपपन्नमाह—प्राप्यकारीति । यदि तु कश्चित् दृष्टान्तस्य साध्यविकलत्वमुद्भावयेत् त्वगादीनामप्राप्यकारित्वादिति, तं प्रत्याह—अथ पुनर्न किञ्चिदिति । पृच्छति—अथेति । योग्यतयैव हि कारणानि स्वकार्यं कुर्वन्ति, 98/tha प्राप्तिस्तु स्वरूपयोग्यताप्रयुक्तां व्याप्तिमुपजीवति, न त्वस्याः स्वाभाविकं व्यापकत्वमिति भावः । उत्तरम्—सोऽपीति । सहकारिसाकल्यं तावत् न प्राप्तेरतिरिच्यत इत्युक्तम् । केवलं स्वरूपयोग्यता वक्तव्या । सा च व्यस्तानामप्यस्तीति यत्र तत्र व्यवस्थितेभ्योऽपि कार्योत्पादप्रसङ्गः । अयस्कान्तमणेरपि चक्षुष इव वृत्तिभेद एषितव्यः, अन्यथा व्यवधानविप्रकर्षयोरपि लौहाकर्षणप्रसङ्गात् । न च व्यवधानविप्रकर्षाभावसहितो लौहमाकर्षति, व्यवधानविप्रकर्षयोस्तु तदभावाभावे *नाकर्षति सांप्रतम् । प्राप्तेरेव तत्र तत्र कार्योत्पादं प्रति उपयोगस्य विदितत्वात् । योग्यतामात्रस्य चोपाधेरपाकृतत्वात् । यथा च द्रव्यातिरिक्तस्तद्धर्मः प्राप्तिस्तथाग्रे निवेदयिष्यते । तस्मात् सर्वमवदातम् । उपसंहरति—तस्मादिति । यदपि कृष्णसारानुग्रहोपघाताभ्यां दर्शनादर्शनादिति तत्रोच्यते, *तदधिष्ठानमिन्द्रियमित्यधिष्ठानानुग्रहोपघाताभ्यां तस्यानुग्रहोपघातौ । यथा कूष्माण्डलतासेचनच्छेदनाभ्यां तत्फलस्यानुग्रहोपघातौ । अत+एव बहिर्निःसृताप्यच्छिन्नमूला दृष्टिः कार्याय समर्था न छिन्नमूलेति सिद्धम् । § 158

पृच्छति—अथ ज्ञानेति । प्रत्यक्षसमाख्यातलक्षणानुवादेन लक्षणे विधीयमाने ज्ञायत एवैतज्ज्ञानमेवेति लोके साक्षात्कारिज्ञानहेतोः प्रत्यक्षत्वादिति भावः । उत्तरम्—सुखादिव्युदासार्थम् । तदेव हि लक्षणवाक्यमुच्यते, यस्य लक्ष्यानपेक्षोऽतिव्याप्त्यव्याप्तिव्युदासो लक्षणपदेभ्य एव प्रतीयते । लक्ष्यानुरोधेन तु लक्षणव्यवस्थापनेऽन्योन्याश्रयत्वमगतिर्वेति भावः । सुखादीनां विज्ञानाभिन्नहेतुजत्वेन विज्ञानत्वादशक्यं व्यावर्तनमिति चेत्—न, अभिन्नहेतुजत्वादिसिद्धेः । न खलु यैव चन्दनस्पर्शज्ञानस्योत्पत्तौ सामग्री सैव सुखस्यापीति । अस्ति हि शीतार्तस्यापि चन्दनेन्द्रियसंयोगात् शीतस्पर्शज्ञानमिति तद्वदेवास्य सुखमपि भवेत् । अवान्तरसामग्रीभेदेऽपीन्द्रियार्थमनस्कारजत्वात् ज्ञानजातीयत्वमिति चेत्—न, किञ्चित्कारणभेदेऽपि 99/tha कार्यभेदस्यानाकस्मिकत्वोपपत्तेः । तदर्थत्वाच्च कारण भेदानुसरणप्रयासस्य । न चोपादानाभेदादभेद इति युक्तम् । भिन्नानामपि ज्ञानानामेकसमनन्तरप्रत्ययोपादानत्वस्य भवद्भिरभ्युपगतत्वात् । अपि चोपादानाभेदश्च कुतश्चित् कारणभेदात् कार्यभेदश्चेति को विरोधः ? अत एवास्माकमभेदेऽप्युपादान-

१ लौहं ] मणिम्nvt-C
४ अथ ] पुनः*Om*nvt-C
१२ *] °भावेन न भवतीतिnvt-C
१३ त्वात् ] आवेदित°nvt-C
१६ *] तदधिष्ठानानु°nvt-C
१८ अत+एव ] हि निर्गताप्य°nvt-C
१८ दृष्टिः ] चक्षुःसन्ततिःnvt-C

स्य पिठरस्यौष्ण्यापराख्यस्य च वह्निसंयोगस्य पूर्वरूपादिप्रध्वंसानां कारणानां भेदाद् भिन्नजातीया जायन्ते गन्धरूपरसस्पर्शा इति सिद्धान्तः । तस्मादर्थप्रवणेभ्यो ज्ञानेभ्यस्तदप्रवणतया भिन्नजातीयाः सुखादयो यथास्वमनुकूलवेदनीयत्वादिभिर्लक्षणैरन्योन्यमपि भेदवन्तस्तीव्रसंवेगतया प्रमित्सानपेक्षमानसप्रत्यक्षप्रवेदनीया इति रमणीयम् ॥ § 159

स्यादेतत् । असत्यपीन्द्रियार्थसन्निकर्षे ज्ञानमात्रादेव सुखदुःखयोः स्वप्रान्तिके दर्शनात् यत्रापीन्द्रियार्थसन्निकर्षस्तत्रापि ज्ञानमस्तीति तदेव सुखदुःखयोः कारणं क्लृप्तसामर्थ्यात् । इन्द्रियार्थसन्निकर्षस्य तु ज्ञानमात्रोपयोगादन्यथासिद्धौ भावाभावाविति । तदयुक्तम्, स्वप्नान्तिके सुखदुःखोत्पादस्यासिद्धेस्तज्ज्ञानस्यार्थज्ञानस्येव मिथ्यात्वात् । यथा हि तत्र कामिनीस्मृतिविपर्यास एवमुपलब्धचरतज्जन्मसुखस्मरणविपर्यासः । सुखदुःखबुद्ध्युत्पाद एव चात्र धर्माधर्मोपयोगो न तु सुखदुःखोत्पादे । न चासतीन्द्रियार्थसन्निकर्षे ज्ञानमन्यन्मनोरथादि वा तादृशं सुखभेदं विधत्ते यादृशो विषयोपभोगजन्मा । सतीन्द्रियार्थसन्निकर्षे ज्ञानमात्रमेव तस्य हेतुः । ज्ञानहेतुस्तु सन्निकर्ष इत्युक्तमिति चेत्—न, विषयासन्निधाने विषयस्मृतिमतः तादृशस्य सुखभेदस्यानुत्पादादित्यप्युक्तमेव । विषयसाक्षात्कारस्तदुत्पादहेतुर्न विषयज्ञानमात्रमिति चेत् ? हन्त, ईश्वरस्याप्यस्ति तत्रभवतो योगर्द्धिसंपन्नानां च महाधियां समस्तवस्तुसाक्षात्कार इति तेषामपि सुखदुःखोत्पादप्रचयः प्रसज्येत असत्यां प्रतिपक्षधारणायाम् । तस्मादिन्द्रियार्थसन्निकर्षोऽपि सुखदुःखोत्पादहेतुरेषितव्यः । स च सत्यप्यर्थसाक्षात्कारे नास्ति सिद्धानामिति न तेषां सुखदुःखोत्पादः । अपि च चरमभावि कारणं गृहीत्वा पूर्वभाविनामकारणत्वापादने तन्त्वादीनामपि पटादीन् प्रत्यकारणत्वप्रसङ्गः । 100/tha
संयोगभेदादेव तादृशपटोत्पत्तेः तन्त्वादीनां च संयोगभेद एवोपयोगात् । तत्सहितस्य तु तत्कारणत्वं सनिनिकर्षस्याप्यालोचनसहितस्येति समानम् । यथाहुः पदार्थविदः स्रगाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षधर्माद्यपेक्षादात्ममनसोः संयोगात् यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत्सुखम् इति । तस्मात् सुष्ठूक्तं सुखादिनिवृत्त्यर्थं ज्ञानग्रहणमिति । § 160

इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति । तत्रोभय्यपि इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति लक्षणेन संगृहीतापि स्वशब्देनोपात्ता, तत्र विप्रतिपत्तेः । तत्राविकल्पिकायाः पदम् अव्यपदेश्यमिति, सविकल्पिकायाश्च व्यवसायात्मकमिति । तत्र व्यपदेशो विशेषणमुपलक्षणं वा नामजात्यादि, तत् कर्म व्यपदेश्यं विशेष्यमिति यावत् । तद्यथा डित्थोऽयं गौरयं शुक्लोऽयं कमण्डलुमानयं गच्छत्ययमिति सर्वं हि स-

१२ एव ] वात्रnvt-C
१६ मेव ] °दित्युक्त°nvt-C
२४ त्वं ] °कारणत्वnvt-C
२७ म् ] पदार्थधर्मसंग्रहे प्रशस्तपादीये सुखलक्षणम्

विकल्पकं विशेषणविशेष्यभावेन वस्तुषु प्रवर्तते । अविद्यमानं व्यपदेश्यं यस्मिंस्तदव्यपदेश्यं जात्यादिस्वरूपावगाहि, न तु जात्यादीनां मिथो विशेषणविशेष्यभावावगाहीति यावत् । § 161

तत्र नामरहितमविकल्पकं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति भाष्यकारः यावदर्थं वै नामधेयशब्दाः । सर्वेऽर्थाः सर्वथा सर्वदा सर्वत्र नामधेयान्विताः । नास्ति सोऽर्थो यः कदाचित् क्वचित् कथञ्चित् नामधेयेन वियुज्यते । तदनेन नामधेयतादात्म्यमर्थानां प्रतिजानीते । अत्र हेतुमाह—तैरर्थसंप्रत्यय इति । अर्था हि प्रतीयमाना नामधेयैरुपेतास्तत्सामानाधिकरण्येनावगम्यन्ते, गौरित्यर्थोऽश्व इत्यर्थ इति । न चोपायतया सामानाधिकरण्यं घटते । न हि चक्षुरादिसामानाधिकरण्यं रूपाद्यनुभवति । नापि ज्ञायमान उपाय उपेयसामानाधिकरण्यमनुभवति । न हि भवति धूमोऽयं वह्निरिति, किं तु धूमोऽयं धूमत्वात् वह्निमानिति । अपि चाशब्दोपायेऽनुमेयादौ न शब्दसंभेदेनाधिगमो भवेत्, अस्ति तु । तस्मात्
101/tha तैर्नामधेयैः सह समाना धिकरणस्यार्थस्य प्रत्ययो यत इति । तस्मात् नामधेयात्मानोऽर्थाः । किं च गवादिषु *षड्जादिषु च शब्दापकर्षेऽर्थप्रत्ययापकर्षात् तदुत्कर्षे त्वर्थप्रत्ययोत्कर्षात् प्रत्ययस्य च प्रत्येतव्योत्कर्षाधीनोत्कर्षत्वात् नामधेयोत्कर्षेणार्थस्योत्कर्षोऽर्थस्य तादात्म्यं *गमयति । तदिदं समः प्रयोजनं संप्रत्यय इति समधिकः प्रत्यय इत्यर्थः । अस्त्यर्थसंप्रत्ययो नामधेयसामानाधिकरण्येन, न त्वेतावता नामधेयात्मता सिध्यति । अस्ति हि पुरोवर्तिद्रव्यसामानाधिकरण्येन रजतप्रत्ययो न चैतावता शुक्ती रजतात्मिका भवतीत्यत आह—अर्थसंप्रत्ययाच्च व्यवहारः । ततश्चाविसंवादात् प्रमाणं सन्नामधेयतादात्म्यं साधयत्यर्थानामित्यर्थः । § 162

तदेवं सामान्यतोऽर्थानां नामधेयतादात्म्यं व्युत्पाद्य प्रकृते योजयति—तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्नं विषयज्ञानं रूपमिति वा रस इति वा एवं रूपाद्यर्थसामानाधिकरण्येन भवति । भवतु, किमेतावतापीत्यत आह—रूपरसशब्दाश्च विषयनामधेयम् । किमेतावतापीत्यत आह—तेन व्यपदिश्यते ज्ञानम् । उक्तमपि व्यपदेशं सव्याख्यानमाह—रूपमिति जानीते रस इति जानीते इति । तथा चार्थानां नामधेयात्मकत्वात् तद्गोचरमालोचनमपिनामधेयगोचरमित्यर्थवत् नामधेयेन व्यपदिश्यमानं शाब्दं प्रसज्यत इति । न शब्दप्रमाणकतया शाब्दम्, अपि तु शब्दे जातं शाब्दम् । शब्दश्चात्र विषयत्वेन जनकोऽर्थतादात्म्यात् । तथा च नाविकल्पकं शब्दरहितमस्तीति तात्पर्यार्थः । तथा चाहुः,

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते ॥ § 165

१५ *] वृक्षादि°nvt-C
१७ *] कथयतिnvt-C
२० ण्येन] °वर्तिसामानाधि°nvt-C

वाक्यपदीयम् १'१२३ बालमूकादीनामपि ज्ञानं शब्दानुव्याधवदेवानादिशब्दभावनावशात् । यदवोचत्,

आद्यः करणविन्यासः प्राणस्योर्द्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥§ 167

वाक्यपदीयम् १'१२२ इति । तदस्य निराकरणं लक्षणगतेनालोचनज्ञानावरोधार्थेनाव्यपदेश्यपदेन सूचितमिति परीक्षापर्वणि वचनार्हमपि सुभाषितरुचितया तद्विलम्बमसहमानो भाष्यकारो लक्षणावसर एवाह । अत एवाह—अव्यपदेश्यमिति । तेन सूचितेऽप्यर्थे अव्यपदेश्यपदं योजयति—यदिदमनुपयुक्ते शब्दार्थसंबन्धेऽर्थज्ञानम्, न तत् नामधेयशब्देन व्यपदिश्यते । § 168

अयमभिसन्धिः । सामानाधिकरण्येन शब्दात्मकत्वं रूपादीनामभिधीयमानं शब्दब्रह्मात्मकत्वं वोच्येत श्रूयमाणगौरित्यादिपदभेदात्मकत्वं वा ? न तावदाद्यः कल्पः । न खल्वस्मदादिसमस्तदर्शनपथातिवृत्तेन शब्दब्रह्मणा रूपादीनामस्ति सामानाधिकरण्यप्रतीतिर्लौकिकानाम् । श्रूयमाणशब्दसामानाधिकरण्येन तु तादात्म्यप्रसाधने अनुपयुक्तशब्दसंबन्धस्य बालमूकादेः रूपादिज्ञानेषु नास्ति श्रूयमाणशब्दगन्धोऽपि, प्रागेव तु तत्सामानाधिकरण्यम् । न च तेषामपि प्राग्भवीयशब्दभावनानुगमेन तत्सामानाधिकरण्यमिति सांप्रतम् । न खलु रूपाद्यात्मनः शब्दस्य रूपादिवैशद्येनावैशद्यं संभवति । युगपद् वैशद्यावैशद्यरूपविरुद्धधर्मयोगेन भेदप्रसङ्गात् । वैशद्ये तु व्युत्पन्नवदव्युत्पन्नोऽपि शब्दैर्व्यवहरेत्, न तु संबन्धग्रहणमपेक्षेत । न च तादात्म्यादन्यद् वाचकत्वं शब्दानां यत्र संबन्धग्रहापेक्षा भवेत् । न च तादात्म्येऽपि कल्पितभेदानां वाच्यवाचकभावः । तथा सति न सामानाधिकरण्यं स्यात् । न ह्यस्ति संभवो भेदकल्पना च सामानाधिकरण्यप्रथा चेति । तस्मादव्युत्पन्नानामस्ति शब्दरहितं रूपादिषु निर्विकल्पकं प्रत्यक्षमिति । न केवलमव्युत्पन्नानाम्, व्युत्पन्नानामप्यस्तीत्याह—गृहीतेऽपि च शब्दार्थसंबन्धे इति । अर्द्धोक्त एव सामानाधिकरण्यनिरासाय संबन्धग्रहणस्वरूपमाह—अस्यार्थस्य सास्नादिमद्रूपस्य अयं गकाराद्योकारो नामधेयमिति । इतिकरणो ज्ञानपरामर्शप्रधानः । तथा च यो डित्थो नानादेशकालावस्थासंसृष्टः पिण्डभेदः सोऽयमिति सन्निहितदेशकाल इत्यर्थः । न त्वयं पिण्डो डित्थशब्द इति प्रत्ययः । औत्सर्गिकं हि शब्दानामर्थपरत्वं क्वचित् पुनरित्यादिभिः शब्दैस्तदपोद्यते । यत्रापि संबन्धप्रतिपादनमभेदेन *अयं डित्थ इति, तत्रापि 103/tha
शब्दो वाच्यत्वपरो न स्वरूपपरः । यथा गौर्वाहीक इति लक्ष्यमाणगुणयोगपरः । न च तन्मात्रेण वाहीकस्य गोत्वं भवति । तस्माद् भिन्नयोरेव शब्दार्थयोः संबन्धग्रहात् तन्मूलत्वाच्च शब्दव्यवहारस्य न शब्दपुरःसरमपि

२९ *] अयं *Om* nvt-C
३० रो] वाच्यपरो न स्वपरः nvt-C

ज्ञानं *शब्दसामानाधिकरण्यमात्मनोऽर्थस्यावगमयति । यत्तु शब्दानुपायेऽपि ज्ञाने शब्दः पूर्वं भवति तद्गृहीतसङ्केतस्य प्रथममिन्द्रियार्थसन्निकर्षादालोचनेन शब्दसंसर्गरहितेनालोचितेऽर्थमात्रे तस्यार्थभेदस्य शब्दभेदेन संबन्धात् शब्द-विषयः संस्कारः प्रबोध्यते । स प्रबुद्धः शब्दस्मृतिं जनयति । तेन व्युत्पन्नस्य निर्विकल्पकात् पराञ्चः प्रत्ययाः शब्दानुपाया अपि शब्दपुरःसरा जायन्ते । यथाहुः,

यत् संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् ।
पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः ॥ § 171

तस्माद् व्युत्पन्नस्यापि नामधेयस्मरणाय पूर्वमेषितव्यो विनैव नामधेयमर्थप्रत्ययः । तदिदमुक्तम्—गृहीतेऽपि च शब्दार्थसंबन्धे अस्यार्थस्यायं शब्दो नामधेयमिति । यदा तु सोऽर्थो गृह्यते नामधेयरहितो नामधेयस्मरणात् पूर्वमविकल्पेन तदा पूर्वस्माद् अव्युत्पन्नावस्थायाम् अर्थज्ञानात् न विशिष्यते इति । यतो न विशिष्यते तस्मात् तदर्थज्ञानं तादृगेव भवति । ननु परप्रतिपादनादिलक्षणव्यवहाराय स्वरूपेण ज्ञाने व्यपदेष्टव्ये यदर्थव्यपदेशेन व्यपदिश्यते तदवगच्छामोऽर्थव्यपदेशाकारमिति । कथं चार्थाकारं भवति ? यद्यर्थव्यपदेशयोर्नाभिदः, तस्मात् पुनरपि तादात्म्यं प्रसक्तमित्यत आह—तस्य त्विति । अर्थाकारमेव तु ज्ञानमर्थव्यपदेशेन व्यपदिश्यते अन्यथा अशक्यत्वादित्यर्थः । प्रतीयमानं परेण । उपसंहरति—तस्मादिति । तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते प्रतीयमानतया व्यवहारकाले परप्रत्यायनकाले तु व्याप्रियते कारणतया । तदनेन गोपालाविपालादीनां संज्ञानिवेशनं तासु तासु व्यक्तिषु व्यवहारोत्कर्षहेतुः नार्थोत्कर्षहेतुरित्यपि सूचितं भवति । तस्माद् अविकल्पकप्रत्यक्षावरोधार्थेनाव्यपदेश्यपदेनास्यैवाविकल्पकस्य शब्दानुव्याधरहितता सूचिता इत्याशयवान् उपसंहरति—तस्मादिति । § 172

तदेतद् भाष्यं वार्त्तिककारः तात्पर्यतो व्याचष्टे—तच्चेन्द्रियार्थेति । विषयभेदानुविधायि ज्ञानमिति शब्दात्मतामपाकरोति । चाक्षुषं हि रूपज्ञानं रूप एव नियतं न शब्दे प्रवर्तते । एवं श्रोत्रमपि शब्द एव नियतं न रूपादौ प्रवर्तते । यदि पुनरिदं शब्दात्मकं रूपादि भवेत् श्रोत्रजं ज्ञानं शब्दग्राहीति रूपादावपि प्रवर्तेत । अप्रवर्तमानं वा विधुरयति रूपादीनां शब्दात्मताम् । अपि च श्रूयमाणशब्दात्मत्वे रूपादीनाम्, तेषामपि श्रवणग्राह्यत्वमित्यन्धोऽपि रूपं गृह्णीयात् । अस्ति हि तस्य श्रोत्रं च शब्दज्ञानं च । एवं बधिरोऽपि शब्दं गृह्णीयात् । अस्ति हि तस्य लोचनं च रूपज्ञानं च । अशब्दोऽभाव इति च विवक्षितविपरीतापत्तिः शब्दाभावस्यार्थस्य शब्दत्वात्, अशब्दत्वे वा स एवास्यार्थः शब्दाद् भिन्नः प्रसज्यते । एवमभावोऽप्यर्थ इति शब्दः स्यात्

१ *] शब्द° *Om*nvt-C
३ स्य] °र्थस्यnvt-C
१३ स्मात्] तस्मान्नnvt-C

। तथा च नाभावः, शब्दस्य सत्त्वात् । तथा चार्थानुविधायि विज्ञानं न भवेत् । अस्ति च । तस्मात् न शब्दात्मानोऽर्था इति । तदुत्पत्तिकाल इति प्राथम्येन शब्दानुव्याधं व्यावर्तयति । § 173

एकदेशिव्याख्यानमाह—अपरे त्विति । इन्द्रियार्थसन्निकर्षेण हि लिङ्गेन यदिन्द्रियगतिज्ञानं तदपि प्रत्यक्षलक्षणोपेतमिति प्रत्यक्षं प्रसज्यत इति तन्निवारणायाव्यपदेश्यपदम् । अपदेशो हेतुवचनम् । तदेव तदाभासेभ्यो विशिष्टं व्यपदेशः । तस्य कार्यं हेतुप्रत्यायनद्वारा अनुमेयज्ञानं व्यपदेश्यम् । न व्यपदेश्यमव्यपदेश्यमलिङ्गोद्भवमित्यनुमानं व्यावर्तितमित्यर्थः । तदेकदेशिमतं दूषयति—तच्च नैवमिति । नन्विन्द्रियगतिज्ञानमपि इन्द्रियार्थसन्निकर्षाल्लिङ्गादुत्पन्नमित्यत आह—न ह्यनुमेयस्येति । नैतदिन्द्रियार्थसन्निकर्षादुपजायते, किं तु तज्ज्ञानात् । अत+एवातीतेऽपि धूमादौ लिङ्गे तत्स्मरणमात्रादेवानुमेयज्ञानं भवति । न च सन्निकर्षपदस्य मुख्यत्वे संभवति 105/tha ज्ञानलक्षणा युक्तेति भावः । उपसंहरति—अत इति । इमं च वार्त्तिकग्रन्थमबुध्यमाना इन्द्रियगतिज्ञाननिवृत्त्यर्थमिन्द्रियविषयेष्विति पदं सूत्रेऽध्याहरन्तीति । § 174

क्रमप्राप्तस्याव्यभिचारिपदस्य तात्पर्यं ब्रुवाणो भाष्यस्यापि तात्पर्यमाह—ग्रीष्मे मरीचय इतीति । यद्यपि सामान्यलक्षणेनैव व्यभिचारिणो निरस्ताः प्रत्ययास्तदपेक्षं च विशेषलक्षणम्, अन्यथा अनुमानादिपदेष्वप्यव्यभिचारिपदमुपादेयं स्यात्, तथापि सिद्धे सत्यारम्भो नियमार्थः । द्वयी हि प्रमाणानां गतिः । किञ्चित् सत्तामात्रेण प्रमासाधनं यथा प्रत्यक्षम् । न हि चक्षुरादीनां ग्रहणं प्रमायामुपयुज्यते, अपि तु सत्तैव । अनुमानादीनि तु स्वज्ञानेन प्रमासाधनानि न खल्वगृहीतं लिङ्गं वा शब्दो वा आगमसहितं सादृश्यं वा यथाविषयम् आदधाति प्रमाम् । तत्रानुमानस्य प्रमोपजननात् प्रागेवार्थाव्यभिचारग्रहणमपेक्षते नान्यथा । ततः प्रमा सिध्यतीति । शब्दादौ तु यद्यपि प्रमोपजननं प्रति नार्थाव्यभिचारग्रहापेक्षा, तथापि शक्यमतिरोहितार्थमन्त्रमध्यपतितस्य द्रागित्येव प्रतीयमानार्थस्यापि सृण्येव जर्भरी तुर्फरी तू इत्येवमादेर्मन्त्रस्याप्तप्रणेतृकतया सामान्यतोऽर्थाव्यभिचारित्वं ग्रहीतुम् । औत्सर्गिकं हि शब्दानामर्थपरत्वम् । अत+एव निगमनिरुक्तव्याकरणसहायास्ततोऽर्थमवधारयन्ति । एवं यथा मुद्गस्तम्बस्तथा मुद्गपर्णीति आप्तवाक्यश्रवणादेव मुद्गस्तम्बसादृश्यज्ञानस्यानुपजनितफलस्यापि शक्यं तदर्थाव्यभिचारित्वं निश्चेतुम् । प्रत्यक्षस्य तु प्रमाणस्यात्यन्तपरोक्षस्वरूपोपलम्भ एव तावत् प्रमोपजननात् प्राग् दुर्लभः, प्रागेव तु तस्यार्थाव्यभिचारित्वम् । यद्यपि च संवेदनप्रामाण्यपक्षेऽपि तत्संवेदनं मनसा सुलभम्, तथापि न तन्मात्रं प्रमाणम् । अपि तु असाधारणेन्द्रियार्थसन्निकर्षसहायमिति तत्सहायस्य तस्य परोक्षत्वमेव ।

---

६ इति ] तन्निराकरणा°nvt-C
२९ था ] मुद्गस्तथाnvt-C
२९ णादेव ] मुद्गस्तथाnvt-C
३१ म्भ ] परोक्षस्योप°nvt-C
३१ त् ] तावत्*Om*nvt-J

तेन प्रत्यक्षस्य प्रमाणस्य फलाव्यभिचारेणैवाव्यभिचारज्ञानम्, न स्वरूपत 106/tha इत्येतत् प्रमाणान्तरेभ्यो व्या  वृत्तमसाधारणं प्रत्यक्षस्य रूपमादर्शयितुमव्यभिचारि पदोपादानम् । अथवा प्रत्यक्षाव्यभिचार एवानुमानाद्यव्यभिचारे कारणम् । न ह्यस्ति संभवोऽव्यभिचरितप्रत्यक्षगृहीतपक्षधर्मताकं तर्कसहायप्रत्यक्षगृहीताविनाभावं चानुमानं व्यभिचरतीति । यत्तु बाधितविषयं सत्प्रतिपक्षितं चानुमानम् तदपि यद्यपि प्रथमं व्याप्तिग्रहणदोषेण न खण्डितम्, तथापि खण्डनोत्तरकालं सोऽपि प्रतीयते । तथा च व्याप्तिग्राहि प्रत्यक्षं तत्रापि व्यभिचारीति । एवमागमोऽपि साक्षात् क्वचित् पारम्पर्येण प्रत्यक्षपूर्वकस्तद्व्यभिचारेणैव व्यभिचरति । *आगमव्यभिचारेणैवोपमानव्यभिचारो व्याख्यातः । तदेवं प्रत्यक्षाव्यभिचारे प्रमाणानामव्यभिचारोऽस्तीति प्रत्यक्षस्यैव विशेषणम् अव्यभिचारिपदं चकार, नेतरेषां प्रमाणानाम् । न ह्यस्ति संभवस्तन्मूलं प्रत्यक्षम् अव्यभिचारि, तानि च व्यभिचारीणीति । सोऽयं विशेषः प्रमाणान्तरेभ्यः प्रत्यक्षस्य । यथाह मीमांसावार्त्तिककारः,

> प्रत्यक्षाव्यभिचारेण स्वलक्षणबलेन च ।
> प्रसिद्धाव्यभिचारित्वान्नानुमानं परीक्ष्यते ॥§ 177

इति । तस्मात् सुष्ठूक्तं ग्रीष्मे मरीचय इति भाष्यम् । तत्प्रतिषेधार्थमिदमुच्यते— अव्यभिचारीति । § 178

पृच्छति—किमिदमिति । उत्तरम्—यदतस्मिन्निति । एतच्चोपपादितं द्वितीयसूत्रे । पुनः पृच्छति—किं पुनरत्रेति । एकदेशिमतेनोत्तरम्—एके तावदिति । तदेतद् दूषयति—तच्च नैवमिति । पृच्छति—कस्मात् ? उत्तरम्—अर्थस्येति । तदेव स्फोरयति—यत्तदिति । अत्र च न निर्विकल्पकं भ्रान्तम्, किं तु सविकल्पकमित्याह— तांस्तु मरीचीनिति । इन्द्रियेणालोच्य मरीचीन् उच्चावचमुच्चलतो निर्विकल्पकेन गृहीत्वा पश्चात् तत्रोपघातदोषाद् विपर्येति, सविकल्पकोऽस्य प्रत्ययो भ्रान्तो जायते इति । तस्माद् विज्ञानस्य व्यभिचारो नार्थस्येति । यथाहुर्निरुक्तकाराः, § 179
107/tha

नैष स्थाणोरपराधो यदेनमन्धो न पश्यति । पुरुषापराधः स भवतीति । निरुक्तम् १. १६ § 180

अव्यभिचारिपदेनैव संशयज्ञानमपि व्युदस्तम् । नो खलु संशयज्ञानं विकल्प्यमानवस्तुगोचरं तद्रूपं वस्तु प्रापयति । अप्रापयच्चोपदर्शितं कथं संवादकम्, असंवादकं च कथमव्यभिचारि ? तस्मादव्यभिचारिपदेनैव संशयज्ञाने निरस्ते सविकल्पकप्रत्यक्षावरोधार्थमुपादीयमानं व्यव-

---

२ त् ] इत्यतःnvt-C
२ स्य ] °मापयितुम् nvt-C
४ ताकं ] °धर्मतं nvt-J
५ गृहीताविनाभावं ] वानु° nvt-C
५ यं ] °पक्षं nvt-J
८ त्रापि ] चरतीति nvt-C
९ * ] च *for* एव nvt-C
१० भिचारे ] °चारेण nvt-C
२८ पि ] परास्तम्nvt-C

सायात्मकपदं संशयज्ञानप्रत्यक्षतापाकरणमन्वाचिनोति । तद्यथा एधानाहर्तुमरण्यं गच्छ, शाकमप्यानेष्यसीति शाकानयनमन्वाचीयते । न च तदेवास्य प्रेषितुर्विधित्सितम्, तथेहापि । व्यवसायात्मकपदं साक्षात्सविकल्पकस्य वाचकम् । तथा हि व्यवसायो विनिश्चयो विकल्प इत्यनर्थान्तरम् । स एवात्मा रूपं यस्य तत् सविकल्पकं प्रत्यक्षम् । तदेतदतिस्फुटत्वात् शिष्यैर्गम्यत एवेति भाष्यवार्त्तिककाराभ्यामव्याख्यातमपि अस्माभिः, § 181

त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखैः ।
यथान्यायं यथावस्तु व्याख्यातमिदमीदृशम् ॥§ 183

स्यादेतत् । न व्यवसायात्मकं प्रत्यक्षं भवितुमर्हति । अभिलापसंसर्गायोग्यप्रतिभासं हि तत् । न चेन्द्रियार्थाभ्यां लब्धजन्म विज्ञानमर्थावभासं शक्यमभिलापेन योजयितुम् । न ह्यर्थे शब्दाः सन्ति, अर्थात्मानो वा, तथा सत्यव्युत्पन्नस्यापि व्युत्पन्नवद् व्यवहारः स्यादित्युक्तम् । न चाभिलापोऽर्थसंस्पर्शो संवेदनधर्मः, अर्थेषु तन्नियोजनात् । तस्मादर्थादुपजायमानं ज्ञानमर्थमेवादर्शयेत् नाभिलापम् । न हि रूपात् जायमानं प्रत्यक्षं रससहितमेतदादर्शयति । तस्मादभिलापसंसर्गानपेक्षमभिलापसंसर्गिणमादर्शयद् विकल्पविज्ञानं विकल्पवासनोत्थापितमनियतार्थग्राहि मानसमात्मीयमुत्प्रेक्षालक्षणं व्यापारं तिरस्कृत्यानुभवप्रभवतया अनुभवव्यापारं दर्शनं पुरस्कृत्य प्रवर्तमानमनुभवतया अभिमन्यन्ते प्रतिपत्तारः । तत् सिद्धमेतत्, य- 108/tha
दर्थसामर्थ्यलब्धजन्म, न तत् शब्दकल्पनानुगतम्, यथा निर्विकल्पकम् । *अर्थसामर्थ्यलब्धजन्मानश्च विवादाध्यासिता विकल्पा इति प्रसङ्गसाधनविरुद्धव्याप्तोपलब्धिः । शब्दकल्पनानुगतत्वस्य हि प्रतिषेध्यस्य विरुद्धं तदननुगतत्वम्, तेनार्थसामर्थ्यजत्वं व्याप्तम् । तस्योपलब्धिस्तदननुगतत्वमुत्थापयन्ती तदनुगतत्वं विरुणद्धीति । अथैषां प्रत्ययानां प्रत्यक्षमभिलापानुगतत्वमशक्यापह्नवम् ? हन्त भोः, नार्थसामर्थ्यजत्वमिति प्रसङ्गविपर्ययः । तथा हि यदभिलापकल्पनानुगतं न तदर्थसामर्थ्यजं यथेश्वरप्रधानादिविकल्पविज्ञानम् । तथा चैते विवादाध्यासिता विकल्पा इति व्यापकविरुद्धोपलब्धिः । निषेध्यमर्थसामर्थ्यजत्वं तदभिलापकल्पनाननुगतत्वेन व्याप्तं तद्विरुद्धं च तदनुगतत्वमिति । न च सन्दिग्धव्यतिरेकिता, अर्थसामर्थ्येन हि तदुत्पद्यमानमर्थरूपमनुकुर्याद् न शब्दरूपम् । न ह्यर्थे शब्दाः सन्ति तदात्मानो वेत्युक्तम् । असंबद्धरूपानुकारे तु विज्ञानस्य सर्वरूपानुकारेण सर्वसर्वज्ञतापत्तिरिति । सङ्केतवशात् शब्दानामर्थसंबन्धेनार्थोपलब्धौ तत्स्मरणात् तत्संसृष्टवेदनमिति चेत् ? यत्र तर्हि ते कृतसङ्केताः तदेव स्मारयेदेतान् । तत्रैव च

१ दं ] °प्रत्यक्षतया करणम्nvt-C
५ त्वात् ] °तिस्फुटतरत्वात्nvt-J
८ थान्यायं ] यथामानंnvt-C
२० *] अर्थजन्मा°nvt-C
२० इति ] प्रसङ्गसाधनं विरु°nvt-J
३२ ङ्केताः ] य एव तर्हि कृत°nvt-C

ते कृतसङ्केता यदनुगतं सामान्यम् । न च तद्दृष्टम्, किं तु स्वलक्षणं दर्शनगोचरः । तदेव हिपरमार्थसद्विज्ञानस्य कारणम्, न तु सामान्यम् । सर्वसामर्थ्यरहितं हि तत्, अलीकत्वात् । तस्माद् यद् दृष्टं न तेन शब्दानां संबन्धः, येन च संबन्धो न तद् दृष्टम् । अपि च दृष्टस्य शब्दवाच्यत्वे दर्शनादिव वह्निरुष्ण इति वाक्यादपि प्रतीयेत । तथा च शब्दादपि तस्मिन् प्रतीते शीतापनोदनप्रसङ्गः । सामान्यविषयौ लिङ्गशब्दौ वस्तुभूतसामान्यवच्च स्वलक्षणम् । तादृशं च तद्दर्शनस्य कारणमिति निर्विकल्पकेन प्रथमाक्षसन्निपातजन्मना जातिमद्वस्तुवेदनात् तत्रोपलब्धचरसंबन्धस्य शब्दस्य स्मरणम् । तथा च तच्छब्दाभिधेयजातिविशिष्टद्रव्यावगाहीन्द्रियार्थसन्निकर्षजन्मा
109/tha विकल्पप्रत्ययो गौरयमित्येवमाकारो जायत इति चेत् ? यथाहुः,*

निर्विकल्पकबोधेन द्व्यात्मकस्यापि वस्तुनः ।
ग्रहणम् श्लो. वा. प्रत्यक्ष. ११८[§ 186]

तथा [§ 187]

ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमता ॥[§ 189]

श्लो. वा. प्रत्यक्ष. १२० इति । तन्न, पिण्डविवेकेन जात्यादेरविकल्पकेनाग्रहणात् । न हि जातिजातिमन्तौ वा क्रियाक्रियावन्तौ वा गुणगुणिनौ वा तत्समवायो वा विवेकेन चकासति । न च विवेकेनाप्रतिभासमानाः शक्या मिथो योजयितुं क्षीरोदकवदतद्भेदिना । तस्मादेकमविभागं स्वलक्षणमनादिविकल्पवासनासमारोपितजात्यादिभेदं तथा विकल्प्यत इति युक्तमुत्पश्यामः । अपि च परमार्थसद्वस्तुद्वयवेदनेऽपि कुतो विशेषणविशेष्यभावः ? न ह्यङ्गुल्यावेकविज्ञानविषयौ मिथो विशेषणविशेष्यभावमापद्येते । विशेषणं खलूपकारकम्, उपकार्यं च विशेष्यम् । नान्यथा तयोस्तद्भावः । न चैकविज्ञानसमारूढयोर्ज्ञाप्यज्ञापकभावो वा कार्यकारणभावो वा संभवी, समानकालयोस्तयोरुभयोरपि पौर्वापर्यनियमात् । अपि च वस्तुनिवेशे जात्यादीनामुपाधीनामेकस्य वस्तुनः सत्त्वं च द्रव्यत्वं च पार्थिवत्वं च वृक्षत्वं च शिंशपात्वं चोपाधय इति दूरादेकोपाधिविशिष्टस्य ग्रहे सर्वोपाधिविशिष्टग्रहप्रसङ्गः । तथा ह्याधाराधेयभाव उपकारगर्भो भवति । पतनधर्मणो हि बदरस्योत्तरस्य कुण्डमधरं प्रत्यासन्नमपतनधर्मकं बदरं विदधद् आधारः । तद्वदिहापि जात्यादीनामुपाधीनामुपकर्तव्यम् । न च शक्त्यन्तरैरुपकरोति । शक्त्यन्तरोपकारेऽपि शक्त्यन्तरकल्पनायाम् अनवस्थापातात् । तस्मात् स्व-

२ स्य ] °सतो विज्ञानस्यnvt-C
३ त्वात् ] अलीकत्वात्*Om*nvt-J
८ स्य ] °पलब्धे च न सं°nvt-C
१० * ] °हुर्निरुक्तकाराःnvt-C
२० था ] तथा तथाnvt-C
२९ स्य ] उत्तरस्य*Om*nvt-C
३० दिहापि ] द्रव्येण जात्यादीनामुप°nvt-C

भाव एव स्वकारणाधीनजन्मा द्रव्यस्य स तादृशो येन बहूनामुपाधीनामुप-
करोतीति वाच्यम् । तथा च सत्त्वोपकारसमर्थे तस्मिन् द्रव्ये गृह्यमाणे
द्रव्यत्वाद्युपकारसमर्थोऽपि स एवास्य स्वभाव इति तत्स्वभावावच्छिन्नाः स-
त्त्वविकल्पकेन परमार्थसद्द्रव्यावगाहिना सर्व एव द्रव्यत्वपार्थिवत्ववृक्षत्वशिंश- 110/tha
पात्वादयो विषयीकृता इति विकल्पान्तराणामानर्थक्यम् । यदाह,

यस्यापि नानोपाधेर्धीग्राहिकार्थस्य भेदिनः ।
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे ।
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः ॥ § 193

एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे ।
दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रहः ॥ § 195

इति । § 196

अस्माकं तु अनादिविकल्पवासनोपादाना विकल्पा यच्च गृह्णन्ति, यच्चाध्यवस्यन्ति तयोरुभयोरप्यन्यनिवृत्तिरूपतया अवस्तुत्वात् मनागपि न परमार्थसद् वस्तु गाहन्ते, पारम्पर्येण तु वस्तुप्रतिबन्धात् तत्र प्रवर्तयन्तः प्रापयन्तश्च न विसंवादयन्ति लोकम् । अतो वस्तुसद्भावाविनिवेशाद् विकल्पानां न पौनरुक्त्यमस्ति । अपि चालोचिते वस्तुनीन्द्रियेण तदनन्तरोत्पन्नं शब्दस्मरणव्यवहितव्यापारमिन्द्रियमर्थश्च न सविकल्पिकामपि धियमुपजनयितुमर्हतः । यथाह,

अर्थोपयोगेऽपि पुनः स्मार्तं शब्दानुयोजनम् ।
अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् ॥ § 199

न च यदेवालोचनमजीजनदिन्द्रियं तदेव स्मरणसहकारि विकल्पप्रत्ययमाधत्ते । न च स्मृतिर्व्यवधायिका स्वाङ्गमव्यवधायकमिति न्यायात् । यतो § 200

यः प्रागजनको बुद्धेरुपयोगाविशेषतः ।
स पश्चादपि । इति § 202

नो खल्वतीतं भवति गोचरोऽक्षस्य । न चागोचरे सहस्रेणाप्युपायैरेतत्
*प्रवर्तितुमर्हति । न च स्मृतिरतीतविषयाननुभूतपूर्वं वर्तमानं गोचरयितुमर्हति
। तद्गोचरत्वे चान्धानामपि रूपसाक्षात्कारप्रसङ्गः । यथाह, 111/tha

तेन स्यादर्थापायेऽपि नेत्रधीः । § 204

३ माणे ] द्रव्यत्वादावपिnvt-C
८ निश्चितः ] प्र. वा. ३. ५२
९ रे ] द्रः प्र. वा. ३. ५४
१० ये ] °न्नदृष्टेऽपिnvt-C
१४ स्तु ] गाहतेnvt-C
२७ * ] प्रवर्तयितुम्nvt-C

इति । तदेवं नामजातिगुणकर्मकल्पनाः प्रत्यक्षत्वेन परास्ताः । द्रव्यकल्पनापि दण्डीति, § 205

विशेषणं विशेष्यं च संबन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सङ्कलय्यैतत् तथा प्रत्येति नान्यथा ॥§ 207

न चैतावन्तं व्यापारकलापं विचारकनिर्वर्तनीयमिन्द्रियज्ञानं सहते, तस्य सन्निहितविषयबलेनोत्पत्तेरविचारकत्वात् । *जातिगुणक्रियावतां चैतन्न संभवत्येव, रूपविवेकसंबन्धयोरप्रतिभासनेन घटनायोगात् क्षीरोदकवदतद्वेदिनेत्युक्तम् । तस्मात् न तद्विकल्पं प्रत्यक्षमिति । § 208

अत्रोच्यते । यत् तावदुक्तमर्थसामर्थ्यजत्वाभिलापसंसर्गायोग्यप्रतिभासत्वयोर्विरोध इति, तत्र ब्रूमः । स्याद् विरोधो यदि स्वलक्षणमेवार्थः, न त्वेतदस्ति । उपपादयिष्यति हि परमार्थसन्तं जात्यादिमन्तमर्थं स्थेमभाजमभिलापसंसर्गयोग्यम् । तेन तज्जनितं ज्ञानमर्थसामर्थ्यजं चाभिलापसंसर्गायोग्यप्रतिभासं चेति न विरोधः । तथा च प्रसङ्गसाधनस्य सन्दिग्धव्यतिरेकिता । न च द्रव्याद्यभिन्नं जात्यादि भिन्नं कल्पयन्तो विकल्पा नार्थसामर्थ्यजन्मान इति सांप्रतम् । द्रव्यादपि हि भेदः साधियष्यते तेषाम् । यथा च भेदेऽपि तेषां तद्वाचकानां सामानाधिकरण्यं तथोपपादितमधस्तात् । न च भिन्नेन शब्देन डित्थोऽयमित्यभेदकल्पनादर्थस्य विकल्पानामनर्थजत्वमिति युक्तम् । उक्तमेतद् अव्यपदेश्यपदव्याख्यानावसरे यथा न शब्दाभेदेनार्थयोरेकेन्द्रियज्ञानसंसर्गिता किं तु प्रथममालोचितोऽर्थः सामान्यविशेषवान् *संङ्केतग्रहणसमयवर्तिनीमात्मनोऽवस्थां स्मारयन् तत्कालभाविनं शब्दमपि स्मारयत्यवर्जनीयतया । न त्विन्द्रियजविकल्पोत्पादं प्रत्यस्त्युपयोगः कश्चिच्छब्दस्मरणस्य । अन्यथा बालमूकादीनां नेन्द्रियजः स्याद्विकल्पःशब्दस्मरणाभावात् । सङ्केतसमयवर्त्यवस्थास्मरणं तूपयुज्यते, वस्तुनस्तदानीन्त-
112/tha नेदानीन्तनावस्थाभेदवत एकस्येन्द्रियजेन विकल्पेनाकलनात् । शब्दस्तु संपातायातो न निवेशयत्यात्मानमिन्द्रियजे विकल्पे । यथाह, § 209

देवदत्तादिशब्देन हृदयस्थेन यः स्मृतः ।
चक्षुषापि स एवायं पिण्डः संप्रति दृश्यते ॥§ 211

अनेन हि पिण्डस्य पूर्वापरावस्थावर्तिनीमेकतामिन्द्रियजविकल्पगोचरत्वेन दर्शयति, न तु शब्दनिवेशनमपि । तथा,

संज्ञा हि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते ।

४ था] प्र. वा. २. १४५
६ *] गुणक्रिया°nvt-C
७ नेन] °भासनेnvt-C
८ म्] °दवत् तद्वेदने°nvt-C
८ न] विकल्पक°nvt-J
११ हि] ष्यते चnvt-C
१९ र्गिता] °ज्ञानग्राह्यताnvt-C
२० *] सङ्केतसमय°nvt-C

संज्ञिनः ।§ 214

कुतः ?

सा तटावस्था न रूपाच्छादनक्षमा ॥§ 215

नार्थेन्द्रियव्यापारं व्यवधत्ते इत्यर्थः । न च प्रागवस्थास्मरणसापेक्षतया नेन्द्रियार्थसन्निकर्षः कारणं विकल्पस्येति सांप्रतम् । यतो, § 216

न किञ्चिदेकमेकस्मात् सामग्र्याः सर्वसंभवः ।§ 217

प्र. वा. ३. ५३ इति भवन्तोऽप्याहुः । अन्यथालोकमनस्कारसापेक्षमर्थेन्द्रियं निर्विकल्पकमपि न जनयेत् । यत्तु प्रथमं नाजीजनत् तत् स्मरणसहकारिविरहात् । न हि नाजीजनत् कुशूलस्थं बीजमङ्कुरमिति न समवहितक्षित्यादिसहकारिग्राममप्यस्याजनकं भवति । न च जनकत्वाजनकत्वलक्षणो विरुद्धधर्मसंसर्गो भेदहेतुरित्युपपादयिष्यते क्षणभङ्गभङ्गे । § 218

स्यादेतत् । अतीतावस्था नेन्द्रियगोचरस्तस्य वर्तमानार्थे नियमात् । न च वर्तमानोऽर्थः स्मरणगोचरः स्मरणस्यानुभवजनितसंस्कारोद्बोधजन्मनः पूर्वानुभवगोचरं प्रति नियमात् । तस्मात् भिन्नविषयतया नेन्द्रियसहकारिता स्मरणस्य । न हि रूपविषयाः सहस्रमपि नयनप्रदीपादयः शब्दविषयस्य श्रवसः सहकारितामापद्यन्त इति । तत् किं भवतां यत्र गन्धज्ञानानन्तरं चाक्षुषं रूपज्ञानं जायते तत्र गन्धज्ञानम् न समनन्तरप्रत्ययः ? तत्रापि हि 113/tha
चक्षूरूपविषयं न गन्धविषयस्य ज्ञानस्य सहकारि भवितुमर्हति, भिन्नविषयत्वादेव । अथान्वयव्यतिरेकनिबन्धनः कार्यकारणभावो न समानविषयत्वमनुविधीयते इत्युच्येत, तदस्माकमपि समानम् । नन्वतीतावस्थाविशिष्टत्वमस्य नेन्द्रियसन्निकृष्टमिति कथं प्रत्यक्षम् ? तत् किं यदिन्द्रियसंबद्धं तत् प्रत्यक्षम् ? तथा सत्याकाशपरमाण्वादयोऽपि तत्संयुक्ता इति तेऽपि प्रत्यक्षाः प्रसज्येरन् । तस्माद् यदेवेन्द्रियजस्य ज्ञानस्य गोचरस्तत् प्रत्यक्षम् । *न त्विन्द्रियसंबद्धम् । नन्वसंबद्धमिन्द्रियं कथं तत्र ज्ञानं जनयति ? तच्च ज्ञानं कथं प्रत्यक्षम् ? प्रत्यक्षं चेत्, कथमिन्द्रियार्थसन्निकर्षोत्पन्नमिति लक्षणं प्रत्यक्षं व्याप्नोति, अस्यैव प्रत्यक्षस्य लक्षणेनाव्यापनात् ? मा भूदर्थस्य पूर्वकालवर्तिता इन्द्रियगोचरः, तथापि स्मरणसहकारिणा संस्कारसहकारिणा वेन्द्रियेण यज्ञनितं ज्ञानं तेन तद् विषयीक्रियत एव । न च यत् स्मरणसहकारिणेन्द्रियार्थसन्निकर्षेणोपजनितं तदिन्द्रियार्थसन्निकर्षोत्पन्नं न भवति । तथा च नाव्यापकमस्य लक्षणम् । § 219

२ स्था] संज्ञिनः सा तटस्था हिnvt-C
५ स्मात्] एकस्याःnvt-C
१० ङ्गे] द्रः ३. २. १०-७
१६ रं] गन्धबुद्ध्यन°nvt-C
१७ त्र] रूपविज्ञानं तत्रnvt-C
२३ *] न न त्वnvt-C
२४ मिन्द्रियं] नन्वसंबन्धेnvt-C
२८ द्] तेन तावद्nvt-J

ननु पूर्वापरावस्थापरामर्शि ज्ञानं कथमेकम्, विषयभेदात् पारोक्ष्यापारोक्ष्यलक्षणविरुद्धधर्मसंसर्गाच्च ? तथा हि तदिति पारोक्ष्यम्, इदमिति च साक्षात्कारः । न च विरुद्धधर्मसंसर्गेऽप्येकत्वम्, त्रैलोक्यस्यैकत्वप्रसङ्गात् । विषयभेदश्च पूर्वदेशकालापरदेशकालसंबन्धयोरेकस्य विरोधात् । यथा ह्येकस्मिन् पद्मरागमणौ गृह्यमाणे तदभावो व्यवच्छिद्यते, यदि पुनर्न व्यवच्छिद्येत तदा भावो न परिच्छिद्येत, तस्य स्वाभावव्यवच्छेदरूपत्वात् । तदभावाविनाभाविनश्च पुष्परागादय इति तेऽपि सर्वे व्यवच्छिन्ना भवन्ति । यदि पुनर्न व्यवच्छिद्येरन्, स एव पुष्परागाद्यात्मेति तदविनाभावी पद्मरागाभाव इति, स एव तदेव पद्मरागाभावः पद्मरागश्च स्यादिति दुर्घटमापद्येत । एवं तस्यैव
114/tha पूर्वदेशकालसंबन्धे गृह्यमाणे तदभाव व्यवच्छेदक्रमेणापरदेशकालसंबधो व्यवच्छिन्नः पूर्वदेशकालसंबन्धाभावाव्यभिचारी । तथा च न परदेशकालसंबन्धस्वभावः । तथापि यद्यसौ तद्देशकालसंबन्धादन्यस्वभावो भवेत् । तथा सति स एव भवेत् न भवेच्चेति दुर्घटमापद्येत । तस्मात् पूर्वदेशकालसंबन्धादन्योऽपरदेशकालसंबन्ध इति सिद्धो विषयभेद इति । § 220

अत्रोच्यते । यदि पारोक्ष्यापारोक्ष्यधर्मभेदात् पूर्वापरावस्थापरामर्शिज्ञानं भिद्येत, हन्त भोः, तदित्यपि विकल्पो भिद्येत । सोऽपि हि परोक्षश्चापरोक्षश्च विकल्पश्चाविकल्पश्च । अर्थे परोक्षो विकल्पश्च स्वात्मनि त्वविकल्पोऽपरोक्षश्च । तस्माद् विषयभेदादविरोध इति चेत्—न त्विहापि तदेकं ज्ञानं तस्यैवैकस्य वस्तुनः पूर्वदेशकालसंबन्धे परोक्षमपरोक्षं वा परदेशकालसंबन्ध इति को विरोधः ? योऽपि कालदेशसंबन्धभेदेन विषयभेद उक्तः, सोऽपि अयुक्तः । यतो युक्तं यत् पद्मरागस्वरूपग्रहे तदभावो व्यवच्छिद्यत इति, स्वाभावव्यवच्छेदात्मकत्वेन भावानां तदव्यवच्छेदे स्वरूपाग्रहणप्रसङ्गात् । कस्मात् पुनः पुष्परागादयो व्यवच्छिद्यन्ते, पद्मरागाभावाविनाभावादिति चेत् ? अथैतदभावाविनाभावज्ञानं कुतस्त्यम् ? तयोः कदाचिदपि तादात्म्येनानुपलम्भादिति चेत् ? यत्र तर्हि तादात्म्यमुपलभ्यते न तत्र तदभावाविनाभावः, तथा च पूर्वापरदेशकालसंबद्धस्तादात्म्येनानुभूयमान इन्द्रियजेन विकल्पेन पद्मरागो न भिन्नो भवितुमर्हति । तस्मात् पूर्वापरदेशकालौ तत्समबन्धौ वा कामं भिद्येयातां परस्पराभावाविनाभावात्, तयोरेकदापि तादात्म्येनाप्रतिभासनात् । न तु तदालिङ्गितस्वभावः पद्मरागमणिः, तस्य ताभ्यामन्यत्वात् । न चान्यस्य भेदोऽन्यस्य भेदमापादयति, अतिप्रसङ्गात् । न चेन्द्रियार्थसन्निकर्षाभावेऽपि *पूर्वापरावस्थापरामर्शात्मनो विकल्पस्य भावादनिन्द्रिय-

२ दिति ] परोक्षम्nvt-C
५ दि ] यदि न...द्येत भावो पुनः*Om*nvt-J
१८ इति ] अयं भागःnvt-J पुस्तके ।
२० इति ] अयं भागःnvt-J पुस्तके ।
२४ तादा ] एषnvt-Jपुस्तकपाठः, nvt-Cपुस्तके तु° त्म्यं नानुपलभ्यं तेन इति । अस्याधारभूते खपुस्तकेnvt-J पुस्तकसंवादः ।
२५ न ] एषnvt-Jपुस्तकपाठः, nvt-Cपुस्तके तु° त्म्यं नानुपलभ्यं तेन इति । अस्याधारभूते खपुस्तकेnvt-J पुस्तकसंवादः ।
२८ न्धौ ] चnvt-J
३१ * ] पूर्वापरावमर्शा°nvt-J

जत्वमिति सांप्रतम्, तथा सत्यविकल्पकमपि कामातुरस्य कामिनीं भाव-
यतः तद्विषयमिन्द्रियार्थसन्निकर्षं विनापि दृष्टमिति नीलाद्यनुभवात्मानोऽपि 115/tha
अविकल्पका अनिन्द्रियजाः प्रसज्येरन् । यदि तु नीलाद्यनुभवानां कामिन्य-
नुभवात् कथञ्चिद् विशेषं ब्रूयात्, तदा अस्माकमप्यनिन्द्रियजेभ्यो विकल्पेभ्य
उत्प्रेक्षाव्यापारेभ्योऽस्तीन्द्रियजानां दर्शनव्यापाराणां भेदः । न च विकल्पगतो
दर्शनव्यापारोऽनुभूयमानः सति संभवे निर्विकल्पकोपाधिरिति युक्तम् । सर्वा
एव हीन्द्रियजा बुद्धयो विकल्पिका अविकल्पिका वा धारावाहिन्योऽहम-
हमिकया परस्परानपेक्षा एकमर्थमवगाहमाना उदयन्ते व्ययन्ते च । न
त्वमूषामन्योन्यमनुगम्यानुगन्तृतामीक्षामहे । तस्मात् इन्द्रियार्थसन्निकर्षलब्ध-
जन्मानो विकल्पा दर्शनव्यापारा नान्य इति युक्तमुत्पश्यामः । न च श-
ब्दप्रत्यक्षयोर्वस्तुगोचरत्वे सत्यपि प्रत्ययाभेदः, कारणभेदेन पारोक्ष्यापारोक्ष्य-
भेदोपपत्तेः । न च वह्निसंयोगजन्मा शीतापनोदो वह्निज्ञानाद् भवितुमर्हति ।
न चैकोपाधिना सत्त्वेन विशिष्टे तस्मिन् गृहीते उपाध्यन्तरविशिष्टतद्ग्रहप्रसङ्गः
। स्वभावो हि द्रव्यस्योपाधिभिर्विशिष्यते, न तूपाधयो वा तैर्विशिष्टत्वं वा
तस्य स्वभावः । न च यत् स्वभावसंबन्धि स स्वभावः । तथा सत्यसंब-
न्धित्वमेव । न हि तदेव तेन संबध्यते । अपि च रूपज्ञानं विषयग्रहणधर्मं
नानापरमाणुविषयं न परमाणुस्वभावः । तत्स्वभावत्वे वा तेषां सर्वान् प्रत्य-
विशेषात् सर्वैरेव ते परमाणवो विदिताः स्युः । न चासंबद्धा एव स्वज्ञानेन
रूपपरमाणवो विषयास्तस्येति वाच्यम्, असंबद्धस्य विषयत्वेऽतिप्रसङ्गात् ।
स्वभाव एवार्थज्ञानभेदयोः संबन्धो यदर्थो विषयो ज्ञानं च विषयीति चेत्
? हन्तोपाध्युपाधिमतोरपि स्वभाव एव संबन्धोऽस्तु तथापि विज्ञानार्थवन्न
स्वरूपाभेदः । क्षणभङ्गपरिणामनिराकरणे तु स्वभावातिरिक्तं संबन्धमुपपाद-
यिष्यामः । तस्मात् नैकोपाध्यन्वितग्रहणे सकलोपाध्यन्वितप्रत्ययप्रसङ्गः ।
§ 221

यच्चैकविज्ञानगोचरयोर्न विशेष्यविशेषणभाव इति, तत्र ब्रूमः । भिन्न-
ज्ञानगोचरत्वेऽपि नासौ संभवीति । न हि विशेषणज्ञानं विशेष्याविषयं
विशेष्यमवच्छेत्तुमर्हति । एवं विशेष्यज्ञानमपि विशेषणाविषयं केन स्व- 116/tha
विषयमवच्छिन्द्यात् ? तयोः परस्परवार्तानभिज्ञत्वात् । ताभ्यां वासना, ततो
मानसप्रत्ययो विशेषणविशेष्यभावाकार उत्पद्यते । न त्वस्ति विशेषणविशेष्य-
भावो वास्तव इति चेत् ? अस्तु तावद् वास्तवावास्तवचिन्ता, करिष्यते
हीयमुपरिष्टात् । यस्तु भवतामस्य मानसत्वे प्रयासः, स वरमिन्द्रियजत्व एव
भवतु, तथा सति दर्शनव्यापारत्वमस्य साक्षात् समर्थितं भवति । इतरथा
हि निर्विकल्पकोपधानं कल्प्येत । § 222

---

७ जा ] वृत्तयःnvt-C
१० व्यापारा ] नानाnvt-C
२० भाव ] °ज्ञानयोःnvt-C
२२ णे ] द्रः ३. २. १० प्रभृतिटीका
२७ केन ] विषयकं नnvt-C
२९ भावाकार ] °ष्याकारःnvt-C

नन्वविचारकमिन्द्रियज्ञानं कथं विशेषणविशेष्यादि सकलं समाकलयेत् ? हन्त भोः किं मानसमपि ज्ञानं संकलयितुमर्हति ? संकलयति मनसस्तत्कारणस्य सर्वविषयत्वादिति चेत् ? यदि पूर्वकं विज्ञानं मनः, कथं तस्य सर्वविषयता ? अस्माकं तु मनः सर्वाविषयमपि अचेतनतया न विचारकम् । तस्मादात्मैव सकलज्ञानतज्जनितवासनाधारः स्मर्ता च प्रतिसन्धाता च । यथाह, § 223

आत्मन्येव स्थितं ज्ञानं स हि बोद्धात्र गम्यत ।
स्मरणे चास्य सामर्थ्यं सन्धानादौ च विद्यते ॥§ 225

श्लो. वा. प्रत्यक्ष १२२ स खल्विन्द्रियार्थसन्निकर्षादालोच्य जातिमन्तं संमुखमर्थम् उद्बुद्धसंस्कारसमुपजातपूर्वपिण्डानुस्मृतिसहायः प्रागेव चक्षुषा विकल्पयति, गौरयमिति । यथाह,

करणं चेन्द्रियं बुद्धेः कर्ता चात्मा स चेतनः ।
स च स्मृतिसमर्थत्वात् सर्वार्थान् कल्पयिष्यति ॥§ 228

तेनैकविज्ञानवेद्यत्वे यद्यपि ज्ञाप्यज्ञापकभावरूप उपकार्योपकारकभावो नास्ति, तथापि तदर्थलोचनानुगतस्मरणयोर्विशेषणविशेष्यभावावगाहि विज्ञानं प्रत्युत्पादकत्वमेवोपकारकत्वमस्ति । अर्थौ हि रूपरूपिभावेन स्थितावपि नापातजन्मना ज्ञानेन तथा गृहीतौ, अपि तु स्वरूपमात्रेण, न हि यावदस्ति तावद् ग्रहीतव्यम् । तेन तदेकदेशग्रहेऽपि नाप्रमाणता । सविकल्पकं तूक्तसामग्रीजन्म जात्यादिरूपतया द्रव्यं च रूपितया कल्पयत् पश्चाज्जायमानमपीन्द्रियार्थसन्निकर्षप्रभवतया प्रत्यक्षं भवत्येव । अक्रमस्यापि च क्रमवत्सहकारिभेदसमवधानवशात् क्रमेण कार्यकरणमुपपादयिष्यते । तत् सिद्धमेतद् विवादाध्यासिता विकल्पाः स्वगोचरे प्रत्यक्षा अव्यभिचारित्वे सति इन्द्रियार्थसन्निकर्षजत्वात् । यो य एवंभूतः स सर्वः प्रत्यक्षो यथालोचनम् तथा चैतत् । तस्मात् तथेति । § 229

तस्मात् सविकल्पकप्रत्यक्षावरोधार्थं व्यवसायात्मकपदमिति सिद्धम् । तदस्य सविकल्पकप्रत्यक्षावरोधार्थस्यान्वाचीयमानो व्यवच्छेदः । तद्व्यवच्छेद्यप्रतिपादनार्थं भाष्यमनुभाष्यान्वाचीयमानमेव व्यवसायात्मकपदस्यार्थमाह—दूराद्यक्षुषेति । न चैतन्मन्तव्यमिति भाष्यं व्याचिख्यासुश्चोदयति—न संशयस्येति । ननु सतीन्द्रियार्थसन्निकर्षे पुरोवर्तिनि द्रव्ये धूम इति वा रेणुरिति वा ज्ञानमुत्पद्यमानं कथमनिन्द्रियजमित्यत आह—न हीति । कस्मान्मानस इत्यत आह—संशीतिरिति । संपूर्वो हि शीङ् भावप्रत्ययान्तो विशेषापेक्षे विमर्शे वर्तते । स चैकाधिकरणौ स्मर्यमाणौ मिथो विरुद्धौ धर्मावारोप-

७ त] बोद्धावगम्यतेnvt-C
११ त्] कल्पयेत्nvt-C
२१ ते] द्रः ३.२.१७ टी
३२ णौ] °करणेnvt-C

यन् अन्यतरन्नावधारयति । तथा चाधिकरणमात्रसमर्पणमिन्द्रियव्यापारः । मनसा तु स्मरणसहकारिणैव पुरुषः संशेते । अत एव विस्फारिताक्षः सौदामिनीसंपातात् सकृदालोच्य कश्चित् समानधर्मवन्तं धर्मिणं समन्धकारे सन्दिग्धे, तस्मान्मानस एवैष संशयो न त्विन्द्रियज इत्यर्थः । तदेतत् परिहरन् न चैतदित्यादि भाष्यं व्याचष्टे—तच्च नैवम् । कस्मात् संशयस्येति—उभयं त्विति । तुशब्दो मनोमात्रनिमित्तत्वं व्यवच्छिनत्ति । तदनेन चक्षुषा हीत्यादि भाष्यं व्याख्यातम् । पश्यन् समानधर्माणं धर्मिणं नावधारयति । विशेषतः सन्दिग्धे तस्मिन्नित्यर्थः । इन्द्रियेणोपलब्धं सन्निकृष्टं सन्निकर्षपूर्वकत्वादुपलब्धेः मनसोपलभते जानीते चक्षुःसहायेनेत्यर्थः । अत्र भाष्यं यच्च तदिन्द्रियानवधारणपूर्वकं मनसानवधारण तद्विशेषापेक्षं विमर्शमात्रं संशयः, न पूर्वमिति । अनवधारणशब्दोऽयं संशयज्ञानवाचकः स्वकारणेन्द्रियार्थ- 118/tha सन्निकर्षे प्रयुक्त उपचारेण । उपरतेन्द्रियव्यापारस्य हि संशयज्ञानदर्शनात् । *सत्यपीन्द्रियव्यापारे संशयो नेन्द्रियज इति चोदकोऽभिमन्यते । तदनयोः संशयज्ञानयोर्मध्ये यत् तदिन्द्रियानवधारणपूर्वकमिन्द्रियार्थसन्निकर्षपूर्वकं मनसानवधारणं संशायज्ञानमित्यर्थः । न पूर्वम् यदुपरतेन्द्रियव्यापारस्य संशयज्ञानं दृष्टान्ततया हृदि स्थितं शङ्कितुरित्यर्थः । तदेतद् भाष्यं व्याचष्टे—तत्र यदिन्द्रियार्थेति । इन्द्रियार्थसन्निकर्षश्चासावनवधारणं चेति कर्मधारयः । तत्पूर्वकं मनसानवधारणं संशयज्ञानमित्यर्थः । § 230

ननु स्मरणव्यवहितव्यापारमस्य कारणं नेन्द्रियमित्यत आह—तस्य हीति । उपपादितमेतदधस्तात् यथा स्मरणं नेन्द्रियव्यापारं व्यवधत्त इति । पूर्वं त्विति । दृष्टान्ततया पूर्वत्वम् । स्यादेतत्, मन एवेन्द्रियानपेक्षं बाह्ये प्रवर्तते इत्यभ्युपेयम्, अन्यथा घटमहं जानामीति ज्ञानं निर्निमित्तं स्यात् । न तावदिन्द्रियजम्, आन्तरे ज्ञाने चक्षुरादीनामप्रवृत्तेः । नाप्यनुमानादिष्वन्तर्भवति, लिङ्गाद्यभावात् । तस्मान्मानसमेवेदम् । यदि च घटादौ बाह्ये न मनः प्रवर्तेत, कथं घटमिति भवेत् ? जानामीत्येव स्यात् । न चार्थनिरूपणमन्तरेण ज्ञानरूपनिरूपणम्, तस्माद् बाह्याभ्यन्तरविषयं मनः, तथा च सर्व एव संशयो मानस इत्याशङ्क्याह भाष्यकारः, सर्वत्र च प्रत्यक्षविषये इति । यद्यप्ययमीदृशोऽनुव्यवसायो मानसस्तथाप्यन्धबधिरादीनामभावात् तत्पूर्वं व्यवसायोत्पत्तौ चक्षुराद्यपेक्षणीयम्, अन्यथा अन्धबधिराद्यभावप्रसङ्गः । तथा च संशयज्ञानोत्पादेऽपीन्द्रियार्थसन्निकर्षोऽपेक्षणीय इति भावः । तदिदं तस्य हीत्यादिना वार्त्तिकेन व्याख्यातम् । § 231

अव्यापकत्वेन लक्षणाक्षेपपरं भाष्यम् आत्मादिषु इत्यादि । तद् व्याचष्टे—इन्द्रियार्थेति । चोदयति—कथं पुनरिति । परिहरति—इन्द्रियेति । मा

१ न्] यत्तत्राव°nvt-C
३ श्चित्] सामान्य°nvt-C
११ ब्दोऽयं] °वाचकः...संशयज्ञान°*Om*nvt-C
१३ *] °न्द्रियार्थव्या°nvt-C
२८ भावात्] तत्पूर्वव्यव°nvt-J

भूदिन्द्रियसूत्रे पाठः । तद्धि बाह्येन्द्रियलक्षणम्, आन्तरं च मन इत्यत
आह—पृथक् चेति । न च सुखादौ प्रमाणान्तरमस्ति । तस्मात् पारिशेष्यात्
119/tha सिद्धं प्रत्यक्ष त्वमित्याह—प्रत्यक्षाश्चेति । ननु नैते प्रमेयाः स्वसंवेदन-
सिद्धत्वात्, तत् किमत्र प्रमेयार्थेन प्रमाणेनेत्यत आह—न च तेषामिति
। ननूक्तं स्वसंवेदनतया न प्रमाकर्मभाव एषामित्यत आह—न चान्या
गतिरिति । संवेदनत्वेन हि तेषां स्वसंवेदनता, न चैते संवेदनमित्युक्त-
मधस्तादिति भावः । आक्षेपमुपसंहरति—तस्मादिति । भाष्ये चात्मादिषु
सुखादिष्विति नित्यानित्याभिप्रायं वर्गद्वयम् । आत्मखदुःखत्वादयो नित्याः,
अनित्याश्च सुखदुःखादय इति । तदिदमुक्तं दिग्नागेन § 232

न सुखादि प्रमेयं वा मनो वास्त्विन्द्रियान्तरम् ।§ 233

न च तत् संभवति, घ्राणादिसूत्रेण विभागपरेण निषेधादिति भावः ।
समाधिभाष्यम् इन्द्रियस्य वै सत इति । तद्व्याचिख्यासुर्गूढाभिप्रायः पृच्छ-
ति—कश्चैवमिति । आक्षेप्तुरुत्तरम्—इन्द्रियार्थेति । समाधाता आह—नैष
दोष इति । आक्षेप्तुरनुशयबीजमुद्धाट्य दूषयति—यत्तु सूत्रे इति । नेदं
विभागपरं घ्राणदिसूत्रम्, अपि तु लक्षणपरम् । तत्र चेन्द्रियमपि मनो
न लक्षितम्, वैधर्म्यादित्यर्थः । वैधर्म्यमाह— वैधर्म्यमिति । तत्र प्रमाण-
यति—सर्वविषयं त्विति । वैधर्म्यान्तरं दूषयति—भौतिकेति । कार्यस्य हि
विशेषौ भौतिकत्वाभौतिकत्वे, भूतकार्यं भौतिकम् । यद् भूतकार्यं न भवति
तदभौतिकम् । भूतकार्यत्वप्रतिषेधश्च तदन्यकार्यत्वं गमयति, विशेषनिषेधस्य
*विशेषान्तराभ्यनुज्ञानहेतुत्वात् । इतरथा तु अकार्यमेवोच्येत, न त्वभौतिक-
मिति । तस्मादकार्यस्य मनसोऽभौतिकत्वं कार्यधर्मो विरुद्धमित्यर्थः । अपि
च वैधर्म्यात् मनोवत् श्रोत्रमपि न वक्तव्यमित्याह—श्रोत्रे चेति । शङ्क-
ते—स्वार्थ इति । भूतानि हि घ्राणादीनि श्रोत्रान्तानि, मनस्तु न भूतमिति
वैधर्म्यमित्यर्थः । निराकरोति—तच्च नेति । दर्शयिष्यति हि वार्त्तिककारो
यथा स्वार्थिको न कश्चिदपि प्रत्यय इत्यर्थः । आक्षेपहेतुमनुभाषते—यत्
पुनरिति । दूषयति—न नास्तीति । तदनेन सति चेन्द्रियार्थसन्निकर्षे इत्यादि
भाष्यं व्याख्यातम् । यच्चापरं वैधर्म्यं घ्राणादिभ्यो मनस उक्तं भाष्यकारेण
120/tha तदपि सिंहावलोकनेन दूषयति—सगुणानामिति । घ्राणादीनि यथा स्व-
स्वगुणेन गन्धादिना बाह्यं गन्धादि बोधयन्ति, नैवं स्वगुणेन शब्देन श्रोत्रं
बाह्यं शब्दं बोधयति, तन्मनोवत् श्रोत्रमपि घ्राणादिसूत्रे न पठितव्यमित्यर्थः
। भाष्योक्तेषु मध्येऽभिमतं वैधर्म्यमुपसंहरति—तस्मादिति । भूतत्वाभूतत्वल-
क्षणं वैधर्म्यं न भौतिकत्वाभौतिकत्वग्रहणेन शक्यं वक्तुमित्यवधारणाभिप्रायः ।
ननु युगपज्ज्ञानानुत्पत्तेर्ज्ञानकरणं मनोऽस्तीत्यवगम्यते न पुनरस्येन्द्रियत्वमपि

---

२० *] °शेषाभ्यनु°nvt-C
२६ नास्तीति] तन्नास्तीतिnvt-C
२८ नेन] तत् सिंहावलोकितेनnvt-C
३२ क्यं] वक्तुं*Om*nvt-C
३३ णं] °कारणंnvt-C

। तद्भावानवगमे च नेन्द्रियार्थसन्निकर्षजं सुखादिज्ञानं शक्यं वक्तुमित्यत आह—तन्त्रान्तरेति । तन्त्र्यते व्युत्पाद्यते अनेन तत्त्वमिति तन्त्रं शास्त्रम् । तदनेन मनसश्चेत्यादि भाष्यं व्याख्यातम् । एतद्दूषितं दिग्नागेन

अनिषेधादुपात्तं चेदन्येन्द्रियरुतं वृथा ।§ 235

इति । तद्दूषयितुमुपन्यस्यति—न शेषेति । तद्दूषयति—न तन्त्रयुक्तीति । सर्वस्य तन्त्रान्तरे लोके च सिद्धत्वादवक्तव्यतायां स्वमतमपि नास्ति । वचनलिङ्गं हि मतज्ञानं न चाननुमते निषेधमात्रं शक्यं वक्तुम् अभावस्य भावनिरूपणाधीननिरूपणत्वादिति भावः । सिद्धमर्थमुपसंहरति—तस्मादिति । प्रकृतमुपसंहरति—तदिति ॥ § 236

तदेवं लक्षणपदानि व्याख्याय विमृशति—समस्तमिति । अभिमतमाहसमस्तमित्याह भाष्यकारः । हेतुमाह—यस्मादिति । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति हि प्रत्यक्षलक्षणमनवयवेन समानासमानजातीयेभ्यो व्यावृत्तं शक्यमेव लक्षयितुम् । न खल्वयमसावश्व इति ज्ञानमिन्द्रियजं शब्दजं संभवति । तद्धि द्रव्यगोचरं वा उच्येत, वाच्यत्वगोचरं वा, वाच्यत्वविशिष्टद्रव्यगोचरं वा । तत्र द्रव्यमैन्द्रियकमेव न शाब्दमित्यशक्यं हि ज्ञानं व्यवच्छेत्तुम्, अनभिमतं च । वाच्यत्वगोचरं तु ज्ञानं शाब्दमेव, अन्यथा ह्यश्रुतशब्दोऽप्यारण्यकोऽश्वमेवेन्द्रियसन्निकर्षादश्वशब्दवाच्य इदि गृह्णीयात् । वाच्यत्वविशिष्टद्रव्यज्ञानमपि शाब्दमेव, वह्निविशिष्टधूमज्ञानमिवानुमानिकम् । अन्यथा तदप्यैन्द्रियकमिति न तन्निराकरणाय *यत्नान्तरमास्थेयम् । अथ न 121/tha
वाच्यत्वं नाम मीमांसकानामिव किञ्चिदतीन्द्रियम्, अपि तु सङ्केतमात्रमेतदस्मादिदं प्रत्येतव्यमिति । तथापि तव्यार्थः शब्द एव । अथायमप्यैन्द्रियक एव, तत्र गुरूपदिष्टा गाथा पठितव्या,

शब्दजत्वेन शाब्दं चेत् प्रत्यक्षं चाक्षजन्मतः ।
स्पष्टग्रहणरूपत्वाद् युक्तमैन्द्रियकं हि तत् ॥§ 239

इति । तस्मात् नोभयजज्ञाननिवारणायाव्यपदेश्यपदम् । *व्यवसायात्मकपदेन तु सविकल्पके ज्ञानेऽवरुद्धे निर्विकल्पकस्याप्रत्यक्षता मा प्रसांक्षीदिति तदवरोधार्थेनाव्यपदेश्यपदेन निर्विकल्पकेऽपि शब्दसंभेदनिराकरणमन्वाचितमिति शाब्देत्युक्तम् । एवमव्यपदेश्यपदेन निर्विकल्पकेऽवरुद्धे सविकल्पकस्येन्द्रियजस्याप्रत्यक्षत्वं मा प्रसांक्षीदिति तदवरोधार्थेन व्यवसायात्मकपदेन संशयज्ञानप्रत्यक्षत्वनिराकरणमन्वाचितमिति संशयेत्युक्तम् । § 240

१६ ज्ञानं] °शक्यं तज्ज्ञानंnvt-C
१९ *] मानान्तर°nvt-C
२१ स्मादिदं] °मेव स्याद्nvt-C
२५ म्] °जं ज्ञानं यन्निवा° °पदम् । कैश्चिदुक्तम्nvt-C
२५ *] व्यवसायात्मकपदेन...तदवरोधार्थेन*Om*nvt-C

अन्वयं दर्शयित्वा व्यतिरेकमाह—यदीति । उपसंहरति—तस्मादिति । हेयास्त्रिंशत्कोटीर्गणयति—तत्रेति । द्विपदपरिग्रहेण दश—इन्द्रियार्थसन्निकर्षोत्पन्नपदं ध्रुवं कृत्वा ज्ञानाद्येकैकपदसंबन्धेन चतस्त्रः कोटयः, ज्ञानं च ध्रुवं कृत्वा अव्यपदेश्याद्येकैकपदसंबन्धेन तिस्रः, एवमव्यपदेश्यपदं ध्रुवं कृत्वा अव्यभिचार्याद्येकैकपदसंबन्धेन द्वे कोटी, अव्यभिचारिव्यवसायात्मकसंबन्धे दशमीति । त्रिपदपरिग्रहेणापि दशैव । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ध्रुवं कृत्वा अव्यपदेश्याद्येकैकपदसंबन्धेन तिस्त्रः कोटयः, ज्ञानमव्यपदेश्यमिति ध्रुवं कृत्वा अव्यभिचार्यादिपदसंबन्धेन द्वे कोटी, अव्यभिचार्यव्यपदेश्यपदयोस्तु व्यवसायात्मकपदसंबन्धे कोटिरेका, इन्द्रियार्थसन्निकर्षाव्यपदेश्यपदध्रौव्ये अव्यभिचार्याद्येकैकपदसंबन्धे कोटिद्वयम्, अव्यभिचारिव्यवसायात्मकपदयोस्तु ध्रुवयोरिन्द्रियार्थसन्निर्षोत्पन्नपदेन ज्ञानपदेन च प्रत्येकं
122/tha संबन्धे कोटिद्वयम्, इति त्रिपदपरिग्रहेण दश कोटयः । चतुष्पदपरिग्रहेण पञ्च । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमिति ध्रुवं कृत्वा अव्यभिचार्याद्येकैकपदसंबन्धे द्वे कोटी, अव्यपदेश्यपदं त्यक्त्वापरकोटिः, ज्ञानपदं त्यक्त्वा चापरा, इन्द्रियार्थसन्निकर्षोत्पन्नपदं त्यक्त्वा तु पञ्चमी । पृच्छति—कस्मात् पञ्चपदपरिग्रहेणैकत्रिंशत्तमकोटिपरिग्रहेणेतराः कोटयो व्यवच्छिद्यन्ते ? न ह्यत्र तद्व्यवच्छेदवाचकः कश्चिदस्ति शब्द इत्यर्थः । उत्तरम्—विशेषेति । विशेषप्रतिविधानप्रस्तावे शेषनिषेधोपन्यासो दृष्टान्तलाभाय । एकदेशाभ्युपगम एकत्रिंशत्कोटिषु एकत्रिंशत्तमी कोटिरेकदेश इत्यर्थः । शेषविधानं वेति । वाशब्द इवार्थः । § 241

तदेवं प्रत्यक्षलक्षणं समर्थ्य वासुबन्धवं तावत् प्रत्यक्षलक्षणं दूषयितुम् उपन्यस्यति—अपरे पुनरिति । लक्षणं व्याचष्ट—ततोऽर्थादिति । यत्तदोर्नित्यसंबन्धाद् यस्यार्थस्य यद्विज्ञानं व्यपदिश्यते, यदि तत एव तद्भवति नार्थान्तराद् *व्यपदेशासंबन्धिनः तत् प्रत्यक्षम् । अत एव व्यपदेशासंबन्धिनोऽर्थान्तरात् शुक्तिरूपात् रजतेन व्यपदिश्यमानं शुक्तिज्ञानं न प्रत्यक्षम् व्यपदेशकानुत्पत्तेः, व्यपदेशकस्य रजतस्य तत्रासंभवात् । एतस्य प्रत्यक्षाभासस्य व्यावृत्तिः सुप्रसिद्धेति तामुपेक्ष्यानुमानव्यावृत्तिमाह—एतेनेति । कुतः ? न हि तत एव व्यपदेशकादेव वह्नेः, तद् विज्ञानमनुमानं भवति । किं तु यत्र वह्निरस्ति तत्र । ततश्च यत्र तु दृष्टमात्र एव वह्नेरुपरमादुपरतो धूमः तत्रान्यतश्च तद्भवति स्मर्यमाणाद् धूमादसति व्यपदेशके वह्नौ । ततोऽर्थादित्यत्र हि अर्थविशेषणं तत इति । तत्संगतश्च एवकारोऽयोगव्यवच्छेदे वर्तते, यथा चैत्र धनुर्धर एवेति । तेन यत्रैव तदयोगः तदप्रत्यक्षमित्यर्थः । तदेतल्लक्षणं दूषयति—अत्रार्थग्रहणमनर्थकम् । न हि ज्ञानव्यपदेश आत्मना वा इन्द्रियेण वा संभवति । शङ्कते—अवधारणार्थ इति । अयोगव्यवच्छेदेनैतदवधारणम्, विशेषणं च

२४ *] व्यपदेश्यमानं शुक्तिज्ञानं न प्रत्यक्षं व्यपदेशा°nvt-C
२५ रात्] शुक्तिरूपाज्ञायमानं रजतेनnvt-C
२५ म्] °देशकादनुत्पत्तेःnvt-J

तत इति । विशेषणसंगतश्चैवकारोऽयोगं व्यवच्छिनत्ति । असति चार्थपदे कस्येदं विशेषणमिति विशेषणसंगतो नैवकारोऽयोगं व्यवच्छिन्दादिति भावः । निराकरोति—तन्नेति । तत इति सर्वनाम्नः सन्निहितविशेष्यापेक्षत्वात् । 123/tha
अन्यथा अभिधानापर्यवसानाद् यस्य तद् व्यपदिश्यत इति व्यपदेशसंबन्धी विशेष्यः प्राप्यत एवेति सिध्यत्येव विशेषणत्वम् । अभ्युपेत्य त्ववधारणमात्रेऽप्यदोष इति मन्यमानेनाब्भक्ष इत्युदाहृतम् । अन्यव्यवच्छेदेऽपि हि तदेवान्यद्व्यवच्छिद्येत यद्विरोधि, न पुनरन्यमात्रम् । यथाहुः,

नियमस्तद्विरोधाच्च कल्पते नाविरोधिनः ।§ 243

इति । § 244

स्यादेतत् । तत इत्युच्यमाने यतस्ततः स्यात्, तथा चानुमानाद्यपि लिङ्गज्ञानादेस्तत उपजायते इति प्रत्यक्षं प्रसज्येतेति तन्निवृत्त्यर्थमर्थादिति वक्तव्यम् । न हि तदर्थात् जायते । अपि तु प्रत्यक्षमेव, इत्यत आह—एतेनेति । यस्य तद् व्यपदिश्यते इत्यपेक्ष्य ततःशब्दसामर्थ्ये नानुमानादिव्युदासोऽपि प्रत्युक्तः । यच्च ततःशब्दस्य व्यावर्त्यान्तरमुक्तम्, तदपि दूषयति—यत्पुनरेतदिति । यदि यस्य व्यपदिश्यते ज्ञानं, तत् प्रत्यक्षं ततो घट इत्यपि ज्ञानं प्रत्यक्षं प्रसज्येत, तदपि हि घटस्य व्यपदिश्यते, न तु ततो घटाद् भवति । तस्य विचारासहतया परमार्थसत्त्वाभावेन संवृतिसतो विज्ञानं प्रति कारणभावाभावात् । तेन तन्निराकरणाय तत इत्युक्तम् । तदेतत् न बुध्यामहे कथमपक्षिप्तमिति । शङ्कते—यदीति । रूपादिपरमाणव एव निरन्तरोत्पादाः परमार्थसन्तो भिन्नाः स्वविज्ञानस्याविकल्पकस्य जनकाः । तेषां तु नानात्वं स्वेन रूपेण संवृण्वती निर्विकल्पकपृष्ठभाविनी घट इति विकल्पिका बुद्धिस्तानेव रूपादीन् एकोदकाहरणादिक्रियाकारिणो भेदिन इव दर्शयन्ती संवृतिरित्युच्यते । निराकरोति—न हि रूपादिभ्य इति । अनुशयबीजमुद्घाटयति—अथापीति । निराकरोति—मनोमोदकेति । भवन्तु व्यतिरिक्ताः किमेतावतापीत्यत आह—सर्वं चेति । यत्संवृतित्वेन भवतामभिमतं ज्ञानं यच्चाविकल्पकं तत्सर्वं स्वविषयाद् भवति । तस्मात् 124/tha
ततोग्रहणम् संवृतिनिवृत्त्यर्थम् अनर्थकम् । मा भूत् संवृतिनिवृत्त्यर्थम्, मिथ्याज्ञाननिवृत्त्यर्थं भविष्यतीति चोदयति—ननु च मिथ्याज्ञानमतस्मादपि भवति । यथा पुरोवर्ति द्रव्यमिदमिति व्यपदिश्यते रजतमिति च, न तु शुक्तिरिति, तेन यद्यपि सामान्यरूपेण तस्य व्यपदिश्यते ज्ञानम्, ततश्च तद्भवति, तथापि येन विशेषारूपेण तस्य व्यपदिश्यते न ततस्तद्भवति इत्यतस्मादपीत्युक्तम् । तस्मात् तत एव यद्भवति तत् प्रत्यक्षम् न चैवं

१ इति ] विशेषणं च तत इति*Om*nvt-C
६ दोष ] °प्यस्ति दोषःnvt-C
६ हि ] च्छेदे तदर्थे हिnvt-C
८ द्विरोधाच ] °द्विपक्षाचnvt-J
१७ तो ] संप्रति सतोnvt-C
१८ भावाभावात् ] कारणत्वाभावात्nvt-C
१८ तेन ] तन्निवारणार्थंnvt-C
२३ न्ती ] संवृत्ति°nvt-C
३२ म् ] प्रमितिःnvt-C

मिथ्याज्ञानम् । तद्धि ततश्चातश्च भवतीत्यर्थः । परिहरति—न ह्यतस्मात् आरोपितादूपात् तत्रासतः तत् मिथ्याज्ञानं भवति, किं तु ततो भवति । यस्य सामान्यरूपस्य व्यपदिश्यत इदमिति तत एव । समारोपितं तु रजतमस्य विषयो दृश्यमानाकारतया । तदिदमुक्तम्—अतस्मिंस्तद् भवतीति । एवं च लक्ष्यपदमात्रावशेषात् लक्षणाभाव इत्याह—ततो ग्रहणमिति । तथा चातिव्याप्तिरित्याह—तथा चेति । अभ्युपेत्य दूषणान्तरमाह—यद्यप्येतदिति । यतो भवति ज्ञानं स ग्राह्योऽर्थः कारणम्, ग्राहकं च विज्ञानं कार्यम्, तयोरयुगपद्भावात् वर्तमानाभं ज्ञानमतीते मिथ्येति न प्रत्यक्षं स्यात्, तत्समानकालयोस्तु कार्यकारणभावाभावात् । ततोऽर्थादिति नास्तीति भावः । शङ्कते—नाशोत्पादाविति । क्षणिकत्वाद् भावानां कारणस्य नाशः कार्यस्योत्पाद इत्येकः कालः, तथापि कारणस्य ग्राह्यता भिन्नकालस्यापि, स्वसदृशज्ञानजनकमेव हि तस्य तज्ज्ञानं प्रति ग्राह्यत्वम्, नान्यत् । यथाह, § 245

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञाः ज्ञानाकारार्पणक्षमम् ॥ § 247

प्र. वा. २. २४७ इति । न चैतावता मिथ्यात्वम्, अर्थाहितस्य नीलाकारस्य ज्ञानवर्तिनो वर्तमानत्वादिति भावः । निराकरोति—तच्च नेति । पूर्वापरकालकलाविकललक्षणा क्षणिकता न क्वचिदपि । विद्युज्ज्वालादेरप्याशुविनाशिनो द्वित्रादिक्षणावस्थानादित्यर्थः । पूर्वोक्तश्चानुयोग-
125/tha स्तदवस्थ एवेत्याह—विनष्टश्चेति । अनहङ्कारास्पदमसातादिरूपं विज्ञानाद् भिन्नं नीलाद्यनुभूयते, न तु विज्ञानात्मकम् । तथा च यदि विच्छेदग्रहो मिथ्या, तथा सति ज्ञानमेतस्मिन् मिथ्येति कथं प्रत्यक्षम्, सम्यग्ज्ञानभेदस्य तथाभावात् । न चार्थाहिताकारवेदनमर्थवेदनम्, भाक्तत्वप्रसङ्गात् । न च गौणमुख्यलक्षणा गिरां गतयो ज्ञानेषु शक्या नियोजयितुम्, भिन्नप्रस्थानत्वात् । तस्मात् निराकारं ज्ञानमर्थमात्मनो भिन्नं गोचरयतीति वाच्यम् । स च कारणं विनष्टस्य प्रत्यक्षतेति स्यात् । तथा च वर्तमानाभमवर्तमानं गोचरयतीति मिथ्यात्वमप्रत्यक्षत्वं च स्यादिति भावः । यौगपद्येऽपि नास्त्युदाहरणम्, सर्वस्य क्षणिकत्वपक्षनिक्षेपादिति चोदयति—तुल्यमिति चेत् । निराकरोति—तच्चेति । § 248

संप्रति दिग्नागस्य लक्षणमुपन्यस्यति—अपर इति । दूषयितुं कल्पनास्वरूपं पृच्छति—अथ केयमिति । लक्षणवादिन उत्तरम्—नामेति । यदृच्छाशब्देषु हि नाम्ना विशिष्टोऽर्थ उच्यते डित्थ इति । जातिशब्देषु जात्या गौरयमिति । गुणशब्देषु गुणेन शुक्ल इति । क्रियाशब्देषु क्रियया पाचक इति । द्रव्यशब्देषु द्रव्येण दण्डी विषाणीति । सेयं कल्पना यत्र ज्ञाने

१५ मेव ] तद्युक्तम्nvt-C
१८ णा ] °विरहलक्षणाnvt-J
२६ च ] चेत्nvt-C
३४ विषाणीति ] द्रव्येण ज्ञानत्वं दण्डीतिnvt-C

नास्त्यर्थतः स्वरूपतो वा तत्कल्पनया अपोढं प्रत्यक्षम् । तदिदमाह—यत् किल न नाम्ना अभिधीयते अर्थतः स्वरूपतश्च न जात्यादिभिर्व्यपदिश्यते । अव्यभिचाराय विषयकारणत्वमाह—विषयस्वरूपानुविधायीति । प्रमाणत्वमाह—परिच्छेदकं व्यवस्थापकम् । ज्ञानतामस्य दर्शयति— आत्मसंवेद्यं स्वसंवेदनादेव तस्य कल्पनारहितत्वमपि । यथाह,

प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति । प्र. वा. २.
१२३§ 250

इति । तत् प्रत्यक्षमिति । तदेतल्लक्ष्यलक्षणपदतत्समुदायव्यापारनिरूपणेन दूषयति—त इदमिति । *अथ नेति । विकल्पयोनयो हि शब्दास्तद्गोचरमभिनिविशन्ते । यद् विकल्पा गृह्णन्ति, यच्चाध्यवस्यति तदुभयमप्यन्यव्यावृत्तिरूपमवस्तु, तस्मान्नाविकल्पकं ज्ञानं तद्गोचरं वा परमार्थसद् गोचरयन्ति विकल्पाः शब्दाश्चेत्ययमभिसन्धिः । अपि चास्यावाच्यत्वे भवदभ्युपगतप्रामाण्यागमविरोध इत्याह— अनित्यादीति । शङ्कते—अथेति । स्वमसाधारणं रूपं व्यावृत्तमिति यावत् । *ततो निराकरोति—सर्वेऽर्था इति । न हि यथा सम्यग्ज्ञानमधिकृत्य प्रत्यक्षादिलक्षणं कृतं कीर्तिना तथा दिग्नागेन येनाधिकारात् ज्ञाने व्यवतिष्ठेत कल्पनापोढमिति भावः । ननु यदि स्वरूपतो नाभिधीयेतानभिधेयं तर्हि वस्तु प्रसज्येत । तथा चावास्तवः स्यात् शाब्दो व्यवहार इत्यत आह—सर्वस्य चेति । सामान्यविशेषतद्वद्भेदाद् वस्तुत्रयम् । तत्र तद्वद्स्वधिकृत्योक्तम्—द्वावाकाराविति । सामान्येनैवाकारेणाभिधीयते सामान्यान्वितमित्यर्थः । ब्राह्मण इति । मनुष्यत्वजातिमानित्यर्थः । विशेषमाकारमभिप्रेत्य स्वरूपतो न व्यपदेश्यमित्युक्तम्, न तु सर्वथेति भावः । प्रकृते योजयति—एवमिति । आशङ्क्य पूर्वोक्तमतिप्रसङ्गं स्मारयति—*यदि चेति । अथाश्वकर्णवदव्युत्पन्नः कल्पनापोढशब्दः प्रत्यक्षस्वरूपस्य वाचक इति शङ्कते—अथेति । निराकरोति—एवमपीति । भवतु कल्पनापोढशब्दोऽव्युत्पन्नो मा वा भूत्, अवाच्यं तु प्रत्यक्षमेषितव्यम् । अन्यथा विकल्पस्य प्रत्यक्षत्वप्रसङ्गात् । तथा च व्याघात इत्यर्थः । § 251

जैमिनिप्रत्यक्षलक्षणं दूषयति—सत्संप्रयोग इति । यथाश्रुतस्यातिव्याप्तिः संशब्देनापि प्रयोगस्य समीचीनता प्रतिपाद्यते । सा च मिथ्याप्रत्ययेऽपि तुल्या । व्यत्ययेऽपि बुद्ध्या बोद्धस्योपस्थापनात् तद् इति बोध्यं परामृशति । अस्ति च मिथ्याज्ञानेऽपि बोध्येन संबन्ध इन्द्रियाणाम्, बोध्यं हि पुरोवर्ति द्रव्यम् । अथ यथा बोध्यं तादृशो नास्ति संबन्ध इन्द्रियाणाम्, रजतत्वस्य प्रकारस्यासन्निधानात् । हन्ताव्यापकत्वं लक्षणदोषः । प्रत्यभिज्ञायां तत्ताप्रकारस्य इन्द्रियेणासंबन्धात् । अपि च प्राभाकरे दर्शने अनुमानादिज्ञान-

५ स्य ] कल्पनाहितत्व°nvt-C
८ *] अथ नेति*Om*nvt-J
१३ *] ततो*Om*nvt-C
२१ *] यदिदं चेतिnvt-C

मात्मनि प्रत्यक्षं न भवेत्, न हि तत् सत्संप्रयोगजम् । तस्मादेतदपि परिभावनीयं सूरिभिरिति । § 252

वार्षगण्यस्यापि लक्षणमयुक्तमित्याह—श्रोत्रादिवृत्तिरिति । पञ्चानां खल्विन्द्रियाणामर्थाकारेण परिणतानामालोचनमात्रं वृत्तिरिष्यते । सा च संशया
127/tha दिव्यापकत्वादलक्षणमिति । तत् सिद्धमिन्द्रियार्थसन्निकर्षोत्पन्नमित्येतदेव लक्षणमिति प्रत्यक्षलक्षणं समाप्तम् ॥ ४ ॥ § 253

## अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च ॥ १ । १ । ५ ॥ § 254

प्रत्यक्षलक्षणानन्तरमनुमानलक्षणपरं सूत्रं पठति—अथ तत्पूर्वकं त्रिविधमनुमानमिति । अत्रानुमानमिति सिद्धवत् प्रमाणविशेषरूपलक्ष्यानुवाद एव नाप्रत्यक्षं प्रमाणमित्यप्रामाण्यमनुमानस्य सुदूरं प्रतिक्षिपति । दृष्टप्रामाण्याप्रामाण्यविज्ञानव्यक्तिसाधर्म्येण हि कासांचिद् व्यक्तीनां प्रामाण्यमप्रामाण्यं वा विदधीत । दृष्टसाधर्म्यं चानुमानमेवेति कथं तेनैव तस्याप्रामाण्यम् ? अपि चानुमानमप्रमाणमिति वाक्यप्रयोगोऽज्ञं विप्रतिपन्नं सन्दिग्धं वा पुरुषं प्रत्यर्थवान् । न च परपुरुषवर्तिनो देहधर्मा अपि सन्देहाज्ञानविपर्यासा गौरत्वादिवत् प्रत्यक्षमीक्षन्ते । न च तद्वचनात् प्रतीयन्ते, वचनस्यापि प्रत्यक्षादन्यस्याप्रामाण्योपगमात् । पुरुषविशेषमनधिकृत्य तु वचनमनर्थकं प्रयुञ्जानो नायं लौकिको न परीक्षक इत्युन्मत्तवदनवधेयवचनः स्यात् । परिशिष्टं तु परीक्षापर्वणि निवेदयिष्यते । तस्मादकामेनापि प्रमाणमनुमानमुपेक्षितव्यमिति । लक्ष्यं प्रमाणभेदमनुमानमनूद्य तत्पूर्वकमिति लक्षणं विधत्ते । अथेत्यानन्तर्ये । उक्तं प्रत्यक्षमनुमानस्य हेतुः । *अथेदानीमनुमानं हेतुमद्व्युत्पाद्यते इत्यर्थः । लक्षणसूत्रतात्पर्यमाह—अनुमानेति । तदेव स्फुटयति—अनेनेति । समानजातीयानि प्रमाणतया प्रत्यक्षादीनि, असमानजातीयानि चानुमानाभासादीनि, यथा क्षणिकत्वादिषु साध्येषु सत्त्वादीनि । स्यादेतदतिव्यापकमेतत् तत्पूर्वकत्वम् । तदिति हि प्रत्यक्षं परामृशत्यानन्तर्यात् । तथा च प्रत्यक्षपूर्वकत्वमनुमानस्येवागमस्मृतिसंश-
128/tha यविपर्यासानामप्यस्तीति तान्यप्यनुमानं प्रसज्येरन् । अनुमानादिपूर्वकं चानुमानं न प्रत्यक्षपूर्वकमिति नानुमानं स्यात्, अनुमानलक्षणेनाव्याप्तत्वात् । तस्मादव्याप्त्यतिव्याप्तिभ्यामलक्षणमेतदित्यत आह—तत्पूर्वकमिति । तत्पूर्वकमित्यावृत्त्या विग्रहत्रयप्रदर्शनम् । तत्र प्रथमे विग्रहे तानीत्यनन्तरं सूत्रम् उल्लङ्घ्य विभागसूत्रगताः प्रत्यक्षादयः संबन्धनीयाः योग्यत्वात् । यथाहुः,

यस्य येनार्थसंबन्धो दूरस्थस्यापि तस्य सः ।§ 256

---

११ ते] २́१́३७
२२ *] अथ*Om*nvt-C
२८ त्वात्] °व्यापनात्nvt-C

इति । तदनेन लक्षणस्याव्याप्तिः परिहृता । तदिदमाह—यदा तानीति । नन्वेवं प्रत्यक्षपूर्वकमिति भाष्यविरोध इत्यत आह—पारम्पर्येणेति । पारम्पर्येण हि प्रत्यक्षपूर्वकत्वमुक्तं भाष्यकृता, तस्मान्न विरोध इति । अतिव्याप्तिनिरासाय द्वितीयं विग्रहं विवृणोति—यदापीति । ते इति विग्रहे अनन्तरसूत्रगतमेव प्रत्यक्षपदं संबध्यते । तथा च द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य लिङ्गपरामर्शज्ञानस्य प्रत्यक्षफलस्य । तदिदं तत्पूर्वकं प्रत्यक्षम्, तद्धि स्वविषये प्रत्यक्षमप्यनुमेयार्थप्रत्ययं कुर्वदनुमानम् । तदिदं तदित्युच्यते । अत्रापि प्रत्यक्षग्रहणमुपलक्षणार्थम्, अनुमाने इत्याद्यपि द्रष्टव्यम् । स्यादेतत् । संबन्धग्रहणसमये पदतदर्थगोचरं प्रत्यक्षं प्रथमम् अथ तदर्थविषये द्वितीये प्रत्यक्षे सति या तत्पदविषया स्मृतिरुत्पद्यते सापि प्रत्यक्षद्वयपूर्वा । एवं लिङ्गालिङ्गिसंबन्धस्मृतिरपि प्रत्यक्षद्वयपूर्वेति तदवस्थैवातिव्याप्तिरित्याशयवान् पृच्छति—कतरे द्वे इति । उत्तरम्—लिङ्गेति । सर्वसन्देहेष्विदमुतिष्ठते । व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहालक्षणमिति भावः । न च द्वितीयलिङ्गदर्शनं व्याप्तिस्मरणसमये विनश्यदवस्थमप्यस्ति, व्याप्तिसंस्कारोद्बोधसमयजन्मना स्वजनितेन संस्कारेणास्य व्याप्तिस्मरणसमये विनाशात् । विनश्यदवस्थस्य द्वितीयलिङ्गदर्शनस्य व्याप्तिस्मरणेन सह यौगपद्येऽपि तयोः परस्परवार्तानभिज्ञतया मिथो घटनायोगः । न चात्मा ते घटयतीति युक्तम् । वृत्त्या खल्वयं घटयेत् न स्वरूपतः । तस्माद् उभाभ्यामुत्पन्नं परामर्शज्ञानमिन्द्रियार्थसन्निकर्षजं तृतीयं प्रत्यक्षम् एषितव्यम् । *बुभुत्सावतो द्वितीयादिति । बुभुत्साप्यनुमानज्ञानोत्पत्तौ कारणमिति दर्शयितुं बुभुत्सावत इत्युक्तम् । लिङ्गलिङ्गिसंबन्धदर्शनमाद्यं प्रत्यक्षमित्यत्र संबन्धपदेनानुमानाङ्गं संबन्धं विवक्षन् परोक्तान् संबन्धविकल्पान् अनुमानानङ्गभूतान् प्रतिक्षिपति—प्रत्यक्षमिति च तस्य प्रमाणमाह । तथा हि केचिदविनाभावं तादात्म्यतदुत्पत्तिनिबन्धनमनुमानाङ्गमाहुः । द्विविधो ह्यर्थः, प्रत्यक्षश्च परोक्षश्च । तत्र यो बुद्धौ साक्षादात्मीयं रूपं निवेशयति स प्रत्यक्षः । स हि स्वविषयाया बुद्धेः जनक इति तमन्तरेण बुद्धिरात्मानमनासादयन्ती तस्य सत्तां निश्चाययतीति युक्तम् । परोक्षस्तु बुद्धौ साक्षात् स्वरूपोपधानसामर्थ्यरहितोऽयुक्तप्रतिपत्तिरेव । न चान्यदर्शनेऽन्यकल्पनायुक्ता, अतिप्रसङ्गात् । नान्तरीयकतया त्वन्योऽप्यन्यं गमयेत् । स हि प्रतिबद्धस्वभावो यथाविधे सिद्धः, तथाविधसन्निधानं सूचयति । स च प्रतिबन्धो न दर्शनमात्रादवसेयः, तथा सति स श्यामो मैत्रतनयत्वात् परिदृश्यमानमैत्रतनयस्तोमवदित्यप्यनुमानं स्यात् । इहापि हि स्तो दर्शनादर्शने । तस्मात् तादात्म्यतदुत्पत्तिनिबन्धन एव प्रतिबन्धः । यदाह, § 257

६ द्वि ] तत्तुnvt-C
९ ये ] यदेतत्तद°nvt-C
१७ चात्मा ] तु घटयिष्यतीतिnvt-C
१९ * ] बुभुत्सावतो...इत्युक्तम्*Om*nvt-C
३० न्धो ] न दर्शनादर्शनमात्रात्nvt-J

कार्यकारणभावाद् वा स्वभावाद् वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥§ 259

तथा च लिङ्गविकल्पं विना न लिङ्गिविकल्पः । न लिङ्गविकल्पो लिङ्गानुभवं विना । न लिङ्गानुभवो लिङ्गं विना । न चाविनाभूतं लिङ्गं विना लिङ्गिनमिति लिङ्गिस्वलक्षणाप्रतिभास्यपि पारम्पर्येण तत्प्रतिबन्धात् तत्राविसंवादकोऽनुमानविकल्प इति । कार्यकारणभावश्चेदम् । अस्मिन् सति भवति सत्स्वपि तदन्येष्वस्मिन्नसति न भवत्येवमाकारो नान्वयव्यतिरेकाभ्यामतिरिच्यते । तौ च प्रत्यक्षपृष्ठभाविना विकल्पेनावसीयेते । तथा हि सत्यग्नौ धूम इति प्रत्यक्षमेव विकल्पानुगतव्यापारमध्यवस्यति । असति चाग्नौ न धूम इत्यपि प्रत्यक्षमेव । न ह्यग्निधूमानुपलम्भावन्यौ । अतस्तद्विविक्तवस्तूपलम्भात् नाप्यनयोर्व्यतिरेकोऽन्यस्तद्विविक्ताद् वस्तुनः । एवं तादात्म्यमपि विपर्यये बाधकप्रमाणोपपत्त्या निश्चेतव्यम् । यथा सत्त्वस्य क्षणिकतया सह तादात्म्यं विपक्षेऽक्षणिके क्रमाक्रमयोर्व्यापकयोरनुपलम्भान्निश्चीयते । तस्मात् तादात्म्यदुत्पत्तिभ्यामेव प्रतिबन्धो नान्यत इति ॥

130/tha

§ 260

अत्रोच्यते । सत्यं यत् किञ्चित् क्वचिद् दृष्टम्, तस्य यत्र प्रतिबन्धः तद्विदस्तस्य तद्गमकं तत्रेत्यनुजानीमः । स एव तु प्रतिबन्धो न तावत् तदुत्पत्त्या संभवति । का पुनरियं तदुत्पत्तिर्धूमस्य ? किं वह्न्यनन्तरं भावः ? स तादृशोऽस्ति रासभस्यापीति तत्प्रतिबद्धोऽपि धूमः स्यात् । अथ तदनन्तरमेव भावः । न च रासभानन्तरं भवन्नपि तदनन्तरमेव भवति, तस्मिन् सत्यप्यसत्यग्नौ तदभावात् । असत्यपि तस्मिन् सत्यार्द्रेन्धनवति वह्नौ तद्भावात् । अथ यद्यपि धूमस्य वह्निभावाभावानुविधानं तत्रोपलब्धं तथापि देशान्तरादिषु तद्भावोऽस्य कुतस्त्यः ? तथा हि भूयो भूयो रासभे दृष्टे धूमो दृष्टः, तदभावे चादृष्टः । न च स तत्कार्यः । तज्जातीयस्यैव धूमस्य रासभं विना सति वह्नौ भावात् । एवं सत्यप्यग्नौ पिशाचेन जनितो धूमः क्वचित् देशादौ तज्जातीय एव रासभवद् वह्न्यभावेऽपि पिशाचादेव भविष्यतीति ।

अवश्यं शङ्कया भाव्यं नियामकमपश्यताम् ।§ 262

न च सति भावमात्रं नियामकम्, तस्य रासभादिष्वप्यविशेषात् । तदनन्तरमेवेति चावधारणस्य शङ्कापनयनमन्तरेणासंभवात् । अवधारणेन तु शङ्कापनये परस्पराश्रयप्रसङ्गः । § 263

स्यादेतत् । यो यो धूमो दृष्टः स सर्वस्तावदार्द्रेन्धनसहितवह्न्यनन्तरमेव न पिशाचानन्तरम् । स च कादाचित्कतया निमित्तमपेक्षमाणो यदनन्तरमेव गम्यते तदेवाप्रतीतव्यभिचारं निमित्तीकरोति, न तु प्रतीतव्यभिचारं रास-

२ नात्] प्र. वा. ३. ३०
६ न्धात्] तत्रापि संवा°nvt-C
२८ स्य] अपि*Om*nvt-C
२९ स्य] च शङ्कायामभावात्nvt-C
३३ भिचारं] निमित्तंnvt-C

भादि । नापि सर्वथा अनुपलब्धपूर्वपिशाचादि । यदि तु तन्निमित्तं कस्मात्
विनापि वह्निं क्वचिद् धूमो नोपलभ्यते ? अथासौ सर्वथा वह्निसहितः,
तथा सत्यार्देन्धनवत् कथं वह्निरपि न कारणम् ? कारणं चेत् कथं 131/tha
तदन्तरेण धूमभावशङ्का ? अकारणस्य हि कार्यस्य नित्यं सत्त्वमसत्त्वं वा
स्यादनपेक्षत्वात् अनपेक्षत्वात् न कादाचित्कत्वम् । नाप्यनेककारणकमकार-
णकत्वप्रसङ्गादेव । *वह्न्यनन्तरमेव भाव इति हि धूमस्य वह्निकार्यत्वम् ।
स चेदयमवह्नेरप्यनन्तरं नैवकारार्थः स्यादिति न वह्नेः कार्यम् । एवमन्य-
स्यापि न कार्यम् । न हि अन्यानन्तरमेव भवति, वह्नेरप्यनन्तरं भावात् ।
ततश्चाहेतुको धूमः स्यात् । तथा च कादाचित्कत्वव्याहतिः । § 264

सत्यम्, तत्कार्यत्वसिद्धौ स्यादेवम् । तदेव तु तदनन्तरमेव भाव इत्येवंरूपं *नास्ति । यद्यपि च विना वह्निं नोपलब्धो धूमो यद्यपि च पिशाचानन्तरं नोपलभ्यते तेषामनुलब्धेः, तथापि पिशाचकार्य एव धूमस्तत्र तत्र वह्निः कुतश्चित् स्वहेतोरुपनिपतितो रासभ+इव न तु धूमस्य जनकः । तेन तदभावेऽपि तज्जातीय एव कारणभेदजन्मा कदाचित् कादाचित्को धूमः स्यादिति अनिवृत्तिरेव शङ्कायाः । न च दृष्टसंभवे नादृष्टं कल्पयितुं युक्तमिति शक्यं भवद्भिर्वक्तुम्, अनुपलब्धिलक्षणप्राप्तस्य अशक्यनिराकरणत्वात् । न चानुपलब्ध्यन्तराण्यपि तन्निषेधे प्रभवन्ति । तस्मात् अनन्तरमेवेत्यवधारणाभावात् नैवंरूपं कार्यकारणभावावधारणं युक्तम् । न च यद् यदन्यसहितानन्तरमुपलब्धं तत् तदन्यरहितात् तस्माद् भवद् भिन्नजातीयं भवति । उक्तं हि रासभसहिताद् वह्नेर्यादृशो धूमः तादृश एव तद्विरहिताद् वह्नेरिति । तस्मादेवंविधा शङ्कापिशाची स्वनिवारकं तदुत्पत्तिनिश्चयमास्कन्दन्ती न शक्या निवारयितुम् । अपि चास्तु तदुत्पत्तिनिश्चयः, तथापि कस्मात् कारणमन्तरेण न कार्यं भवति ? तथा च सत्यनपेक्षतया कादाचित्कत्वविहतिरिति चेत्—यथाह,

> नित्यं सत्यमसत्त्वं वाहेतोरन्यानपेक्षणात् ।
> अपेक्षातो हि भावानां कादाचित्कत्वसंभवः ॥§ 267

इति । अस्तु तर्हि संबन्धः स्वाभाविकतया अन्यानपेक्षोऽव्यभिचारी गमकाङ्गम् । स च यो वा स वा भवतु, कृतं कार्यकारणभावावधारणायासेन । यथा चैतत् तथात्रैव प्रदर्शयिष्यामः । § 268

अपि च कार्यात् कारणमनुमीयमानं ततः पूर्वमेवानुमीयेत, न तु वर्तमानकालम् । न हि हेतुसत्ता कार्यकाला कार्योत्पादाङ्गम्, अपि तु तत्पूर्वकाला । न हि नदीपूरभेदः स्वसत्तासमयवर्ति वर्षं गमयत्यपि तु

---

१ दि ] नnvt-C
६ * ] तथा हि वह्न्य°nvt-J
११ * ] नास्ति*Om*nvt-J
१८ णाभावात् ] नैव°*Only*nvt-C, कार्यावधारणंnvt-J
२६ वः ] प्र. वा. ३. ३४.
२९ थात्रैव ] तथाग्रेnvt-C

तत्पूर्वकालम् । तत्कालं तु न तस्य कारणम् । अत+एव साधकबाधकप्रमाणाभावेन तत्कालवर्तिनि वर्षे सन्दिहाना न तदर्थिनः प्रवर्तन्ते । एवं धूमादप्यग्निः तत्पूर्वकाल एवानुमीयेत, न तु वर्तमानकालः । तथा च सति न तदर्थिनस्तत्र निःशङ्कं प्रवर्तेरन् । अपि च रसादन्यद्रूपं रससमानकालमनुमिमतेऽनुमातारः । न चानयोरस्ति कार्यकारणभावः तादात्म्यं वा । यद्युच्येत तत्पूर्वेभ्यो रूपरसगन्धस्पर्शक्षणेभ्यो रसक्षणो जायते, स स्वकारणं पूर्वरूपक्षणमनुमापयन् यादृशा तेन जनितः, तादृशमेवानुमापयति । स चानुमापकरसक्षणसमानकालरूपक्षणान्तरजनक एव स्वकारणमिति तादृशमेव गमयति । तथा च कार्यसमानकालरूपानुमानसिद्धिः । एतेन धूमानुमानं व्याख्यातम् । यथाह,

> एकसामग्र्यधीनस्य रूपादे रसतो गतिः ।
> हेतुधर्मानुमानेन धुमेन्धनविकारवत् ॥[§ 271]

इति । [§ 272]

अत्रोच्यते । योऽयं गमकरससमानकालो रूपक्षणः, स किं तज्जनकस्य रूपक्षणस्य स्वभाव उत तत्स्वभावावच्छेदकोऽस्वभावभूतः ? न तावत् स्वभावः, एकस्मिन्नभिन्ने जन्यजनकभावानुपपत्तेः, तस्य भेदाश्रयत्वात् । तदस्वभावभूतः कथं तदनुमाननिवेशी ? तदवच्छेदकत्वादिति चेत् ? ननु नैतावताप्यस्य तुल्यकालस्य रूपस्य कारणभाव इति कथं कार्यहेतोर्गम्येत ? विशिष्टेन कारणस्वभावेनास्वभावोऽप्यसावाक्षिप्यते विशेषणतयेति चेत् ? 133/tha नन्वाक्षिप्यते ज्ञाप्यत इत्यनर्थान्तरम् । *स किं कारणानुमितेः प्रागथानुमितिसमये पश्चाद् वा ? न तावत् प्राक् न हि सत्तामात्रेण कारणं तद्गमयत्यतिप्रसङ्गात्, किं तु स्वज्ञानेन । न च कार्यमस्य गमकम्, अकारणत्वादित्युक्तम् । अत+एवानुमितिसमयेऽप्यगमकम्, स्वज्ञानेन गमकत्वात् । उभयोश्च ज्ञानयोः सह भवतोः सव्येतरविषाणवत् कार्यकारणभावाभावात् । तथा च रसात् कार्यात् तत्कारणं रूपमनुमातव्यम् । ततश्चानुमिताद् रूपात् कारणात् तत्कार्यं रससमानकालं रूपमनुमातव्यम् । तथा च कारणात् कार्यानुमानं तादात्म्यतदुत्पत्तिभ्यामन्यत इति नाभ्यामेव प्रतिबन्धसिद्धिः । लौकिकानां चेदं रसाद् रूपानुमानम्, न चैते पिशितचक्षुषः क्षणानामन्योन्यभेदमध्यवस्यन्ति । न चानध्यवस्यन्तः प्रवृत्तरूपोत्पादनसामर्थ्यं रसहेतुं रूपमनुमातुमुत्सहन्ते । न च *लक्षणानुरोधेन लक्ष्यस्यान्यथाकरणं युक्तं परीक्षकाणाम् । अतिपतितलोकमर्यादानां तेषां तत्त्वानुपपत्तेः । यथाहुः,

---

१२ त् ] प्र. वा. ३. ८
१८ स्य ] एतावताप्यस्य nvt-K
१८ म्येत ] कार्यं हेतोःnvt-C
२० * ] सा...मितिnvt-C
२० णानुमितेः ] प्रागप्यनु°nvt-C
२७ इति ] मभूदितिnvt-C
२९ न्तः ] प्रवृत्ति°nvt-C
३० * ] स्वलक्षण° CK

सिद्धानुगममात्रं च कर्तुं युक्तं परीक्षकैः ।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम् ॥ § 275

इति । अपि चाद्यतनस्य सवितुरुदयस्य ह्यस्तनेन सवितुरुदयेन, चन्द्रोदयस्य च समानकालस्य समुद्रवृद्ध्या, मध्यनक्षत्रदृष्ट्या चाष्टमास्तमयोदयस्य, न कार्यकारणभावस्तादात्म्यं वा । अथ च दृष्टो गम्यगमकभावः । अपि च तादात्म्येऽपि कथं गम्यगमकभावः ? न हि तदेव कर्म च कर्तृ चेति युक्तम्, तस्य भेदाश्रयत्वात् । यद्यपि च वृक्षत्वशिंशपात्वे परमार्थतो न भिन्ने तथापि भेदान्तरप्रतिक्षेपाभ्यां कल्पितभेदयोर्गम्यगमकभाव इति चेत्-न, वास्तवमेव वृक्षत्वशिंशपात्वयोर्भेदमुपपादयिष्यामः । अपि च काल्पनिकमपि रूपं विचार्यमाणं न यथा भिन्नमेवमभिन्नमपि न भवति, वस्तुनोऽपि तुच्छत्वप्रसङ्गात् । काल्पनिकस्यावास्तवत्वेन तत्त्वानुपपत्तेः । तस्मात् कल्पनारूढयोर्न वस्तुतादात्म्यम्, नापि परस्परम् । तथा सति सद्द्रव्यपार्थिववृक्षशिंशपादिविकल्पानां शब्दानां च पर्यायत्वप्रसङ्गात् । § 276

स्यादेतत् । कल्पनाभेदविरहिणां भेदमुल्लिखन्त्यपि परस्परमेषामभेदमप्यवगाहते सामानाधिकरण्याकारत्वात्, अभेदानुल्लेखे तदनुपपत्तेः । तथा च तादात्म्यं सिद्धमिति । *तदयुक्तम् । उक्तं हि यथा सामानाधिकरण्यं न भावानामभेदसाधकम्, जात्यादिशब्दा हि जात्यादीन् निमित्तीकृत्य द्रव्ये वर्तन्ते । तच्चाधिकरणमेकमिति सामानाधिकरण्यमश्नुवते । न पुनर्जात्यादीनपि मिथो मिश्रयन्ति । शब्दसमानविषयाणां विकल्पानामपीयमेव गतिः । तस्माद् यत्र गम्यगकभावो न तत्र तादात्म्यम्, यत्र तादात्म्यं न तत्र गम्यगमकभाव इति सिद्धम् । यत्तु विदितशिंशपाव्यवहारमविदितवृक्षव्यवहारमुच्चायां हि शिंशपायां वृक्षशब्दः प्रयुक्तः, तस्मादुच्चत्वमेव वृक्षशब्दप्रवृत्तिनिमित्तमिति मन्यमानं मूढं प्रति शिंशपात्वेन वृक्षव्यवहारमात्रं साध्यते । वामनायामपि शिंशपायां वृक्ष इति व्यवहर्तव्यम्, शिंशपामात्रानुबन्धित्वाद् वृक्षत्वस्येति । तत्रापि चेद् व्यवहारः साध्यः स शिंशपाया भिन्न इति, न तादात्म्यम् । व्यवहारयोग्यता चेत् ? सा शिंशपाया अभिन्नेति न गम्यगमकभावः । व्यावृत्तिभेदे चोक्तम् । तस्मात् तादात्म्यतदुत्पत्तिभ्यां प्रतिबन्ध इति मनोरथमात्रम् ॥ § 277

यश्च वैशेषिकैः चतुष्प्रकारः संबन्ध उच्यते, अस्येदं कार्यं कारणं संबन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम् वै. सू. ९।२।१ इति, अत्रापि संबन्धिपदेनैव सर्वोपसंग्रहात् शेषाभिधानं व्यर्थम् । न च संबन्धिपदोपात्तस्यातिप्रसक्तिः शेषपदैर्निवार्यते । तथा सति शेषपदान्येव सन्तु कृतं संबन्धिपदेन, तेभ्य एव संबन्धिभेदानामधिगतेः । न चैवं चातुर्विध्यं संबन्धस्यानुमानाङ्गस्य । तच्चेष्यते । तथा च संबन्धिपदस्य संबन्धिमात्रावरोधेऽतिव्याप्तिः । अपि च *भूतं वर्षम् अभूतस्य वाय्वभ्रसंयोगस्य कथं

२ म्] श्लो. वा. प्रत्यक्ष° १३३
१६ *] °युक्तं यथा हिnvt-C
३४ स्य] सर्वमात्राव°nvt-C
३५ *] द्र: वै. सू. ३. १. १२

135/tha विरोधि ? तद्धि तदनुकूलमेव । एवम् *अभूतम् वर्षं भूतस्य वाय्वभ्रसंयोगस्याप्रतिकूलम् । एवं *भूतो नकुलजयो न भूतस्य सर्पपराजयस्य विरोधी । नापि *अभूतोऽसौ अभूतस्य विरोधी येषां पुनर्विरोधः, तेषामन्यतमदन्यतमस्य न लिङ्गमपि तु प्रतिक्षेपकमेव । § 278

एतेनैव,

मात्रानिमित्तसंयोगिविरोधिसहचारिभिः ।
स्वस्वामिवध्यघातादैः सांख्यानां सप्तधानुमा ॥§ 281

इत्यपि पराकृतं वेदितव्यम् । § 282

तस्माद् यो वा स वास्तु संबन्धः केवलं यस्यासौ स्वाभाविको नियतः, स एव गमको गम्यश्चेतरः संबन्धीति युज्यते । *तथा हि धूमादीनां वह्न्यादिसंबन्धः स्वाभाविकः, न तु वह्न्यादीनां धूमादिभिः । ते हि विनापि धूमादिभिरुपलभ्यन्ते । यदा त्वार्द्रेन्धनादिसंबन्धमनुभवन्ति, तदा धूमादिभिः सह संबध्यन्ते । तस्माद् वह्न्यादीनामार्द्रेन्धनाद्युपाधिकृतः संबन्धो न स्वाभाविकः, ततो न नियतः । स्वाभाविकस्तु धूमादीनां वह्न्यादिसंबन्धः, तदुपाधेरनुपलभ्यमानत्वात् । क्वचिद् व्यभिचारस्यादर्शनादनुपलभ्यमानस्यापि कल्पनानुपपत्तेः । अतो नियतः संबन्धोऽनुमानाङ्गम् । न चादृश्यमानोऽपि दर्शनानर्हतया साधकबाधकप्रमाणाभावेन सन्दिह्यमान उपाधिः *संबन्धस्य स्वाभाविकत्वं प्रतिबध्नातीति सांप्रतम् । § 283

अवश्यं शङ्कया भाव्यं नियामकमपश्यताम् इति दत्तावकाशा खल्वियं *लौकिकप्रमाणमर्यादातिक्रमेण शङ्कापिशाची लब्धप्रसरा न क्वचित् नास्तीति नायं क्वचित् प्रवर्तेत । सर्वत्रैव कस्यचित् कथञ्चिदनर्थस्य शङ्कास्पदत्वात् । अनर्थशङ्कायाश्च प्रेक्षावतां निवृत्त्यङ्गत्वात् । अन्ततः स्निग्धान्नपानोपयोगेऽपि मरणादिदर्शनात् । तस्मात् प्रामाणिकलोकयात्रामनुपालयता यथादर्शनं शङ्कनीयम् । न त्वदृष्टपूर्वमपि । विशेषस्मृत्यपेक्षो हि संशयो नास्मृतेर्भवति ।
136/tha न च स्मृतिरननुभूतचरे भवितुमर्हति । तस्मादुपाधिं प्रयत्नेनान्विष्यन्तोऽनुपलभ्यमाना नास्तीत्यवगम्य स्वाभाविकत्वं संबन्धस्य निश्चिनुमः । § 284

स्यादेतत् । अन्येनान्यस्य सहकारेण चेत् स्वाभाविकः संबन्धो भवेत्, सर्वं सर्वेण स्वभावतः संबध्येत । तथा च सर्वं सर्वस्माद् गम्येत । *अथान्यस्य चेदन्यत् कार्यम्, कस्मात् सर्वं सर्वस्य न भवति, अन्यत्वाविशेषात् । ततश्च स एवातिप्रसङ्गः । यद्युच्येत, न भावस्वभावाः पर्यनुयोज्याः, तस्मादन्यत्वाविशेषेऽपि किञ्चिदेव कारणं कार्यञ्च किञ्चिदिति । नन्वेष स्वभावानामनुयोगो भिन्नानामकार्यकारणभूतानामपि स्वभावप्रतिबन्धे तुल्य एव । तस्माद्

१ *] तदेव, ३.१.११
२ *] तदेव, ३.१.१३
३ *] तदेव, ३.१.१४
१० *] द्रः व्याप्तिनिर्णयः पृः १०९
१७ *] संबन्धस्य*Om*nvt-C
१९ भाव्यं ] नियामकाभावादितिnvt-C
२० *] लौकिक°nvt-J
२८ *] उत्तरम—अथा° nvt-J
३१ न्वेष ] स्वभावानु° nvt-J

यत्किञ्चिदेतत् । कः पुनः प्रमाणेन स्वाभाविकः संबन्धो गृह्यते ? प्रत्यक्षसंबन्धिषु प्रत्यक्षेण, यथाहलिङ्गलिङ्गिसंबन्धदर्शनमाद्यमिति । यदा तावत् प्रथमं वह्निधूमयोः सहार्द्रेन्धनयोः संबन्धं पश्यति तदा द्वयोरपि किं स्वाभाविकः संबन्ध औपाधिको वा । अथ धूमस्यौपाधिको वह्नेः स्वाभाविकः वह्नेर्वौपाधिको धूमस्य तु स्वाभाविक इति न शक्यं निर्धारयितुम् । तत्र वह्नेरनार्द्रेन्धनस्य विनाधूममयोगोलकादौ दर्शनाद् आर्द्रेन्धनोपाधिः । अस्य धूमेन संबन्धो न तु स्वाभाविक इति निश्चीयते । धूमविशेषस्य तु विना वह्निमनुपलम्भाद् उपाधिभेदस्य चादृश्यमानस्य कल्पनायां प्रमाणाभावाद् विशेषस्मृत्यपेक्षस्य च संशयस्यानुपलब्धपूर्वे अनुत्पादात्, उत्पादे वा अतिप्रसङ्गात् प्रेक्षावतां प्रवृत्त्युच्छेदात् स्वाभाविकः संबन्धोऽवधार्यते । तदिदमवधारणं न मानसम्, अनपेक्षस्य मनसो बाह्ये प्रवृत्तावन्धबधिराद्यभावप्रसङ्गात् । भूयोदर्शनसापेक्षस्य च प्रवृत्तौ प्रमाणान्तरापातात्, न हि मनो निमित्तमित्येव मानसं प्रत्यक्षं भवति । तथा सति न किञ्चिदमानसम्, प्रत्ययमात्रस्य मनोनिमित्तत्वात् । तत्तदसाधारणकारणापेक्षया तु तत्प्रमाणव्यपदेशे अत्रापि भूयोदर्शनमसाधारणमिति प्रमाणान्तरं जातम् । तस्मादभिजातमणिभेदतत्त्ववद्भूयोदर्शनजनितसंस्कारसहायमिन्द्रियमेव धूमादीनां वह्न्यादिभिः स्वाभाविकसंबन्धग्राहीति युक्तमुत्पश्यामः । § 285

137/tha

एवं मानान्तरविदितसंबन्धिषु मानान्तराण्येव यथास्वं भूयोदर्शनसहायानि स्वाभाविकसंबन्धग्रहणे प्रमाणमुन्नेतव्यानि । स्वभावतश्च प्रतिबद्धा हेतवः स्वसाध्येन यदि साध्यमन्तरेण भवेयुः स्वभावादेव प्रच्यवेरन्निति तर्कसहायानिरस्तसाध्यव्यतिरेकवृत्तिसन्देहा यत्र दृष्टाः तत्र स्वसाध्यमुपस्थापयन्त्येव । न च श्यामादिषु मैत्रतनयादीनां स्वाभाविकप्रतिबन्धसंभवः, अन्नपानपरिणतिभेदस्योपाधेः श्यामताया मैत्रतनयसंबन्धं प्रति विद्यमानत्वेन मैत्रतनयत्वस्यागमकत्वात् । एनेन पक्वान्यस्य वृक्षस्याग्रवर्तीनि फलानि एतद्वृक्षप्रभवत्वात् पतितफलवदित्यादयोऽप्यौपाधिकसंबन्धा व्याख्याताः । तस्मात् सर्वमवदातम् ॥ § 286

नन्वन्तिमप्रत्यक्षमतीताभ्यां प्रत्यक्षाभ्यां कथमनुगृह्यते इत्यत आह— स्मृत्या चेति । चो हेत्वर्थे । यद्यपि स्वरूपतो लिङ्गदर्शने अतीते, तथापि तज्जनिता स्मृतिरनुगृह्णाति यस्मादतस्ताभ्यामनुगृह्यते । अनुग्रहश्च करणमेव । संबन्धस्मृतिसहकारिणेन्द्रियेण स्वसाध्याविनाभूतलिङ्गविज्ञानं यदुपजन्यते तत् परामर्श इत्याख्यायते । तथाभूतलिङ्गगोचर एव चतुर्थो वाक्यावयव उपनय इत्याख्यायते । अत्र पृच्छति—कः पुनरिति । अनुमानशब्दस्यार्थो न तावदनुमितिः । न खलु लिङ्गपरामर्शोऽनुमितिः, प्रत्यक्षफलत्वात् । तस्मादनुमीयते अनेनेति करणार्थो वक्तव्यः । स च लिङ्गविषयः क्रिया च लिङ्गिविषयेति विषयवैषम्यात् न क्रियाकरणभाव इति भावः । उत्तरम्— अनुमीयत इति । तेनैवाभिप्रायेण पृच्छति—किं पुनरिति । उत्तरम्—अग्नीति

। प्रष्टा स्वाभिप्रायमुद्घाटयति—कथं पुनरन्यविषयमिति । एकदेशिन उत्त-
रम्—नानियमादिति । वृक्षोद्देशेन प्रवर्तितः परशुः कर्त्रा न तदवयवोद्देशेन,
तस्माद् वृक्षविषयः परशुर्न तवदयवविषयः । द्वैधीभावश्चावयवेषु न वृक्षे,
तस्य ततो विनाशादिति भावः । क्वचित् पुनर्यद्विषयमिति । औष्ण्यापेक्षो
वह्निसंयोगः करणं तण्डुलेषु । रूपादिपरावृत्तिरूपः पाकः तेष्वेव । तण्डुलेन
पिठरं लक्षयति । न केवलं समानविषयत्वानियमः कर्तुः करणं भिन्न-
मित्यपि नियमो नास्तीत्यनियमाभिधानप्रसङ्गेनाहक्वचित् पुनरिति । स्थितिः
138/tha सावयवेषु समवायो वा प्रदेशविशेषे संयोगो वा । एवमनियमं दृष्टान्त
उक्त्वा दार्ष्टान्तिके योजयति— एवमन्यविषयस्येति । धूमविषयस्य प्रमाण-
स्याग्निविषया क्रिया प्रमितिः । यदा अग्निविषयमेव ज्ञानं प्रमाणं तत्राह—
क्वचित् पुनरिति । आक्षिपति—किं पुनरिति । अत्र हेतुमाह—प्रमितत्वात्
। उत्तरम्—प्रमीयते । *तद्विभजते—हेयत्वेनेति । अनियमवादिन एक-
देशिनो मतं नियमवादी दूषयति—तन्नेति । हेतुमाह— प्रमाणफलयोरिति
। यदि अन्यविषयं करणमन्यविषया क्रिया भवेत् ततश्छेदने खदिरं प्राप्ते
पनसादावपि च्छिदा स्यादित्यतिप्रसङ्गः स्यात् । यद्यपि वृक्षोद्देशेन कर्त्रा
परशुः प्रयुक्तस्तथाप्ययं वृक्षमिव तदवयवानपि प्राप्त इति तद्विषयो भवति
। तेन तदवयवद्वैधीभावमुखेन वृक्षविषयामपि द्वैधीभावक्रियां जनयतीति
न वैयधिकरण्यं करणफलयोः । एवं यद्यपि लिङ्गविषयं प्रत्यक्षफलतया
लिङ्गज्ञानम्, तदनुबद्धस्य तस्य मानसप्रत्यक्षगोचरत्वात्, लिङ्गिनिरूपणमन्त-
रेण तदनिरूपणात् । न तु लिङ्गज्ञानं लिङ्गिनं विना न निरूप्यते । तस्मात्
प्रतिपत्त्यनुबन्धितया विषयो न लिङ्गज्ञानस्य लिङ्गी, किं तु लिङ्गमेव । तथापि
लिङ्गिविषयप्रतिपत्तिजनकत्वात् लिङ्गज्ञानं भवति लिङ्गिविषयम् । न चातिप्र-
सङ्गः, स्वाभावितकसंबन्धशालित्वात् लिङ्गस्य लिङ्गिनि । तस्माद् द्विविधो
विषयभावः प्रतिपत्त्यनुबन्धिता, प्रतिपाद्यता च । तत्र पूर्वः फलस्य, उत्तरस्तु
प्रामाण्यस्येति विवेकः । तस्मात् सुष्ठूक्तम्—प्रमाणफलयोर्विषयभेदानभ्युप-
गमादिति । स्थितौ तु भेदो दर्शयिष्यते कर्तुः करणस्य चेति । तदेवं तानि
ते इति विग्रहद्वयं परस्परापेक्षमुपपाद्य तानि तदिति विग्रहद्वयं परस्परापेक्ष-
मुपपादयति—यदा पुनरिति । लिङ्गलिङ्गिसंबन्धदर्शनं च अनन्तरलिङ्गदर्शनं
च तत्स्मृतिश्चेति विग्रहः । अत्रापि सर्वसन्देहेष्विदमुपतिष्ठते, व्याख्यानतो
विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति भावः ॥ § 287

ननु यदि प्रमाणफलयोरेकविषयत्वं तर्हि परामर्शज्ञानविषयीकृत एवार्थो
विषयीकर्तव्यो नान्यः । स च प्रत्यक्षप्रमाणविषय एवेति कृतमनुमानेनेत्याश-
139/tha यवान् पृच्छति—किं पुनरिति । तैर्विशिष्टेन लिङ्गपरामर्शेनेत्यर्थः । उत्तर-
म्—शेषोऽर्थः । प्रत्यक्षप्रमितात् लिङ्गादन्यो लिङ्गी तद्विषयत्वं च लिङ्गपरामर्श-
स्योक्तमिति । पृच्छति— अनुमानमित्यत्र किं कारकम् ? अनुमीयतेऽनेनेति

१२ *] तद्विभजते *Om* nvt-C
२४ भावः] °न्धितया °पाद्यतया nvt-C
२५ स्येति] प्रमाणस्येति तद्विवेकः nvt-C

करणकारकमेव युक्तं तस्यैव लिङ्गदर्शनद्वयस्मृतिपूर्वकत्वात् न त्वनुमितिरनुमानं प्रमाणव्यापारत्वेनातन्निमित्तत्वात् करणकारकादन्यत्वाद् अतत्पूर्वकत्वाच्चेति भावः। उत्तरम्—भावः करणं वा। ननूक्तं न भावः कारकमित्यत आह—यदेति। न द्रव्यादीनामेव कारकत्वम्, अपि तु व्यापारस्यापि। अन्यथा कर्मनामधेयेषूद्भिदादिशब्देषु न करणविभक्तिः श्रूयेत, उद्भिदा यजेत दर्शपौर्णमासाभ्यां यजेतेत्यादि। संभवति हि तस्यापि सिद्धस्य फलभावनायां निमित्तत्वम्। एवं वह्निप्रमायाः सिद्धायाः संभवति हानादिबुद्धिनिमित्तभावः। एतस्मिंश्च कल्पे तत्पूर्वकमित्यत्र तदा हानादिसंबन्धावधारणसमये प्रथमं वह्नित्वस्य लिङ्गस्य दर्शनम्, अथानुमानिकं द्वितीयम्, अथ संबन्धस्य स्मृतिरिति त्रयमेकीकृत्य परामर्ष्टव्यम्। तत्पूर्वको हि तथा चायमनुमीयमानो वह्निरिति लिङ्गपरामर्शः। तस्माद् दाहपाकादिकारित्वादुपादेयो वह्निरिति ज्ञानमनुमानस्य फलम्। ततश्च तत्पूर्वकत्वमपि सिद्धं भवतीति भावः। करणकारकपक्षे फलमाह—यदा करणमिति। अत्र विमृशति—लिङ्गेति। तत्पूर्वकत्वानुमिति निमित्तत्वसमानधर्मदर्शनात् संशयः। अत्राचार्यदेशीयमतमाह—एके तावदिति। सत्स्वपीतरेषु स्मृतेरभावादनुमितेरनुत्पादेन स्मृतिरेवानुमानम् इतरे तु तदनुग्राहका इत्यर्थः। मतान्तरमाह—अपर इति। सत्स्वपीतरेषु लिङ्गपरामर्शं विना अनुमित्यनुत्पादात्, लिङ्गपरामर्श एवानुमानमितरैरनुगृहीत इत्यर्थः। स्वमतमाह—वयं त्विति। अन्वयव्यतिरेकाभ्यामशक्यो गुणप्रधानभावो विवेक्तुम्, तयोः सर्वत्र तुल्यत्वादिति भावः। तत् किमिदानीं नास्त्येव गुणप्रधानभाव इत्यत आह—प्रधानेति। *नान्वयव्यतिरेकावत्र प्रभवतो न तु न्यायान्तरमिति भावः। पृच्छति—कः पुनरत्रेति। उत्तरमाह—आनन्तर्येति। नेहास्ति तिरोहितं किञ्चित्॥ § 288

140/tha

अतिव्याप्तिं चोदयति—यदीति। ननु भवतु प्रत्यक्षद्वयपूर्वकः संस्कारोऽनुमानम्, तेनापि शेषोऽर्थोऽनुमास्यत इत्यत आह—स्मृतिहेतुर्नानुमितिहेतुरित्यर्थः। परिहरति—नैष दोष इति। विशिष्टज्ञानं विज्ञानं विशेषश्च स्मृतेरन्यत्वम्। न हीन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं स्मृतिः। तस्याः संस्कारमात्रप्रभवतया अन्यस्मादनुत्पत्तेः। तेन च ज्ञानेन स्वकारणं विशेषितम्, प्रत्यक्षसूत्रे यत इत्यध्याहारात्। तस्मादिहापि स्वकारणविशेषकं स्मृतेरन्यद् विज्ञानमधिकृतम्। न च संस्कारः प्रत्यक्षपूर्वोऽपि तादृशज्ञानकारणमिति न तस्य प्रसङ्ग इत्यर्थः। निर्णयेऽनुपजनितफले प्रसङ्ग निवारयति—*निर्णय इति। विभागसूत्राक्षिप्तप्रमाणसामान्यलक्षणपूर्वकं विशेषप्रमाणलक्षणं तदपेक्षं प्रवर्तमानं नानुपजनितफलेऽप्रमाणे निर्णयमात्रे

२ नुमानं] °व्यापारत्वे न तन्निमित्तात् कारकत्वादन्य° nvt-J
८ ये] प्रथमं ज्ञानं nvt-C
२० *] °रेकात् तत्रभवतो न न्याया° nvt-C
३१ *] निर्णयास्त्वितिnvt-J

प्रवर्तितुमर्हति, जनितफलस्तु निर्णयः प्रमाणमेवेति भावः । स्वविषय परिच्छेदकत्वात् फलं परिच्छेद एव परिच्छेदकः, स्वार्थिकः प्रत्ययः ॥ § 289

त्रिविधमिति सूत्रावयवमर्थगौरवादराद् वार्त्तिककार उद्भाष्यं व्याचष्टे—त्रिविधमितीति । अन्वयव्यतिरेकिणं लक्षयति—तत्रेति । विवक्षितोपपत्तिः पक्षधर्मता, तज्जातीयोपपत्तिः अन्वयः । विपक्षावृत्तिः व्यतिरेकः । अन्वयिमात्राद् व्यतिरेकिमात्राच्च व्यावृत्तोऽन्वयव्यतिरेकी दर्शनीय इति हेतुत्रयसाधारणे अबाधितविषयत्वासत्प्रतिपक्षत्वे सती अपि हेतुरूपे न दर्शिते । *विवक्षितप्रत्ययमन्तरेण चान्वयव्यतिरेकयोः तज्जातीयातज्जातीयवृत्तिव्यावृत्त्योरशक्यप्रतीतित्वाद् विवक्षितोपादानम् । तत्प्रसङ्गेन च तद्धर्मता हेतुत्रयसमानापि दर्शिता । तस्योदाहरणमाह—यथेति । प्रत्यक्षत्वादिति हेतुरात्मनि नित्येऽस्तीत्यत उक्तम्—बाह्यकरणेति । तथापि सामान्यविशेषैर्घटत्वादिभिर्व्यभिचार इत्यत उक्तम्—सामान्यविशेषवत्त्व इति । तथापि परमाणुभिर्बाह्यकरणप्रत्यक्षैर्योगिनां व्यभिचार इत्यत उक्तम्—अस्मदादीति । 141/tha तथा चायं नित्येभ्य आकाशादिभ्यो घटादिषु चानित्येष्वन्वित इति भवत्यन्वयव्यतिरेकी । अन्वयिनं लक्षयति—अन्वयीति विपक्षहीन इति । विपक्षाभावेन ततो व्यतिरेकाभावं दर्शयति । सद्ग्रामभावो निरूप्यते नैकेन सतेत्युक्तम् । तेन हेतोर्यतो विपक्षान्निवृत्तिः स एव नास्तीति कुतो निवर्तताम्, पक्षादन्यस्य सर्वस्यैव सपक्षत्वात् ? न निवर्तत इति चेत् ? अस्तु तर्हि हेतोस्तत्र वृत्तिः निवृत्तिनिषेधरूपत्वाद् वृत्तेरिति चेत् ? यस्याभावाधिकरणत्वमपि न संभवति निरुपाख्यस्य तस्य भावाधिकरणत्वशङ्केति सुभाषितम् । न खलु मुमुर्षोस्तोयाभ्यवहारेऽप्यसमर्थस्य शष्कुलीभक्षणं शङ्कते चेतनः । तत् किमिदानीं भावाभावौ न परस्पराभावात्मानौ यदेकनिषेधेनान्यविधिः स्यात् ? सत्यम्, यदेकतर एतयोर्निषिध्यते विधीयते च तत्र तदितरविधिर्निषेधो वावश्यं भवेत् । न त्विह परमार्थतः कस्यचित् निषेधः । *न चात्र निरुपाख्यो हेतोर्व्यतिरेको निषिध्यते, न निरुपाख्यो निषेधाधिकरणमिति च वचः स्वचरितविरुद्धम् । न चैतत् तत्त्वतोनिरुपाख्ये हेतोर्व्यतिरेकं वा हेतुं वा व्यासेधामो नाप्यन्वयं विदध्मः । नो खल्वयं सकलप्रतिपत्त्यभाजनं क्वचिदप्युपयुज्यते । उपयोगे वा निरुपाख्यो न भवेत् । कस्तर्हि न निरूपाख्ये हेतोर्व्यतिरेक इत्यस्य वचनस्यार्थः ? अथ निरूपाख्ये हेतोर्व्यतिरेक इत्यस्य भवद्भाषितस्य कोऽर्थः ? अहृदयवाचां खल्वहृदया एव प्रतिवाचो भवन्ति । यक्षानुरूपो बलिरिति हि लौकिकानामा—भाण-

३ मिति ] गौरवात्nvt-C
७ ती ] अपि रूपेnvt-C
७ * ] पक्षज्ञानमन्तरेणnvt-J
९ च ] पक्षधर्मताnvt-J
११ थापि ] सामान्यविशेषे घटत्वादौnvt-C
१२ थापि ] बाह्यप्र°nvt-C
१७ नैकेन ] पृः २८. ५
१९ अस्तु ] तर्हि*Om*nvt-C
१९ वृत्तिः ] अवृत्ति°nvt-C
२१ स्य ] अपि*Om*nvt-C
२३ च ] व्यतिरेको निषिध्यते विधीयते वाnvt-C
२४ * ] ननु च निरुपाख्ये चnvt-J
२७ तिरेकं ] वा हेतुं वाnvt-J

कः । न चात्यन्तादृष्ट पूर्वाणां कल्पनाजालगोचरत्वमिति चोपपादितमन्यथाख्याति निरूपणावसरे । कल्पितगोचरश्च व्यतिरेकोऽपि काल्पनिक इति नानुमानाङ्गम् । स्वाभाविकरूपसंपन्नं हि प्रमाणं तत्त्वज्ञानरूपफलाय कल्पते न कल्पितरूपसंपदा, तस्याः सर्वत्र सुलभत्वादिति । तत्त्वविषयत्वं चानुमानस्योपपादयिष्यते । तस्मादनुपाख्ये विपक्षे हेतोर्व्यतिरेकनिवृत्तौ वा व्यतिरेके वा हेतुप्रवृत्तौ वा सहृदयानां मूकतैवोचिता । न चैतावता 142/tha हेतोरगमकत्वम् । न हि व्यतिरेकोऽस्तीत्येव गमको भवति । मा भूदसाधारणस्यापि गमकत्वम्, किंतु स्वसाध्येन सह स्वाभाविकसंबन्धशालितया । सा चान्वयव्यतिरेकाभ्यामिवान्वयमात्रेणाप्युपाधिरहितेन शक्या ज्ञातुमिति कृतमत्र व्यतिरेकेण । विपक्षसंभवे तु तत्रापि हेतुवृत्तिशङ्कानिराकरणाय व्यतिरेकग्रहणमुपासनीयमिति सर्वमवदातम् । § 290

उदाहरणमाह—यथेति । स्वमते त्वभिधेयो विशेषः प्रमेयत्वात् सामान्यवत् । परमाण्वाकाशादयः कस्यचित् प्रत्यक्षाः प्रमेयत्वात् घटवदित्यादयो द्रष्टव्याः, विश्वस्यैव सदसत्प्रभेदभिन्नस्य यथास्वं पक्षसपक्षयोरन्तर्भावेन विपक्षाभावादिति । व्यतिरेकिणं लक्षयति—व्यतिरेकीति—तमिमं व्यतिरेकिणं हेत्ववयवलक्षणव्याख्यानावसरे वार्त्तिककृद् उपपादयिष्यातीति नेहोपपादितः । तदेवं त्रिविधमित्यवच्छिद्य व्युत्पाद्य संप्रति पूर्ववदित्यादिना एकवाक्यतया व्याचष्टे— अथवा त्रिविधिमिति । तिसृष्वपि विधासु साध्यवचनस्य पूर्वमुपपादनात् पूर्वं साध्यं तद् यस्यास्त्यधिकरणतया तत्पूर्ववत् । तथाप्यनित्याः परमाणवो गन्धवत्त्वाद् घटवदित्यपि हेतुः स्यात् । अस्ति हि साध्यं तस्यापि, पार्थिवानामप्यणूनामनित्यत्वेन सिषाधयिषितत्वादित्यत आह—व्याप्त्येति । अस्ति गन्धवत्त्वस्य साध्यं न तु व्याप्त्या, पृथिवीमात्रवृत्तितया चतुर्षु परमाणुषु तदभावात् । साध्यस्योपयुक्तत्वात् ततोऽन्यस्तज्जातीयः शेषः, साध्यसामान्येन समान इति यावत् । तदिदमाहसाध्यतज्जातीय इति । § 291

पदानि विभज्यार्थमाह—पूर्ववन्नामेति । सामान्यतोऽदृष्टमिति नञमन्तर्भाव्य व्याचष्टे—सामान्यतश्चेति । तथा च बाधितविषयं प्रकरणसमं चानुमानं स्यादित्यत आह—चशब्दादिति । वार्त्तिके चशब्देनासत्प्रतिपक्षत्वमपि सूचितम् । तेन *सूत्रस्थेन चशब्देनाबाधितविषयत्वमसत्प्रतिपक्षत्वमपि रूपद्वयं समुच्चितमित्युक्तं भवति । नन्वेवं त्रिविधोऽपि हेतुः पञ्चलक्षणः स्यादित्यत आह—एवमिति । एतदुक्तं भवति अबाधितविषयमसत्प्रतिपक्षं पूर्ववदिति 143/tha च ध्रुवं कृत्वा शेषवदित्येका विधा, सामान्यतोऽदृष्टमिति द्वितीया, शेषवत्सामान्यतो दृष्टं चेति तृतीया । तदेवं त्रिविधमनुमानम् । तत्र चतुर्लक्षणं द्वयम् । एकं पञ्चलक्षणमिति । § 292

१ पूर्वाणां ] कल्पनाज्ञानगो°nvt-J
२ रे ] द्र. १. १. २
६ वा ] हेतु...वा*Om*nvt-C
१३ त्वात् ] घटादि°nvt-J
१६ रे ] १.१.३५
१६ यिष्यातीति ] दर्शयिष्य°nvt-C
२९ * ] °स्थेनाबाधितत्त्व°nvt-C

तदेवं स्वमतेन सूत्रं व्याख्याय भाष्यकृन्मतेन व्याचष्टे—अथ वेति । आक्षेप्तुं स्वरूपतो व्याचष्टे—तत्रेति । पूर्वं कारणं कार्यात् । तद् यस्यास्ति विषयतया परामर्शज्ञानस्यानुमानस्य तत् पूर्ववदित्यर्थः । विकल्प्य आक्षिपति—यदि तावदिति । सर्वत्रानुमानप्रसङ्गादिति भावः । अतिप्रसङ्गभिया कल्पान्तरमातिष्ठते—अथ पुनरिति । दूषयति—एतदपीति । दूषणान्तरं समुच्चिनोति—कारणदर्शनाच्चेति । नासिद्धाश्रयो हेतुर्गमक इत भावः । परिहरति—नेति । द्वयमपि नाभ्युपेयत इत्यर्थः । किं तर्हि अभ्युपेयते इत्यत आह—कार्यं त्विति । एनं प्रकारमन्यत्राप्यतिदिशति—एवमिति । पृच्छति—कथमिति । उत्तरम्—द्वयोरिति । पूर्वशब्देन कारणाभिधायिना प्रतिसंबन्धितया कार्यमप्युपक्षिप्तम् । अतो द्वयोरप्युपक्षिप्तयोः कारणस्योपयोगादनुमानभावेनेति योजना । उदाहरणमाह—उदाहरणमिति । यद्यपि कारणमात्रं व्यभिचरति कार्योत्पादम्, तथापि यादृशं न व्यभिचरति तत्र निपुणेन प्रतिपत्त्रा भवितव्यम् । अन्यथा धूममात्रमपि वह्निसत्तां व्यभिचरतीति न धूमविशेषो गमको भवेत् । रसाद्रूपानुमाने तु वैनाशिकानामापादितं कारणात् कार्यानुमानम् अस्माभिः । अपि चान्त्यतन्तुसंयोगानन्तरं पटो जायते तत्रापि शक्यं कारणात् कार्यानुमानम् । यदा खल्वयमन्यत एवोद्बुद्धसंस्कारो व्याप्तिस्मृतिमान् अविचलेष्वितरेषु तन्तुषु अन्त्यतन्तावुत्पन्नायां क्रियायामिन्द्रियसन्निकर्षात् प्रथममेव परामृशति तथा चेयमिति, तदैव क्रियातो विभाग इत्येकः कालः । अथ यदा विभागात् पूर्वसंयोगविनाशः, तदा परामर्शात् तस्मादवश्यंभाविपटविशिष्टेयं क्रियेत्यनुमानोत्पाद इत्येकः कालः । अथान्त्यस्य तन्तोः तन्तुसंयोगः, अथ पटोत्पादः, तत्र रूपाद्युत्पादः, अथ प्रत्यक्षदर्शनम् इत्यनुमानोत्पादस्य परस्ताच्चतुर्थे क्षणे प्रत्यक्षम् । 144/tha यदि तु क्रियोत्पादानन्तरमालोचनमिष्यते, तथापि तृतीये क्षणे प्रत्यक्षस्य उत्पाद इति नानवसरमनुमानम् । अपि च बधिरो मुरजमुखमभिहत्य स्वपाणिनाभिघातादेव शब्दकारणात् तत्कार्यं शब्दं निःशङ्कमनुमिमीते । एवमन्यान्यपि कारणात् कार्यानुमानान्यूहनीयानीति । § 293

शेषवदुदाहरणमाह—नद्या इति । चोदयति—कथं पुनरिति । परिहरति—नेति । अनुमीयतेऽनेनेति अनुमानं नदीपूरः, न तु वृष्टिरनुमीयमाना पूरविशेषात् नातीता शक्यानुमातुम् । अनुमानसमये तदत्ययस्याशक्यनिश्चयत्वात् । नापि वर्तमाना तदत्ययस्यापि तदानीं संभवात् । एवं भविष्यन्त्यपि साधकबाधकप्रमाणाभावेन सन्दिग्धैव । तस्मात् त्रैकाल्यस्याशक्यनिश्चयत्वात् अनुपपन्नमनुमानमित्यत आह— भविष्यतीति । कारणस्य हि कार्यात् पूर्वकालता शक्या निश्चेतुम् । कार्येण लिङ्गेन तु न अतीतत्वादिसन्देहः

---

१३ पि ] वह्निमत्तांnvt-C
१७ व्याप्तिस्मृतिमान् ] अविरले° अत्यन्तावनु°nvt-J
२५ त्य ] स्वकारणाभिघातादेव स्व°nvt-C
३३ लिङ्गेन ] तेनnvt-J

क्षतिमावहति । यः कश्चिदिति योग्याभिप्रायम् । स च कार्यस्य पुरस्तात् ततो निश्चयव्याप्त इत्युक्तम् । § 294

सामान्यतोदृष्टोदाहरणं भाष्यकारीयं दुरवबोधम्, शेषवदुदाहरणान्तर्गतं च । अत्रापि कार्येण सवितुर्देशान्तरप्राप्त्या तत्कारणस्य व्रज्याया अनुमानात् । न चैतावता अनुमानस्य त्रैविध्यं भवति, उदाहरणमात्रस्यानन्त्येनानन्त्यप्रसङ्गात् । तस्माद् भाष्यकारव्याख्यानमरोचयमानो वार्त्तिककृत् अन्यथा व्याख्यायोदाहरणान्तरमाह— सामान्यतोदृष्टं नामेति । साध्यधर्माविनाभाविना विशेषणेन साधनधर्मेण विशिष्यमाणो धर्मी गम्यते गमकत्वेन । हेतुविशिष्टो हि धर्मी गमकः, जिज्ञासितधर्मविशिष्टश्च गम्यः । यथाहुः,

स एव चोभयात्मायं गम्यो गमक इष्यते ।
असिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः ॥§ 297

इति । अविनाभावित्वं स्वभावप्रतिबद्धत्वं सर्वेषामेव हेतूनां सामान्यम्, ततोऽत्र धर्मधर्मिणोरभेदविवक्षया हेतुरेव सामान्यमुक्तः । सामान्येनाविनाभाविना हेतुना *अवच्छिन्नं दृष्टं धर्मिरूपमनुमानं सामान्यतो दृष्टमनुमानम् । तृतीयायास्तसिः । तदेतत् पूर्ववच्छेषवतोरपि प्रापकमपि तत्पदसन्निधानात् गोबलीवर्दन्यायेन ते परित्यज्यान्यत्रनिविशते । तदिदमुक्तम्—अकार्यकारणभूतेनेति । उदाहरणमाह—यथा बलाकयेति । § 298

भाष्यकारीयमुदाहरणमुपन्यस्याक्षिपति—अपरे पुनरिति । तदिति गतिमानिति परामृशति—उपलब्धिलक्षणप्राप्तत्वादिति । कर्मणो हि महत्त्वरूपविशेषैकार्थसमवाय उपलब्धिलक्षणप्राप्तिः प्रत्यक्षोपलब्धियोग्यता । समाधत्ते—नैवेदमिति । देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसंबन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्, मण्यादिवत्, तत्प्रत्ययविषयत्वादित्युच्यमाने पुरःस्थितेन स्थाणुना व्यभिचारः, सोऽपि हि प्रत्यभिज्ञाविषयो भवति तत्रैव स्थितः । तन्निवृत्त्यर्थं परिवृत्येत्युक्तम् । तथापि गुणादिभिर्व्यभिचारः । तन्निवृत्त्यर्थं द्रव्यत्वे सतीति विशेषणम् । तथापि प्रदीपादिभिराशुतरविनाशिभिर्व्यभिचारः, तन्निवृत्त्यर्थं क्षयवृद्धिप्रत्ययाविषयत्वे सतीति विशेषणम् । तथापि पृष्ठतोऽवस्थितया स्थूणया व्यभिचारः, तन्निवृत्त्यर्थं प्राङ्मुखोपलभ्यत्वे सतीति विशेषणम् । उपलभ्यता च उपलब्धिकर्मता । सा चेहातीता विवक्षिता, अन्यथा पूर्वापरजलधिवेलावगाहिना तुहिनशैलेन व्यभिचारः । यद्यप्ययमपि परिवृत्य तत्प्रत्ययवतोऽतिपतितोपलम्भकर्मभावः, तथापि तदा नरान्तरस्योपलभ्यः । मार्तण्डमण्डलं त्वस्ताचलचूडावलम्बि न प्राच्यां कस्यचिदुपलम्भगोचर इति

२ म्] इत्यर्थःnvt-C
१३ हेतूनां] सामान्यतोऽत्रnvt-C
१५ *] लक्षितम्nvt-C
२७ थापि] °दिभिर्व्यभि°nvt-C
३१ पि] परावृत्त्यnvt-C

वैषम्यम्, तथापि यदि द्रष्टैव पुरोऽवस्थितस्य पश्चिमाभिमुखस्य प्रासादस्य स्वयमुपनिपत्य पृष्ठतो भवति, तदोक्तलक्षणस्य हेतोरस्ति व्यभिचारः । तन्निवृत्त्यर्थम् अनुत्पन्नपादविहारस्येति विशेषणम् । तदभिमुखदेशसंबन्धादिति ल्यब्लोपे पञ्चमी । स्वाभिमुखदेशमुद्दिश्यानुत्पन्नः पादविहारो यस्य स तथोक्तः
146/tha । तमुद्दिश्य खल्वयं पद्भ्यां संचरमाणः प्रासादस्य पृष्ठतो भवतीति भावः । देशान्तरप्राप्तौ साधनान्तरमाह—देशान्तरेति । सत्यविनाश इति च द्रष्टव्यम् । ये त्विमामनुमानपरम्पराम् अमृष्यमाणा दिशः प्रत्यक्षतामिच्छन्ति, विप्रतिपन्नं चानुमानेन बोधयन्ति, *तन्मतमुपन्यस्यति—एके त्विति । दूषयति—तच्च नेति । अरूपमात्मसुखाद्यपि प्रत्यक्षमिति शङ्कमानेन बाह्यकरणेत्युक्तम् । पृच्छति—कथं तर्हीति । उत्तरम्—दिग्देशेति । अन्यथासिद्धतया अङ्गुल्या निर्देशस्य दिक्प्रत्यक्षत्वेन न स्वाभाविकः प्रतिबन्ध इत्यर्थः । § 299

स्यादेतत् । अप्रत्यक्षायां दिशि दिग्देशसंबन्धिष्वित्येतदेव कुत इत्यत आह—आदित्येनेति । तद्विभजते—प्राचीत्ययमिति । तत् पुनरिदं प्रत्यक्षम् आ चोदयात् आ चास्तमयाद् देशाद् देशान्तरं सञ्चरणं मार्तण्डमण्डलस्य अनाकलितद्रव्यत्वे सतीत्यादिदण्डकानुमानानामिन्द्रियव्यापारानन्तरमुपजायमानत्वात् । तत्र मा भूवन्नाकाशदिगादयः प्रत्यक्षाः, तथापि परितो विनिष्पतदतिविशदमयूखजालमध्यवर्तिनो हेलिमण्डलस्य त एव मयूखभागभेदाः प्रत्यक्षदेशा इति तेषां प्रत्यक्षाणां प्रत्यक्षेण सवितृमण्डलेन संयोगविभागाः प्रत्यक्षा भविष्यन्तीति युक्तम् । इदं त्वतिस्फुटतया नाभिधाय शिष्यव्युत्पादनायाक्षुण्णं मार्गान्तरं दर्शितमिति मन्तव्यम् । तदेवं रूपेण स्पर्शानुमानम्, शिंशपात्वेन श्रुतेन वृक्षत्वानुमानमित्यादि सामान्यतोदृष्टेन संगृहीतं वेदितव्यम् । § 300

स्वमतेन व्याख्यान्तरमाह—अथवा त्रिविधमिति । तद्विभजते—प्रसिद्धमिति । पक्षैकदेशे सदपि सिद्धम्, पक्षव्यापकं तु प्रकर्षेण सिद्धमित्यर्थः । यद्यप्यविनाभावः पञ्चसु चतुर्षु वा रूपेषु लिङ्गस्य समाप्यते इत्यविनाभावेनैव सर्वाणि लिङ्गरूपाणि संगृह्यन्ते, तथापीह प्रसिद्धसच्छब्दाभ्यां द्वयोः संग्रहे गोबलीवर्दन्यायेन तत् परित्यज्य विपक्षव्यतिरेकासत्प्रतिपक्षत्वाबाधितविषयत्वानि संगृह्णाति । अत्रापि यथासंभवं चतुर्णां पञ्चानां वा रूपाणां लिङ्गेषु संब-
147/tha न्धः । तदनेन प्रबन्धेनानुमान वादिनां स्वरूपसंख्याफलविप्रतिपत्तयो निराकृताः । तत्र तत्पूर्वकमिति स्वरूपविप्रतिपत्तिः । अनुमानमिति समाख्यानिर्वचनसामर्थ्यात् फलविप्रतिपत्तिः । त्रिविधमिति न्यूनाधिकसंख्याव्यवच्छेदेन संख्याविप्रतिपत्तिर्निराकृता । संप्रत्यान्तर्गणिकभेदानन्त्येनानन्त्याद् अनुमानस्याशक्यलक्षणत्वमिति यदि कश्चिदनुमन्येत, तन्निराकरणाय त्रैविध्यमनुमानस्य उच्यते इति त्रिविधपदस्य तात्पर्यान्तरमाह—अथ वेति । त्रिविधत्वेन

८ *] °न्यस्य दूषयतिnvt-C
१५ स्य] अनाकालित ? द्र.nvt-C
१८ भेदाः] देशान्तर इतिnvt-C
२८ रूपाणां] लिङ्गसंबन्धःnvt-C
३२ न्त्याद्] भेदानामान°nvt-C

यतो नियतमतः शक्यलक्षणमित्यर्थः । अनित्यः शब्दः कृतकत्वादिति सपक्षे सदेव । अनित्यः शब्दोऽस्मदादिप्रयत्नानान्तरीयकत्वादिति सपक्षे सदसत् । तदेतदन्वयव्यतिरेकि द्विविधम् । एवमन्वय्यपि द्वेधा । तत्र सपक्षे सदेव, यथा परमाण्वादयः कस्यचित् प्रत्यक्षाः प्रमेयत्वाद् घटादिवदिति, तथा सपक्षे सदसद् यथा तत्रैव साध्ये सत्त्वाद् घटादिवदिति । कालभेदः त्रैकाल्यम् । प्रतिपन्नोऽप्रतिपन्नः सन्दिग्धो विपर्यस्तश्चेति पुरुषभेदः । पूर्वं सिद्धवत् पूर्ववदित्यनूद्य तस्योदाहरणमुक्तम् । संप्रति प्रश्नपूर्वकं तदर्थाभासनिराकरणेन तात्त्विकमस्यार्थमाह—पूर्ववदित्युक्तमिति । *भाष्यव्याघात इत्यर्थः । पूर्ववदित्यस्य व्याख्यानं शेषवदित्यत्रापि योजयति । सामान्यतोदृष्टे च ज्ञानमतिदिशति—एवं शेषवदादिष्विति । अथ वा पूर्ववदिति भाष्यम्, तस्यार्थः, पूर्वेण तुल्यं वर्तते इति पूर्ववत् । क्रिया तुल्यतायां च वतिरिति क्रियातुल्यता दर्शिता । यत्रेति । पूर्वमन्यतरदर्शनेन सहान्यतरदर्शनं दृष्टान्तधर्मिणि, यथापूर्वं प्रत्यक्षभूतयोरिति प्रमाणमात्रोपलक्षणम् । एवं साध्यधर्मिणि *अन्यतरधर्मदर्शनेन साधनधर्मदर्शनेनान्यतरस्य साध्यधर्मस्यानुमानमनुमितिदर्शनमिति भवति क्रियातुल्यता । तदेतद्भाष्यमनुभाष्य व्याचष्टे—अथ वेति ।

§ 301

अत्र दिग्नागेन धूमादग्निरूपधर्मान्तरानुमानम् अग्निदेशयोः संबन्धानुमानं च दूषयित्वा अग्निविशिष्टदेशानुमानं समर्थितम् । तथा चाह—

केचिद् धर्मान्तरं मेयं लिङ्गस्याव्यभिचारतः ।
संबन्धं केचिदिच्छन्ति सिद्धत्वाद् धर्मधर्मिणोः ॥§ 304 148/tha

लिङ्गं धर्मे प्रसिद्धं चेत् किमन्यत् तेन मीयते ।
अथ धर्मिणि तस्यैव किमर्थं नानुमेयता ॥§ 306

संबन्धेऽपि द्वयं नास्ति षष्ठी श्रूयेत तद्वति ।
अवाच्योऽर्थगृहीतत्वान्न चासौ लिङ्गसंगतः ॥§ 308

न हि संबन्धधर्मतया लिङ्गं (Edtext outside numbered paragraph)प्रमीयते, अपि तु देशसंगतमित्यर्थः ।

लिङ्गस्याव्यभिचारस्तु धर्मेणान्यत्र दर्श्यते ।
तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति ॥§ 310

इति । तत्र दिग्नागदूषितान् कल्पान् अन्यांश्च विकल्पान् दिग्नागसमर्थितं च कल्पमुपन्यस्य दूषयति—अन्ये पुनरिति । धर्मधर्मिभावानुपपत्तेरिति

८ *] भाष्यव्याख्यानnvt-C
१३ *] अन्यतरदर्शनेनnvt-J
२४ अवाच्योऽर्थ] अनुगृहीत°nvt-C
२५ त्र] दृश्यतेnvt-C

। धर्मेण हि धर्मी प्रतिपत्तव्यः, अन्यथा अतिप्रसक्तेरिति भावः । देशस्य च स्वरूपेणेत्यर्थः । शङ्कते—अथापीदमिति । निराकरोति—तच्च नैवमिति । यः कश्चिद् वा देशोऽग्निमान् साध्यो, धूमवान् वा देशभेदः ? तत्र पूर्वस्मिन् कल्पे निराकरणमाह—अतद्धर्मत्वादिति । यः कश्चिदग्निमत्तया देशः साध्यते न तस्यावश्यं धूमो धर्म इत्यर्थः । न चैतत् साध्यं सिद्धत्वादित्याह—न चाग्नेरिति । द्वितीयं कल्पमाशङ्कते—अयमिति । निराकरोति—न, तस्येति । शङ्कां विभजते—देशेति । निराकरणं विभजते—न ह्ययमिति । न ह्ययमेवंवादी दिग्नागो धूमाधारं देशविशेषं पश्यति । न ह्यस्य मते पर्वतो नाम कश्चिदवयवी यदाधारो धूम उपलभ्येत, किं तु परमाणवः परमसूक्ष्मा अतीन्द्रियाः पर्वतः । एवं धूमोऽपि तादृश एव । यथा वक्ष्यति—सर्वाग्रहणमवयव्यसिद्धेः २।१।३४ इति । येषामपि देशभेदोऽवयवी दर्शनार्हः, तेषामपि वियद्वर्तिनीं धूमलेखामभ्रंलिहामुपलभ्यानुपलब्धदेशानां नानुमानसंभव इति भावः । शङ्कते—अविनाभावेनेति । तदेव विभजते—अथापीति । निराकरोति—तन्नेति । विकल्पयति—अग्निधूमयोरिति । कार्यकारणभावमालम्बते—अस्त्विति । दूषयति—तन्नेति । धूमेन हि वह्निरनुमीयते, न च कार्यसत्ता निमित्तकारणसत्तया व्याप्ता । न हि यदा यत्र वा पटः, तदा तत्र वा कुविन्दः । नाप्यसमवायिकारणसत्तया, न हि यदा यदा संयोगस्तदा कर्म । तस्मात् समवायिकारणाविनाभावः कार्यस्य वक्तव्यः । तत्रेदं दूषणम्—अतद्वृत्तित्वादिति । एकार्थसमवायमविनाभावं दूषयति—नैकेति एकार्थसमवाय इति हि द्वेधा, एकस्यार्थस्य समवायः, एकस्मिन् वार्थे समवाय इति । तत्र प्रथमं कल्पं दूषयति— ताभ्यामिति । यदि हि वह्निधूमाभ्यामेकोऽर्थः कश्चिदारभ्येत ततोऽसौ तयोः समवेयात्, न त्वेतदस्तीत्यर्थः । द्वितीयं कल्पं दूषयति—न च ताविति । तत् किमसंबद्धावेव वह्निधूमौ, तथा च प्रतीतिविरोध इत्यत आह—संबन्धमात्रमिति । संयोग इत्यर्थः । तदेव तर्ह्यवधार्यतामित्यत आह—तदपीति । पृच्छति—कथमिति । उत्तरम्—यदि तावदिति । कुरुते प्रयोगम् । अस्ति संबन्धोऽग्निधूमयोर्धूमादिति । दूषयति—तन्नाप्रतीतत्वात् । तदनेनानैकान्तकत्वं दर्शयति । संबन्धान्तरम् आशङ्कते—रूपस्पर्शवदिति । न हि बौद्धराद्धान्ते द्रव्यं नाम किंचिदस्ति यत्र रूपस्पर्शौ समवेतौ, किंत्वेकसामग्र्यधीनतया नियतसाहचर्यौ, तथा वह्निधूमावपि इत्यर्थः । दूषयति—नोभयोरिति । उभयसाहचर्यनिराकरणेन यत्र धूमस्तत्राग्निरित्यपि पराकृतम्, तस्यापि साहचर्यविशेषत्वादित्याह—यत्र धूम इति । गत्यन्तराभावादुपसंहरति—न चेति । शङ्कते—लोक इति । निराकरोति—नास्तीति । यत्र तावत् पर्वतनितम्बवर्तिनी धूमलेखा सन्ततमुद्गच्छन्ती दृश्यते, तत्रासौ देश एव तद्विशिष्टोऽनुमीयते इति लोकप्रसिद्धमेवेति किमत्र वक्तव्यम् । यत्र तु भूयिष्ठतया तस्य धूमस्य दूरत्वेन देशो न दृश्यते, धूम

४ देशः ] साध्यो nvt-C

एव त्वभ्रंलिहो लिम्पन्निवाभ्रमण्डलमवलोक्यते तत्र देशानुमानप्रयासालसतया दृश्यमानो धूमविशेष एवाग्निमत्तया साध्यते धूमत्वैकार्थसमवायिभिः तद्गतैः संतत्यूर्ध्वगमनादिभिरित्याह—धूमविशेषेणेति । विशिष्यतेऽनेनेति विशेषः संतत्यूद्ध्वगमनादिः । तेन धूममात्राद् वह्निव्यभिचारिणो वह्न्यविनाभावी धूमो विशेष्यत इत्यर्थः । शेषमतिरोहितार्थम् । § 311
150/tha

शेषवन्नाम परिशेषः । द्रव्यत्वकर्मत्वयोः शब्दे निराकार्यत्वेन उपयुक्तत्वात् ताभ्यामन्यद् गुणत्वं शेषः । स यस्यास्त्यनुमानस्य प्रतिपाद्यतया, तच्छेषवत् । तत्र न द्रव्यं शब्दः एक द्रव्यत्वात् । द्विविधमेव हि द्रव्यम्, अद्रव्यमनेकद्रव्यं च । अद्रव्यं परमाण्वादि, अनेकद्रव्यं च घटादि । शब्दस्त्वेकद्रव्यः । तस्मात् न द्रव्यं रूपादिवत् । न कर्म, शब्दान्तरहेतुत्वादिति । तदेतद् भाष्यमाक्षिपति—न कर्मेति । परिहरतिनेति । अन्यमस्यार्थं दर्शयति—समानजातीयारम्भकत्वादिति । यत् समानजातीयारम्भकं न तत् कर्म, यथा रूपादय इति । कार्यत्वात् तावत् शब्दः समवायिकारणवान् । तत्र च पृथिव्यादिनिषेधात् नभोऽस्य समवायिकारणम् । न चैष नभोव्यापकः सर्वत्र उपलम्भप्रसङ्गात् । तस्मादव्यापकः । *कर्णशष्कुल्युपसन्निहितं च नभः श्रोत्रम् । ताल्वादिसंयोगोपधानेन च नभःप्रदेशे शब्दः समवेतः । प्राप्यकारि च श्रोत्रम् । न च वक्तृवक्त्रावरुद्धं नभःप्रदेशं तत् प्राप्नोति । न चाद्रव्यं शब्दो गत्वा श्रोत्रेण संबध्यते । तस्माद् वीचीतरङ्गरीत्या स्वदेशानन्तरदेशे शब्दान्तरारम्भणपरम्परया श्रोत्रदेशोत्पन्नं शब्दं गृह्णातीति सिद्धं सजातीयारम्भकत्वादिति । इदं तु परिशेषस्य उदाहरणं नादरणीयम् । व्यतिरेकिणो हि नामान्तरमिदं परिशेष इति । एष पुनरन्वयव्यतिरेकी द्रव्यकर्मान्यत्वे सति सदाद्यभेदस्य सपक्षे रूपादौ सत्त्वाद्, विपक्षे सामान्यादावभावात् । तस्माद् आत्मतन्त्रतासाधनमिच्छादीनां परिशेषोदाहरणं द्रष्टव्यम् । तच्चानन्तरमेव वक्ष्यतीति । § 312

सामान्यतोदृष्टं नामेत्यादि भाष्यम् अनुभाष्याक्षिपति—सामान्यत इति । कथं तर्हि अनुमानमत्र प्रवर्तते इति । नित्यपरोक्षेण सह कस्यचित् लिङ्गस्य संबन्धादर्शनादित्यर्थः । व्याहतं चेति । स खल्वत्यन्तापरिदृष्टः स्वरूपतो वा साध्येत, दृष्टधर्मिविशेषणतया वा ? तत्र पूर्वस्मिन् कल्पे नानुपलब्ध इति व्याघातः । उत्तरस्मिन् सन्दिग्ध इति, विशेषस्मृत्यपेक्षो हि संशयो नात्यन्तानुपलब्धपूर्वधर्मवत्तया क्वचिद् भवितुमर्हति । न खलु सप्तमरसवत्तया केचिद् द्रव्ये संशेरत इति भावः । समाधत्ते—न विशेषणभूतस्येति न तावत् 151/tha
स्वरूपेणानुमीयते येन नानुपलब्ध इति व्याहन्येत, किं तु दृष्टस्य धर्मिणो विशेषणतया । न चैवं सर्वानुमानाविशेषः । साध्यधर्मिण्यस्यास्मदादिभिः

१ भ्रंलिहो ] लिम्पन्नभोमण्डल° nvt-J
१५ * ] °ल्योपहितंnvt-J
२२ क्षे ] °दावसत्त्वात्nvt-J
२९ यो ] लब्धधर्मवत्तायांnvt-C
३१ व्ये ] संदिहतेnvt-J

कदाचिदपि प्रत्यक्षेणानुपलम्भात् । तज्जातीयेन तु दृष्टान्तधर्मिणि दृष्टेन प्रत्यक्षतो वा मानान्तराद् वा साधनधर्मस्य स्वाभाविकप्रतिबन्धग्रहसंभवादित्यर्थः । उदाहरणमाह—यथेच्छादिभिरात्मा । तदेव विभजते— इच्छादयः खलु धर्मिणो भवन्ति मानसप्रत्यक्षदृष्टाः, तेषाम् आत्मा विशेषणम् कुतः ? गुणभूतोऽवच्छेदकतया यतः, तस्मादात्मविशिष्टा इच्छादयः साध्या इत्युक्तं भवति । साधनधर्मं तद्वर्तिनं दर्शयति—इच्छादीनां गुणत्वमिति । ननूक्तमनुपलब्धचरेण साध्यधर्मेण न संदेहविषयत्वम्, अनुपलब्धचरश्चात्मेति कथं तद्विशिष्टा इच्छादयो न्यायविषया इति शङ्कामुरीकृत्य प्रयोगं सूचयति—परतन्त्रा इति । मा तत्र सैत्सीदात्मपारतन्त्र्यम्, पारतन्त्र्यमात्रं तु सिद्धमित्यर्थः । तेन सामान्यतोदृष्टस्य पारतन्त्र्यमात्रविषयता, न पारतन्त्र्यमिच्छादीनाम् अनुमेयात्मवादिनां कदाचिदप्यस्मदादिप्रत्यक्षगोचरः परस्य तदाश्रयस्य नित्यपरोक्षत्वादिति । तदेवं सामान्यतोदृष्टमुदाहृत्य परिशेषोदाहरणं पारमार्थिकं प्रश्नपूर्वकमादर्शयति—पारतन्त्र्येति । इच्छादीनां हि बाधकैरपनीते द्रव्याष्टकगुणत्वे गुणत्वमेव व्यतिरेकी हेतुरात्मपारतन्त्र्ये प्रमाणम् । यद्यपि चायं स्वरूपेणात्मा न प्रसिद्धः, तथापि द्रव्याष्टकव्यतिरेकादिशब्दैरदूरविप्रकर्षेण परामृष्टः, शक्नोति विशेष्टुं धर्मिणि च न्यायप्रवृत्त्यङ्गं संशयमापादयितुमिति निरवद्यम् । § 313

अत्र भाष्यं विभागवचनादेव त्रिविधमिति सिद्ध इति । तस्यार्थः, त्रिविधमिति विभागवचनादेव त्रिविधे पूर्ववदादौ सिद्धे किमर्थं पूर्ववदाद्युपादानं सूत्रेणेति । तत्र समाधानं त्रिविधवचनं त्रिविधस्य पूर्ववदादेर्वचनमुक्तिः । महतः त्रिविधस्य महाविषयस्य अतीतानागतवर्तमानविषयस्य लघीयसा सूत्रेण तत्पूर्वकमित्येतावतैवोपदेशे परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्य-
152/tha लाघवेऽनादरः * सूत्रकारस्येति शिष्यान् व्युत्पादयिषोः । अत्रैव निदर्शनम् तथा चायम् । अस्य समाचारः—इत्थं भूतेन वाक्यविकल्पेन वैचित्र्येण प्रवृत्त इति योजना । § 314

एवं तावत् लक्षणभेदादनुमानं भिन्नं प्रत्यक्षाद् दर्शितम् । भाष्यकारस्तु विषयभेदादपि भेदमाह—सद्विषयं च प्रत्यक्षं सदसद्विषयं चानुमानम् । चो विषयभेदं समुच्चिनोति । सदिति वर्तमानम् । असदित्यतीतानागते । प्रत्यक्षं हि लौकिकं वर्तमानविषयमेव । अनुमानं तु त्रैकाल्यविषयम् । यद्यपि प्रत्यक्षमप्यतीतानागतयोः संप्रति निषेध्ययोर्निषेधे प्रवर्तमानमसद्विषयं तथापि न प्रतिषेध्ययोः प्रवर्तते इत्येतावता सद्विषयमुक्तम् । अनुमानं तु तयोरपि प्रवर्तते इत्येतावता असद्विषयमुक्तम् । तदेतदाक्षिपति—सद्विषयं चेति । न ह्यनुपलब्धसामान्ये इति सामान्यत उपलब्धो विशेषतश्चानिर्णीतो धर्मो न्यायप्रवृत्तावधिक्रियते । न त्वनुपलब्धसामान्य इत्यर्थः । न चासतः

९ म] तत्रात्माnvt-C
२३ *] एव*Om*nvt-C
२३ अत्रैव] °न्तरसद्भावेnvt-C

स्वतन्त्रस्य सामान्येन दर्शनमस्तीति । द्वितीयं कल्पमाशङ्कते—अथेति । एत- दूषयितुं धर्मत्रैविध्यमाह—धर्मा इति । तद्विभजते— तत्रेति । पृच्छति—कथं पुनरिति । यदि हि स्वतन्त्रः समवायः, न तर्हि कस्यचिद् विशेषणम् । तथा च न विशेषणतया गृह्येतेति भावः । उत्तरम्—समवायान्तराभावात् । न विशेषणत्वं स्वातन्त्र्येण निराकुर्मः, किं तु वृत्तिमस्येत्यर्थः । कस्मात् पुनरस्य न समवायान्तरमभ्युपेयत इत्यत आह—अथेति । पृच्छति—किमिदमिति । अनवस्थाप्रसङ्गो हि नाम तर्कः । नैष प्रमाणमन्तेरण निर्णयाय पर्याप्त इत्यर्थः । उत्तरम्—न संदेहः, किं त्वस्त्येव न्यायः । तमाह—पञ्चेति । अयं पञ्चपदार्थवृत्तिशब्दो बहुव्रीहिणा परमाणौ वर्तते, षष्ठीसमासेन तु सम- वाये । न च कथञ्चित् शब्दाभेदमात्रमनुमानाङ्गम्, मा भूद् गोशब्दसाम्येन वागादीनामपि विषाणित्वमित्यपरितोषात् न्यायान्तरमाह— अनाश्रितः सम- वाय इति । इह बुद्धिनिमित्तत्वं कारणत्वम् । संयोगेनानैकान्तो मा भूदित्यत उक्तम्—व्यापकत्वे सतीति । *सत्युपलब्धिकारणान्तरसमवधाने सर्वत्रोप- लभ्यता व्यापकत्वम् । तच्चेह प्रत्ययकारणे आत्मनि च समवाये चावि 153/tha लक्षणमिति । न्यायेतिकर्तव्यताभूतं तर्कं पृच्छति—यदि पुनरिति । उत्तर- म्— कार्यमिति । उक्तमनवस्थाप्रसङ्गमवतारयितुमनाधारत्वप्रसङ्ग उक्तः ।

§ 315

स्यादेतत् । भवतु वृत्तेः प्रागनाश्रितं कार्यं पश्चात् समवैष्यति, तुरीसं- युक्तेभ्य इव तन्तुभ्य उत्पद्य पटः पश्चात् तुर्या इत्यत आह—समवायश्चेति । अनवस्थाप्रसङ्गः पूर्वोक्त इत्यर्थः । शङ्कते—प्राप्तित्वादिति । *प्रमाणवत्त्वात् प्राप्तसमवायस्य वृत्तिर्न शक्या अनवस्थाभिया परित्यक्तुमित्यर्थः । विम- र्शपूर्वकं शङ्कां निराकरोति— किमियमिति । संयोगे प्राप्तित्वस्य निवृत्त्या स्वाभाविकः संबन्धः कार्यत्वस्योपाधेः तत्प्रयोजकस्य विद्यमानत्वादित्यर्थः । अथ प्राप्तिधर्मोऽपि कस्मात् न भवतीत्यत आह—यदि पुनरियमिति । न न्वियमनवस्था कस्माद् बीजाङ्कुरादिष्विवेहापि नाभ्युपेयते इत्यत आह—न चैनामनवस्थामिति । अनिदंप्रथमेष्वनादित्वात् शक्या प्रतिपादयितुमनवस्था प्रमाणेन, न त्विदंप्रथमेष्वादिमत्त्वेन तस्याशक्यनिश्चयत्वात् । तदिदमुक्तम्—प्र- माणाभावादिति । शास्त्रविरोधश्च समवायान्तराभ्युपगम इत्याह—समवाय- श्चेति । तत्त्वमेकत्वं समवायस्य भावेन सत्त्वया व्याख्यातमिति शास्त्रमाह, तदनकेत्वमुपपादयता बाध्येतेत्यर्थः । चोदयति—संबन्धिनिवृत्ताविति । तथा च विनश्यति, विनष्टे च तस्मिन् यो दृश्यते स ततोऽन्य उत्पन्न इति सिद्धं समवायस्य नानात्वमित्यर्थः । परिहरति—न नास्तीति । ख्यातिरुपलब्धिः । कस्मात् ? अकृतकत्वात् । अकृतकत्वमेव कुत इत्यत आह—अकृत- क इति । कार्यं स्वोपादानेनाकृतकसंबन्धवद् आधारवत्त्वादिति व्यतिरेकी

१ स्य ] सामान्यदर्शनम्nvt-C
१३ *] °न्तरसद्भावेnvt-C
१४ नि ] प्रत्ययकारणत्वमात्मनिnvt-C
१५ ताभूतं ] °कर्त्तव्यतां तर्कम्nvt-C
२० *] प्रमाणसत्त्वात् प्राप्तसम°nvt-C
३२ र्थः ] °मिति ।nvt-C

हेतुः । व्यतिरेकाव्यभिचारमाह—यद्ययमिति । उत्पद्यमानः खल्वयं स-
मवायः सह कार्येण न कार्यस्य । न हि सहोत्पन्नौ रूपस्पर्शौ मिथः
संबध्येते । एकार्थसमवायस्तु तयोः । सोऽपि समवाये नास्ति । सन्नप्यसौ
न कार्यमाधारवत् करोति । तस्मात् सहोत्पादे कार्यमनाधारं स्यादिति
। शङ्कते—अथेति । कार्यात् पूर्वमुत्पन्नः समवायः पश्चादुत्पद्यमानं कार्य-
154/tha मुपादानाधारकं करिष्यति कार्यहेतुबलादित्यर्थः । निराकरोति—तथापीति
। त्रिभ्यो हि कारणेभ्यः कार्यं भावरूपं जायते । कार्यकारणसमवायस्य च
कार्यकारणे समवायिकारणे वक्तव्ये, कार्यात् प्राग् जातस्य च समवाय-
स्य न कार्यं कारणम् । न च निमित्तकारणमात्रादस्य जन्मेति सांप्रतम्,
भावोत्पादस्य सर्वत्र कारणत्रयपूर्वकत्वनियमात् । तस्मात् समवायस्य स-
मवाय्यसमवायिकारणाभावात् न कार्यात् प्राग् उत्पाद इति सुष्ठूक्तम्—
तथापि कस्येति वाच्यमिति । शङ्कते—अथेति । दूषयति—कार्येति । न
च पटतुरीसंयोगवत् समवायस्य पश्चात् कार्यकारणसमवाय इति युक्तम्
। संयोगजस्य संयोगस्य कारणत्रयसंभवाद् अस्य तु समवायान्तरमन्तरेण
कारणत्रयायोगात् । *अन्यथानवस्थाप्रसङ्गादिति भावः । उपसंहरति—त-
स्मादिति । ततश्च न ज्ञायते किमभिप्रेत्यासद्विषयमित्युक्तमित्याक्षेप इति
। समाधत्ते—तत्र प्रतिषिध्यमानेति । अतीतानागते संप्रति प्रतिषिध्यमाने
तद्विषयमनुमानम् असद्विषयमुक्तम् । तन्निषेधस्तु भवतु प्रत्यक्षगोचरः, त-
थापि सिद्धो विषयभेद इत्यर्थः । अत्र चैष धर्मत्रैविध्यक्रमो द्वेधा तावत्,
विधीयमानः प्रतिषिध्यमानश्च । *विधीयमानोऽपि द्वेधा, परतन्त्रः स्वतन्त्रश्चेति
। स्वतन्त्रस्य च धर्मत्वं विशेषणत्वमात्रविवक्षया द्रष्टव्यम् । ननु विधीय-
मानोऽप्यसन् प्रत्यक्षश्च क्वचित् । यथा व्याप्रियमाणे कुलाले जायमानो
घटः । विस्फारिताक्षो हि तदा घटो भवतीति प्रत्येति । न चासौ त-
दा सन्, सतो भवनं प्रत्यकर्तृकत्वात्, गमनवदिति शङ्कते—भवतीति ।
निराकरोति—न, जायमानेति । जायमानस्यार्थस्य विधिविषयस्य सत्त-
यासत्तया वानभ्युपगमात् । निषेधविषयतया तु तस्यासत्त्वमभ्युपेयत एवेति
। कस्तर्हि भवतिशब्दस्यार्थ इत्यत आह—भवतीति । घटो जायत इति
तु लौकिकः प्रयोगो घटशब्दं घटार्थेषु तावदवयवेषूपचर्य तेषां च सिद्धतया
कर्तृत्वादुपपादनीय इति । उपसंहरति—एवं तावदिति । § 316

स्वलक्षणं समाधाय परेषामनुमानलक्षणं दूषयितुमुपन्यस्यति—अपरे
त्विति, तस्यार्थमाह—अस्यार्थ इति । दूषयति—अत्रेति । यथासंभवं समासं
155/tha विकल्प्य दूषयति—नान्तरीयकार्थ इति चेति । सत्त्वं विधिविषयज्ञानग-
म्यत्वम्, न तु सामान्यम् । *सत्त्वादिभिरनित्यत्वानान्तरीयकैस्तन्नान्तरीयक-
कृतकत्वधर्मैरनित्यत्वानुमानं स्यात्, न च शक्यम्, तेषामाकाशादिषु नित्येषु

१५ *] तथा चान॰nvt-J
२० *] ॰मानश्चnvt-C
३३ म्] विधिविषयप्रमाणविषयत्वं nvt-J
३३ *] ॰रनित्यत्वनान्तरीयककृत॰ nvt-C

व्यभिचारादित्यर्थः । तथाप्यसमर्थः समास इति । पूर्वमर्थातिरेकमात्रं दूषणमुक्तम् । संप्रति त्वर्थातिरेकेण हेतुना विशेषणसमासानुपपत्तिरित्यपौनरुक्त्यम् । विशेषणं विशेष्येण बहुलम् पा. २. १. ५७ इत्यत्र विशेषणपदोपादानमात्रेण वा विशेष्यपदोपादानमात्रेण वा अन्यतरस्यार्थात् प्राप्तेरुभयपदोपादानस्यैतत् प्रयोजनम्—यत्रोभयोः प्रत्येकं व्यभिचारः समुदाये त्वव्यभिचारः, तत्र समासो यथा स्यादिति । स चात्र नास्तीति समासानुपपत्तिरित्यर्थः । सामर्थ्यं प्रयोजनाभिसंबन्धः । चोदयति—एकपदेति । परिहरति—अत्रापीति । प्रधानं व्यक्तिर्विशेष्यत्वात् । अङ्गं जातिर्विशेषणत्वात् । पृथिवीत्युक्ते भवति संशयः, किं पृथिवीत्वं सामान्यमस्य विवक्षितं यथा पशुना यजेतेति किं वा तद्विशेष्यं द्रव्यम्, ग्रहं संमार्ष्टीति । अत्रेदमुपतिष्ठते—द्रव्यमिति । तद्धि पृथिवीत्वात् सामान्यविशेषात् पृथिवीं व्यवच्छिनत्ति । एवं द्रव्यमित्यप्युक्ते द्रव्यत्वं वा सामान्यं व्यक्तिर्वेति विमर्शे पृथिवीत्येतदुपतिष्ठते । न द्रव्यत्वं सामान्यं किं तु पृथिवी । न च द्रव्यत्वपृथिवीत्वयोः सामानाधिकरण्यमस्ति । न हि भवति पृथिवीत्वं द्रव्यत्वमिति । तस्मात् सामानाधिकरण्यसंभवात् प्रधानैकव्यक्तिलाभः । इह त्वर्थो नान्तरीयकत्वं व्यभिचरति । नान्तरीयकत्वं तु नार्थम् । न ह्यस्ति संभवो नान्तरीयकश्च स्यात् न चार्थ इति, नान्तरीयकशब्दवाच्यस्यानभिधेयत्वासंभवात् । वस्तुवचनत्वेऽप्यर्थशब्दस्य लक्ष्यासंभवाद् अविषयं लक्षणम् । न हि *दिग्नागस्य मते किञ्चिदस्ति वस्तु यन्नान्तरीयकं सद्धेतुर्भवति । यथाह— § 317

सर्वोऽयमनुमानानुमेयभावो बुद्ध्यारूढेन धर्मधर्मिभावेन न बहिः सदसत्त्वमपेक्षते इति । § 318

156/tha

अव्यापकं च, न हि वस्त्वेव नान्तरीयकमसतोऽपि नान्तरीयकत्वादिति भावः । दूषणान्तरमाह—तद्विद इति चेति । नान्तरीयकदर्शनमित्युच्यमाने शब्दसामर्थ्यादेव लभ्यते नान्तरीयकत्वविशिष्टार्थदर्शनमिति, सति संभवे शब्दार्थपरित्यागाभावात् । *अतस्त्रिरूपलिङ्गदर्शनस्य सिद्धेः किमपरमवशिष्यते *यदवरोधाय तद्विद इत्युपादीयत इत्यर्थः । एतदेव व्यतिरेकमुखेन निरूपयति—न हीति । एतल्लक्षणदूषणं लक्षणान्तरेऽप्यतिदिशति—एतेनेति । पृच्छति—क इति । न ह्यस्मिन् लक्षणे तद्विद इत्यस्ति, येन तदतिरिच्यते इति भावः । उत्तरम्—यथेति । तेषामुदाहरणं दूषयति—उदाहरणमिति । तदनेन दिग्नागस्य लक्षणं दूषयित्वा अन्येषां लक्षणं दूषितम् । § 319

संप्रति दिग्नागस्य स्वकीयलक्षणप्रपञ्चार्थं वाक्यम् अनुमेयेऽथ तत्तुल्य इत्याद्युपन्यस्य दूषयति—अपरे त्विति । अनन्तरलक्षणकारमपेक्ष्यापर इत्युक्तम् । चोदयति—अनुमेय इति । न हि योऽनुमेये संश्चासंश्च स शक्यः सन्निति वक्तुमित्यर्थः । समाधत्ते—नाप्रसङ्ग इति । यद्येवं स्याद् यो

१८ *] परेषां मते nvt-C
२५ *] त्रिविधलिङ्गदर्शनसि°nvt-C
२६ *] यदवबोधायnvt-C

विपक्षे द्वेधा स विपक्षावृत्तिरिति हेतुरेव स्यात् न सव्यभिचार इत्यर्थः । पुनश्चोदयति—न कर्त्तव्य इति । कुतः ? अवधारणात् निवृत्तेः । अनुमेये सद्भाव एवेत्यवधारणेनानुमेये सद्भावस्य नियतत्वात्, कुतः पक्षैकदेशवृत्तेः प्रसङ्ग इति भावः । एतन्निराकर्तुं यथासंभवं विकल्पयति—अनुमेये इति । तत्र पूर्वकल्पस्य तात्पर्यं विकल्पयति—किं पुनरनेनेति । असंभवः अत्यन्तासंभवो निराक्रियते, यथा नीलं सरोजं भवत्येव नात्यन्तं न भवतीति गम्यते । न तु नीलमेव सरोजं नानीलमिति, नापि सरोजमेव नीलं नान्यदिति । अथ संभव इति । अन्वयपरो न व्यतिरेकपर इत्यर्थः । एतद्विकल्पद्वयं दूषयति—उभयथा चेति । दूषणान्तरं चाह—न चैकदेश-
157/tha वृत्तिरिति । न ह्यत्यन्तायोग व्यवच्छेदेनायोगो व्यवच्छिन्नो भवति, नापि संभवमात्रविधानेनासंभवो व्यवच्छिन्नो भवति । ततश्चायोगाव्यवच्छेदादेकदेशवृत्तिरनुमानाभासो न व्यवच्छिन्न इत्यर्थः । § 320

स्यादेतत् । विशेष्यसंगतोऽयमेवकारोऽनुमेय एव संभवति । यथा पार्थ एव धनुर्धर इति । न चायमन्योगव्यवच्छेदो विनैवकारं लभ्यते । तस्मात् न व्यर्थमवधारणमित्यत आह—उत्तरपदबाधा च । न ह्यस्ति संभवोऽनुमेय एवास्ति *तत्तुल्ये चेति । तस्मात् तत्तुल्य इत्यस्य बाधा । चकारो नैकदेशवृत्तिर्निराकृत इति दूषणं समुच्चिनोति । § 321

अनुमेय एव सद्भाव इति पक्षं यथासंभवं दूषयित्वा अनुमेये सद्भाव एवेति द्वितीयं पक्षं दूषयितुमुपन्यस्यति—अथोत्तरमिति । तस्य प्रयोजनं दर्शयति—तस्य व्याप्तिरर्थः । सद्भाव एवेति किल विशेषणसंगतमवधाऋअण-मयोगम् अव्याप्तिं व्यवच्छिन्दत् व्याप्तिं दर्शयति । तथा च व्याप्तिरस्यार्थ इत्यर्थः । दूषयति—तथाप्यनुमेयमवधारितं संभवस्य व्याप्त्या न धर्मः सद्भावः । हेतुमाह—यत एवकारकरणं ततोऽन्यत्रावधारणमिति । मा वधारि सद्भावोऽवधार्यतां चानुमेयम् । किमेतावतापीत्यत आह—संभवव्याप्त्या चेति । अनुमेयं खल्ववधारितं सद्धेतुसंभवं परित्यज्य नान्यत्र वर्तते, ततश्चानुमेयं हेतुसंभवव्याप्त्यावधारितं भवति, हेतुसंभवस्त्वनवधारितः सर्वत्रैव तत्तुल्ये च विपक्षे च प्रसृतः । स च कश्चित् तत्तुल्यविपक्षौ व्याप्नोति, कश्चित् तदेकदेशवृत्तिः । तदस्य हेतुसंभवस्य विपक्षेऽपि प्रसक्तस्य प्रतिषेधाय युक्तमसति नास्तीति । तत्तुल्ये तु प्रसक्तमप्रतिषिद्धमनुमतमेवेति तत्तुल्ये सद्भाव इति व्यर्थमित्यर्थः । § 322

स्यादेतत् । तुल्ये हेतुसद्भावसिद्धावपि तत्तुल्ये व्याप्त्या हेतोः सद्भावो भवत्वित्येतदर्थं तत्तुल्ये सद्भाव इति वचनमित्यत आह—तत्तुल्ये चेति । यदि पुनर्व्याप्तिर्विवक्ष्येत कृतकत्वे साध्ये प्रयत्नानन्तरीयकत्वं न हेतुः स्यात् । न ह्ययं सपक्षव्यापक इति भावः । देशयति—अथ तत्तुल्ये इति ।
158/tha दूषयितुं विकल्पयति—किं पुनरत्रेति । पूर्वस्य विरोधाद् बाधनम्, उत्तर-

३ स्य ] °मेयस्य सद्भावेnvt-J
७ ते ] गम्यतेOmnvt-C
१६ * ] न तुल्येnvt-C

स्य पौनरुक्त्यादिति । पूर्वपदेन सह विरोधे निदर्शनमाह—न हि भवतीति । अनुमेये सद्भाव इत्यनेनानुमेये वृत्तौ हेतोर्लब्धायां तत्तुल्य एव सद्भाव इति समुच्चीयमानावधारणं विपक्षमात्राद् वृत्तिं व्यवच्छिनत्ति, न त्वनुमेयात् । § 323

नरं च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयांबभूव इति यथेति चेद् अत आह—तथेहापीति । समुच्चीयमानावधारणे हि तत्तुल्येन यथान्योगव्यवच्छेदेनैवकारः संबध्यते तथानुमेयेनापि संबध्येत । तथा चानुमेयैकदेशनिवृत्तिरपि हेतुः स्यात् । न खलु नरं च नारायणमेवेति निपातो नारायणेन सहान्ययोगव्यच्छेदेन संबध्यते, नरेण चायोगव्यवच्छेदेनेति भावः । अथावधारणस्यावैचित्र्येण संबन्धमिच्छतानुमेये यथायोगव्यवच्छेदः, तथा तत्तुल्येऽयोगव्यवच्छेदेन संबन्ध उच्येतेति शङ्कते—अथ तत्तुल्य इति । निराकरोति—तत्तुल्य इति । एतदेव विस्फारयति—य इति । ते तव दर्शने इत्यर्थः । न च यस्यानुमेये सद्भाव एवेत्यनूद्य तस्य तत्तुल्य एव सत्त्वमिति विधातुं शक्यम् । न ह्यनूद्यमानं शक्यं विशेष्टुम्, तथा सति तद्विशेषणाय प्रयत्नान्तरास्थाने सति वाक्यभेदप्रसङ्गात् । यथा § 324

यस्योभयं हविरार्त्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत् । इत्यत्र हि यद्यपि स्वरूपेणार्तेरशक्यप्रतिपत्तित्वेन हविषा विशेषणं मृग्यते, तथापि न शक्यं हविरुभयत्वेन विशेष्टुं विना प्रयत्नान्तरादिति वाक्यभेदभिया प्रतीयमानमप्युभयत्वम् अविवक्षितम्, एवमत्राप्यनुमेय इत्यविवक्षितम् । अथ तद्विवक्षयैव वाक्यभेदमभ्युपेत्य पश्चाद् वाक्यैकवाक्यतया अभिमतार्थसिद्धिरास्थीयते । न च विरोधाद् वाक्ययोरेकवाक्यताविरहः । तत्तुल्य एवेत्यन्ययोगव्यवच्छेदस्य विपक्षमात्रविषयत्वेनाप्युपपत्तौ विरोधासिद्धेः । तस्मात् अन्यापोहार्थत्वात् पदानां विरोधो वक्तव्यः । तथा हि अनुमेये सद्भाव इत्यत्रानुमेय एव नाननुमेये, सद्भाव एव नासद्भाव इति पदार्थः । तथा च तत्तुल्यविपक्षयोर्हेत्वभावो दर्शितः । एवं तत्तुल्ये सद्भाव इत्यत्रापि तत्तुल्य एव नातत्तुल्ये 159/tha
। सद्भाव एव नासद्भाव इति पदार्थः । तथा चानुमेयेऽसद्भाव इत्युक्तं भवति न चानुमेयम् । तत्तुल्यपदार्थयोः परस्परपरिहारवतोः समुच्चयसंभवः । द्वयोरपि विपक्षव्यावृत्तिमात्रपरत्वात् परस्परसमुच्चयसद्भाव इति चेत्—न, वृक्षो गौरित्यनयोरपि हस्त्यादिनिवृत्तिमात्रपरत्वेनाभिन्नार्थयोः सामानाधिकरण्यप्रसङ्गात्, तस्माद् विरोधात् समुच्चीयमानावधारणं न युक्तमिति । न च समुच्चीयमानावधारणं दिग्नागो मेने, यदेवमूचे वैशेषिकलक्षणदूषणावसरे— § 325

यदि रूपमेव चाक्षुषं ततो न द्रव्यं चाक्षुषं स्यात् । तथा च महदनेकद्रव्यसमवायाद् रूपाच्चोपलब्धिः वै. सू. ८. १. ६ इति द्रव्यचाक्षुषत्वाभिधानं व्याहन्येतेति । § 326

---

१२ ति ] स्फोरयति—इति तेnvt-C

१८ विना ] यत्नादितिnvt-C

अत्र हि रूपवद्द्रव्यसहितं रूपमेव चाक्षुषं न गन्धरसादीति शक्यं समुच्चीयमानावधारणम् । तस्मात् समुच्चीयमानावधारणाभिधानं कीर्तेः स्वातन्त्र्येण । तच्चायुक्तमिति कृतं विस्तरेण ॥ § 327

असति नास्तितेति दूषयति—असतीति । कस्मात् ? यदसत् तत्तुच्छं स्वयमेव नास्ति, तन्न सदिति शक्यं व्यवहर्तुम् असदिति वा । भवतु, तथापि कस्मात् तस्मान्न हेतोः व्यावृत्तिर्भवतीत्यत आह—न ह्यसदिति । यथा चैतत् तथा अन्वयिहेतूपपादनावसरेऽस्माभिरुक्तम् । स्वरूपेण दूषयित्वा एतद्गतमवधारणं दूषयिष्यन्ननूद्य विकल्पयति—किमवधार्यत इति । प्रथमं कल्पं दूषयति—यदि तावदिति । तत्तुल्य एव सद्भाव इत्यनेन गम्यत इत्यर्थः । द्वितीयं कल्पं दूषयति—अथ पुनरिति । गौरयं विषाणीत्वादित्ययं हेतुर्विपक्ष एव नास्ति, पक्षसपक्षव्यापकत्वात् । न तु नास्त्येव, विपक्षैकदेशे महिषादौ वृत्तेः । अतो विपक्ष एव नास्ति इत्ययमपि हेतुः स्यादिति । तदेवमवयवार्थं दूषयित्वा समुदायार्थं दूषयितुमुपन्यस्यति—यदप्येकद्विपदपर्युदासेनेति । तत्रैकपदपर्युदासेन त्रयः पक्षाः, द्विपदपर्युदासेनापि त्रय इति षट्कम् । तत्पर्युदासेन सप्तिकापरिग्रहः । यथानुमेये सद्भाव इत्युच्यमाने यस्य तत्तुल्ये नास्तिता विपक्षे च वृत्तिः सोऽपि हेतुः स्यात् । यथा नित्यः शब्दः कृत-
160/tha कत्वादिति । तत्तुल्येऽस्तीत्युच्यमाने विपक्षवृत्तेरपक्षधर्मस्य च हेतुत्वं स्यात्, यथा नित्यः शब्दः चाक्षुषत्वात् सामान्यवदिति । नास्तिता सतीत्युच्यमाने योऽपक्षधर्मस्तत्तुल्ये च नास्ति स हेतुः स्यात् यथा नित्यः शब्दोऽसत्त्वात् । अनुमेये तत्तुल्ये चेत्युच्यमाने, अनित्यः शब्दः प्रमेयत्वादिति विपक्षवृत्तिर्हेतुः स्यात् । अनुमेयेऽस्त्यसति च नास्तीत्येतावत्युच्यमाने नित्यः शब्दो जातिमत्त्वे सति श्रावणत्वादित्ययं तत्तुल्यवृत्तिहीनोऽपि हेतुः स्यात् । तत्तुल्येऽस्ति, असति च नास्तीत्येतावत्युच्यमाने अनित्याः परमाणवः कृतकत्वादित्ययमपक्षधर्मोहेतुः स्यात् । तदेतत्सर्वं मा भूदिति समुदायोपादानप्रयोजनम् । तदेतद् दूषयति—एतदपीति । सपक्षव्याप्त्यव्याप्तिभ्यां द्विरूपयुक्तस्यान्वयिनो द्वित्वम् । § 328

संप्रति सांख्यीयमनुमानलक्षणं दूषयति—एतेनेति । संबन्धोऽविनाभावः साधनस्य साध्येन । तस्मात् प्रत्यक्षाद् दृढतरप्रमाणावधारितात् । तथापि यत्राविनाभूते लिङ्गे भवत एकस्मिन् धर्मिणि विरुद्धाव्यभिचारिणी, तयोरपि हेतुत्वं प्रसज्येतेत्यत उक्तम्—एकस्मादिति । शेषस्य अनुमेयस्य सिद्धिः । अनुपपन्नत्वमात्रसाम्येनोक्तमेतेन न प्रयुक्तमिति । अनुपपत्तिं पृच्छति—कथमिति । यथासंभवमनुपपत्तिमाह—न हीति । यदि प्रत्यक्षशब्दो ज्ञानवचनः ज्ञानं चैकत्वेन विशिष्यते, तदैतद् दूषणम् । अथ संबन्धविशेषणमेकस्मादिति,

१ हि ] पूर्ववद्nvt-C
७ म् ] पृ. १३९
१५ माने ] यस्य…त्युच्यमानेnvt-J, *fn. in*nvt-C
२१ च ] नास्तीत्युच्यमानेnvt-C
२२ यं ] तत्तुल्यहीनोnvt-C
३१ न ] न*Om*nvt-J

प्रत्यक्षशब्दश्च ज्ञेये न तु ज्ञाने तदेतदुपन्यस्य दूषयति—अथ संबन्धादिति । शङ्कते—अथेति । संबन्धस्य प्रत्यक्षतोक्ता पूर्वम्, न त्वनुमानकाल इत्यर्थः । दूषयति—तथाप्युपलब्धसंबन्धस्य पूर्वमनुमानकाले चानुपलब्धलिङ्गस्यानुमानं प्रसज्येतेति । स्यादेतत् । संबध्यते इति व्युत्पत्त्या संबन्धो लिङ्गम् । तेनाविनाभूताद्धेतोः प्रत्यक्षादेकस्माद् अनुमेयसिद्धिरिति । तथा च गृहीताविनाभावात् लिङ्गात् संप्रति प्रत्यक्षादित्युपपन्नमित्यत आह—न चान्या गतिरस्ति । अत्रापि व्याख्याने एकस्मादिति व्यर्थम् । तथा हि अन्वयव्यतिरेकमात्रसंपत्तिरविनाभाव इत्युच्यते, सर्वरूपसंपत्तिर्वा ? तत्र प्रथमे कल्पे मा भूद् विरुद्धाव्यभिचारी, बाधितविषयस्तु हेतुः स्यात् । द्वितीये तु कल्पे न सर्वरूपसंपन्नो हेतुर्विरुद्धाव्यभिचारी संभवतीत्येक- 161/tha स्मादित्यतिरिच्यते । तस्मात् सुष्ठूक्तम्—न चान्या गतिरस्तीति । अव्यापकत्वं लक्षणदोषमाह—रूपेण चेति । न तावदनयोः तादात्म्यम् भिन्नेन्द्रियग्राह्यत्वाद् भिन्नबुद्धिबोध्यत्वाच्च । न चातदात्मनोरनयोः संबन्धः कश्चिदुपलभ्यते । न च प्रतिक्षणपरिणामवादे कुण्डवदरादीनामपि कश्चिदस्ति संबन्ध इत्यपि द्रष्टव्यम् । शङ्कते—अथेति । निराकरोति—सोऽपीति । न हि सांख्यानां बौद्धानां वा राद्धान्तेऽस्ति संबन्धः समवायो नाम । नापि तदाश्रयो द्रव्यम् । अतः स्वदर्शनव्याघात इत्यर्थः । यद्युच्येत प्राधानिकत्वाद् रूपादीनां प्रधानमेकमाश्रयः, तथा च यत्र रूपं तत्र स्पर्श इत्यत आह—यत्र रूपमिति । कुतः ? न क्वचिदिति । न हि प्रधानमाधारः कार्याणाम् अपि तु प्रधानात्मकत्वमेषामिष्यते, तथा च यत्र तत्रेत्यनुपपत्तिः । न च तादात्म्यमित्यप्युक्तम् । न च भेदाभेदावेकत्र संभवतो विरोधादिति भावः । शङ्कते—परस्परेति । यथा ह्यासन्दिकाङ्गानि भिन्नान्यनौत्तराधर्यव्यवस्थितान्यपि परस्पराश्रयतया न पतन्ति, एवं रूपस्पर्शावपि परस्पराश्रयावित्यर्थः । निराकरोति—परस्पराधारभावेऽप्यन्यत्रासन्दिकाङ्गादौ, नासौ रूपस्पर्शयोः । कुतः ? न रूपं स्पर्शे न च स्पर्शो रूपे इति । *परस्परसंयोगभेदप्रतिबद्धगुरुत्वानि आसन्दिकाङ्गानि अपतन्ति स्थितानि परस्पराधारत्वेनापदिश्यन्ते । रूपस्पर्शादीनां तु स्थितिर्न परस्परहेतुका, अपि तु भोगापवर्गलक्षणपुरुषार्थहेतुकेति भावः । एतेन सांख्यानां सप्तविधः संबन्धः प्रत्युक्तः । शेषं सुबोधम् ॥ ५ ॥ § 329

## प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ॥ १ । १ । ६ ॥

§ 330

विभागसूत्रे अनुमानानन्तरमुपमानस्योद्देशाद् यथोद्देशं च लक्षणादनुमानलक्षणानन्तरमुपमानलक्षणमाह—अथोपमानमिति भाष्यम् । सूत्रं पठति—प्रसिद्ध साधर्म्यात् साध्यसाधनमुपमानम् । अत्रापि यत इत्य- 162/tha ध्याहार्यम् । सिद्धिः साधनम् । तदेतद् भाष्यकारेण व्याख्यातम् । प्र-

१० त्पे ] न*Om*nvt-J
२५ *] °संयोगप्रतिबध्य°nvt-C
२६ न्दिकाङ्गानि ] न पतन्त्यव°nvt-C

ज्ञातेन प्रसिद्धेन । गवा साधर्म्यात् सामान्याद् गवयस्य । साधर्म्यं च सामान्यमभिदधता न सामान्यातिरिक्तं सादृश्यं नाम पदार्थान्तरमस्तीत्युक्तं भवति । साधर्म्यं चाप्रसिद्धं न साध्यसाधनायालमिति साधर्म्यप्रसिद्धिरपि द्रष्टव्या । सा च यथा गौस्तथा गवय इत्याप्तवाक्यात् । तदिदमुक्तम्—यथा गौरिति । साध्यसाधनपदव्याख्यानम्—प्रज्ञापनीयस्य गवयशब्दवाच्यतया प्रत्यक्षदृश्यमानगोसादृश्यस्य गवयत्वसामान्यविशेषवतः पिण्डस्य प्रज्ञापनमुपमानम् । पिण्डस्य हि गवयशब्दवाच्यतां पुरुषोऽतिदेशवाक्यस्मरणसहकारिणः प्रत्यक्षाद् गवयगताद् गोसादृश्यात् प्रजानन् तेन प्रज्ञाप्यत इति प्रमाणस्य व्यापारः प्रज्ञापनमुक्तमिति । तत्र वार्त्तिककारः प्रथमं तावत् सूत्रतात्पर्यमाह—सूत्रार्थः पूर्ववत् । समानासमानजातीयव्यवच्छेद इत्यर्थः । साध्यसाधनमित्युच्यमाने प्रत्यक्षादिसाधनेषु सुखदुःखसाधनेषु प्रसङ्गः । अत उक्तं प्रसिद्धसाधर्म्यादिति । यद्यपि प्रसिद्धसाधर्म्यमुपमानमित्युच्यमाने प्रमाणविशेषाभिधाय्युपमानपदसामानाधिकरण्यात् करणत्वलाभः, तथापि तदाभासनिराकरणाय साध्यसाधनपदोपादानम् । तेनोपमानाभासमपाकृतं भवतीति । § 331

अवयवार्थं विभजते—प्रसिद्धेति । वार्त्तिककारेण बहुव्रीहिद्वयसंभवो दर्शितः, न तु तृतीयासमासो भाष्यकारीयो निरस्तः । भाष्यकारेण हि संज्ञितया *गवयप्रतिपत्तिः फलं साध्यसाधनपदवाच्यमुक्ता, आक्षिप्तप्रयोज्यव्यापारत्वात् । प्रयोजकव्यापारस्य प्रज्ञापनस्य पश्चात् निष्कृष्याभिधानं कृतम्—समाख्यासंबन्धप्रतिपत्तिरुपमानार्थ इति । एतदेव साध्यसाधनपदार्थतया वार्त्तिककारो व्याचष्टे—समाख्यासंबन्धप्रतिपत्तिरुपमानार्थः फलम् । साध्यशब्देन समाख्यासंबन्ध उच्यते । तस्य साधनं सिद्धिः प्रतिपत्तिरिति ।
163/tha ननु प्रतिपद्यतामयं गोसादृश्य युक्तं गवयम् । समाख्यासंबन्धप्रतिपत्तिस्तु कुतस्त्या ? न हि यो यत्सदृशं यं प्रतिपद्यते स तस्य समाख्यामप्यवगच्छतीत्याशयवान् पृच्छति—किमुक्तं भवति । उत्तरम्—आगमेति । आगमानुभवाहितात् संस्कारात् स्मृतिः । एतदुक्तं भवति, न केवलं सारूप्यज्ञानं समाख्यासंबन्धप्रतिपत्तिहेतुः, अपि त्वागमार्थस्मृत्यपेक्षमिति । नन्वसत्यागमानुभवे कुतः स्मृतिरित्यत आह—यदा ह्यनेनेति । प्रसिद्धसाधर्म्यादित्यत्र प्रसिद्धिरुभयी श्रुतमयी प्रत्यक्षमयी च । श्रुतमयी यथा गौरेवं गवय इति । प्रत्यक्षमयी च यथा गोसादृश्यविशिष्टोऽयमीदृशः पिण्ड इति । तत्र प्रत्यक्षमयी प्रसिद्धिरागमाहितस्मृत्यपेक्षा समाख्यासंबन्धप्रतिपत्तिहेतुः । यद्यपि यथा गौरेवं गवय इत्येतस्मादपि गोसादृश्यस्य गवयशब्दः समाख्येति शक्यमवगन्तुम् । न खलु प्रत्यक्ष एव संज्ञाकर्म, समानजातीयव्यवच्छिन्ने

२ सादृश्यं ] नामार्थाnvt-C
३ न ] साध्य*Om*nvt-J
११ नेषु ] °साधने सुख° साधने घटेnvt-C
१३ ण्यात् ] कारकत्वलाभःnvt-C
१८ * ] °प्रतिपत्तिंnvt-J
२२ ब्देन ] °पदेनnvt-C
२९ यी ] श्रुतिमयींnvt-C
३२ स्य ] गवयः समा°nvt-J

हि तद्भवति । तच्च यदि मानान्तरेणापि तथावगम्यते, कस्तत्र संज्ञाकर्म निवारयेत् ? गोसादृश्येन चोपलक्षितः पिण्डो य इति सर्वनाम्ना परामृष्टः शक्यो घटादिभ्योऽसमानजातिभ्यो महिषादिभ्यश्च समानजातीयेभ्यो व्यवच्छिन्नोऽवगन्तुं गवयः, तथापि यावदयमसौ गवय इति साक्षात् प्रतीते संबन्धिनि संज्ञां न निवेश्यति तावदयं परिप्लुतमतिः प्रमाता कच्चित् खलु द्रक्ष्यामि तादृशं पिण्डं यत्र गवयसंज्ञां प्रतिपत्स्य इति प्रमोत्सुक एवोदीक्षते । न चासौ वाक्यमात्रसहायोऽप्रत्यक्षीकृतगोसदृशगवयत्वजातिमत्पिण्डोऽसौ गवयाख्य इति प्रतिपत्तुमर्हति । न च वाक्यं विना प्रत्यक्षमात्रात् । तस्मादागमप्रत्यक्षाभ्यामन्यदेवेदम् आगमस्मृतिसहितं सादृश्यज्ञानमुपमानाख्यं प्रमाणमास्थेयम् । § 332

ननु यदोदीच्येन क्रमेलकं निन्दतोक्तम्, धिक् करभमतिदीर्घवक्रग्रीवं प्रलम्बोष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशमपसदं पशूनामिति, तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य नूनमसौ करभ इति प्रत्येति, तत् कतमदेतेषु प्रमाणम् ? न तावदुपमानं साधर्म्याभावात् । नापि पञ्चमं प्रमाणमुपगम्यते । यद्युच्येत निन्दापरं वाक्यं करभस्य तादृशत्वे न 164/tha प्रमाणम् । न ह्यन्यपरात् शब्दादन्यस्यावगम इति । यत्र तर्हि तादृक्त्वे पर्यवस्यति वाक्यं तत्र का गतिः ? अथ तत्रापि तादृक् करभ आगमावगतः प्रत्यक्षेण प्रत्यभिज्ञायते, करभशब्दवाच्यता तु तस्य तत्पूर्वं तादृक्करभपरत्वेऽप्यागमस्य प्रयोगमात्रादवगता अनुमानात् । यो हि यत्र प्रयुज्यते शब्दोऽसति वृत्त्यन्तरे स तस्य वाचकः यथा गोशब्दो गोत्वे । प्रयुक्तश्चायं तादृशि । तस्मात् तस्य वाचक इति । तदिदं प्रागेव प्रयोगानुमितं वाचकत्वमस्य प्रत्यक्षसमये केवलं स्मर्यते इति । समानमेतत् उपमानवाक्येऽपि । तत्रापि वाक्यादवगतः साधर्म्यवान् पिण्डः प्रत्यक्षेण प्रत्यभिज्ञायते । प्रयोगानुमितं च गवयपदस्य वाचकत्वं स्मर्यते इति न फलान्तरमवशिष्यते यत्रोपमानं प्रमाणमिति । § 333

अत्रोच्यते । न तावदाकाशादिशब्दवदेष गवयशब्दः साक्षात् पिण्डस्य वाचकः, किंतु गवयत्वं निमित्तीकृत्य पिण्डे वर्तते इति परमार्थः । न च यथा गौरेवं गवय इति वाक्याद् गवयत्वमवगतम्, न ह्यनवगतसंबन्धं गवयपदमेतदवबोधयति । ततस्तदवगमात् तु संबन्धवेदने परस्पराश्रयप्रसङ्गः । न च गोसादृश्येनोपलक्ष्यते गवयत्वम् । न खल्वनुपलब्धचरेण गवयत्वेन गोसादृश्यं संबद्धं दृष्टम् । न चादृष्टसंबन्धमुपलक्षकम् । न हि पुरुषेणादृष्टसंबन्धो दण्डः पुरुषमुपलक्षयितुमर्हति । तस्मात् संबन्धिनो गवयत्वस्य स-

१ त्र ] कस्तत्र*Om***nvt-C**
३ जातिभ्यो ] महिष्यादि°**nvt-J**
५ माता ] कश्चित्**nvt-C**
७ त्पिण्डोऽसौ ] गवयपिण्डमसौ **nvt-C**, गोसदृशे पिण्डेऽयमसौ**nvt-C***Var*
१३ भ ] इत्यवैति**nvt-C**
२२ त् ] अपवादवाक्ये**nvt-C**
२४ च ] गवयशब्दवाच्यत्वं**nvt-C**
२५ मिति ] प्रमाणान्तरम्**nvt-C**
२८ न्धं ] पदमवधारयति**nvt-C**
३२ स्मात् ] संज्ञिनो**nvt-J**

र्वथानुपलब्धेः कुतो वाक्याद् वा अनुमानाद् वा वाच्यवाचकसंबन्धावसायः ? कुतस्तरां च संबन्धस्मृतिः ? गवयत्वसामान्यविशेषवति तु पिण्डे प्रत्यक्षे युक्तः संबन्धावगमः, संबन्धिनो गवयत्वस्य प्रत्यक्षत्वात् *वाक्यार्थस्य च स्मर्यमाणत्वात् । तथापि किं गवयत्वजातिमान् पिण्डो वाच्यः, उत गोसादृश्यवानिति कुतो विनिगमनेति चेत् ? वाक्यार्थस्मरणसहकारि गवयत्वजातिमतः पिण्डस्य गोसादृश्यदर्शनमेव तर्कसहायं गवयत्वाभिधाने प्रमाणम् । तर्कश्च गोसादृश्यविशिष्टपिण्डाभिधाने कल्पनागौरवप्रसङ्गः । तथा हि सादृश्यविशिष्ट
165/tha पिण्डाभिधाने नाप्रतीतं सादृश्यं पिण्डं विशिनष्टीति तत्प्रतिपत्तव्यम् । न च शब्दादन्यतस्तदवगम इति शब्दस्य तत्र वाचकत्वं कल्पनीयम् । न चाविशिष्टं सादृश्यमपि पिण्डविशेषे गवयपदमवस्थापयितुमर्हति, यस्य कस्यचिद् येन केनचित् सह सादृश्यादिति तदपि गवा विशेषणीयम् । न चान्यतो गोत्वस्यापि प्रतिपत्तिरिति तदपि गवयपदेनाभिधातव्यमिति कल्पनागौरवम् । गवयत्वजातिमत्पिण्डाभिधाने तु लाघवमिति तदनुजानाति । साधर्म्यग्रहणं च धर्ममात्रोपलक्षणमिति करभसंज्ञाप्रतीतिफलमप्युपमानमेवेति नाव्याप्तिः । नापि पञ्चमप्रमाणाभ्युपगमः । अत एव बह्न्युदाहरणान्युक्त्वाप्याह स्म भगवान् भाष्यकारः, एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति । तस्मात् सर्वं चतुरस्रम् । § 334

तदीदृशमुपमानफलमविद्वान् सादृश्यविशिष्टवस्तुज्ञानं चोपमानफलमिति भ्रान्तो भदन्तो दिग्नाग आक्षिपति—प्रत्यक्षेति । पृच्छति—कथमिति । उत्तरम्—यदा ताविति । उपलक्षणं चैतत्, उभौ प्रत्यक्षेण पश्यतीति । यदा तु गवयमेकं प्रत्यक्षेण पश्यति, स्मरति च गाम्, तदापि गोसादृश्यं गवयस्थं प्रत्यक्षमेव । गोस्थमप्रत्यक्षम्, अप्रत्यक्षत्वाद् गोरिति चेत् ? हन्त भोः किमभिमतं सादृश्यमायुष्मतो यदप्रत्यक्षायां गवि न प्रत्यक्षम् ? सामान्यबाहुल्यं जात्यन्तरवर्ति जात्यन्तरस्य । यथाहुः,

> सामान्यान्येव भूयांसि गुणावयवकर्मणाम् ।
> भिन्नप्रधानसामान्यवृत्ति सादृश्यमुच्यते ॥ § 337

इति चेत् ? तत् किमिदानीं कर्णत्वादिसामान्यं गोगवयगतकर्णादिभेदेन भिन्नमित्यपि वक्तुमध्यवसितोऽसि ? तस्माद् यथा कालाक्ष्यां गवि गोत्वमीक्षितवतः स्वस्तिमत्यां प्रत्यभिज्ञायमानं तदेवेदमिति, एतदेव च तदित्यवगतं भवति, तथेहापीति न फलातिरेकः । तस्मात् न सादृश्यप्रतीतिफलमुपमानं प्रत्यक्षाद् वाक्याद् वा व्यतिरिच्यत इति सूक्तत् । भदन्तभ्रान्तिमुद्घटयति—गवेति । गवयसत्तां सादृश्यविशिष्टमित्यर्थः । अर्थतत्त्वमुक्तं स्मारयति—गवयेति । उपसंहरति—तस्मादिति । प्रयोगस्तु, प्रत्यक्षादिभ्यः प्रमाणान्तरमुपमानम्, तज्जन्यप्रमाविलक्षणप्रमाजनकत्वात् । यदि तु न तेभ्यो विलक्षणमभविष्यद्

१ सायः ] °अवगमःnvt-C
३ *] वाक्या° त्वात् *Om* nvt-C
५ वानिति ] च्यः न चादृष्टगो°nvt-C
२६ वृत्ति ] °न्यव्यक्तंnvt-C

न तद्विलक्षणां प्रमामकरिष्यत्, यथा तान्येव । न चैतत् तथा । तस्मात् तथेति ॥ ६ ॥ § 338

## आप्तोपदेशः शब्दः ॥ १ । १ । ७ ॥ § 339

अथ शब्द इति भाष्यम् । उपमानानन्तरं शब्दोद्देशात् उपमानलक्षणानन्तरं शब्दस्य लक्षणमित्यर्थः । लक्षणसूत्रं पठति—आप्तोपदेशः शब्दः । अत्र शब्द इति लक्ष्यपदम् । आप्तोपदेश इति लक्षणम् । उपदिश्यतेऽनेनेति उपदेशो वाक्यज्ञानं वा तदर्थज्ञानं वा अभिधीयते । तत्र वाक्यज्ञानप्रामाण्यपक्षे तदर्थज्ञानं फलम्, पदार्थस्मृत्यादयस्त्वान्तरालिका इतिकर्तव्यताः । तदर्थज्ञानप्रामाण्यपक्षे तु हानादिबुद्धिः फलम् । यद्यपि विधिरुपदेशः प्रवर्तनमित्यनर्थान्तरम्, यद्यपि चायं नियोज्यप्रयोजने प्रवृत्तिनिवृत्ती विदधदाज्ञाध्येषणाभ्यामतिरिच्यते, ते हि नियोक्तृप्रयोजने प्रवृत्तिनिवृत्ती विधत्तः, तथापि भूतार्थपरोपनिषदादिशब्दव्यापकत्वात् परप्रयोजनवद्वचनमात्रविवक्षयोपदेशपदं व्याख्येयम् । यद्यपि सदेव सोम्येदमग्र आसीद् इत्यादि वचनं क्वचित् न प्रवर्तयति, कुतश्चिद् वा न निवर्तयति पुरुषम्, तथापि पुरुषश्रेयोऽभिधत्ते इत्युपदेश इत्युच्यते । तथाप्यतिव्याप्तिः, चैत्यवन्दनादिवाक्यानामप्येवंलक्षणत्वात् । अत उक्तम्—आप्तेति । आप्तानां ऋष्यार्यम्लेच्छानामुपदेशः शब्दो न त्वनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनां प्रमाणविरुद्धक्षणिकसर्वधर्मनैरात्म्यवादिनामिति । तदेवाह वार्त्तिककारः—न शब्दमात्रमिति सूत्रार्थः ॥
§ 340

सूत्रस्थाप्तलक्षणपरं भाष्यम्—आप्तः खलु साक्षात्कृतधर्मा । सुदृढेन प्रमाणेनावधारिताः साक्षात्कृता धर्माः पदार्था हिताहितप्राप्तिपरिहारप्रयोजना येन स तथोक्तः । तथापि तत्त्वं विद्वान् अकारुणिकतया वा अलसतया वा अनुपदिशन्, मत्सरितया वा विपरीतमुपदिशन् नाप्तः स्यादित्यत 167/tha
आह—यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्तः । यथादृष्टस्येति मत्सरितया विपरीतोपदेशो निवारितः । चिख्यापयिषयेति अकृपास्त्वार्थकामत्वे निराकृते । प्रयुक्तः उत्पादितप्रयत्नः इत्यलसत्वम् । तथापि स्थानकरणपाटवाभावेन वर्णनिष्पादनासामर्थ्येनाप्तः प्रसज्येत, इत्यत आह—उपदेष्टा स्थानकरणपाटववानित्यर्थः । § 341

आप्त इति प्रकृतिप्रत्ययसमुदायात् प्रकृतिं निष्कृष्य तदर्थमाह—साक्षात्करणमिति । अनेन यथोक्तरूपसंपदुपलक्षिता । प्रत्ययार्थमाह—तयेति । आप्तलक्षणस्य व्यापकत्वमाह—ऋषीति । दर्शनाद् ऋषिः । करतलामलकफलवत् साक्षात्कृतत्रैकाल्यवर्त्तिप्रमेयमात्रः, आराद् यातः पातकेभ्य इत्यार्यो मध्यमो लोकः, म्लेच्छः प्रसिद्धः । म्लेच्छा अपि हि परिपथमवस्थिताः पान्थानामपहृतसर्वस्वानां मार्गाख्याने हेतुदर्शनशून्या भवन्त्याप्ताः । तदनेन,

---

२२ या] वा अलसतया...दृष्टस्येति मत्सरितया *in J only*.
२५ त्वे] अकृपाभ्यासकारिते nvt-C
३० अनेन] चोक्तस्वरूप° nvt-C
३२ त्] करतला...वत् *Om* nvt-C
३३ हि] प्रतिपथ° nvt-C

*आप्तिं दोषक्षयं विदुः ।§ 343

इति परेषामाप्तलक्षणमव्यापकमित्युक्तं भवति ॥ § 344

तदेतद् भाष्यम् आक्षेप्तुमनुभाषते—आप्तःखल्विति । आक्षिपति—स्वर्गेति । आक्षेप्ता भाष्यम् आक्षिप्य सूत्रं समाधत्ते—तस्मादिति । आप्तः प्राप्तो युक्त इति यावत् । अपौरुषेयो वैदिक उपदेशः स्वर्गापूर्वदेवतादिविषयः स्वतः प्रामाण्ये सिद्धे निर्दोषतया युक्त उपपन्नः । लौकिकश्चार्यम्लेच्छानां प्रमाणान्तरमूलो युक्तः । मानान्तराभावे त्वनाप्तोऽयुक्तः इत्यर्थः । समाधत्ते—न ब्रूम इति । पौरुषेयत्वं वेदानां द्वितीयाध्याय उपपादयिष्यते । तस्मात् पुरुषस्यैवाप्तस्योपदेशः आप्तोपदेश इति साधु व्याख्यानं भाष्यकारीयमिति भावः । § 345

पृच्छति—कः पुनरिति । अस्ति हि स्वर्गादीनामप्रत्यक्षत्वे न्यायः, योगिप्रत्यक्षं न स्वर्गादिविषयः प्रत्यक्षत्वात् अस्मदादिप्रत्यक्षवदिति भावः । उत्तर-
168/tha म्—ब्रूमो न्यायम् । तमाह—सामान्यविशेषवत्त्वात् कस्यचित् प्रत्यक्षा इति । अत्र यावति पक्षे यो हेतुः सिद्धः, तस्य तन्मात्रं पक्षीकार्यम् । योगजे च प्रत्यक्षे सिद्धे तत्साधकादेव प्रमाणात् तस्य स्वर्गादिविषयत्वमपि सिद्धमिति धर्मिग्राहकप्रमाणविरुद्धं मीमांसकानाम् अनुमानं नोदेतुमप्युत्सहते प्रागेव तद् बाधितुम् । असिद्धे तु योगजे प्रत्यक्ष आश्रयासिद्धो हेतुराभासः । अस्माकं तु सम्यञ्चो बहवश्च न्याया इति भावः । अनित्यत्वं हेतुमाक्षिपति—असिद्धमिति । परिहरति—नेति । नित्ये चापूर्व इति । अत्र त्रयः कल्पाः, किमेकमपूर्वं सर्वपुरुषसाधारणम् आहो असाधारणम् ? यदाप्यसाधारणं तदापि किं प्रतिपुरुषमेकैकमपूर्वम्,* आहो प्रतिपुरुषमनेकमिति ? तत्र प्रथमं कल्पं दूषयति—यदि साधारणतेति । न हि कदाचिदप्ययमपूर्वं पश्यति लौकिकः पुरुषः । योगिनस्त्वनभिव्यक्तमपि पश्यन्तीति भावः । द्वितीयं कल्पं दूषयति—एतेन प्रतिपुरुषमिति । उत्कर्ष आधिक्यमवयवोपचय इति यावत् । शङ्कते—व्यञ्जकेति । एकमपि व्यञ्जकभेदात् उत्कर्षनिष्कर्षवद् दृष्टम् । तद् यथा महति दर्पणतले महन्मुखम्, तदेव कनीनिकायाम् अण्विति भावः । *वक्ष्यमाणेनाभिप्रायेण निराकरोति—न ह्येकमिति । शङ्किता स्वाभिप्रायमुद्घाटयति—ननु चेति । स्वाभिप्रायेण निराकरोति—न दृष्ट इति ब्रूम इति । शङ्किता पृच्छति—किं पुनस्तत् यदि न दृष्टम् ? तत्र यदि भेदेन न दृष्टम्, दृष्टिर्नास्ति । किं पुनस्तत्, यद् भेदेन भेददर्शनमिति भासते ? समाधाता स्वाभिप्रायमाह—मिथ्याप्रत्यय इति । न भेददर्शनमपजानीमहे किं तु पारमार्थिकं भेदम् । न च कल्पितोऽपूर्वभेदः पारमार्थिकाय

१ *] आप्तंnvt-C
४ स्मादिति] तस्मादिति*Om*nvt-C
८ द्वितीयाध्याय] २. १. ६८
२१ *] असाधारणम्nvt-C
२७ *] वक्ष्यमाणेन...स्वाभिप्रायेण*in J* *alone.*
३० दि] भेदेन तद् दृष्टम्nvt-C
३० मिति] यद् भेददर्शनमिवnvt-C

कार्यायालमिति भावः । उत्कर्षापकर्षकर्तृत्वं वेति कर्मण इति शेषः । तृतीयं कल्पमातिष्ठते—प्रतिपुरुषमनेक इति । दूषयति—अनिवृत्त इति । अथोत्तरकालमिति । अश्वमेधक्रियया तावत् तदपूर्वं स्वकाल एवाभिव्यक्तं फलादानाभिमुखीकृतम्, अभिव्यञ्जकसमानकालत्वादभिव्यक्तेः, प्रदीपादिषु 169/tha दर्शनात् । तथापि फलं तावत् न दत्ते, यावत् क्रिया न निवर्तते । निवृत्तायां तु फलं दत्ते इत्यर्थः । दूषयति—असतीति । तत् खलु पूर्वं सदपि फलं नाकार्षीत् चरमभाविन्याः क्रियायाः तज्जन्याया वाभिव्यक्तेरनुत्पादात् । उत्पन्नायां तु क्रियायामभिव्यक्तौ वा कस्मात् न करोति ? न हि क्रियाया विनाशस्य कश्चिदुपयोगः । तस्मादकामेनापि त्वया असत्या एव क्रियाया व्यञ्जकत्वमनुग्राहकत्वं चाङ्गीकर्तव्यम् । तच्चैतदुभयमपि चित्रमित्यर्थः । अपि च सासती चेत् क्रियाभिव्यनक्ति, तथा सति असत्तायाः सर्वत्र सुलभत्वात् न किञ्चिदपूर्वं नाभिव्यक्तमिति, क्रियाविलोपः प्रयत्नविलोप इत्यर्थः । § 346

अत्र शब्दं प्रमाणान्तरमसहमानो दिग्नागः तल्लक्षणं विकल्प्याक्षिपति—आप्तोपदेश इति । अन्यस्मादन्यस्य निश्चयो न तावदसंबन्धादतिप्रसङ्गात् । न च शब्दोऽर्थात्मा, नाप्यर्थकार्यः । विनाप्यर्थं पुरुषविवक्षामात्रादेव तदुत्पादात् । तस्मात् न साक्षात् शब्दादर्थनिश्चयः, विवक्षाकार्यतया तु विवक्षां गमयेत् । सा चार्थाभिप्रायपूर्वा । अभिप्रायश्च कश्चिन्मनोमात्रयोनिः, अपरस्तु प्रमाणमूलः । तत्र यः प्रमाणनिश्चितमर्थं विवक्षति, यथाविवक्षं चोच्चारयति स आप्तः । तस्य वचनात् कार्यात् कारणं विवक्षा अनुमीयते । तस्याश्च कारणमर्थज्ञानम् । ततश्चार्थज्ञानस्यार्थकार्यत्वादिति प्रमाणगतिः । तत्राप्तोपदेश इत्यत्रोपदेशक्रियया उपदेष्टार उपस्थापिताः । ते च प्रायेण विसंवादका दृष्टा इत्याप्तग्रहणेन तेषामविसंवादित्वम् । ततश्च उपदेशादर्थविनिश्चयो भवत्वित्येतदर्थं यद्युच्येत इत्याह—यद्याप्तानामिति । उपदेष्टॄणामित्यर्थः । इमं कल्पं दूषयति—तदनुमानात् । अविसंवादित्वमुपदेष्टुरानुमानिकम्, तादृशस्य वचनमर्थविनिश्चये अनुमानमेव । तथा हि यद् यन्निर्दोषसत्त्वीयं वचनं तत्सर्वमर्थवत् यथा बुद्धस्य क्षणिकनैरात्म्यादिविषय उपदेशः, तथा चायं विवादाध्यासित उपदेश इति । यथोक्तं भदन्तेन 170/tha

आप्तवाक्याविसंवादसामान्यादनुमानता ।§ 348

इति । द्वितीयं कल्पमातिष्ठते—अथार्थस्य तथाभावः । अत्र हि उपदिश्यत इत्युपदेश इति व्युत्पत्त्या अर्थ उच्यते । आप्तः प्राप्त उपदेशो यस्मात् स तथोक्तः । एतदुक्तं भवति यस्मात् शब्दादवगम्यार्थं प्रवर्तमानः प्राप्नोति तमेवार्थं स आप्तोपदेशः शब्दः प्रमाणम् । एवं च यथा शब्देन योऽर्थो दर्शितः, तस्यास्या तथाता दर्शिता भवति । तदिदमुक्तम् अथार्थस्य तथाभाव

६ लु ] अपूर्वंnvt-J
९ स्य ] क्वचित्nvt-C
९ त्या ] सत्याnvt-C
३० स्मात् ] इत्युपदेशोऽर्थ उच्यते इति आप्त्युपदेशो यस्मात्nvt-C

इति । दूषयति—सोऽपीति । तदेव स्फुटयति— यदा हीति । आप्त्या हि तथात्वं विनिश्चिन्वन् अर्थस्य नाप्रतिपन्नतया निश्चेतुमर्हति । प्रतिपत्तिश्च प्रायेण प्रत्यक्षेणेति प्रत्यक्षत इत्युक्तम् । तमिममाक्षेपमपाकरोति— तन्नेति । नाप्तत्वसहायः शब्दोऽर्थं बोधयतीति सूत्रार्थः । नापि शब्दार्थप्राप्त्या शब्दार्थतथात्वमिति । कस्तर्हि इत्यत आह—अपि त्विति । इन्द्रियसंबद्धासंबद्धेष्विति दृष्टादृष्टेष्वित्यर्थः । यथोक्तं स द्विविधो दृष्टादृष्टभेदादिति, एतदुक्तं भवति नाप्तत्वहेतुकमविसंवादित्वमनेन सूत्रेणागमार्थतया प्रतिपाद्यते । नाप्यर्थतथात्वम् आगमार्थतया प्रतिपाद्यते । नाप्यागमः प्रत्यक्षानुमानाभ्यां न भिद्यते । किं तु उपदेशः शब्द इत्युक्तम् । उपदेश इति च कारकपदम्, उपदिश्यते ज्ञाप्यते प्रयोजनवानर्थोऽनेनेति । तथापि वातिकाद्युपदेशोऽपि शब्दः स्यादित्यत उक्तम्— आप्तेति । तेनोपदेशपदादेवागमस्य वाक्यार्थप्रतिपत्तिः फलमुक्ता । तदिदमुक्तम्—या शब्दोल्लेखेन पदार्थस्मरणावान्तरव्यापारात् शब्दादेवार्थं प्रत्येमीत्यनेनोल्लेखेन *प्रतिपत्तिः सागमस्यार्थः फलमिति । आप्तत्वं च न वाक्यार्थं प्रत्याययति अपि त्वागमस्याव्यभिचारिताम् । न च यतः प्रामाण्यमवगम्यते ततः प्रमेयमपि । तथा च सति प्रामाण्यज्ञानहेतोरनुमानादेव प्रत्यक्षादिप्रमेयावगतिरिति प्रत्यक्षादीनामप्रामाण्यप्रसङ्गः । *तथा सति कस्यानुमानमपि प्रामाण्यमवधारयेत् । न चाप्तवाक्यं कार्यं सद्वक्तृज्ञानानुमानद्वारेणार्थेऽप्यनुमानमेव, न त्वर्थस्य प्रत्यायकमिति सांप्रतम् । यदि हि नार्थं प्रत्याययेत् ज्ञानमात्रमनुमापयेत्, तथा च नार्थविशेषसिद्धिः । न च ज्ञानस्यार्थादन्योऽस्ति कश्चिद् विशेषः । तस्मात् वक्तृज्ञानविशेषणाय पूर्वं शब्दादेव केवलाद् वाक्यार्थज्ञानमेषितव्यम् । एवं च कृतं वक्तृज्ञानानुमानेनार्थप्रतिपत्त्यर्थेन केवलं प्रामाण्यज्ञानाय तदुपयोग इति । न चाविनाभाव एव संबन्धो येन शब्दार्थयोरसंबन्धेन गम्यगमकत्वं न स्यात् । अस्ति हि सांकेतिकः संबन्धोऽनयोरिति वक्ष्यते न चाविनाभाव एव प्रत्यायनाङ्गम् । चक्षुरादयो नीलादिभेदव्यभिचारिणोऽपि दृष्टाः तत्प्रतिपादका इत्युक्तम् । तस्मात् पदानि कृतसंकेतानि स्वार्थान् स्मारयन्ति । आकांक्षायोग्यतासत्तिसध्रीचीनानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न संगतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानाद् भवन्ति । यथा चैतत् तथोद्देशे लेशत उक्तम् । उपपादितं च तत्त्वबिन्दौ । तस्मात् सर्वमवदातम् ॥ ७ ॥
§ 349

स द्विविधो दृष्टादृष्टार्थत्वात् ॥ १ । १ । ८ ॥ § 350

स द्विविधो दृष्टादृष्टार्थत्वात् इति सूत्रस्य तात्पर्यमाह—नियमार्थम् । तद्विभजते—अनेकधेति । दृष्टादृष्टार्थत्वादिति भाष्यमतेन व्याचष्टे—प्रत्यक्षेति

---

१३ *] प्रतिपत्तिरागमार्थःnvt-C
१४ भिचारिताम्] चागमस्यार्थं प्रत्याययित्वा स्वस्याव्यभिचारित्वम्nvt-C
१६ *] तस्मिंश्चासतिnvt-C
१७ कार्यं] स्ववक्तुर्ज्ञा°nvt-C
२४ ते] २.१.५२

। आप्तप्रणीतत्वलिङ्गानुमितप्रामाण्यशब्दैकविषयता स्वर्गयागादिसंबन्धादीनामनुमानविषयता । यथाह भाष्यकारः यस्यामुत्र प्रतीयते सोऽदृष्टार्थ इति । अदृष्टा र्थोऽपि प्रमाणमर्थस्यानुमानादिति । तेन दृष्टोऽर्थो यस्यागमस्य स तथा । एवमितरोऽपीति । तदेवं भाष्यमतेन व्याख्याय स्वमतेन व्याचष्टे—वक्तृभेदेनेति । दृष्टोऽर्थो येन स दृष्टार्थः प्रवक्ता, एवमदृष्टोऽर्थोऽनुमितो येन स तथा । तत्र दृष्टार्था ऋषयोऽस्मदादयश्च । अनुमितार्था अस्मदादय एवेति । एवमपि शब्दद्वैविध्यसाधने मा भूदपक्षधर्मतेति प्रवक्तृपदेन पूरयति—दृष्टादृष्टार्थप्रवक्तृकत्वादिति । अदृष्टार्थः प्रवक्ता यस्यागमस्य स तथोक्तः । अस्यार्थमाह न विग्रहं करोति प्रत्यक्षत इति । शेषं * सुबोधम् । स 172/tha
न मन्येत दृष्टानां वाक्यानां प्रामाण्यम् । स इति । विप्रकृष्टो नास्तिकः परामृष्यत इति भाष्ययोजनिका । परिशिष्टं तु परीक्षापर्वणि निवेदयिष्यते ॥ ८ ॥ § 351

॥ इति प्रमाणलक्षणप्रकरणम् ॥

## १.१.३ प्रमेयलक्षणप्रकरणम्

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ १ । १ । ९ ॥ § 353

इह प्रमेयं हेयोपादेयभावेनावस्थितं मुमुक्षुणा प्रतिपित्सितम् । तच्च परीक्षितस्वप्रमाणविशेषाधीनप्रतिपत्ति । लक्षणं चास्य प्रमाणविशेषः । न चावान्तरप्रमाणसामान्यप्रत्यक्षादिलक्षणमन्तरेणात्मादिप्रमाणावतारः कर्तुं शक्यः, तस्य प्रत्यक्षादिसामान्यविशेषत्वात् । अतः प्रत्यक्षादिलक्षणानन्तरं तदवतारः । अपरीक्षितं च न तत्त्वनिर्णयाय पर्याप्तमिति परीक्षा विधायिष्यते । तत्परिकरश्च संशयादय इति युक्तं तेषां पश्चाल्लक्षणम् । तदिह प्रमेयलक्षणाय तद्विभागोद्देशसूत्रमवतारयितुं भाष्यकारः पृच्छति स्म—किं पुनरनेन प्रमाणेनेति । जात्यभिप्रायमेकवचनम्, प्रकृते प्रमेये यथायथं प्रमाणानामुपयोगात् । तदेतद् भाष्यम् अनूद्य वार्त्तिककार आक्षिपति—किं पुनरिति । प्रमेयनान्तरीयकत्वं प्रमाणानां सामर्थ्यम् । समाधत्ते—नेति । प्रत्यक्षादिलक्षणसामर्थ्यात् प्रमेयमात्रं सिद्धम्, विशिष्टं तु प्रमेयमद्यापि न सिध्यतीति तदर्थं प्रश्नः । स च विशेषो यथावदिति न दर्शित इति । अयमेव च सूत्रार्थ इति । येषां तत्त्वातत्त्वज्ञानाभ्यामपवर्गसंसारौ भवतः, त एतावन्त एव न न्यूना नाधिका इत्यर्थः । प्रथमसूत्रव्यवस्थानमतिदिशति—अत्रापीति । उक्तमर्थमनाकलयन्नाक्षिपति—उभयेति । दिगादीनामिति । द्रव्येषु दिक्काल-

१ ता] २.१.५२
९ *] विषयस्वर्गयागादिnvt-C
७ ते] न्या. द. ३-४ अध्यायौ
१४ न] न$Om$nvt-J
१५ न्त] त एतेnvt-C

परमाणूनामनभिधानात् । वृक्षस्तिष्ठतीति । इतिशब्द आद्यर्थे । तेन वृक्षं
173/tha पश्यति, वृक्षेण चन्द्रमसं पश्यतीत्या दयो वेदितव्याः । समाधत्ते—न सूत्रार्थापरिज्ञानादिति । न प्रमेयपदं प्रमेयमात्रे प्रवर्तते, किं तु यत् तत्त्वतो ज्ञायमानमपवर्गसाधनं तस्मिन्, तच्चात्माद्येव नान्यदिति युक्तोऽन्ययोगव्यवच्छेद इत्यर्थः । अयेगव्यवच्छेदेऽपि न दोष इत्याह—प्रमेयमेवेति । नन्वस्मिन् पक्षे न कदाचिदपि प्रमाणता स्यादित्यस्ति दोष इत्यत आह—किमुक्तं भवतीति । नास्य पुरुषमात्रं प्रति प्रमेयत्वं विधीयते, अपि तु मोक्षमाणशिष्यं प्रति विधीयते । अनूद्यत इति प्रमाणान्तरमूलकत्वेन विधानस्य दार्ढ्यं दर्शयति । उपसंहरति—तस्मादिति । कौशलमात्रमात्मनः ख्यापयितुमभ्युपेत्य समाधानान्तरमाह—उपेत्येति । प्रवृत्तिसंस्कारकत्वमस्ति दिक्कालयोः,

> प्राङ्मुखोऽन्नानि भुञ्जीत ।
> प्राचीनप्रवणे वैश्वदेवेन यजेत ।
> पौर्णमास्यां पौर्णमास्या यजेत ।
> अमावास्यायाममावास्यया यजेत ।[§ 358]

इत्येवमादिश्रवणात् । कौशलमात्रमिदं न तु समाधानमित्याह—न पुनरिदमिति । विहितविधानादिति । प्रमाणविधानसामर्थ्येन विहितमित्यर्थः । न केवलं प्रमाणविधानाक्षिप्तम्, अपि त्वाद्यसूत्रगतप्रमेयपदादपि लब्धमित्याह—आद्येन चेति । *एतस्मिंश्चार्थे सूत्रकारस्य अनुमतिमाह—एन चार्थमिति । भाष्यम् सर्वस्य सुखदुःखसाधनस्य द्रष्टा, सर्वस्य सुखदुःखस्य भोक्ता, यतः सुखदुःखसाधनं सर्वम्, सर्वं च सुखदुःखं जानाति, अतः सर्वज्ञः । न चाप्राप्तान्येतानि जानातीत्यत आह—सर्वानुभावी । अनुभवः प्राप्तिः । तदेतद् वैराग्योत्पादायोक्तम्, एवमुत्तरत्रापि बोद्धव्यम् । आत्मन्ययं विशेषो यदनेन रूपेण हेयः, कैवल्येन चोपादेयः । शरीरादीनि तु हेयान्येव । अपवर्गस्तूपादेय एवेति । अविद्यमानं पूर्वं शरीरं यस्य तदपूर्वं शरीरम् । तन्निषेधति—नास्येदमिति । प्रमेयतत्त्वमविदुष आत्मन अविद्यमानमुत्तरं शरीरं यस्य तद् अनुत्तरम् । तदपि निषिद्धं चेन, नेत्यनुकर्षणात् । ननु यथा पूर्वेषां शरीराणाम् अनादिता एवमुत्तरेषामप्यनन्तता, तथा च मोक्षमाणानां प्रवृत्तयश्च तदर्थानि शास्त्राणि चानर्थकानि प्रसज्येरन्नित्यत आह—उत्तरेषामिति । प्रमेयतत्त्वावगमादित्यर्थः । ननु सुखेऽप्युपदेष्टव्ये दुःखमात्रोद्देशः किं सुखं प्रत्याचष्टे ? तथा चानुभवविरोध इत्यत आह—नेदमिति । तदेतद् भाष्यं वार्त्तिककार आक्षेपसमाधानाभ्यां व्याचष्टे—सुखं पुनरिति । न चान्यत आत्मादिपदात्, उपलब्धिः, अस्मादेव आत्मादिभ्यो भेदेन प्रत्यात्ममुपलभ्यमानत्वादेव । निर्विद्यते इत्यस्य व्याख्यानम्—अन-

२ वृक्षं ] पश्यnvt-J
१८ *] स्मिन्नर्थेnvt-C
२३ त्येन ] केवलेनnvt-C
२६ निषिद्धं ] चेत्यनुकर्षणात्nvt-C
२७ अनादिता ] इत्येवम्nvt-C

भिरतिसंज्ञेति उपेक्षाबुद्धिः । निर्विण्णस्य वैराग्यम् इत्यस्य व्याख्यानम्—तां चोपासीनस्य तथैव विरोधिगुणेन तृष्णा विच्छिद्यते । सुखानभिधानेन दुःखपक्षनिःक्षेपं सूचयति । तथा च सुखेऽस्य वैराग्यं भवतीति तात्पर्यार्थः ॥ ९ ॥ § 359

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥ १ । १ । १० ॥ § 360

अपवर्गस्याप्यात्मार्थत्वेन प्रमेयेष्वात्मनः प्राधान्यात् प्रथममात्मलक्षणसूत्रम् इच्छेत्यादि । तदवतारार्थं भाष्यम्—तत्रात्मेति । अहमिति ज्ञानं गौराद्याकारं शरीरावभासं न शक्यं घटादिज्ञानवद् द्रागात्मनि प्रमाणयितुमित्यभिप्रायः, परदेहवर्त्यात्माभिप्रायं वा । *तदत्र वार्त्तिककारः सूत्रतात्पर्यमाह—समानेति । समानजातीयं शरीरादि, असमानजातीयं प्रमाणसंशयादि । सत्येवास्मिन् प्रयोजने प्रयोजनमन्वाचिनोति—आगमस्येति । ततश्चाप्तोक्तत्वानुमानसिद्धमपि प्रामाण्यं शब्दस्य अनेन तदर्थसंवादकेनानुमानेन दृढतरं भवतीत्यर्थः । प्रयोजनान्तरं चान्वाचिनोति—प्रमाणसंप्लवस्येति । द्वावपि वाशब्दौ चार्थेऽन्वाचये द्रष्टव्यौ । तदनेन वार्त्तिकेन अनुमानाच्च प्रतिपत्तव्य इति भाष्यं व्याख्यातम् । इच्छाया आत्मलिङ्गत्वकथनपरं भाष्यं यज्जातीयस्येति, यज्जातीयस्येति व्याप्तिस्मृतिकथनम् । तज्जातीयं पश्यन्निति पक्षधर्मोपनयः 175/tha
। तस्मादयं सुखहेतुरित्यनुमायादातुमिच्छति । सेयमीदृशीच्छा व्याप्तिग्रहणतत्स्मरणपक्षधर्मताग्रहणानुमानेच्छादीनामेककर्तृत्वं सूचयति, भेदे प्रतिसन्धानाभावेन तदनुपपत्तेः । तदिदमुक्तम् एकस्येति । यश्चासावेकोऽनुभविता च स्मर्ता चानुमाता चैषिता च स आत्मा । न च शरीरमेवं भवितुमर्हति, *तस्यापि बाल्यकौमारयौवनवार्द्धकभेदेनान्यत्वात् । नेन्द्रियम् इन्द्रियान्तरगृहीत इन्द्रियान्तरेणाप्रतिसन्धानप्रसङ्गात् यमहमस्प्राक्षं तं पश्यामीति । नापि मनः, मनसः करणत्वेनैवानुमानात् । वक्ष्यति ह्येतत् सर्वं

ज्ञातुर्ज्ञानसाधनोपपत्तेः ।§ 362

३।१।१७ इत्यत्र सूत्रे । § 363

स्यादेतत् । असत्यपि आत्मनि ज्ञातरि सत्यपि च बुद्ध्यादीनां भेदे, तत्सन्तानाभेदेन प्रतिसन्धानव्यवस्थोपपत्स्यत इत्यत आह—नियतविषये इति । नियतविषय इति बुद्धिभेदस्य प्रतिसन्धानमपाकरोति । मात्रग्रहणेन च संतानं संतानिव्यतिरिक्तमपाकरोति । तदभ्युपगमे वा स एवात्मेति सिद्धं नः समीहितम् । तदेतद् भाष्यम् अनुभाष्य वार्त्तिककारस्तात्पर्यमस्याह—यज्जातीयस्येति । तत्र विचारमारभते—तत्रेति । पूर्वपक्षमाह—कथमिच्छादीति

७ त्वेन ] अपि*Om*nvt-C
९ भासं ] °भासनं नnvt-C
१० * ] तत्रnvt-C
२१ * ] अपि*Om*nvt-C
२३ ज्ञात् ] °मद्राक्षं तं पश्यामीतिnvt-C
२७ नि ] ज्ञातरि*Om*nvt-J

। परिहरति—स्मृत्येति । नन्वेकविषयाणां स्मृत्यादीनां नानाकर्तृकत्वे को विरोध इत्यत आह—न हीति । नानाविषयत्व उदाहरणमाह—*न हि भवति यद्रूपमिति । नानानिमित्तत्व उदाहरणमाह—नापि भवतीति । यद् यस्मात् निमित्तात् त्वगिन्द्रियात् स्पर्शमहमस्प्राक्षं तत् तस्मात् निमित्तात् चक्षुषो रूपं पश्यामीति । नानाकर्तृकत्व उदाहरणमाह—न हि भवति देवदत्त इति । तदेतत् किल प्रतिसन्धानं कर्तृभेदाद् देवदत्तयज्ञदत्तादेर्व्यतिरेकबलेनैककर्तृकत्वं साधयतीत्युक्तम् । § 364

तदेतदनुपपन्नम्, भिन्नकर्तृकत्वाद् व्यतिरेकस्योपाधिसंभवेन स्वाभाविकप्रतिबन्धविज्ञानवैकल्यात् । अस्ति हि देवदत्तयज्ञदत्तविज्ञानानां भिन्नकर्तृकत्वम
176/tha कार्यकारणभावश्च । तत्र किमकार्यकारणभावात् प्रतिसन्धानस्य व्यतिरेक उत भिन्नकर्तृकत्वादिति सन्दिग्धव्यतिरेकत्वादसाधनाङ्गं प्रतिसन्धानमित्याशयवांश्चोदयति—कार्यकारणभावादिति । तदिदमुक्तम्—तदिदंप्रतिसन्धानमन्यथा भवदिति । गूढाभिप्रायः परिहरति—*न नानात्वस्येति । चोदक आह—अकार्येति । गूढाभिप्राय एव परिहारवाद्याह—तदयुक्तमिति । अनैकान्तिकत्वं सन्दिग्धव्यतिरेकिता । चोदक आह—तुल्यं भवतोऽपीति । सिद्धान्ती गूढाभिप्राय एवाह— अभ्युपगमादिति । चोदक आह—नासाधनादिति । असिद्धार्थता अन्यथासिद्धार्थता हेतोः हेतुवचनस्येत्यर्थः । संप्रति समाधाता स्वाभिप्रायमाविष्करोति—न, हेत्वर्थापरिज्ञानात् । *तदेव विभजते—न भवतेति । कः पुनरसौ हेतुविशेष इत्यत आह—विशेषितं चैतत्प्रतिसंधानम् । तत् कथयति—स्मृत्या सह पूर्वापरप्रत्यययोरेकविषयत्वेन प्रतिसंधानम् यज्जातीयं चन्दनवनितादि सुखहेतुं प्रतीतं स्मरामि तज्जातीयमिमं प्रत्येमीति प्रतिसन्धानम् । तदनेन शालिबीजाङ्कुरस्य परम्परया शालिबीजान्तरजननलक्षणात् प्रतिसंधानात् कार्यकारणभावनियमाद् व्यवच्छिनत्ति । § 365

नन्वियं पूर्वापरप्रत्ययसंहिता स्मृतिरपि कार्यकारणभावादेवोपपत्स्यते, कृतमेकेन कर्त्रेत्यत आह—सा च स्मृतिर्भवत्पक्षेऽनुपपन्ना । पृच्छति—कस्मात् ? उत्तरम्—अन्येन निमित्तेन अनुभूतस्य अन्येन निमित्तेन अस्मरणात् । न हि भवति येनैव चक्षुषा घटमद्राक्षम्, तेनैव त्वगिन्द्रियेण तं स्पृशामीति । निमित्तभेदे प्रतिसंधानाभावमुक्त्वा विषयभेदेऽप्याह—न ह्यन्येन स्वभावेन घटत्वादिनानुभूतस्यान्येन वृक्षत्वादिना स्मरणम् । न हि भवति यमहं घटमद्राक्षं सोऽयं वृक्ष इति । कर्तृभेदे प्रतिसंधानाभावमाह—न ह्यन्येन देवदत्तेन अनुभूतमन्यो यज्ञदत्तः स्मरति । न हि भवति योऽहं देवदत्तोऽद्राक्षं सोऽहं यज्ञदत्तः पश्यामीति । न चेदं सत्यपि भेदे कार्यकार-
177/tha णभावात् प्रतिसंधानं भवितुमर्हति । न हि यत्र स्फुटतरः कार्यकारणभावः तन्तुपटयोर्घटकपालयोर्वा दृश्यते तत्र प्रतिसंधानं भवति, ये तन्तवः स एव

२ *] न हि रूपेतिnvt-C
१३ *] न*Om*nvt-C
१८ *] तदेतद्nvt-C
२१ ज्ञातीयं] सुखहेतुचन्दन°nvt-C
२४ संहिता] °संहतिःnvt-C
३२ त्तः] स्मरामीतिnvt-C

पट इति वा, यो घटक्षणः स एव कपालक्षण इति वा। वस्तुतः कार्यकारणभूतानामगृहीतभेदानां प्रतिसंधानहेतुभावः सभागेषु क्षणेषु तथा दर्शनादिति चेत् ? तन्न, आमलकफलस्यैकस्यापनयने तत्रैव स्थाने आमलकान्तरावस्थापने भवति प्रतिसंधानम्। न च तयोरामलकयोरस्ति कार्यकारणभावः। पूर्वापरप्रत्यययोः स्मृत्या सहैकविषयत्वं कर्तरि कार्यकारणभावनिबन्धनं न कर्मणीति चेत् ? हन्त नैरात्म्यसाक्षात्कारसात्मीभावेऽप्यस्ति विज्ञानानां कार्यकारणभाव इति तन्निबन्धनं प्रतिसंधानं पूर्ववदेव प्रसज्येत। सैव चात्मदृष्टिर्दोषाणां निदानं परमिति व्यर्थो नैरात्म्यसाक्षात्कारसात्मीभावप्रयासः। अथासदपि प्रतिसंधानं कार्यवशादाहरति तथागतो नट इव रामत्वमात्मनः, यदि तत् कार्यकारणभावनिबन्धनम्, कथमसत्, कथमाहार्यम् ? अथ कार्यकारणभावोऽप्यवस्तु सन् कल्पनामात्रनिबन्धनः, स तर्हि तादृशः शालिबीजस्योत्पादं वास्तवं न नियन्तुमर्हति, न जातु कल्पितवह्निभावो माणवको दहनपाकयोरुपयुज्यते। न च प्रत्ययानां भेदाग्रहात् प्रतिसंधानमिति सांप्रतम्, प्रवृत्तिविज्ञानानां रूपादिविषयाणां भेदेन पृथग्जनैरपि प्रतीयमानत्वात्, आलयविज्ञानस्य च प्रवृत्तिविज्ञानातिरिक्तस्यानुपलब्धेः। अहमिति च सत्त्वदृष्टेः क्षणिकत्वनिराकृतावसति बाधके स्थिरवस्तुविषयत्वात्। तस्मात् स्मृत्या सह पूर्वापरप्रत्यययोः एकविषयत्वलक्षणस्य प्रतिसन्धानस्यानेककर्तृकत्वाद् व्यतिरेको निरुपाधिरेककर्तृकत्वं साधयति। स चैकः कर्ता शरीरेन्द्रियबुद्धिभ्यो भिन्न आत्मेति सिद्धम्। § 366

तदनेनाशयेनोक्तम्—अस्ति च स्मृतिः उक्तरूपा। तस्माद् यस्मिन् पक्षे स्मृतिः संभवति तत्र प्रतिसंधानं न्याय्यमिति। स च कर्त्रेकत्वपक्ष इति भावः। आशयमविद्वान् पुनः परः प्रत्यवतिष्ठते—भवानिति। पर एवैकग्रन्थेनाह—कथमिति। कथं न संभवतीत्यर्थः। स्यादेतत् योगिचित्तमपि सार्वज्ञ्यस्य चेतस आलम्बनप्रत्यय इति तस्यापि योगिचित्तेन प्रतिसन्धानं स्यादित्यत 178/tha
आह—यत्कायेति। एतदुक्तं भवति, उपादानोपादेयभावेनावस्थितः चित्तप्रवाहः सन्तानः। न च योगिचित्तमुपादानं सार्वज्ञ्यस्य चेतसः। आलम्बनप्रत्ययो हि तदिति। कायग्रहणं च एकसन्तानोपलक्षणपरम्। तेन जन्मान्तरेऽपि स्मृतिरुपपन्नेति। तमिममस्मदभिप्रायानभिज्ञं परमन्यथापि बोधयितुं विभवाम इति सिद्धान्ती अन्यथा स्मृत्यनुपपत्तिमाह—न, अस्थिरत्वाद् बुद्धीनाम्। न ह्यजातानन्वयध्वस्तयोरस्ति कश्चिद् विशेष इति पूर्वोत्पन्नोऽनुभवः काञ्चन वासनामाधाय ध्वंसते, यया कालान्तरे स्मृतिराधीयते इत्यभ्युपगन्तव्यम्। न चास्थिरा बुद्धिः शक्या वासयितुमित्यात्मा स्थिरोऽभ्युपेय इत्यर्थः। युक्त्यन्तरमाह—असंबन्धाच्चेति। न च बुद्धीनामसमानकालानामस्ति संबन्ध इत्यर्थः। पुनः परः प्रत्यवतिष्ठते—शक्तीति। नास्माकं क्षणिकवस्तुवादिनामस्ति तज्जगति यदवस्थितं वासकेन वास्यमानं दृष्टमिति भावः। ननु त-

९ तिसंधानं] °दाह तथा° nvt-C, बलादाहरतिnvt-J

१० त्] असत् कार्यम्nvt-C

थाप्यसमानकालतया संबन्धरहितमशक्यं वासयितुमिति ग्रहणकवाक्यविवरणव्याजेनापाकरोति—अथापीति । पूर्वचित्तं प्रवृत्तिविज्ञानं यत्तत् षड्विधम्, पञ्च रूपादिज्ञानान्यविकल्पकानि, षष्ठं च विकल्पविज्ञानम् । तेन सह जातः समानकालः चेतनाविशेषः तदालयविज्ञानमित्युच्यते । अहङ्कारास्पदं स्मृतिशक्तिः । सा च न शक्तात् तज्ज्ञानादतिरिच्यते । तेन कथञ्चिद् भेदविवक्षया शक्तिविशिष्टमित्युच्यते । सिद्धान्तवाद्याह—अत्रोक्तमिति । उपपादयिष्यते हि भावानां सर्वजनप्रतीतिसिद्धा स्थिरता क्षणभङ्गनिराकरणेन । तथा च स्थिरस्य संबद्धस्य च वस्त्रादेर्मृगमदादिना वास्यत्वं दृष्टमिति नास्थिरेऽसंबद्धे च भवितुमर्हतीत्यर्थः । § 367

स्यादेतत् । अस्थिरयोरपि ज्ञानयोः समानकालतया अस्ति संबन्ध इति कस्मादन्यतरचित्तवासितमन्यतरच्चित्तं स्मृतिं नाधत्ते इत्यत आह—यश्चासाविति । वक्ष्यमाणापेक्षोऽपि शब्दः । ननु वर्तमाने चेतसि मा कार्षीदुपकारम्, अनागते तु करिष्यतीत्यत आह—नापीति । पृच्छति—कथमिति । उत्तरम्—वर्तमानं तावदिति । प्रकृतमुपसंहरति—तस्मादिति । इतोऽप्यसत्यात्मनि विज्ञानमात्रात् कार्यकारण भावेन स्मृतिर्नोत्पद्यते इत्याह— 179/tha इतश्चेति । कस्मात् ? भावस्य भवित्रपेक्षत्वात् । भाव उत्पत्तिमान् धर्मः । भविता धर्मी पाको विक्लित्तिः संयोगभेदः । स च तण्डुलावयवसमवेतोऽप्यवयवावयविनोरभेदोपचारात् तण्डुलानामित्युक्तम् । गतिः तु परिस्पन्दो देवदत्ते कर्तरीति सिद्धान्ती क्षणिकवादिनमुत्थाप्याक्षणिकत्वाभिप्रायेण दूषयति—अनाधारैवेति । पूर्वपक्षी क्षणिकत्वाभिप्रायेणाह—कार्येति । सिद्धान्तवाद्यक्षणिकत्वाभिप्रायेण परिहरति—तच्च नेति । समानकालयोराधाराधेयभावो दृष्टः । यथा कुण्डवदरयोः स्थिरमेव हि कुण्डं स्थिरस्यैव वदरस्य गुरुत्वेन पततो गुरुत्वं प्रतिबध्नदधःपतनं निवारयदाधारो भवति । यद्युच्येत न स्मृतिर्भावः किं तु भवित्री । उत्पत्तिरस्या भावः । न तु भवितुर्भवित्रन्तरापेक्षा युक्ता अनवस्थापातादिति आशङ्कते—अथापीदमिति । निराकरोति—तच्च नेति । विरोधादिति विवृणोति—यदीति । कस्माद् व्याहतमित्यत आह—स्वरूपं चेति । चो हेत्वर्थे । स्वरूपमुत्पत्तेरुच्यमानं स्वतन्त्रं बाधते यतः, तस्माद् विरोध इत्यर्थः । अनभ्युपगमादिति विवृणोति—न हि भवन्त इति । विरोधादिति स्फोरयति— व्यतिरिक्तां चेति । तन्त्रं शास्त्रम् । शङ्कते—अथेति । तथा च न विरोधो नाप्यनभ्युपगम इत्यर्थः । निराकरोति—किं क्वेति । अभिधानस्वरूपमाह—उत्पत्तिरिति । अपि चोत्पत्तेर्भावत्वेऽपि न स्मृतिर्न भावः, भावत्वस्य कार्यमात्रानुबन्धित्वात् स्मृतेश्च कार्यत्वात् । न चानवस्था, नित्ये व्यवस्थानात् । तथा च स्मृतेर्भावस्य भविता आत्मैव नित्यः परिशिष्यते इत्याशयवानाह—यदा चोत्पत्तिरिति । प्रकृतमुपसंहरति— तस्मादिति । तत् सिद्धमेतत्, स्मृतिः पूर्वापरप्रत्ययाभ्यामेककर्तृका ताभ्यां सहैकविष-

१५ भावेन ] भावात् nvt-C
१८ तु ] तु nvt-J
३५ र्तृका ] उभाभ्यां nvt-C

यत्वेन प्रतिसन्धीयमानत्वात् । या पुनर्नाभ्यामेककर्तृका सा नाभ्यां तथा प्रतिसन्धीयते, यथा देवदत्तस्य स्मृतिर्न यज्ञदत्तप्रत्ययाभ्याम् । न चेयं तथा । तस्मात् तथेति । § 368
180/tha

तदेवं व्यतिरेकिसमर्थनं कृत्वा अन्वयव्यतिरेकिणमत्रार्थे प्रमाणयति— अथ वेति । अनेकग्रहणमनेकनिमित्तप्रतिषेधशङ्कानिवृत्त्यर्थं येन मया रूपादयोऽनुभूताः तेनैव गन्ध उपलभ्यते इति खलु मयेति स्मृत्या सह प्रतिसन्धानं तस्माद् भरतमताभ्यासेनाभिनये ये कृतसङ्केताः, तेषाम् । यच्चोक्तं परैः,

नर्तकीभ्रूलताक्षेपो न ह्येकः पारमार्थिकः ।
परमाणुसमूहत्वादेकत्वं तस्य कल्पितम् ॥§ 371

इति । तत्राह—भ्रूक्षेपस्यैकत्वात् । न भ्रूः परमाणुसमूहोऽपि तु अवयविद्रव्यमेकम् । तद्गतं च रेचितमपि क्रियैकैव । भवतु वा परमाणुसमूह एव भ्रूक्षेपः, तथापि समूहस्य समूहिभ्योऽनन्यत्वात् परमाणव एव, तेषां च प्रत्येकमेकता चानेकभरतमतनिपुणप्रतिपत्तृसाधारणता च । अस्ति च तेषामपि स्वगोचराविकल्पोत्पादनद्वारेण परंपरया मयेति प्रतिसन्धानहेतुभाव इति यत्किञ्चिदेतदेकत्वं तस्य कल्पितमिति । तदेवं प्रतिसन्धानद्वारेणेच्छादीनामात्मलिङ्गत्वमुक्त्वा संप्रति गुणतया लिङ्गतां वार्त्तिककृद् आह—अथ वेति । गुणत्वेनेच्छादीनां पारतन्त्र्यं रूपादिवत् साधनीयम् । तच्चानित्यत्वेनैव सामान्यविशेषसमवायेभ्यो व्यावर्तकेन सिद्धम् । न ह्यनित्यो भावो द्रव्यात् स्वतन्त्रो भवति । तस्माद् गुणत्वप्रसाधकादेव हेतोः पारतन्त्र्यसिद्धेः कृतं गुणत्वेन पारतन्त्र्यसाधकेनेति हृदि निधाय वार्त्तिककारः तदपि पूर्वमुक्तमिति सिद्धेन पारतन्त्र्येण गुणत्वमपि साधयति । न चैतदनित्यस्य *पारतन्त्र्यमात्रेण सिध्यति, द्रव्यकर्मणोरप्यनित्ययोः पारतन्त्र्यात् । तस्मादनित्यत्वसिद्धेन द्रव्यपारतन्त्र्येण द्रव्यकर्मभ्यां व्यतिरेचयति—न द्रव्यं कर्म वा इच्छादयः व्यापकद्रव्यसमवायात् शब्दवद् इत्यादि । यद्यप्यनित्यत्वेन द्रव्यसमवायमात्रं सिध्यति, तथापि द्रव्यकल्पनमात्रेणैवोपपत्तौ तदवयवकल्पनायां प्रमाणाभावेन तद् द्रव्यमनवयवं तावत् सिद्धम् । अनवयवं च द्रव्यं द्वेधा, व्यापकम् अणु च । न तावदणु, तत्रेच्छादीनामुपलब्धेः । क्वचिदन्यतरकर्मणा क्वचित् स्वभावतस्तत्संयोगोपपत्तौ तद्गतिकल्पनायां प्रमाणाभावात् सिद्धमस्य व्यापकत्वम् । तदेतदादिग्रहणव्याख्यानम् । तदनया

१ सा ] नाभ्यां *Om* nvt-C
२ स्य ] न *Om* nvt-C
२ न ] त्वियं nvt-C
२ था ] न तथा nvt-C
५ र्थं ] °निरासार्थंnvt-C
५ या ] येन प्रागनुभूताnvt-C
६ ह ] ममnvt-C
८ मार्थिकः ] परमार्थतःnvt-J
९ म् ] तत्वसंग्रहः पृः ८६
१४ पि ] स्वगोचरो विकल्पोत्पादन°nvt-C
१५ इति ] एतत्*Om*nvt-C
२२ * ] पारतन्त्र्यं द्रव्येणnvt-C
२३ ति ] विवेचयतिnvt-C

वक्रोक्त्या नित्यत्वं परममहत्त्वं चात्मनो दर्शितं भवति । एतच्च सामान्यतोदृष्टमनुमानं सूत्रयता सर्वं दर्शितमित्याह—सामान्यत इति । *यत् तत्पूर्वं हृदि स्थितमिच्छादीनां द्रव्यपारतन्त्र्ये साध्येऽनित्यत्वानुमानम्, तदुद्घाटयति कार्यत्वमपि हेतुं समुच्चिनोति—एतेनेति । नन्वस्तु द्रव्यपारतन्त्र्यं तथापि शरीरपारतन्त्र्यमस्तु, कृतमनुपलब्धचरेणात्मना इत्यत आह—अयावदिति । सर्वपुरुषसाधारण्यप्रसङ्गाच्च न पृथिव्यादिगुणाः । तदुत्पत्तौ करणत्वेन कल्पनाच्च नाकर्तुर्मनसः । तस्माद् अष्टद्रव्यातिरिक्तं द्रव्यान्तरम् । तत्रेच्छादयः, स चात्मेति सिद्धमित्याह—तत्प्रतिषेधादिति ॥ १० ॥ § 372

## चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ १ । १ । ११ ॥ § 373

आत्मानं लक्षयित्वात्मनो दुःखनिदानानामिन्द्रियादीनां सर्वेषां साक्षात् पारम्पर्येण च शरीरमाश्रित्य तन्निदानत्वमिति तदेवास्य दुःखमूलकारणमित्यनन्तरं शरीरं लक्षयितुं सूत्रम्—चेष्टेत्यादि । तदवताराय भाष्यम्—तस्येति । तस्येत्यात्मानं परामृशति । भोगः सुखदुःखसंवित् । तदधिष्ठानं शरीरम् । तदनेन सर्वस्यास्यानर्थसंभारस्य परमनिदानं शरीरम् । अतस्तदेवेन्द्रियादिभ्यः पूर्वं लक्षणीयमित्युक्तम् । अत्र चेष्टाश्रयत्वेनेन्द्रियाश्रयत्वेन च प्रत्येकं समानजातीयेभ्य आत्मेन्द्रियादिभ्योऽसमानजातीयेभ्यः प्रमाणसंशयादिभ्यः शरीरं व्यवच्छिद्यते । § 374

कथं चेष्टाश्रय इति भाष्यम् । तस्यार्थं व्याचष्टे—का पुनरिति । चेष्टा व्यापारः । स चातिव्यापकतया अव्यापकतया च न लक्षणम्, वृक्षा-
182/tha दिषु भावात्, अभावाच्च पाषाणमध्यवर्तिमण्डूकादिशरीरे इति भावः । अत्रोत्तरभाष्यम्— ईप्सितमित्यादि । तद् व्याचष्टे—हिताहितेति । प्रयुक्तस्य उत्पादितप्रयत्नस्य । न च व्यापारमात्रं चेष्टा अभिमता, *अपि तु विशिष्टो व्यापारः । स च न वृक्षादिष्वस्तीति नातिव्यापकता । यद्यपि च दारुयन्त्रादिषु ईदृशो व्यापारोऽस्ति, तथापि मूर्तान्तराप्रयोगे सतीति विशेषणात् न व्यभिचारः, तेषां शरीरेण मूर्तेन प्रयोगात् । शरीरस्य तु मूर्तान्तराप्रयुक्तस्य ईदृशव्यापाराश्रयत्वम्, पाषाणमध्यवर्तिनश्च मण्डूकदेहस्य तद्व्यापारायोगेऽपि तद्योग्यत्वात्, पाटिते पाषाणे तादृशस्य तद्व्यापारस्य दर्शनादिति भावः । § 375

कथमिन्द्रियाश्रय इति भाष्यं व्याचष्टे—कथमिति । संयोगितया त्विन्द्रियाश्रयत्वे घटादीनामपि शरीरत्वप्रसङ्गः, तेषामपीन्द्रियसंयोगित्वादिति भावः । यस्येत्यादि परिहारभाष्यं व्याचष्टे—शरीरेति । § 376

एतेनेति । तद्वृत्तित्वेनानुपपत्त्या अर्थानामप्यन्यादृश आश्रयार्थो व्याख्येयः । यद्यपि गन्धादयो विषया न स्वरूपेण शरीरमाश्रयन्ते तथापि यदेषां सुखाद्युपलम्भहेतुत्वं कार्यं प्रयोजनं तदर्थमाश्रयन्ते इत्यर्थः । तदनेन य-

२ *] तत्*Om*nvt-C
३ मिच्छादीनां] द्रव्य°*Om*nvt-C
३ म्] °त्वहेतुकानु°nvt-C
११ र्येण] च*Om*nvt-C
२२ *] किं तु nvt-J
२५ तेषां] शरीरे nvt-C

स्मिन्नित्यादि भाष्यं व्याख्यातम् । चोदयति—कथं पुनरिति । परिहरति—सामान्येति । विशेषेण बुभुत्सितत्वादिना प्रकरणापन्नं नियन्त्रितं सामर्थ्यम् । *प्रकरणादीत्यत्रादिपदसंगृहीतमपरमपि सामर्थ्यशब्दार्थमाह—सामर्थ्यं चेति । अपरमप्याह— प्रमाणेति । अत्र प्रथमे पक्षे चेष्टाशब्दो व्यापारविशेषे स्पन्दादिवन्मुख्यार्थः । तदेतत् लोकस्तावदित्यादिना तथा चायं चेष्टाशब्द इत्यन्तेन दर्शितम् । प्रमाणासंभवो वेति द्वितीयं पक्षं विवृणोति—सामान्यवाच्यपीति । अपिरभ्युपगमे । प्रमाणासंभवोऽनुपपत्तिः । सा च न क्रियामात्र इत्यनेन दर्शिता । एवं चेष्टापदव्याख्याने न घटादिषु शरीरत्वप्रसङ्गः । § 377

183/tha

एवं भाष्यानुसारेण स्वमतेन च प्रत्येकं चेष्टाश्रयत्वादि शरीरस्य लक्षणमिति वर्णयित्वा समस्तमेवेदं शरीरलक्षणमिति ये वर्णयांबभूवुः, *तन्मतं निराकरोति— यैरपीति । यद्याद्यं पदं लक्षणं चेष्टाश्रय इति, तदा घटेन व्यभिचारः । तदर्थं द्वितीयपदोपादानम् इन्द्रियाश्रय इति, इन्द्रियसंयोगीत्यर्थः । तथापि तेनैव घटादिना व्यभिचारः, प्राप्यकारित्वेनेन्द्रियाणां घटादीनामपि इन्द्रियसंयोगित्वात् । अत आह—अर्थाश्रय इति । एवमपि व्यभिचारस्तदवस्थ एव, घटादीनामपि रूपाद्यर्थसमवायेनार्थाश्रयत्वात् । अथ समवायाभिप्रायेणाश्रयत्वम्, तथापि न समवाय इन्द्रियाणां शरीरे । घ्राणस्य पार्थिवत्वेन समवायो न विरुद्ध इति चेत्—न, तस्य शरीरावयवसमवायित्वेन शरीरासमवायात् । यदि नासिकाग्रमेव घ्राणम्, अथ तदाधारमतीन्द्रियम्, तथापि न तत्समवेतं शरीरम्, प्रत्यक्षाप्रत्यक्षवृत्तेर्वायुवनस्पतिसंयोगवदप्रत्यक्षत्वप्रसङ्गाद्देहस्य । अपि च यदा चेन्द्रियार्थस्य समवायेन शरीरत्वम्, हन्त भो इन्द्रियसमवायिकारणेषु परमाणुषु समस्तमेतदस्तीति तेषामपि शरीरत्वप्रसङ्ग इत्याह—समस्तेति । स्यादेतत् । भवन्मतेऽपि चक्षुरादिभिरिन्द्रियैर्व्यभिचारः, तेषामपि यथोक्तव्यापाराधारत्वादित्यत आह—यथा त्विति । मूर्तान्तराप्रयोगे सतीति विशेषितम् । चक्षुरादयस्तु उन्मीलनान्मूर्तेन शरीरेण प्रयुज्यन्ते इति न प्रसङ्गः । श्रोत्रं तु चेष्टाधार एव न भवति । तदेतदुपलक्षणं शरीरं भावयन्निर्विद्यते इति सिद्धम् ॥ ११ ॥ § 378

## घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ १ । १ । १२ ॥ § 379

इन्द्रियस्योपनायकत्वेनार्थादिभ्यो विशेषादिन्द्रियाणामर्थादिभ्यः पूर्वं लक्षणम् । न च विशेषलक्षणमकृते सामान्यलक्षणे शक्यमिति भाष्यकारः प्रथममिन्द्रियाणां सामान्यलक्षणं निर्वेदोपयुक्तमाह—भोगसाधनानीति । अनेन य-

---

३ *] °दित्यादि° nvt-C
७ च] सा तु nvt-C
८ र्शिता] वा° पृः......
९ तेन] च*Om*nvt-C
१० ये] वर्णयन्तिnvt-C
१० *] °मपाकरोतिnvt-C
२३ त] °त्वादतnvt-C

184/tha च्छरीरसंयुक्तं *संस्कारकदोषव्यतिरिक्तं साक्षात्प्रतीतिसाधनं तदिन्द्रियमिति सामान्यलक्षणं सूचितम् । साक्षात्प्रतीतिसाधनमिन्द्रियमिति वक्तव्ये भोगसाधनाभिधानं निर्वेदोपयोगीति । पारम्पर्येण च भोगसाधनत्वं घ्राणादीनाम्, साक्षान्मनस एव तत्साधनत्वात्, सुखदुःखसाक्षात्कारस्य भोगत्वात् । § 380

घ्राण—भ्यः ॥ अत्रेन्द्रियाणीति लक्ष्यनिर्देशः घ्राणादीनीत्यर्थः । तेषां पञ्चानां पञ्चैव लक्षणानीति कथयति—लक्षणसूत्राणीति । आपाततः सूत्रम् । विचार्यमाणानि *तु सूत्राणीत्यर्थः । समानजातीयं घ्राणादे रसनादि प्रतिनियतविषयत्वात् । असमानजातीयं तु मन आदि सर्वविषयमिति । जिघ्रतीत्यादिभाष्यनिराकरणीयां शङ्कामाह—उद्देशेति । प्रमाणाद्युद्देशेन सामान्यादित्यर्थः । लक्षणं हि विधेयम् । लक्ष्यं चोद्देश्यम् । ज्ञातं चोद्दिश्यते, अज्ञातं च विधीयते इति । न चैकस्य युगपज्ज्ञाताज्ञातत्वे संभवतः । नापि लक्ष्यलक्षणत्वे इति भावः । परिहरति—नेदं तथा यथोद्देश इत्यर्थः । कस्मात् ? करणभावात् स्वविषयग्रहणलक्षणत्वं यतो घ्राणादीनाम् । एतदुक्तं भवति, इन्द्रियाणामतीन्द्रियत्वात् सर्वदा स्वस्वविषयोपलब्धिकरणत्वेनैवानुमातव्यानि । तस्मात् स्वस्वविषयोपलब्धिसाधनत्वमेव समानासमानजातीयव्यवच्छेदकतया लक्षणम् । तदेकार्थसमवायि तु घ्राणत्वादि लक्ष्यम् । अत्र च घ्राणादिशब्दाः पङ्कजादिपदवदवयवार्थं निमित्तीकृत्य क्वचित् क्वचित् सामान्यविशेषे वर्तन्ते, *अवयवार्थसंबन्धस्य प्रतीयमानस्यासति बाधके परित्यागायोगात् । अश्वकर्णादौ वृक्षविशेषवाचके वाजिकर्णायोगेन बाधकेनावयवार्थपरित्यागात् । अवयवार्थयोगेऽपि च गन्धाद्युपलब्धिसाधने सन्निकर्षादौ घ्राणादिशब्दाप्रयोगात् अवयवार्थान्वितं घ्राणत्वाद्येव घ्राणादिशब्दप्रवृत्तिनिमित्तम् । तथा च घ्राणादिपदमेव घ्राणत्वादिपरं लक्ष्यनिर्देशः । तच्च इन्द्रियाणीत्यनेन सूचितम् । 185/tha तदेव त्ववयवार्थपरं लक्षणनिर्देशो घ्राणेत्यादि । न च सन्निकर्षेण गन्धोपलब्धिसाधनेन च व्यभिचारः, इन्द्रियसामान्यलक्षणयुक्तस्य गन्धोपलब्धिसाधनत्वं न सन्निकर्षस्यास्ति । तदनेन जिघ्रतीत्यादि स्वविषयग्रहणलक्षणानि इत्यन्तं भाष्यं व्याख्यातम् । निर्वचनग्रहणेन पदप्रवृत्तिनिमित्तमात्रमुच्यते । तेन त्वक्पदमपि संगृहीतं भवति । तस्यापि त्वक्स्थाने इन्द्रिये स्पर्शोपलब्धिसाधने एवोपचार इति । § 381

भूतेभ्य इति *सूत्रावयवतात्पर्यव्याख्यानपरं भाष्यं भूतेभ्य इतीति । नानाप्रकृतीनामित्यादि । तद् वार्त्तिककारो व्याचष्टे—भूतेभ्य इति । पृथिव्यादीति । पृच्छति—कः पुनरिति ? उत्तरम्—भूतगुणविशेषग्रहणसाधनत्वम् । घ्राणेनैव हि पृथिव्या यो गुणविशेषो गन्धः स गृह्यते, न रसनादिना ।

१ *] सत् कारक°nvt-C
३ च] °साधनत्वेnvt-J
७ *] चnvt-C
११ अज्ञातं] च*Om*nvt-J
१६ वायि] तु*Om*nvt-C
१८ *] °संबन्ध°*Om*nvt-C
२० योगेऽपि] च*Om*nvt-C
२३ निर्देशो] घ्राणेतिnvt-C
२४ नेन] च*Om*nvt-J
२९ *] °व्याख्यान°*Om*nvt-C

एवं रसनेनैवापां यो माधुर्यं गुणविशेषः स गृह्यते, *न घ्राणादिना । एवं चक्षुषैव शुक्लभास्वरं रूपं तेजसः । एवं त्वचैवानुष्णाशीतस्पर्शोऽपाकजो वायोः । एवं श्रोत्रेणैव शब्दो नभस इति हि नियमः । अत्र च प्रयोगः, गन्धोपलब्धिः करणसाध्या क्रियात्वात् छिदिक्रियावदिति । एवं सा तदन्यक्रियाकरणातिरिक्तकरणनिष्पाद्या तदन्वयव्यतिरेकाननुविधाने सति कार्यत्वात् । या यत्क्रियाकरणान्वयव्यतिरेकाननुविधाने सति कार्या, सा सर्वा तत्क्रियाकरणातिरिक्तकरणनिष्पाद्या, यथा पटादिक्रिया घटादिक्रियाकरणचक्रदण्डाद्यतिरिक्तवेमादिकरणनिष्पाद्या । तथा चेयम् । तस्मात् तथेति । तच्च करणं चक्षुराद्यतिरिक्तं घ्राणम् । तद् द्रव्यम् संयोगाधारत्वाद् घटादिवत् । तच्च पार्थिवम् । द्रव्यत्वे सति रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् पार्थिवान्तरवत् । एवं रसनादिष्वपि योज्यम् । तदिदमुक्तम् यज्जातीयमिन्द्रियं पार्थिवं पाथसीयं वा भवति, तस्य पृथिव्याः पाथसो वा यो गुणविशेषो गन्धो वा मधुर एव वा रसभेदः, तेन हि पृथिवी अबादिभ्यः, आपो वा पृथिव्यादिभ्यो व्यवच्छिद्यन्ते इति इतरेतरभूतव्यवच्छेदहेतुः स तेनैवेन्द्रियेण गृह्यते नान्येनेति । न चैवं रसना अपामिव पृथिव्या अपि रसभेदं गृह्णातीति 186/tha
पार्थिवी भवति, तथात्वे तया गन्धोऽप्युपलभ्येत । तेन तेनैवेन्द्रियेणेति नियमो गुणविशेषमवधारयति, न त्विन्द्रियमिति । अत्र च कर्णशष्कुलीसंयोगोपाधिना श्रोत्रस्य नभसः कथञ्चिद् भेदं विवक्षित्वा भूतेभ्य इति पञ्चम्यर्थो व्याख्येयः । § 382

अनेन खल्वाहङ्कारिकाणीन्द्रियाणि इति यदाहुः सांख्याः तत् निराकृतम् । निराकरणहेतुमाह—ऐकात्म्य इति श्लिष्टं पदम् । सांख्यानां किल राद्धान्ते कारणात्मकं कार्यम् । तच्च कारणमिन्द्रियाणामहङ्कार एक इत्यैकात्म्यमेककारणकत्वम् । तथा चैकात्म्यमेकत्वं घ्राणादीनामित्यनियमः स्यादिति । तदेतद् विभजते—यदि पुनरिति । शङ्कते—एकेति । विभजते—अथेति । एकः पाक्य एकोऽग्निसंयोगः एकं चौष्ण्यमित्यर्थः । निराकरोति—न ब्रूम इति । यद्यप्यौष्ण्यं निमित्तं साधारणम्, तथापि गन्धाद्युत्पत्तौ पूर्वगन्धादिध्वंसानां निमित्तानां भेदादुत्पन्नं कार्यनानात्वमिति । तदिदमुक्तं ये पूर्वे रूपादयः तेषां स्वगतो विशेषः प्रध्वंस इत्यर्थः । अथ रूपत्वादिसामान्यमेव कस्मात् स्वगतो विशेषो न भवतीत्यत आह—एवं च कृत्वेति । रूपादिसामान्यानां तादवस्थ्ये न पक्वतरतमादिभेदः । प्रध्वंसानां तु स्तोकभूयस्त्वं निःशेषत्वे नोपपद्यते इति भावः । पुनराशङ्कते—एकं कर्मेति । निराकरोति—नेति । समवायिकारणं स्वाश्रयप्रत्यासत्तिं वापेक्षत इति भावः । शङ्कते—यदि तर्हीति । लक्षणहानिः । तथा च लक्षणहानिरित्यर्थः । निराकरोति—*नेति । चरमभाविनिमित्तान्तरं

१ *] न घ्राणादिना *Om*nvt-C
७ र्या] °वेमादि° *Om*nvt-C
१० त्] घटादिवत् *Om*nvt-C
१३ पृथिवी] अब्वाय्वादिभ्यः nvt-C
१८ व्याख्येयः] व्याख्यातः nvt-C
२७ न्धादिध्वंसानां] निमित्तानां *Om* nvt-C
३३ *] नेति *Om* nvt-C

भावरूपमित्यर्थः । संयोगाभावं तूत्तरसंयोगजननायापेक्षत एव । उपसंहरति—तस्मादिति ॥ १२ ॥ § 383

## पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥ १ । १ । १३ ॥ § 384

इन्द्रियप्रकृतित्वं तु भूतलक्षणं वेदितव्यम् ॥ १३ ॥ § 385
187/tha

## गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ १ । १ । १४ ॥ § 386

क्रमप्राप्तमर्थलक्षणमवतारयति भाष्यकारः—इमे त्विति । तुशब्देनार्थमात्राद् व्यवच्छिनत्ति । येषामिन्द्रियविषयत्वेन भाव्यमानानां निःश्रेयससाधकत्वम्, मिथ्याज्ञानविषयीकृतानां तु संसारनिमित्तता, त इमे इत्यर्थः । § 387

गन्ध—र्थाः ॥ अत्र चोद्देशक्रमस्मारिता अर्था लक्ष्यतया प्रतिपत्तव्याः, तेषां लक्षणं तदर्था इति । तदित्यनन्तरलक्षितानीन्द्रियाणि परामृशति, तेषामिन्द्रियाणामर्थाः । इन्द्रियैरर्यमाणत्वमर्थानां लक्षणम् । एतावतैव लक्षणे पर्यवसिते सुहृद्भावेन प्रविभागाभिधानं पृथिव्यादिगुणा इति । पृथिव्यप्तेजांसि च गुणाश्च धर्माः संख्याकर्मादयः । प्रविभागेऽप्येतावतावगते गन्धाद्यभिधानं सुहृद्भावेनेन्द्रियविषयनियमज्ञापनार्थम् । पृथिव्यादीनामिति भाष्यं न षष्ठीसमासज्ञापनार्थम्, अपि त्वर्थाभिधानमात्रम् । यथाविनियोगमिति । यथाक्रमं पृथिव्यादिष्वनिलान्तेषु गन्धादयः स्पर्शान्ताः चतुस्त्रिद्व्येकनियमेन विनियुक्ताः । शब्दश्चाकाश एवेत्यर्थः । तदर्था इति लक्षणपदं व्याचष्टे—इन्द्रियाणामिति । येन क्रमेण घ्राणादय इन्द्रियसूत्रे पठिताः, येन चेह गन्धादयः, तदनतिक्रमेणेत्यर्थः । अत्र वार्त्तिककारः पृथिव्यादिगुणा इत्यत्रानेकसमासप्रतिभासनात् संशयं कृत्वा द्वन्द्वसमासमवधारयति—पृथिव्यादिगुणा इति । षष्ठीसमासेनाभिन्नार्थत्वात् सप्तमीसमासस्येत्यसौ न दर्शितः । ननु कण्ठेकाल इतिवद् वैयधिकरण्येन बहुव्रीहिर्भविष्यति पृथिव्यादीनां गुणा येभ्यो गन्धादिभ्यः, ते तथा । तथा हि परमाणुगता गन्धादयोऽवयविनि गन्धाद्यारभन्ते, नभोगतश्च शब्दो नभसि समानजातीयं शब्दमित्यत आह—न चान्यथेति । ज्ञापकवशात् क्वचिद् व्यधिकरणानां बहुव्रीहिः । ज्ञापककृतं च न सर्वत्र । न च गन्धादीनां पृथिव्यादिगुणहेतुत्वप्रतिपादनं क्वचित् निर्वेदादावुपयुज्यत इति
188/tha भावः । अन्यसमासः कर्मधारयादिः । द्वन्द्वमवधारितमाक्षिपति—न द्वन्द्व इति । समाधत्ते—न, उभयस्यापीति । पृथिव्यादिग्रहणेनेति । यद्यादिशब्देन वाय्वादयो गृह्येरन्, तदर्था इति लक्षणमव्यापकं स्यात्, तेषां बाह्येन्द्रियार्थ-

२४ त्वात्] °समासो नnvt-C    २९ चित्] निर्वेदायोप°nvt-C

त्वाभावादित्यर्थः । गुणग्रहणेन च सर्व इति आश्रितानाश्रितत्वाभिप्रायम्, गुणशब्दस्य धर्मवचनत्वात् । विशेषस्तु रेखोपरेखादिः न त्वन्त्यः, तस्यातीन्द्रियत्वात् । एतेषां च यथायोगं मिथ्याज्ञानसम्यग्ज्ञानविषयाणां रागवैराग्यहेतुत्वमूहनीयम् । चोदयति—गन्धेति । परिहरति—न कर्तव्यं लघुसूत्रम् । गन्धादीनां पृथगभिधानं कर्तव्यमित्यर्थः । नियममाह—इन्द्रियाणीति । तत्रेत्यनियतेषु मध्ये पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि, शेषश्च गुणराशिः संख्यादिर्विशेषान्तो द्वीन्द्रियग्राह्य इत्यर्थः । तथा सर्वेन्द्रियग्राह्य *इत्यर्थः । § 388

अत्र बौद्धमुत्थापयति—दर्शनस्पर्शनाभ्यामिति । तस्य पर्यनुयोगमाह—स इति । स्वसंवेदनेन वा मानसेन वा ज्ञानेन रूपाद्यालम्बनः प्रत्ययो रूपादिविशिष्टो यथानुभूयते, एवं रूपाद्यतिरिक्तघटादिविशिष्टोऽनुभूयत इत्यर्थः । अत्र पर आह— रूपादिभ्यस्तथा सन्निविष्टेभ्य इति । तथेत्याकारं निर्दिशति । सन्निवेशो व्यवस्थानम् । रूपादिपरमाणव एव तेन तेनाकारेण उत्पन्ना एकयोदकाहरणक्रियया व्यवच्छिन्ना घट इत्युच्यन्ते । अनुरञ्जनादिकया तु रूपादिव्यपदेशः । यथाह घट इत्यपि च रूपादयं एवैकार्थक्रियाकारिणस्तथा व्यपदिश्यन्ते इति । निराकरोति—न, आकारार्थेति । तथार्थस्य यथा पदार्थेन नित्याभिसंबन्धात् यथा घटः, तथा सन्निविष्टा रूपादय इत्यर्थो गम्यते । तेन घटाकारेण घटसादृश्येनेत्ययमर्थः । तथा च दूषणमिति । दूषणान्तरमाह—रूपादिमात्रे चेति । न तावद् रूपादिक्षण एको घटः, क्षणान्तरे तत्प्रयोगाभावप्रसङ्गात् । तस्माद् रूपादिमात्रमविवक्षितभेदम् तथा सत्येतद्दूषणमित्यर्थः । शङ्कते—संस्थानभेदादिति । यथासंस्थाना रूपादयोऽर्था अनुभूयन्ते, तथा सन्निविष्टेभ्यो घटादिप्रत्यया इत्यर्थः । 189/tha
निराकरोति—नैतदिति । अन्यत्वे तदेवावयवीति संज्ञाभेदमात्रम् । अनन्यत्वे व्यर्थाभिधानम् । शङ्कते—घटादिप्रत्यया इति । एकानेकविचारासहत्वाद् असन्त एव घटादयोऽनादिविकल्पवासनाजनितविकल्पप्रत्ययप्रतिभासिनः । शब्दशब्देन विकल्पमुपलक्षयति—शब्दवासनावशादिति । निराकरोति—तदयुक्तमिति । बीजं मिथ्याप्रत्ययस्य सम्यक्प्रत्ययविषयोऽर्थः । तस्य क्वचिदभ्युपगमेऽभिमतार्थहानमित्यर्थः । यस्तु भिन्नलोकमर्यादतया ब्रूते आदिमान् मिथ्याप्रत्ययः सम्यग्ज्ञानं निमित्तीकरोति । अयं पुनरनादिः पूर्वपूर्वमिथ्याप्रत्ययजन्मा मिथ्याप्रत्ययप्रवाहः, कृतमत्र सम्यग्ज्ञानेनेति, तं प्रत्याह— मिथ्याप्रत्ययाश्चैत इति । *रूपाद्यव्यतिरेके अवयविन इत्यर्थः । *परस्त्वव्यतिरेके प्रमाणमाह—न नास्तीति । न हि मांसतोयातिरिक्तः कश्चिद्यूषो नाम । नापि तृणराजतरुव्यतिरिक्ता पङ्क्तिर्नाम । § 389

७ *] इत्यर्थः Om nvt-J
९ ज्ञानेन] ज्ञानेन Om nvt-C
२० म्] °विवक्षितम् nvt-C
२१ थासंस्थाना] अर्थाः Om nvt-J
२४ तिभासिनः] °भासमानाः nvt-C
२९ न्मा] °मिथ्याप्रत्ययजन्मा Om nvt-J
३० *] रूपादिव्यतिरेके nvt-C
३० *] परस्तदव्यति° nvt-J

दूषयति—नायं हेतुरिति । ये घटादिभावमापन्ना भवतां दर्शने इति । कामेऽष्टद्रव्यकोऽणुरशब्दः रूपधातुररूपाधातुः कामधातुरिति त्रैधातुकं जगत् । तत्र कामधातुस्वरूपमुक्तम् । कामे कामधातौ । अष्टद्रव्यकोऽणुः । रूपरसगन्धस्पर्शा इति चत्वारि द्रव्याणि, पृथिव्यप्तेजोवायव इति चत्वारि । द्रव्यशब्दो वस्तुवचनः । *तेनाष्टद्रव्यकोऽणुरित्यागमः । सोऽयं रूपाद्यतिरिक्तपृथिव्याद्यनभ्युपगमे बाध्येत । अथ वैयात्यादुच्यते—पृथिव्यादीनामिति । ततश्च सांवृतत्वेनाष्टसंख्यासिद्धेर्नागमविरोध इति भावः । उत्तरम्—तथापीति । मा भूवन् वस्तुतः, उभयेऽपि सांवृता भविष्यन्तीत्यत आह—संहन्यमानस्येति । यो हि यत्तन्त्रः स तदभावमभ्युपगम्याशक्याभ्युपगमः, न खलु संयुज्यमानानामभावे संयोगः शक्याभ्युपगम इत्यर्थः । न च संवृतिः, सा हि पररूपं स्वरूपेण संवृणोति, संहन्यमानाभावे च न संघातः, नापि संहन्यमाना इति किमनया स्वरूपेणाव्रियेतेति भावः । § 390

190/tha

तदेवं तदग्रहे तद्बुद्ध्यभावादित्यस्य व्याघातदोषं दर्शयित्वा स्वसामर्थ्यालोचने न विवक्षितलिङ्गाभिधायिता, किं त्वसंबद्धार्थता हेतुवचनस्येत्याह—तदग्रहे इति । एवं किलात्राभिमतम्, पृथिव्यादयो रूपादिभ्योऽभिन्ना, रूपाद्यग्रहे पृथिव्यादिबुद्ध्यभावादिति । *तन्न तदेतदग्रहे तद्बुद्ध्यभावादित्यनेन न शक्यं वक्तुम् । तदग्रह इत्यत्र तच्छब्दः प्रधानपरामर्शी, पृथिव्यादयश्च धर्मितया प्रधानमिति परामर्ष्टव्याः । तथा च पृथिव्याद्यग्रहे पृथिव्यादिबुद्ध्यभावादिति स्यात् । तथा च प्रतिज्ञातस्तेषां रूपाद्यभेदो न सिध्येदित्यसंबद्धम् । अथ रूपादयः पक्षीक्रियन्ते, तथापि रूपाद्यग्रहे रूपादिबुद्ध्यभावादिति स्यात् । तथापि न प्रतिज्ञातार्थसिद्धिरित्यसंबद्धार्थमित्यर्थः । एवं शब्दान्तरेणापि प्रतिज्ञाप्रयोगे तुल्यः प्रसङ्ग इत्याह—एवं रूपादिमात्रमिति । प्रतिज्ञादोषमाह—सर्वत्र चेति । नानात्वैकार्थसंबन्धनियतताया बहुत्वसंख्याया अभेदैकार्थनियतैकत्वसंख्यया सामानाधिकरण्यविरोध इत्यर्थः । तदेतदनैकान्तिकमिति चोदयति—नन्विति । निराकरोति—तन्न, अनभ्युपगमादिति । समानं धर्मसाधनम् । यमाः पञ्च । नियमाश्च पञ्च । ब्रह्मचारिगृहस्थवानप्रस्थयतीनामविशेषेणैव दश धर्मसाधनम् । तेषां धर्मसाधनत्वमेकं चातुराश्रम्यमिति प्रकृतिगता विभक्तिराह । आश्रमप्रकृतिगता तु विभक्तिः प्रकृत्यर्थसमवेतामेव बहुत्वसंख्यामाह, समानार्थानामपि प्रकृतीनां रूपभेदेन तत्परस्य प्रत्ययस्य सामर्थ्यभेदात् । यथाप्तोयशब्दयोस्तुल्यार्थत्वेऽपि तोयशब्दात् परा विभक्तिस्तोयानीति तोयसमवेतामेव बहुत्वसंख्यामाह । आप इति न तोयगताम्, अपि तु तत्संबद्धगताम् । तत्संबद्धाश्च तदवयवाः,

---

५ *] तेषामष्ट° nvt-C
७ विरोध] सिद्धिरिति ना° nvt-J
१६ *] तन्न*Om*nvt-J
१६ हे] तदेतत्तदग्रहेnvt-J
१८ व्याः] °म्रष्टव्याःnvt-J
२८ मिति] °गतविभक्तिःnvt-C
२९ वेतामेव] बहुत्व*Om*nvt-J

तद्गतरूपादयो वा बहव इत्येकस्यामपि पाथःकणिकायां बहुवचनोपपत्तिराप इति । न च सोरस्ताडं क्रन्दतोऽपि लोकस्याविनिवृत्तेर्नैवमिति साम्प्रतम् । लोको हि दृष्टव्यवहारमात्रप्रयोजनो न विवेचयति, परीक्षकास्तु तदनुसारिणो विवेचयन्त्येव । अन्यथा हि प्रत्यक्षादिलक्षणप्रणयनवैयर्थ्यप्रसङ्गः । एतेन दाराः षण्णगरीत्यादयोऽपि व्याख्याताः । षाड्गुण्यमिति षण्णां गुणानामेकं राज- 191/tha प्रयोजनसाधकत्वम् । वैशेषिकमित्यत्रापि विशेषाणां समानासमानजातीयव्यवच्छेदकत्वमेकमुच्यते इति गमयितव्यम् । हेतुदोषमाह—असिद्धोऽपीति । स्फटिकस्य धवलं रूपम् । तच्च नीलीद्रव्यानुषङ्गादभिभूतं न प्रतीयते । स्फटिकश्च प्रतीयते । न च नीलस्य स्फटिकलक्षणस्योत्पत्तिरिति तृतीये निवेदयिष्यते । तस्मादसिद्धो हेतुरित्यर्थः । § 391

दृष्टान्तश्च साध्यविकल इत्याह—योऽप्ययमिति । उत्पन्नपाकजानां तैले सर्पिषि वा भृष्टमांसपिण्डावयवानाम्, द्रव्यान्तरेण तोयेन *संपृक्तानां पाकजोत्पत्तौ सत्याम् । न चासौ सहसेति अत उक्तम्—कालविशेषानुग्रहे सतीति । स च संयोगभेद एव तोयमांसयोः, न त्ववयवी, विजातीययोरनारम्भकत्वात् । नापि यूषजातीयं तोयसंयोगि द्रव्यं क्षीरजातीयमिवेति युक्तम् । तोयविरहे काठिन्येऽपि क्षीरबुद्धिव्यपदेशयोस्तादवस्थ्यात् । इह तु काठिन्ये न यूषबुद्धिव्यपदेशाविति *संयोगभेद एव तोयमांसयोर्यूष इति न्याय्यम् । स चानुभवसिद्धः संयोगिव्यतिरिक्तः । एवं बहुत्वसंख्या संख्येयातिरिक्तानुभवसिद्धैवेति । एवं तत्र तत्र व्याख्येयम् । अनाद्यन्तेषु अनारब्धावयविष्विति द्रष्टव्यम् । न च परकीयसाधनदोषोद्भावनमात्रात् स्वपक्षसिद्धिरिति सिद्धान्तिनं साधनं पृच्छति—अथ रूपादिभ्योऽर्थान्तरे द्रव्ये किं प्रमाणमिति । यतोऽयं परो रूपादिभ्योऽर्थान्तरं द्रव्यं प्रत्यक्षेण विद्वानपि स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मारो न तथा व्यवहरति, अतोऽनेनानुमानेन स व्यवहार्यते । अस्ति हि सर्वेषामेव लौकिकपरीक्षकाणां ब्राह्मणस्य कमण्डलुरितिवत् चन्दनस्य रूपादय इति व्यपदेशः । तत्र च परो रूपाद्युपलम्भमभ्युपगच्छति चन्दनोपलम्भमपि । अन्यथा तद्बुद्ध्यभावादित्येतावन्मात्रे वक्तव्ये कथमाह तदग्रह इति ? *तेनावगच्छामो रूपादिग्रहेऽस्य चन्दनबुद्धिः अभिमतेति 192/tha । न चासौ मनोमात्रयोनिः स्मार्तीति न्याय्यम् । उपपादितमेतस्याः सविकल्पिकाया इन्द्रियजन्यत्वं व्यवसायात्मकपदव्याख्यानावसरे । द्रव्यबाधकप्रमाणानि च परीक्षापर्वणि निराकरिष्यन्ते । तस्मात् सिद्धमुपलभ्यत्वं चन्दनस्य । सोऽयं चन्दनो विवादगोचरेभ्यो रूपादिभ्यो भिन्नः, स्वयमुपलभ्यस्य च समस्तैरुपलभ्यैर्व्यपदिश्यमानत्वात् । प्रधानमपि सांख्यैर्व्यपदिश्यते, प्रधानस्य

---

२ तोऽपि ] °स्य निवृत्तेःnvt-C
५ मिति ] °ण्यमपिnvt-C
१० ते ] द्रः ३२९ वा°
१२ *] संयुक्तानांnvt-C
१३ सेति ] अतः*Om*nvt-C
१७ *] संबन्धभेदःnvt-C
२२ रो ] परः*Om*nvt-J
२७ *] तेनाधि°nvt-C
२८ स्याः ] वि°*Om*nvt-J
२९ रे ] द्रः टीका १. १. ४
३० स्य ] °स्य व्यपदेश्यस्यnvt-C

रूपादय इति । तन्निवृत्त्यर्थम् उपलभ्यस्येति । प्रधानं तु काल्पनिकं नोपलभ्यम्, तथापि रूपादीनां मूलकारणं प्रधानमित्यस्ति सांख्यानां व्यपदेशः । अत उक्तम्—उपलभ्यैरिति । तथापि रूपादीनां परस्परभिन्नानामन्योन्यं व्यपदेश्यव्यपदेशकभाव उपपत्स्यत इत्युक्तम्—समस्तैरिति । अतः समस्तेभ्यो व्यपदेशकेभ्यश्चन्दनं भिन्नं भवति । उपलभ्यस्योपलभ्येनेति वक्तव्ये प्रत्यक्षस्य प्रत्यक्षेणेति वचनं रूपावगमसमयेऽनुमेयेभ्यो रसादिभ्य एकान्ततो व्यपदेशं व्यावर्तयितुम्, न त्वस्यानुमान उपयोग इति । अस्यानैकान्तिकत्वमुद्भाव्य निराकरोति—सेनावनादिभिरिति । संख्यायामसत्त्वमाशङ्क्य निराकरोति—तदसत्त्वमिति चेदिति । विधीयमानं प्रतिषिध्यमानमिति यथासंख्यं निषेधस्य विध्यधीननिरूपणतया निषेध्यमेकत्वमङ्गीकार्यम्, तच्च संख्येत्यर्थः । ननु सत्त्वमी प्रत्ययाः, ते तु द्रव्यमात्रनिबन्धना भविष्यन्ति, कृतं संख्ययेत्यत आह—विशिष्टाश्चेति । न द्रव्यातिरिक्तनिमित्तप्रत्याख्यानेन इत्यर्थः । प्रयोगान्तरमाह—तत्प्रत्ययविषयनिमित्तप्रत्ययव्यतिरेकेणेति । घटप्रत्ययस्य विषयश्च, निमित्तं च, घटप्रत्ययश्च तद्व्यतिरेकेणेति, तद्विशिष्टसंख्यादिप्रत्ययस्य निमित्तान्तराकाङ्क्षित्वात् । *तत् किमर्थमत उक्तम्—उत्पत्ताविति । चर्मणि द्वीपिनं हन्ति इतिवद् घटादिविषयनिमित्तव्यतिरेकभाज इत्यत्रापि
193/tha प्रत्ययग्रहणं कर्तव्यम् । चोदयति—महत्पुष्पितेति । न संख्याया गुणस्य परिमाणपुष्पयोगसंभव इत्यर्थः । परिहरति—नैष दोष इति । स्थानशब्देन तिष्ठतीति व्युत्पत्त्या संख्योच्यते । सा येषामस्ति ते गजवाजिपदातिप्रभृतयः स्थानिनः प्रत्येकं महान्तः । तत्र ते क्वचिच्छतमेव, क्वचित् पुनस्तज्जातीयस्थान्यङ्गान्तरसन्निधाने सत्युपचिताः सहस्रं भवन्ति । तेन बहुत्वसंख्योपचयोपकरणा तदेकार्थसमवेतमहत्त्वोपचारात् महती सेनेत्युच्यते । न चैतावता यत्र शतं गजादयः यत्र च सहस्रं तयोः सेनयोर्महत्त्वाविशेषः, *उपचयापचयोपकरणत्वेन विशेषितत्वात् । एवं पुष्पितवनादयोऽपि द्रष्टव्याः । प्रत्ययभेदाद् द्रव्यादिभ्यः संख्याया भेदमुक्त्वा व्यपदेशभेदादप्याह—अत एवेति । § 392

स्थाणुशब्देनापीति । मूर्तानां समानदेशत्वाभावात् न पर्वसु खदिरश्च स्थाणुश्च समवेतौ । न चावस्थितसंयोगेभ्यस्तरुविनाशापेक्षेभ्यः स्थाणोरुत्पत्तिरिति युक्तम् । यस्य द्रव्यस्य यावान् संयोगप्रचयोऽसमवायिकारणं स तावानुत्पन्नमात्र एव तज्जनकः, *तस्य क्षेपायोगात् । तस्मात् पर्वणां संस्थानविशेष एव स्थाणुरिति गमयितव्यम् । अथावस्थितसंयोगानां द्रव्यविनाशापेक्षाणां जनकत्वम्, ततः संयोगप्रचयपदेन स्थाणुत्वसामान्यविशेषवद् द्रव्यमुपलक्षणीयम् । तच्च खदिरतरोर्भिन्नमिति । प्रतिमाया महारजतमय्या अवयविन्याः शरीरं संस्थानमेव, एवं शिलापुत्रकस्य अवयविनः संस्थानमेव शरीरम् । शङ्कते—गुणसमुदायेति । अतादात्म्येनाग्रहणं व्यतिरेकेणाग्रहणम्

११ ना ] °मात्रनिमित्ताnvt-J
१५ *] तत्*Om*nvt-J
१८ स्य ] पुष्पयोगगुणयोग°nvt-J
२३ *] °अपचय°*Om*nvt-J
२४ योऽपि ] अपि*Om*nvt-C
२८ स्य ] यावत्सं°nvt-C
२९ *] तस्य चnvt-C

पृथक्शब्दोऽप्यतादात्म्यमेव ब्रूते । दूषयति— अग्रहणस्येति । सतामपि वस्तूनामनुपलम्भो यथा मूलकीलोदकादीनां प्रमाणाभावेन, शशविषाणादीनां चानुपलम्भो ग्राह्याभावेन । तस्माद् व्यतिरेकाग्रहणमात्रं हेतुरनेकान्त इति । शङ्कते—ग्राह्याभावादिति चेत्, ग्राह्याभावे सत्यग्रहणादिति हेतुः, न त्वग्रहणमात्रमित्यर्थः । दूषयति—प्रतिज्ञार्थेनेति प्रतिज्ञातस्यासत्त्वेन तद्विशिष्टो हेतुरसिद्ध इत्यर्थः । शङ्कते—ग्रहणेति । ग्रहणं प्रमाणम् । निराकरोति— न *प्रमाणाभावमात्राद् व्यतिरेकप्रतिषेधः, यस्तु योग्यप्रमाणाभाववदिति 194/tha विशेषयेत् तं प्रत्याह—यश्च तदग्रह इति । असिद्धता हेतोर्दोषः । दर्शनस्पर्शनाभ्यामेकार्थप्रतिसन्धानमेव रूपादिव्यतिरिक्तद्रव्यग्रहणम् । *अतो गुणसमुदायव्यतिरेकेणाग्रहणादित्यसिद्धो हेतुरिति । एकत्र अन्यत्वे । प्रमाणानामुपपत्तेः । एकत्र अनन्यत्वे चानुपपत्तेरिति । प्रकृतमुपसंहरति—तस्मादिति ॥ १४ ॥ § 393

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १ । १ । १५ ॥ § 394

आत्मादीनां बुद्धिहेतूनां लक्षणस्यानन्तरं हेतुमती बुद्धिर्लक्षणीयेत्याह वार्त्तिककारः—अथ बुद्धेरवसरप्राप्ताया इति । लक्षणं तावत् प्रकृतत्वादपदेष्टव्यमेव, तदपदेशद्वारेणान्यदपि किञ्चित् सूचनीयम् । अत एवोक्तम्— सूत्रमिति । अन्यच्च सांख्यमतनिराकरणम् । यथोक्तं भाष्यकारेण अचेतनस्य करणस्य बुद्धेरिति । इवकारेण नेदं प्रत्याख्यानपरम्, अपि तु लक्षणपरादयमप्यर्थः प्रतीयमानोऽपेक्षितश्च नोपेक्षणीय इत्युक्तं भवति । § 395

बुद्धि—रम् ॥ सूत्रतात्पर्यमाह—एतैरिति । पृच्छति—कथमिति । समानासमानजातीयव्यवच्छेदकं हि लक्षणमव्यभिचारितया । पयार्यशब्दाश्च संकेतमात्राधीनप्रवृत्तयः क्व नाम न संभवन्ति ? तस्मात् नैते लक्षणमिति भावः । उत्तरम्— व्यवच्छेदेति । ननु व्यभिचारसंभवेन व्यवच्छेदकत्वमयुक्तमित्यत आह—एतैश्चेति । संकेतो हि द्वेधा, *सर्वजनीनो यथा गौरिति गोजातीयस्य वाचकः, प्रादेशिकश्च यथा चैत्र इति पुरुषभेदस्य । तत्र सर्वजनीनः शक्नोति व्यवच्छेदबुद्धिं भावयितुम् तद्विवक्षयैवोक्तम्—एतैश्चेति । उपपत्तिसामर्थ्यादिति भाष्यावयवं व्याचष्टे— पर्यायेति । अचेतनस्येत्यादि भाष्यम् । तद् व्याचष्टे—य आहुर्बुद्धेरिति । बुद्धिः किल त्रैगुण्यविकारः । 195/tha त्रैगुण्यं चाचेतनमित्यचेतनं केवलमिन्द्रियप्रणालिकया अर्थाकारेण परिणमते । चितिशक्तिश्चापरिणामिनी नित्यचैतन्यस्वभावा । तस्याः सन्निधानादयस्कान्तमणिकल्पा बुद्धिस्तत्प्रतिबिम्बोद्ग्राहितया चैतन्यरूपतामापन्नेवार्थाकार-

२ था ] °कीलका°nvt-C
५ त्वेन ] °स्यासिद्धत्वेनnvt-C
७ * ] °णमात्राभावात्nvt-J
८ येत् ] विशेषहेतुःnvt-C
९ * ] इतःnvt-C
१० सिद्धो ] °ग्रहणमित्य°nvt-C
२४ * ] सार्वजनीनःnvt-C
२५ त्र ] सार्वजनीनःnvt-C
२९ नं ] °चेतना nvt-J

परिणतार्थं चेतयते । तेन योऽसौ नीलाकारः परिणामो बुद्धेः, स ज्ञानलक्षणा वृत्तिरित्युच्यते । आत्मप्रतिबिम्बस्य तु बुद्धिसंक्रान्तस्य यो बुद्ध्याकारनील-संबन्धः, स आत्मनो व्यापार इवार्थोपलब्धिरात्मनो वृत्तिरित्याख्यायते । तदिदं बुद्धितत्त्वं जडप्रकृतितया इन्दुमण्डलमिव स्वयमप्रकाशं चैतन्यमार्तण्डमण्डलच्छायापत्त्या प्रकाशते, प्रकाशयति चार्थानिति । तन्निराकरणाय पर्यायोपन्यासः । नात्मवृत्तेरुपलब्धेरन्यास्ति बुद्धिः । नापि बुद्धिवृत्तिर्ज्ञानमन्यदिति । अयमभिसन्धिः । न तावद् बुद्धेरात्मच्छायापत्तिरिन्दाविव मार्तण्डमण्डलतेजःसंक्रान्तिः पारमार्थिकी, चितेरपरिणामितया संक्रमायोगात् । तस्माद् भ्रान्तिः । सा च न तावद् बुद्धेः, तस्या अचैतन्यात् । नाप्यात्मनः, तस्यावृत्तिकत्वात् तथात्वे वा परिणामापत्तेः । तस्मात् कृपणधनमिवात्मचैतन्यं न स्वपरोपकारीति बुद्धेः स्वाभाविकं चैतन्यमास्थेयम् । तथा च उभयचैतन्ये दूषणमुक्तम् । प्रत्ययव्यवस्थया यदेककर्तृत्वानुमानं तन्न स्यादित्यर्थः । अथ द्वयोश्चेतनयोरेका वृत्तिर्भेदाग्रहो वा, तेनैककर्तृकत्वाभिमान इत्यत आह— बुद्धिवृत्त्यविशिष्टायामिति । बुद्धिर्ज्ञानसाधनमिति । बुध्यतेऽनेनेति व्युत्पत्त्या मन उच्यते । गन्धादिविषयतया सुखदुःखविषयतया चेयं बुद्धिर्भाव्यमाना निर्वेदाय कल्पत इति ॥ १५ ॥ § 396

## युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १ । १ । १६ ॥ § 397

भाष्यकारः क्रमप्राप्तं मनोलक्षणसूत्रमवतारयन् उत्सूत्रमन्यान्यपि लक्षणानि आह—स्मृतीत्यादि । सुखादिप्रत्यक्षमित्यादिशब्देन विषयतयेच्छादयः संगृहीता । इच्छादय इत्यत्रादिशब्देन कार्यतया सुखादयः संगृहीताः । § 398

196/tha

युग—ङ्गम् ॥ अनिन्द्रियनिमित्ता अबाह्येन्द्रियनिमित्ता इत्यर्थः । स्मृतीत्यादिभाष्यस्य वार्त्तिककारः तात्पर्यमाह—स्मृतीति । अनिन्द्रियेत्यादिभाष्यं व्याचष्टे— यस्मादिति । *इन्द्रियगतरूपादिनिवृत्त्यर्थमुक्तम् इन्द्रियसंयोगीति । तथापि आकाशादीनामपि मनस्त्वं मा भूदित्यत उक्तम्—सहकारीति । तथाप्यालोकस्य मा भूदित्यत उक्तम्—निमित्तान्तरमिति । तथाप्यात्मनो मा भूदित्यत उक्तम्— अव्यापीति । § 399

आक्षिप्य भाष्यं समाधत्ते—कथं पुनरिति । चक्षुरादिभ्योऽनुत्पत्तौ सत्यां क्रियात्वात् । अत्र च य आत्मनो विशेषगुणास्ते सर्वे इन्द्रियजन्मानो यथा गन्धादिप्रत्ययाः, तथा च विवादाध्यासिताः स्मृत्यादयः । तस्मात् तेऽपीन्द्रियजन्मानः । एवं च संस्कारादिषु न करणत्वप्रसङ्ग इति । सौत्रं हेतुमाक्षिप्य समाधत्ते—अथायुगपदिति । सम्बन्धिभेदादिति । यदा तस्यैव मनःसंयुक्त-

३ व्यापार ] इवोपलब्धिः nvt-C
४ या ] °बिम्बमिव nvt-J
७ त्तिरिन्दाविव ] °मण्डल° *Om* nvt-J
१२ म् ] वा. पृः
२४ * ] °दिव्यावृ° nvt-C

स्येन्द्रियस्य क्रमेण नीलादयोऽर्थाः सम्बध्यन्ते तदा तत्क्रमात् क्रम इत्यर्थः । बुभुत्साक्रमं गृहीत्वा सिद्धान्तेऽपि मनःपरित्यागो मा भूदिति भिया उक्तम्—सत्यां बुभुत्सायामयुगपद्ग्रहण इति । न हि किञ्चित्करणं सम्बद्धमपि सदिति स्यात् । यद्येवं धारावाहिकज्ञानोत्पत्तिर्न स्यात्, द्वितीयादिज्ञानेष्वपि सैव सामग्रीति सकृदेव यावत् कर्तव्यकरणात् समर्थस्य क्षेपायोगात् । क्षेपयोगे वा पश्चादपि न जनयेत्, अविशेषात् । न च कर्तुरप्ययं क्रमकारिताधर्मः स ह्यनेककरणाधिष्ठानेन युगपन्नानाकार्याणि करोति । *यथा युगपन्माणवको गच्छति, पठति, *पन्थानं वीक्षते, वहति चाचार्यस्य कमण्डलुमिति । तस्मात् सर्वमवदातम् । तदिदमपि मनः स्मृत्यादिसाधनतया भाव्यमानं निर्वेदाय कल्पत इति सिद्धम् ॥ १६ ॥ § 400

197/tha

## प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १ । १ । १७ ॥ § 401

क्रमप्राप्ता त्विति भाष्यम् । प्रवृत्तिलक्षणमवतारयितुं मनसोऽपि प्रवृत्तिर्दर्शनीया । न चाप्रतिपादिते मनसि शक्या दर्शयितुमिति मनसोऽनन्तरत्वं प्रवृतेः इत्यर्थः । § 402

प्रवृ—म्भः । आरम्भः प्रवृत्तिः । सा च द्विविधा ज्ञानहेतुः क्रियाहेतुश्च । तत्र या ज्ञानोत्पादद्वारेण पुण्यपापहेतुः सा वाक्प्रवृत्तिः । वागिति च ज्ञापकहेतूपलक्षणम् । तेन मनसा इष्टदेवताद्यनुचिन्तनं चक्षुरादिभिश्च साध्वसाधुदर्शनादिसूचितं भवति । क्रियाहेतुर्द्वयी, कायनिमित्ता मनोनिमित्ता चेति । तदेतद् वार्त्तिककारो विभजते— शरीरेणेति । ननु प्रवृत्तेर्जन्महेतुत्वमुक्तं द्वितीयसूत्रे । न चेयं क्षणिका सती आमुष्मिकं जन्म साधयितुमर्हति । तस्माद् द्वितीयसूत्रव्याघात इति चोदयति—क्षणिकत्वादिति । परिहरति—नेति ॥ १७ ॥ § 403

## प्रवर्त्तनालक्षणा दोषाः ॥ १ । १ । १८ ॥ § 404

प्रयोज्यव्यापारपूर्वकत्वेन प्रयोजनकव्यापारनिरूपणात् प्रवृत्त्यनन्तरं दोषलक्षणम् । § 405

प्रव—षाः ॥ रागद्वेषौ मोहप्रभवौ पुरुषं प्रवर्तमानं प्रवर्तयतः । तयोर्धर्मः प्रवर्तना । सा च मोहैकार्थसमवायः । तावद्धि अयं रागादिवशः स्पन्दते, यावदस्य मोहो वर्तते इति । प्रत्यात्मवेदनीया इत्यादि चोद्यभाष्यम् । तस्यार्थः । लक्षणं खल्वनुमानम् । न च प्रत्यात्मवेदनीयेषु समानासमानजातीयव्यावृत्तेषु स्फुटतरेषु तद् युक्तमिति भावः । परिहारभाष्यम्—कर्मलक्षणा इत्यादि । तस्यार्थः । स्वरूपतः स्फुटत्वेऽपि न निर्वेदविषयतया

---

२ मा ] भूदत उक्तम् nvt-C
७ * ] यथा *Om* nvt-C
८ * ] पन्थानं वीक्षते nvt-J
१७ क्षुरादिभिश्च ] च*Om*nvt-C
३१ इत्यादि ] इति ।nvt-C

198/tha स्फुटता । तथा चेह प्रयोजनम् । प्रवर्तनावत्त्वेन चैते निर्वेद  विषयाः । सा च प्रवृत्त्या कार्येण लक्ष्यत इति कर्मलक्षणा इत्युक्तम् । यतः कर्मणा प्रवृत्त्या प्रवर्तकरागादियुक्ताः पुरुषा लक्ष्यन्ते, अतो रागादीनां प्रवर्तनावत्त्वमपि लक्षितं भवति । बहु नोक्तं भवतीति । स्वरूपमात्रं रागादीनामुक्तं भवति, न तु *प्रवर्तनात्वमपि तेषामित्यर्थः । तदेतत् सर्वं वार्त्तिककारः प्रश्नपूर्वकं व्याचष्टे—का पुनरिति । अवशोऽस्वतन्त्रः । सा पुनरियं प्रवर्तना प्रवर्तकानां दोषाणां व्यापारः कथं गम्यते ? दोषा हि गम्यन्ते, न तु तेषां प्रवृत्तिहेतुत्वमपीत्यर्थः । उत्तरम्—प्रत्यात्ममिति । स्वपरात्मनोर्यथासंख्यं प्रत्यक्षानुमानाभ्याम् । मोहैकार्थसमवायो हि रागादीनां मानसप्रत्यक्षवेदनीय इत्यर्थः ॥ १८ ॥ § 406

## पुनरुत्पत्तिः प्रेत्यभावः ॥ १ । १ । १९ ॥ § 407

उद्देशक्रमप्राप्तं प्रेत्यभावं लक्षयति—पुनः—वः ॥ § 408

सत्त्वनिकायः प्राणिनिकायः । नन्वात्मनो नोत्पत्तिः संभवति नित्यत्वादित्यत आह भाष्यकारः—उत्पन्नस्य संबद्धस्येति । तदेतद् वार्त्तिककारो व्याचष्टे— पूर्वेति । पुनर्ग्रहणमिति । पुनरित्यभ्यासमाह । तथा चानादिता सूचिता भवति । तदेतद् वार्त्तिकजातं द्वितीयसूत्रे कृतव्याख्यानम् । पूर्वाभ्यस्तसूत्रे चायमर्थ उपपादयिष्यते । आजरञ्जरीभाव इत्यागमभाषया अस्यार्थस्यागमिकत्वं सूचयति । क्रियामित्युपसर्पणमपसर्पणं चेत्यर्थः ॥ १९ ॥ § 409

## प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ १ । १ । २० ॥ § 410

यद्यपि शरीरेन्द्रियबुद्धिसुखदुःखोपभोगातिरिक्तं गौणमुख्यफलं भिन्नं ना-
199/tha स्ति  ते च यथायोगं पूर्वं लक्षिताः, *तेनापि च रूपेण ते निर्वेदोपयोगिनः, तथापि प्रवृत्तिदोषजनितत्वेनापि रूपेणामी निर्वेदोपयोगिन इति तेन रूपेण लक्ष्यन्ते । § 411

प्रवृ—लम् ॥ अत्र च प्रवृत्तिजनित इति वक्तव्ये दोषग्रहणं न केवलं प्रवृत्तिं प्रति दोषाणां हेतुभावः, अपि तु प्रवृत्तिकार्ये सुखदुःखे अपि प्रति इति दर्शनार्थम् । दोषसलिलावसिक्तायां खल्वात्मभूमौ धर्माधर्मबीजे सुखदुःखे जनयतः, नान्यथा । न चास्ति संभवो न तत्र तृष्यति तच्च तस्य सुखम् न च तद् द्वेष्टि तच्च तस्य दुःखमिति । सूत्रे अर्थग्रहणं गौणमुख्यफलावरोधार्थम् । भाष्ये च निष्ठा समाप्तिः । सा च महाप्रलयेऽप्यस्तीत्यत उक्तम्—पर्यवसानमिति । अवसानमात्रमस्ति, न तु परितः पुनरपि सर्गहानोपादानयोर्भावादित्यर्थः । सुबोधं वार्त्तिकम् ॥ २० ॥ § 412

५ *] °नावत्त्वम्nvt-C
१६ सूत्रे] १. १. २
१७ ते] ३. १. १९
२० पि] °दुःखभोग°nvt-C
२१ *] अपि*Om*nvt-C
२७ त्र] हृष्यतिnvt-C
२९ च] महा°*Om*nvt-C
३० तु] न पुनःnvt-C

बाधनालक्षणं दुःखम् ॥ १ । १ । २१ ॥ § 413

नानुक्ते शरीरादौ तेषां दुःखत्वं शक्यं लक्षयितुमिति तल्लक्षणेभ्यः परमिदं दुःखलक्षणम्— § 414

बाध—खम् ॥ अत्र च बाधनेति बाधनाविषयां बुद्धिमुपलक्षयति । तेन बाधना च तदनुषङ्गिणश्च शरीरादयो गौणमुख्यभावेन लक्षिता भवन्ति । सैव हि बाधनाबुद्धिर्दुःखे मुख्या, शरीरादौ गौणीति । अलमेभिरिति प्रत्ययो निर्वेदः, वशितया योगिनः स्वयमुपलभन्ते स्वयमुपनीतेष्वपि विषयेषु औदासीन्यमुपेक्षाबुद्धिर्वैराग्यम् । लक्षणशब्द इति वार्त्तिकम् । अनुषङ्गश्च संबन्धः । स च बाधनायां विषयविषयिभावः शरीरादिषूक्तः । केचिद् विरक्तंमन्या मन्यन्ते न सुखं नामास्ति स्वरूपत इति । तान्निराचिकीर्षुराह— स्वरूपतस्तु दुःखमिति । विकल्पो विशेषः । अभावफलत्वप्रसङ्गात् इति । यद्यपि उपात्तदुरितक्षयहे तवोऽपि धर्माः सन्ति, *तथाप्यधिकाधिकोत्कर्ष- 200/tha
फलानां दर्शपौर्णमासादीनां सहस्रसंवत्सरपर्यन्तानां विधायकेभ्यो वचनेभ्यो भावफल एव धर्मो गम्यते भावस्यैवोत्कर्षशालित्वादिति ॥ २१ ॥ § 415

तदत्यन्तविमोक्षोऽपवर्गः ॥ १ । १ । २२ ॥ § 416

क्रमप्राप्तमपवर्गलक्षणमवतारयति भाष्यकारः—यत्र त्विति । § 417

तद—र्गः ॥ तदित्यनन्तरं गौणमुख्यभेदभिन्नं दुःखं परामृशतीत्याह भाष्यकारः—तेन दुःखेनेति । मुख्यमेव दुःखमिति भ्रमो मा भूदत आह— जन्मनेति । अनेन जायमाना दुःखशब्देन सर्वे शरीरादय उच्यन्ते इत्युक्तं भवति । अभयमिति पुनः संसारभयाभावमाह अभयं वै ब्रह्म इत्यसकृदभयश्रुतेः । ये तु ब्रह्मैव नामरूपप्रपञ्चात्मना परिणमत इत्याहुः, तान् प्रत्याह—अजरमिति । सर्वात्मना वा परिणाम एकदेशेन वा । पूर्वस्मिन् कल्पे सर्वात्मना ब्रह्मणोऽन्यथात्वाद् विनाशप्रसङ्गः । एकदेशपरिणामे तु सावयवत्वेन घटादिवदनित्यत्वप्रसङ्गः इत सूक्तम्—अजरमिति । वैनाशिकाः प्राहुः

प्रदीपस्येव निर्वाणं विमोक्षस्तस्य चेतसः ।§ 419

इति । तान् प्रत्याह—अमृत्युपदमिति । एतदुपपादयिष्यत्यग्रे वार्त्तिककारः । तदेतद् भाष्यं वार्त्तिकारो व्याचष्टे—तेनेति । आत्यन्तिकग्रहणं महाप्रलयावस्थानिवृत्त्यर्थम् । § 420

अत्र भाष्यं नित्यं सुखमात्मन इत्यादि । अस्यार्थः विज्ञानमानन्दं ब्रह्म इति सामानाधिकरण्यश्रुतेः ब्रह्मस्वभावं सुखम्, तथा च ब्रह्मणो नित्य-

४ ति ] उप° *Om* nvt-C
७ न्ते ] स्वय° न्ते *Om* nvt-C
७ पि ] अपि *Om* nvt-C
१० न ] दुःखं nvt-C
१२ * ] °प्यधिकोत्कर्षशालित्वादिफलानां nvt-C
१८ त ] उक्तम् nvt-J
२० वै ] च nvt-C
२७ ग्रे ] °ष्यते nvt-C

त्वात् तदपि नित्यमित्यर्थः । आत्मन इति च षष्ठी राहोः शिर इतिवत् मन्तव्या । तदेतद् भाष्यं व्याचष्टे—आत्यन्तिकीति । तेषामित्यादि भाष्यं
201/tha व्याचष्टे—तन्नेति । अत्रानुमानमुप न्यस्यातिप्रसङ्गेन निराकरोति—*न, नेति । अथात्मनि दुःखादिकं नित्यं नेच्छति तत्राह—अनैकान्तिकता वा । नित्यस्याभिव्यक्तिरित्यादि भाष्यार्थमाह—नित्यमिति । अयमभिसन्धिः । सुखं तावदात्मनो गुणो नात्मा । उपपादितो हि गुणगुणिनोर्भेदः । एवं विज्ञानमप्यात्मगुणः, न ह्युदयव्ययवर्तीभ्यो विज्ञानव्यक्तिभ्योऽनुदयव्ययधर्मा भवितुमर्हत्यभिन्न आत्मा । न चात्मैव विज्ञानस्वभावः तत्तद्विषयोपधानेनोदय-व्ययधर्मेव भवतीति सांप्रतम् । घटमहं जानामीति मानस्यां बुद्धौ त्रयाणामपि ज्ञानज्ञेयज्ञातॄणां भेदेनानुव्यवसायात् । विषयतज्ज्ञानभेदेऽपि च ज्ञातुरेकस्य प्रतिसन्धीयमानत्वात् । न चैतद बाधके भेदज्ञानं भ्रान्तमिति युक्तम् । न चागन्तुकज्ञानातिरिक्तं स्वाभाविकम् आत्मनि चैतन्यमनुभूयते । न चात्मैव तत्स्वभावः, सुषुप्तत्वानुपपत्तेः, अचेतयन्नेव हि सुषुप्त इत्युच्यते । न च तदा विषयशून्यं स्वनिष्ठमात्मचैतन्यमिति युक्तम् । तदवस्थाभेदस्य सुषुप्तोत्थितेन स्वप्नान्तिकस्येव स्मरणप्रसङ्गात् । सुखं च न ज्ञानजातीयमित्युपपादितं प्रत्य-क्षसूत्रे । न च किञ्चिदपि स्वयंप्रकाशमस्तीति चतुर्थे विज्ञानवादं निराकुर्वन् वक्ष्यति । § 421

तदेवं व्यवस्थिते दूषणं भाष्यवार्त्तिकोक्तं द्रष्टव्यं यथायमात्मनःसंयोग इति । संसारावस्थायां तावदयमात्ममनःसंयोगो धर्मं निमित्तमपेक्षमाणः सुखज्ञानमकार्षीत् । यदि तु मुक्त्यवस्थायां तदनपेक्ष एव सुखज्ञानं क-रोति, हन्त रूपादिज्ञानेषु इन्द्रियान्तराण्यपि नापेक्षेतेति भावः । शङ्कते—योगजेति । न वयं विषयमात्रापेक्षां ब्रूमो येन रूपादिष्वपि ज्ञानमुत्पादयेत् अपि तु संसारावस्थायां यत् सुखज्ञानायानेनापेक्षितं तदपेक्षते । धर्मश्च तदा तेनापेक्षित इति मुक्त्यवस्थायामपि धर्ममेवापेक्षते । एतावान् विशेषो यदयं योगज इति । तथा च न रूपादिविज्ञानप्रसङ्ग इति । शङ्कते—नित्योऽसाविति । निराकरोति—योगेति । ननु त्वन्मते यथा सुखसंवेदनं जिहासितम्, एवमस्मन्मतेऽपि सुखसंवेदनहानाय घटिष्यत इत्यत आह—
202/tha न चायं सुखमिति । अस्मन्मते हि दुःखहानायैव तदनुषक्तं सुखं जिहासित-म् । नित्यं तु सुखं सर्वदुःखविनिर्मुक्तं सन्न दुःखहानाय जिहासितं संभवति इत्यर्थः । न केवलमानुकूल्यात् प्रतिबन्धकत्वं नास्ति शरीरादीनाम्, प्रत्युत मुक्त्यवस्थायामपि कल्पनीया इत्याह— *नित्यंशरीरादि इति । सिद्धान्तिनो वचनमनुभाष्य देशयति—प्रमाणाभावादित्युक्तं तच्च नेति । शास्त्रेण हि मोक्ष-

---

३ *] न*Om*nvt-C
४ दुःखादिकं] दुःखमेकंnvt-C
५ माह] °ष्यं व्याचष्टेnvt-C
६ भेंदः] टी १. १. १४
९ तीति] भविष्यतीतिnvt-C
१० स्य] °कत्वेनnvt-C
१४ म्] °मित्युक्तम्nvt-C
१७ ति] °र्थे निवेदयिष्यते; द्रः वा° ४. २. ३४
३१ *] नित्य° *Om*nvt-Jनित्यंnvt-C
३१ नित्यं] शरीरादितिnvt-C

साधने लोकः प्रवर्तनीयः । अप्रवर्तमानश्च प्रवर्तनीयः । इष्टार्थी च प्रवर्तते तत्साधने । सुखं चेष्टम् । सुखात्मको मोक्ष इत्यर्थः । सेयं लोकप्रवृत्तिरनैकान्तिकत्वेन संशयहेतुरिति परिहरति—न, प्रवृत्तीति । स्यादेतत् । मुख्यासंभवे गौणमाश्रीयते । सुखशब्दश्च सुखे मुख्यः । भाक्तस्तु दुःखनिवृत्तौ । तस्मात् नित्यानन्द एव मोक्ष इत्यत आह—यदिपुनरिति । संचक्षाणकः संख्यानप्रवृत्तो योगी । धर्माधर्मौ तावदात्मनि पारमार्थिकौ, न त्वविद्याकल्पितौ । तौ च वीतरागेणासक्तेन सता शक्यौ भोगेन क्षेतुम्, न तु सक्तेन । स हि सक्तस्तेषु तेषु विषयेषु उपात्तमुपात्तं भुञ्जानः त्यक्तं त्यक्तं चोपाददानः संसारात् न मुच्येत । तस्मादयं रागो बन्धनमिति समाज्ञातः । तन्निबन्धना च प्रवृत्तिः परिहर्तव्या । अन्यथा तु नित्यसुखावधारणलालितेयं तृष्णापिशाची लब्धप्रसरा विषयसुखेष्वपि प्रत्यासन्नेषु पुरुषं प्रवर्तयन्ती मोक्षमस्य सुदूरं प्रतिक्षिपेदिति मनागपि प्रसरोऽस्या न दातव्यः । तस्मात् नित्यानन्दप्रतिपादकश्रुतिरात्यन्तिके दुःखवियोगे भाक्तीति युक्तमिति भावः । चोदयति—यद्यपीति । रागवद् द्वेषस्यापि प्रसरो न दातव्यः । तस्य च त्वया प्रसरो दत्त इति तुल्यो दोष इति । परिहरति—न, अप्रतिकूलत्वात् । यथा नित्यसुखोपादानं मोक्षमप्रतिकूलया सक्त्या सप्रतिकूलं नैवमात्यन्तिकदुःखहानं *दुःखद्वेषानुषक्तम् । द्वेषः क्रोधो मन्युरित्यनर्थान्तरम् । ज्वलनात्मको हि स भवति । नैवं वैराग्यम् । अलं प्रत्ययो हि स इत्यप्रतिकूलं दुःखहानमित्यर्थः । तदनेन नित्यं सुखमात्मनो मोक्षेऽभिव्यज्यते इत्यादि तस्मिन् प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवतीत्येवमन्तं भाष्यजातं व्याख्यातं वेदितव्यम् । यदेवमित्यादेर्भाष्यस्यायमर्थः । एवं 203/tha
वैराग्येण मोक्षमाणस्य प्रवृत्तौ सत्याम् मुक्तस्य यदि नित्यं सुखं भवति कामं भवतु मा वा भूत्, उभयोरपि पक्षयोः वीतरागस्य प्रवृत्तौ न मोक्षाधिगमो विकल्प्यते, न सन्दिग्धो भवतीत्यर्थः । § 422

वैनाशिकानां मोक्षमुपन्यस्यति—चित्तं विमुच्यत इति । संसारी हि मुच्यते । रागादयस्तद्धेतवः । न चात्मनि नित्ये रागादयः संसारं कर्तुमुत्सहन्ते, नित्यस्याविकार्यत्वेन तादवस्थ्यादुपनेयापनेयाभावात् । यथाहुः,

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम् ।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः ॥§ 425

इति । चित्तं तु कार्यं रागादिवशात् संसारी, तद्वियोगाच्च मुच्यते इति युक्तमित्यर्थः । देवमनुष्यादिजातिः गतिस्तत्रोत्पत्तिः । तदेतद् दूषयति—न, अयत्नत इति । क्षणिकत्वात् चित्तस्य, जन्म विनाशप्रयोजनमेव । जन्मान्तरं

८ तु] तु*Om*nvt-C
११ लालितेयं] °रणजनितेयंnvt-C
१६ त्त्या] प्रतिकूलंnvt-C
१७ *] दुःख°*Om*nvt-C
२१ म्] बोद्ध°nvt-C
२२ त्याम्] प्रसक्तस्यnvt-C

हि विनाश इति क्षणस्याभेद्यत्वेनोपनेयापनेयाभावात् । स्वरसभङ्गित्वाच्च वैयर्थ्यमित्यर्थः । शङ्कते— सन्ततेरिति । अनादिः खलु कार्यकारणप्रवाहरूपा बुद्धीनां सन्ततिः । सा चात्मसाक्षात्कारोन्मूलितसवासनक्लेशजालस्य निवर्तते । निवृत्तिश्चेयमेव तस्या यत् तत्सन्तानवर्तिनश्चेतसोऽनागतस्यानुत्पाद इति भावः । निराकरोति—न, तस्याशक्यत्वात् । उत्पन्नस्यानुत्पादो न शक्यः, नापि सन्ताननिवृत्तिः शक्या कर्तुम्, अन्त्यक्षणानुपपत्तेः । स हि अन्त्यः क्षणः किञ्चिदारभते न वा ? आरम्भे नान्त्य इति न कार्यकारणप्रवाहनिवृत्तिः । प्रवाहश्च सन्तान इति न सन्ताननिवृत्तिः । अनारम्भे तस्यासामर्थ्येनासत्त्वम् । ततः पूर्वे सर्वेऽपि क्षणा असन्तः स्युरिति कस्योच्छेद इति भावः । शङ्कते—अनागतानुत्पाद इति । तथा सत्यनागतानुत्पादलक्षणार्थक्रियाकारित्वादन्त्यक्षणोपपत्तिरिति भावः । निराकरोति—अनागतेति । प्रागभावस्यानादित्वादित्यर्थः । पृच्छति—तर्हि कस्येति । नित्यस्यानुपकार्यत्वादुपनेयापनेयाभाव इति भावः । उत्तरम्—य इति । यथा चाक्षणिकस्योपकार्यत्वं तथा *क्षणभङ्गभङ्गे उपपादयिष्यत इति सिद्धम् ॥ २२ ॥
§ 426

॥ इति प्रमेयलक्षणप्रकरणम् ॥

## १.१.४ न्यायपूर्वाङ्गलक्षणप्रकरणम्

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ १ । १ । २३ ॥ § 428

संशयलक्षणावतारणपरं भाष्यं स्थानवत एतर्हि इति । तस्यार्थः । स्थानं क्रमः । तद्वतः । एतर्हि इदानीमिति । क्वचित् पाठः स्थानवत एव तर्हीति । तर्हि तदानीमुद्देशसमये, क्रमवतः संशयस्य प्रमेयानन्तरमुद्दिष्टस्य, प्रमेयलक्षणानन्तरं स्थानं क्रमो लक्षणस्येत्यर्थः । तदेतद् वार्त्तिककारो व्याचष्टे—प्रमेयेति । एतदेव स्फुटयति—येति । स्थानं क्रमग्रहणेन व्याख्यातं मतुबर्थश्च प्राप्तिग्रहणेन । § 429

समा—यः ॥ अत्र च विमर्शः संशय इति संशयसामान्यलक्षणम् । तत्र संशय इति लक्ष्यनिर्देशः, विमर्श इति लक्षणपदम् । एकस्मिन् धर्मिणि विरोधिनानार्थावमर्शो विमर्शः, किं स्विदिति ज्ञानम् । तदनेनासमानजातीयेभ्यः प्रमाणादिभ्यः समानजातीयेभ्यश्च विपर्ययादिभ्यः संशयो निवर्तितो भवति । समानेत्यादीनि तु त्रीणि विशेषलक्षणानि । तेषु च विमर्शः संश-

१ हि ] °न्तरमेवnvt-C
९ तः ] °नासत्त्वात्ततःnvt-C
९ र्वेऽपि ] सर्व एवnvt-C
१२ र्थः ] °दिति भावःnvt-C
१४ त्वं ] °स्यैवोप°nvt-C
१४ * ] टी ३।२।१०-७
१० त्र ] तत्र चnvt-C

य इत्येतदनुवर्तनीयम् । अत्र विशिष्टोऽवमर्शो विमर्शविशिष्टः संशय इति लक्ष्यपदम् । समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेरिति त्रीणि प्रत्येकं शेषैः पदैरुपेतानि लक्षणानीति । तदेतदाह वार्त्तिककारः—तत्र समानेति । त्रिविध एवेति ये पञ्चविधमाचक्षते ते निरा कृताः । तदनवधारणज्ञानं स 205/tha संशय इति । संशयसामान्यलक्षणपरं भाष्यं व्याचष्टे—तत्र विषयस्वरूपेति प्रत्ययोऽनवधारणात्मकश्चेति । आक्षेपपरिहारौ प्रथमसूत्र एव व्याख्यातौ । प्रत्ययशब्दस्य निश्चयवचनत्वमभ्युपेत्य व्याख्यानं प्रतीयत इति । परमार्थतस्तु प्रत्ययशब्दो ज्ञानपर्यायः । ज्ञानत्वं च सामान्यं संशयादिष्वप्यस्तीति न विरोध इति । § 430

समानधर्मोपपत्तेरिति व्याचष्टे—समानेति । विकल्प्याक्षिपति—किं पुनरिति । कस्मादिति । मा कार्षीद् द्रव्ये संशयम्, गुण एव कस्मात् न करोतीति प्रश्नार्थः । समाधत्ते—न, साधारणेति । यादृशं संख्याप्रचयपरिमाणभेदयोनि परिमाणं स्थाणुपुरुषयोः, तादृशमस्यापि पुरोवर्तिनो द्रव्यस्य परिमाणम् । तस्मात् सदृशपरिमाणधर्मस्य धर्मिण उपपत्तेरित्यर्थः । महत्त्वदीर्घत्वसामान्यधर्मयोगस्तु सन्नपि न संशयकारणम्, असादृश्ये तद्योगेऽपि संशयाभावादिति भावः । स्यादेतत् । उपपत्तिः सत्ता । न च सदृशो धर्मः सत्तामात्रेण संशयहेतुः अपि तूपलब्धः । न चोपलब्धिवाचकमत्रास्ति पदमित्यत आह—तस्योपपत्तिरध्यवसाय इति । यद्यप्ययमुपपत्तिशब्दः सत्तावचनस्तत्परश्च, तथापि पदान्तरसमभिव्याहारादवगम्यते सत्तामात्राभिधानेऽपि तदुपलब्धिर्विवक्षितेति । विषयविषयिणोरभेदविवक्षया सामानाधिकरण्यमुपपत्तिरुपलब्धिरिति । पृच्छति—कस्मादिति । अस्मदायत्ते हि शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामह इत्यर्थः । उत्तरम्—अनुक्तमपीति । विशेषापेक्ष इति वचनेन विशेषस्यापेक्षा उच्यते । अपेक्षाशब्दश्च यद्यपीच्छायां वर्तते, तथापीह जिघृक्षायां वाक्यसामर्थ्यात् । न च सा संशयस्य हेतुः, तस्याः संशये सति भावात् । तस्माद् विशेषापेक्षया जिघृक्षालक्षणयेह विशेषयोः पुरोवर्तिवस्तुसादृश्यात् स्मरणे सत्यग्रहणं लक्षणीयम्, यथा गङ्गाशब्दस्तीरसंबद्धमेव लक्षयति, न तु तीरमात्रम् । एवं बुभुत्सयापि स्मर्यमाणमेवागृह्यमाणं संबद्धं लक्षणीयम्, न त्वगृह्यमाणमात्रम् । अनेनैवाभिप्रायेण वक्ष्यति 206/tha भाष्यकारः विशेषस्मृत्यपेक्ष इति । तस्माद् विशेषग्रहणप्रतिषेधात् सामान्यग्रहणमभ्यनुज्ञातं भवतीत्यर्थः । परिहारान्तरमाह—अथ वेति । स्यादेतत्, उपपत्तिशब्दः सत्तावचनश्चोपलब्धिवचनश्च । तथा च विनिगमनायां को हेतुरित्यत आह—यः पुनरिति । नन्वभावः प्रमाणालम्बनमुक्तः, तत् कुतो न विरोध इत्यत उक्तम्—स्वतन्त्रमिति । अथ वा सत्तावाचकोऽप्यय-

१ र्शो ] विमर्श°*Om*nvt-J
६ व्याख्यातौ ] टी ३.२.१३
८ च ] तुnvt-C
१३ योनि ] °योगिnvt-C
१४ र्मिण ] उपपत्ति°nvt-C
१५ स्तु ] °न्यवद्धर्म°nvt-C
२६ योः ] पुरोवर्तिनोस्तुnvt-C
२९ तिषेधात् ] °न्यज्ञानमभ्य° nvt-C
३२ त् ] कथं nvt-C

मुपपत्तिशब्दः स्वाभिधेयविषयामुपलब्धिं लक्षयतीत्याह—विषयशब्देनेति । न चेयमलौकिकी लक्षणेत्याह— लौकिकमिति । यथा च धूमो न सत्तामात्रेण हेतुस्तथोक्तं प्रागिति । § 431

एकदेशिनामुपसंख्यानमुपन्यस्यति—अव्यवच्छेदेति । ते किल मन्यन्ते व्यवच्छेदहेतुरपि धर्मः समानो भवति । यथा कृतकत्वं साध्यधर्मिणि शब्दे दृष्टान्तधर्मिणि च घटादौ समानम्, न चासौ नित्यानित्यत्वसंशयहेतुः, अपि त्वनित्यत्वस्यायोगं साध्यधर्मिणि व्यवच्छिनत्ति । *अतोऽव्यवच्छेदहेतोरिति वक्तव्यमित्यर्थः । तदेतद् वक्तव्यं दूषयति—न समानेति । समानो हि धर्मः प्रतिसंबन्धिनमपेक्षते—केनेति । संशयपदेन च स्वविषयोपस्थापकेन परस्परविरोधिनौ तावुपस्थितौ, तेन ताभ्यां समान इति गम्यते । तेन विवक्षिततज्जातीयवृत्तित्वे सत्यन्यजातीयवृत्तिरेव गम्यते । न चैवं कृतकत्वम् । तस्मात् न वक्तव्यमव्यवच्छेदहेतोरिति । समानशब्दार्थः सादृश्यं तत्र नास्तीत्यर्थः । अत्रैवोपलब्धीत्यादिपदद्वयं शङ्कापूर्वकं योजयति—सोऽयं साधारण इति । उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इति । शिरःपाण्यादीनामुपलब्धिर्वक्रकोटरादेरनुपलब्धिः पुरुषस्य साधकं प्रमाणम् । तद्विरुद्धस्य वा शिरःपाण्यादेरनुपलब्धिर्वक्रकोटरादेरुपलब्धिः पुरुषस्य बाधकं प्रमाणम् । तद्धि पुरुष एवायं वा इदन्तया व्यवतिष्ठते, इदंतानिषेधेन वा नायं पुरुष इत्यनिदन्तया व्यवतिष्ठते तदभावो व्यवस्था । तदनेन साधकबाधकप्रमाणाभावो दर्शितः । विशेषाकाङ्क्षायां चेति विशेषस्मृतिर्दर्शिता । § 432

207/tha

विमर्शपूर्वकं समस्तमित्यवधारयति—किमिदमिति । तत्रैकपदपरिग्रहे दोषमाह—यदि समानेति । विशेषः शिरःपाण्यादिः । विशिष्यते ह्यनेन पुरुषः स्थाणोरिति । अनुपलब्धसामान्यस्यापि क्वचिदुपलब्ध्यनुपलब्ध्यव्यवस्थास्तीति । यथा सप्तमे रसे दशमे वा द्रव्ये । न हि तत्र साधकं बाधकं वास्ति प्रमाणम् । न च संशयः । विशेषापेक्ष इत्येतावतीति । तद् यथा हस्तिनं दृष्टा तत्संबन्धिनौ स्थूणाहस्तिपकौ स्मरति न च तत्र सन्दिग्धे । § 433

द्विपदपरिग्रहे दोषमाह—एवं समानेति । नौदोलाद्यारूढो हि गच्छन् विदूरे आरोहपरिणाहवद्वस्तुदर्शनेऽपि सत्यपि च साधकबाधकप्रमाणाभावे विशेषस्मृत्यभावात् नग इति वा नाग इति वा न सन्दिग्धे । एवमुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति पदद्वये विधीयमानेऽन्यतः स्मर्यमाणाद् विशेषात् सदृशधर्मवति धर्मिण्यनुपलभ्यमाने संशयः स्यात् । अस्ति हि तदा विशेषस्मृतिः साधकबाधकप्रमाणाभावश्च, नो खल्वनुपलभ्यमाने समानधर्मे धर्मिणि तद्गता वक्रकोटरादयो वा शिरःपाण्यादयो वा शक्यग्रहा इति । यदायं द्रष्टेति । य-

४ ते ] हि nvt-C
६ चासौ ] नित्यत्वसं° nvt-C
७ * ] तस्माद° nvt-C
१८ स्था ] °भावोऽव्यव° nvt-J
२४ च ] प्रमाणानां चnvt-C
२९ इति ] इति चnvt-C

दा खल्वयं द्रष्टा प्रतिपरुरङ्कुरोद्भेदपुलकिताभिर्मन्दमलयमारुतान्दोलनललितलास्यशालिनीभिः शाखाभिर्मधुमदमुदितमधुपमालाशिञ्जितवल्लकीवाद्यमनोहराभिर्मत्तपुंस्कोकिलकुलविपञ्चमानपञ्चमाभिरारब्धसङ्गीतकं सहकारतरुमनुभूयाथ विदूरवर्ती कुञ्जरसदृशधर्मवन्तमनुभवति, तदास्यास्ति समानधर्मोपलब्धिः। अस्ति च करितरुरूपविशेषस्मृतिः, न तु साधकबाधकप्रमाणाभाव इति न संशेते। कतिपयव्यक्त्याश्रयत्वं सहकारत्वादेर्विशेषस्याल्पविषयत्वम्। आरोहपरिणाहादेस्तु बहुव्यापित्वं महाविषयत्वम्। नानार्थावमर्शनं च विरुद्धार्थावमर्शनं द्रष्टव्यम्। तदनेन स्थाणुपुरुषयोरित्यादि भाष्यं व्याख्यातम्। पश्यन् इत्युपपत्तिविवरणम्, विशेषं बुभुत्समान इति विशेषापेक्ष इत्यस्य विवरणम्। किं स्विदिति विमर्शविवरणम्। स्यादेतत्। संशयोत्तरकाला बुभुत्सेति, कथं बुभुत्समानः संशेत इत्यत उक्तं भाष्यकृता समानमनयोरिति। विशेषापेक्षाशब्देनेच्छावाचिना अगृह्यमाणविशेषस्मरणं लक्षितमिति 208/tha
भावः। सेयं साधकबाधकप्रमाणानुपपत्तौ सत्यां समानधर्मोपलब्धिर्विनश्यदवस्था विशेषस्मृत्या सहाविनश्यदवस्था एकस्मिन् क्षणे सती संशयज्ञानस्य हेतुरिति सिद्धम्। त्रिपदपरिग्रहमनेकधर्मोपपत्तेर्विप्रतिपत्तेरित्यत्रापि योजयति—एतेनेति। द्वे द्वित्वेनैकीकृत्याद्यानन्तरयोरिति द्रष्टव्यम्। § 434

अनेकधर्मोपपत्तेरित्यत्र भाष्यकृतो व्याख्यां ग्रहीतुमेकदेशिव्याख्यानमुपन्यस्य दूषयति—अनेकेति। शब्दो हि संयोगजः। संयोगजत्वं हि कार्ये द्रव्ये गुणे च रूपादौ शरीरादिक्रियायां चास्तीति द्रव्यगुणकर्मणां समानम्। तस्मादनेकस्य धर्मश्चरितार्थः। एवं शब्दगतोऽनेकोऽपि धर्मः समानतयैव द्रव्यत्वादिसन्देहहेतुः त्रिषु, संयोगजत्वं साधारणं सत्त्वादिना निर्भक्तस्य, निर्गुणत्वं गुणकर्मणोः। एवं क्षणिकत्वं द्रव्यगुणकर्मणामिति समानधर्मोपपत्त्या गतार्थमित्यर्थः। पृच्छति— अथेति। भाष्यकृद्व्याख्ययोत्तरम्—असाधारण इति। पुनः पृच्छति—कथमिति। समासपदशब्देन तदेकदेशोऽनेकशब्दो लक्ष्यते, समासगतेनानेकशब्देनेत्यर्थः। उत्तरम्—समानेति। एतदुक्तं भवति। यतोऽनेकस्मात् समानासमानजातीयादेष स्वाश्रयं व्यावर्तयति, अतोऽनेकोपादानकव्यावृत्तिहेतुकत्वात् लक्षणयानेकइत्युच्यते। तदनेन समानजातीयमसमानजातीयं चानेकमिति भाष्यं तस्माद् विशेष इत्यध्याहृत्य व्याख्यातम्। अध्याहृतविशेषपदविवरणं विशेषको धर्म इति। संबन्धसामान्यविवक्षया तु षष्ठी तस्यानेकस्येति। लक्षणाबीजान्तरमाह—तस्य चानेकस्येति। निवर्त्यनिवर्तकसंबन्धेनानेकशब्देन धर्मो लक्ष्यत इत्यर्थः। तदनेन विनैवाध्याहारं समानजातीयमसमानजातीयं चानेकम्। तस्य धर्मो निवर्तकतयेति व्याख्यातम्। न त्वत्र समासभ्रान्तिः कर्तव्या। दर्शयिष्यति हि बहुव्रीहिमिहैव वार्त्तिककारः। *तदेवं लक्षणाबीजद्वयोपन्यासेन

४ नुभूयाथ] आलोक्याथnvt-C
२१ स्य] निर्विभक्तस्यnvt-C
३४ हुव्रीहिमिहैव] वा. १. १. २३nvt-C
३४ *] तदनेनnvt-C

असाधारणो धर्म इति ग्रहणकवाक्यं व्याख्यातम् । प्रकारान्तरेणानेकधर्मपदं
209/tha व्याचष्टे—एकानेकेति । एकं चानेकं च तदुभयमनेकं तस्यानेकस्य प्रत्ययहेतुर्धर्मोऽनेकधर्मः भेदाभेदप्रत्ययहेतुरित्यर्थः । विभागजत्वं विभागजानां शब्दानामन्योन्यस्याभेदप्रत्ययहेतुः, तदितरेभ्यश्च भेदप्रत्ययहेतुः । तदिदमाह—यतो विभागजत्वात् एष प्रत्ययो भवतीदं विभागजं शब्दजातम् एकम् । इदं च ततोऽन्यद् अनेकं भिन्नम् । तत्र य एव एकप्रत्ययहेतुः धर्मोऽभेदः स एव अनेकप्रत्ययहेतुर्विशेषः । जात्यभिप्रायं चैकवचनम् । सदादिर्हि धर्मो द्रव्यगुणकर्मणामभेदप्रत्ययहेतुः सामान्यादिभ्यश्च शब्दं निर्भजति । तदिदमाह—यतः सदादेरेष प्रत्ययो भवतीदमेकं यतश्च विभागजत्वादेष प्रत्ययो भवतीदमनेकमिति, तस्मात् सिद्धमेकं चानेकं च । अनेकमिति तत्प्रत्ययहेतुरुपचारेणानेक इति । तदिदमुद्भाष्यं व्याख्यानम् । अत्रोदाहरणमाह—यथेति । द्रव्यत्वादिकोटित्रयविषयसंशयप्रदर्शनार्थमुक्तं सामान्यविशेषसमवायेभ्य इति । § 435

सदनित्यं द्रव्यवत्कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणाम् अविशेषः ॥ तेनानेन सदादिना निर्भक्तस्य पृथक्कृतस्येत्यर्थः । § 436

स्यादेतत् । यद् येन सहचरितं दृष्टं तत् क्वचिद् दृश्यमानं तत् स्मारयत् तद्विरुद्धेनापि च संबन्धादनिश्चाययत् संशयहेतुर्भवति, यथा समानो धर्मः । असाधारणस्तु धर्मो विभागजत्वं नर्ते शब्दात् क्वचित् पृथिव्यादौ वा उत्क्षेपणादौ वा गन्धादौ वा दृष्ट इति कथं स्मारयेत्, अस्मारयद् वा कथं तत्र संशयं जनयेत् ? तस्मात् कोऽयं भवेदित्यतो धर्मादिति जिज्ञासामात्रमुत्पादयेत्, न त्वयं वायं वेति संशयमित्यत आह—न हीति । कस्मात् न दृष्टमित्यत आह—सर्वत्रासंभवात् । न हि द्रव्यादेर्विभागतो जन्म संभवति, तदन्वयव्यतिरेकाननुविधानादित्यर्थः । नन्वत एवोक्तं न
210/tha संशयहेतुरित्यत आह—विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति । अयमर्थः, यद्यपि विभागजत्वं न द्रव्यादौ क्वचिद् दृष्टम्, तथापि तद्व्यतिरेकः प्रत्येकं द्रव्यादौ दृष्ट इति विभागजत्वेन सदाद्यविशेषवान् शब्दो द्रव्यकर्मभ्यां व्यावर्तमानः किं गुणः, गुणकर्मभ्यां व्यावर्तमानः किं द्रव्यम्, गुणद्रव्याभ्यां व्यावर्तमानः किं कर्मेति व्यतिरेकमुखेन तत्तत् स्मारयन् असाधारणो धर्मो भवति संशयकारणमिति । देशयति—ननु चेति । § 437

अयमभिसन्धिः । वंशे पाट्यमाने वंशदलयोः क्रिया, ततस्तयोर्मिथो विभागः, ततो वंशदलावरुद्धनभोभागविभागः । सोऽयं विभागजो विभागो न वंशदलकर्मजः । अवयवक्रिया हि तदवयवावरुद्धनभोभागविभागजनिका द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकत्वेन व्याप्ता विकसत्कमलकुड्मलद-

२ नेकं ] तदेतस्या°nvt-C
६ र्मोऽभेदः ] अभेदप्रत्ययहेतुःnvt-C
७ हेतुर्विशेषः ] हेतुर्धर्मोऽनेकधर्मो भेदप्रत्ययहेतुर्वि°nvt-C
८ ति ] निर्विभजतिnvt-C
१२ मुक्तं ] °त्रयविशेषे सं°nvt-C
१५ अविशेषः ] वै. सू. १. १. ८
१५ स्य ] निर्विभक्तस्यnvt-C
२० त्र ] तत्र*Om*nvt-C

लेषु दृष्टा । न हि तत्र मुकुलिताद् विकासिकमलमन्यत् आकुञ्चितप्रसारिताङ्गुलिकरतलवत् तत्त्वेन प्रत्यभिज्ञायमानत्वात् । वंशदलक्रियापि चेत् तादृशी, नूनमनयापि द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनिकया भवितव्यम् । तथा च द्रव्यं कार्यमपि न नश्येत् । तस्मात् नानया वंशदलाकाशविभागो जनयितव्यः । न चान्यदस्य कारणं संभवति । तस्माद् वंशदलक्रियाजनितो दलयोर्विभागः कार्यैकार्थसमवेतः तदवरुद्धाकाशप्रदेशविभागस्यासमवायिकारणमेषितव्यः । एवं च गुणः शब्दो विभागजत्वाद् विभागजविभागवदिति विभागजत्वं गुणत्वनिश्चयहेतुरिति सिद्धं भवतीति । परिहरति—अनभ्युपगतविभागजविभागस्यैतद् विभागजत्वम् एवं संशयकारणं भवति । अनभ्युपगमबीजं च कुतः पुनरेतदेवमवगतं पद्मपत्रावयवक्रिया विभागद्वयजनिकेति, विभागद्वयक्रमकल्पनायां प्रमाणाभावादिति चेत् ? हन्त, वंशदलविभागयोरपि तुल्यम् । ननूक्तं द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकं स्यात् कर्म, ततश्च द्रव्यनाशो न भवेदिति । अथ विपर्ययः कस्मात् न भवतीति वंशदलद्वयक्रियैव विभागद्वयजनिका, पद्मपत्रावयवक्रिया त्ववयवविभागजनिका, तदवयवाकाशविभागस्त्ववयवविभागजन्मा । यदि तु पद्मपत्रावयवक्रिया उभयजनिका भवेत् वंशदलक्रियैव द्रव्यारम्भकसंयोगप्रतिद्वन्द्विनं 211/tha विभागं जनयेदिति । न चान्यतरत्र विभागद्वययौगपद्यनिश्चयः क्रमप्रमाणाभावश्च तुल्यः । तस्मात् पद्मपत्रावयवक्रियाविभागजनकत्वसन्देहादशक्यविनिश्चयो व्याप्यव्यापकभावः । क्रियावैलक्षण्यात् तु स्वहेतुवैलक्षण्यजन्मनः कार्यस्य विभागस्य वैलक्षण्यं स्यात्, यदेको द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी अप्रतिद्वन्द्वी चेतरः, तथापि चैतद्वैलक्षण्यं क्रियाया अभ्युपेतव्यम् यदेका विभागमेकं जनयति । अन्या तु विभागद्वयमिति । तस्मादेतदुदाहरणबलेन न विभागजविभागसिद्धिः । यस्त्वङ्गुलिकर्मानन्तरमङ्गुलितरुविभागो हस्ततरुविभागः, शरीरतरुविभागश्च दृश्यते, तत्राङ्गुलितरुविभागमङ्गुल्याश्रया क्रिया करोतु, हस्ततरुविभागं तु न शक्ता जनयितुम्, तस्याः स्वाश्रयसमवायात्, स्वाश्रयसमवेतकार्यजनने च क्रियायाः सामर्थ्यावधारणात् । तस्मात् हस्तादितरुविभागः क्रियातोऽसंभवन्नङ्गुल्यादितरुविभागमेव कार्यैकार्थसमवायलक्षणया प्रत्यासत्त्या निमित्तीकरोतीति विभागजविभागसिद्धिं मन्यते, तं प्रत्याह—यः पुनरिति । अस्तु वा विभागजो विभागः, तथापि विभागजत्वमीदृशमसाधारणमेवेत्यत आह—अस्तु वा तस्याभ्युपगतविभागस्यापि विभागजत्वमसाधारणं विशिष्टम् । तदेव दर्शयति—विभागजेति । पाट्यमाने हि वंशे शब्दोत्पत्तौ वंशदलयोर्मिथो विभागो निमित्तकारणम् । वंशदलावरुद्धाकाशविभागस्त्वस्यासमवायिकारणम्, न तु भेर्याकाशसंयोगवत् वंश-

१ लेषु ] °कुड्मलेषुnvt-C
१२ पि ] °दलयोरपिnvt-C
१५ तु ] चnvt-C
१७ त्र ] विभागविषययौ°nvt-C
१८ श्च ] °निश्चयक्रम°nvt-C
२७ मेव ] °कार्यकारणैकार्थ°nvt-J

दलाकाशसंयोगोऽसमवायिकारणं भवितुमर्हति । तथा हि प्रयोगः, योऽयं
वंशदलविभागनिमित्तः शब्दः, स निमित्तसमानजातीयासमवायिकारणजन्यः,
तदसाधारणनिमित्तजन्यशब्दत्वात् । यो यः शब्दो यदसाधारणनिमित्तजन्मा,
स सर्वस्तज्जातीयासमवायिकारणजन्यः, यथा भेरीदण्डसंयोगनिमित्तः श-
ब्दो भेर्याकाशसंयोगासमवायिकारणकः । तथा चायम् । तस्मात् तथेति
। तदेवं वंशदलविभागलब्धजन्मना वंशदलाकाशविभागेनासमवायिकारणेन
212/tha जनितः शब्दः । तदेवं विभागजविभागासमवायिकारणकत्वं शब्दस्य, तद-
पि यद्यप्यङ्गुल्याकाशविभागजहस्ताकाशविभागासमवायिकारणे कायाकाश-
विभागेऽस्ति, तथापि कारणमात्रविभागजविभागासमवायिकारणकत्वादिति
हेतुः भाष्यकारेण विभागजत्वात् इत्यनेन सूचितः । न चाङ्गुल्याकाशविभाग-
पूर्वकः कायाकाशविभाग एवम् । स हि कारणाकारणविभागपूर्वको, न तु
कारणमात्रविभागपूर्वकः । तदिदमुक्तम्—विभागजविभागासमवायिकारण-
कः शब्दो नान्यः पदार्थ इति । ननु सहचरितो दृष्टः स्मारयन् विशेषसंशय-
हेतुर्भवति, न तु यो व्यावृत्तः तेन सहास्यासाहचर्यादिति शङ्कामपनेतुं भाष्य-
कारीयमुत्तरमाह—तुल्यजातीयेष्विति । यद्यपि व्यतिरेकमुखेनासाधारणः श-
क्तः स्मारयितुम्, तथापि भाष्योक्तमप्युक्तम् । यत् खलु सदादिरूपसंपन्नं
विशेषवत् तत्समानजातीयेभ्योऽसमानजातीयेभ्यश्च व्यावृत्तम्, यथा पृथिवी
द्रव्यम् । अबादिभ्यश्च द्रव्यान्तरेभ्यो गुणकर्मभ्यश्च विजातीयेभ्यो गन्धवत्त्वेन
व्यावृत्तं द्रव्यजातीयम् । एवं रूपत्वेन रूपं गुणः । उत्क्षेपणत्वेनोत्क्षेपणं कर्म
। तथाविधः शब्दः सदादिरूपसंपन्नो विभागजत्वेन समानासमानजातीयेभ्यो
विशिष्यते । तस्माद् भवति द्रव्यं गुणः कर्म वेति संशय इति । पूर्व-
व्याख्यानतोऽनेकशब्देनासाधारणधर्मो लक्ष्यत इत्युक्तम् । संप्रति समान-
शब्दपर्यालोचनयाप्यनेकपदमसाधारणे वर्तते लक्षणयैवेत्याह—समानधर्मस्य
संशयकारणत्वेन उपयोगाद् वेति । समानं हि प्रतियोगितया असमानं बुद्धौ
सन्निधापयति । तत्र द्वयस्यापि समानशब्देन श्रुत्यर्थाभ्यामुपात्तस्य समान-
स्य धर्मस्यासमानस्य च, समानस्य संशयकारणत्वेनोपयोगादिति योजना ।
पृच्छति—कस्मादिति । अस्मदायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामह
इति भावः । उत्तरम्—नैवमिति । असाधारणो हि धर्मो व्यतिरेकमुखेन
संशयहेतुः । स चानेकस्माद् व्यावृत्त्या सिध्यति । सा च लाक्षणिकानेक-
पदाधीना नासमानपदात् लभ्यत इति प्रयोजनवल्लाक्षणिकपदोपादानम् ।
लक्षणैव चेयम् अनेकस्माद् व्यावृत्तो धर्मोऽनेकधर्म इति विग्रहेण निर्वर्ण्यते
213/tha इति । अभ्युच्चयमात्रमाह—लाघवं वेति । असाधारणस्य संशयकारण-
त्वे व्यावृत्तिः प्रयोजिकेति मन्वानश्चोदयति—यद्यनेकेति । परिहरति—नैष
दोष इति । व्यभिचाराव्यभिचारौ हि संशयनिर्णययोः प्रयोजकौ, नान्वय-
व्यतिरेकमात्रमित्यर्थः । चोदयति—यदि तर्हीति । सपक्षासपक्षसाधारण्यं हि

३ त्वात्] °जन्यत्वात्nvt-C
१४ व्यावृत्तः] तेन साह°nvt-C
३५ र्थः] °मात्रे इत्यर्थःnvt-J

हेतोर्व्यभिचारः । स चेत् संशयस्य कारणम् ? हन्त, समानधर्मोपपत्तिरेव सर्वत्र संशयकारणमिति कृतमनेकग्रहणेनेत्यर्थः । परिहरति—सत्यमिति । *सपक्षासपक्षसाधारण्यं हि हेतोर्व्यभिचारः । स च संशयस्य प्रयोजकः । तथाप्येकस्यान्वयः साधारणोऽपरस्य व्यतिरेक इत्येतावतोभयोपादानमित्यर्थः । § 438

एवमनेकधर्मोपपत्तेरिति स्वमते व्याख्याय परमतव्याख्यानं दुषयितुमुपन्यस्यति—नञ इति । नित्यः शब्दः श्रावणत्वात् शब्दत्ववदित्येकः पञ्चरूपोपपन्नोऽव्यभिचारी हेतुः । अनित्यः शब्दः कृतकत्वाद् घटवदिति चायमपरः पञ्चरूपोपपन्नोऽव्यभिचारी हेतुरिति । तदेतद् दूषयति—तदयुक्तमिति । न ह्यव्यभिचारिणौ पञ्चरूपोपपन्नावित्यर्थः । न चायं प्रतिवादिनः प्रयोगोऽपि युक्त इति । विरुद्धशब्दस्यार्थो विरुद्धार्थ इति, स्वरूपमनयोर्विरुद्धं परस्पराभाववदित्यर्थः । विशेषदर्शनादुपजात इति । संशयस्य हि विशेषादर्शनं जनकम्, विशेषदर्शनं च निवर्तकमिति । स चेत् त्वन्मते निवर्तकादुत्पद्येत, अव्यभिचारिहेतुजनिताद्विशेषदर्शनात् नास्य निवृत्तिः स्यादित्यर्थः । न च यदा निवर्तकत्वमस्यास्ति तदा जनकमपीत्याह—न हि विशेषदर्शने सतीति । § 439

स्यादेतत् । प्रत्यक्षमेव स एवायं गकार इत्येवमाकारं प्रत्यभिज्ञासमाज्ञातं शब्दस्य स्थेमानमाकलयत्,

तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति ।§ 441

इति नित्यत्वं परिच्छेत्स्यतीत्यत आह—नायमर्थः प्रत्यक्षस्य विषयः । तदेव हि प्रत्यक्षं संशयस्य निवर्तकं यदनन्यथासिद्धम्, यथौष्ण्यग्राहि वह्नेः । इदं तु सादृश्ये नापि संभवात् स्वयं सन्दिग्धं सन्न संशयोच्छेदायालमित्यर्थः 214/tha
। मा भूत् प्रत्यक्षस्य विषयः, भवति त्वागमस्य । नो खलु क्षणिकः शब्दोऽर्थप्रत्यायने समर्थः, तस्यान्वयव्यतिरेककालानवस्थायिनोऽशक्यसमयत्वेनार्थप्रतिपत्तेरनुपपत्तेः । तस्माद् यद्यपि साक्षान्नित्योऽहमित्यागमो नाभिधत्ते, तथापि विदितसंगतेरर्थप्रत्ययं कुर्वन्नात्मनो नित्यतामाक्षिपन्नित्यताविषयो भवति । यथाहुः

नित्यस्तु स्याद् दर्शनस्य परार्थत्वात् ।§ 442

मी. सू. १. १. १८ इत्यत आह—नागमविषयः । यद्यपि वर्णव्यक्तयः क्षणिकाः, तथापि स्वस्वसामान्यविशेषगत्वाद्युपहिता गवादिव्यक्तय इव गोत्वाद्युपधानाः शक्यसंकेता इति न नित्यतामाक्षिपत्यागम इत्यर्थः । भवतु किं नो बाध्यत इति । न खलु चन्द्रमसः परभागे हरिणसदसद्भावसन्देहः शक्यः कदाचिदप्युच्छेत्तुमस्मदादीनामित्यर्थः । कथं न बाध्यत इति

३ *] सत्यं सपक्षा°nvt-C

१९ ति] श्लोक वा° शब्दनित्यताधिकरणम्

३६६

। सन्दिग्धनित्यानित्यभावे शब्दे कृतकत्वं दृष्टमिति नानित्यत्वेन स्वभावतः प्रतिबद्धम् । तथा च न बुद्ध्यादीनामनित्यत्वं साधयितुमर्हतीत्यर्थः । सर्वमिति । *कृतकत्वप्रयत्ननान्तरीयकत्वप्रत्ययभेदभेदित्वादीत्यर्थः । सर्वं चानुमानमिति । यदि च पञ्चरूपोऽपि हेतुः, संशयकारणं सर्वमेवानुमानमिति सर्वमप्रमाणं स्यादित्यर्थः । वैनाशिकाः प्राहुः नित्यासंभवादिति । न, बाधापरिज्ञानादिति । बाधाविषयापरिज्ञानादित्यर्थः । स्वदेशे परोत्पत्तिप्रतिबन्धकत्वं सप्रतिघत्वम् । सौत्रान्तिकमते हि रूपं सप्रतिघमिष्यते मूर्तं च, नित्य एवेति वा अनित्य एवेति वा अभिलापो नोपपद्येत, स्थाणुरेवेति वा पुरुष एवेति वा अभिलापः । चोदयति—नैवं भविष्यतीति । मा भूदभिलाप इत्यर्थः । परिहरति—व्याहतमिति । स एवैकग्रन्थेनाह—ननुचेति । तदेवं पञ्चरूपयोर्हेत्वोरेकत्र समवायाभाव उक्तः । यदि पुनरसत्प्रतिपक्षरूपरहितयोरेकत्र संभवोऽङ्गीक्रियते, तथा च संशयहेतुत्वमित्यभिप्रायेण शङ्कते—अथ कृतकत्वेति । निराकरोति—तथापीति । प्रत्येकं सत्प्रतिपक्षत्वम्, मिलितयोस्त्वसाधारणत्वम्, तादृशोरन्यत्र अदर्शनादित्यर्थः । तत् किमिदानीं सत्प्रतिपक्षतया कृतकत्वमसाधनमेव शब्दानित्यत्वे, तथा च बहु व्याहतं भवतीत्याशयवान् पृच्छति—यदा पुनरेवंभूताविति । उत्तरम्—तदा तयोरिति । ननु कृतकत्वस्य साध्यत्वात् श्रावणत्वस्य च सिद्धत्वात् प्रथमभाविना नित्यत्वानुमानेन सिद्धाङ्केनापहृतविषयं चरमभाविसाध्याङ्कमनित्यत्वानुमानमेव बाध्यतामित्यत आह—यत्नश्च क्रियमाण इति । सिद्धमपि श्रावणत्वमनुनासिकताद्यनित्यधर्मसाधारणतया सव्यभिचारं सन्नित्यत्वस्य साधनं न भवितुमर्हतीति । कृतकत्वस्य तु पाञ्चरूप्यम् । नित्यत्वस्य च प्रमाणबाधनमुपपादयिष्यत इत्यर्थः । § 443

विप्रतिपत्तेरित्यस्य व्याख्यानम्—विप्रतिपत्तेरिति । यद्यपि विरुद्धा प्रतिपत्तिर्ज्ञानं विप्रतिपत्तिः, तथापि तस्या वादिप्रतिवादिगताया अत्यन्तपरोक्षत्वात् संशयकारणत्वानुपपत्तेः स्वकार्यं प्रवादं लक्षयतीत्यर्थः । अत्र भाष्यकारः उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च पृथक् संशयकारणत्वं मत्वा समानधर्मोपपत्तेरित्यनेन गतार्थतां परिहरन्नाह स्म—पूर्वः समानोऽनेकश्चेत्यादि । तदुपन्यस्य वार्त्तिककारो दूषयति—तत्रेति । नो खलु समानानेकधर्मोपलब्धौ सत्याम्, सत्यां च विशेषस्मृतौ *साधकबाधकप्रमाणासद्भावे संशयो भवतीत्युक्तम् । तस्मात् नोपलब्ध्यनुपलब्ध्यव्यवस्थे पृथक् संशयकारणे इति । विशेषमपि दूषयति—समान इति । ननु यदि नास्ति भेदः, तत् किमिदानीं सर्वेषां ज्ञातृस्थत्वाविशेषेण त्रयाणामपि संशयकारणानां समानानेकविप्रतिपत्तीनामभेदः, तथा च पृथगुपादानवैयर्थ्यमित्यत आह—समानानेकधर्मयोरिति । पुनश्चोदयति—समानधर्मः सर्व एवायमिति । अयमभिसन्धिः । असाधारणो ह्यदृष्टपूर्वः क्वचिदपि न संशयं

३ *] कृतकत्वं प्र°nvt-C
४ णं] सर्वमनुमानमेवमितिnvt-C
११ वायाभाव] समावेशाभा°nvt-C
२१ त] वा २ं२ं२२
२८ *] °प्रमाणसद्भावे nvt-J

कर्तुमुत्सहते । यत् पुनरसाधारणवत्त्वं संशयहेतुत्वेनोपवर्णितं भाष्यकृता तत् समानमेव, न त्वसाधारणम्, यथाहुः, § 444

अन्योऽसाधारणो धर्मस्तद्वत्तान्या च दृश्यते ।
सर्वसाधारणी सा चेदिष्टा संशयकारणम् ।
ततः साधारणस्यैव सिद्धा संशयहेतुता ॥§ 447 216/tha

यच्च वार्त्तिककारेण सर्वतोव्यावृत्त्या असाधारणस्य संशयकारणत्वमुक्तम्, तत्रापि तदभावस्य साधारणस्य संशयहेतुत्वे किमायातमसाधारणस्य ? यथाहुः,

सर्वतोऽस्य निवृत्तत्वादभावात् संशयो यदि ।
अनन्यवृत्तिरूपस्य ततोऽसाधारणस्य किम् ॥§ 450

इति । § 451

विप्रतिपत्तिरपि विरुद्धहेतुद्वयसमुत्था एकस्मिन् संशयकारणम् विरुद्धहेतुसमवायश्चासाधारण एव । स च साधारणे निविशते इति सूक्तम् सर्व एवायं समानधर्म एवाभिधीयत इति । परिहरति—न, सूत्रार्थापरिज्ञानादिति । न वयं सर्वत्र साधारणमपजानीमहे अन्वयव्यतिरेकव्यभिचारवत्कृगतत्वभेदमात्रमाद्रियमाणाः कारणभेदेन त्रिविधं संशयमाचक्ष्महे इत्यर्थः । § 452

वार्त्तिककारो भाष्यकारमतमुपन्यस्य दूषयति—अपरे पुनरिति । साधकबाधकप्रमाणाभावरहितं त्रयमपि न संशयकारणमित्युक्तमित्यर्थः । अपि चैतयोः पृथक् संशयकारणत्वेऽतिप्रसङ्गात् निश्चयपूर्वं न प्रवर्तेत लोकः, तथा च लोकविरोध इति दर्शयति—उपलब्ध्यनुपलब्ध्योर्द्वैविध्याच्चेति । न चास्य क्वचिदाश्वासो निःशङ्कता, न चानभ्यासदशापन्ने उपलब्ध्यनुपलब्ध्यव्यवस्थायां संशय इति वाच्यम्, अनभ्यासदशापन्ने हि दूराद् वह्निज्ञाने उपलब्ध्यव्यवस्थाया अपि न नागो वा नगो वेति संशेरते, किं तु किंशुककुसुमनिचयो वा उषर्बुधो वेति, तत्र समानधर्मोपपत्तिरेव कारणमितरसहिता । एवमयोग्यानुपलब्धिमात्रादपि न संशयो विना समानधर्मादिदर्शनमित्युक्तम् । विकल्प्य दूषणान्तरमाह—येषां चेति । सामग्रीभेदेन भेदे त्रैविध्यं संशयस्य सामग्रीनिवेशिकारणभेदेन तु न पञ्चविधः, अपि त्वनेकविध इत्यर्थः ॥ § 453

217/tha

समानानेकधर्मोपपत्तेरित्यत्र षष्ठीतत्पुरुषं मत्वा आक्षिपति—न समानधर्मग्रहणादिति । बहुव्रीहिं मत्वा समाधत्ते—अयं परिहार इति । अथेति । कश्चासौ विशेषश्चेति किंविशेषः अनुपलब्धपूर्वो विशेषोऽस्येत्यर्थः । उपलब्धपूर्वायां व्यक्तौ संशये तद्गता विशेषाः सुस्मूर्षिताः तज्जातीयव्यक्त्यन्तरसंशये त्वन्यगतास्ते सामान्यद्वारेणोपलब्धा एवेति—सामान्यप्रत्यक्षादिति । सामान्य-

१३ ण ] °हेतुद्वयसमावेश° nvt-C
१९ क् ] °संशयहेतुत्वे nvt-J
२१ स्थायां ] °स्थायाः nvt-C
२३ ते ] संशयः nvt-C

वानेव सामान्यः । यथा सामान्योऽयं धर्मसेतुर्नृपाणाम् इति । सामान्यश्चासौ प्रत्यक्षश्चेति धर्मी तथोक्तः । अव्यवस्थितविशेषत्वं साधकबाधकप्रमाणाभाव इत्यर्थः ॥ § 454

बौद्धाभिमतं संशयलक्षणमुपन्यस्यति—अन्ये त्विति । निगूढाभिप्रायो दूषयति—तैरपीति । अविदिताभिप्रायः शङ्कते—धर्मी चेदिति । दूषणवादी स्वाभिप्रायमुद्धाटयति—यदि तावदिति । बौद्धानां हि राद्धान्ते न रूपादिधर्माश्रयः कश्चिदस्ति धर्मी । ततश्च सिद्धान्तव्याकोपः । यदि त्वाह भवतु राद्धान्तव्याकोपो न हि शास्त्राश्रयो वाद इति, तत्रापि दोषान्तरमाह—धर्मधर्मिणोश्चेति । अथाप्यस्मद्दिशेति । समानानेकधर्मपदवद् बहुव्रीहिरित्यर्थः । सामान्यशब्दस्तु भवितरि दृष्टो यथा,

सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः ।§ 456

इति भावः । व्यर्थं चाभिधानमिति । सामान्यविशेषतद्वदभ्युपगमेऽपि तद्वतोऽश्रवणात् साधर्म्यस्य सामान्यस्य विशेषा इति गम्येत, न च सामान्यस्य विशेषा इति विरुद्धार्थमभिधानं स्यादित्यर्थः । वैशेषिकलक्षणे हि विशेषाप्रत्यक्षादित्यनेन साधकबाधकप्रमाणाभावो दर्शितः । इह त्वसौ वक्तव्यः । तस्मात् न्यूनं बौद्धलक्षणमित्याह—उपलब्धीत्यादि । यदि च साधर्म्यदर्शनादित्यनेनान्वयमात्रव्यभिचारः अभिमतो बौद्धेन ततोऽनेकधर्मदर्शनादिति वक्तव्यमिति । तदेवं सामान्यलक्षणम्, एकम्, त्रीणि च विशेषलक्षणानीति स्थितम् ॥ § 457

तदेतानि चत्वारि लक्षणानि पुञ्जीकृत्य विचारयति—समानेति । यदि तावत् संशयसामान्यलक्षणे स्थिते त्रीणि विशेषलक्षणानि ततः संशयत्वेनोपगृहीतानां त्रयाणां परस्परव्यवच्छेदकमात्रं लक्षणं वक्तव्यम् । ततः समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्येतावन्मात्रं वक्तव्यम् । कृतमत्र शेषेण, तन्मात्रादेव परस्परव्यवच्छेदसिद्धेः । तस्मात् परस्परव्यवच्छेदमनपेक्ष्य संशयकारणकथनपरमेतत् सूत्रम् । तथा चान्यान्यपि संशयकारणानि सन्तीति तान्यपि वक्तव्यानि । यदा खल्वयमात्मनः शमादौ संशेते, किमहं चन्दनवनितादिसन्निधाने रज्ये विरज्ये वेति, सोऽयमस्यात्मनः सन्निकर्षजन्मा संशयः आन्तरस्य शमादेर्विषयस्येति समाधत्ते—अस्तु तावदिति । यद्यपि तावन्मात्रेण समानजातीयव्यवच्छेदसिद्धिः, तथापि विजातीयनिर्णयादिव्यवच्छेदाय सामान्यलक्षणमनुवर्तनीयम् । तथा च प्रतिपत्तिगौरवं स्यादिति तल्लाघवाय शेषापेक्षा युक्ता । *आत्ममनःसन्निकर्षादयस्त्वत्यन्तसाधारणा विजातीयव्यवच्छेदायापि नालमिति नोपात्ता इति भावः । एवं संशयकारणावधारणादर्थात् संशयभेदावधारणमित्युक्तम् । संप्रतिकारणविशेषणत्वेन संशयस्वरूपमेवोच्यते इत्याह—स्वरूपनिर्देशो वेति । विप्रतिपन्नोऽपि

१० स्तु ] शब्दो हिnvt-C
३० च्छेदाय ] विजातीयव्यावर्तनायnvt-C
३१ * ] आत्मनःnvt-C
३४ त्वेन ] °विशेषेणnvt-C
३४ ते ] °रूप एवो°nvt-J

पुरुषः सन्दिग्धवत् प्रतिपाद्य एवेति मन्वानश्चोदयति—संशयवदिति । विप्रतिपन्नो न शिष्यः, किं तु जल्पवितण्डाभ्यां शिष्यतां नीत्वा सन्दिग्ध एव प्रतिपाद्य इत्यभिप्रायेण परिहरति—सत्यमिति ॥ २३ ॥ § 458

## यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥ १ । १ । २४ ॥

§ 459

उद्देशक्रमप्राप्तस्य प्रयोजनस्य लक्षणम्—यम—नम् । अत्रार्थशब्दो गौणमुख्यप्रयोजनावरोधार्थः । तत्र मुख्यं सुखदुःखाप्तिपरिहारौ, गौणं तु तत्साधनम् । अत्र भाष्यं—यमर्थमित्यादि । अत्राधिकृत्येत्यस्य व्याख्यान- 219/tha
म्—व्यवसाय विनिश्चित्येत्यर्थः । ससाधनौ च सुखदुःखाप्तिपरिहारावर्थः । न च सुखदुःखप्राप्तिपरिहारौ स्वरूपेण प्रवृत्तिनिवृत्तिगोचराविति तदुपायप्रवृत्त्यैव चेतनप्रवृत्तिगोचराविति दर्शयति—तदाप्तिहानोपायमनुतिष्ठतीति । प्रवृत्तिहेतुत्वादिति । यद्यपि सुखदुःखाप्तिहाने तदुपायाश्च सन्ति, तथापि सामान्येन ज्ञायमानानीच्छाद्युपहारमुखेन प्रवृत्तिहेतवः । ननु सूत्रेऽधिकृत्येत्यस्ति भाष्ये च व्यवसायेति, तत् कुतो न विरोध इत्यत आह—व्यवसायोऽर्थस्याधिकार इत्यादि । तदेतद् वार्त्तिककारो व्याचष्टे— यमर्थमधिकृत्येति, व्यवसायेति । पृच्छति—कस्येति । सुखदुःखाप्तिपरिहारयोर्व्यवसायस्तत्रैव प्रवर्तयेत्, न चानयोः प्रवृत्तियोग्यता । न चान्यनिश्चयोऽन्यत्र प्रवर्तयति अतिप्रसङ्गादिति भावः । उत्तरम्—सुखदुःखसाधनानामिति । ततश्च प्रतीतिप्रवृत्त्योः संप्रतिपत्तिरित्यर्थः । सर्वव्यापितामस्य दर्शयति—अनेन प्रयोजनेनेति । वितण्डाया अपि प्रयोजनमुक्तं प्रथमसूत्रे । चोद्यमानस्य प्रवर्तमानस्येत्यर्थः । शङ्कते—यदीति । लोक्यतेऽनेनेति लोकः प्रमाणम् । तदन्वितः तदुपपन्नः । न च प्रमाणमीदृशम्, अनवस्थाप्रसङ्गादिति भावः । निराकरोति—अतिदोषोऽयमिति । यथा च प्रमाणस्य प्रमाणोपपन्नता न चानवस्था, तथा द्वितीये निवेदयिष्यते । न च प्रसिद्धतरतया न प्रयोजनं लक्षणीयमिति युक्तम्, कथमस्य प्रयुक्तौ साधनत्वम्, क्व च प्रयोजयति, कथं च व्यापकमिति सर्वस्य परीक्षकप्रवेदनीयत्वात् । अथान्य इति । अप्रामाणिको लौकिक इति । यथा वटे वटे वैश्रवणः इति । निराकरोति—तन्न बुध्यामह इति । प्रयोजनस्य प्रामाणिकत्वादित्यर्थः । यदप्युक्तं न्यायस्याङ्गं प्रयोजनं न भवति, तस्मात् न वक्तव्यमिति, तन्न युक्तम् । या खलु निष्प्रयोजनेति न ब्रूमः प्रयोजनं न्यायस्याङ्गमित्यपि, मुख्यं प्रयोजनमेव हि तन्न स्याद् यदृते पुरुषादन्यार्थमिति । प्रयोजनवांस्तु न्यायो निष्प्रयोजनां तद्गतां 220/tha
चिन्तामङ्गीकरोति, फलवत्सन्निधावफलं तदङ्गमिति न्यायात् । तस्मादनङ्गम-

---

३ तिपाद्य ] प्रतिपाद्यतnvt-C
२४ स्था ] °पन्नताऽनवस्थाnvt-C
२४ ते ] २११८
२५ स्य ] प्रवृत्तौnvt-J
३० पि ] °मिति किं तुnvt-J

पि प्रयोजनं परीक्षाया मूलं स्वर्ग इव सेतिकर्तव्यताकस्य यागाद्यनुष्ठानस्येति सिद्धम् ॥ २४ ॥ § 460

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ १ । १ । २५ ॥ § 461

क्रमप्राप्तं दृष्टान्तं लक्षयति—लौकिक—न्तः ॥ दृष्टान्त इति लक्ष्यनिर्देशः, शेषं लक्षणम् । साध्यसाधर्म्यात् तद्धर्मभावित्वेनार्यते तथा साध्यवैधर्म्यादतद्धर्मभावित्वेनार्यते यः सोऽर्थस्तस्मिन् । तथा च नातिव्याप्तिः । उदाहरणसूत्राच्चेदृशविशेषप्रतिलम्भः । लोकसामान्यम् किं तदित्यत आह—नैसर्गिकमिति । शास्त्रपरिशीलनलब्धजन्मा बुद्ध्यतिशयो वैनयिकः । तद्रहिता लौकिकाः प्रतिपाद्या इति यावत् । तद्विपरीताः तदुभयसंपन्नाश्च परीक्षकाः प्रतिपादका इति यावत् । कथाबहुत्वाच्च बहुवचनम् । तदनेन वादिप्रतिवादिनौ दर्शितौ, तयोर्बुद्धिसाम्यं व्याचष्टे—यथा यमर्थमिति । लक्षणप्रयोजनमाह—दृष्टान्तविरोधेनेति । दृष्टान्तस्य विरोधो विरुद्धत्वं साध्यविकलत्वादि । प्रतिपक्षा इति प्रतिपक्षासाधनानि । समाधिः अभूतदोषारोपस्य प्रतिषेधः । लक्षितश्च दृष्टान्त उदाहरणलक्षणाय कल्पते घटते इति भाष्यम् । अत्र वार्त्तिककारो लौकिकपरीक्षकस्वरूपमविवक्षितमिति मन्वान आह—बुद्धिसाम्येति । अविवक्षायाः प्रयोजनमन्वयव्यतिरेकाभ्यामाह—एवं चेति । परेषां दृष्टान्तलक्षणाक्षेपमुपन्यस्य दूषयति—सोऽयं दृष्टान्त इति । दृष्टान्तस्य प्रयोजनमाह—दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः । यथा आक्षेप्त्रोक्तं तत्तदक्षरमनूद्य दूषयति—असिद्धसाधनार्थो वेति । न खल्वसिद्धः साध्येन साधनस्याविनाभावो दृष्टान्तेन साध्यते इत्यर्थः ॥ २५ ॥ § 462

॥ इति न्यायपूर्वाङ्गलक्षणप्रकरणम् ॥

## १.१.५ न्यायाश्रयसिद्धान्तलक्षणप्रकरणम्

221/tha

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ १ । १ । २६ ॥ § 464

अत्र भाष्यकारः सिद्धान्तसामान्यलक्षणमपठित्वैव तात्पर्यं व्याचष्टे—अथ सिद्धान्त इत्यादिना । तत्र इदमित्थंभूतमिति वार्त्तिककारो व्याचष्टे—इदमिति सामान्यत इति । भाष्ये च संस्थितिरित्थंभावव्यवस्थेति सामान्योपक्रमस्य अभ्युपगमस्य प्रमाणतो विशेषपर्यन्ततापरिसमाप्तिः संस्थितिरित्यर्थः । अत्रैवार्थे सूत्रमित्याह वार्त्तिककारः—अस्यार्थस्येति । § 465

२ म्] युक्तम् nvt-J
६ ते] अर्थ्यते nvt-C
१८ रेषां] दृष्टान्त° *Om* nvt-J
३ र्यं] अपठित्वावतार्य nvt-J
५ च] तु nvt-C

तन्त्रा—न्तः । सूत्रार्थमाक्षिपति—किं पुनरिति । लक्षणार्थं चेति । सामान्यलक्षणार्थम्, न खलु सामान्यलक्षणमन्तरेण शक्यो विभाग इत्युक्तम् ॥ २६ ॥ § 466

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ १ । १ । २७ ॥ § 467

समाधत्ते—नानार्थमिति । लक्षणार्थत्वं सामान्यलक्षणार्थत्वम् । तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाण्यनेनेति तन्त्रं प्रमाणम् । तदेवाधिकरणम् आश्रयो ज्ञापकत्वेन येषामर्थानां ते तथोक्ताः । अशास्त्रितः अप्रामाणिक इत्यर्थः । आभिमानिकं च प्रामाणिकत्वम्, तेन सिद्धान्तभेदिनामर्थानां सर्वेषां न प्रामाणिकत्वप्रसङ्गः । तदेवं भाष्यकारेण व्याख्याय सामान्यलक्षणं पठितम् । एवं व्याख्यानपूर्वकमेव विभागसूत्रं पठति—तन्त्रार्थसंस्थितिरिति । तन्त्रग्रहणेन च सर्वतन्त्रप्रतितन्त्रयोरुपादानम् उभयोरपि तन्त्रत्वात् । तदिदमुक्तम्—तन्त्रभेदात् त्विति । अनवधारितार्थपरिग्रह इति । साक्षाच्छास्त्रे नोपात्तो यथा मनस इन्द्रियभाव इति ॥ २७ ॥ § 468
222/tha

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ १ । १ । २८ ॥ § 469

सर्व—न्तः । यद्यपि घ्राणादिषु भौतिकत्वाभौतिकत्वादयो विप्रतिपत्तयः, तथापि इन्द्रियत्वे नास्ति विप्रतिपत्तिरिति । तदेतद् वार्त्तिककारो व्याचष्टे—सर्वेषामिति । अत्र चोदयति—न दृष्टान्तादिति । परिहरति—भिद्यत इति । न चैवं सर्वतन्त्रसिद्धान्तः । तस्य सर्वैरेव निश्चितत्वादिति । अनुमानागमयोरिति । संबन्धग्रहणाश्रयावनुमानागमौ, यत्र च संबन्धग्रहः स दृष्टान्त इत्यर्थः ॥ २८ ॥ § 470

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ १ । १ । २९ ॥ § 471

समा—न्तः ॥ समानशब्द एकपर्यायः । नैयायिकानां हि समानं तन्त्रं न्यायशास्त्रम्, परतन्त्रं च सांख्यादिशास्त्रम् । चेतना आत्मनः निरतिशया अपरिणामिनो न केनचिद् धर्मेणोपजनापायधर्मेण युज्यन्ते । प्राकृतेषु च देहादिषु तत्कारणेषु महदहङ्कारपञ्चतन्मात्रभूतसूक्ष्मेषु विशेषोऽतिशय इत्यर्थः । तदेतत् सूत्रं वार्त्तिककृद् व्याचष्टे—सामान्येति । योगानाम् एव, सांख्यानाम् एवेति नियमः ॥ २९ ॥ § 472

६ त्वं ] तेन सामा° nvt-J
१२ म् ] तयोरपि nvt-C
१७ यो ] °त्वादौ nvt-C
२८ देहादिषु ] देहादिषु *Om* nvt-C

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ १ । १ । ३० ॥ § 473

यत्—न्तः ॥ यस्यार्थस्य साध्यस्य वा हेतोर्वा सिद्धौ इति विषयसप्तमी, न तु निमित्तसप्तमी, द्वयोर्ज्ञायमानयोर्निमित्तनैमित्तिकभावायोगात् । तेन यस्मिन्नर्थे ज्ञायमाने तदनुषङ्गिणोऽर्थास्तदन्तर्भाविनो गम्यन्ते, सोऽर्थः साक्षादधिक्रियमाणस्तदनुषङ्गिणां चाधारः तदाश्रयत्वात् तत्सिद्धेः, स पक्षो वा भवतु
223/tha हेतुर्वा अनेन रूपेण अधिकरणसिद्धान्तः । पक्षस्तावद् यथा विवादाध्यासितमुपलब्धिमत्कारणमुत्पत्तिमत्त्वाद् वस्त्रादिवदिति । अत्र हि पृथिव्यादिगतेनोत्पतिमत्तेन उपलब्धिमत्पूर्वकत्वं तद्गतं साध्यमानं स्वसिद्ध्यन्तर्गतानुषङ्गिसर्वज्ञत्वाद्युपेतमेव सिध्यति नान्यथेहोपलब्धिमत्पूर्वकत्वस्य सिद्धिरिति । भाष्ये हेतुः प्रतिसन्धानं सिध्यत् अनुषङ्ग्यर्थान्तरान्वितं सिध्यतीत्युदाहृतम् । तदेतत्सर्वावरोधार्थं वार्त्तिककृद् आह—वाक्यार्थेति । हेतुरीदृशः पक्षश्च वाक्यार्थ इत्यर्थः । पूर्वोऽर्थो यः साक्षादधिकृतः तस्य सिद्धावन्तर्गत इति भाष्यार्थः ॥ ३० ॥ § 474

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ १ । १ । ३१ ॥ § 475

अथाभ्युपगमसिद्धान्तलक्षणसूत्रम्—अप—न्तः ॥ तद् वार्त्तिककारो व्याचष्टे— अपरीक्षितोऽसूत्रित इति, सूत्रितस्य प्रायेण परीक्षासंबन्धात्, मनसो हीन्द्रियत्वेनासूत्रितस्यापि इन्द्रियत्वाभ्युपगमः प्रमाणाधिकरणो यतः, तस्मादयमभ्युपगमसिद्धान्तः । सूत्रं चैवं योजनीयम्, असूत्रिताभ्युपगमात् हेतोर्यतस्तद्विशेषपरीक्षणं क्रियते, तस्माद् विशेषपरीक्षणात् ज्ञायते असूत्रितमप्यभ्युपगतं सूत्रकारेण । सोऽयमस्याभ्युपगमोऽभ्युपगमसिद्धान्त इति ॥ § 476

एवं स्वमतेन सूत्रं व्याख्याय भाष्यकारव्याख्यानं दूषयति—शास्त्रानभ्युपगत इति । प्रमाणीकृतेन शास्त्रेणाननुज्ञातः प्रमाणानधीन इत्यर्थः । प्रमाणतन्त्राभ्युपगमसंस्थितिरिति हि सिद्धान्तसामान्यलक्षणम्, न च प्रमाणानधीनाभ्युपगमस्तदन्वेतीति नायमीदृशोऽभ्युपगमसिद्धान्तो भवितुमर्हतीति हृदि निधायायुक्तापि दर्शिता । अज्ञं प्रत्यसदाचारत्वात् प्रामाणिकं च पुरुषं प्रत्यशक्यत्वात् बुद्धिमतोऽवज्ञानस्यायुक्तत्वात् अशक्यत्वादित्यर्थः । सर्व
224/tha एवायं पक्ष इति । सर्वतन्त्रप्रतितन्त्रसिद्धान्तौ तावत् साक्षादभ्युपगम्यमानौ स्वमुखेनैव पक्षतयाभिधीयेते । अधिकरणाभ्युपगमौ च साक्षादनभ्युपगम्यमानावप्यर्थादभ्युपगन्तव्याविति अर्थापत्त्या पक्षावित्यर्थः । ननु यद्युपपन्नः

४ भावायोगात् ] °त्वायोगात्nvt-C
५ न्ते ] °भावेन ज्ञायन्तेnvt-C
७ हेतुर्वा ] तेनnvt-C
७ द् ] यथा*Om*nvt-C
२१ ते ] भवतिnvt-J
३१ मौ ] तु nvt-C

प्रमाणतया अभ्युपगमः सिद्धान्तः, तर्हि सिद्धान्तभेदिनामर्थानां प्रामाणिकत्वेन विरुद्धधर्मसमालिङ्गिता भावाः प्रसज्येरन्नित्यत आह—तत्प्रत्ययात् । तस्य प्रमाणोपपन्नकर्मत्वस्य प्रत्ययादभिमानादित्यर्थः । पक्ष इति पचि व्यक्तीकरणेत्यस्माद् व्युत्पन्नम् । कर्मतया व्यज्यमानतया वा उपादानं स्वार्थस्य पक्ष इति पदम् । उपादीयतेऽनेनेति व्युत्पत्त्या क्रियासाधन इति प्रधानक्रियासाधने । क्रियाविशेषयुक्त इति अवान्तरव्यापारयुक्ते । तेन हि प्रधानाक्रियायां कारकाणां वैचित्र्यं भवतीति, यश्चासौ न्यायस्याभ्युपगम इति । यावदभ्युपगतं न्यायस्य साधनं न्याय इति, तावदभ्युपगतं भवति प्रमेयसाधनं प्रमाणमिति । न च धर्मिणि अनभ्युपगते तदाश्रयोऽभ्युपगतो भवति । तस्मादुभयथापि सर्वतन्त्रसिद्धान्तानपह्नव इत्यर्थः । अथ संग्रहः पक्षशब्देनेति, यथा दण्डिशब्देन दण्डसंबन्धोपहितसीमानः समानासमानजातीयाः सर्वे संगृह्यन्ते, तथा पक्षशब्देनापीत्यर्थः । अयं तु कल्पः सर्वतन्त्रसिद्धान्ताव्यापकत्वकथनेनैवार्थादपाकृत इति न पृथक् निराकृतः । पक्षशब्दो हि व्यज्यमानत्वोपाधिनिबन्धनप्रवृत्तिः, न च व्यज्यमानत्वमस्ति निसर्गव्यक्ते सर्वतन्त्रसिद्धान्त इति भावः । वाक्यार्थप्रतिपत्ताविति । पीनो देवदत्तो दिवा न भुङ्क्ते इति वाक्यस्य दिवाभोजननिषेधोऽर्थः । तस्मात् तद्विपरीतरात्रिभोजनविधिरर्थापत्तिर्लोकसिद्धा । सा च न यथा प्रमाणान्तरफलं तथा द्वितीये निवेदयिष्यते । तदनेन प्रबन्धेन भदन्तदिग्नागोदितानि दूषणानि निराकृतानि ॥ ३१ ॥ § 477

॥ इति न्यायाश्रयसिद्धान्तलक्षणप्रकरणम् ॥

## १.१.६ न्यायलक्षणप्रकरणम्

225/tha

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ १ । १ । ३२ ॥
§ 479

प्रति—वाः ॥ ३२ ॥ वार्त्तिककारः सूत्रतात्पर्यमाह—अवयवानामिति । नन्ववयवसामान्यलक्षणम् अन्तरेणाशक्यो विभागोद्देशः, तद्विशेषलक्षणं च । न चेदं सामान्यलक्षणं विभागपरत्वादित्यत आह—सूत्रम्, विभागपरमप्येतदर्थादवयवसामान्यलक्षणं सूचयतीति सूत्रम् । अन्यपरादपि वाक्यात् प्रतीयमानोऽर्थोऽपेक्षितः स्वीक्रियत एवेति शाब्दाः । तत्रावयवपदादेव सामान्यलक्षणमवगम्यते । अवयवत्वेनैकवाक्यता दर्शिता । सा च पदानां परस्परमसंप्रत्यायितापेक्षितसंबन्धयोग्यार्थप्रत्ययेन भवति । तस्मात् तथाविधार्थप्रत्यायनमेव प्रतिज्ञादीनामवयवसामान्यलक्षणं सिद्धमिति सूत्रमित्यनेन दर्शितं

१६ स्य ] इत्यस्य nvt-C
१८ ते ] ॱ२ॱ२६

८ दानां ] परस्परासंप्र°nvt-C

वार्त्तिककृता इति । विभागोद्देशतात्पर्यमाह— विभागेति । त्र्यवयग्रहणम् उपलक्षणार्थम्, द्व्यवयवमित्यपि द्रष्टव्यम् । अत्र भाष्यं तत्राप्रतीयमान इति । सामान्येनावगतधर्मिणि विशेषेणाग्निमत्त्वादिना सन्दिग्धे अग्निमत्त्वादितत्त्वावधारणं प्रत्ययः । तस्यार्थः प्रयोजनं हानोपादानोपेक्षाबुद्धयः । *तस्य प्रवर्त्तिका उत्पादिका जिज्ञासा प्रत्ययसाधनानुसरणद्वारेण प्रत्यासत्तिः संशयतत्त्वज्ञानयोर्विशेषगता न तु स्वरूपगता, संशयानन्तरया जिज्ञासया संशयस्य व्यवधानात् । शक्यं प्रमेयम् । तस्मिन् प्राप्तिः शक्तता प्रमाणानां प्रमातुश्च । सा च स्वरूपसहकारिभ्यां द्वेधा । तामिमां भाष्यकारोऽनया वचोभङ्ग्या दर्शयति—प्रमातुः प्रमाणानीति । प्रतिज्ञादिवदिति । वैधर्म्यदृष्टान्तः । प्रतिपक्षोपवर्णनमिति । यदि शब्दो नित्यः स्यात्, न स्यात् कृतक इति अनित्यत्वस्य नित्यत्वं प्रतिपक्षः । तस्मिन् *हेत्वभावोपवर्णनं न चायमकृतक
226/tha इति । तदुपवर्णनप्रतिषेधे सति तत्त्वज्ञाना भ्यनुज्ञानार्थम् । *तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं प्रमाणम् । तदभ्यनुज्ञानार्थं संशयव्युदासस्तर्कापरनामा । व्युदस्यते हि तेन प्रमाणाभ्यनुज्ञानद्वारेण इतिकर्तव्यताभूतेन संशय इति । तदेतद् भाष्यजातं प्रश्नपूर्वकं वार्त्तिककृद् व्याचष्टे—कथं पुनरिति । न पुनर्जिज्ञासादयः परप्रतिपादकाः शब्दादवगताः सन्तः । अथ मा भूवन् परप्रतिपादकाः, स्वप्रदिपादका एव कस्मात् न भवन्तीत्यत आह—निश्चितत्वाच्चेति । साधनादेव गम्यते *प्राप्यते, प्राप्तं च ज्ञायत इत्यर्थः । शक्यप्राप्तिश्च ज्ञायत इत्यर्थः । तत् किं सर्वथैवानङ्गं जिज्ञासादयः इत्यत उक्तं भाष्यकृता प्रकरणे तु जिज्ञासादयः समर्था इति । तदनुभाष्य व्याचष्टे—प्रकरणे त्विति । प्रकरणं कथाप्रवृत्तिः । तदुत्थापका जिज्ञासादयोऽवयवा अङ्गमित्यर्थः । ते च जिज्ञासादय उत्पन्नाः प्रकरणस्योत्थापकाः स्वरूपेण, न पुनः स्वज्ञानेन, येन शब्दप्रतिपाद्याः सन्तः प्रकरणेऽप्यङ्गं भवेयुः, यथा प्रतिज्ञादयः स्वज्ञानेन स्वार्थान् प्रतिपादयन्तः । तस्मात् सर्वथैव जिज्ञासादिवाचकपदप्रयोगोऽनर्थक इति भावः । अत एवाह—परप्रतिपादकत्वादिति । तुशब्दो जिज्ञासादिभ्यो व्यवच्छिनत्ति । त्र्यवयवमपीत्यपिना द्व्यवयवनिषेधं समुच्चिनोति । उपनयनिगमनयोरित्यत्र प्रतिज्ञाया अपीति द्रष्टव्यम् ॥ ३२ ॥ § 480

## साध्यनिर्देशः प्रतिज्ञा ॥ १ । १ । ३३ ॥ § 481

साध्य—ज्ञा । परिगृह्यतेऽनेनेति परिग्रहः । स च वचनं चेति परिग्रहवचनम् । उदाहरणम् अनित्यः शब्द इति । तदाक्षिप्य वार्त्तिककारः समाधत्ते—सिद्धत्वादिति । अग्निमानेव नातद्वान् नास्याग्निनेदानीमयोगः । स च पर्वतेऽग्निमति साध्यमाने विशेषणविशेष्ययोः परस्परसंबन्धलक्षणो

४ *] अस्यnvt-C
६ ता] विषयगता nvt-K
११ *] उप°*Om*nvt-C
१२ *] तत्त्वं*Om*nvt-J
१४ तेन] ह्यनेनnvt-C
१४ द्वारेण] प्रमाणेति°nvt-C
१८ *] प्राप्यते*Om*nvt-C
२३ येन] स्वशब्द°nvt-C
२६ निषेधं] °प्रतिषेधंnvt-C
३२ ऩ्ध] °लक्षणे नियमेnvt-J

नियमोऽर्थात् सिध्यति । न तु साक्षादयोगव्यवच्छेद एव साध्यः, लिङ्ग- 227/tha स्यान्यापोहविषयत्वानभ्युपगमात् । तस्य निर्देश इति निर्दिश्यतेऽनेनेति प्रतिज्ञावाक्यमुच्यते । § 482

अत्रान्यव्यवच्छेदं वाक्यार्थं मन्वानो भदन्तः प्रतिज्ञालक्षणमतिव्याप्त्यव्याप्तिभ्यामाक्षिपति—उभयेति । उभयोरवधारणयोः प्राप्तौ संशयेन किमिदमवधार्यते किं चेदमिति प्रसक्तावित्यर्थः । प्रतिज्ञावधृतेति । यत एवकरणं ततोऽन्यत्रावधारणमिति हि शाब्दा इति भावः । व्यतिरेकित्वादिति व्यभिचारादित्यर्थः । समाधत्ते—सर्वस्मिन् वाक्ये इति । संसर्गो वाक्यार्थ इत्युत्सर्गः । क्वचित् पुनरन्यव्यवच्छेदोऽपीति । सामान्यश्रुतौ नियम इति । यथेन्द्रियार्थसन्निकर्षोत्पन्नमित्युक्ते ज्ञानं सुखादि च सामान्येन प्राप्तम् । तत्र ज्ञानग्रहणं न विधायकम्, प्राप्तत्वात् । अतः सुखादिव्यवच्छेदफलं विज्ञायते । यदि त्वस्मद्दर्शनमतिक्रम्य सर्वत्रावधारणं करोति, ततोऽस्य लोकविरोध इत्याह—सर्वत्र चेति । तत् किं लोके न क्वचिदवधारणमित्यत आह—यत्र चेति । चोदयति—ननु चेति । सिद्धप्रतिपक्षः साध्यशब्दस्यार्थ इत्यभिप्रायः । परिहरति—न सूत्रार्थेति । सर्वसन्देहेष्विदमुपतिष्ठते व्याख्यानतोऽर्थप्रतिपत्तिरिति भावः । चोदकः स्वाभिप्रायमुद्घाटयति—अथ पुनरिति । असाध्यनिर्देशः सिद्धनिर्देशः । तस्य निवृत्तिः साध्यशब्दादवगम्यते, न तु प्रज्ञापनीयोऽर्थ इत्यर्थः । परिहरति—असाध्यं चेति । भवेदेतद् यदि सिद्धमात्रमसाध्यं स्यात् । अपि त्वनुपपद्यमानं साधनं सिद्धिर्यस्य तदप्यसाध्यम् । तथा चासिद्धस्य चाक्षुषत्वादेर्निवृत्तिरित्यर्थः । पुनश्चोदयति—अथ पुनरिति । न कृतकत्वादि सिद्धं नाप्यनुपपद्यमानसाधनम् । नापि कृतकत्वादि पराङ्गत्वेनोपात्तं येनाप्रज्ञापनीयं स्यादित्यर्थः । परिहरति—नैष दोष इति । प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनम् इति सूत्रार्थः, न पुनर्धर्ममात्रपरिग्रहवचनमिति । अभ्युपगम्य व्यवच्छेदं शब्दार्थमेतदुक्तम्, परमार्थतस्त्वनियमः क्वचित् संसर्गः, क्वचिद् व्यवच्छेद इत्यत आह—यच्चेद- 228/tha मिति । इतोऽपि नासिद्धयोर्हेतुदृष्टान्तयोः प्रसङ्ग इत्याह—साध्यनिर्देश इति च प्रतिज्ञायामिति । प्रमाणतन्त्रः खल्वभ्युपगमः सिद्धान्तः । न च चाक्षुषत्वादिषु प्रमाणमूलता, तदभिमानोऽपि बाधकादपाकृत इति । ननु यदि सर्वतन्त्रसिद्धान्तातिरिक्तानां सिद्धान्तान्तराणां साध्यत्वं तर्हि साध्येनैव चरितार्थत्वाद् अपार्थकं पृथगभिधानमेतेषामिति । अत उक्तम्—अवस्थायामिति । विमत्यवस्थायाम्, सर्वतन्त्रे तु विमतिरशक्येत्युक्तम् । परिहारान्तरमाह—जिज्ञासादीति । विभागसूत्रेण प्रकरणोत्थानहेतवो वाक्यावयवतया निराकार्यत्वेन जिज्ञासादयो बुद्धिस्थीकृताः । तेन यत्र जिज्ञासादयः स साध्यः । न च

२ तेऽनेनेति ] हि प्रति°nvt-C
५ येन ] संशयेnvt-C
६ त ] एवकारःnvt-J
१३ त ] °मित्यत्रnvt-C
१४ क्षः ] प्रतिक्षेपःnvt-C
१५ ते ] विशेष *for* अर्थnvt-J
२१ त्वादि ] साध्यंnvt-C
३३ त्वेन ] °र्यतयाnvt-C

चाक्षुषत्वादिषु प्रमाणबाधितेषु सन्ति त इत्यर्थः । परिहारान्तरमाह—अर्हत्यर्थ इति । § 483

अपरमपि परिहारमाह—कर्मकरणयोर्वेति । एवं तावद् व्युत्पत्त्याद्यालोचनया साध्यशब्दस्य न हेतुदृष्टान्तयोः प्रसङ्ग इत्युक्तम् । संप्रति लोक एवातिस्फुटास्तिस्रो विधा अर्थानाम् । कृतमत्र सूक्ष्मानुसरणेनेत्याह— साध्यासिद्धसिद्धभेदादिति । अन्यतरासिद्धयोर्हेतुदृष्टान्तयोः प्रसङ्गो मा भूदिति कर्मतया ते उपादीयन्त इत्युक्तम् । उभयपक्षेति पक्ष शब्दो वर्गवचनः । संप्रतिपन्नमुभयोर्वर्गयोरित्यर्थः । परिहारान्तरमाह अथ वेति । अवयवानामेतत् प्रकरणम् । तेषां च प्रधानैकार्थप्रत्यायनेनैकवाक्यतामापन्नानामवयवभावः । यत्प्रत्यायनोद्देशेन ते प्रवर्तन्ते तत्प्रधानम् । धर्मी च सिषाधयिषितधर्मविशिष्टः । तथा च न साक्षात् तत्प्रत्यायनाय ते विभवन्तीति तदर्थं साधने व्याप्रियन्ते । तेन सिषाधयिषितधर्मविशिष्टो धर्मी तेषां प्रधानं विषयश्च । प्रधानं च प्रथमं बुद्धौ विपरिवर्तते इति साध्यशब्देन स एवोच्यते, न तु हेतुदृष्टान्तावप्रधाने इत्यर्थः । § 484

तदेवमदुष्टमस्मल्लक्षणमिति यदस्मल्लक्षणमनेन दोषेण भङ्क्त्वा भदन्तेन अन्यथा लक्षणं प्रणीतम्, तदेव दुष्टमित्याह—न चेदयमिति । ननु यत्र
229/tha साध्यपदमस्ति भवतु तत्रेष्टग्रहणमनर्थकम्, न त्वस्मिंस्तदस्तीति कथमिष्टग्रहणमनर्थकमित्यत आह—कर्मग्रहणाच्चेति । मा भूत् साध्यपदम् । अस्ति तु पक्षपदम् । तदपि हि *पच्यमानं व्यज्यमानं साध्यमेवाह—तच्च कर्म । *कर्म चेप्सितमिति प्राप्तुमिष्टमित्यर्थः । चोदयति—अथाप्यनिष्टेति । नन्वनिष्टः पक्ष इति विप्रतिषिद्धमित्यत उक्तम्—अर्थतः किलेति । वस्तुव्यवस्थापनाय प्रवृत्तस्य तादृशं नेष्टमित्यर्थः । § 485

बौद्धपक्षमुपन्यस्यन्नेव मध्ये तदभिमतं किञ्चिन्निराकरोति—अश्रावण इति । कृतव्याख्यानमेतत् प्रथमसूत्रे । अपि त्वनुमानतः कारणतो विकारात् इत्येवमादेः । न हि व्यङ्ग्यं व्यञ्जकं कारणमनुविधीयते । नो खलु महति प्रदीपे घटो महान् अल्पे वा अल्प इति । महति तु कारणे महान् शब्द इति । तस्मात् कारणतो विकारात् कार्यः शब्दः, यथा महद्भिः स्थूलपिण्डैरारब्धोऽवयवी महानिति । तदनेन प्रत्ययभेदभेदित्वं हेतुरुपलक्षितो भवति, आदिशब्देन च सतः शब्दस्य

अभिव्यक्तौ दोषात् ।§ 487

---

१ त ] एतेnvt-C
३ पि ] °हारान्तरम्nvt-J
४ या ] °दिपर्यालो°nvt-C
७ ब्दो ] बहुवचनःnvt-C
१९ * ] पठ्य°nvt-C
२० * ] कर्म°*Om*nvt-C
२४ सूत्रे ] पृः ५११५
२५ विकारात् ] वै. सू. २. २. ३४
२५ मादेः ] विकारादेःnvt-C
२५ ते ] विधत्तेnvt-C
२९ च ] च*Om*nvt-C
३० दोषात् ] वै. सू. २. २. ३५

इत्येवमादयो ग्राह्याः । दोषश्च दर्भेध्मादिवदुपयुक्तानामृचां निरिष्टिकत्वेन (Edtext outside numbered paragraph)पुनरुपयोगः, कार्यत्वे पुनरन्यत्वेन निरिष्टिकत्वमित्यर्थः । यद्यप्यागमोऽपि शब्दानित्यत्वेऽस्ति यथा

सोमं राजानमसृजत ततस्त्रयो वेदा असृज्यन्त ।§ 488

इति । तथापि

नासदासीन्नो सदासीदाम्नाय एव खल्वयमग्र आसीत् ।§ 489

इति नित्यत्वेऽप्यागमदर्शनात् अनिश्चयादनुमानस्यैवात्र प्रामाण्यम् । तथा चानुमानविरोध इति । प्रसिद्धिविरोधं तु न बुध्यामहे प्रमाणविरोधाद् भेदेन । अबोधमाह— कोऽयं प्रसिद्धिविरोध इति । एकग्रन्थेनाह—प्रसिद्धिः प्रत्यक्षादीनामिति । अचन्द्रः शशीति । यदि चन्द्रे शशिशब्दवाच्यत्वं निषिध्यते, तदा लोकव्यवहारावगतान्वयव्यतिरेकप्रभवानुमानविरोधः । अथ विकल्पज्ञानगोचरत्वनिषेधः, ततो भवतां स्वसंवेदनप्रत्यक्षविरोधः । अस्माकं तु मानसप्रत्यक्षविरोध इति सर्वथा न प्रमाणादन्या प्रसिद्धिरिति । तदेवं बौद्धपक्षमुपन्यस्य तदुक्तान्युदाहरणानि दूषयित्वा बौद्धपक्षमुपसंहरति—एतदर्थेति । § 490

तदेतद् दूषयति—एतच्चेति । वस्तु हि यादृशं स्वकारणादुत्पन्नं तादृशमेव तत् । न तस्यान्यथाभाव इति न तत्र दोषो निविशते । तद्विषयाणि पदान्यपि प्रत्येकमदुष्टान्येव । या पुनः पौरुषेयी दृष्टमन्यत्रार्थमन्यत्र समारोप्य भ्रान्त्या वा परविप्रलम्भाय वा प्रतिज्ञादिरूपेण वाक्यक्रिया, सा स्ववचनविरोधादिशालिनी दुष्टा । तद्द्वारेण पुरुषो निगृह्यते, नार्थो न पदानीति । स्वार्थापवादः स्ववचनविरोधः कर्तृदोषो भ्रमो वा विप्रलम्भो वा क्रियायामुपचर्यते । न च क्रियायां भ्रमो वा विप्रलम्भो वा, तयोरभिप्रायभेदतया पुरुषधर्मत्वात् क्रियाया वस्तुबाधनात् पुरुषाभिप्रायावगतिरिति क्रियाद्वारेणेत्युक्तम् । § 491

चोदयति—अथ प्रतिज्ञाया इति । तदेतदतिप्रसङ्गेन दूषयति—नैतद् युक्तं हेत्वादीति । न पुनर्दूषणानि न्यूनतावयवोत्तरदोषाक्षेपभावोद्भावनानीति । त्रैरूप्यसंपन्नो हेतुः पूर्णः । स त्रिषु रूपेष्वन्यतमेन रूपेण रहितो न्यूनोऽसिद्धो वा विरुद्धो वा अनैकान्तिको वा भवतीति सोऽयं न्यूनतादोषो हेतोः । अवयवदोषश्च प्रतिज्ञादोषः स्ववचनविरोधादिः । हेतुदोषोऽसिद्धत्वादिः । एवमुदाहरणदोषः साध्यविकलत्वादिः । उत्तरदोषो जातिः प्राप्त्यप्राप्तिसमादिः । तस्याक्षेप उपादानं स्वीकार इति यावत् । भावोऽप्रतिभादिः । स हि वादिनो वा प्रतिवादिनो वाभिप्रायः । तस्योद्भावनानि दूषणानीति । न हि संभवे सत्युपचार इति । प्रतिज्ञागता हि दोषा यदि तद्गतत्वेनोद्भाव्यमाना न

६ त्वं ] चन्द्रशब्द°nvt-J
१८ च ] तुnvt-J

231/tha वादिनो निग्रहमापादयेयुः, ततस्तत्र निष्प्रयोजनत्वेनासंभवात् पक्ष एवोपचर्येरन्, पारयन्ति तु प्रतिज्ञागतानि दूषणानि निग्रहितुं वादिनमिति । सोऽयं प्रतिज्ञादोषाणां प्रतिज्ञायां संभव इति । कस्मात् पुनर्मञ्चस्था इत्येवं न प्रयुञ्जते इत्यत उक्तम्—लौकिकप्रयुक्तवाक्यान्वाख्यानम् न, अनादिर्लोक प्रयोगो नियोज्यः पर्यनुयोज्यो वेत्यर्थः । § 492

स्यादेतत् । इष्टग्रहणमनक्षरारूढमप्यभिप्रायव्याप्तं साध्यं यथा स्यादित्येवमर्थं यथा परार्थाश्चक्षुरादय इति । अत्र हि पारार्थ्यमात्रमक्षरारूढम् । न च तन्मात्रमस्य साध्यम्, अपि त्वात्मपारार्थ्यम् । तच्च नोच्चारयति मा भूदनन्वयो हेतुः संघातत्वादिति । तस्मात् तदवरोधायेष्टग्रहणमित्याह—अथेष्टग्रहणेनेति । परिहरति—अयमप्यर्थः साधनादेव गम्यते । प्रतिज्ञाप्रयोगादेव गम्यते । अयमभिसन्धिः । वचनलिङ्गा हि वक्त्रभिप्राया भवन्ति । यत्परं च वचनं स वचनार्थः । तात्पर्यं चास्य क्वचिद् वाच्ये क्वचिल्लक्ष्य इति सर्व एवासौ वचनार्थः । यस्तु नैवंविधः कथमसौ वचनार्थः ? कथमसौ वाद्यभिप्रायव्याप्त इत्यवगन्तव्यम् । न च क्वचिदपि पक्षः प्रतिज्ञापदवाच्यः, तस्य वाक्यार्थत्वेन लक्ष्यत्वादेवेति । अनिष्टनिवृत्तिरिष्टेति । तत्साधनमन्विष्यमाणमपि तदानीमिष्टमेव । अन्यथा तत्र प्रयत्नानुपपत्तेरिच्छापूर्वकत्वात् तस्येति । अथ संशयो विचारणेति । ततश्च संशयविषय इष्यमाणो जिज्ञास्यमानश्च साध्य एव भवति, न साधनादिरित्यर्थः । स्थानान्तरीयं च भदन्तस्य लक्षणम्,

साध्यत्वेनेप्सितः पक्षो विरुद्धार्थानिराकृतः ॥ § 494

इति दूषयति—एतेनेति । अत्रापि हि साध्यपदादूर्ध्वं वृथाक्षरचतुष्टयमिति । तथा पक्षो यः साधयितुमिष्टः इत्यत्रापि *वसुबन्धुलक्षणे विरुद्धार्थानिराकृतग्रहणं न कर्तव्यम् । एतदुक्तं भवति—न केवलमस्माकमेतद् विरुद्धार्थानिराकृतपदमनर्थकं प्रतिभाति, समानतीर्थानामपि तथा विभाति, यतस्तैर्नोपात्तमिति । अत एवं वक्तव्यं पक्षो यः साधयितुमिष्ट इति । यद्यप्यत्रापि प्रयोज्यप्रयोजकव्यापारयोः साधयितुमिति समानम्, तथापि तुमुना य एव साधयिता वादी स एवैषितेत्युक्तं भवति । न पुनर्वादिनो नियोक्ता साधयिता वादी चैषितेति । एषितृत्वं च वादिनो ध्रुवं कृत्वैतदुच्यते, यदा पुनरेषितृत्वमपि प्रयोजके संचार्यते, तदा स्वयंग्रहणेनाप्यप्रतीकार इत्यभिप्रायः । तत्त्वभाक्तयोश्चेति । सिद्धः साध्यस्य प्रयोजकः कर्ता । स हि सिध्यन्तं साध्यं साधयति वादी । तस्मिन्नियं साधना समवेता । य-

१ क्ष ] एव*Om*nvt-J
४ म् ] प्रयुक्त° *Om*nvt-J, वाक्यार्थान्वा°nvt-C
७ हि ] परार्थमात्रम°nvt-C
११ ते ] प्रतिज्ञा° गम्यते*Om*nvt-C
१४ सौ ] वचनार्थः ? कथमसौ*Om*nvt-C
१६ त्र ] °नुत्पत्ते°nvt-C
२२ * ] च सुबन्धु°nvt-C

स्तु तस्यापि प्रयोजकस्तृतीयस्थानपतितो न तस्मिन् साधना समवैतीति । यः कारयति स करोत्येवेति कथञ्चिदस्य भक्त्या कर्तृत्वम्, तच्चायुक्तं सति मुख्ये कर्तरीत्यभिप्रायः । *आञ्जसत्वं मुख्यत्वम् । पूर्वाभिप्रायस्थितमर्थमुद्धाटयति—तुमुनश्चेति । अत्रोक्तं भाष्यकारीयाभ्युपगमसिद्धान्तनिराकरणावसरेऽप्रमाणकमर्थमिति । यस्तावत् शास्त्राविरुद्धोऽर्थः प्रमाणसिद्धः स शास्त्रीय एव शास्त्राभ्युपेतप्रमाणसिद्धत्वात्, तं व्युत्पादयन् न शास्त्रं बाधते । यस्तु प्रमाणीकृतवैशेषिकतन्त्रः शब्दनित्यत्वं साधयति सोऽनवधेयवचनः न हेत्वभिधानं यावत् परिषत्प्रतिवादिभ्यां नीयते, अपि तु प्रतिज्ञोच्चारणानन्तरमेव निगृह्यते । यस्तु वैशेषिक तन्त्राध्ययनमात्राद् वैशेषिकत्वमात्मनो दर्शयित्वा शब्दनित्यतां प्रतिजानीते नासौ प्रमाणीकृतवैशेषिकतन्त्र इति न निगृह्यते इति । यश्चाप्रमाणकोऽभ्युपगम इति । अभ्युपगम्यत इत्यभ्युपगमः । तदभिधानं प्रतिज्ञेति वक्तव्यमिति । साध्यग्रहणात् तद्ग्रहणस्य लाघवादित्यर्थः । यस्तु तत्रभवता नैयायिकेन इति प्रकृतमुपसंहरति—तस्मादपेतेति ॥ ३३ ॥ § 495

## उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥ १ । १ । ३४ ॥

§ 496

अवान्तरसंगतिं प्रदर्शयन् प्रतिज्ञावचनस्य साधनाङ्गत्वमपि दर्शयति— 233/tha
हेतोरवसरप्राप्तस्येति । प्रतिज्ञानन्तरं हेतुवचनस्यावसरः । तथा हि परप्रत्यायनाय वचनमुच्चारयन्ति प्रेक्षावन्तः । तदेव च परे बोधयितव्या यद् बुभुत्सन्ते । तथा सत्यनेनापेक्षिताभिधायिना परो बोधितो भवति । नो खल्वाम्रान् पृष्टः कोविदारानाचक्षाणः प्रष्टुरवधेयवचनो भवति । अनवधेयवचनश्च कथं प्रतिपादको नाम ? यथा च माठर समिधमाहरेति गुरुणा प्रेषित एषोऽहमाहरामीत्यनुक्त्वा तदर्थं यदायं दात्राय गृहं प्रविशति, तदास्मै कुप्यति गुरुः । आः शिष्यापसद छान्दसवचर माठर मामवधीरयसीति ब्रुवाणः । एवमनित्यं शब्दं बुभुत्समानायानित्यः शब्द इत्यनुक्त्वा यदेव किञ्चिदुच्यते कृतकत्वादिति वा, यत् कृतकं तदनित्यमिति वा, कृतकश्च शब्द इति वा तत् सर्वमस्यानपेक्षितम् आपाततोऽसंबद्धाभिधानबुद्ध्या, तथा चानवहितो न बोद्धुमर्हतीति । यत् कृतकं तत्सर्वमनित्यं यथा घटः, कृतकश्च शब्द इति वचनमर्थसामर्थ्येनैवापेक्षितशब्दानित्यत्वनिश्चायकमित्यवधानमत्रेति चेत्—न, परस्पराश्रयत्वप्रसङ्गात् । अवधाने हि सति अतोऽर्थनिश्चयः । तस्माच्चावधानमिति । न च परिषत्प्रतिवादिनौ प्रमाणीकृतवादिनौ यदेतद्

३ *] आञ्जस्यंnvt-C
४ ति] अर्थम्*Om*nvt-C
२० नेनापेक्षिताभिधायिना] °धानात्nvt-C
२१ श्च] °वचनस्यnvt-C
२३ प्रेषित] एवमाच°nvt-J
२३ दात्राय] दात्राय*Om*nvt-C
२४ र] °वत्तरnvt-C
२७ बुद्ध्या] °धानम्nvt-C
३० ङ्गात्] °श्रयत्वात्nvt-J

वचनं संबन्धाय प्रतीक्षेते, तथा च सति न हेत्वाद्यप्यपेक्षेताम्, तद्वचनादेव तदर्थनिश्चयात् । अनित्यः शब्द इति त्वपेक्षित उक्ते कुत इत्यपेक्षायां कृतकत्वादिति हेतुरुपतिष्ठते । सोऽयं पञ्चावयवप्रयोगे च तल्लक्षणे च प्रतिज्ञानन्तरकाल एवावसरो हेतोः । तदेवं हेतोरवसरप्राप्तस्य सामान्यलक्षणापदेशद्वारेण तद्विशेषलक्षणसूत्रम्— § 497

उदा—तुः । श्रुत्यर्थाभ्यामुभयलक्षणसूचनात् सूत्रम् । *अत्र हेतुरिति लक्ष्यनिर्देशः । स च विभागोद्देशे वाक्यावयव इति वचनरूपः । तस्य सामान्यलक्षणं साध्यसाधनमिति । साध्यतेऽनेनेति व्युत्पत्त्या यद्यपि पारार्थ्यापन्नं कृतकत्वादिकमर्थमाह, तथापि तस्य वचनात्मकहेतुसामानाधिकरण्यानुपप-
234/tha त्तेर्विषयि कृतकत्वा दित्यादिकं वचनमुपलक्षयति । यदि च वचनं हेतुरित्युच्येत तत्साध्येन समभिव्याहृतं प्रतिज्ञा स्यात् । अथ वचनमित्येतावदुच्येत, तदातिव्याप्तिः स्यात् । उपचारे तु न क्वचित् प्रसङ्गः । उपनयादपि साधनं न पराङ्गतया गम्यते, किं तु प्रातिपदिकार्थप्रधानतया स्वनिष्ठमिति न तत्रापि प्रसङ्गः । हेत्वाभासाश्च न साधनमिति साधनपदेनैव निराकृताः । न्यायवाक्यावयवत्वादेव च न शब्दे प्रसङ्गः । तदेव समानासमानजातीयव्यवच्छेदकत्वं सिद्धं सामान्यलक्षणस्य । इदं चार्थम् । श्रौतं तु विशेषलक्षणम् । हेतुरिति यद्यपि सामान्यपदम्, तथापि प्रकरणादन्वयव्यतिरेकिहेतुविशेषपरं द्रष्टव्यम् । तेन हेतुरिति लक्ष्यनिर्देशः, परिशिष्टं तु लक्षणम् । § 498

तदेतद् भाष्यकृद् व्याचष्टे—उदाहरणेनेति । साधर्म्यपदव्याख्यानं सामान्यादिति । साध्यसाधनपदव्याख्यानं साध्यस्य धर्मस्येति । साध्यस्येति धर्मिमात्रे बुद्धिर्मा भूदित्यत उक्तं धर्मस्येति । धर्मसहितस्य धर्मिण इत्यर्थः । एतदेव स्फुटयति—साध्ये प्रतिसन्धायेति । उदाहरणसाधर्म्यात् साध्यस्येत्यनेनान्वयपक्षधर्मत्वे, अन्वयव्यतिरेकपक्षधर्मत्वानि च दर्शितानि । साध्यसाधनमित्यत्र च साध्यग्रहणेनाबाधितत्वासत्प्रतिपक्षत्वे सूचिते, तद्विपरीतस्य साधनानर्हत्वादिति । § 499

तदेतद् वार्त्तिककारो व्याचष्टे—उदाहरणेनेति । यो धर्मो धूमादिः साध्ये भवति स तथाभूत एवोदाहरणेऽपीति । उदाह्रियत इत्युदाहरणं दृष्टान्तधर्मी तस्मिन्, न पुनः स एव । कुतः अन्यधर्मस्येति । यदि तर्हि नान्यस्य धर्मोऽन्यत्र वर्तते, कथं तर्हि समानता ? सा हि तत्त्वान्यत्वविरोधिनीत्यत आह—किं तु तत्तुल्यः स एवेत्युच्यते, यथा तानेव शालीन् उपयुंक्ते तानेव तित्तिरीनिति । तदनेन सामान्याद् इति भाष्यं व्याख्यातम् । § 500

१ तीक्षेते ] वचनमनुसन्धाय प्रयतिष्येतेnvt-C
६ *] अत्र चnvt-C
१० च ] तुnvt-J
१५ त्वादेव ] °त्वेनnvt-C
१५ ब्दे ] नान्यशब्देnvt-C
१७ रं ] °विशेष° *Om*nvt-C
२९ त्र ] नान्यस्य धर्मोऽन्यत्रnvt-C
३० ते ] एवोच्यतेnvt-C
३० युंक्ते ] °भुञ्जाहेnvt-C

उदाहरणग्रहणप्रयोजनमाह—यदि पुनरिति । साधर्म्यमात्रत्वं हि विरुद्धे चासाधरणे सव्यभिचारे चास्तीति तेषामपि वचनं हेतुः स्यात् । तेषामपि यथास्वं साधारणत्वादित्यनिष्टमित्यर्थः । ननु तथापि सव्य- 235/tha
भिचारेऽप्युदाहरणसाधर्म्यमिति कथं निवर्त्यत इत्यत आह—उदाहरणेति । विशिष्टविधानस्य शेषनिषेधोऽर्थसिद्ध इत्यर्थः । पक्षान्तरमाह—अवधारणेन वेति । साधर्म्यादित्यतो विशेषेण सर्वसाधर्म्यप्राप्तौ उदाहरणसाधर्म्यमपि प्राप्तमेवेति विधानानर्थक्यं परिसंख्यायकं सदवधारणार्थमेव भवति । तदवद्योतनाय च एवकारः । साधर्म्यमेवेत्यत्र साध्यपदं योजनीयम् । तेन साध्यैकदेशासिद्धमपाकरिष्यति । पृच्छति—कस्य पुनरिति । उत्तरम्—कस्यान्यस्येति । अत्रैव हेतुद्वयमाह—प्रकृतत्वात् प्रत्यासत्तेश्च । साध्यं खल्वत्र प्रकृतं प्रधानम्, तदुद्देशेन अवयवानां प्रवृत्तेः । साध्यसाधनमिति च पदेन सन्निधापितमिति तदेव द्वितीयमवधारणं स्फुटीकरोति—अत्रापि चेति । साध्ये प्रतिसन्धाय इति भाष्यार्थमाह—साध्योदाहरणाभ्यामिति । द्वाविति । सपक्षव्यापकाव्यापकावित्यर्थः । अनैकान्तिकस्य चेति । साधारणस्य असाधारणस्य चेत्यर्थः । एवं भाव्यमानेनेति । परिभाव्यमानेन । नातिप्रसक्तस्येति परिसंख्यायकं हेत्वाभासलक्षणं न विधायकमित्यर्थः । § 501

एतत् किल हेतुलक्षणं भदन्तो दूषयांबभूव, साधनं यदि साधर्म्यं न वाक्यांशो, न ह्यर्थः पञ्चावयववाक्यस्यावयवः । न पञ्चमी । यदि साधनसाधर्म्ययोरत्यन्ताभेदो यदि वा सामान्यविशेषभावेन कथञ्चिद् भेदः, उभयथापि न पञ्चमी, सामानाधिकरण्येन प्रथमाप्रसङ्गात् । अत्यन्ताभेदे चैकतरपदाप्रयोगात् । वाक्यं चेत् ततः पञ्चम्युपपद्यते । साधनं हि वाक्यरूपं साधर्म्यादर्थादुत्थितं यतः । तद्विशेष्यं स्यात् न हि वाक्यमेवार्थादुत्थितम्, 236/tha
अपि तु विवक्षाद्यपीति । न विशेष्यम् कुतः ? साधनत्वादसंभवः ॥ अर्थसमुत्थानामपि ज्ञानविवक्षादीनामप्रसङ्गः, असाधनत्वादिति । न तत्रापि द्विधा दोषात् साक्षाद् वा साधनं पारम्पर्येण वा ? यदि पारम्पर्येण, वक्तृज्ञानं तर्हि साक्षात् साधर्म्यसमुत्थं पारम्पर्येण च श्रोतुः साध्यविज्ञानसाधनं हेतुः स्यात् । अथ साक्षात् साधनम्, तर्हि श्रोतृज्ञानं पारम्पर्येण साधर्म्यसमुत्थं साक्षात् साधनं हेतुः स्यात् । प्रकृतत्वेऽन्यसंभवः । यदि तु पञ्चावयववाक्यस्य प्रकृतत्वात् ज्ञानादिव्यवच्छेदः, तथाप्यन्यसंभवः, उपनयस्यापि साधर्म्यसमुत्थत्वात् ।

स्वलक्षणेन बाधा चेन्न विकल्पादिसंभवात् ।
तस्मात् षष्ठ्यस्तु तत्रापि विशेषणमनर्थकम् ॥ § 504

साधर्म्यस्य हेतुरित्येतावन्मात्रं वक्तव्यमिति । § 505

तदेतद् दिग्नागदूषणमुपन्यस्यति—उदाहरणसाधर्म्याच्चेति । यद्यर्थात्मकं साधर्म्यमेव साधनमुच्यते तदैतद् दूषणमित्यर्थः । यदि पुनरर्थात्मकस्य

१ त्वं ] °त्रं हिnvt-C
२३ पीति ] विपक्षा°nvt-C*Var*
२९ वः ] °प्यन्यस्य तथा संभवःnvt-J

साधर्म्यस्य अर्थात्मकमेव साधनं सामान्यमुच्यते, तत्राह—अथ पुनरिति । तदिदमुक्तं भदन्तेन—न पञ्चमी । § 506

अन्ये त्वेतदन्यथा व्याचक्षत इत्याह—अन्ये त्विति । विशेषातिरिक्तं न सामान्यं नाम किञ्चिदस्ति, तस्य कल्पनामात्रत्वाद् भेदस्य च वस्त्वधिष्ठानत्वादित्यभिप्रायः । दोषान्तरमाह—साध्यसाधनेति । यदा हि साध्यसाधनं नामोदाहरणसाधर्म्यादतिरिक्तं नास्ति, किं तु शब्दमात्रमवशिष्यते, तदोदाहरणसाधर्म्यमनेनाभिधेयत्वेन विशेषणीयम् । तथा च साध्यनिर्देशः 237/tha प्रतिज्ञेत्यनेन विरोधः । अनेन ह्यवयवः शब्दात्मकः प्रतिज्ञा लक्ष्यते, हेत्वादिसमुदायापेक्षया चावयवो भवति । न चाभिधानाभिधेयात्मकः समुदायो दृष्ट इति । तस्मात् समुदायाभावात् नोभयेषामवयवत्वम् । तदिदमुक्तम्—न वाक्यांश इति । तदेतल्लक्षणं व्याचक्षाणैरस्माभिः परिहृतमिति न परिहारान्तरं प्रयोजयतीत्याह—तत्र त्विति । उक्तं यथा हेतुपदसन्निधौ साधनपदं हेतुपदे प्रवर्तते, न चोपनयप्रसङ्गः, तस्य प्रातिपदिकार्थमात्रप्रधानत्वेन हेतुभावाप्रकाशकत्वादिति । § 507

अत्र चोदयति—साधर्म्यस्येति । साधर्म्यस्य लिङ्गस्य कृतकत्वादिहेतुपदवाच्यस्य व्यभिचारित्वादियोगादुदाहरणविशेषणयोगो न पुनः साध्यसाधनपदवाच्यस्य कृतकत्वादित्यादेर्हेतुवचनस्येत्यर्थः । तदुक्तं भदन्तेन—तत्रापि विशेषणमनर्थकं वचनेऽपीत्यर्थः । तदेतद् दूषयति—वचस इति । वचनमपि दर्शनभेदेन उभयथापि भवति, यथा मीमांसकानां नित्यं वचनम्, वैशेषिकाणामनित्यमिति । केषाञ्चिदमूर्तः शब्दः, केषाञ्चित् मूर्त इति । यथाहुः वायुरापद्यते शब्दताम् इति । तथा प्रातिस्विकमपि भेदं सर्वेषामेव शब्दानामितिकरणो दर्शयतीत्याह— दृष्टश्चेति । स्वचरितविरोधमाह—स्वयमिति । अनभ्युपगतेति । अनभ्युपगतोऽर्थान्तरं विपक्षो यस्य हेतोरनित्यत्वे साध्ये कृतकत्वादेः स तथोक्तः । यदभ्युपगतं भदन्तेन तस्मात् षष्ठ्यस्त्विति तद् दूषयति—यदपीति । विवक्षातः कारकशब्दप्रयोगादिति । कारकत्वेन संबन्धित्वं लक्षणीयम्, क्रियाकारकभावगर्भत्वात् संबन्धित्वस्य । न तु षष्ठी वा हेतुपञ्चमी वा कारकविभक्तिरिति । अत्र भाष्यकारेण *शुद्धं हेतुवचनमुदाहृतम्—उत्पत्तिधर्मकत्वादिति । तस्य चोदाहरणसाधर्म्यसमुत्थत्वज्ञापनायोदाहरणमपि दर्शितम् उत्पत्तिधर्मकमनित्यं दृष्टमिति । § 508
238/tha

तत्र भाष्यकारेण शुद्धं हेतुवचनमुदाहृतम् । तत्प्रतिज्ञापदेन पूरयित्वा वार्त्तिककृद् आह—उदाहरणमिति । अत्र पृच्छति—किं पुनरिति । सतो विनाशो वा अनित्यत्वम्, तद्योगो वा ? तच्चोभयमयुक्तम्, न हि सदसतोः कश्चिदस्ति संबन्धः, असमानकालत्वात् । ततश्चानित्यः शब्द इति

१५ स्य ] °दित्यादिहेतु° nvt-C
१६ स्य ] व्यभिचार्यव्यभि° nvt-C; आदि *Om* nvt-C
२६ म् ] उपलक्षितम् nvt-C
२७ वा ] °हेतु° *Om* nvt-C
२७ * ] शुद्धं *Om* nvt-J

सामानाधिकरण्यं न स्यात् । अपि च शब्दस्य भूत्वा यदभवनम्, न तदेव पिठरस्य । न ह्यभवनत्वं नामास्ति सामान्यम्, येन दृष्टान्तो न साध्यविकलः स्यात् । न च सामान्यातिरिक्तं सादृश्यं वस्त्वन्तरं दृष्टमिष्टं वा । तस्मात् मृष्टाशेयमनित्यत्वं साध्यमिति भावः । गूढधिय उत्तरम्—यस्यानित्यत्वमस्ति तदनित्यम् । स्वाभिप्रायेण पृच्छति—अथेति । उत्तरवाद्यभिप्रायमुद्घाटयति—उभयान्तेति । अपरान्तेति वक्तव्ये उभयान्तग्रहणेन पूर्वान्तनिवेशनं हेतोरुत्पत्तिमत्त्वस्यात्यन्तिकीं प्रत्यासत्तिमविनाभावोपयोगिनीं दर्शयितुमिति । अवच्छेदकत्वं चोपलक्षणत्वम्, न तु विशेषणत्वम् । तच्चापरान्तस्य भिन्नकालस्य संबद्धस्यापि विरोधितया बुद्धिस्थस्य संभवति । *तथा च यैवापरान्तावच्छिन्नस्य सत्ता पिठरस्य सैवापरान्तावच्छिन्नस्य शब्दस्यापि । एवं सतासमवायोऽपि तद्विधयोः पिठरशब्दयोः समानः । विरोधिभावः पश्चाद्भावश्चाभावमात्रात् प्रध्वंसस्य विशेषः । पृच्छति—अथोत्पत्तीति । न तावदुत्पन्नस्योत्पत्तिर्धर्मः, तदाप्युत्पद्यत इति प्रत्ययप्रसङ्गात् । नाप्यनुत्पन्नस्य, असतो धर्मित्वायोगादिति भावः । गूढधिय उत्तरम्—उत्पत्तिरिति । उक्ताभिप्रायवान् पुनः पृच्छति—का पुनरियमिति । उत्तरम्—असद्विशेषणस्य सतोऽत्यन्तमभावभावप्रतिषेधः । असदिति प्रागभावमाह, विशेषणत्वं च प्रागभावस्य उपलक्षणत्वम् । तच्च भिन्नकालस्यापि बुद्धिस्थतामात्रेणोक्तम् । तेनासद्विशेषणस्य सत इत्येतावतैव पूर्वान्तपरिच्छिन्नस्य सत्तासंबन्धः सत्ता वा तद्विशेषणोत्पत्तिर्दर्शिता । यश्चेदृशस्तस्य गगनवत् नात्यन्तमसंभवः, नापि गगनकुसुमवदत्यन्ताभाव इति स्वरूपमुक्तमुत्पत्तिमुपलक्षयितुम् । 239/tha उपलक्षणोपलक्ष्ययोश्चाभेदविवक्षया सामानाधिकरण्यम् । न चैवं लब्धोत्पत्तिनि वस्तुन्युत्पद्यत इति प्रत्ययप्रसङ्गः । लभ्यमानोत्पत्तिनि तदवयवेषु तदुत्पादनानुकूलव्यापारावेशलब्धपूर्वापरीभावेषु तत्प्रयोगस्य लोके दर्शनात् । तस्मात् पूर्वान्तावच्छिन्नवस्तुसत्तया तत्संबन्धेन वा तस्यैव वस्तुनोऽपरान्तावच्छिन्ना सत्ता वा तत्संबन्धो वा ज्ञाप्यत इति सर्वं रमणीयम् ।

§ 509

ननु भाष्यकृद् अभूत्वा भवतीत्यस्य वाक्यस्यार्थमुत्पत्तिं वक्ष्यति, त्वं पुनरसद्विशेषणस्य सतोऽत्यन्तमभावप्रतिषेध इत्यस्य वाक्यस्यार्थमुत्पत्तिम् । *अतः कुतो न विरोध इत्यत आह—वाक्यार्थेति । य एवार्थो भाष्यकारेण उत्पत्तिशब्दार्थतयाभ्यनुज्ञातोऽङ्गीकृतः, स एवास्माभिरपि । नात्य-

१ स्यात् ] °दितिnvt-C
४ स्मात् ] मृषाशेषम°nvt-C
८ म् ] °त्वं उपलक्षकत्वम्nvt-J
९ * ] तथा च*Om*nvt-J
१० स्य ] °न्तपरिच्छिन्नस्यnvt-J
११ विरोधिभावः ] °भावेnvt-J
१९ वः ] न्तं भावःnvt-J
२० नापि ] नापि*Om*nvt-C
२० न्ताभाव ] °वद्वा नात्य°nvt-C
२२ ङ्गः ] प्रत्यय°*Om*nvt-C
२५ च्छिन्ना ] °न्नता तत्सं°nvt-C
२५ इति ] सर्वं*Om*nvt-J
२७ अभूत्वा ] °भावित्वमि°nvt-C
२७ ति ] न्या. भा. ५. १. ३७
२९ * ] तत्nvt-C

न्तमभावप्रतिषेध उत्पत्तिः, अपि त्वसद्विशेषणस्य सतः सत्ता वा तत्संबन्धो वेत्युक्तमित्यर्थः ॥ ३४ ॥ § 510

## तथा वैधर्म्यात् ॥ १ । १ । ३५ ॥ § 511

सूत्रान्तरमवतारयति—किमेतावदिति । तथा—त् । अत्र यदि वैधर्म्यादित्युच्यते ततः सकलकेसरादिमत्पदार्थपक्षीकरणेनाश्वत्वं यदा विषाणित्वेन साध्यते तस्यास्ति पक्षवैधर्म्यमिति हेतुः स्यादित्यत आह—उदाहरणेन वैधर्म्यमिति । विपक्षेणेत्यर्थः । तथापि यदा शरीरमात्रं पक्षीकृत्य सात्मकत्वं साध्यते प्राणादिमत्त्वेन, तदास्ति तस्योदाहरणेन वैधर्म्यमिति सोऽपि हेतुः स्यादित्यत आह—एवेति । न चैतावता सपक्षे सत्त्वप्रसङ्गः, सपक्षस्याभावात् । अवधारणस्य च व्याप्त्या पक्षसत्त्वेनोपपत्तेरिति । तथापि अन्वयव्यतिरेकिणो
240/tha हेतोरनैकान्तिकस्य च विपक्षे कदेशव्यापिनः संग्रहः स्यात् । यथा अनित्यः शब्दः, उत्पत्तिधर्मकत्वाद् अनित्यो मूर्तत्वादित्यत आह—वैधर्म्यमेव चोदाहरणेनेति विपक्षोदाहरणेनेत्यर्थः । भाष्यकारीयमुदाहरणं निगदेनोपन्यस्यति—अनित्यःशब्द इति । नित्यमनुत्पत्तिधर्मकं दृष्टमिति योजना । तदेतद् दूषयति—एतच्चेति । मा भूत् प्रयोगमात्रभेदाद् भेदः, उदाहरणभेदाद् भेदो भविष्यतीत्यत आह—उदाहरणमात्रभेदाच्चेति । § 512

तदेतद् भाष्यकारीयमुदाहरणं दूषयित्वा स्वकीयमुदाहरणमाह—उदाहरणं त्विति । प्राणादिना च स्वकारणं प्रयत्नेच्छाद्युपलक्षयति—यदुभयपक्षसंप्रतिपन्नं निरात्मकं घटादि तत्सर्वमप्राणादिमद् दृष्टम् इति व्यत्यासेन योजना । *प्राणादिकारणेच्छादिकारणरहितं यदित्यर्थः । तस्मात् नेदमिति । नेच्छादिसमवायिकारणरहितम् । यश्चासौ इच्छादिसमवायिकारणं पृथिव्यादिविलक्षणो द्रव्याणां नवमः, स आत्मेत्युच्यते इत्यर्थः । अन्वयिव्यतिरेकिणस्तद्विवेकस्य च तन्त्रान्तरप्रसिद्धेन नाम्ना *तन्त्रान्तरप्रसिद्धतां दर्शयति—सोऽयमवीत इति । विविधेन प्रकारेण इतः प्राप्तो वीतः, पक्षव्यापकत्वे सति सपक्षव्याप्त्या अव्याप्त्या च, तस्मादन्योऽवीत इति । § 513

गूढाभिसन्धिः पृच्छति—कथं पुनरिति । गूढाभिसन्धेरुत्तरम्—अथ योऽभ्यनुज्ञात इति । यथा वीतस्यार्थपरिच्छेदकत्वं तथैवावीतस्येत्यर्थः । प्रष्टा स्वाभिप्रायमुद्घाटयति—*अन्वयादिति । गृहीताविनाभावो हि हेतुः साध्येन तस्य परिच्छेदकः, स च दृष्टान्तधर्मिणि हेतुसाध्यधर्मयोर्दर्शने सत्यविनाभावो दृष्टो भवति । न च सात्मकत्वं क्वचिद् दृष्टम्, तत् कथं तेनाविनाभावदर्शनं प्राणादिमत्त्वस्य, दर्शने वा नावीतः किं तु वीत एवेत्यर्थः । उत्तर-

१ त्तिः ] °स्योत्पत्तिःnvt-C
९ ता ] सपक्षत्वप्र°nvt-C
१८ णं ] प्रयत्नाद्यु°nvt-C
१९ कं ] घटादि*Om*nvt-C
१९ इति ] विपर्ययेणnvt-C
२० *] °च्छारहितंnvt-C
२२ स्य ] तद्व्यतिरेकिणश्चnvt-C
२३ *] °न्तरसिद्धान्तंnvt-C
२८ ति ] °प्रायमाविष्करोतिnvt-C
२८ *] वीतोऽन्व°nvt-C
३१ वा ] चnvt-C

वादी प्रष्टारं पृच्छति—अथ प्रमेयत्वमिति । प्रष्टा आह—व्यभिचारादिति । उत्तरवाद्याह—न तर्ह्यन्वय इति । स एवैकग्रन्थेनाह—यदि चेति । तदेवमुत्तरवादिना स्वाभिप्राय उद्घाटितः । पृच्छति— कथम् । अव्यभिचारित्वं 241/tha व्यतिरेकिण इति । अव्यभिचारमाह—यावदिति । अत्रापि यावन्निरात्मकं तत् सर्वम् अप्राणादिमद् दृष्टमिति व्यत्यासेन योजना, साध्यविपर्ययस्य व्याप्यत्वात् । व्यापकनिवृत्तौ च व्याप्यं निवर्तते, यथा वृक्षत्वनिवृत्तौ शिंशपात्वम् आरादुपलभ्यमानादेकशिलामयादचलप्रदेशादित्यर्थः । यदि पुनरेवमुच्यते निवर्ततामप्राणादिमत्त्वं जीवच्छरीरात् प्राणादिमत्त्वस्य प्रमाणत उपलब्धेर्मा निवर्तिष्ट नैरात्म्यम्, तस्माद् व्यभिचारादहेतुरिति शङ्कते—अथ पुनरिति । निराकरोति—न युक्तमेवमिति । किं जीवच्छरीरे साध्ये नैरात्म्यनिश्चयाद् व्यभिचार उत तत्सन्देहात् ? यदि निश्चयात् कृतं व्यभिचारेण, बाधितविषयत्वेनैव हेतोरपाकरणात् । अथ सन्देहात्, तथा सत्यन्वयिनोऽप्यहेतुत्वे सर्वानुमानोच्छेदप्रसङ्ग इत्यर्थः । § 514

शङ्कते—सर्वात्मकत्वप्रसङ्ग इति चेत् ? निराकरोति—न, विकल्पानुपपत्तेः । शङ्कावाक्यं विभजते—यदीति । न तावदयमात्मा नाम प्रमाणेन क्वचिदुपलब्धः, यस्य प्रतिषेधो नैरात्म्यमवगम्येत, तदुपलम्भे वा कृतमनया कुसृष्ट्या । तस्मात् कल्पयित्वात्मानमप्रामाणिकं तत्प्रतिषेधस्य घटादावप्राणादिमत्त्वेन व्याप्तिं गृहीत्वा जीवच्छरीरे व्यापकस्याप्राणादिमत्त्वस्य निवृत्त्या नैरात्म्यस्य व्याप्यस्य निवृत्तेरात्मा अवगन्तव्यः । एवं च सति कल्पनाकोषस्यापरिमेयत्वात् यद् यदेव कल्प्यते तत्तदभावस्य घटादौ सुलभत्वाद् अप्राणादिमत्त्वेन व्याप्तेर्जीवच्छरीरेऽप्राणादिमत्त्वस्य व्यापकस्य निवृत्तेरात्मसद्भाववत् सकलकाल्पनिकडित्थादिमत्त्वप्रसङ्ग इत्यर्थः । § 515

निराकरणवाक्यं विभजते—तच्च नैवम् । कस्मात्—विकल्पानुपपत्तेः । विकल्पयति—किमिति । अयमर्थः । प्राणादयो हीच्छाद्यन्वयव्यतिरेकानुविधायिभावाभावतया इच्छादिकार्याः, अक्षणिकत्वे च व्यवस्थिते कार्यं समवायिकारणापेक्षमितीच्छादीनां समवायिकारणेन भाव्यम्, कार्यत्वाद् घटादिवत्, शरीरेन्द्रियादीनां च समवायिकारणत्वनिषेधे सति यद् इच्छादीनां समवायिकारणं परिशिष्यते, तद् द्रव्यमात्मेति च क्षेत्रज्ञ इति च 242/tha जीव इति चाख्यायते । तदस्य विशेषतोऽनवगतस्यापीच्छादिसमवायिकारणतया सामान्यरूपेणावधारितस्य शक्यः प्राणादिरहितेषु घटादिष्वभावः प्रतिपत्तुम् । निरात्मकशब्देनापि चायमेवार्थ उच्यते । अनेन प्राणादिलक्षणकार्याभावेन घटादौ नैरात्म्यलक्षणकारणाभावस्य व्याप्तिरवधारिता । सोऽयं जीवच्छरीरे कार्यस्याभावो व्यापको निवर्तमानः स्वव्याप्यं तत्कारणाभावमादाय निवर्तते इति सिद्धं जीवच्छरीरे प्राणकारणम्, स चात्मेति । यदि च डित्थादयोऽपि तादृशः, तदा आत्मनो नामान्तराणि नार्थान्तराणि । नामानि

९ हेतुरिति ] °तुत्वमित्याश° nvt-J
२६ णेन ] भवितव्यमिति nvt-J
३५ योऽपि ] तथा nvt-C

च लोकतन्त्राणि, न त्विच्छातन्त्राणीति । अवधारितं कार्यं प्राणाद्युपलक्षितमिच्छादि यस्य सोऽवधारितकार्यः । स एव स्वभावो यस्य स तथोक्तः । एतदुक्तं भवति । सामान्यतस्तावदिच्छादीनां कार्यत्वेनान्वयव्यतिरेकिणा हेतुना समवायिकारणावत्त्वमनुमितम् । उभयसिद्धश्च घटादाविच्छादिकारणाभावः । येऽपि हि नैरात्म्यवादिनो बुद्धिं वा भूतपरिणामभेदं वा इच्छादिकारणमाचक्षते, तेऽपि घटादौ न तदातिष्ठन्ते । तस्मादुभयसिद्धनैरात्म्या घटादयः । तेषु चेच्छादिकार्याभावेन नैरात्म्यं व्याप्तम् । सोऽयं जीवच्छरीरे कार्याभावो व्यावर्तमानः कारणाभावं व्यावर्तयति । न च कार्येणैव कारणमनुमीयतां जीवच्छरीरे, किं व्यतिरेकिणा, ऋजुमार्गेण सिध्यन्तं को नु वक्रेण साधयेत् इति वाच्यम्, कारणमात्रस्य ततः सिद्धेरित्युक्तम् । परिशेषाद् विशेषसिद्धिरिति चेत् ? स एव व्यतिरेकीत्युक्तम् । § 516

यदि हि पृथिव्यादिसमवायिकारणा इच्छादयो भवेयुः, घटादिष्वपि प्रसज्येरन् । तस्माद् घटादिष्विच्छादिकार्यनिवृत्त्या द्रव्याष्टकातिरिक्तकारणनिवृत्तिर्व्याप्ता दृष्टेतीच्छादयः शरीरे दृश्यमाना व्यापिकां स्वनिवृत्तिं निवर्तयन्तो व्याप्यद्रव्याष्टकातिरिक्तकारणाभावनिवृत्तिमुखेन नवमं द्रव्यं साधयन्ति
243/tha । न चैषां बुद्धिरेव समवायिकारणम्, द्रव्यस्यैव समवायिकारणत्वनियमाद् बुद्धेश्चाद्रव्यत्वात् । यथा च भूतानां परिणतिभेदो न कारणं तथा तृतीये उपपादयिष्यते । व्यतिरेकमुखेनापि प्राणादेः सात्मकत्वेनान्वयसिद्धौ न केवलव्यतिरेकीति चेत् ? न स्वाभाविकं साध्येन प्रतिबन्धमन्वयव्यतिरेकिणि व्यासेधामः, किं तु सपक्षाभावेन विधिमुखेनास्य प्रतिबन्धं निराकुर्मः । एतावतैव चान्वयिनो भिद्यते । न च पक्ष एव सपक्षः, जिज्ञासितविशेषस्य ज्ञातविशेषादन्यत्वात् । शरीरादिषु च सत्सु नैरात्म्यनिषेध एवात्मसद्भावः, असन्निषेधस्य सद्भावलक्षणत्वात् । सपक्षाभावस्तु नैरात्म्येनाप्यव्यपदेश्य इति कथं नैरात्म्यनिषेधेन व्यपदिश्यताम् असतोऽधिकरणत्वायोगादित्युक्तम् ।
§ 517

एतेन परैः यदुक्तम्,

> सपक्षाव्यतिरेकी चेद् भवेद्धेतुरतोऽन्वयी ।
> नान्वय्यव्यतिरेकी चेदनैरात्म्यं न सात्मकम् ॥§ 520

इति, तदनेन निराकृतम् । एतच्चास्माभिरन्वयिहेतुसमर्थनेन स्फुटीकृतम् । तस्मात् सर्वमवदातम् ॥ § 521

विपक्षव्यतिरेकिमात्रेण व्यतिरेकिणो गमकत्वं मत्वा चोदयति—यदि तर्हीति । परिहरति—न, हेत्वर्थापरिज्ञानादिति । न वैधर्म्यमात्रेण गमकत्वम्, अपि त्वव्यभिचारिणा । स चात्राव्यभिचारो नास्तीत्यर्थः । ननु मा भूद् गन्ध-

---

१ न्त्राणीति ] न °णीति*Om*nvt-C
१८ ते ] न्या. सू. ३.२.३८
२८ म् ] प्र. वा. ४. २४४
३० म् ] टी १.१.५

वत्त्वं हेतुर्व्यतिरेकव्यभिचाराद् अनित्यादिवन्नित्यादप्यस्य व्यतिरेकात् । यस्य तु पक्ष एव केवलं न तु सपक्षविपक्षौ, न तस्य व्यतिरेकव्यभिचारोऽस्तीति स कस्मात् न हेतुरिति चोदयति—यः पुनरिति । परिहरति—सत्यमिति । व्यतिरेकधर्मोऽव्यभिचारो नासति व्यतिरेके संभवति, असतोऽधिकरणत्वायोगादित्युक्तत्वादिति । प्रत्युदाहरणान्तरं दर्शयति—एतेनेति । एतेन विपक्षाभावात् ततो व्यावृत्त्यभावेनेत्यर्थः । चोदयति—यः पक्षैकदेश इति । यदि हि पक्षैकदेशवृत्तिरपि विपक्षाभावात् न व्यतिरेकी हेतुः, तर्हि य- 244/tha
स्य पक्षैकदेशवृत्तेरपि सतो विपक्षानिवृत्तिरस्ति स हेतुः प्रसज्येत । अस्ति खल्वस्योदाहरणवैधर्म्यमेवेति व्यतिरेकिहेतुलक्षणमित्यभिप्रायः । परिहरति—अयमपि न हेतुः, कस्मात् ? सूत्रार्थेनापोदितत्वात् । तं सूत्रपाठपूर्वकं दर्शयति— सूत्रार्थ इति । अत्र च येन पक्षैकदेशवृत्तेर्व्यतिरेक्याभासस्य निराकरणं तदवधारणं प्रथमं दर्शितम् । उदाहरणेनैव वैधर्म्यं नानुदाहरणेन पक्षेणापि । अस्य तु पक्षेणापीति व्यतिरेक्यपि न हेतुः, न पुनर्वैधर्म्यमेवेति सूत्रार्थः । तथा सति सव्यभिचारमात्रस्य निवृत्तिः स्यात्, न तु पक्षैकदेशवृत्तेरित्यर्थः ।

§ 522

संप्रति *वासुबन्धवं हेतुलक्षणं दूषयितुमुपन्यस्यति—हेतुर्विपक्षाद्विशेष इत्यन्ये । एतद् व्याचष्टे—अन्ये त्विति । साधर्म्यमात्रनिराकरण इति । यस्य कस्यचित् साधर्म्यस्य निराकरणे । विपक्षसाधर्म्यनिराकणे तावदिष्टस्य संग्रहः । यदा तु सपक्षादिसाधर्म्यनिराकरणम्, तदा अनिष्टस्य विरुद्धादेः संग्रहः । उपलक्षणं चैतत् । इष्टानिष्टसंग्रह इति, इष्टपरित्याग इत्यपि द्रष्टव्यम् । स चानेकभेद इति । सपक्षादपि विशेषे सति विपक्षाद् विशेषः, पक्षादपि विशेषे सति विपक्षाद् विशेषः, विपक्षमात्राद् वा विशेषः इति प्रकाराः । *तत्र पूर्वयोः प्रकारयोर्यथाक्रममसाधारणस्य चासिद्धस्य च हेतुत्वप्रसङ्ग इति, तन्निवृत्त्यर्थं विपक्षादेव इत्यवधार्यते । द्वितीयमवधारणमवतारयितुमाह—अवधारणे चेति । विपक्षादेवेत्यनेनावधारणेन विशेषोऽ वधारितः, न विपक्षः । स चायं विशेषे चाविशेषे च प्रसृत इति विपक्षैकदेशवृत्तेरपि पक्षसपक्षसाधारणस्य हेतुत्वप्रसङ्गः । तन्निवृत्त्यर्थं द्वितीयमवधारणं विशेष एवेति । उपसंहरति—तदेवमिति । § 523

तदेतदव्यापकत्वेन दूषयति—सत्यमेक इति । अत्र चोदयति—विपक्षैकदेशवृत्तिप्रतिषेधादिति । विशेष एवेत्यवधारणेन विपक्षैकदेशवृत्तिः गौरयं विषाणित्वादिति हेतुत्वेन प्रतिषिद्धः । तस्मादेतस्मिन्नवधारणे सत्येव विप- 245/tha
क्षादेवेत्यवधारणीयम् । तथा च विपक्षादेव यो विशेष एव स हेतुः । सपक्षात्तु यो विशेष एव स न हेतुरित्युक्तं भवति । तथा च अश्वोऽयं

---

५ त्वादिति ] °क्तमितिnvt-C
८ तो ] विपक्षानि° JK
१६ *] वासुबन्धवं*Om*nvt-C
१६ ति ] उपन्यस्य दूषयतिnvt-C
२२ वा ] वा*Om*nvt-C
२२ *] अत्रnvt-C
३० यं ] गौरियंnvt-C
३१ विषाणित्वादिति ] द्रः वै. सू. ३. १. १७

विषाणित्वात् इति सपक्षाद् विशेष एवेति हेतुत्वेन प्रतिषिद्धो भवति । यस्तु सपक्षैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिः स सपक्षाद् विशेष एव न भवति, अपि तु सामान्यमपीति । *न तस्याहेतुत्वमवधारितमिति हेतुरेवासावित्यर्थः । परिहरति—यद्येवमिति । यदि सपक्षादपि यो विशेषः स सपक्षैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिर्हेतुः, एवं सति विपक्षादेवेति अवधारणं बाधितं भवति । शङ्कते—अथेति । न विपक्षादेवेत्येतन्मात्रमवधार्यते, येन सपक्षैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिर्न हेतुः स्यात्, अपि तु यो विशेष एव स हेतुरिति प्राप्ते विपक्षादेवेति नियम्यते, तेन सावधारणस्य विशेषस्य विपक्षवृत्तेर्हेतुत्वं प्रतिषिद्धं भवति यथा अश्वोऽयं विषाणीत्वादिति । यः पुनर्विशेषश्चाविशेषश्च सपक्षे हेतुः, तस्य हेतुत्वेऽपि न विपक्षादेवेति बाधितं भवति । यद्यपि चैवं सत्यपि सपक्षैकदेशवृत्तेर्हेतुत्वं न श्रुतम्, तथापि विपक्षादेवेत्यनेनावधारणेनानिषिद्धमित्यनुमतमेव । तेन चाश्रुतेनार्थेनार्थवती अवधारणे इत्यर्थः । § 524

निराकरोति—एवं चेति । यथा तत्तुल्यैकदेशवृत्तेरविहितमपि हेतुत्वमनिषेधादनुमतम् एवं पक्षैकदेशवृत्तेरपीति सोऽपि हेतुः स्यादित्यर्थः । पुनः प्रत्यवतिष्ठते—नैष दोष इति । पक्षधर्मत्वे सति विशेष एव विपक्षादेवेति नियमे कुतः पक्षैकदेशवृत्तेः प्राप्तिः, अपक्षधर्मत्वात् तस्येत्यर्थः । परिहरति—यो धर्मः पक्षस्येत्यनेनेति । पर आह—न कर्तव्य इति । दूषयितिमवधारणं विकल्पयति—किं पुनरिति । प्रथमं कल्पं गृह्णाति—अस्तु तावदिति । एतमपि दूषयितुं विकल्पयति—किं पुनरस्येति । सामर्थ्यं प्रयोजनाभिसंबन्धः संभवज्ञापनपक्षेऽज्ञापननिवृतिः प्रयोजनम् । असंभवनिवृत्तिपक्षे तु अत्य-
246/tha न्तायोगव्यावृत्तिः फलम् । यथा नीलं सरोजं भवत्ये वेति । विकल्प्य दूषयति—उभयथापीति । युक्त्यन्तरमाह—न चेति । अत्यन्तायोगो निषिद्धो भवति, न त्वयोग इत्यर्थः । शङ्कते—अथेति । विशेषणसंगतो ह्येवकारोऽयोगं व्यवच्छिनत्ति, यथा चैत्रो धनुर्धर एवेति । हेतुविशेषणं चेत् अपक्षधर्म एवेति । तस्मात् सिद्धं पक्षैकदेशे वृत्तेर्निराकरणमित्यर्थः । निराकरोति— सत्यमिति । शेषमनुमानसूत्रे व्याख्यातप्रायमिति नेह व्याख्यातम् । § 525

हेतुर्विपक्षाद् विशेष इति च यदा सौत्रान्तिकपक्षमिति । यदा त्वनित्यत्वहेतौ लक्ष्ये लक्षणं विचार्यते इति विपक्षशब्दार्थो वाच्यः । ननु च नित्यो विपक्ष इत्यत आह—न ह्यसतीति । न हि निरुपाख्यमाख्यायत इत्यर्थः । न चास्यापादानत्वं नाप्यधिकरणत्वं येन पञ्चमी वा सप्तमी वा प्रयुज्येतेति आह—न चासतीति । न चासतो विपक्षाद् व्यावृत्त्यभावेन विशेषोऽपीत्याह—विपक्षासंभवे चेति । पक्षस्यैवेति । अत्र चैवकारास्त्रय

---

१ विषाणित्वात्] द्रः वै. सू. ३. १. १६
३ *] तस्य हेतुत्वमवधारितम्nvt-C
५ एवं] सति*Om*nvt-C
८ तेन] साधारणस्यnvt-C
११ पि] अपि*Om*nvt-C
१६ एव] विपक्षादेव*Om*nvt-C
२९ वाच्यः] वक्तव्यःnvt-J
३२ वा] प्रसज्येतnvt-C

पदान्तरानपेक्षत्वं सूचयन्ति । पक्षस्यैव धर्म इति हेतुलक्षणे असाधारण एव हेतुः स्यात् । समान एव सिद्ध इति तु हेतुलक्षणे *अश्वस्य विषाणित्वे साध्ये गोत्वादिर्हेतुः स्यात् । विपक्ष एव नास्तीत्युच्यमाने अनित्यः शब्दः प्रमेयत्वादित्ययं हेतुः स्यात् । तस्मात् त्रयः पक्षाः हेयाः तथा च पक्षस्य धर्मः समाने च सिद्धः इत्यत्र सव्यभिचारो हेतुः स्यात् । पक्षस्य धर्मो विपक्षे च नास्तीत्यत्रासाधारणो हेतुः स्यात् । समाने च सिद्धो विपक्षे च नास्तीत्यत्र अनित्यः परमाणुः कृतकत्वादिति हेतुः स्यादिति त्रयः । सप्तममभिमतं पक्षमाह—पक्षस्येति । शेषं सुबोधम् । § 526

अत्र दिग्नागेन

सपक्षे सन्नसन् द्वेधा पक्षधर्मः पुनस्त्रिधा ।
प्रत्येकमसपक्षे च सदसद्विविधत्वतः ॥§ 529

इति नव पक्षधर्मान् हेतुतदाभासान् दर्शयित्वा 247/tha

तत्र यः सन् सजातीये द्वेधा चासंस्तदत्यये ।
स हेतुर्विपरीतोऽस्माद् विरुद्धोऽन्यत्वनिश्चितः ॥§ 531

* (Edtext outside numbered paragraph)इत्यनेन हेतुतदाभासविवेको दर्शितः । तस्यार्थः । यः पक्षधर्मः स सपक्षे सन् असन् द्वेधा इति (Edtext outside numbered paragraph)त्रिविधः, स पुनरसपक्षे सदसद्विविधत्वतः प्रत्येकं त्रिधा भवतीति । पक्षधर्मः सपक्षे सन् विपक्षे सदसद्विविधत्वतस्त्रिधा । पक्षधर्मः सपक्षेऽसन् (Edtext outside numbered paragraph) विपक्षे सदसद्विविधत्वतस्त्रिधा, पक्षधर्मः सपक्षे द्वेधा विपक्षे सदसद्विविधत्वतस्त्रिधेति (Edtext outside numbered paragraph) । अत्रोदाहरणम्,

प्रमेयकृतकानित्यकृतश्रावणयत्नजाः ।
अनित्ययत्नजास्पर्शानित्यत्वादिषु ते नव ॥§ 533

नित्यत्वादिषु साध्येषु प्रमेयत्वादयो नव हेतुतदाभासाः । तेषां यथासंख्यं नित्यत्वादीनि साध्यान्युदाहरन्ति § 534

नित्यानित्यप्रयत्नोत्थमध्यमत्रिकशाश्वताः ।
अयत्नानित्यनित्याश्च प्रमेयत्वादिसाधनाः ॥§ 536

तदेतेषु हेतुतदाभासेषु हेतुर्निर्धारितो येन तदुपन्यस्य वार्त्तिककारो व्याचष्टे— तत्र य इति । तदेतद् दूषयति—यथाश्रुतीति । § 537

२ *] नरस्यnvt-J
३ गोत्वादिर्हेतुः] °दिति हेतुःnvt-J
४ ब्दः] अप्रमेयत्वादित्ययंnvt-J
६ च] नास्तीत्युच्यमानेnvt-C
१७ दीनि] °दीतिnvt-C

तत्र यः सन् सजातीये द्वेधा चासंस्तदत्यये इत्येतावन्मात्रात् न लभ्यते इत्यर्थः । चोदयति—ननु चोक्तमिति । उक्तं दिग्नागेन,

साध्यधर्मो यतो हेतुस्तदाभासाश्च भूयसा ।§ 539

इति । तदेतत् परिहरति—उक्तमेतदिति । न पुनः पक्षधर्म एवेत्यर्थः, अवधारणमबुद्धा शङ्कते—अथापीति । अवधारणार्थालाभेनोत्तरमाह—सत्यमर्थादिति । ननु अपक्षधर्मत्वनिवृत्त्यैव पक्षव्यापकत्त्वं गम्यते, न ह्यव्यापको भवत्यपक्षधर्मत्वनिवृत्तिमानित्यत आह—अपक्षधर्मनिवृत्तिमात्रत्वेन चेति । अत्यन्तनिवृत्तिनिषेधेन वृत्तिमात्रं स्यात् नैकान्तिकी वृत्तिरित्यर्थः । चोदयति—न प्राप्त इति । परिहरति— नावधारणस्येति । हेतुहेत्वाभासावेव पक्षधर्मौ नान्य इति नियमज्ञापनार्थमवधारणमिष्टं भवद्भिरित्यर्थः । § 540

शङ्कते—अथोभयेति । निराकरोति—तथापि सन् सजातीय इति । तदेतत् पूर्वमेव व्याख्यातप्रायम् । द्वेधा चेति सर्वथा न वक्तव्यमिति । सन् सजातीय इत्यस्योपादानेऽनुपादाने चेत्यर्थः । सन् सजातीय इति नोपादातव्यमिति यदुक्तम्, तत्र शङ्कते—अथ मन्येतेति । निराकरोति—अवधारणेति । यद्यवधारणं युज्येत, अवधारणार्थो युक्त आरम्भः स्यात्, तदेव त्वयुक्तमित्यर्थः । आद्ये पद इति । पक्षस्य धर्म एव इत्येतस्मिन् पद इत्यर्थः । अन्यपदे इति । अन्ये पदे ययोः पक्षधर्मत्वविपक्षासत्त्वयोस्ते तथोक्ते । तत्र द्वैविध्यं निराक्रियत इति । सन् सजातीयेति सर्वथेति सजातीये द्वेधा चेति पदोपादाने चानुपादाने चेत्यर्थः । सजातीय एव द्विधेत्यनेनैवेति हेतुतदाभासयोरौत्सर्गिके पक्षधर्मत्वे स्थित इत्यर्थः । शङ्कते—अथ मा भूदिति सजातीय एव द्विधेति नावधारणमित्यर्थः । निराकरोति—तथापीति । सन् सजातीये द्विधेति मध्यमपदे इत्यर्थः । तदेवं सजातीये एव द्विधेत्यवधारणं दूषितम् । संप्रति द्वितीयमवधारणं शङ्कते—अथ पुनरिति । निराकरोति—तथापीति । तथापि पक्षैकदेशवृत्तिरपि हेतुः प्रसक्तः । यदि च तदत्यय एवेति नावधार्येत ततोऽनैकान्तिकोऽपि हेतुः स्यादिति दोषः । § 541

दिग्नागस्यैव प्रदेशान्तरहेतुलक्षणम्—ग्राह्यधर्मः पक्षधर्मः, तदंशेन तस्यैव पक्षस्यांशेन साध्यधर्मसामान्येन, व्याप्तो हेतुरिति । *तदेतद्धेतुलक्षणमुपन्यस्यास्मिन् पूर्वोक्तं दोषमतिदिशति—एतेनेति । अतिदेशमेव स्फुटयति—अव्यापकादिरिति । यथाश्रुतलक्षणे पक्षाव्यापकस्य हेतुत्वम्, तदंशेन व्याप्त इत्यस्य विवरणालोचनेन सपक्षे सत्त्वं विपक्षाच्च व्यावृत्तिरित्यर्थः । तथा च पूर्वोक्तदोषानुषङ्ग इत्यर्थः । सिंहावलोकितन्यायेन दूषयति—असंस्तदत्यय इतीति । § 542

249/tha

६ त्त्वं ] ननु पक्ष°...पक्षाव्यापकत्वंnvt-C
२७ *] तदेव तद्धे° nvt-C
२९ णे ] °ग्रहणे nvt-J
२९ व्याप्त ] °शेऽतिव्याप्तम् nvt-C
३१ ङ्ग ] दोषप्रसङ्गः nvt-C

अन्येषां हेतुलक्षणं दूषयितुमुपन्यस्यति—तादृगिति । तदेतद्व्याचष्टे— तादृशेति । किलकारोऽरुचौ । पक्षधर्म इति च हेतोरभिधानम् । तेन त्रिलक्षणप्रविभावितात्मा हेतुरित्यर्थः । दूषयति—यत् तावदिति । श्रावणत्वाद्यपीति । तदुक्तोऽसाधारण इत्यर्थः । यस्तु तादृगविनाभावीति विपक्षे सत्ताप्रतिषेधात् *सपक्षे सत्त्वं गम्यते एव, विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वादिति मन्येत, तं प्रत्याह—भवतु तावदिति । एकदेशाभ्यनुज्ञानेऽपि विशेषनिषेधस्योपपत्तेर्न समस्ताशेषाभ्यनुज्ञाने प्रमाणमस्तीत्यभिप्रायः । चोदयति—ननूपदर्शनग्रहणादिति । परिहरति—न तल्लभ्यत इति । न हि चाक्षुषत्वमिति । बौद्धानां रूपत्वादिजातेर्नित्याया अभावाद् न चाक्षुषत्वमनित्यत्वेन विना भवतीत्यर्थः । यस्तु मन्येत विशेषनिषेधस्य शेषमात्राभ्यनुज्ञाहेतुत्वेनागृह्यमाणविशेषत्वात् पक्षसत्ताभ्यनुज्ञानम्, तथा चोपदर्शनपदेन पक्षे हेतोः सत्तोपदर्शनं भवतीति तं प्रत्युपेत्याह—उपेत्य वेति । सुबोधम् । § 543

तदेवं लक्षणं दूषयित्वा तदुदाहरणं दूषयति—यत्त्विदमिति । एतस्मिन् हेतुलक्षणे इत्यर्थः । प्रयत्ननान्तरीयकत्वं प्रयत्नकारणकत्वं तत् साक्षात् पारम्पर्येण वा ? तत्र प्रथमे कल्पे दूषणमाह—प्रयत्नानन्तरीयकत्वस्येति । द्वितीयकल्पमाशङ्क्य दूषयति—अथेति । प्रयत्नग्रहणमपार्थकमित्यर्थः । भावप्रत्ययवाच्यं विकल्प्य दूषयति—यच्चेदमिति । एवमप्युपलब्धेरेवेति । न हि बौद्धराद्धान्ते किञ्चिदुपलभ्यमानं नित्यमस्ति, येनोपलब्धिर्विशेष्येत इत्यभिप्रायः । प्रयत्नानन्तरमन्यथा चेति । यत् तावदुपलब्धिकर्म तत्सर्वं प्रयत्नादेव पुरुषव्यापारादेवोपलभ्यते नान्यथेत्यर्थः । शङ्कते—अथेति । *अस्माकं नैयायिकानामिति भावः । उत्तरम्— त्वयैवेति । अस्मद्दर्शनं चेदास्थाय त्वया बौद्धेनोच्यते, ततः प्रयत्नग्रहणेनाप्यनैकान्तिकत्वं तदवस्थमेवेत्यर्थः । अव्यापकं चेति । न हि दवदहनाभिघात प्रस्फुटद्वेणुदलविभागजन्मा 250/tha
ठात्कारोऽस्मदादिप्रयत्नकार्य इत्यर्थः । शङ्कते—अथेति । वर्णात्मकमित्यर्थः । निराकरोति—तत्रापीति । पारम्पर्येणापि प्रथम एव वर्णः प्रयत्नानन्तरीयकः, न द्वितीयादयः । अतिपारम्पर्याश्रयणे त्वतिप्रसङ्गः, प्रायेण तस्य तत्र तत्र सुलभत्वादिति भावः । शङ्कते—अथ य इति । विशेषः प्रयत्नानन्तरीयकत्वं धर्मिविशेषणम्, प्रयत्नानन्तरीयकत्वं सामान्यं च हेतुरित्यर्थः । निराकरोति—तथाप्यन्य इति । न हि भवतामस्माकमिव विशेषातिरिक्तमस्ति सामान्यं वस्तु सद् यो हेतुः स्यात् । न च कल्पनारोपितं हेतुः सम्यग्ज्ञानस्य भवितुमर्हति, न चात्यन्तासतः कल्पनापि संभवतीति भावः । § 544

---

३ विभावितात्मा ] °प्रविभागात्माnvt-C
४ स्तु ] तादृशा विना न भवतीतिnvt-C
५ *] पक्षेnvt-C
५ एव ] एव*Om*nvt-C
१२ तं ] प्रत्याहnvt-C
१८ ब्धिर्विशेष्येत ] इत्यर्थःnvt-C
१९ त् ] यावत्nvt-C
२० *] युष्माकंnvt-C
२४ कार्य ] °प्रयत्नसाध्यःnvt-C
२७ भावः ] भावः*Om*nvt-C
३० द् ] अस्ति वस्तु सामान्यं सद्nvt-C

तदेवमुदाहरणं दूषयित्वा प्रसङ्गेन परेषामुदाहरणविचारं दूषयति— यदप्युक्तमिति । यत् खल्वसत् सर्वसामर्थ्यरहितं तदाश्रितानाश्रितभावाभावधर्मवन्न भवतीत्यर्थः । नित्यं तु किञ्चिद् भवतीति । तस्य धर्मयोगः संभवत्येव, न त्वस्याप्यप्रयत्नानन्तरीयकत्वं त्वप्रत्ययाभिधेयं हि जन्म, तत् प्रयत्नेन प्रयत्नादन्येन वा विशेषणीयम्, यस्य तु जन्मैव नास्ति तस्य तद्विशेषणं दूरोत्सारितमित्यर्थः । एतेनाभाव इति । नैयायिकाभिमतोऽप्यभावो व्याख्यातः । तस्यापि हि प्रागसतः स्वकारणे न समवाय इति जन्म नास्तीति न तद्विशेषणयोग इत्यर्थः । प्रकृतमुपसंहरति—तदेवमिति ॥ ३५ ॥ § 545

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ १ । १ । ३६ ॥ § 546

हेतावुक्ते नाव्याप्तोऽसौ साध्यधर्मेण हेतुभावे व्यवतिष्ठते, न च व्याप्तिप्रदर्शनमुदाहरणमन्तरेणेति हेतुलक्षणानन्तरं क्रमप्राप्तमुदाहरणलक्षणमाह—साध्यरणम् । सूत्रमित्युदाहरणसामान्यलक्षणमप्यनेन सूचितमिति दर्शितम् । 251/tha अस्य तात्पर्यमाह—अस्येति । दृष्टान्तोऽर्थरूपो नोदाहरणस्य वचनात्मकस्य स्वरूपतो लक्षणं संभवति । तस्मात् स्वाभिधायकवचनोपलक्षकत्वेन लक्षणत्वं सामानाधिकरण्यं च भजत इत्यभिसन्धिनोक्तम्—उदाहरणोपलक्षणमिति । अनेन च समानजातीयेभ्यः प्रतिज्ञादिभ्यः असमानजातीयेभ्यश्च प्रमाणादिभ्य उदाहरणं व्यवच्छिन्नं भवति । साध्येन साधर्म्यम् इत्यादि भाष्यम् । तस्यार्थः । साध्येन धर्मिणा शब्देन, साधर्म्यं दृष्टान्तस्य स्थाल्यादेः कृतकत्वं हेतुः । तद्ध्यनित्यत्वेन साध्ये च शब्दे दृष्टान्ते च स्थाल्यादौ समानम् । तस्मात् कारणात् प्रयोजकात्, तद्धर्मभावी तस्यैव साध्यस्य शब्दस्य यो धर्मो धर्मान्तरम्, येन विशिष्टः शब्दः सिषाधयिषितोऽनित्यत्वेन, तदनित्यत्वं तद्धर्मः । स एव भावस्तद्भावः । सोऽस्यास्तीति तद्धर्मभावी स्थाल्यादिरनित्यत्वधर्मवानिति यावत् । तेन तादृशा दृष्टान्तेनोपलक्षितं तद्विषयं वचनमुदाहरणमिति । § 547

तत्र वार्त्तिककारः सूत्रपदं व्याचक्षाण एव फलतो भाष्यं व्याचष्टे— साध्येति । उदाहरणसाधर्म्यादित्यस्य व्याख्यानं साध्यसाधर्म्यादित्यत्रापि योजयति—अत्रापीति । साध्यशब्देनैव कृतकत्वं साधर्म्यं दृष्टान्तस्य, नासाध्येन विपक्षेणाकाशादिना नित्येन, ततो हि कृतकत्वं व्यावृत्तमिति । तथा च सव्यभिचारो व्यवच्छिन्नो भवति । साधर्म्यमेवेति भागासिद्धो व्यवच्छिन्नः । यस्मात् साध्यसाधर्म्यात् तद्धर्मभावी भवति,* सोऽयं दृष्टान्त उदाहरणमिति यावद् वाक्यं न समाप्यते, तावदर्धोक्त एव पृच्छति—किं कुतश्चिदिति । अवधार-

२ त्] असत्*Om*nvt-C
४ त्] तत्*Om*nvt-C
७ न] कारणेnvt-J
१३ मिति] सूच्यत इतिnvt-J
२० त्वेन] °त्वम्, तद्वति नित्य°nvt-C
२३ द्भावः] तद्भावः*Om*nvt-J
२४ वानिति] °धर्म°*Om*nvt-J
३१ *] भवतीत्येतत्nvt-C

णद्वययोगिनः साध्यसाधर्म्याद् दृष्टान्तोऽवश्यमेव तद्धर्मभावी भवतीति गतार्थं तद्धर्मभावीत्येतदिति भावः । उत्तरम्—न भवत्यपीति । यथा नित्ये शब्दे साध्ये अमूर्तत्वादेः साध्येन शब्देन कर्मणः साधर्म्यात् कर्म न तद्धर्मभावि भवति, नित्यं न भवतीत्यर्थः । साध्येनैवेत्यवधारणेनैव एतदुदाहरणं प्रत्युक्त-
मिति । शिष्योपाध्यायश्यामत्वमैत्र तनयत्वादयोऽत्रौपाधिकसंबन्धा उदाहार्याः 252/tha
। हेतुलक्षणे तु सामान्यलक्षणापेक्षं विशेषलक्षणमिति नातिव्याप्तिः । अत्र च साध्यसाधर्म्यग्रहणेन साधनविकलमनुदाहरणं भवतीत्युक्तं भवति । यथा नित्यः शब्दोऽमूर्तत्वात् परमाणुवदिति तद्धर्मभावीत्यनेन च साध्यविकलं परास्तम् । यथा नित्यः शब्दो मूर्तत्वात् कर्मवदिति । एतेनोभयविकलमपि पराकृतम् । यथा नित्यः शब्दोऽमूर्तत्वाद् घटवदिति । पञ्चम्युपादानेन च साध्यसाधर्म्यप्रयुक्तं तद्धर्मभावित्वं यत्र वचने प्रदर्श्यते तदेवोदाहरणं नान्यदिति दर्शितं भवति । प्रयोजकत्वं च साध्यसाधर्म्यस्य हेतोः स्वाभाविकः संबन्धो व्याप्यत्वमिति यावत् । प्रयोज्यत्वं च साध्यसाधर्म्यस्य व्यापकत्वमेव । तेनाप्रदर्शितान्वयविपरीतप्रदर्शितान्वययोरनुदाहरणत्वमुक्तं भवतीति । तद्यथा अनित्यः शब्दः उत्पत्तिमत्त्वात्, पटवदिति । यो योऽनित्यः, स सर्व उत्पत्तिमान् यथा घट इति । समाख्यानिर्वचनसामर्थ्यात् सामान्यलक्षणमप्यनेन सूचितमित्याशयवता भाष्यकृता समाख्याया निरुक्तिः कृता । तां वार्त्तिककारो दर्शयति— उदाह्रियतेऽनेनेति । § 548

चोदयति—ननु चेति । परिहरति—नैष दोष इति । वचनस्य विशेषणत्वेनोपलक्षणत्वेनेत्यर्थः । अभिधीयमान इति चाभिधानोपलक्षणपरम्, नाभिधेयपरम्, असामानाधिकरण्यदोषस्य तादवस्थ्यात् । तद्धर्मभावीति सूत्रावयवव्याख्यानपरं भाष्यम्—तस्य धर्म इत्यादि । अत्र चोत्तरमिति गूढाभिप्रायम् । तदेतद् भाष्यमनुभाष्यव्याचष्टे—तस्य धर्म इति । तस्य धर्मस्तद्धर्म इति हि धर्मस्य संबन्धित्वेन पृथग्वचनम् । न च धर्म एव धर्मस्य, नापि धर्मान्तरं धर्मस्य, किं तु धर्मिण इत्यर्थः । भाष्यकारीयामनुपपत्तिमुक्त्वा वार्त्तिककारः स्वकीयामप्याह—धर्मे च साध्य इति । अनेन हेतूदाहरणोप-
नयलक्षणैर्व्याघात उक्तः । भाष्यम् । साध्यसाधर्म्याद् उत्पत्तिधर्मकत्वादिति, 253/tha
तद्व्याचष्टे—तस्य धर्मिण इति । तद्धर्मभावी भवतीति, तदनुपपन्नं; न हि कृतकत्वात् स्थाल्यादेरनित्यत्वं भवति, जायते बीजादिवाङ्कुर इत्यत उक्तम्—भवति विद्यते ॥ ३६ ॥ § 549

४ न] भवति नित्यं न *Om* nvt-K
८ नेन] च*Om*nvt-C
१० पि] परिहृतमnvt-C
१३ त्वं] तुnvt-J
१४ मेव] °मिति यावत्nvt-C
१५ स] सःnvt-C
१६ इति] इति चेतिnvt-J
१७ कृता] न्या° भा. १ । १ । ३६
२३ म्] गूढाभि° nvt-K पाठाभि° nvt-Cnvt-J
२७ णैर्व्याघात] लक्षणसूत्रैःnvt-J
२८ इति] उत्पत्तिधर्मकत्वादिति तद्व्याचष्टे—तस्य धर्मिण इति *Om* nvt-J
२९ ति] भवति औम् ञ्

## तद्विपर्ययाद्वा विपरीतम् ॥ १ । १ । ३७ ॥ § 550

वैधर्म्योदाहरणस्य लक्षणम्—तद्वि—तम् । अनुवृत्तेन पूरयित्वा सव्याख्यानं सूत्रं पठति—साध्यवैधर्म्यादतद्धर्मभावी च दृष्टान्त उदाहरणमिति । सात्मकतया साध्येन जीवच्छरीरेण वैधर्म्याद् घटादेर्दृष्टान्तस्य सात्मकत्वसाधर्म्यविरहादिति यावत् । तस्य साध्यस्य जीवच्छरीरस्य धर्मः प्राणादिमत्त्वं तद्धर्मः । स एव भावस्तद्धर्मभावः । सोऽस्यास्तीति तद्धर्मभावी । न तद्धर्मभावी अतद्धर्मभावी प्राणादिरहितो घटादिरिति यावत् । एतदुक्तं भवति, यत्र घटादौ साध्यधर्माभावप्रयुक्तः साधनधर्माभावः, स घटादिवैधर्म्यदृष्टान्तः । तद्विषयः शब्द उदाहरणमिति । सूत्रस्थश्च वाशब्दः समुच्चये वेदितव्यः, व्यतिरेकविषयत्वाद् वैधर्म्योदाहरणस्येति । अत्र भाष्यकारेणान्वयव्यतिरेकी पूर्वसूत्रोदाहृतोऽत्राप्युदाहृतः । साधनधर्माभावप्रयुक्तत्वं च साध्यधर्माभावस्योक्तम्, तच्चायुक्तम् । अन्वयव्यतिरेकिणि हेतौ सत्यपि वैधर्म्ये साधर्म्योदाहरणमेवोचितम्, तत्र तत्पूर्वकत्वाद् वैधर्म्यप्रतीतेः, ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात् । व्याप्यव्यापकभावश्च यादृशो भावयोः, तदभावयोस्तद्विपरीतो बोद्धव्यः । अन्यथा सपक्षैकदेशवर्ती न हेतुः स्यादिति मन्यमानो वार्त्तिककार आह—उदाहरणमवीतहेताविति । तच्चास्माभिः सूत्रं योजयद्भिरुक्तमिति । § 551
254/tha

अत्र आचार्यदेशीयानाम् अनार्षसूत्रपाठदूषणं नास्माकमार्षसूत्रपाठेऽस्तीति प्रतिपिपादयिषुराचार्यदेशीयानां पाठमभिप्रायं चाह—अन्ये त्विति । आर्षे हि पाठे सामानाधिकरण्याद् दृष्टान्तस्यार्थरूपस्य शब्दरुपेणोदाहरणेनैक्यं स्यात् । यदा तु दृष्टान्तस्योदाहरणमिति पाठः, तदा नायं दोषः । दूषणं चापरेषाम्, यथा न दृष्टान्तस्योदाहरणेन सामानाधिकरण्यम्, एवं तद्धर्मभावित्वस्याप्यर्थरूपस्य, स्वविषयवचनोपलक्षणत्वेन तु सामानाधिकरण्यं दृष्टान्तेऽपि तुल्यम् । तस्मादार्षमेवास्त्विति । आर्षेऽपि पाठे परोक्तं दूषणमुपन्यस्यति—एतस्मिन्नपीति । उपहासे किलकारः । ण्यन्ताद् भवतेस्ताच्छील्ये णिनिना भावीति व्युत्पन्नम् । तथा च तद्धर्मकारित्वमर्थः । न च ज्ञापनादन्या क्रिया संभवतीति गमकत्वम् । तच्च सर्वेषामवयवानामभिन्नमिति साधारणत्वात् न वक्तव्यमित्यर्थः । तदेतदभ्युपगमेनैव परिहरति—नायमिति । § 552

अन्ये तु तद्धर्मभावीत्येतद् विकल्प्य दूषयन्तीत्याह—अन्ये त्विति । तत्र प्रथमकल्पे दूषणमाहुः—तद् यदीति । नायं सूत्रार्थः सर्वावयवसाधारण्यादिति । तस्मात् न किञ्चिदेतत् तद्धर्मं भावयितुं शीलमस्येति । द्वितीयकल्पे दूषणमाहुः— दण्डिन्यायस्तु इति । § 553

---

१५ व्यः ] द्रः श्लो. वा. अनुमान, १२१-२ २३ एवं ] तद्धर्म° *Om* nvt-C

संभवे व्यभिचारे च स्याद् विशेषणमर्थवत्, § 554

न संभवमात्रे इत्यर्थः । तदिदं परेषां दूषणं दण्डिन्यायमालम्ब्य परिहरति—न वक्तव्यमिति । संभवव्यभिचाराभ्यां समर्थं विशेषणमित्यर्थः । न बहुव्रीहाविति । अन्यपदार्थविवक्षयैवेनिराश्रीयते । सा च बहुव्रीहिणैव लभ्यत इति कृतमत्रेनिनेत्यर्थः । सुहृद्भावेन चेद् अत एवाह—अथावश्यमिति । प्रयोजनान्तरं भाविग्रहणस्यान्वाचिनोति—सन्तीति । § 555

अत्र च *वसुबन्धुना प्रतिज्ञादयस्त्रयोऽवयवा दुर्विहिता अक्षपादलक्षणेनेत्युक्तम्, तद् दूषयति—तदेतस्मिन्निति । § 556
255/tha

तदेवमुदाहरणलक्षणमुपपाद्य परेषां लक्षणं दूषयितुमुपन्यस्य व्याचष्टे—तथा सिद्ध इति । यथा च स एव साध्यो विशिष्टः प्रत्ययभेदभेदित्वेनेति, प्रत्ययः कारणम्, तदेतत् साध्यसाधनवत्त्वं दृष्टान्तस्य बौद्धराद्धान्तेऽव्यापकम्, स्थाल्यादौ दृष्टान्ते कृतकत्वानित्यत्वरूपसाध्यसाधनवत्त्ववैकल्यात् । प्रागभावो हि स्थाल्याः कृतकत्वं प्रध्वंसाभावश्चानित्यता राद्धान्ते बौद्धानाम् । न चैवमुभयं स्थाल्यामस्ति, तस्याः स्वाभावविरोधित्वादिति दूषयति—अत्र विस्फूर्जतापीति । एतेनेति, अव्यापकत्वेन । निदर्श्यतेऽस्मिन्ननेन चेति निदर्शनम् ।

साध्येनानुगमो हेतोः साध्याभावे च नास्तिता ।§ 558

इति च प्रत्युक्तम् कृतकत्वानित्यत्वयोः स्थाल्यामसंभवदर्शनादव्यापकत्वेन । अस्मद्राद्धान्ते तु यथा तयोः स्थाल्यादौ संभवः तथोक्तं हेतुलक्षणसूत्र इति । भाष्ये पण्डितरूपवेदनीयमिति प्रशस्तपण्डितवेदनीयमित्यर्थः ॥ ३७ ॥ § 559

## उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ १ । १ । ३८ ॥ § 560

स्वप्रतिपत्तौ व्याप्तिस्मरणानन्तरं तथा चायं न तथेति वा परामर्शज्ञानोत्पादादुदाहरणवचनस्य च व्याप्तिप्रतिपादकत्वात् परामर्शज्ञाने हेतोरुपनयस्योदाहरणपूर्वकत्वनियमात् उदाहरणानन्तरमुपनयं लक्षयति—उदा—यः । अपेक्षापदं भाष्यकृद् व्याचष्टे—उदाहरणतन्त्र इति । उदाहरणवशः । वश्यत इति वशः, वशिन उदाहरणस्य वश्य इत्यर्थः । एतदेव कर्मणो भावं निष्कृष्य विवृणोत्ति—वशः सामर्थ्यम् । वश्येन उदाहरणस्य फलेन उपनयेनाभिसंबन्ध इत्यर्थः । तथात्वातथात्वयोर्विषयं विभजते—साध्यसाधर्म्ययुक्त इति । ननु हेतोरुपसंहार उपनयो न साध्यस्य । तथा चानुपपन्नः साध्यस्योपसंहार इत्यत उक्तम्—साध्यस्य शब्दस्योत्पत्ति धर्मकत्वमिति 256/tha
। उदाहरणसिद्धव्याप्तिकहेतुमत्तया साध्यमुपसंह्रियते न स्वरूपेणेत्यर्थः ।

७ *] सुबन्धुना nvt-C
२५ त्वात्] परामर्शज्ञानहे°nvt-J

अत्राप्युदाहरणापेक्ष उपसंहार उपनय इति सामान्यलक्षणम् । तथा न तथेति सामान्यलक्षणापेक्षे विशेषलक्षणे इति बोध्यव्यम् । § 561

अत्र केचित् आहुः हेतुवचनादेव सोदाहरणात् साध्यसिद्धेरसाधनाङ्गमुपनय इति । तन्निराकर्तुमाह वार्त्तिककारः—यथा तथेति प्रतिबिम्बनार्थम् । तदेतत् प्रश्नपूर्वकं विभजते—किं पुनरिति । तदनेन व्युत्पन्नाव्युत्पन्नतया परेषामनियतप्रतिपत्तिसाधनत्वात् स्वप्रतिपत्त्यनुसारेण परे बोधयितव्याः । व्याप्तिस्मरणानन्तरोत्पन्नलिङ्गपरामर्शपूर्वकश्च स्वयमनुमेयार्थप्रत्यय इति तथैव परे बोध्यन्ते । तथा च परामर्शज्ञानहेतोरुपनयस्य सिद्धमर्थवत्त्वम् । न च यथा लिङ्गपरामर्शज्ञानान्वयव्यतिरेकानुविधानम् अनुमेयज्ञानस्य, तथा दधिभक्षणाद्यनुविधानमपि, येनातिप्रसङ्गश्चोद्येतेति । प्रयोजनान्तरम् उपनयस्याह—साध्ये वा संभव इति । चोदयति—ननु चेति । यद्यपि साधनतया कृतकत्वमुक्तम्, प्रतिज्ञानन्तरं प्रतिपत्त्रा साधनस्यैवापेक्षितत्वम्, तथापि तन्नासिद्धं तत्र साधनत्वेन व्यवतिष्ठत इति स्वसिद्धिमाक्षिपति सामर्थ्यादिति भावः । परिहरति—नोक्त इति । यत्परः शब्द स शब्दार्थ इति शाब्दाः । साधनत्वपरश्च कृतकत्वादिति सामर्थ्यात् । आक्षेपे तूदाहरणमपि न प्रयोक्तव्यम् । *अस्यापि साधनसामर्थ्यादाक्षेपात् अव्याप्तस्य साधनत्वायोगात् तद्विधस्यापि प्रमेयत्वादेः शब्दनित्यत्वादौ साधनत्वभ्रमेण प्रयोगोऽसिद्धेऽपि तुल्य इति व्याप्तिप्रदर्शनार्थोदाहरणप्रयोगवद्धेतोः सिद्धत्वप्रतिपादनाय उपनयस्यापि प्रयोग इति रमणीयम् ॥ ३८ ॥ § 562

257/tha

## हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ १ । १ । ३९ ॥ § 563

निगमनलक्षणावतारपरं भाष्यं द्विविधस्य पुनरिति । साधर्म्येण वैधर्म्येण द्विविधानामपि हेतूदाहरणोपनयानां समानं निगमनलक्षणमित्यर्थः । हेत्वन्म् । तस्मादिति । हेत्वपदेशात् तद्धेतुकम् अनित्यः शब्द इति प्रतिज्ञाया पुनर्वचनम् । यद्यपि च सिद्धनिर्देशो निगमनम्, साध्यनिर्देशश्च प्रतिज्ञा तथापि यस्यैव प्रतिज्ञायां साध्यत्वमासीत्, तस्यैव निगमने सिद्धत्वमित्यवस्थावन्तमेकमाश्रित्य समानविषयतया निगमनं प्रतिज्ञेत्युपचर्यते । तथा च पुनर्वचनमप्युपपन्नम् । तदेतद् भाष्यकारो व्याचष्टे—साधर्म्योक्त इति । व्युत्पादयति—निगम्यन्ते इति । साधर्म्यवैधर्म्ययोः प्रतिज्ञातः प्रभृति निगमनान्तं प्रयोगमाह—तत्रेति । *अत्र प्रथमसूत्रवदेव यथास्वमवयवेषु प्रमाणानां परमन्यायं स्तोतुं संभवमाह— अवयवसमुदाये चेति । आप्तोपदेशस्येति ।

२ थेति ] तथेति चेति nvt-C
४ थेति ] तथा न तथेति nvt-K
६ त्वात् ] °प्रतिसाध° nvt-C
१६ * ] अत्रापि nvt-C
१७ योगोऽसिद्धेऽपि ] असिद्धोऽपि nvt-C
३० * ] तच्च *for*अत्रnvt-C

सदेव सोम्येदमग्र आसीत् ।§ 565

इत्यादेराप्तोपदेशस्य प्रत्यक्षानुमानाभ्यां प्रतिसन्धानात् । ननु कस्मात् प्रतिज्ञैवाप्तोपदेशो न भवति, कृतमस्या आगमान्तरविषयत्वेनेत्यत आह— अनृषेश्चेति । अनुमानं हेतुः । स्यादेतत् । द्वितीयं लिङ्गदर्शनं हेतुः । न च तदनुमानम् । तृतीयस्योपनयविषयस्य लिङ्गदर्शनस्य तथाभावादित्यत आह—उदाहरण इति । उदाहरणे दृष्टान्तधर्मिणि । साध्यसाधनयोः प्रतिबन्धं संदृश्य सम्यग् दृष्टा लिङ्गस्य प्रतीतेः । § 566

एतदुक्तं भवति—यद्यपि त्रयाणामपि लिङ्गदर्शनानां सस्मृतीनामनुमानत्वम्, तथापि तदेकदेशे मध्यमेऽपि लिङ्गदर्शने समुदायोपचारादनुमानव्यपदेश इति । प्रत्यक्षविषयमुदाहरणम् । कस्मात् ? दृष्टेन उदाहरणे प्रतिबन्धेन अदृष्टस्य साध्यधर्मिण्यनुमेयस्य सिद्धेः । यदि पुनर्न मूलं प्रत्यक्षमास्थीयेत, अव्यवस्थाया नादृष्टं सिध्येदिति भावः । निगमनप्रयोजनं प्रतिपादय- 258/tha
ति—सर्वेषामिति । प्रतिज्ञादीनामुपनयान्तानामेकोऽर्थः स्वभावप्रतिबद्धं लिङ्गं वा अनुमेयं वा, तस्य प्रतिपत्तिः, तस्यां सामर्थ्यप्रदर्शनं निगमनमिति । तदनेनैकार्थत्वं दर्शितम् । द्विविधं च प्रयोजनम् । तत्रावान्तरं स्वभावप्रतिबद्धलिङ्गप्रतीतिः । परमं च साध्यप्रतीतिरिति । § 567

संप्रति विभागे साकाङ्क्षत्वं दर्शयति—इतरेतराभिसंबन्ध इति । अभिसंबन्धेन फलेनाकाङ्क्षामुपलक्षयति—असत्यामिति । प्रधानं हि प्रतिज्ञापदम् । तदुत्तरकालं हि साधनाकाङ्क्षायां प्रतिज्ञामाश्रित्य हेतुपदं प्रवर्तते । न पुनः प्रथममेव हेत्वपेक्षेति हेतुलक्षणेऽस्माभिरुपपादितमिति । हेतुपदविरहे आकाङ्क्षां दर्शयति— असति हेताविति । उदाहरणाभावेऽपेक्षामाह— असत्युदाहरण इति । उपनयाभावेऽपि अपेक्षामाह—उपनयं चान्तरेणेति । निगमनाभावेऽप्यपेक्षामाह—निगमनाभावे चेति । अवयवानां प्रातिस्विकं प्रयोजनमुक्तमपि शिष्यहिततया भाष्यकारः प्रतिपादयति—अथेति । *पञ्चावयवप्रतिपादनप्रयत्नस्य प्रयोजनं दर्शयति—न चेतस्यामिति । कथं पुनः प्रक्रमत इत्यत आह—अव्यवस्थाप्येति । व्यवस्थापिते *तु न जातेरवसर इत्याह—व्यवस्थिते हीति । § 568

अत्र केचिदाहुः निगमनमसाधनाङ्गम् । कथम् ? प्रतिज्ञया गतार्थत्वादिति । तन्मतमपाकर्तुं वार्त्तिककारः सप्रयोजनं निगमनं दर्शयति प्रतिज्ञाविषयस्यार्थस्येति । चतुर्भिः खल्ववयवैर्हेतोस्त्रीणि रूपाणि द्वे वा प्रतिपादिते, न त्वबाधितविषयत्वासत्प्रतिपक्षितत्वे । पञ्चसु वा चतुर्षु वा रूपेषु हेतोरविनाभावः परिसमाप्यते । *तस्मादबाधितविषयत्वासत्प्रतिपक्षितत्वरूप-

१ आसीत्] छान्दोग्योप° ६.२.१
७ संदृश्य] सादृश्यंnvt-C
११ स्य] अदृष्टेnvt-C
१५ च] हिnvt-C
२० मिति] प्रतिपा°nvt-C
२४ *] °व्युत्पादन°nvt-J
२६ *] तु*Om*nvt-C
३२ *] °विषय°*Om*nvt-C

द्वयसंसूचनाय निगमनम् । तदिदमुक्तम्—**विपरीतप्रसङ्गप्रतिषेधार्थमिति** । बाधने प्रतिपक्षे वा साध्यविपरीतप्रसङ्गः स्यादिति । सोऽयं प्रतिज्ञाविषयार्थस्य अशेषप्रमाणमूलावयवोपपत्तौ सत्यां प्रतिज्ञेयस्यार्थस्य सिद्धतया पुनर्वचनेन
259/tha निगमनेन प्रतिषिध्यते । न च प्रतिज्ञावचनादेव तत्सिद्धिः, तस्य साध्यपरत्वात् । न चान्यपरादप्याक्षेपात् सिद्धिः हेत्वादिपदाप्रयोगवैयर्थ्यप्रसङ्गात्, प्रतिज्ञात एव सर्वाक्षेपसंभवात् । तस्माद् रूपद्वयप्रतिपादनार्थं निगमनम् । यथा च त्रैरूप्यातिरिक्तमेतद्रूपद्वयं तथोपपादितमस्माभिः प्रथम**सूत्रे** । हेत्वाभासेषु च शेषं दर्शयिष्यत इति । एतस्मिन् **सूत्रा**र्थे परस्य प्रतिज्ञायां निगमनं गतार्थं मन्यमानस्य अवकाशो नास्तीति । § 569

यस्तु मन्येत न हेतोरविनाभावसिद्धिमन्तरेण सिद्धनिर्देशो निगमनं भवति, न च पाञ्चरूप्यं विना अविनाभावसिद्धिः । निगमनात्तु तत्सिद्धौ न सिद्धनिर्देशो निगमनम्, अपि तु साध्यनिर्देश एवेति, तं प्रत्युपेत्य तद्दोषनिराचिकीर्षया परेषां वाक्यमुपक्षिप्यते । परेषां वाक्यं पठति—**उपनयनिगमने त्विति** । दूषयति—**इदं तावदिति** । यथाश्रुति हि निगमनोपनययोरभेदं साधयति, अर्थगतं चाविशेषं हेतुमाह—तच्चैतदालोकतमसोरैक्यं काकस्य कार्ष्ण्यादिवदापतितम् । शङ्कते—**अथ हेतूपनयाविति** । उपलक्षणं चैतत् प्रतिज्ञानिगमने इत्यपि द्रष्टव्यम् । अर्थाविशेषादिति चाविशिष्टार्थत्वादित्युन्नेतव्यम् । तथा च संबन्ध इति शङ्कितुरभिप्रायः । अत्रापि दोषमाह—**स विपक्षेति** । पुनः शङ्कते—**अथैकप्रयोजनत्वेनेति** । निराकरोति— **तथापीति** । सिद्ध्यत्येकप्रयोजनत्वे साध्ये हेतोरविरोधः, हेतुस्तु न प्रतिज्ञार्थादतिरिच्यते इत्यर्थः । **तद्वर्णितमिति** । अन्यश्च हेत्वर्थोऽन्यश्चोपनयार्थ इत्येतद् वर्णितमित्यर्थः । एतेनोपनयनिगमनप्रयोजनाभिधानेन ये त्र्यवयवं वाक्यमाहुः, तन्मतमपि परास्तमित्याह—**पक्षधर्मत्वेति** । § 570

यच्च **परैः** उपनये दूषणं विकल्प्याभ्यधायि तत् तावदुपन्यस्यति—**यदपि यथा तथेति** । सर्वसामान्ययोगे हि तदेव स्यात् न तु तथेति । **अन्यथा शब्दस्य कृतकत्वादिति** । न हि यथा घटः कृतकः, तथा शब्दोऽपि कृतकः, घटशब्दयोरभेदप्रसङ्गादित्यर्थः । तस्मात् सामान्यप्रतिषेधे
260/tha विशेषप्रतिषेधे च कृत कत्वं सामान्यं परिशिष्यते । तस्य च यथातथाभावयोरभावात् कृतकत्वादित्येव स्यात् । तथा च न हेतोर्व्यतिरेक उपनयः स्यादित्याह—**परिशेषादिति** । तदेतत् परेषां दूषणं निराकरोति—**तदप्ययुक्तमिति** । यथा तथेति वाक्यमुपमानैकदेशमुपमानमुपचारात् । उपमानमर्थो यस्य सोऽयमुपमानार्थ उपनयः । तस्य भावस्तत्त्वं तस्मात् । तच्चोपमानं न सर्वथा साध्यसाधनभावमाश्रित्य प्रवर्तते । साध्ये शब्दे साधनस्य कृतकत्वस्य स्थालीगतस्य यः सर्वथाभावः स्थालीत्वाद्येकार्थसमवायः तमाश्रित्य न प्रवर्तते । तथा च शब्दस्थाल्योरभेदप्रसङ्गाद् यथा तथेत्येव न स्यात् । त-

४ सिद्धिः ] हेत्वादिप्रयोगवैयर्थ्यप्र°nvt-C    ५ वात् ] सर्वाक्षेपात्nvt-J

स्मात् स्थालीस्थप्रकारान्तरव्युदासेन कृतकत्वसामान्यमात्रसाधारण्येन यथा तथेत्युपमानोपपत्तिरित्यर्थः । नन्वेवमपि कृतकत्वसामान्यमात्रं शब्दे स्यात्, न तु यथातथाभावः । तथा च न हेतोरतिरेक इत्युक्तमित्यत आह—कृतकत्वसामान्यं त्विति । न हि जातु शावलेयसन्निधौ गोत्वसामान्यमात्रं भवति, अपि तु विशेषसहितम् । तथा च यथातथाभाव उपपन्न इत्यर्थः । § 571 ३५

एतेन यत् परैरुपनयस्य दृष्टान्तादभिन्नत्वं वर्णितम्, तदपि परास्तमित्याह— गतार्थत्वादिति । अनेनोपमानसमानत्ववर्णनेन एतदेव विभजते— यदप्युक्तमिति । व्याप्तिप्रदर्शनविषयो दृष्टान्तः, दृष्टव्याप्तिकस्य हेतोः साध्यधर्मिण्युपसंहार उपनय इति महान् भेद इत्यर्थः । एतेन निगमनं प्रतिज्ञायाः समानाभिधेयत्वेऽपि प्रतिज्ञात्वेन प्रत्युक्तम् । प्रतिज्ञायाः साध्यपरत्वात् निगमनस्य च विपरीतशङ्कानिवृत्तिपरत्वादिति । प्रयोजनभेदसामान्यमात्रविवक्षया एतेनेत्युक्तम् । अत्र भाष्यकारेण एकस्मिन्नन्वयव्यतिरेकिण्येव वीतावीतवाक्ये पञ्चावयवे उदाहृते । तत्र कदाचिद् भ्रान्तिः स्यादेकोदाहरणतया द्वे अपि वाक्ये परस्परापेक्षे एवेति, तन्निराकरणायाह—ते एते इति । न पुनरन्वयि व्यतिरेकि चेत्येकं वाक्यमित्यर्थः ॥ ३९ ॥ § 572

॥ इति न्यायलक्षणप्रकरणम् ॥

## १.१.७ न्यायोत्तराङ्गलक्षणप्रकरणम्

261/tha

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ १ । १ । ४० ॥ § 574

अत्र भाष्यं तर्कलक्षणावतारपरम्—अत ऊर्द्धमिति । उद्देशक्रमानुसारेण । अवि—तर्कः । तर्कप्रवृत्तिक्रममाह—अविज्ञायमानतत्त्वेऽर्थे इति । यद्यपि संशयस्य पश्चादेव जिज्ञासा भवति, तथापि जिज्ञासायाः परस्तादपि संशयो भवति । स चात्र विवक्षितः, तर्के प्रवृत्त्यङ्गत्वात् । तर्केण हि प्रसङ्गापरनाम्ना द्वयोः पक्षयोरेकतरनिषेधेनैकतरः प्रमाणविषयतया अभ्यनुज्ञातव्य इति विषयप्रत्यासत्त्या तर्कप्रवृत्तिं प्रत्यङ्गता संशयस्येति । कारणोपपत्त्येति व्याचष्टे—संभवत्यस्मिन् कारणं प्रमाणमिति । अत्र च कारणमित्यस्य व्याख्यानं प्रमाणमिति । उपपत्तिव्याख्यानं संभवतीति । अनुज्ञाव्याख्यानम्—एवमेतत्, नेतरदिति । एतदुक्तं भवति, यस्मिन् विषये प्रमाणं प्रवर्तितुमुद्यतं तद्विपर्ययाशङ्कायां न तावत् प्रमाणं प्रवर्तते । न यावदनिष्टापत्त्या विपर्ययाशङ्का अपनीयते । तदपनय एव च स्वविषये प्रमाणसंभव इति चोपपत्तिरिति व्याख्यायते । तया प्रमाणस्योपपत्त्या

४ च ] यथाभावः nvt-C
१० च ] च *Om* nvt-C
१२ त् ] प्रमाणं*Om*nvt-C
१४ त्तिरिति ] चाख्या°nvt-J

इतिकर्तव्यतया *प्रमाणविषयमभ्यनुजानत्या विशोधिते विषये प्रमाणमप्रत्यूहं प्रवर्तते । न चोपपत्तिरेवास्तु निश्चयहेतुः कृतं प्रमाणेनेति वक्तव्यम् । उपपत्तेः स्वतन्त्राया आश्रयासिद्धतया स्वतो निश्चयायोगात् । तदुपपादितं प्रथमसूत्रे इति । § 575

उदाहरणमाह—निदर्शनमिति । स्वकृतस्य कर्मण इत्यादिना पूर्वस्य कारणमित्यन्तेन संसारो दर्शितः । उत्तरेत्यादिना अपवर्ग इत्यन्तेनापवर्गः । तेन संसारापवर्गाविच्छन्तौ वादिप्रतिवादिनौ प्रति आत्मनित्यत्वविषयं प्र-
262/tha माणं प्रवर्तमानमनेन तर्केणानुगृह्यत इति प्रमाणविषयविपर्ययाननुज्ञैव च प्रमाणविषयाभ्यनुज्ञा । अनिष्टप्रसक्त्या विपर्ययस्यैव साक्षात् निवर्तनात् । अत एवान्ते भाष्यकार उपसंजहार—यत्र कारणमनुपपद्यमानं पश्यति, तत् नानुजानातीति । § 576

ननु यदि तर्क एवमेतत्, नेतरदित्येवमाकारः, कथं पुनरयं तत्त्वज्ञानार्थो न तु तत्त्वज्ञानमेवेति देशयति—कथं पुनरिति । परिहरति—अनवधारणादिति । पर्यायैर्निश्चयादत्यन्तभेद उक्तः । भावितात् चिन्तितात्, अत एव प्रसन्नात् निर्मलादिति । प्रमाणसामर्थ्यादिति तर्कस्य स्वातन्त्र्यमपाकरोति । स्यादेतत्—यदि न तर्कस्तत्त्वनिश्चयसाधनमपि तु प्रमाणमेव, हन्त भोः किमर्थं तर्हि वादे प्रमाणतर्कसाधनेत्युक्तमित्यत आह—सोऽयं तर्क इति । व्यक्त्यभिप्रायेण प्रमाणानीति । प्रमाणविषयविपर्ययशङ्काविघटितानि प्रमाणानि प्रतिसन्दधान इत्यर्थः । § 577

वार्त्तिककारः सूत्रतात्पर्यमाह—अस्येति । समानजातीयात् संशयादेरसमानजातीयात् चेच्छादेर्व्यवच्छिद्यते । यद्यपि संशयजिज्ञासे अप्यविज्ञाततत्त्वेऽर्थे प्रवर्तेते, तथापि न कारणोपपत्तित इति तयोर्व्यवच्छेद इति । तत्त्वं व्याचष्टे—यथेति । समानासमानजातीयव्यवच्छिन्नमविपरीतं रूपं तत्त्वमित्यर्थः । चोदयति—कुतः पुनरिति । न हि सामान्यज्ञानविधायकं पदमत्रास्तीत्यर्थः । परिहरति—अविज्ञातेति । विशेषनिषेधः शेषाभ्यनुज्ञाहेतुरित्यर्थः । विमृशति—अविज्ञाततत्त्व इति समासोऽयमिति । अवधारयति—षष्ठीविग्रहेणेति । युक्तम् उपपन्नम् । तृतीयाविग्रहेण त्वनुपपन्नमित्यर्थः । संशयवाद्याह—विशेषहेत्वभावादिति । युक्तमिति प्रतिज्ञामात्रेणोच्यते, न त्वत्र हेतुरभिधीयत इति भावः । युक्तत्वे हेतुमाह—युक्तमर्थग्रहणसामर्थ्यादिति । अन्यश्चोदयति—अर्थग्रहणमन्तरेणापीति । ज्ञेयेन हि ज्ञानं निरूप्यते न ज्ञात्रा, तस्य साधारण्यादिति सामर्थ्यमित्यर्थः । निगूढाभिसन्धिः परिहर-
263/tha ति—एवमपीति । तस्याभिसन्धिभेदमुररीकृत्य चोदयति—मा भूत् समास इति । उत्तरवाद्याह— भवत्येवमिति । नाद्याप्यनेन स्वाभिप्रायो दर्शित इति मत्वा पुनश्चोदयति— अनुक्तेऽपीति । उक्तपरिहारपूर्वं स्वाभिप्राय-

१५ *] प्रमाणस्याभ्यनुज्ञातस्यnvt-C
२ सूत्रे] टी. पृः ५०
८ स्यैव] °प्रसज्यविप°nvt-C
९ हार] °एव भाष्ये उपसंहारःnvt-C
२८ भावः] इत्यर्थःnvt-C

मुद्घाटयति—अत्रोक्तमिति । समस्तानभिधानप्रसङ्गाच्चेति स्वाभिप्रायोद्घाटनम् । एतदुक्तं भवति, सामर्थ्यप्राप्तस्यानभिधानेऽतिप्रसङ्ग इति न सामर्थ्यमाश्रित्य लक्षणे संशयो निराकरणीय इति तन्निराकरणार्थमर्थग्रहणं कर्तव्यमिति ।
§ 578

अत्र चोदयति—अविज्ञाततत्त्व इति न वक्तव्यमिति । न हि तत्त्वे ज्ञाते तत्त्वज्ञानार्थिता भवति । तस्माद् गम्यते अविज्ञाततत्त्व इति भावः । गूढाभिसन्धिरुक्तं परिहारं स्मारयति—अत्र तावदुक्तमिति । अविदिताभिप्रायश्चोदक आह—मा भूदिति । अस्तूहस्तर्क इत्येतावदेवेत्यर्थः । उत्तरवादी स्वाभिप्रायमुद्घाटयति—न बुद्धिधर्मेति । यद्यपि नास्माकं राद्धान्ते शुश्रूषादयो बुद्धिधर्मा बुद्धिमत्त्वस्यैवाभावात्, तथाप्यात्मगुणा अपि सांख्याभिप्रायेण बुद्धिगुणा उक्ताः । एतदुक्तं भवति, यद्यूहस्तर्क इत्येतावदुच्येत, यदि वा तत्त्वज्ञानार्थमूहस्तर्क इत्येतावन्मात्रम्, ततो विज्ञातेऽपि तत्त्वे य ऊहः पूर्वानुभूतपरिच्छेदात्मा जायते पुनस्तत्त्वज्ञानार्थं सोऽपि तर्कः स्यात् । तस्मादविज्ञाततत्त्व इति वक्तव्यमित्यर्थः । यद्यपि कारणोपपत्तित इत्येतस्मादयमर्थोऽपि गम्यत एव, तथापि कारणोपपत्तिरेवैवंरूपत्वं नाविज्ञाततत्त्वग्रहणमन्तरेण भवति । तथा हि अधिगतपरिच्छेदात्माप्यूहः कारणस्योपपत्त्या संभवेन जायते, कारणासंभवे कार्यस्याभावात् । न त्वसावविज्ञाततत्त्व इति ततो व्यवच्छेदः । तथा च सति प्रमाणमपि तर्कः स्यात् । अत उक्तं कारणोपपत्तित इति । उक्ते सति प्रयोजनानुसरणम्, न त्विह लाघवादरः सूत्रकारस्येति मन्तव्यम् । § 579
264/tha

चोदयति—षष्ठ्यभिधानमिति । परिहरति—न विभक्तिव्यत्ययादिति । यथान्यत्र कणभुजः सूत्रे । विप्रतिपन्नः पृच्छति—कस्मात् ? प्रष्टैवैकग्रन्थेनाह—यदि व्यत्ययेनेति । परिहरति—न न युक्त इति । सामान्येनाधिगतस्य विशेषेण ज्ञापनार्थम् । नित्यत्वादयो विशेषाः समवायिनो वह्न्यादयश्च धूमादिसंयोगिन इति । शेषं सुगमम् । § 580

देशयति—ऊहः संशयनिर्णयाभ्यामिति । केचित् सिद्धान्तैकदेशिनः अनुमानं तर्क इत्याहुः । अन्ये त्वनुमानमेव युक्त्यपेक्षं विपर्ययेऽनिष्टप्रसङ्गापेक्षं तर्क इति वर्णयन्ति । तत्र प्रथमचोदकं प्रत्याह—यत् तावदिति । आक्षिप्त आक्षिप्तहृदयः, न तु तर्कप्रत्ययस्वरूपं चेतयत इत्यर्थः । विशेषदर्शनादिति विशेषदर्शनात् निश्चयः प्रमाणेन भवति न तर्केण, तदनुज्ञानमात्रत्वात् तर्कस्येत्यर्थः । चोदकं निराकृत्य सिद्धान्तैकदेशिनं निराकरोति—एतेनेति । यदि संशयात् प्रच्युतो निर्णयं चाप्राप्तः, तर्हि तस्य स्वरूपं वक्तव्यमिति पृच्छति—किं पुनरिति । उत्तरम्—भवेदिति, प्रमाणविषयाभ्यनुज्ञेत्यर्थः । द्वितीयमेकदेशिनं निराकरोति—यैरपीति । *युक्तिरिह प्रमाणोपपत्तिः । तज्ज-

७ यो ] बुद्धिगुणा बुद्धितत्त्व° nvt-C
१० त्त्वे ] विज्ञाततत्त्वेऽपि nvt-C
१४ वेन ] ज्ञायते nvt-C
१५ वे ] °स्यासत्त्वात् nvt-C
३१ * ] युक्तिर्हि nvt-C

न्मा च प्रत्ययस्तर्क एव । स चानुमानमिति त्वयोच्यते । अस्माभिस्तु तर्क इति संज्ञाभेदमात्रमित्यर्थः । शङ्कते—अथेति । निराकरोति— अनुमानमिति । *प्रसङ्गोपपत्त्यतिरिक्ताया युक्तेरनिरूपणाद् अपेक्षार्थो वक्तव्यः । न ह्यपेक्षणीयमन्तरेणापेक्षा शक्या निरूपयितुमिति भावः । ननु यदेव किञ्चित् स्वविषयाधिगमे अनुमानमपेक्षते सैवापेक्षणीया युक्तिरनुमानस्य भविष्यति इत्यत आह—स्वविषयाधिगमे चेति । § 581

शङ्कते—अथेति । निराकरोति—एवमपीति । यद्युत्पत्तौ प्रत्यक्षागमापेक्षमनुमानम् न वक्तव्यं युक्त्यपेक्षमिति, सर्वस्यानुमानस्य तथा भावेनाव्यभिचारेण विशेषणायोगादिति भावः । पुनः शङ्कते—अथानुमानस्येति । निराकरोति—तत्रापीति । एवमपि तर्को नार्थान्तरं स्यात् । अनुमानभेदस्य
265/tha चेदृशस्य प्रमाण एवान्तर्भाव इति भावः । उक्तमर्थं प्रमाणयति—भवेदिति । भवेदिति प्रत्ययोऽवधारणप्रत्ययश्चेत्यर्थः । चोदयति—अनुमानमिति । विपर्ययोऽनिष्टप्रसङ्गो व्यतिरेकि लिङ्गम् । तद्यागृहीतसंबन्धं लिङ्गिनि न प्रवर्तत इति लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वादप्राणादिमत्त्वप्रसङ्गादितिवदनुमानमेवेत्यर्थः । परिहरति—न तर्केति । युक्तं व्यतिरेकिणि जीवच्छरीरे धर्मिणि प्राणादिमत्त्वस्य साधनधर्मस्य दर्शनात्, न तु यद्युत्पत्तिमान् आत्मा अभविष्यत् न संसारापवर्गावुपपत्स्येतामित्यत्रात्मनि धर्मिणि साधनधर्म उत्पत्तिरस्ति यद्दर्शनतः संस्कारोद्बोधे सति लिङ्गलिङ्गिसंबन्धस्मृतिर्भवेदित्यर्थः । न केवलं प्रसङ्गसाधनं साध्यधर्मिण्यसिद्धम्, अपि त्वन्यगतमेव प्रसङ्गहेतुः । न त्वनुमानमन्यगताद् धर्मात् प्रवर्तते, तस्मादनुमानादस्य स्फुटो भेद इत्याह—अनुमानं चेति । भाष्यव्याख्यानं सोऽयमिति ॥ ४० ॥ § 582

## विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ १ । १ । ४१ ॥ § 583

नैतन्निर्णयमात्रस्य लक्षणम्, अपि तु परीक्षाप्रयोजनस्य । स च निर्णयभेदो विमर्शानन्तरोत्पन्नतर्कसहायप्रमाणनिबन्धनस्तर्कविषय एवेति निर्णयभेदलक्षणमिति नाव्यापकं तत्र तल्लक्षणमिति दर्शयितुं भाष्यकारो निर्णयलक्षणमवतारयति— एतस्मिंश्च तर्कविषये । § 584

विमृ—यः । अत्र पक्षप्रतिपक्षयोः कर्मतया न निर्णयसाधनत्वमित्यनुपपत्त्या साधनोपालम्भौ वादसूत्रगतौ लक्षणीयाविति तावेव तावद् भाष्यकृद् विभजते—स्थापना साधनम्, प्रतिषेधः साधनस्य उपालम्भः । लक्षणानिबन्धनं संबन्धमाह—तौ साधनोपालम्भाविति । यद्यप्युपालम्भो न प्रतिपक्षाश्रितः, तथापि तदुद्देशेन प्रवृत्तस्तदाश्रित इत्युच्यते । मुख्यपदोपादानोल्ल-

---

१ *] प्रमाणोप°nvt-C
१ णाद्] युक्त्यर्थोnvt-C
१५ स्ति] यद्दर्शनं वाnvt-J
१७ मेव] °गत एवnvt-C
२३ भेदो] निर्णयोnvt-C

266/tha द्वनेन लाक्षणिकपदो पादानलभ्यं प्रयोजनमाह—व्यतिषक्ताविति । अर्थग्रहणसामर्थ्यलभ्यमेकतरनिर्णयावसानत्वमाह—अनुबन्धेन प्रवर्तमानाविति । एतच्च वार्त्तिके स्फुटीभविष्यति । तमेव साधनोपालम्भयोः परस्परानुबन्धं दर्शयति—तयोरन्यतरस्येति । यस्य साधनस्य वा उपालम्भस्य वावस्थानम्, तस्य साधनस्य वा उपालम्भस्य वा योऽर्थः पक्षः प्रतिपक्षो वा तस्यावधारणमित्यर्थः । § 585

अत्र पक्षप्रतिपक्षप्रयोगाद् वादे संशयोऽस्तीति वादभ्रान्त्या चोदयति—नेदमिति । एक इति वादी । प्रतिज्ञातमर्थं हेतुतः स्थापयति । द्वितीयस्य प्रतिवादिनः प्रतिषिद्धं प्रतिषेधं वाद्युक्तस्य हेतोर्दूषणमिति यावत् । उद्धरति दूषणाभासीकरोति । द्वितीयेन तु प्रतिवादिना वाद्युक्तस्य हेतोः स्थापनाहेतुत्वं प्रतिषिध्यते । तस्यैव वादिनः प्रतिवाद्युक्तदूषणप्रतिषेधहेतुश्च प्रतिवादिनैवोद्ध्रियते । स वादिनो वा प्रतिवादिनो वा हेतुर्वोपालम्भो वा निवर्तते । तस्मिन् निवृत्ते योऽवतिष्ठते एकः, तेनार्थनिर्णयः, न द्वाभ्याम् । तस्मादयुक्तं पक्षप्रतिपक्षाभ्यामिति । न तावत् संशयविषये निर्णये वादिप्रतिवादिनौ स्तः, तयोर्निश्चितयोरेव प्रवृत्तेः । § 586

अभ्युपेत्य तु परिहरति—उभाभ्यामिति । वादिनः साधनस्य संभवः प्रतिवादिन उपालम्भस्य असंभवः । एवं प्रतिवादिनः साधनस्य संभवो वादिन उपालम्भस्यासंभव इति । विमृश्येति विमर्शं कृत्वेति । अनुपादेयोऽपि विमर्शः कार्यत्वात् कृतिव्याप्य उक्तः । विमृश्येति पदोपादानस्य प्रयोजनमाह—सोऽयम् इति । अवद्योत्य नियमेन विषयीकृत्येत्यर्थः । एकधर्मिस्थयोरित्यस्य व्यतिरेकमाह—यथा क्रियावदिति । विरुद्धयोरित्यस्य कालभेदेन व्यतिरेकमाह— एकधर्मिस्थयोश्चेति । न निर्णयमात्रस्येदं लक्षणमपि तु परीक्षाविषयस्येत्याह—न चायं निर्णय इति । अर्थावधारणं निर्णय इत्येतावन्मात्रं लक्षणमिन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षे भवतीति योजना । हृदि व्यवस्थितमभ्युपगममुद्घाटयति—शास्त्रे वादे चेति । न हि ज्योतिष्टोमादीनां 267/tha
स्वर्गादिसंबन्धनिर्णये आगमेन कर्तव्ये विमर्शोऽस्ति, नापि वादजल्पवितण्डासु विमर्शः, निश्चितयोरेव वादिप्रतिवादिनोस्तत्र प्रवृत्तेरित्यर्थः । § 587

वार्त्तिकम्—संबन्धोऽर्थश्च पूर्ववत् । संबन्ध उद्देशक्रमेण तर्कानन्तर्यलक्षणः । अर्थश्च प्रयोजनम् । समानासमानजातीयव्यावृत्तिरित्यर्थः । शेषं भाष्यव्याख्यानेन गतम् । ननु भवतु पक्षशब्दलक्षितस्य साधनस्य निर्णयं प्रति *करणत्वम्, प्रतिपक्षलक्षितस्य तु तद्दूषणस्य न साक्षात्साधकत्वमित्यत आह— प्रतिपक्षाच्चेति हेतुत्वं पारम्पर्येणेत्यर्थः । पक्षप्रतिपक्षाभ्यामिति । साधनदूषणाभ्यामित्यर्थः । § 588

३१ नेन ] °दानातिल°nvt-J
३१ भ्यं ] अर्थमाहnvt-J
५ योऽस्तीति ] वाद°*Om*nvt-C
१० वा ] हेतुश्चोपलम्भश्चnvt-C
१४ अभ्युपेत्य ] तु*Om*nvt-C
२५ योरेव ] वादिप्रति°*Om*nvt-C
२९ * ] कारणत्वम्nvt-C

लक्षणमाचिक्षिप्सुर्विकल्पयति—क्व पुनरयमिति । अत्र पक्षप्रतिपक्षाभ्याम् एवेति प्रथमः कल्पः, तदा हि यत एवकारः ततोऽन्यत्रावधारणमिति निर्णये नियमो भवेत् । निर्णय एवेति द्वितीयः कल्पः । तदा हि पक्षप्रतिपक्षाभ्यामित्यत्र नियमः । विमृश्यैवेति च तृतीयः । तदापि निर्णये नियमः । तत्र प्रथमं कल्पमाक्षिपति—यदि विमृश्येति । एतस्मिन् विकल्पे निर्णयः पक्षप्रतिपक्षविमर्शातिलङ्घनेनान्यत्र न प्रवर्तत इति प्रत्यक्षं प्रमाणं निर्णयफलं न स्यात् । न हि तत्र पक्षप्रतिपक्षौ, नापि विमर्श इति प्रत्यक्षलक्षणं बाध्यते इत्यर्थः । तृतीयकल्पमाक्षिपति—एतेनेति । व्याघातेनेत्यर्थः । द्वितीये कल्पे दूषणमाह—अथ पक्षेति । तदा निर्णयस्यानियमात् पक्षप्रतिपक्षौ च तदभावश्चेति तदुभयम्, तदाश्रयः निर्णयः प्राप्नोति । तथा चाव्यापकं लक्षणमित्यर्थः । प्रथमं कल्पमालम्ब्य समाधत्ते— तर्कविषय इति । न निर्णयमात्रस्येदं लक्षणम्, अपि तु निर्णयविशेषस्येत्यर्थः । न निर्णय इति न निर्णयमात्र
268/tha इत्यर्थः । अथ निर्णयस्य किमिति *निर्णयमात्रस्ये त्यर्थः । एकशश्च प्रमाणैरिति प्रत्यक्षादिभिः । संहत्य च प्रमाणैरिति साधनदूषणसमाधानैरित्यर्थः । पक्षप्रतिपक्षाभ्यामेव वादे निर्णयो न तु विमर्शः । शास्त्रे तु निर्णय एव न तु तत्र शास्त्रातिरिक्तं साधनान्तरमाश्रीयत इत्यर्थः । § 589

पक्षप्रतिपक्षाभ्यामिति । लक्षणायां हि येन यत् लक्ष्यते तदवच्छेदकतया तदपि बुद्धौ सन्निधीयते । ततश्च तेन नियमो भवति लक्ष्यमाणस्य, यथा गङ्गायां घोष इति । गङ्गासंबन्ध्येव तीरं धोषेणान्वीयते, न त्वकूपारतीरमपीति । चोदयति—अर्थेति । परिहरति—न नेति । अर्थग्रहणे क्रियमाणे काल्पनिकत्वं प्रतिषिध्यते, न चाकल्पितं विरुद्धधर्मवदित्येकतरनिर्णयः । नेदं पक्षप्रतिपक्षाभ्यामित्यादि चोद्यभाष्यं व्याचष्टे—पक्षप्रतिपक्षाभ्यामिति । उभाभ्यामित्यादि परिहारभाष्यं व्याचष्टे— उभाभ्यामेवेत्याहेति । पृच्छति—एतस्मिन्निति । प्रथमं साधनम्, द्वितीयं दूषणम्, तृतीयं समाधानम् । उत्तरम्—सर्वत्र । कदाचित् प्रथमे कदाचिद् द्वितीये कदाचित् तृतीय इत्यर्थः । अवश्यं तु तृतीय इत्याह—अथ वेति । उभयत्र कल्पे प्रश्नः—कथमिति । उत्तरम्—एकस्तावदिति । *तं निवर्त्य वादिनः साधनं दूषणेन निवर्त्य प्रतिवादी स्वपक्षे साधनं ब्रवीति । प्रथम इति वादी । § 590

निर्णयोऽनुमानमेवेति केचित् । तथा हि तृतीयलिङ्गदर्शनं प्रत्यक्षफलं निर्णयः । तदेव चानुमानमतो निर्णयो नानुमानादतिरिच्यते इत्यर्थः । परिहरति—न लिङ्गलिङ्गीति । यदि निर्णयमात्रमनुमानमुच्येत, तदा न तस्य सर्वस्य लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वमिति । यदि तु लिङ्गपरामर्शो निर्णयः, तस्य चास्ति लिङ्गलिङ्गिसंबन्धापेक्षेति । तत्राह—प्रमाणफलत्वात् । सामान्य-

३३ कारः ] °कारकरणंnvt-C
२ स्मिन् ] किल कल्पेnvt-C
४ ते ] बाधतेnvt-J
१० *] निर्णयसामान्यस्ये°nvt-C
१३ त्र ] तत्र*Om*nvt-C
१४ येन ] यत्*Om*nvt-C
२४ *] तं निवर्त्य…प्रथम इति वादी *only in*nvt-J
३० न्धापेक्षेति ] °पेक्षित्वमितिnvt-C

व्याप्तो विशेषः सामान्यनिवृत्त्या निवर्तते, शिंशपात्वमिव वृक्षत्वनिवृत्त्या । न च फले प्रमितिरूपे निर्णये प्रमाकरणत्वं फलत्वे नास्तीति नानुमानत्वं तद्विशेष इत्यर्थः । इतश्चानुमानात् निर्णयो भिद्यते इत्याह—निर्णयः स्वविषय एवेति । न हि निर्णयो निर्णयत्वेन प्रतिपत्त्यनुबन्धिभूताद् विष- 269/tha
यादन्यत्र, अनुमानं तु तत्र चान्यत्र च । *यदानुमेयोऽग्निरेव हेयत्वादिभिः परिच्छिद्यतेऽग्निज्ञानेनानुमानेन, यदा तु धूमज्ञानेनाग्निरनुमीयते तदान्यत्र चेति गमयितव्यम् । शेषमतिरोहितम् ॥ ४१ ॥ § 591

॥ इति न्यायोत्तराङ्गलक्षणप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां प्रथमाध्याये प्रथमाह्निकम् ॥

# १.२ प्रथमाध्याये द्वितीयाह्निकम्

270/tha

## १.२.१ कथालक्षणप्रकरणम्

प्रमाणतर्कसाधनोपालम्भः सिद्धाताविरुद्धः पञ्चवयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ । २ । १ ॥ § 594

नितान्तदक्षिणश्लक्ष्णधियो गृह्णन्त्वमत्सराः ।
वाचस्पतिगिरामर्थतत्त्वानि विबुधा इव ॥ § 596

उद्देशक्रमप्राप्तं वादलक्षणपरं सूत्रमवतारयितुं भाष्यम्-तिस्रः कथा भवन्तीति । तदयुक्तम्, बृहत्कथादीनां तिसृषु कथासु अनन्तर्भावात् । न च सामान्यलक्षणाभिधानमन्तरेण विशेषलक्षणावसरोऽस्ति, वादादयश्च कथाविशेषा इत्यत आह वार्त्तिककारः-तिस्रः कथा भवन्तीति । नायं कथामात्रनियमो येन बृहत्कथादीनामकथात्वं स्यात्, अपि तु यन्नानाप्रवक्तृके विचारे वसति तद् विचारवस्तु । विचारविषया वाक्यसंदृब्धिः कथेति यावत् । तस्याः कथाया एष नियमः तिस्र एवेति । तथा च नानाप्रवक्तृकविचारविषया

---

३१ निवृत्त्या ] °वृत्तौnvt-C
३१ निवृत्त्या ] °वृत्तौnvt-C
३२ त्वं ] फलेnvt-C
२ न्धिभूताद् ] °बधीभूताद् nvt-J
३ त्र ] चान्यत्र *Om* nvt-J
३ * ] यथा nvt-C
५ चेति ] °त्रेति nvt-C
५ प्राप्तं ] °लक्षणसूत्रंnvt-C °तारोऽस्ति nvt-K
१० या ] विचार वस्तु विषयाnvt-C
१० संदृब्धिः ] वाक्यसंदृब्धिः*Om*nvt-J
११ थाया ] तस्यां कथायांnvt-C

वाक्यसंदृब्धिः कथेति सामान्यलक्षणं पक्षप्रतिपक्षपरिग्रह इति सूत्रावयवेन सूचितमित्येतदप्यर्थादुक्तं भवतीति द्रष्टव्यम् । यद् वस्तु विचार्यते इत्यर्थाभिधानमात्रम्, न तु विचारवस्त्वित्यस्य विवरणम् । वादादिष्वधिकारिणः पुरुषानाह—तत्र गुर्वादिभिरिति । वादलक्षणस्यानन्तर्ये हेतुमाह—तत्र यथोद्देशमिति । § 597

सूत्रमिति । सामान्यलक्षणमप्यनेन सूच्यत इत्युक्तं भवति । एकाधिकरणस्थावित्यादि भाष्यं प्रश्नपूर्वकं व्याचष्टे—काविति । वस्तुधर्माविति । विभ- 271/tha जते वस्तुधर्माविततीति । धर्मशब्दो विशेषे । तदनवसायाद् वस्तुनः सामान्यतोऽवसाय उक्तो भवति । तदिदमाह—वस्तुनः सामान्येनेति । अविरुद्धावप्येवं न विचारं प्रयोजयत इत्यर्थः । प्रमाणतर्कसाधनोपालम्भपदस्य तात्पर्यमाह—अस्येति । अनेन तस्य विशेषणम् इत्यादि भाष्यं व्याख्यातम् । यद्यपि वितण्डायामपि पक्षप्रतिपक्षपरिग्रहोऽस्ति, तथापि प्रतिपक्षसाधनं नास्ति तस्याः स्थापनाहीनत्वात् । यद्यपि च जल्पेऽपि पक्षप्रतिपक्षसाधनमस्ति, तथापि न प्रमाणमूलैरवयवैस्तर्केण च साधनोपालम्भाविति जल्पवितण्डाभ्यां प्रमाणतर्कसाधनोपालम्भग्रहणेन व्यवच्छेदः । यथा चैतत् तथोपरिष्टादुपपादयिष्यते ॥ § 598

आक्षिपति—कथं पुनस्तर्केणेति । समाधत्ते—न ब्रूम इति । तर्कस्येतिकर्तव्यतारूपस्य प्रमाणानुग्राहकतया प्रमाणमूला अवयवास्तर्कमूला अपि भवन्ति । तथा च तर्कस्यापि साधनोपालम्भहेतुभावः सिद्धो भवतीत्यर्थः । विकल्प्याक्षिपति— साधनमुपालम्भश्चास्मिन्निति । परं प्रति हि सिद्ध्युपालब्धी विवक्षिते । न च ते प्रमाणतर्काभ्याम्, तयोः स्वप्रतिपत्तिहेतुत्वात् । अवयवार्थस्य अवयवशब्दार्थस्येत्यर्थः । उभयथाभिमतत्वेऽपि करणसाधनपक्षं कक्षीकृत्य तावत् समाधत्ते—न, अन्यार्थत्वादिति । अन्यप्रयोजनत्वादित्यर्थः । यदा तु भावसाधनौ तदा पृच्छति— अथैताविति । विप्रतिपन्नस्य प्रश्नः । न प्रतिपक्षविषय उपालम्भो नापि तत्साधनविषयः, तयोर्वस्तुनोः स्वकारणादुत्पन्नयोः सदा तद्रूपत्वेन पुरुषधर्मोपालम्भानास्पदत्वादित्याक्षेपार्थः । समाधत्ते—एवमेतदिति । धर्मी धर्मविशिष्टः पक्षः प्रतिपक्षो वा कर्म, तस्य विषयः । तस्य धर्मिणो वास्तवं तादृशत्वमतादृशत्वं वा, करणस्य तु कर्मैव विषयः । तत्र च कर्मकरणे समर्थे एव, नासमर्थे । अन्यविषये तु पुरुषस्ते नियुञ्जानोऽसमर्थीकरोतीति । सोऽयं पुरुषस्यापराधो न कर्मकरणयोः । यथा आकाशे निशातमसिं व्यापारयतः पुरुषस्यापराधो नाकाशस्य शब्दे समर्थस्य, असेर्वा निशातस्य दारुणि समर्थस्य । तस्मादौप-
272/tha चारिकः साधनस्योपालम्भो न मुख्यः । मुख्यस्तु पुरुषस्यैव । वचनद्वारेण तूद्भाव्यते पुरुषस्येति । वचन उपचर्यते न तु पक्षे पक्षद्वारेणानुद्भावनादिति

१० स्याः ] साधनहीन°nvt-C
१० ल्पेऽपि ] पक्ष°*Om*nvt-J
२० क्षं ] कुक्षी°nvt-C
२६ च ] च*Om*nvt-C

सिद्धम् । यथायमर्थः सूत्रपदेभ्यो लभ्यते तथा प्रश्नपूर्वकं दर्शयति—कथं पुनरिति । § 599

यदुक्तं प्रमाणतर्कसाधनोपालम्भग्रहणं वादस्य जल्पवितण्डाभ्यां विशेषणार्थमिति, तत्र प्रकारं पृच्छति—अथेति । प्रष्टैवाह—नन्विदमपीति । उत्तरम्—न समानमिति । नियममाह—प्रमाणतर्कसाधनोपालम्भ एव वादः । एवकारेण छलादिसाधनोपालम्भत्वं वादस्य व्यवच्छिद्यते, तथा च जल्पवितण्डाभ्यां व्यवच्छेदः । एतदुक्तं भवति, तर्कानुगृहीतप्रमाणमूला अवयवाः परमार्थतो भवन्तु मा भूवन् वादिप्रतिवादिनोस्त्वभिप्रायो भवतु प्रमाणमूला अवयवा इति । एतावतैव प्रमाणतर्कसाधनोपालम्भता वादस्य, वीतरागकथात्वेन तत्त्वनिर्णयावसानत्वात् । जल्पवितण्डयोस्त्वप्रमाणमूलत्वं विदुषापि प्रतिवादिना छलादिभिः प्रत्यवस्थेयम् । एकान्तपराजयाद् वरं संशयोऽस्त्वितीच्छता विजिगीषुणा । यथा चास्य शास्त्रे व्युत्पादनं नासदृशं यथा चैष सतामाचारः, तथा जल्पलक्षणे वक्ष्यामः ॥ § 600

जल्पे निग्रहस्थानविनियोगाद् इत्यादि भाष्यम् । तदनुपपन्नम् उपालम्भग्रहणादेव वादेऽपि निग्रहस्थानस्य लब्धत्वादित्यत आह वार्त्तिककारः—छलजातीति । असत्युपालम्भग्रहण इत्यभिप्रायः । चोदयति—समस्तेति । यद्युपालम्भग्रहणस्य निग्रहस्थानविधानं प्रयोजनम्, हन्त भो न जल्पाद् वादस्य विशेषः, कृतं चोत्तराभ्यां पदाभ्यामित्यर्थः । परिहरति—नोत्तरयोरिति । नियमः परिसंख्या । तदनेन कस्यचिदभ्यनुज्ञानार्थमिति भाष्यं व्याख्यातम् । सिद्धान्ताविरुद्ध इत्यत्र भाष्यव्याख्यानमुपन्यस्य दूषयति—सिद्धान्ताविरुद्ध इत्यनेन किलेति । भाष्यमते दूषिते पृष्ट्वा स्वमतेन व्याचष्टे—अथ किमिदं पदमिति । पृच्छति—कस्मात् पुनरिति । उत्तरम्—गुर्वादिभिरिति । न खल्वप्रतिभाद्युद्भावना तत्त्वप्रतिपत्तावुपयुज्यते, अधिकं तु न यद्यपि तत्त्वप्रतिपत्तिं साक्षाद् व्याहन्ति, तथापि तत्प्रयोजनानुसरणे 273/tha परः प्रतिपत्ता समाकुलितबुद्धिर्न तत्त्वं प्रतिपत्तुमर्हतीत्यधिकस्यापि तत्त्वप्रतिपत्तिविघातहेतुत्वमिति । तत्त्वबुभुत्सुरिति जिगीषुतां निराकरोति, न हि गुर्वादिषु जिगीषासंभवः । त्रिविधं फलमिति । अनधिगततत्त्वावबोधः संशयनिवृत्तिरध्यवसिताभ्यनुज्ञानमिति फलानि त्रीणि । प्रतिद्वन्द्विनि तु न वादः, अपि तु जल्पवितण्डे । चोदयति—प्रमाणतर्केति । पारमार्थिकात् तर्कसहितात् प्रमाणादेकस्मिन् विषये साधनोपालम्भयोः संभवे विरुद्धधर्मसमालिङ्गितमेकदा वस्तु प्रसज्यत इत्यर्थः । परिहरति—नैष दोष इति । वादेऽभिप्रायो नियम्यते वादिप्रतिवादिनोः प्रामाणिकधिया साधनोपालम्भौ ताभ्यां प्रयोक्तव्यौ, नाप्रामाणिकधिया जल्पवितण्डयोरिव । न पुनर्वस्तु नियम्यत इति । तथा च वादे अबुद्धिपूर्वं छलादिप्रयोगे तदुद्भावनमपि संभवति, ताव-

४ भिप्रायो ] भवतिnvt-C
९ क्ष्यामः ] सू. १२२
१२ भिप्रायः ] इत्यर्थःnvt-C
२२ हि ] °दिभिर्जि°nvt-C
३० वादे ] बुद्धिपूर्वम्nvt-C

देव चोद्भाव्यं यावत्यनुद्भाविते तत्त्वप्रतिपत्तिव्याघातः, यस्मिंस्त्वनुद्भावितेऽपि न तत्त्वप्रतिपत्तेर्व्याघातः, *तत्प्रयुक्तमपि नोद्भावनीयम् । एतच्च पञ्चमेऽध्याये निपुणतरमुपपादयिष्यते । § 601

साधनोक्तं प्रकारं दूषणेऽप्यतिदिशति—दूषणमप्येवम् । पूर्वस्मिन् प्रयोजने स्थिते भाष्यकारः प्रयोजनान्तरमन्वाचिनोति—अवयवेष्विति । न हि पञ्चावयवोपपन्नत्वं प्रमाणं च तदनुग्राहकं च तर्कमन्तरेण भवतीति पञ्चावयवोपपन्नत्वादेव प्रमाणतर्कप्रतिलम्भे साधनोपालम्भयोर्व्यतिषङ्गज्ञापनायावश्यं साधनोपालम्भग्रहणं तावत् कर्तव्यम्, अन्यथैकः स्वस्थानस्थित एव शब्दस्यानित्यत्वं प्रति पञ्चावयवोपपन्नं वाक्यं प्रयुङ्क्ते अपरोऽपि तादृशः शब्दनित्यतां प्रति तादृशमेव वाक्यं प्रयुङ्क्ते इति सोऽपि वादः प्रसज्येत । साधनोपालम्भविशेषणाय च प्रमाणतर्कग्रहणं कृतमिति भावः । प्रयोजनान्तरमन्वाचिनोति—अन्तरेणापि चेति । वादः पञ्चावयवोपपन्न इत्येकः कल्पः । प्रमाणतर्कसाधनोपालम्भ इति च द्वितीय इत्यर्थः । प्रयोजना274/tha न्तरमन्वाचिनोति—छलजातीति । विनिग्रहो जल्पो मा विज्ञायि । वादगतनिग्रहस्थानरहितो मा विज्ञायीत्यर्थः । तद्विज्ञाने कीऽदृशोऽर्थो भवतीत्यत आह— छलजातिनिग्रहस्थानेति । वादगतो निग्रहो न जल्पे, जल्पगतश्च निग्रहो न वाद इति स मा विज्ञायि । इष्यते हि वादगतोऽपि निग्रहो जल्पे । सोऽयमिष्टोऽर्थो ग्रन्थाधिक्यात् प्रमाणतर्कग्रहणात् लभ्यत इत्यर्थः । § 602

तदेवं स्वाभिमतं वादलक्षणं व्याख्याय *वासुबन्धवं लक्षणं दूषयितुमुपन्यस्यति—अपरे त्विति । स्वपक्षस्य सिद्धिः परपक्षस्य चासिद्धिः, तदर्थं वचनं वाद इत्यर्थः । दूषयति—अत्र चेति । प्रथमं हेतुं विभजते—एताविति । पूर्वः पक्षोऽयुक्तः, पक्ष उत्तरस्तु युक्त इत्यर्थः । एकस्य वा शब्दस्य धर्मिणोऽनेकनित्यानित्यविशेषणाभिसंबन्धिनः पुरुषाभिसन्धिभेदात् अनेकशब्दाभिधानम्, स्वपरशब्दाभिधानमित्यर्थः । एतदेव चिन्त्यते किं तत्स्वीकरणमिति न तावद् भूमिधनादिष्विव स्वोचितास्वर्थक्रियासु यथेष्टविनियोगयोग्यत्वं स्वत्वमर्जनापादितमनित्यत्वादिना प्रतिज्ञाते शब्दादौ संभवतीत्यर्थः । चोदयति—ममेति प्रत्योत्यपत्तिकारणत्वं स्वत्वम्, अकारणत्वमस्वत्वमिति । दूषयति—निर्दिष्ट इति । यथेष्टविनियोगयोग्यत्वमेव ममेति प्रत्ययकारणत्वम् नान्यत् । न चैतन्नित्यत्वादिना प्रतिज्ञाते शब्देऽस्ति शास्त्रकारस्येत्यर्थः । अपि चोपकारकत्वेन व्याप्तं सत्त्वं गोघटादिषु तथा दर्शनात्, पक्षात् निवर्तमानमुपकारकत्वं स्वत्वमपि स्वव्याप्यं निवर्तयति वृक्षत्वमिव शिंशपात्वमित्याह—यच्च यस्येति । द्वितीयं कल्पम् आशङ्कते—साधनीयेति । निराकरोतिअहो श-

३२ *] तत्र प्र°nvt-C
३ त्वं] °पपन्नंnvt-C
५ थैकः] सुस्थान°nvt-C
८ णं] कर्तव्यमितिnvt-C
१२ हितो] निग्रहरहितोnvt-J
१४ तोऽपि] अपि*Om*nvt-C
१७ *] सौबन्धवंnvt-C*Var*
२६ म्] °कारणं°nvt-C

ब्दार्थेति । विशेष्यपदात् अनतिरिक्तार्थं विशेषणपदमित्यर्थः । अपि चेदं विशेषणपदं विशेष्यं सामान्यतः प्रसृतं विशेषेऽवस्थापयति न वा ? अवस्थापयतीति चेत् ? न साधनीयमात्रार्थता स्वपक्षशब्दस्य, न चेद् विशेषणं व्यर्थमित्याह— व्यवच्छेदार्थं चेदमिति । ननु च विशेष्यशब्दो विशेषणयोगात् विशेषे वर्तमानोऽपि सामान्यशब्द एव, ततश्च शक्नोति समानमर्थं 275/tha वक्तुमिति चोदयति—सामान्यशब्दा अपीति । परिहरति—न ते सामान्यशब्दा इति । अपि च साधनीयः पक्ष इति । विरुद्धोपदर्शनेन स्फुटा प्रतीतिर्भवतीति अयुक्तप्रतिपादनार्थं युक्तस्याप्युपन्यास इति । यदि न पक्षेण दूषणं संबध्यते कस्तर्हि तस्य विषय इति शङ्कते—अथ दूषणस्येति । उत्तरम्—कस्यचिदिति । उत्तरदोषः जात्युद्भावनम् । आक्षिप्यन्त इत्याक्षेपाः । के ते भावाः ? अप्रतिभाविक्षेपादयः । नैते स्वपरपक्षाभ्यां संबध्यन्ते नापि स्थापनयेति । चोदयति—सत्यमिति । परिहरति—उपचरितेति । नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम् इति हि गाथा भवतामित्यर्थः । अपि चोपचारश्चेत् लक्षणे ततो वरमेवं क्रियतां लक्षणं लाघवायेत्याह—यदि चेति । शङ्कते—अथेति । निराकरोति—स्वरूपत इति । मुख्यत इत्यर्थः । चोदयति—स्थापनयापीति । परिहरति—न दोषेति । ननु न दूषणमात्रं संबध्यते असिद्ध्यर्थमिति च दूषणमात्राभिधानम्, तत् कुतो विशेषप्रतिलम्भ इत्यत आह—सामान्याभिधानेऽपीति । तृतीयं कल्पं दूषयितुमुपन्यस्यति—स्वपरशब्दाविति । एतदपि *सूत्रान्तरविरोधेन दूषयति—न युक्तमेतदपीति । ते साधनदूषणैः स्वपरशब्दाः संबध्यन्ते इति सूत्रे हि नियमेन स्वपक्षे साधनं परपक्षे दूषणमुक्तम्, तथा चोत्तरपक्षो दूषणीय एवेति उत्तरपक्षवादिनापि दूषणीयः । एवं पूर्वपक्षोऽपि साधनीय एवेति । उत्तरपक्षवादिनोऽपि साधनीयो न दूषणीयः स्यादित्यर्थः । अपि चायुक्तस्य पूर्वपक्षस्य साधनं युक्तस्य चोत्तरपक्षस्य दूषणमिति विपरीतप्रसङ्ग इत्याह— स्वपक्षश्चोत्तरपक्षवादिनः पूर्वपक्षात् अयुक्तपक्षात् अन्यः युक्त इत्यर्थः । न पदार्थः नावयवार्थः । एतेन सूत्रान्तरनियमाभिधानव्याघातेनेत्यर्थः । व्याख्याता निराकार्यत्वेन । 276/tha षष्ठं कल्पं दूषयितुमुपन्यस्यति—एक एवायमिति । दूषयति— युक्तमेतत् । एकस्यानेकं विशेषणम् । § 603

द्वितीयं हेतुमुपन्यस्तं व्याख्यातुं स्मारयति—समासेति । न केवलं विशेष्यात् पृथक् स्वार्थो विशेषणं नावधार्यते, अपि त्वन्यस्मादपि न भिद्यते इत्याशयवानाह— भेदाच्चेति । चोदयति—असत्यपि भेद इति । न केवलं पत्युर्विशेष्यात् सेना न भिद्यतेऽपि तु ततोऽन्येभ्योऽपि हास्तिकाश्वीयरथपदातिभ्य इति । एवं पानकमपि न केवलं तदङ्गेभ्यो जीरकादिभ्यः, अपि

३२ दं ] विशेष्यं*Om*nvt-C
३३ ता ] स्वशब्दस्यnvt-C
११ णे ] ततो*Om*nvt-C
१६ * ] सूत्रान्तरेणnvt-C
१७ ब्दाः ] °रेव स्वपरपक्षाःnvt-J
१९ णीयः ] °णीयम्nvt-C
२० स्य ] पूर्वस्य पक्षस्यnvt-C
२२ वार्थः ] °र्थ इत्यर्थःnvt-C

त्वन्येभ्योऽपि फलसलिलादिभ्य इति । परिहरति—तच्च नेति । उक्तं विस्मृत्य शङ्कते—अथ मन्यसे स्वार्थ इति । उक्तस्मारणेन निराकरोति—तन्नेति । एतेनैव च कर्मधारयबहुव्रीही अपीत्याह— एतेनेति । अपि च स्वः पक्षो यस्य साधयितुः स तथोक्तः । तथा च साधयितृविषयं स्यादित्याह—साधयितृविषयं चेति । § 604

ननु मा भूद् यथेष्टविनियोगयोग्यार्थता स्वशब्दस्य, साधनीयार्थता तु भविष्यति । तथा च समासोपपत्तिरिति चोदयति—ननु चेति । षष्ठीसमासपक्षोक्तं दोषं स्मारयति—न संभवतीति । अपि च पक्षात् स्वपक्षभेदे सूत्रान्तरव्याघातोऽभेदे वा एतस्य व्याघात इत्याह—विरोधाच्चेति । § 605

अपि च वाक्यसमासयोः समासो ज्यायान् लाघवादित्याह—आस्तां तावदिति । न ह्ययं समर्थः समास इति । सिद्ध्यसिद्ध्यर्थमित्ययं समासः स्वपरपक्षयोः प्रत्येकं न संबन्धार्थ इत्यर्थात् कस्यचित् सिद्धिः कस्यचिदसिद्धिरित्यर्थः । परिहरति—यद्यसामर्थ्यात् न समासः सिद्ध्यसिद्ध्यर्थमिति । समासेऽपि तर्हीति । स्वपक्षपरपक्षसिद्ध्यसिद्ध्यर्थमिति समासेऽपीत्यर्थः । § 606

एकवचनबहुवचनप्रसङ्गोऽपि नास्त्यसामर्थ्यादिति चोद्यसमाधानाभ्यां दर्शयति—एकवचनेति । अनित्यत्वेऽपि समासविधेः समास एव विग्रहात् ज्यायानिति चोद्यसमाधानाभ्यां दर्शयति—अनित्य इति । भवतु गौरवमेवमपि को दोष इत्यत आह—*अर्थगत्यर्थं चेति । लघुनोपायेनाशुसिद्धौ गुर्वभिधानमनर्थकम् । यथाहुः,

277/tha

> अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
> इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥ § 609

इति अनर्थकप्रयोगश्चानपेक्षितः शिष्यैरिति तेषामशासनात् न शास्त्वं स्यात्, तदिदमुक्तम्—शास्त्रत्वेनेति । § 610

सिद्ध्यसिद्ध्यर्थमित्येतदपि दूषयति—सिद्ध्यसिद्ध्यर्थमित्येतदपि न युक्तमिति । तन्न तावदिति । तदिति तयोर्मध्य इत्यर्थः । अधिकरणप्रत्यायनमिति प्राश्निकप्रत्यायनमित्यर्थः । कुतो व्याहतमित्यत आह—ये चैते इति । चो यस्मादर्थे, अधिकरणे वर्तते पक्षस्येति व्याहतमित्यर्थः । चोदयति—नायमिति । सिद्धिर्ज्ञानं तस्य पक्षो विषयः, आश्रयास्तु प्राश्निका इत्यर्थः । विकल्प्य दूषयति—न युक्तमेतदिति । न तावत् ज्ञानं पक्षविषयं प्राश्निकाधिकरणं चेति बौद्धराद्धान्ते संभवति, ज्ञानस्यानाधारत्वात् विषयिविषयभावस्य चातात्विकत्वात् । तस्मादन्या सिद्धिः । तत्रेदमुपतिष्ठते—किं तर्हीति । सिद्धियोगात्

३१ विस्मृत्य ] प्रस्मृत्यnvt-C
३३ च ] एव च*Om*nvt-C
५ च ] साक्षात्सपक्षस्य भेदेnvt-C
१६ पि ] एवम्*Om*nvt-C
१६ * ] अनुगत्यर्थंnvt-C
१८ अक्के ] अर्केnvt-J
२२ ति ] सिद्ध्य° दूषयति*Om*nvt-J
२८ स्य ] च औम् छ्

सिद्धः पक्षो भवति । प्रमाणयोगस्य सिद्धिः । सैवार्थस्य तथाता, तस्यास्तु प्राश्निकानां प्रतीतिर्भवति । तस्मात् न प्राश्निकप्रतीतिः पक्षस्यासिद्धिरिति विरोधः । यस्मात् सोऽर्थस्तथा भवति तस्मात् तथाभावादधिकरणप्रत्यायनं भवतीति द्वितीयं कल्पमाशङ्कते—अथासिद्ध इति । यावत् पक्षविषयं साधनं न प्रयुज्यते तावद्यद्यधिकरणप्रत्यायनं ततः साधनप्रयोगात् प्रागधिकरणप्रत्यायनमस्तीति वादवैयर्थ्यं साधनदूषणप्रयोगोऽनर्थकः । दूषणान्तरमाह—पक्षस्येति । न प्रयोजनमन्तरेणेदानीन्तनानामस्मदादीनां मुख्यार्थशब्दस्यातिक्रमोऽवाचकपदप्रयोगेण लभ्यते इत्यर्थः । यथाहुः, § 611

अस्मदायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामहे इति
|§ 612

स्यादेतत् । मञ्चस्थाः क्रोशन्तीति वक्तव्ये विनापि प्रयोजनं मञ्चाः क्रोशन्तीत्युपचारो दृष्ट इत्यत आह—अपि तु प्रमाणासंभवेनेति । प्रमाणासंभवेनापि त्विति योजना । नन्विहापि विनापि प्रयोजनं प्रमाणासंभवमात्रेणोप- 278/tha
चारो मञ्चाः क्रोशन्तीतिवद्भविष्यतीत्यत आह—*लोकप्रयुक्तेति लोकप्रयुक्तशब्दार्थवत् । उपचारोऽपि लौकिको न प्रयोजनाभावेन शक्योऽपवदितुं न लोकः पर्यनुयोज्यो यतः इदानीन्तनस्तु अस्मदादिप्रयोगः प्रयोजनाभावे न शक्य पर्यनुयोक्तुमित्याशयेनाह—न चेदं लौकिकमिति । § 613

अपरे त्विति । न दूषणविषयत्वमसिद्धिर्येन न पक्षेण संबध्येत, अपि त्वज्ञानम् । तच्च पक्षविषयमेवेति न मुख्यार्थलङ्घनमित्यर्थः । अत्रापि पूर्वोक्तं प्रसङ्गमाह— तद् यदीति । तस्मात् पक्षस्येतीच्छता सिद्ध्यसिद्धिज्ञानाज्ञाने पक्षधर्माविवाभ्युपगन्तव्ये । यतः तयोः पक्षधर्मत्वात् एतद्भवति सिद्धः पक्षोऽसिद्धश्चेति । अस्तु तर्ह्येवमित्यत आह—एवं सतीति । नैव द्रष्टाधारता ज्ञानस्य विषयता च बौद्धराद्धान्ते संभवतीति भावः । शङ्कते—अथ मा भूदिति । अस्ति खल्वालयज्ञानं यदुपाश्रित्य षडपि प्रवृत्तिज्ञानानि जायन्ते । तस्मादालयप्रत्ययो द्रष्टा । तत्स्थे एव सिद्ध्यसिद्धी । ननु पक्षस्य तद्विषयत्वात् तस्यापीति चेत्, कः पुनरयं विषयभावः । तत्कारणत्वमिति चेत् ? चक्षुरादीनामपि ज्ञानकारणानां विषयत्वप्रसङ्गः । असतश्चाकारणस्य अविषयत्वप्रसङ्गः । ज्ञानप्रकाश्यत्वं विषयत्वमिति चेत्-न, ज्ञानेनार्थे प्रकाशाजननात् । तस्मात् ज्ञानस्य तदसमवायिनः तदविषयस्य च द्रष्टृस्थतैवेति सिद्धम् । निराकरोति—तथापीति । पुनः शङ्कते—अथ तथातथाते इति प्रमाणयोग इत्यर्थः । निराकरोति—तथापीति । तत्त्वं जिज्ञासुः पृच्छति—के पुनरेते इति

३० स्य ] तथाnvt-C
१ नं ] तावदधि°nvt-C
५ त्ते ] शब्द°*Om*nvt-J
५ हे ] प्रतीक्ष्या°nvt-J
९ * ] लोकप्रयुक्तेति*Om*nvt-C
११ तः ] इदानीं तु नास्म°nvt-C
११ न ] °भावेनnvt-C
१७ श्चेति ] °द्धः पक्षःnvt-C
१७ नैव ] एव*Om*nvt-C
२१ भावः ] विषयविषयिभावः nvt-K
२४ च ] च*Om*nvt-C

। सुहृद्भावेनोत्तरमाह—वस्तुधर्माविति । यद्यपि प्रमाणयोगायोगौ प्रमेयस्य च प्रमातुश्च साधनासंबन्धे कर्तृत्वानुपपत्तेः, तथापि प्रमेयस्य प्राधान्यात् तत्रैवाभिधानप्रत्ययाविति प्रमेयधर्मावुच्येते व्यक्त्यव्यक्ती, न तु प्रमातृधर्माविति । *सिद्ध्यसिद्ध्यर्थमिति अर्थशब्दानुपपत्तिः । कस्मात् ? विकल्पानुपपत्तेः । 279/tha विकल्पमाह—अर्थशब्दः खल्विति । इह सूत्रे धननिमित्तादिवचनतार्थशब्दस्य न संभवतीति त्रयमवशिष्यत इति त्रेधा प्रवर्तत इत्युक्तम् । साधनं साधनाभासो दूषणं दूषणाभास इति चतुर्विधं वाक्यम् । प्रथमकल्पमपाकरोति—तन्न तावदिति । तदिति तेषु मध्य इत्यर्थः । § 614

ग्रन्थान्तरे युक्तायुक्तत्वेन विशेषणात् चतुर्विधवाक्यसंग्रहार्थो ह्युद्देशे अर्थशब्दो व्याख्यातः । न च युक्तायुक्तत्वविशेषणे चतुर्विधवाक्यसंग्रहो भवति साधनाभाससंबन्धिनः पक्षस्य युक्तत्वाभावात् दूषणाभाससंबन्धिनश्च प्रतिपक्षस्यायुक्तत्वाभावादित्यर्थः । अथ न साधनादियोगोऽपि तु साध्यधर्म एव साधनानपेक्षो युक्तायुक्तत्वमिति शङ्कते—अथ पुनरिति । निराकरोति—तथापीति । कुतो व्याघात इत्यत आह—न हीति । यदि प्रत्यायनं सिद्धिः प्रतीतिः, तथापि सा प्रत्याय्या न संभवति । अथ करणम् ? तथापि कर्म करणं न संभवतीति व्याघात इत्यर्थः । द्वितीयं कल्पमाशङ्क्य निराकरोति—अथ प्रयोजन इति । प्रयोजनं कार्यम् । तन्न कारणाभासाद् भवितुमर्हति । न हि वह्निरिति गृहीतः खद्योतो दहति पचति वेत्यर्थः । तृतीयं कल्पमाशङ्क्य निराकरोति—अथाभिधेय इति । ग्रन्थकारः सूत्रकारः । एवं त्विति । एवं सति सिद्धिशब्दोऽसिद्धिशब्दश्च वादः स्यात् । ननु धननिमित्तादयोऽप्यर्थशब्दवाच्याः सन्ति, ते कस्मादिह न गृह्यन्ते इत्यत आह—तत्र सूत्रे । न चान्योऽर्थशब्दस्य विषयः संभवति, न हि सिद्धिर्धनं वा स्वपरपक्षयोः साधनं वा निवृत्तिर्वा संभवतीत्यर्थः । अपि च वचनविशेषणपक्षे स्वशास्त्रव्याघात इत्याह— सिद्ध्यसिद्ध्यर्थं वचनं वाद इति ब्रुवाणेनेति । नैयायिकहेतुदूषणं पूर्वमिदं सूत्रमुत्तरम् । उपसंहरति—तदेवमिति । तन्त्रं शास्त्रम् । लोकं च बाधन्त इति । अवाचकपदप्रयोगात् साधनदूषणाभासवादिनश्च वादित्वेन लोकसिद्धस्यावादित्वापादनात् सिद्ध्यसिद्धिशब्दयोश्च वादत्वापादनार्थत्वादित्यर्थः । § 615

280/tha

सूत्रं दूषयित्वा वृत्तिं दूषयति—यथा चेति । स्वस्य पक्षस्येति । स्वस्यात्मीयस्य पक्षस्य । न हि पक्षव्यतिरेकेण पक्षाधारं साध्यं ज्ञानमन्यद् वा सिद्धिशब्दाभिधेयं संभवति, ज्ञानस्य पुरुषाधारतया अनाधारतया वा पक्षाधारत्वानुपपत्तेः, पक्षस्य तु भवेत् केनचित् संबन्धेन यादृशतादृशेनेत्य-

---

३० *] सिद्ध्य°*Om*nvt-C
५ रे] °न्तरेण nvt-C
११ त्याय्या] प्रत्याय्यं nvt-C
१८ योः] कारणं nvt-J
१९ क्षे] विशेषपक्षे nvt-C
२० र्थं] °र्थं च nvt-C
२५ स्येति] स्वस्य पक्षस्येति*Om*nvt-J

र्थः । ते साधनदूषणैरित्यत्र पृथगुक्ते साधनदूषणे । युक्तायुक्तत्वाभ्यां ते युक्तायुक्तत्वे । साधनदूषणैरिति । न हि कर्म करणं भवतीत्यर्थः । अपि च युक्तायुक्तार्थाभ्यामभेदे साधनदूषणपदमनर्थकं ते इत्यनेनैव युक्तायुक्तत्वावमर्षिणा गतार्थत्वादित्याह—युक्तायुक्तत्वशब्दाभ्यां चेति । अथ न पर्यायता, अपि तु सामान्यविशेषभावः, युक्तायुक्तत्वे सामान्यम्, साधनदूषणे च विशेष इति शङ्कते—अथ मन्यसे इति । निराकरोति—न प्रथमेति । उभयव्यभिचारे विशेषणविशेष्यभावे कामचारादुत्पत्तेरित्युक्तम् । द्वितीयं कल्पमाशङ्क्य दूषयति—योग इति चेदिति । न खलु योगो नाम बौद्धानां साध्यसाधनवृत्तिर्दूष्यदूषणवृत्तिर्वा कश्चिदस्तीत्यर्थः । अपि च सांवृतोऽपि योगः साध्यसाधनज्ञानाधीननिरूपणतया नानिरूपिते साध्ये निरूपितो भवति, निरूपणं च निर्णय इति योगनिरूपणात् प्राक् साध्यनिर्णयात् कृतं योगनिरूपणेन साध्यनिर्णयार्थेनेति । युक्तायुक्तत्वेन करणेनाधिकरणप्रत्यायन-मिति व्याघात इत्याह—साधनेनेति । भवति ज्ञायते । तृतीयं कल्पमाशङ्क्य निराकरोति—अथ पदार्थस्येति । युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति युक्तायुक्तत्वयोः करणत्वं दर्शितम्, तत् तथात्वातथात्वपक्षे न संभवति, कर्मत्वात् । तदिदमुक्तम्—ते व्यवच्छेद्ये परिच्छेद्ये न तु व्यवच्छेदस्य परिच्छेदस्य साधने इति । § 616

अधिकरणप्रत्यायनमिति दूषयति—अधिकरणेति । शास्त्रसंबन्धः प्रयोजनेनेति । चोदयति—प्राश्निकप्रत्यायनादिति । कश्चित् चोदकं पृच्छतिकिं कारणम् ? तत्प्रत्यायनादिति । चोदकस्योत्तरम्—प्रतिवादी किलेति । 281/tha
सिद्धान्त्याह—सन्तमप्यर्थं न प्रतिपद्यत इति । न खल्वाध्यात्मिकशक्तिसंपन्नः समाहितः समग्रे साधनप्रयोगे सति सन्तमर्थं न प्रतिपद्यत इति संभवतीत्यर्थः । तथाविधेनापि चेत् प्रतिपत्त्वा सोऽर्थोऽन्यथा प्रतिपन्नः, कथमसौ तथा सन्नित्यभिधीयते इत्याह—कथं चेति । शङ्कते—अथ जिगीषुतया प्रतिपद्यमानोऽपीति । कामकारोऽनुज्ञा । निराकरोति—तथापीति । न प्रतिपद्यते प्रतिपद्यमान इति व्याहतम् । न चायमनुज्ञानिषेधो न प्रतिपद्यते इति वादे वीतरागकथात्वेन जिगीषाया अभावादिति भावः । यच्च प्राश्निकप्रत्यायनादिति । अन्यदीयेन करणेनान्यः प्रतिपद्यत इति सुभाषितम् । अन्यविषयस्येति अन्याश्रितस्येत्यर्थः । न चायं नियम इति । न वादे प्राश्निकानामुपादानम्, दैवागतानां तु न वर्जनमित्यर्थः । वादस्य जल्पवितण्डाभ्यामभेदमभिप्रेत्य चोदयति—यदा तु नायमिति । आशयस्थितमर्थमनभ्युपगच्छन् परिहरति—सत्यमिति । *स्वाभिप्रायं दर्शयति—न त्रैविध्येति । दूषयति—न भवद्भिरेव प्रतिषेधादिति । त्रैविध्यानभ्युपगमादिति दूषयति—यदपीति । § 617

२९ त्वाभ्यां ] °युक्तार्थाभ्यांnvt-C
३२ ब्दाभ्यां ] °युक्तशब्दाभ्यांnvt-C
१५ श्चित् ] चोदकःnvt-C
१६ म् ] किं कारणम् ? *only in*nvt-J
१८ योगे ] सति*Om*nvt-J
२३ थात्वेन ] °कथात्वात्nvt-C
२७ तु ] न*Om*nvt-J
२८ * ] स्व*Om*nvt-C

यच्चोक्तं वृत्तौ पक्षसिद्धिविषयम्, एतदपि दूषयितुमुपन्यस्यति— यच्चोक्तमिति । न कामतः विना प्रयोजनमिति । विनापि प्रयोजनं प्रमाणासंभवेनापीति योजना । सूत्रोक्तं दूषणं वृत्तौ आह—तदर्थं वचन सिद्ध्यसिद्ध्यर्थमित्यर्थः । अधिकरणं दूषयति—अधिकरणमिति । न हि वादे प्राश्निकाधारमिति । प्राश्निका एव तावद् वादे न सन्ति, अभ्युपेत्य उक्तमिति । शङ्कते—प्रत्यायनाधारत्वादिति । सिद्धिः प्रत्यायनं तदाधाराः प्राश्निकाः इत्यर्थः । निराकरोति—नेति । शङ्कते—तस्मिन्निति—दैवमिलिते प्राश्निके सतीत्यर्थः । निराकरोति—नेति । न हि दैवमिलितं कारणम्, मा भूद् गर्दभोऽपि धूमस्य कारणमिति भावः । चोदयति यदि प्राश्निका न सन्ति तद्वाद इति । तयोर्वादिप्रतिवादिनोर्वादस्य परीक्षा का कस्य च तयोः वादस्य
282/tha क्व च असौ परीक्षा ? प्राश्निकाभावे हि वादतत्परीक्षातदधिकरणा नामज्ञानमित्यर्थः । परिहरति—साधनेति । वीतरागौ हि वादिप्रतिवादिनावेव वादस्वरूपज्ञानं च तत्परीक्षां च कर्तुं शक्नुतः, तत् किमत्र प्राश्निकैः ? साधनप्रयोगः पक्षविषयः, दूषणप्रयोगः स्थापनाविषयः इति वादस्वरूपम् । साधनदूषणतदाभासानां परितो ज्ञानं परीक्षा । तदर्थं *परीक्षार्थं तस्मिन् वादेऽधिकारो वीतरागयोरेव वादिप्रतिवादिनोः । तदिदं क्वेति विप्रश्नस्योत्तरम् । तस्मात् सप्तम्यर्थोऽधिकरणार्थः पराभिमतः प्राश्निक इति यावत् । स नास्ति वादिप्रतिवादिनोरेव वीतरागयोः कथासमाप्तेरित्यर्थः । § 618

यदपि वृत्तौ चोदितं यदि सिद्ध्यसिद्ध्यर्थं वचनं वादः, ततः प्राश्निकप्रतिवादिनोः प्रियाप्रियवचसि रथ्यावादे प्रसङ्ग इति तदप्यतिनिर्बीजमित्याह यदपीति । न हि प्रियाप्रियवचसः साक्षात् पारम्पर्येण वा सिद्ध्यसिद्ध्यर्थता, नापि साधनदूषणयुक्तायुक्तत्वविशेषणसंबन्धः । तस्मादेवंवादी नोत्तरार्हः । न ह्युन्मत्ताय कश्चिदनुन्मत्त उत्तरमाह, ब्रुवाणो वा सोऽप्युन्मत्तः स्यात् । तदिदमुक्तम्—दत्तः स्वहस्त इति । पूर्वं सिद्ध्यसिद्ध्यर्थमिति, अपरं युक्तायुक्तत्वमिति, उभयोरप्यनेन चोद्येनासंबन्धात् । यदि त्ववश्यमुत्तरं वाच्यम्, ततो वरमेवं वक्तव्यमित्याह—यदि त्विति । सेयं सूक्ष्मेक्षिका परैरिह कृतेति तदनुबन्धेन वार्त्तिककृतापि कृतेति ॥ १ ॥ § 619

## यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ १ । २ । २ ॥ § 620

उद्देशक्रमानुरोधेन वादलक्षणानन्तरं जल्पं लक्षयति—यथो—ल्पः । अत्रापि समानजातीयाभ्यां वादवितण्डाभ्यामसमानजातीयेभ्यः प्रमाणादिभ्यो व्यवच्छेदो सूत्रार्थः । यथोक्तोपपन्नपदार्थं व्याचष्टे—समस्तमिति । चोदयति—
283/tha यथोक्तोपपन्न इति न युक्तमिति । निग्रहस्थाननियमस्य प्रमाणतर्कसाध-

३३ वादे ] वादे*Om*nvt-C
१० * ] परीक्षार्थं*Om*nvt-C
११ तिवादिनोः ] वादिनोःnvt-C
१४ तः ] तदाnvt-C
१५ थ्यावादे ] रथ्यातथावादे nvt-K
२२ कृतेति ] तन्निर्बन्धेनnvt-C

नोपालम्भाभिप्रायनियमस्य च जल्पेऽभावात्, भावे वा वादजल्पयोरभेदप्रसङ्गात्, वादलक्षणस्य च जल्पव्यापकत्वेन व्यभिचारप्रसङ्गाद् यथोक्तोपपन्न इत्येतदनुपपन्नमित्यर्थः । परिहरति—नैष दोष इति । उक्तमात्रमिह संभवात् योग्यतासंभवाद् गृह्यते, न त्वनुक्तोऽर्थलभ्यो नियमः । न ह्यसौ सूत्रपदश्रवणमात्रात् प्रतीयते, अपि तु तदर्थे प्रतीते तस्यान्यतः सिद्धौ सत्यां गम्यत इति प्रमाणतर्कसाधनोपालम्भ इत्येतदतिदिश्यत इति उक्तमात्रोपलक्षणपरम् । तेन प्रमाणतर्कसाधनोपालम्भः पञ्चावयवोपपन्नः सिद्धान्ताविरुद्धः पक्षप्रतिपक्षपरिग्रह इत्येतस्य वादपदवर्जं समस्तस्य लक्षणस्यातिदेशः । नियमस्त्वार्थो न संबध्यत इति सिद्धम् । लक्षणमात्रस्येति उक्तमात्रस्य, नार्थस्य नापि लक्ष्यपदस्येत्यर्थः । अत्रैव दृष्टान्तमाह—यथान्यत्र वैशेषिकतन्त्रे । न नियमार्थे पदे इत्युपलक्षणम्, न प्रमाणतर्कसाधनोपालम्भपदलभ्योऽभिप्रायनियम इत्यपि द्रष्टव्यम् । § 621

पक्षान्तरमाह—अथ वेति । यथा गोभिर्युक्तो रथो गोरथ इति युक्तपदलोप इति । न हि नियमार्थयोरिति । एतदप्युपलक्षणं पूर्ववदेव । इह वादलक्षणं पठता भाष्यकारेण नियमोऽप्यतिदिष्ट इति मन्वानश्चोदयति—भाष्यम् इदानीमिति । परिहरति—न सूत्रेति । जल्पलक्षणानुकूलो यः पाठक्रमः, *ततोऽर्थस्वरूपमात्रं प्रतीयते, न त्वार्थोऽर्थ इत्यर्थः । यदुपपन्नमुक्तमात्रमित्यर्थः । *अत्र भाष्यकारेण छलादीनां निषेधार्थतया साधनाङ्गभावमाक्षिप्य परपक्षविघातेन स्वपक्षरक्षणादङ्गभाव इति दर्शितम् । तदेतद् वार्त्तिककार आक्षिपति—छलजातिनिग्रहस्थानैरिति । तत् किं निग्रहस्थानान्यप्ययुक्तानि, न चैतच्छक्यमित्यत आह—छलं तावदिति । छलजात्योराक्षेप्तव्ययोः संपातायातानि निग्रहस्थानानीत्यभिप्रायः । भाष्योक्तं 284/tha
समाधिमाशङ्कते—अङ्गभाव इति चेत् इति । निराकरोति—एतदपीति न हि सहस्रेणाप्यन्धैः पाटच्चरेभ्यो गृहं रक्ष्यत इत्यर्थः । § 622

एवमाक्षिप्ते पार्श्वस्थः पृच्छति—किमर्थं तर्हीति । सिद्धान्तिन उत्तरं साधनेति, वादे तावद् यद्यपि न साधनविघातसमर्थानि, तथापि तेषां तत्त्वमविद्वान् एभिरहं साधनं विहनिष्यामीत्यनया बुद्ध्या अपहृतः व्यामोहितः प्रवर्तते । तस्माद् वादे भ्रमेणोपादानमेतेषामित्यर्थः । यत्र त्वेषां तत्त्वं विद्वान् प्रवर्तते, न स वादः, किंतु जल्पो वितण्डा वेत्याह—यत्र चैतानीति । ननु जल्पवितण्डयोः प्रयोगात् साधनमङ्गं वा *स्यादत आह—न पुनरिति । ननु यदि न साधनमङ्गं वा, कस्मात् तर्हि जल्पवितण्डयोरेषां प्रयोग इत्यत आह—साधुसाधनोपादाने चेति । साधुसाधनोपादाने च वादिना

---

३० च ] च*Om*nvt-C
३१ न्न ] इत्ययुक्तमि°nvt-C
१ त्यां ] नियम्यतेnvt-C
४ स्य ] पदलक्ष्यवर्जंnvt-C
७ भ्यो ] °लभ्येnvt-C
१० न ] हि *only in*nvt-J
१३ * ] यतो° nvt-K
१४ * ] तत्रnvt-C
१८ योः ] आक्षिप्तयोःnvt-C
२३ हं ] अस्यnvt-C
२४ ते ] प्रवर्तते*Om*nvt-C
२६ * ] स्युरितिnvt-J

कृते परेण प्रतिवादिना जिगीषुणाकुलितबुद्धिर्द्राक् पारमार्थिकमुत्तरमप्रतिपद्यमानश्छलादीनि प्रयुङ्क्ते । किमर्थमित्यत आह—कदाचिदिति । यथाकथञ्चित् प्रयोगेण । तदनेन प्रकारेण तत्त्वसंरक्षणार्थत्वात् नासदाचारः । न च शास्त्रकाराणां छलादिव्युत्पादनमसदृशम्, न च खटचपेटाद्यभिधानप्रसङ्गः, वाग्युद्धे तेषाम् अप्रसङ्गादिति । न बाधेति । नैकेनापरं तदेवापोद्यत इत्यर्थः । शेषं सुगमम् ॥ २ ॥ § 623

## स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ १ । २ । ३ ॥ § 624

उद्देशक्रमानुरोधेन जल्पानन्तरं वितण्डालक्षणमाह—स-ण्डा । पूर्ववादिपक्षापेक्षया प्रतिवादिन आत्मीय एव पक्षः प्रतिपक्षः । तस्य स्थापना साधनम्, *तया हीनः । तदनेन जल्पाद् व्यवच्छिनत्ति । तदेतदाह भाष्यकारः—स जल्प इति । तयोरेकतरं प्रतिवादी आत्मीयं पक्षं न स्थापयतीति । परपक्षप्रतिषेधेनेति । तत्स्थापनाप्रतिषेधेनेत्यर्थः । स्यादेतत् ।
285/tha यथा प्रतिवादिनः पक्षो वादिपक्षापेक्षया प्रतिपक्षः, एवं वादिपक्षोऽपि प्रतिवादिपक्षापेक्षया प्रतिपक्ष इत्युभयपक्षस्थापनाहीना वितण्डेति स्यात्, *इत आह—वार्त्तिककारः—प्रतिपक्षस्थापनाहीन इति । *द्वितीयपक्षस्थापनाहीन इति । प्रथमपक्षवादिनो हि स्थापनाया अभावे किं वैतण्डिक आहन्ति ? न च पक्षः शक्य आहन्तुम् । तस्मात् प्रथमपक्षवादिनोऽस्ति स्थापनेति द्वितीय एव पक्षः स्थापनाहीन इति सामर्थ्याद् युक्तमिति । अत्र चोद्यभाष्यम्—अस्तु तर्हीति । स्थापनाया अभावे स्थाप्यः पक्षोऽपि नास्ति । न ह्यन्यथा पक्षस्य पक्षत्वमिति भावः । परिहरति—यद् वै खलु तदिति । वैतण्डिकोऽपि हि वादी पारिशेष्यात् मत्पक्षः सेत्स्यतीति बुद्ध्या स्वपक्षमस्थापयन् परपक्षस्थापनामाहन्ति । तस्मात् परपक्षप्रतिषेधलक्षणं वाक्यम् अस्य पक्षः परपक्षनिषेधेन पारिशेष्यात् पक्षसिद्धिहेतुत्वादुपचारतः । तस्मादस्ति वैतण्डिकस्य पक्षः । न तु परपक्षप्रतिषेधादन्या स्थापना । तेनास्य पक्षोऽस्ति, नास्ति च पक्षस्थापना । तदिदमुक्तम्—न कश्चिदर्थं प्रतिज्ञाय स्थापयतीति । पक्षत्वं तु योग्यतामात्रेण, न तु स्थाप्यमानतयेति । § 625

अस्तु तर्हीति भाष्यार्थमाह—वार्त्तिककारः अपरे त्विति । तस्मात् प्रतिपक्षहीनो वितण्डेति वक्तव्यमित्यर्थः । परिहरति—अयुक्तं चैतदिति । न तावदस्थाप्यमानस्यापि स्थापनार्हतालक्षणा पक्षता न युज्यते, तस्मात् न वैतण्डिको दूषणादन्यत् किञ्चिदभ्युपगच्छतीति । अनभ्युपगमात् पक्षोऽस्य नास्तीति वक्तव्यम् । तथा च चतुर्वर्गाभ्युपगमे विरोधोऽनभ्युपगमे वा

३१ त्वात्] जल्पे सदा°nvt-K; ना°*Om*nvt-C
१ च] घटपटाद्य°nvt-C; खटचपेटा=बद्धमुष्टिप्रहारः ।
२ वाग्युद्धे] वाग्वादेnvt-J
७ *] यत्तया nvt-K
११ *] अतः nvt-C
१२ *] द्वितीय° इति *Om* nvt-C
१६ क्षोऽपि] अपि *Om* nvt-C
२२ च] तु nvt-C
२३ तु] तद्योग्य° nvt-C

नायं लौकिको न परीक्षक इति प्रसङ्ग इति भावः । *प्रतिपादयितुरयथार्थावबोधं प्रतिपत्तारं चात्मानमित्यर्थः । यस्तु मन्यते चतुर्वर्गाभ्युपगमेऽपि दूषणमात्रं वितण्डेत्येव वक्तव्यं लाघवायेति, तन्मतमुपन्यस्यातिप्रसङ्गापादनेन दूषयति—दूषणमात्रेति । समाख्यानिर्वचनसामर्थ्यादेव गम्यत इत्यर्थः । उपसंहरति—तस्मादिति । तदनेनार्थतो यद् वै खल्वित्यादि भाष्यं व्याख्यातम् ॥ ३ ॥ § 626

॥ इति कथालक्षणप्रकरणम् ॥

286/tha

## १.२.२ हेत्वाभासलक्षणप्रकरणम्

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासाः ॥ १ । २ । ४ ॥ § 628

उद्देशक्रमानुरोधेन वितण्डानन्तरं हेत्वाभासेषु लक्षयितव्येषु अर्थाक्षिप्तसामान्यलक्षणमेषां विभागोद्देशपरं सूत्रम्—सव्य-साः । § 629

तद्व्याख्यानपरं भाष्यं समाख्यानिरुक्तिवशेन सामान्यलक्षणं प्रतिपादयन् वार्त्तिककारः पठति—हेतुलक्षणाभावादिति । पृच्छति—किं पुनरिति । न ह्यन्यस्यान्यत्वमात्रेण सादृश्यम्, मा भूत् सर्वस्य सर्वेण सादृश्यमिति भावः । उत्तरम्प्रतिज्ञेति । प्रयोगगतं सामान्यमुक्त्वा प्रयोज्यगतमाह—अन्यतमेति । अबाधितविषयतासत्प्रतिपक्षत्वे सती अप्यविवक्षित्वा त्रैलक्षण्यद्वैलक्षण्याभिधानं द्रष्टव्यम् । शेषमतिरोहितम् । § 630

षड्वृतं शतं गणयति—तत्र साध्यव्यापकेति । एतस्यां त्रिषोडश्यां साध्यव्यापकसाध्यैकदेशवृत्तिधर्मभेदात् षोडशीद्वयं विशेषणविशेष्यासिद्धिभेदात् चतुःषष्टिः । एवं समर्थासमर्थविशेषणविशेष्यभेदात् चतुःषष्टिः । तदेतत् चतुःषष्टिद्वितयमष्टाविंशं शतं पूर्वया त्रिषोडश्या सह षड्वृतं शतम् । साध्यव्यापकानां धर्मविशेषाणामुदाहरणान्याह—तत्रेति । विपक्षव्याप्त्यव्याप्तिभ्यां प्रथमद्वितीयौ साधारणौ, तृतीयोऽन्वयव्यतिरेकी साध्यतज्ञातीयव्यापको हेतुरेव । विपक्षव्याप्त्यव्याप्तिभ्यां चतुर्थपञ्चमौ विरुद्धौ हेत्वाभासौ । यत्र विपक्षे न वृत्तिस्तं दर्शयति—द्व्यणुकवदिति । षष्ठोऽविद्यमानसपक्षविपक्षोऽसाधारणः, अत एवाहघटादिवदिति । सप्तमाष्टमौ विपक्षव्याप्त्यव्याप्तिभ्यां साधारणौ । नवमः सपक्षैक देशवृत्तिरन्वयव्यतिरेकी 287/tha हेतुरेव । दशमैकादशौ सपक्षव्याप्त्यव्याप्तिभ्यामन्वयिनौ हेतू । द्वादशस्तु अविद्यमानाविपक्षोऽसाधारणः । त्रयोदशचतुर्दशौ त्वविद्यमानसपक्षौ विप-

२९ *] अव° *Om* nvt-J
६ न्] °णप्रतिपादकंnvt-C
९ त्वे] °त्वासत्प्रतिपक्षितत्वेnvt-C
१३ भेदात्] °विशेषणभे°nvt-C
१९ एवाह] आह*Om*nvt-J
१९ मौ] असपक्ष°nvt-C

क्षव्याप्त्यव्याप्तिभ्यां विरुद्धौ । पञ्चदशोऽपि व्यतिरेकी हेतुरेव । षोडशस्तु *अविद्यमानसपक्षविपक्षोऽसाधारणः । § 631

यदि बाह्यकरणप्रत्यक्षे वाङ्मनसे इति साध्येत तदा नानित्यत्वं सपक्षव्यापकं स्यात्, सामान्ये बाह्यकरणप्रत्यक्षेऽभावात् । अतः साध्यधर्मं विशिनष्टि—सामान्यविशेषवदिति । अनित्ये रूपविज्ञाने अमूर्तत्वादिति । *रूपविज्ञानस्कन्धातिरिक्तानां वेदनासंज्ञासंस्कारस्कन्धानामनित्यतया सपक्षाणां व्यापकममूर्तत्वमिति । तज्जातीयैकदेशवृत्तित्वममूर्तत्वस्य दर्शयितुं यत्र न वर्तते तत्पुरःसरमुदाहरणं रूपादिवदिति । § 632

अनित्यः शब्दोऽश्रावणत्वात् इति नित्ये शब्दत्वे न वर्तते । अर्थः शब्द इति, शब्दो धर्मी । अर्थ इति साध्यो धर्मः, द्रव्यगुणकर्मणामन्यतम इत्यर्थः । यद्यश्रोत्रग्राह्यत्वादित्युच्येत, ततः सामान्यादिष्वनर्थेषु विपक्षेष्वपि वर्तेत । अत उक्तम्— अश्रोत्रग्राह्यसामान्यवत्त्वादिति । अश्रोत्रग्राह्यं च तत् सामान्यवच्चेति विग्रहः । ननु *चाक्षुषत्वं विपक्षवृत्ति समवायस्यानाश्रितस्य चाक्षुषत्वादित्यत उक्तम्— औलूक्यपक्षे इति । सिद्धान्तभेद इति, सौत्रान्तिकानाम् इत्यर्थः । असमर्थविशेष्यस्योदाहरणम्—कृतकत्वे सति प्रमेयत्वादिति । असमर्थविशेषणस्योदाहरणम्—प्रमेयत्वे सति कृतकत्वादिति । निरपेक्षं खलु कृतकत्वमनित्यत्वे साध्ये समर्थम्, प्रमेयत्वं त्वन्यापेक्षमसमर्थमित्यर्थः । तदेवं त्रिषोडश्या प्रकृत्याष्टचत्वारिंशद् भवन्ति हेतुहेत्वाभासाः । व्यापकाव्यापकभेदेन तु द्विषोडशी यदा विशेषणविशेष्यासिद्धा चोभयसंप्रतिपन्नया असमर्थविशेषणविशेष्यतया सन्दिग्धविशेषणविशेष्यतया
288/tha चोभयभसंप्रतिपन्नया विक्रियते तदा चतुःषष्टित्रयेण द्वानवतं शतं भवति । वाद्यसिद्धप्रतिवाद्यसिद्धतया उभयान्यतरसन्दिग्धतया च चतुःषष्टिद्वयेनाष्टाविंशकं शतमपरम् । तदिदम् अन्यतरासिद्धा इत्यनेन वार्त्तिककृता सूचितम् । द्वाभ्यामूना त्रिंशद् द्वात्रिंशदिति कथञ्चिद् व्युत्पत्त्या । ते पुनर्व्यापकाव्यापका व्यधिकरणविशेषणविशेष्यव्यधिकरणसन्दिग्धविशेषणविशेष्यव्यधिकरणासमर्थविशेषणविशेष्यभेदेन चतुःषष्टित्रयेण द्वानवतं शतम् अपरम् । § 633

एवमप्रसिद्धाश्रयविशेषणविशेष्या उभयान्यतरपक्षाप्रसिद्धा अष्टाविंशकं शतम् । अत्रापि द्वात्रिंशकमिति पूर्ववद् व्याख्येयम् । अन्यतरमात्रमत्र विवक्षितं न तु वादिप्रतिवादिभेदः । ते पुनरप्रसिद्धाश्रयाः पूर्ववद्भेदेन व्यधिकरणविशेषणविशेष्यसन्दिग्धविशेषणविशेष्यासमर्थविशेषणविशेष्यभेदेन चतुःषष्टित्रये सति द्वानवतं शतम् । तदेवमनन्तराभ्यां द्वानवतशताभ्यां शतत्रयं चतुरशीतं यत् तदेवाष्टाविंशकशताभ्यां द्वानवतेन च शतेन संपिण्डितं द्वात्रिंशदुत्तराष्ट-

२४ *] °सपक्ष*Om*nvt-C
१ साध्येत ] तदा*Om*nvt-J
४ *] °विज्ञान°*Om*nvt-J
५ मिति ] °त्वादितिnvt-J
८ साध्यो ] साध्यतेnvt-J
११ *] न विपक्षावृ°nvt-C
१७ हेतुहेत्वाभासाः ] हेतु°*Om*nvt-C
१८ या ] °तया उभयसम्प्रतिपन्नयाnvt-C
३१ त् ] °ष्टाचत्वारिंशक° nvt-C

शती विकारभूता भवति । अष्टाचत्वारिंशत् प्रकृतयः पश्चात् निवेशनीया इति । उभयाप्रसिद्धाश्रयविशेष्यमुदाहरति—यथा अग्निमान् देशो धूमवत्त्वात् । उक्तं हि प्राग् यथा न देशोऽग्निमत्तया साध्योऽपि तु धूमविशेष एवेति । *अन्यतरासिद्धाश्रयोदाहरणमाह—अस्ति चात्मा इच्छादिगुणत्वादिति । आश्रयासिद्धविशेषणादयोऽप्यूहनीयाः । असमर्थाव्यापकासिद्धविशेषणानामुदाहरणम् । असमर्थाश्च तेऽव्यापकाश्च, ते व्यधिकरणतया असिद्धाश्चेति विग्रहः । अनित्यः शब्दः प्रयत्नानन्तरीयकत्वे सति कृतकत्वादिति, कृतकत्वस्यैव विशेष्यस्य सामर्थ्यादसमर्थमनित्यत्वे प्रयत्नानन्तरीयकत्वम्, अव्यापकं च स्तनयित्नुशब्दानामव्यापकत्वात् । व्यधिकरणतया असिद्धं च कोष्ठवायुताल्वादिक्रियाया एव प्रयत्नानन्तरीयकत्वं, न त्वाद्यस्यापि शब्दस्य, प्रागेव तु श्रोत्रसमवायिन इति । कृतकत्वे सति प्रयत्नानन्तरीयकत्वादिति चासमर्थाव्यापकासिद्धविशेष्याणामुदाहरणं द्रष्टव्यम् । § 634
289/tha

वैभवेन त्वसिद्धतावर्जमुदाहरति—अव्यापकासमर्थविशेष्याणामुदाहरणम्—अनित्यः शब्दः प्रत्ययभेदभेदित्वेनोपलभ्यमानत्वात् । उपलभ्यमानत्वं हि नित्येऽप्यस्तीति व्यभिचारादसमर्थम् । कारणभेदभेदित्वमेव तु विशेषणं समर्थमव्यभिचारादिति । केवलव्यधिकरणविशेष्याणामुदाहरणम् अस्ति प्रधानं भेदानां गोघटादीनां सुखदुःखमोहात्मकत्वेनान्वयदर्शनादिति । अन्वयदर्शनं हि भेदाधिकरणतया न प्रधानाधिकरणमिति, व्यधिकरणमिति व्यधिकरणं विशेष्यम् । केवलव्यधिकरणविशेषणानामुदाहरणम्—रूपरसगन्धस्पर्शशब्दाः चन्दनशब्दादत्यन्तं विभिन्नार्थाः समुदायसमुदाय्यसंभवे सति रूपादीनामर्थानां रूपादिशब्दानां च तेन चन्दनशब्देन व्यपदिश्यमानत्वात् । चन्दनस्य रूपादय इति समुदायसमुदाय्यसंभवो रूपादिषु व्यपदेशश्च रूपादिशब्देष्विति व्यधिकरणं विशेषणमित्यर्थः । तदनेन प्रपञ्चेन द्वात्रिंशदुत्तराष्टशती दर्शिता ।
§ 635

संप्रति द्वानवतशतयुग्मान्तरं दर्शयितुमुदाहरणमाह—अन्यथासिद्धोदारहणं नित्यः शब्दोऽभ्यासात् । सेयं क्रियाभ्यावृत्तिर्यथा शब्दानित्यत्वेऽप्युपपद्यते तथा द्वितीये दर्शयिष्यते । सिंहावलोकितन्यायेन व्यधिकरणविशेष्यं सन्दिग्धविशेषणमुदाहरति—सन्दिग्धाप्रसिद्धेति । विशेषणशब्दः तन्त्रेण विशेषणे विशेष्ये च कर्मकरणसाधनतया प्रयुक्तो वर्तते । तेन सन्दिग्धं विशेषणम् । अप्रसिद्धं व्यधिकरणतया विशेष्यं येषां तेषामुदाहरणमित्यर्थः । यथा सन्दिह्यमाने धूमादिभावेऽग्निमान् देशो धूमवत्त्वे सति प्रकाशकत्वात्, धूमवत्त्वं विशेषणं सन्दिग्धम् । प्रकाशकत्वं च विशेष्यं व्यधिकरणम् । तत् खलु वह्नेर्धर्मो न देशस्येति । अप्रसिद्धविशेषणसन्दिग्धविशेष्याणामुदाहरणं दर्शय-

---

२ *] °तरप्र° nvt-C
८ न] ह्याद्य° nvt-J
१२ त्वात्] भेदभेदेनो°nvt-J
२५ ते] द्रः २।२।३०
३१ णं] °षणं °ष्यमुदाnvt-J

ति—विपर्ययेणेति । अप्रसिद्धेत्यपि द्रष्टव्यम् । अग्निमान् देशः प्रकाशकत्वे सति धूमवत्त्वादिति । § 636

संप्रति द्वानवतशतयुग्मान्तरं दर्शयितुं भूमिरचनां करोति—एवमिति । ये सन्दिग्धासिद्धा व्यापकाव्यापकभेदेन द्वात्रिंशत् त एवोभयान्य-
290/tha तरासिद्धा चतुः षष्टिर्भवन्ति । ततः किमित्यत आह—ते चतुःषष्टितामापन्नाः पूर्ववद्भेदेन व्यधिकरणविशेषणविशेष्यसन्दिग्धविशेषणविशेष्यासमर्थविशेषणविशेष्यभेदेन तावच्चतुःषष्टित्रयमित्येकं द्वानवतं शतम् । अपरं चाश्रयासिद्धव्यधिकरणविशेषणविशेष्यसन्दिग्धविशेषणविशेष्यासमर्थविशेषणविशेष्यभेदेन द्वानवतं शतम् । तदिदं चतुरशीतं शतत्रयं सन्दिग्धासिद्धमाश्रित्य । अपरमपि द्वानवतशतयुग्मान्तरमन्यथासिद्धमाश्रित्याह—एवमन्यथासिद्धभेदो द्रष्टव्यः । § 637

*अन्यथासिद्धभेदोऽपि हि व्यधिकरणविशेषणविशेष्यसन्दिग्धासमर्थविशेषणविशेष्यभेदात् चतुःषष्टित्रयमिति । पुनश्च स एवान्यथासिद्ध आश्रयासिद्धव्यधिकरणविशेषणविशेष्यसन्दिग्धासमर्थविशेषणविशेष्यभेदात् चतुःषष्टित्रयमिति द्वानवतशतयुग्मेन शतत्रयं चतुरशीतम् । अपरमपि द्वानवतशतयुग्ममाह—एवं *विरुद्धविशेषणाविरुद्धविशेष्याश्चेति । विरुद्धविशेषणविशेष्या अपि हि व्यधिकरणविशेषणविशेष्यसन्दिग्धासमर्थविशेषणविशेष्यभेदाच्च आश्रयासिद्धव्यधिकरणविशेषणविशेष्यसन्दिग्धासमर्थविशेषणविशेष्यभेदाच्च शतत्रयं चतुरशीतम् । तदेवमेभिस्त्रिभिश्चतुरशीतैः शतत्रयैर्द्विपञ्चाशच्छतोत्तरं सहस्रमेकम् । द्वात्रिंशदुत्तरया अष्टशत्या सहस्रमेकं चतुरशीतिसहिता च नवशती । तदेवं प्रकृतिभूताष्टाचत्वारिंशत्प्रक्षेपेण संपिण्डितं द्वात्रिंशे द्वे सहस्रे भवत इति । § 638

तन्न असत्त्वादिति । पञ्चानां चतुर्णां वा रूपाणां संपत्तिरव्यभिचारः । स चैकस्मिन् विषये विरुद्धयोर्न संभवति, अन्ततोऽसत्प्रतिपक्षस्यैव रूपस्याभावादित्यर्थः । पञ्चानां हेतूनामिति । सपक्षव्याप्त्यव्याप्तिभ्यां द्वेधा, व्यतिरेक्येकः, अन्वयव्यतिरेक्यपि सपक्षव्याप्त्यव्याप्तिभ्यां द्वेधेति पञ्च हेतवः । पञ्चानां हेतूनां सरूपासरूपप्रतिबन्धात् पञ्च पञ्चका भवन्ति । सरूपः अन्वयिनोऽन्वयी, व्यतिरेकिणो व्यतिरेकी, अन्वयव्यतिरेकिणोऽन्वयव्यतिरेकी ।
291/tha असरूपश्च अन्वय्यादेर्व्यतिरेक्यादिः, तेन प्रतिबन्धः । एतदुक्तं भवति, अन्वय्यादावेकैकस्मिन् सरूपासरूपाः पञ्च हेतवः प्रतिबन्धका इति पञ्चभिः पञ्चकैः पञ्चविंशतिर्विरुद्धाव्यभिचारिण इति । चोदयति—लक्षणत एवेति । परिहरति—नानर्थकमिति । यत्परो हि शब्दस्तत्रासौ प्रमाणम्, समानासमानजातीयव्यवच्छेदकं च लक्षणसूत्रमिति तत्रैव प्रमाणम्, न त्वियत्तायामतत्परत्वात् । न चासावर्थी सतोऽप्यनुपयोगाद् अलक्ष्यमाणत्वोपपत्तेः प्रमेयान्तरवदिति ॥ ४ ॥ § 639

---

५ भेदेन ] °सन्दिग्धासमर्थ°nvt-J
७ भेदेन ] °सन्दिग्धासमर्थ°nvt-C
१० *] सिद्धोऽपिnvt-J
१४ *] °विशेषणवि°nvt-C
१५ विशेष्या ] °द्धविशेष्याnvt-C

अनैकान्तिकः सव्यभिचारः ॥ १ । २ । ५ ॥ § 640

तदेवमर्थाक्षिप्तसामान्यलक्षणं विभागं दर्शयित्वा विशेषलक्षणमवतारयति भाष्यकारः, तेषां हेत्वाभासानां मध्ये—अनै—रः । § 641

अत्र चानैकान्तिकसव्यभिचारशब्दौ पर्यायौ पुरुषभेदापेक्षया लक्ष्यलक्षणत्वेनावस्थितौ । यस्यानैकान्तिकपदार्थोऽप्रसिद्धः प्रसिद्धश्च सव्यभिचारपदार्थः, तं प्रत्यनैकान्त इति लक्ष्यनिर्देशः, सव्यभिचार इति लक्षणम् । यस्य तु सव्यभिचारपदार्थोऽप्रसिद्धः प्रसिद्धश्चानैकान्तिकपदार्थस्तं प्रति सव्यभिचार इति लक्ष्यनिर्देशः, अनैकान्तिक इति लक्षणम् । तत्र सव्यभिचार इति लक्षणपदं कक्षीकृत्याह भाष्यकारः व्यभिचार एकत्राव्यवस्थितिः । एतदुक्तं भवति । सव्यभिचारपदं निर्वचनसामर्थ्यात् लक्षणपदमिति । अनैकान्तिकपदलक्षणपक्षे भाष्यकारोक्तम् अनित्यत्वमप्येकोऽन्त इत्यादि । तद् वार्त्तिककारः पर्युदासाभिप्रायेण व्याचष्टे—एकस्मिन्नन्ते नियत ऐकान्तिक इति । न हेतुरैकान्तिको येन तदन्यत्वेन हेत्वाभासमात्रसंग्रहादेकजातीयत्वेन हेत्वाभासानां विभागसूत्रविरोधः स्यात्, किं त्वेकस्मिन्नन्ते यो नियतः स ऐकान्तिकः, तद्विपर्ययादनैकान्तिकोऽनियतः । अनित्यत्वे च नित्यत्वे चान्वयेन च व्यतिरेकेण चोभयपक्षगामीति यावत् । न चैवंभूता विरुद्धादयो 292/tha
हेत्वाभासा इत्यभिप्रायः । तदेवमनैकान्तिकः सव्यभिचारः इति स्थिते पृच्छति—कः पुनरिति । उत्तरम्—साध्यतज्जातीयेति । अवगत एष व्यभिचार इति, अनैकान्तिक पदवाच्यतास्य कथमित्यत आह—सर्वोऽयमिति । प्रमेयपदार्थस्य तु सर्वव्यापिनो नान्तो व्यतिरेकोऽस्तीत्यत उक्तम्—अन्यत्र प्रमेयादिति । § 642

अत्र बौद्धैः यद् विकल्प्य दूषणमुक्तम्, तदुपन्यस्यति—अनैकान्तिक इति । किं पुनरयमिति । ऐकान्तिको हेतुः । ततोऽन्यः सर्व एव हेत्वाभास इत्यर्थः । द्वितीयं *कल्पं दूषयति—अथ प्रसज्येति । तथापि हेतोरभावोऽनैकान्तिकः । न नासौ सव्यभिचारः । भावधर्मौ हि व्यभिचाराव्यभिचारौ नाभावे सर्वोपाख्याविरहिणि युज्येते इत्यर्थः । तदेतत् शाक्यदूषणं निराकरोति—नायं पर्युदासपक्ष इति । पर्युदासपक्षस्तावदस्माकमभिमत उपपन्नतरश्च, केवलमयं प्रसज्यप्रतिषेधवल्लभस्तमास्थाय सर्वं दूषयतीति तमेवाङ्गीकृत्य सर्वत्र ब्रूम इत्याशयवतः समाधानम् । न पुनरब्राह्मणादावपि वार्त्तिककारस्य प्रसज्यप्रतिषेधोऽभिमतः, किं तु पर्युदास एवेति । अभ्युपेत्य तु तत्रापि प्रसज्यप्रतिषेधाभिधानम् । न हि प्रसज्यप्रतिषेधोऽपि तुच्छः, अपि तु कस्यचिद् वस्तुनोऽभावेन विशिष्टं किञ्चिदेव वस्त्वित्यर्थः । § 643

अत्र भाष्यम्—निदर्शनम्, नित्यः शब्दोऽस्पर्शत्वात् इति । वैधर्म्ये दृष्टान्तमाह—स्पर्शवानिति । अनित्यः कुम्भः स्पर्शवान् दृष्ट इति योजना

९ मिति ] °पद°*Om*nvt-J
१२ त्वेन ] मात्र*Om*nvt-C
१५ तिरेकेण ] वोभय°nvt-C
१७ त ] अवगतम्nvt-C
२३ * ] पक्षंnvt-C
२७ मास्थाय ] आदायnvt-C
३० तिषेधोऽपि ] अपि*Om*nvt-C

। वैधर्म्ये व्याप्यव्यापकभावस्य वैपरीत्यादिति वैधर्म्यव्यभिचारमाह—दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ न साध्यसाधनभूतौ गृह्येते । न हि यदनित्यं तत् सर्वं स्पर्शवद् बुद्ध्यादिभिर्व्यभिचारात् । साधर्म्येऽपि चैभिरेव व्यभिचारो वक्ष्यत इतीह नोक्तः । ननु मा भून्नित्यत्वं साध्यम्, अस्पर्शत्वमेवास्तु नित्यत्वस्य साध्यमित्यत आह—स्पर्शवांश्चाणुर्नित्यश्चेति । तथापि यदस्पर्शवन्न भवति
293/tha तन्नित्यमपि न भवतीति वैधर्म्यं व्यभिचरति, स्पर्शवतोऽप्यणोर्नित्यत्वादित्यर्थः । साधर्म्यव्यभिचारमाह—आत्मादौ चेति । § 644

अत्र वार्त्तिककारोऽस्पर्शवत्त्वस्य हेतोः प्रश्नपूर्वकं स्वरूपं निष्कर्षति—किं पुनस्तत् अस्पर्शत्वं शब्दाद् भिन्नत्वमित्यर्थः । सत्ताविशेषणो वा समवायः, समवायविशेषणा वा सत्ता, अन्वयव्यतिरेकाभ्यामित्यर्थः । वाक्यार्थे च पदप्रयोगः अस्पर्श इति श्रोत्रियपदवदित्याह—वाक्यार्थेति । अनैकान्तिक इति लक्षणमिति पक्षे चोदयति—अतिदेशेति । यदि हि क्वचित् शास्त्रप्रदेशे अनैकान्तिकः कथितः, तद्देशातिलङ्घनेनात्रातिदिश्यमानो विदितरूप इह सव्यभिचारं लक्षयेत्, न त्वस्य शास्त्रप्रदेशे क्वचिदपि कीर्तनमस्तीत्यर्थः । परिहरति—नेदमिति लोकप्रसिद्धत्वेनोक्तप्रायमित्यर्थः । अन्वयेनैवोभयान्तसन्नियतोऽनैकान्तिक इति मन्वानः शङ्कते—अव्यापकत्वादिति । परिहरति—नेति । व्यावृत्तीति । क्वचिदन्वयस्योभयान्तसंनियतता क्वचिद् व्यतिरकस्येत्यर्थः । एकेषां मतमुपन्यस्यति—अपरेत्विति । दूषयति—तैस्त्विति । नोदारहणे व्यभिचाराल्लक्षणव्यभिचारो भवत्यन्यत्वात् । नो खलूदाहरणमाद्रियन्ते परीक्षकाः, किं तु लक्षणमित्यर्थः ॥ ५ ॥ § 645

## सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ १ । २ । ६ ॥ § 646

पृच्छति—कोऽस्य सूत्रस्येति । न खलु हेतुरचेतनः सिद्धान्तमभ्युपगच्छति । यश्चाभ्युपगच्छति चेतनो नासावन्यतमेन हेतुलक्षणेन युज्यते इति न हेत्वाभासः । न च पक्षः सिद्धान्त इति तद्विरोधी न विरुद्धः स्यादिति भावः । उत्तरम्— अभ्युपगतार्थविरोधी विरुद्धः । हेतुद्वारेण पुरुषस्याभ्युपगमो हेतावुपचरितः । अभ्युपगमविषयमात्रविवक्षया च सिद्धान्तशब्दः प्रयुक्तो न पुनः सिद्धान्त एवेह विवक्षितः । तेन पक्षोऽभ्युपगमविषय इति तद्विरोधी
294/tha हेत्वाभासः संगृहीतो भवति । विशेषविरुद्धस्य च न हेत्वाभासतेत्युक्तं भवति । न हि विशेषोऽभ्युपगमस्य विषयः, न खल्वयं प्रतिज्ञापदगोचरः, किन्तु प्रतिज्ञार्थस्य सिद्ध्यनुषङ्गीति नाभ्युपगमगोचर इति भावः । ईदृशस्य सूत्रव्याख्यानस्य फलमाह—एवं चेति । ईदृशं व्याख्यानमन्तरेणानुक्तस्य विरुद्धस्येत्यर्थः । अभ्युपगतेन वा बाध्यत इति, स्वरूपेण हेतुत्वेन वेत्यर्थः । तदनेन तं विरुणद्धीत्यादि भाष्यं व्याख्यातम् । चोदयति— नन्वेवमिति । यदि

१ रीत्यादिति ] °व्यापकवैप°nvt-C
३ चैभिरेव ] अप्येषnvt-C
४ नु ] ननु चnvt-C
१७ नेति ] नेति*Om*nvt-C
२६ च ] °मात्र° &च*Om*nvt-C
३२ वा ] वा*Om*nvt-C

हेतुत्वबाधाद् विरुद्ध इत्युक्तः, हन्त, सव्यभिचारादयोऽपि विरुद्धाः । तेषामपि हि हेतुत्वं बाधितम् । अबाधे वा न हेत्वाभासा इति भावः । परिहरति—सत्यमेक एवेति । *ईदृशाविरुद्धत्वेन तुल्यत्वेऽप्यवान्तरभेदविवक्षया पञ्चत्वम् । यथा प्रमाणादीनां प्रमेयत्वेन तुल्यत्वेऽपि प्रमाणप्रमेयादीनामवान्तरभेदविवक्षया षोडशत्वम् यथा वा तृणविशेष एवासाधारणतया तृणोलप इत्याख्यायत एवं विरुद्धविशेष एवासावनैकान्तिकादिर्विरुद्धानैकान्तिकादिपदवाच्य इत्यर्थः । § 647

अत्रोदाहरणभाष्यम्-यथा सोऽयं विकार इति । महदहङ्कारपञ्चतन्मात्रैकादशेन्द्रियभूतसूक्ष्ममहाभूतानि विकारः, तस्य व्यक्तिः धर्मलक्षणावस्थापरिणामः, तस्मादपाय इति । अत्र हेतुः नित्यत्वप्रतिषेधादिति । तस्य व्याख्यानम्—न नित्यो विकार उपपद्यत इति । अपेतोऽपि विकारोऽस्ति विनाशप्रतिषेधात् । सोऽयं नित्यत्वप्रतिषेधादिति हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते । एतदेव प्रश्नपूर्वकं विभजते—कथमित्यादिना । विरोधस्य द्व्याश्रयत्वात् सिद्धान्तेन विरुध्यते इत्यभिसन्धाय सिद्धान्तं व्याहन्तीत्युक्तमित्यर्थः । तदेतद् भाष्यं व्याचष्टे—उदाहरणमिति । ननु नित्यत्वप्रतिषेधादिति हेतुर्विनाशप्रतिषेधेन सिद्धान्तेन विरुद्ध इति ब्रुवाणः शास्त्रविरोधमापादयति । तथा च कालात्ययापदिष्टो हेत्वाभासो न विरुद्ध इत्यत आह—एते ते वाक्ये परस्परार्थबाधिते इति । दृढतरप्रमाणबाधितो 295/tha हि हेतुः कालात्ययापदिष्टो भवति, यथा ब्राह्मणेन सुरा पेया द्रवद्रव्यत्वात् क्षीरवदित्ययं हेतुः ।

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।
यथैवैका तथा सर्वा न पेया ब्रह्मवादिभिः ॥ § 650

इत्यादिभिरागमैरतिदृढैर्बाधितः कालात्ययापदिष्टतया हेत्वाभासो भवति । प्रकृते तु वाक्ये परस्परविरुद्धार्थतया न प्रतिष्ठां लभेते, न पुनरन्यतरदन्यतरेण शक्यं बाधितुं द्वयोस्तुल्यबलत्वात् । तस्मात् नायं कालात्ययापदिष्ट इत्यर्थः । § 651

व्याख्यानान्तरमाह—प्रतिज्ञाहेत्वोर्वाविरोध इति । सोऽयं विकारो व्यक्तेरपैतीति प्रतिज्ञा नित्यत्वप्रतिषेधादिति हेतुना विरुध्यते । व्यक्तिमात्रादपैति, न तु विनश्यतीति हि प्रतिज्ञार्थः अपेतोऽप्यस्ति विनाशप्रतिषेधादित्यनेन व्याख्यातः । तथा च व्यक्तेरपैतीत्यनेन विकारस्य नित्यत्वं प्रतिज्ञातं नित्यत्वप्रतिषेधादित्यनेन हेतुना विरुद्धं भवति । स्वसिद्धान्तेनेति स्वपक्षेणेत्यर्थः । अत्र चार्थे सुगमं भाष्यम् । अत्र वार्त्तिककारः चोदयति—ननुप्रतिज्ञाविरोध इति । प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोध इत्यर्थः । परिहरति—नैष दोष इति

---

१ न्त ] विरुद्धो हेतुःnvt-C
३ * ] तादृश°nvt-C
५ त ] °लपतया व्याख्या°nvt-C
१४ न्धाय ] इत्यभिसंधाय*Om*nvt-J
१६ इति ] विरुध्यत इत्येवंnvt-C
१८ एते ] एते तेnvt-C

। प्रतिज्ञाश्रितत्वं विरोधस्य विवक्षित्वा निग्रहस्थानेषु प्रतिज्ञाविरोधस्योपादानम्, हेत्वाश्रितत्वं तु तस्यैव विरोधस्य विवक्षित्वा हेत्वाभासेऽन्तर्भाव इति । यदा प्रतिज्ञया हेतुविरोध इति हेतोरप्यन्यतरासिद्धतया प्रतिज्ञया तुल्यबलत्वाभिप्रायम् । यदा तु हेतुरुभयसिद्धो भवति, तदा हेतोर्वा प्रतिज्ञाविरोधकत्वमिति । उपसंहरति—अत इति । हेतोर्विरोधोदाहरणम् विरोधकत्वं विरोधः । शब्दस्योत्पत्तिधर्मकत्वं प्रमाणविनिश्चितं नित्यत्वप्रतिज्ञां बाधत इत्यर्थः । प्रसङ्गाद्धेत्वाभासातिरिक्तस्य प्रतिज्ञापदयोर्विरोधस्य निग्रहस्थानस्योदाहरणमाह—प्रतिज्ञाविरोधस्येति । तृतीयेऽध्याये चैष विरोध उपपादयिष्यते । हेतोरन्यतरासिद्धतया समानबलयोः प्रतिज्ञाहेत्वोर्विरोधोदाहरणं गुणेति । हेतुविरोधोदाहरणं नास्त्येको भाव इति । उत्पत्तिमत्त्वं ह्यन्यतरासिद्धमपि
296/tha शक्यसाधनमिति प्रतिज्ञार्थं व्याहन्ति, समूहे भावशब्दप्रयोगादिति *तु उभयसिद्धमेव प्रतिज्ञार्थं व्याहन्तीत्येतावता भेद इत्यर्थः ॥ ६ ॥ § 652

## यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ १ । २ । ७ ॥ § 653

प्रकरणशब्दार्थमाह भाष्यकारः—विमर्शाधिष्ठानाविति । विमर्शः संशयः । तस्य विषयौ । अनवसितौ अनिर्णीतौ, तादृशयोरेव पक्षप्रतिपक्षशब्दवाच्यत्वात्, प्रक्रियते साध्यत्वेनाधिक्रियत इत्यनया व्युत्पत्त्या प्रकरणम् । चिन्तापदं व्याचष्टे—तस्य प्रकरणस्य चिन्ता विमर्शात् प्रभृति प्राग् निर्णयात् समीक्षणम् आलोचनं जिज्ञासा । सा खलु तत्त्वानुपलब्ध्या कृता । *नो खल्वयं नित्यधर्मान् नित्यत्वाविनाभाविनोऽनित्यधर्मान् वा अनित्यत्वाविनाभाविन उपलभमानस्तत्र सन्दिग्धे तद् वा जिज्ञासते । सैव नित्यधर्मानुपलब्धिरनित्यधर्मानुपलब्धिर्वा विचित्राभिसन्धितया वादिना निर्णयायापदिश्यमाना प्रकरणसमो हेत्वाभासः । कुतः ? उभयपक्षसाम्यात् यथा नित्यत्वपक्षेऽनित्यधर्मानुपलब्धिरेवमनित्यत्वपक्षेऽपि नित्यधर्मानुपलब्धिः । सेयं तत्त्वानुपलब्धिमात्रविवक्षयोभयपक्षसमा, प्रकरणसमा तु यथाप्रकरणमनिश्चायकमेवमियमपीत्यर्थः । *व्युत्पत्तिनिमित्तमात्रं चैतत् प्रकरणसमपदस्य, प्रवृत्तिनिमित्तं तु सत्प्रतिपक्षत्वम्, अन्यथानैकान्तिकस्यापि प्रकरणसमत्वप्रसङ्गादिति । प्रज्ञापनं प्रज्ञाप्यतेनेनेति व्युत्पत्त्या निदर्शन मुक्तम् । § 654

अनैकान्तिकत्वशङ्कां सत्प्रतिपक्षस्यास्य व्यवच्छिनत्ति—यत्र समान इति, संशयेन समः अनिश्चायकत्वादिति । एतदुक्तं भवति, न हि नित्यधर्मानुपलब्धिरुभयसिद्धे नित्येऽस्ति, येन सव्यभिचारो भवेत्, नाप्यनित्यधर्मानुपलब्धिः

४ तु ] यदिnvt-C
८ ते ] द्र॰ टी. ३ । १ । १
११ * ] तु*Om*nvt-C
१७ या ] अनया*Om*nvt-C
१९ * ] नैव खल्व°nvt-C
२१ द् ] तच्चnvt-C
२२ वादिना ] वादिनांnvt-C
२६ * ] °निमित्त°nvt-J
२९ स्यास्य ] अस्य*Om*nvt-C

उभयसंमतेऽनित्येऽस्ति येन सव्यभिचारो भवेत् । अपि तु परस्परमनयोः 297/tha
सत्प्रतिपक्षतयैव हेत्वाभासत्वमिति । यस्मात् प्रकरणचिन्तेत्युक्तं सूत्रकृता, तत्र यस्मादर्थं प्रश्नपूर्वकं दर्शयति वार्त्तिककारः—कस्मादिति । कारणत्वं तत्त्वानुपलब्ध्येर्व्यतिरेकेण दर्शयति—यस्मादिति । अत एवेति तत्त्वानुपलब्धेरित्यर्थः । चोदयति—नन्वयमिति । पक्षप्रतिपक्षौ हि प्रकरणम् । तौ च साध्यौ । ताभ्यां च समः साध्यसमः । तथा च साध्यसमात् हेत्वाभासात् न पृथग् निर्देश्यः प्रकरणसम इत्यर्थः । परिहरति—नाविशिष्ट इति । यद्यपि प्रकरणसमशब्दो व्युत्पत्त्या साध्याविशिष्टेन समानार्थः, तथापि प्रवृत्तिनिमित्तमस्य सत्प्रतिपक्षत्वम् । न च तत्त्वानुपलब्धिः स्वयमसिद्धा, सा ह्युपलम्भनाभावेन सुलभेति भावः । § 655

परमतमनुभाष्यातिप्रसङ्गापादनेन दूषयति—ये तु संशयहेतुत्वादिति । चोदयति—समूह इति । यस्मिन् सति भवत्येव तत् कारणम्, समूहे सति च भवत्येव नैकैकस्मिन्, तस्मात् नैकैकं कारणमिति भावः । परिहरति—समूहः कारणमितीति । न ह्यकारणानां समूहः कारणं भवितुमर्हति, अतिप्रसङ्गात् । न च समूहिवैलक्षण्यमन्तरेणाजानतः समूहस्य वैलक्षण्यम् । तस्मात् समूहिन एवान्योन्यसमवधानवन्तः कारणम् । तथा च प्रत्यक्षस्योपपन्नं संशयकारणत्वम् । न च यस्मिन् सति भवत्येव तत् कारणम्, अपि तु यस्मिन् सत्येव, न त्वसतीति क्षणभङ्गे वक्ष्याम इति । § 656

ननूभयधर्मानुपलब्धिरुभयपक्षसाधारणीति सव्यभिचार एवेत्यत आह—उभयधर्मानुपलब्धाविति । नोभयधर्मानुपलब्धिरत्र हेतुः, अपि तु एकधर्मानुपलब्धिः । न चासौ साधारणी, किन्तु सत्प्रतिपक्षेत्यर्थः । उभयविशेषानुपलब्धेः प्रकरणसमत्वेन अभिधानाशक्यत्वात् । प्रकरणसमस्योदाहरणान्तरं दूषयति— शरीरादन्यत्वं त्विति । परेषां किलोदाहरणं नित्य आत्मा शरीरादन्यत्वाद् आकाशवदिति । तत्र शरीरादन्यत्वमुपलभमानो यदा तत्त्वं नित्यत्वमात्मनः प्रत्येति न हि तदा जिज्ञासितुं नित्यत्वं प्रवर्तते । यदा तु तत्त्वं 298/tha
नित्यत्वं नोपलभते शरीरादन्यत्वमुपलभमानोऽपि तदा प्रवर्तते । तस्मादन्वयव्यतिरेकाभ्यां तत्त्वानुपलब्धिरेव प्रकरणचिन्ताप्रवर्तिका न शरीरादन्यत्वम् । तस्मात् नैतत् प्रकरणसमस्योदाहरणम् । अपि तु तत्त्वानुपलब्धिरेव । इतश्चैतन्न प्रकरणसमस्योदाहरणमित्याह—शरीरादन्यत्वं चानैकान्तिकम् । उपसंहरति—अतश्च न सूत्रार्थः न सूत्रविषयः । एवमन्यान्यपि सत्प्रतिपक्षोदाहरणान्यूहनीयानि ॥ ७ ॥ § 657

## साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥ १ । २ । ८ ॥

§ 658

---

७ म ] निर्देशः प्रकरणसमस्यnvt-C
१३ त्येव ] °त्येवेतिnvt-C
१८ ङ्गे ] ३'२'१०-१७
२० त्र ] अत्र*Om*nvt-C

अत्र साध्यसम इति लक्ष्यनिर्देशः । साध्याविशिष्ट इति लक्षणम् । तदनेन स्वरूपासिद्धैकदेशासिद्धाश्रयासिद्धान्यथासिद्धानां संग्रहः, तेषामसिद्धत्वेन साध्याविशिष्टत्वात् । अत्र चासिद्धः साध्यसम इति वक्तव्ये साध्याविशिष्टग्रहणमन्यतरासिद्धस्यापि सिद्धेः प्रागहेतुत्वज्ञापनार्थम् । अन्यथात्यन्तासिद्ध एव साध्यसमो नान्यतरासिद्धः, तस्य कदाचित् सिद्धेरिति भ्रान्तिः स्यात् । साध्याविशिष्टेन तु सोऽपि संगृहीत इति । नन्वेवं साध्याविशिष्टत्वेनान्यतरासिद्ध एव स्यात् नेतरे, तेषामसिद्धत्वेन साध्याविशेषाभावादित्यत उक्तं सूत्रकृता साध्यत्वादिति । यदि हि साध्यं नासिद्धं भवेत् साध्यत्वादेव च्यवेत, न खलु सिद्धं साध्यते । तस्मात् साध्यत्वादसिद्धता । सा च कस्यचित् सर्वदा, कादाचित्की कस्यचिदिति सर्वेषामविशिष्टत्वमिति नाव्याप्तिः । नापि साध्यत्वस्यातिप्रसक्त्यातिव्याप्तिः हेत्वाभाससामान्यलक्षणापेक्षत्वात् तद्विशेषलक्षणस्येति सूत्रार्थः । साधनीयत्वादिति भाष्यगतं न साध्यत्वादित्यस्य व्याख्यानम्, अपि तु गतिमत्त्वस्यासिद्धत्वपरम् । § 659

299/tha

अत्र वार्त्तिककारः सूत्रार्थं व्याचष्टे—साध्येनाविशिष्टो य इति । साध्येन व्यभिचारो मा भूदित्यत आह—साधनधर्म इति । हेत्वाभाससामान्यलक्षणयोगे सति एतल्लक्षणमिति न व्यभिचार इति भावः । अत्र भाष्यकारेण स्वरूपासिद्धाश्रयासिद्धान्यथासिद्धानां साधारणमुदाहरणमुक्तम्—द्रव्यं छाया गतिमत्त्वादिति । तद्विभजते वार्त्तिककारः द्रव्यं छायेति । अत्र स्वरूपासिद्धतां तावदाह—यथैवेति । आश्रयासिद्धतामवतारयितुं गतिमत्त्वं छायायाः पश्चावयवेन वाक्येन साधयति— गतिमत्त्वमिति । आश्रयासिद्धतामाह—नाश्रयासिद्धत्वादिति । सत्या एव छायाया देशान्तरे दर्शनाद् योऽस्या गतिमत्त्वमनुमिनोति तं प्रत्याश्रयासिद्धं देशान्तरे दर्शनम्, तदाश्रयस्यासिद्धत्वात् । तदिदमुक्तम्—सति द्रव्याभाव इति, सति सत्त्व इत्यर्थः । न तावत् छाया सामान्यविशेषसमवायान्तर्भूता तस्यानित्यताभावात् । नापि कर्म, संयोगविभागासमवायिकारणत्वाभावात् । न गुणो द्रव्यासमवायात् । न मनोदिक्कालगुणः, तद्गुणानामप्रत्यक्षत्वात् । नाप्यात्मगुणो बाह्येन्द्रियप्रत्यक्षत्वात् । नापि नभोनभस्वतोः, तद्गुणानामचाक्षुषत्वात् । नापि तेजसः, तद्विरोधित्वात् तत्सहचरितगुणान्तरानुपलब्धेश्च । अत एव न पृथिवीपाथसोरपि । अपि च तद्गुणश्चाक्षुषो नालोकमन्तरेण शक्यग्रहः । छाया तु तमन्तरेण गृह्यते, तस्मिंस्तु सति न गृह्यते इति दुर्घटम् । नापि द्रव्यम्, तद्धि पृथिव्यादीनामन्यतमम् भवेद् अन्यद् वा दशमम् । न तावदन्यतमम्, तद्गुणानामनुपलब्धेः, नाप्यन्यद् रूपवदिति युज्यते, तस्याद्रव्यस्य प्रत्यक्षत्वानुपपत्तेः, अस्पर्शवत्वादनारम्भकत्वेनानेकद्रव्यत्वाभावात् । तस्माद् भाभाव एव छाया न तु सतीति सिद्धम् । § 660

६ सोऽपि ] गृह्यते nvt-C
८ कृता ] सूत्रकृता nvt-J
२० तामाह ] °सिद्धमाहnvt-C
२२ त्वात् ] °श्रयासिद्ध°nvt-C
२४ ताभावात् ] अनित्यत्वात् तस्याःnvt-C

यस्तु मन्यते मा भूत् छाया सती, भवतु भाभावः तथापि नाश्रयासिद्धता देशान्तरदर्शनस्य भाभावाश्रयत्वादेवेति तं प्रत्यभ्युपेत्यान्यथासिद्धतया साध्यसमत्वमापादयति—अभ्युपेत्येति । स्वाभाविको हि संबन्धो हेतोः साध्येन सहानुमानाङ्गं नौपाधिक इति विवेचितमनुमानलक्षणे । तदयमन्यथासिद्ध औपाधिकसंबन्धो भवति हेत्वाभासः । सेयं हेतोरसिद्धिर्द्विधा स्वरूपतो 300/tha
हेतुत्वेन च । स्वरूपतोऽपि द्वेधा, स्वत आश्रयासिद्ध्या च । न चैतावता सव्यभिचारादीनामपि हेतुत्वासिद्धेरसिद्ध एवान्तर्भावः सव्यभिचारत्वादिविशेषणेन तेषामतो भेदात् । अन्यथासिद्धस्य तु तद्विशेषणत्वायोगिनो हेतुत्वासिद्धिमात्रेण साध्यसमेऽन्तर्भाव इति सर्वमवदातम् । संकलयति—सोऽयमिति । त एतेऽसिद्धभेदा उदाहरणभेदेष्वपि द्रष्टव्याः, यथा नित्यःशब्दः चाक्षुषत्वादिति स्वयमसिद्धः । तनुभुवनादीनां न कर्ता ईश्वरोऽशरीरत्वादित्याश्रयासिद्धः । स श्यामो मैत्रतनयत्वात् परिदृश्यमानमैत्रतनयस्तोमवदित्यन्यथासिद्धः, अन्नपानपरिणतिभेदनिबन्धनत्वात् रूपभेदस्यान्यथासिद्धत्वमिति । अयमप्यसिद्धत्वात् इति भाष्ये अपिशब्देनाश्रयस्य छायाया अपि सत्तेनासिद्धिः सूचिता । § 661

अत्र भदन्तेन इदं साध्यसमलक्षणमुदाहरणान्तरं कल्पयित्वा दूषितम् । इदं किलास्योदारहणम्, नित्यः शब्दोऽस्पर्शत्वाद् बुद्धिवदिति । तदेतत् त्रिधाप्यसिद्धं न भवतीति दूषयित्वा भदन्तेन शङ्कितम्, अथ साध्येनाविशिष्टो दृष्टान्तो यस्मिन् स साध्याविशिष्टो हेत्वाभास इति बुद्धेर्दृष्टान्तस्य नित्यत्वेनासिद्धत्वात् इत्याशङ्क्य बहुव्रीह्यभावेन दूषितम् । तदेतत् सर्वमनभ्युपगमेन वार्त्तिककारो दूषयति— नित्यः शब्द इति । यद्येतत् नोदाहरणं किमुदाहरणं को वा सूत्रार्थ इत्यत आह—यथा त्वस्माभिरिति । अयं भदन्तोक्तो दोष इत्यर्थः । कस्मादित्यत आह—भदन्तेन सूत्रार्थो न विज्ञातः, न हि सव्यभिचारोऽनेन लक्ष्यते येन सव्यभिचारमस्पर्शवत्त्वमस्योदाहरणं स्यात्, किं तु साध्यसमः । नापि व्यधिकरणबहुव्रीहिदूषणेनाक्षरार्थो ज्ञातः । नापि बुद्धिवदिति दृष्टान्ताभासमेव हेत्वाभासं कुर्वता हेत्वाभासदृष्टान्ताभासौ ज्ञातौ भदन्तेनेत्यर्थः ॥ ८ ॥ § 662
301/tha

## कालात्ययापदिष्टः कालातीतः ॥ १ । २ । ९ ॥ § 663

अत्र कालालीत इति लक्ष्यनिर्देशः कालात्ययापदिष्ट इति लक्षणम् । हेतोरपदेशस्य हि साध्यसन्देहविशिष्टः कालः । यथाहुः— § 664

नानुपलब्धे न निर्णीते न्यायः प्रवर्तते, अपि तु सन्दिग्धे इति । परेऽप्याहुः

४ णे ] पृः १३३. २०
१० नित्यः ] अनित्यः nvt-J
११ त्वादिति ] अयम् nvt-C
१४ छायाया ] अपि *Om* nvt-C
१७ दिति ] इति *Om* nvt-C
३१ इति ] द्रः भा. १. १. १.

सन्दिग्धे हेतुवचनात् ।§ 666

इति । यत्र च प्रत्यक्षानुमानागमविरोधः, अनुष्णोऽग्निर्द्रव्यत्वादिति च, अश्रावणः शब्दो गुणत्वादिति च, शुचि नरशिरःकपालं प्राण्यङ्गत्वादिति च, स सर्वः प्रमाणतो विपरीतनिर्णयेन सन्देहविशिष्टं कालमतिपततीति सोऽयं कालस्यात्ययेनापदिश्यमानः कालातीत इति । तथा चोदाहृतं

यत्तु प्रत्यक्षागमविरुद्धं न्यायाभासः सः ।§ 667

इत्यत्र वार्त्तिककृता । बाधाविनाभावयोः सहासंभव इति चात्र बौद्धानामाक्षेपोऽस्माभिः समाहितः । एवं व्यवस्थिते भाष्यकारः सूत्रं स्वपरमतश्लिष्टं व्याचष्टे—कालात्ययेन संशयकालात्ययेन युक्तो यस्य हेतोरपदिश्यमानस्यार्थैकदेशः धर्मविशिष्टो हि धर्मी हेतोरपदिश्यमानस्यार्थः । स ह्यर्यते हेतुना, तस्यैकदेशः साध्यधर्मः । स हि धर्मिणि बलवता प्रमाणेन तद्विपरीतधर्मनिर्णयं कुर्वता संशयकालमतिपातितः । स तादृशो हेतुः कालात्यापदिष्टः कालातीत इति । स्वमतेनास्यार्थः । अत्र च पूर्वमेवोदाहृतमिति पौनरुक्त्यात् नोदाहृतम् । § 668

परमते च कालात्ययेन युक्तो यस्य हेतोरर्थरूप एकदेशो हेतुविशेषणमिति यावत् स कालात्ययापदिष्ट इति योजना । परमतेनैव निदर्शनमाह—निदर्शनमिति । नित्यत्वं चात्रावस्थानमात्रमभिमतमिति, न घटादिभिरालोकसंयोगव्यङ्ग्यैर्व्यभिचारः । तदेतत् पञ्चावयवं वाक्यमुपन्यस्य संयोगव्यङ्ग्यत्वस्य
302/tha हेतोरेकदेशस्य विशेषणस्य संयोगस्य व्यक्तिकालात्ययेन हेत्वाभासतामाह—अयमहेतुरिति । स पुनरयमसिद्धविशेषणतया हेत्वाभासः साध्यसम एवेति न पृथग्वाच्य इति स्थूलतया एष दोषो भाष्यकारेण नोद्भावितः । § 669

यत् पुनः भदन्तेन कालातीतस्य व्याख्यानं कृतं प्रतिज्ञानन्तरं हि हेतोः कालः । तमतीत्य हेतुः पश्चादपदिश्यमानः कालातीतो भवति । तद् यथा, अनित्यः शब्दः घटादिवदित्युक्ते कस्मादित्यनुयुक्तो हेतुं ब्रूते कृतकत्वादिति स कालातीत इति । तच्चैवं तेन दूषितम्—किं निराकाङ्क्षे वादिनि एष प्रतिवादिनः प्रश्नः, आहो साकाङ्क्षे ? यदि निराकाङ्क्षे तदा न्यूनमेवास्य निग्रहस्थानम्, न हेत्वाभासस्तस्याप्रयोगात् । प्रयुक्तो हि हेतुस्तदाभासो वा स्यात् नाप्रयुक्तः । अथ साकाङ्क्ष एव वादिनि प्रतिवादिनः प्रश्नः, तथापि पश्चादप्यसौ हेतुः प्रयुक्तो हेतुरेव, न ह्यसौ तदा न स्वसाध्याविनाभूतोऽपक्षधर्मो वेति । तस्मात् न कालातीतो नामास्ति हेत्वाभास इति । तदेतद् भदन्तदूषणमेतद्व्याख्यानानभ्युपगमेन परिहरति—अवयवविपर्यासवचनं त्विति । अन-

६ देशः ] यस्यार्थैक°nvt-C
७ स ] अर्थ्यतेnvt-C
११ ते ] तुnvt-C
११ रूप ] अनुरूपःnvt-C
१३ न ] अन्यथा *for*नnvt-C
२० नुयुक्तो ] हेतुं*Om*nvt-C
२१ किं ] विरतेnvt-J

भ्युपगमहेतुं पृच्छति—कस्मादिति । उत्तरम्—यस्येति । अर्थेन सामर्थ्येन संबन्धोऽर्थसंबन्धः । अपि च पौनरुक्त्यादपि नाभ्युपगम्यत इत्याह—अवयवेति । § 670

यस्यापदिश्यमानस्य इत्यादि पुनरुच्यत इत्यन्तं वार्त्तिकं भाष्यव्याख्यानेनैव व्याख्यातम् । शङ्कते—समीकृतेऽभिधानादिति । अयमर्थः, नैतदप्राप्तकालेन निग्रहस्थानेन पुनरुक्तम्, अपि तु हेत्वाभास एव । स ह्यवयवविपर्यास उच्यते यत्रैकग्रन्थेनैव वादी प्रतिज्ञोदाहरणादि प्रयुज्य पश्चात् हेतुं प्रयुङ्क्ते, एष तु प्रतिज्ञोदारहणे प्रयुज्य विरतः प्रतिवादिनानुयुक्तः पश्चात् हेतुं प्रयुङ्क्ते । तस्मात् न्यूनतादूषणेन पक्षे समीकृते पक्षमात्रतां नीते सिद्धव्यवस्थातः प्रच्याविते पश्चादभिधानात् हेतोरेष कालातीतो हेत्वाभासः, न पुनरप्राप्तकालम् । निग्रहस्थानमिति चेदिति । निराकरोति—केनेति यदि हेत्वनभिधानेन न्यूनतया समीकृतः पक्षः किमत्र हेतोरसामर्थ्यम् ? न 303/tha
ह्यन्यदोषेणान्यो युज्यत इत्यर्थः । शङ्किता ब्रूते—एतदस्येति । निराकरोति—नैतदिति । न्यूनतया निगृहीतो यदि पश्चादभिधानेन निग्रहीतव्यः, ततो वाद्येव निगृह्यतां न त्वयं पश्चादभिहित इति समर्थः शक्यो हेतुर्निग्रहीतुमिति नायं समीकृताभिहितत्वेनापि हेत्वाभास इत्यर्थः । उभयनिराकरणमुपसंहरति—तस्मादिति ॥ ९ ॥ § 671

## १.२.३ छललक्षणप्रकरणम्

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ १ । २ । १० ॥
§ 672

उद्देशक्रमानुरोधेन लक्षणक्रमस्य हेत्वाभासानन्तरं छलस्योद्देशात् छललक्षणस्यापि हेत्वाभासलक्षणानन्तर्यमाह भाष्यकारः-अथछलम् । § 673

वच—लम् । यथा वक्तुरभिमतोऽर्थः ततो विरुद्धः अर्थ स्तस्य विकल्पः कल्पना, सैवोपपत्तिस्तया । अथ लक्षणान्तर इव छलस्य सामान्यलक्षणे कस्मादुदाहरणं न दीयत इत्यत आह—न सामान्यलक्षणे इति । सामान्यविशेषवत् सर्वमुदाहरणम्, निर्विशेषस्य सामान्यस्यासत्त्वेन केवलस्य सामान्यस्योदाहरणमशक्यमित्यर्थः । विभागे त्विति । विभज्यत इति विभागो विशेषलक्षणम्, तस्मिन् उदाहरणानि ॥ १० ॥ § 674

तत् त्रिविधं वाच्छलं सामान्यच्छलमुपचारच्छलं च ॥ १ । २ । ११ ॥ § 675

---

५ स्य ] कल्पः nvt-J
६ इव ] °न्तरवत् nvt-C

छलसामान्यलक्षणमभिधाय तद्विशेषलक्षणान्यभिधातुं प्रथमं तावत् न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागलक्षणसूत्रमवतारयति—विभागश्चेति । विभज्यतेऽनेति विभागः सूत्रमुच्यते—तत् त्रि—च । § 676
304/tha

## अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १ । २ । १२ ॥ § 677

तत्र च विशेषलक्षणमवतारयति तेषां छलानां मध्ये वाक्छलं लक्ष्यते—अवि—लम् । नवः कम्बलोऽस्येति एकत्र विग्रहः, नव कम्बला अस्येति अपरत्र इति विग्रहे विशेषः । वाक्छलशब्दार्थं व्युत्पादयति—वाचि निमित्ते छलं वाक्छलमिति । नवकम्बल इत्युभयत्रापि समानायां वाचि निमित्तभूतायामित्यर्थः । तदेतच्छलं पराजयावस्थायां जल्पे प्रयोक्तव्यमित्युक्तम् । परवाक्ये पर्यनुयोगोऽस्येति चोक्तम् । तदत्र यथा पर्यनुयोगः, तथा दर्शयति शिष्यहिततया भाष्यकारः—अस्य प्रत्यवस्थानमिति । *उभयार्थप्रतिभाने संभवत्पदार्थपरित्यागेनासंभवत्पदार्थकल्पनमयुक्तमित्यर्थः । § 678

अथ प्रयोक्तापि कथं साधारणेन शब्देनार्थविशेषं बोधयति ? अबोधयंश्च कथं प्रतिपादको नाम इत्यत आह—प्रसिद्धश्चेति । संबन्धस्वरूपमाह अभिधानाभिधेययोर्या नियमः, अयमेव शब्दोऽस्यैवार्थस्येति । तत्र यः पुरुषस्य नियोगः अस्मादयमेव बोद्धव्य इत्येवमाकारः । किमतो यद्येवमित्यत आह— प्रयुक्तपूर्वाश्चेति । तथापि किमित्यत आह—प्रयोगश्चेति । तामिमां भूमिरचनां प्रकृते योजयति—तत्रैवमर्थगत्यर्थ इति । एतदुक्तं भवति, न सङ्केतकरणावस्थायां वृद्धव्यवहारे वा कश्चित् शब्दः कञ्चिदर्थं शृङ्गग्राहिकया बोधयति, अपि तु सामान्यद्वारेणार्थप्रकरणादिसहकारी विशेषे वर्तते । तस्मात् नैष प्रतिपादयितुरपराधो यदेष विशेषशब्दैर्विशेषं न प्रतिपादयति, किन्तु सङ्केतस्यापराधो यो विशेषमपहाय सामान्ये शब्दानां वर्तते । तस्माद् यथासङ्केतं बोधयन् नापराध्यः प्रयोक्तेति सिद्धम् । सामर्थ्यमेव दर्शयति—यत्रार्थे क्रियाचोदनेति । § 679
305/tha

स्यादेतत् । अविशेषाभिहितेऽर्थे इति न युक्तम् । न हि नवकम्बल इति पदं प्रकरणादिनिरपेक्षं कञ्चिदर्थमविशेषेणाभिधत्ते गवादिशब्दवत् । न हि संख्याविशेषे च नवीनत्वे चास्ति कश्चित्सामान्यविशेषो बाहुलेयादिष्विव गोत्वं यमभिदधीतेत्यत आह वार्त्तिककारः—सामान्यश्रुतीति । अभिहितिः अभिहितम् उच्चारणमिति यावत् । समानः शब्दो नार्थे सामान्यमित्यर्थः ।

२ ति ] विभागमव° nvt-C
८ अस्येति ] एकत्रेति nvt-J
१२ * ] प्रति *Om* nvt-J
१३ तिभाने ] असंभवदर्थकल्पनमयुक्तम् nvt-C
१७ त ] इति *Om* nvt-C
२२ न ] °शेषान् न nvt-C

अश्व इति नामपदमश्वत्वस्य वाचकम्, आख्यातपदं यदा कस्यचिदभिमुखं प्रयुज्यते अश्व इति, तदा वृद्धिं गतोऽसीति प्रतीयते । चोदयति—अविशेषेति । समानो हि शब्दोऽभिधेये संशयमाधत्ते न त्वर्थमभिधत्त इत्यर्थः । परिहरति—न प्रकरणादीन् इति । श्वेतो धावतीति इतः सारमेयो द्रुतरं याति, श्वित्री प्रक्षालयतीत्यर्थसन्देह इत्यर्थः । अर्थ इत्यस्य प्रयोजनमाह—अर्थग्रहणमिति । अविशेषश्रुतौ शब्दे सति अर्थे अर्थान्तरकल्पना, न शब्द इत्यर्थः । अस्य प्रत्यस्थानमित्यादि भाष्यं व्याचष्टे—तस्येति । सुगमम् ॥ १२ ॥
§ 680

संभवतोऽर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यच्छलम् ॥ १ । २ । १३ ॥ § 681

संभवतोऽर्थस्य ब्राह्मणविशेषस्य विद्याचरणसंपद्विषयत्वेन विद्याचरणसंपदमत्येति यत् सामान्यं ब्राह्मणत्वं व्रात्य ब्राह्मणे, तस्य ब्राह्मणत्वस्यातिसामान्यस्य योगादसंभूतार्थकल्पनया यः प्रतिषेधः तत् सामान्यच्छलम् । अहो नु खल्वयं ब्राह्मणो विद्याचरणसंपन्न इति हि स्तुत्यर्थं वाक्यमभ्यनुजानतोक्तं संभवति ब्राह्मणे विद्याचरण संपदिति *तदेतदपि वाक्यं स्तुत्यर्थमेव, न त्वस्य ब्राह्मणत्वात् हेतोर्विद्याचरणसंपद् विवक्षितेति । तत्र परो हेत्वर्थमस्याविवक्षितमारोप्य वचनं विहन्तीति तदिदं सामान्यच्छलम् । विषयानुवाद इति । संपद्विषयस्य ब्राह्मणत्व स्यानुवाद इत्यर्थः । कस्य ? 306/tha
अविवक्षितहेतुकस्य पुंसः । तदेतद् वार्तिककारो व्याचष्टे—सामान्यस्येति । विवक्षितार्थमधिगतं सामान्यमित्यर्थः । शेषं सुबोधम् ॥ १३ ॥ § 682

धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १ । २ । १४ ॥ § 683

शब्दस्य धर्मः प्रयोगः तस्य विकल्पो द्वैविध्यम् । द्विविधः प्रयोगः, प्रधानो भाक्तश्च । तत्रापि प्रधान औत्सर्गिकः, तस्य तु कुतश्चिदपवादाद् भाक्तो भवति । तदेतदाह भाष्यकारः—अभिधानस्य शब्दस्य यथार्थं प्रयोगो धर्मः औत्सर्गिकः । तत् किमयमेव ? नेत्याह—*विकल्पो द्वैविध्यम् । कोऽसौ द्वितीय इत्यत आह—उत्सर्गस्य तु कुतश्चिदपवादाद् अन्यत्र दृष्टस्यान्यत्र प्रयोगः । तदेवं *व्यवस्थितेन धर्मविकल्पेन निर्देशे वाक्ये, निर्दिश्यतेऽनेनेति व्युत्पत्त्या । तत्र भाक्तविवक्षायां मञ्चाः क्रोशन्तीति, अत्रार्थसद्भावेन प्र-

५ श्वित्री ] निर्णेक्तीत्यर्थःnvt-C
११ स्य ] °संपदाnvt-C
१३ या ] °दसद्भूतार्थ°nvt-J
१४ नु ] नु*Om*nvt-C
१५ * ] तदपिnvt-C
१७ रो ] हेतुत्व°nvt-C
१८ यानुवाद ] °र्थवादःnvt-J
१८ स्यानुवाद ] °र्थवादःnvt-J
२० म् ] शेषं सुबोधम्*Om*nvt-C
२४ वादाद् ] क्वचिद°nvt-C
२६ * ] तस्य च वि°nvt-J
२८ * ] व्यवस्थितेnvt-C

तिषेधः । तमेवार्थसद्भावमाह— मञ्चस्थाः पुरुषाः क्रोशन्ति, न तु मञ्चाः क्रोशन्तीति । वार्त्तिकमते त्वर्थसद्भावस्यैव प्रतिषेध इति व्याख्येयम् । ननु यद्यन्यत्र दृष्टस्यान्यत्र प्रयोगः, हन्त सर्वं सर्वत्र प्रयुज्येतेत्यत आह—उपचारो नीतार्थः प्रापितार्थः । सहचरणादिना निमित्तेनेति, अन्यत्र दृष्टस्यान्यत्र प्रयोगः संबन्धादेव भवतीति नातिप्रसङ्ग इत्यर्थः । न छन्दतः न छद्मनेत्यर्थः । ननु यदि भाक्ततयाप्युपपत्तिः, न किञ्चित् जल्पाकभाषितं दुष्टं स्यात् । सर्वस्यैव यथाकथञ्चिद् भाक्तत्वेनोपपत्तेरित्यत आह—प्रधानभूतस्येति । भाक्तस्येत्येतावति वक्तव्ये प्रधानग्रहणं सिद्धतया दृष्टान्तलाभाय । लोकसिद्ध एवोपचारः कर्तव्यो नापूर्वो विना प्रयोजनम्, लोकसिद्धश्चायमुपचारो मञ्चाः क्रोशन्तीत्यर्थः । § 684

सूत्रव्याख्यानपरं वार्त्तिकं धर्मविकल्पनिर्देशशब्देन सूत्रस्थेन । अभिधानं
307/tha प्रयोगः शब्दस्य धर्मो भवन् द्विधाभिधीयते । द्वैविध्यमाह—प्रधानमिति । सोऽयमभिधानाभिधेयव्यवहार इति, अभिधानं शब्दः अभिधेयो गम्यः । स च क्वचिद् वाच्यः, क्वचिद् भाक्त इत्यर्थः ॥ १४ ॥ § 685

## वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १ । २ । १५ ॥

§ 686

परीक्षापर्वणः सन्निधानात् तदर्थं लक्षणपर्वण्यपि योग्यतायै सूत्रकारः छललक्षणं परीक्षते—वाक्छ—त् । स्थान्यर्थो गुणशब्दो यो वस्तुतः स एव प्रधानशब्दः स्थानार्थ इति कल्पयित्वेति योजना । यथा हि वाक्छले नवीनार्थो नव शब्दः संख्याभेदे कल्पितस्तथेहापीति पूर्वः पक्षः ॥ १५ ॥
§ 687

## न तदर्थान्तरभावात् ॥ १ । २ । १६ ॥ § 688

सिद्धान्तसूत्रम्—न त-त् । तस्य उपचारच्छले अर्थसद्भावप्रतिषेधस्य । अर्थान्तरकल्पनातो वाक्छलादित्यर्थः । सूत्रतात्पर्यमाह वार्त्तिककारः—अविशेषादित्यस्येति । विधेयं वस्तु, मञ्चाः क्रोशन्तीत्यत्र क्रोशनं विधीयते, मञ्चा इति त्वनूद्यते । अत एव गुणे त्वन्यार्थकल्पना इति मञ्चा इत्येतदप्रधानमनूद्यतया भाक्तम् । न तु क्रोशन्तीति न विधौ परः शब्दार्थः इति न्यायात् । तदिह विधीयमानं क्रोशनमेव वस्तु प्रतिषिध्यते, नैव मञ्चाः क्रोशन्तीति छलवाक्येन । नवकम्बलो देवदत्त इत वाक्ये तु देवदत्तमनूद्य
308/tha नवत्वविशिष्टः कम्बलो विधीयते । तत्र न विधेयस्य वस्तुनः कम्बलस्य सद्भावः प्रतिषिध्यते, किन्तु तदेकदेशस्यानेकताया इति महान् भेद इति सिद्धान्तः ॥ १६ ॥ § 689

१२ र्मो ] भवन्*Om*nvt-J
१४ भाक्त ] इति सुबोधम्nvt-C
२६ ना ] °न्याय्यकल्पनाnvt-C
२७ या ] °नुवाद्यतयाnvt-J

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥ १ । २ । १७ ॥ § 690

किञ्चित्साधर्म्यात् त्रित्वाभावे द्वित्वस्याप्यभ्युपगतस्याभाव प्रसङ्गः । ओमिति ब्रुवतो वस्तुत्वेन समस्तभेदोच्छेदप्रसङ्गः । भाष्यवार्त्तिके अतिरोहितार्थे ॥ १७ ॥ § 691

॥ इति छललक्षणप्रकरणम् ॥

## १.२.४ पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम्

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १ । २ । १८ ॥
§ 693

उद्देशक्रमानुरोधेन जातिलक्षणक्रममाह भाष्यकारः—अतः छललक्षणाद् ऊर्ध्वम् । साध-तिः । प्रतीपमवस्थानं प्रत्यवस्थानम्, तथा सति छलस्य सम्यग्दूषणस्य च जातित्वप्रसङ्गः । अत उक्तम्—साधर्म्यवैधर्म्याभ्यामिति । न च छले साधर्म्यवैधर्म्ये स्तः । न च सम्यग्दूषणं साधर्म्यवैधर्म्यमात्रात्, अपि तु प्रयोगादिति । प्रयुक्ते हेतौ तदाभासे वा यः प्रसङ्गो जायते स जातिरिति । जल्पे हि वेदप्रामाण्यं विद्वांसं प्रति कुहेतुना यदा नास्तिकैरधिक्षिप्यते, सदुत्तरं चास्य यदा सहसा न प्रतिभाति, तदेश्वराणां जनाधाराणां मा भूद् वेदाप्रामाण्यबुद्धिरिति जात्यापि प्रत्यवस्थेयम्, अन्यथेश्वरचरितानुवर्त्तिनीनां प्रजानां विप्लवो भवेदिति । क्वचित् पुनरबुद्धिपूर्वमेव हेतौ हेत्वाभासे वा जातिप्रयोगः संभवति । जायमानोऽर्थः इति जातिपदव्युत्पत्तिनिमित्तं दर्शितम् । तदेतद् वार्त्तिककारो व्याचष्टे—साधर्म्येणेति । यथा पक्षे सति 309/tha
प्रतिपक्षः, एवं स्थापनायां सत्यां प्रत्यवस्थानमिति । सूत्रार्थस्तु यथाश्रुति, न पुनरुदाहरणसाधर्म्येण यथाभाष्यं बोद्धव्यः । यद्येवम् भाष्यं तर्हि कथमित्यत आह—उदाहरणार्थमिति । एवं वैधर्म्येण वेत्येतदपि । यथाश्रुति न पुनर्यथाभाष्यम् उदाहरणार्थं तदित्यर्थः । अस्य व्याख्यानस्य गुणाभिधानेन प्रश्नपूर्वकं प्रपञ्चमाह—किमर्थमिदमिति ॥ १८ ॥ § 694

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १ । २ । १९ ॥
§ 695

सूक्ष्मविषया प्रतिपत्तिर्विपरीता । स्थूलविषया च कुत्सिता, कथमसौ निग्रहस्थानमित्यत आह—विप्रतिपद्यमान इति । अप्रतिपत्तिमाह—आरम्भविषय इति । लाघवाय विप्रतिपत्त्यप्रतिपत्ती इति वक्तव्ये कस्मादसमासकरणमित्यत आह—असमासाच्चेति । विप्रतिपत्त्यप्रतिपत्तिभ्यामन्यदपि

७ तु ] प्रयोजकात्nvt-J
२१ या ] विप्रति°nvt-J

हेतूदाहरणाधिकं नाम जल्पे निग्रहस्थानमस्ति, तदपि ग्रन्थाधिक्येनावरुध्यत इत्यर्थः । आरम्भविषयेऽनारम्भ इत्यादि भाष्यम्, तद् व्याचष्टे—स्वपरार्थोत्तरासंवित्तिरिति । द्वेधा खल्वारम्भविषयेऽनारम्भो भवति, दूष्यं वा परोक्तं साधनं विप्रतिषेधहेतुं वा न प्रतिपद्यते । सेयं परार्थोत्तरासंप्रतिपत्तिः उत्तरग्रहणं साधनमप्युपलक्षयति । स्वार्थोत्तराप्रतिपत्तिस्तु साधनप्रतिषेधहेतू परकीयौ प्रतिपद्य तत् प्रतिषेद्धुं स्वकीयमुत्तरं न प्रतिपद्यत इत्यर्थः । चोदयति—स्वयं प्रयुक्ते वस्तुतः समर्थे साधने कथम् अप्रतिपत्तिर्विप्रतिपत्तिर्वेति द्रष्टव्यम् । परिहरति—तदापीति । समर्थसाधनज्ञानं साधनप्रतिपत्तिर्न साधनमात्रज्ञानमित्यर्थः ॥ १९ ॥ § 696

तद्विकल्पाज् जातिनिग्रहस्थानबहुत्वम् ॥ १ । २ । २० ॥

§ 697

सूत्रान्तरमवतारयितुं भाष्यकार आह—किं पुनरिति । यद्यपि साध- 310/tha र्म्यवैधर्म्याभ्यां दृष्टान्तस्यापि भेदः, तथापि लक्षणाभेदाभिप्रायेणाभेद उक्तः । तद्वि—त्वम् । नाना कल्प इति स्वरूपतः, विविध इति प्रकारतः । यथालक्षणमिति यथास्वरूपमित्यर्थः । § 698

अध्यायार्थं संक्षिप्याह वार्त्तिककारः—तन्त्रप्रतिज्ञेति । तन्त्रस्य शास्त्रस्य प्रतिज्ञा प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इति सूत्रम् । शास्त्रमेव हि तत्त्वज्ञानमिति । संसारः दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामिति । तन्निवृत्तिश्च संविदा उत्तरोत्तरापाये तदनन्तराभावाद् अपवर्ग इति । तस्माद् यः प्रमाणादिसूत्रेणोद्देशः, तत्परिकरो द्वितीयं सूत्रम्, द्वाभ्यामुद्देशः । शेषं सुबोधमिति ॥ २० ॥ § 699

॥ पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां प्रथमाध्याये द्वितीयाह्निकम् ॥

॥ प्रथमाध्यायः समाप्तः[१] ॥

# २ द्वितीयाध्यायः

311/tha

---

१. मङ्गलं महाश्रीः ॥ nvt-J

---

६ तिषेद्धुं ] °षेधंnvt-J

# २.१ द्वितीयाध्याये प्रथमाह्निकम्

## २.१.१ संशयपरीक्षाप्रकरणम्

अत ऊर्ध्वं प्रमाणादिपरीक्षा इत्यादिभाष्यनिराकरणीयामाशङ्कामाह वार्त्तिककारः-त्रिविधा चास्येति । स्थानवतां क्रमवताम् । परीक्षावचनमिति । प्रमाणमेव परीक्ष्यत इति युक्तमिति । किमत्रादौ प्रमाणं न परीक्षितम् ? *न परीक्षितम् । किंतु संशय एव परीक्ष्यत इत्याह—तानि विलङ्घ्येति । सोऽयं किमर्थं क्रमभेदः कृत इति भाष्यार्थमाह—परीक्षाङ्गत्वादिति । उद्देशक्रमानुरोधेन हि प्रमाणं पूर्वं लक्षितम्, न खलु लक्षणे संशयस्याति कश्चिदुपयोगः । परीक्षा तु सर्वा विमर्शकरणिकेति परीक्षापर्वणि सर्वथा आर्थक्रमेण संशयस्य पूर्वभावः, यथा अग्निहोत्रं जुहोति यवागूं पचति § 703

इत्यत्राग्निहोत्रात् प्राग्भावो यवागू पाकस्य । तस्याग्निहोत्र साधनत्वात् । संशयलक्षणं चात्र परीक्ष्यते, न संशय इति नानवस्थापि । देशयति—ननु चोक्तमिति । शास्त्रगता त्वियं परीक्षा । सा च न विमर्शपूर्वेत्यार्थक्रमाभावात् नोद्देशक्रमो बाधनीय इत्यर्थः । परिहरति—सत्यम्, न निर्णये नियम इति । न निर्णयः सर्वः संशयपूर्वः । विचारस्तु सर्व एव संशयपूर्वः । शास्त्रवादयोश्चास्ति विचार इति तेन नियतं संशयपूर्वेण भवितव्यम् । शिष्टयोश्च वादिप्रतिवादिनोः शास्त्रेण विमर्शाभावो न शिष्यमाणयोः, तस्मादस्ति शास्त्रेऽपि विमर्शपूर्वो विचार इति सिद्धम् । संशेत इति संशयस्य निरुक्तम् । नावधारयतीत्यर्थः । § 704
312/tha

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ २ । १ । १ ॥ § 705

समाना...यः । ननु यथा लक्षणार्थः पूर्वं निरूपितः, तथा निर्बीजः पूर्वपक्ष इत्यत आह—तस्य यथाश्रुतीति । परीक्षासाध्यो ह्यर्थः । तत्र व्याख्यानतो लक्षणपदेभ्यः साक्षादेव गम्यत इत्यर्थः । समानमनयोरिति साक्षात्कारं दर्शयति । § 706

न हि साक्षात् स्थाणुपुरुषावुपलभमानः समानं चानयोर्धर्मं कश्चित् संदिग्ध इत्यर्थः । व्यवच्छेदात्मकत्वादिति । न निश्चयोऽनिश्चयस्य जनकः कारणानुरूपत्वात् कार्यस्येत्यर्थः । न समानधर्माध्यवसायादेवेति संशयलक्ष-

---

४ *] परित्यक्तम्
४ त] परीक्षितः nvt-J
५ कृत] सोऽयं क्रमभेदः कुतः nvt-C
७ णिकेति] °र्शकारणेति nvt-J
१३ एव] एवं nvt-J
१४ तं] तेनापि nvt-C
१६ इति] संशीतिरिति nvt-C
२१ आह] इत्यत पूर्वपक्षबीजम् आह nvt-J

णोक्तकारणमात्रोपलक्षणपरम् । एकवृत्तित्वाच्चेति । न हि यावेवारोहपरिणाहौ स्थाणोस्तावेव पुरुषस्येत्यर्थः ॥ १ ॥ § 707

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ । १ । २ ॥ § 708

विप्र...च्च ॥ २ ॥ § 709

विप्रतिपत्तौ च संप्रतिपत्तेः ॥ २ । १ । ३ ॥ § 710

विप्रतिपत्तौ च संप्रतिपत्तेरिति । न स्वरूपविरोधाद् विप्रतिपत्तिरस्तीति ॥ ३ ॥ § 711

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ २ । १ । ४ ॥ § 712

अव्य...याः ॥ ४ ॥ § 713
313/tha

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ २ । १ । ५ ॥ § 714

तथात्यन्तसंशय इति तत्पदान्तरेण समानधर्मोपपत्त्यादेर्विशेषणमपश्यतः पूर्वपक्षः ॥ ५ ॥ § 715

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ २ । १ । ६ ॥ § 716

सिद्धान्तमाह—अस्योत्तरमिति । यथो...वा ॥ § 717

यदि हि निर्विशेषणं समानधर्मोपपत्त्यादि संशयकारणमुच्येत ततः पश्चादकरणात् पूर्वमपि न कुर्यादित्यसंशयः, पूर्वं वा करणात् पश्चादपि कुर्यादित्यत्यन्तसंशयः । न त्वसौ निर्विशेषणः संशयकारणमिति नासंशयो नात्यन्तसंशय इत्यर्थः । यथोहित्वेति भाष्ये यदप्युक्तमित्यर्थः । § 718

एतेनेति समानपदप्रयोगेण । सदृशार्थो हि समानशब्द इति पूर्वं व्याख्यातम् । यदप्येतत् सारूप्याभावात् अध्यवसायसंशययोः कार्यकारणयोरिति । विशेषानवधारणमुभयोः समानमित्यर्थः । भाष्यकारेण तु यत् सारूप्यमुक्तं तत् तथा न बोद्धव्यम् । यदि हि कार्यकारणयोरुत्पत्तिः सारूप्यम्, तदतिव्यापकं चाव्यापकं च नित्यानामपि कारणत्वात् । तस्मात् सारूप्यशब्दो न सारूप्यस्य निर्देशः, अपि तु कार्यकारणधर्मान्वयव्यतिरेकपर इत्याह—कारणसद्भावाच्चेति । अनवधारणेनैव तत्त्वानुपलब्धेरिति प्रत्युक्तम् । सत्प्रतिपक्षयोरपि मिलितयोरन्यत्रादर्शनेनासाधारण एवान्तर्भावात् । एकैकविवक्षया तु हेत्वाभासान्तरत्वमिति भावः । न चाव्यवस्थातः संशय

२२ म] १. १. २३ सूत्रीयवार्त्तिकटीके द्रष्टव्ये

इति । नासौ पृथक् कारणम्, अपि तु समानधर्मोपपत्त्यादिपरिकरत-येत्यर्थः । यत् पुनरेतत् विप्रतिपत्ताविति । विषया पेक्षया विप्रतिपत्तिः । 314/tha
स्वरूपापेक्षया तु संप्रतिपत्तिरिति । एवमव्यवस्थायामपि द्रष्टव्यम् ॥ ६ ॥
§ 719

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ २ । १ । ७ ॥ § 720

कोऽस्य सूत्रस्येति तात्पर्यप्रश्नः । उत्तरम्—स्वयमिति । संशयपूर्वकत्वात् सर्वपरीक्षाणां परिचिक्षिषमानेन संशयाक्षेपहेतुभिर्न प्रतिषेध्यव्योऽपि तु परैरेवमाक्षिप्तः संशय उक्तैः समाधानहेतुभिः समाधेयः । शास्त्रे कथायां वा वादलक्षणायामित्यर्थः ॥ ७ ॥ § 721

॥ इति संशयपरीक्षाप्रकरणम् ॥

## २.१.२ सामान्येन प्रमाणपरीक्षाप्रकरणम्

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ २ । १ । ८ ॥ § 723

अथ प्रमाणपरीक्षेत्यादि भाष्यम् । प्रत्य...द्धेः । आर्थेन हि क्रमेण संशयपरीक्षायामुक्तेनोद्देशक्रमो बाधितः । प्रमाणादिषु तु तद्बाधकारणाभावाद् उद्देशक्रमानुरोधेन प्रमेयादिभ्यः प्राक् प्रमाणान्येव परीक्षणीयानि । तत्रापि प्रथमं प्रमाणसामान्यलक्षणपरीक्षा, तत्पूर्वकत्वाद् विशेषलक्षणानाम् । तत्र सामान्यलक्षणम् उपलब्धिसाधनं प्रमाणमिति । तच्चोपलब्धिसाधनत्वं प्रत्यक्षादीनामेवेति प्रत्यक्षादीनामित्युक्तम् । § 724

तदेतदाह वार्त्तिककारः । अथेदानीमिति । परीक्षणीयं पृच्छति—किं पुनरेषामिति सर्वैरेव वादिभिः स्वसिद्धान्तव्यवस्थापनाय प्रमाणान्यभ्युपेतव्यानि, तदभावे तद्व्यवस्थानुपपत्तेः । यस्य तु स्वपक्ष एव नास्ति, नासौ लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीयः । तस्मात् सर्वप्राणभृत्सिद्धेर्न प्रमाणसामान्यं परीक्षणीयमिति भावः । उत्तरम्—आदौ तावत् संभव इति 315/tha
। न परीक्षा संशयमन्तरेणेति संशयस्य बीजमाह—सदसतोरिति । पूर्वपक्षमाह—व्युदस्य संशयमिति । अयमत्र पूर्वपक्षिणो माध्यमिकस्याभिसन्धिः, यद्यपि मम विश्वविचारासहत्ववादिनः प्रमाणं नाम न किञ्चिदस्ति विचारसहम्, तथापि लोकसिद्धान्येव प्रमाणानि तैरेव प्रमाणैः पर्यालोच्यमानानि विचारं न सहन्ते । सोऽयं प्रमाणानामपराधो यानि स्वविरोधेन विलीयन्ते, न तु ममापराध इति ॥ ८ ॥ § 725

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ २ । १ । ९ ॥ § 726

ज्ञानं हि प्रमाणं तद्योगात् प्रमेयमिति चार्थ इति च भवति । तद् यदि प्रमाणं पूर्वं प्रमेयादर्थादुत्पद्यते ततः प्रमाणात् पूर्वं नासावर्थ इति इन्द्रियार्थेत्यादिसूत्रव्याघातः ॥ ९ ॥ § 727

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ २ । १ । १० ॥

§ 728

अथ पूर्वं प्रमेयं पश्चात् प्रमाणं तत्राह—पश्चादिति । यद्यपि च वस्तुस्वरूपं न प्रमाणाधीनं तथापि तस्य प्रमेयत्वं तदधीनम् । तदपि चेत् प्रमाणात् पूर्वं, न प्रमाणयोगनिबन्धनं स्यादित्यर्थः । तदिदमुक्तम्—प्रमेयसंज्ञेति ॥ १० ॥ § 729

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ २ । १ । ११ ॥ § 730

यौगपद्ये दृष्टव्याघातः सूत्रव्याघातश्च । प्रयोगस्तु प्रत्यक्षादयो न प्रमाण-
316/tha त्वेन व्यवहर्तव्याः, कालत्रयेऽप्यर्थाप्रतिपादकत्वात् । यदेवंविधं न तत् प्रमाणत्वेन व्यवह्रियते यथा शशविषाणम् । तथा चैतत् । तस्मात् तथेति । एवं पूर्वपक्षिते सिद्धान्तमाह—अत्र समाधिरिति । उपलब्धिहेतोरित्यादिभाष्यवाक्यस्य कालत्रयेऽप्यर्थाप्रतिपादकत्वादिति हेतोरसिद्धतोद्भावनमर्थः । § 731

स्वयं वार्त्तिककारोऽस्यानुमानस्य दूषणमाह—प्रत्यक्षादीनाम् अप्रामाण्यमिति चेति । लब्धात्मकं खल्वनुमानं प्रत्यक्षादीनां प्रमाणानामप्रामाण्यमापादयेत् । न च लब्धात्मकम् । तस्य तु प्रतिज्ञाविरोधेनात्मलाभ एव नास्तीति कथं तेषामप्रामाण्यमापादयितुमर्हतीति भावः । यदि प्रमाणानि नार्थं साधयन्ति प्रत्यक्षादीनीत्येव न स्यात् । न खलु तानि प्रमाणतोऽसिद्धानि प्रत्यक्षादीनीत्येव भवन्तीत्यर्थः । न चैतेषामर्थसाधनत्वं सामान्यविशेषाभिधायिप्रत्यक्षादिपदगोचरतापीत्याह—कथं चान्यथेति । § 732

अपि च प्रामाण्यनिषेधे न प्रमाणानां प्रत्यक्षादीनामसत्त्वम् । न ह्यकमण्डलुर्माणवक इत्यनेन माणवकः प्रतिषिध्यते । किं तर्हि ? तस्य कमण्डलुयोगो धर्मः । ततश्च प्रमाणानामसत्त्वं पूर्वपक्षिणोऽभिमतं न स्यादित्याह—धर्मप्रतिषेधाच्चेति । शङ्कते, अथ भावस्यास्वतन्त्रत्वादिति । निराकरोति एवमपीति । § 733

प्रतिषिध्यमान इतिमात्रे वक्तव्ये विधीयमान इति दृष्टान्तार्थम् । एतेन तद्धितार्थ इति, प्रामाण्यपदार्थ इत्यर्थः । यथाश्रुतश्च हेतुर्व्यधिकरण इत्याह—यश्चायं हेतुरिति । § 734

यत् पुनरित्यादि भाष्यं व्याचष्टे—यत् पुनरेतत् प्रमाणेनेति । संभवः प्रत्यक्षादीनां निवर्तत इति । प्रत्यक्षादीनामभावे कारकहेतुवचनमित्यर्थः । न ह्यसतो निवृत्तिरिति । नासन् घटो मुद्गरप्रहारेण निवर्त्यत इत्यर्थः ।

३३ भावे ] कारकं हेतु° nvt-C

असंभवं प्रत्यक्षादीनां सिद्धमेव ज्ञापयतीत्याह—असंभवो ज्ञाप्यते इति ॥ ११ ॥ § 735
317/tha

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ २ । १ । १२ ॥ § 736

देशयति—त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरित्येवमभिदधानेनेति । परिहरति—नैष दोष इति । त्वद्वचनं त्वदभ्युपगमविरुद्धम् । अस्माकं तु नैतद् वचनम्, नाप्ययमभ्युपगम इत्यर्थः । न च धर्मिणां प्रतिषेधे कश्चित् न्याय इति । नानुमानं धर्मिप्रतिषेधे प्रभवति आश्रयासिद्धत्वाद्धेतोरित्यर्थः । § 737

अपि च प्रमाणमात्रमधिक्षिपतः प्रत्यक्षादीनामप्रामाण्यमिति च प्रत्यक्षादीनां प्रामाण्यमिति च वाक्ययोरर्थभेदाभेदौ विचारं न सहेते इत्याह—प्रत्यक्षादीनामप्रामाण्यम् इति । एवमेव वक्तव्यम् इति नञोरप्रयोगे लाघवात् । घटस्य सामर्थ्यं वेति, यदा सत्येव घटे तस्यासामर्थ्यं विवक्षित्वोच्यते नास्ति घट इति, नोदकाहरणसमर्थ इति तदा गम्यते । तन्त्रान्तराभ्युपगतानां वा प्रतिषेधः इति । तन्त्रान्तरे यादृशं प्रमाणमभ्युपेयते तादृशप्रतिषेधे अन्यादृशस्याभ्युपगमो भवति । यथा प्रधानं नास्तीति जगत्कारणस्य सुखदुःखमोहात्मकत्वं प्रधानत्वं तत्प्रतिषिध्यते, न पुनर्जगत्कारणम् । तस्यान्यादृशस्याभ्युपगमादिति । कथमिति प्रमाणाक्षेपः । कस्येति प्रतिपाद्याक्षेपः । कश्चेति प्रतिपादकाक्षेपः । प्रतिपाद्याक्षेपं विभजते—अप्रतिपन्न इति । प्रतिपादकाक्षेपं विभजते—प्रतिपन्नश्चेति । क्व प्रतिपाद्ये किं प्रतिपाद्यत इति ॥ १२ ॥ § 738

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ २ । १ । १३ ॥ § 739

यद्युपादीयते उदाहरणम्, तत्प्रमाणेनानवधारितं न शक्यमुपादातुमिति भावः । न केवलमशक्यं व्यर्थं चेत्याह—प्रत्यक्षादीनां चेति । सर्वैः प्रमाणैरिति, उदाहरणादिविषयैः प्रमाणैः विप्रतिषिद्धो विरुद्धो भवति, बाधितविषयतया प्रमाणाभासो भवतीत्यर्थः । विरुद्धं चाह—सिद्धान्तमभ्युपेत्येति । प्रमाणानाम् इत्यवयवाभिप्रायम् । अवर्जयन्निति वर्जनविरुद्धमपादानमुच्यते, उपाददान इत्यर्थः ॥ १३ ॥ § 740 318/tha

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ २ । १ । १४ ॥ § 741

तत्प्रामाण्ये वेति । अस्यार्थः । यदि माध्यमको ब्रूयात् प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः इति, स्ववाक्यावयवाश्रितानि प्रमाणानि यथालोकप्र-

६ म ] नाभ्युपगमविरुद्धमि°nvt-C
२३ भावः ] व्याघातःnvt-J
२५ चाह ] चेत्याहnvt-C

३१ त्रैकाल्यासिद्धेः ] न्याः सू २. १. ८

तीतिसिद्धानि तैरविचारितसिद्धैरितरेषां प्रामाण्यं प्रतिषिध्यत इति, तत्रेदमुच्यते—तत्प्रामाण्ये वा अवयवाश्रितप्रत्यक्षादिप्रामाण्ये न सर्वप्रमाणविप्रतिषेधः, अवयवाश्रितानामेव प्रामाण्याभ्युपगमात् । किं पुनरिदमविचारितसिद्धत्वम् ? किं विचारासहत्वम्, आहो सर्वजनसिद्धतया सन्देहानास्पदत्वम् ? तत्र पूर्वस्मिन् कल्पे विचारासहेन स्वयं दुःस्थितेनान्येषां प्रामाण्यं बाध्यत इति सुभाषितम् । तस्मादुत्तरः कल्पः । तथा च न सर्वाप्रामाण्यम्,—तस्यैव प्रामाण्यात् । § 742

अत्र भाष्यम्—वीत्ययमुपसर्गः संप्रतिपत्त्यर्थे । प्रतिषेधशब्दार्थमनुजानाति विशेषमभिदधत् न तु तद्व्यतिरिक्तार्थः । न व्याघातवचन इत्यर्थः । तदिदमुक्तम्—न व्याघाते । कस्मात् । अर्थाभावात् । स्ववाक्यावयवाश्रितानां हि प्रमाणानां प्रामाण्ये सर्वप्रमाणप्रतिषेधव्याघातः पुर्वमुक्तः, तत्प्रतिषेधः पूर्वेण विरुध्यते अशक्यश्चेति अर्थाभाव इत्यर्थः । § 743

तदेतद् वार्त्तिककारो व्याचष्टे—वीत्ययमुपसर्गो विशेषप्रतिषेधे । यावदुक्तं भवति विशेषेण सर्वेषु प्रमाणेषु प्रतिषेध इति तावदुक्तं भवति विप्रतिषेध इति । प्रतिषेधशब्दार्थाभ्यनुज्ञानत्वाद् विशब्दस्य । तेन तु न सर्वप्रमाणविप्रतिषेधः इत्यनेन विपदसहितेन किमुक्तं भवति ? इदमुक्तं भवति—कानिचिदिति । अवयवाश्रितानि प्रमाणानि विचार्य समुदायं विचारयति—यच्चेदमिति ॥ १४ ॥ § 744

319/tha

## त्रैकाल्याप्रतिषेधश्चशब्दादातोद्यसिद्धिवत् तत्सिद्धेः ॥ २ । १ । १५ ॥ § 745

तदिह सूत्रकारेण श्रैकाल्यासिद्धेरित्यनुयोगस्य प्रतिषेधेऽपि साम्यं सर्वप्रमाणविरोधश्चापादितः संप्रत्यसिद्धतोद्भावनपरं सूत्रं पठति—त्रै...द्धेः ॥ § 746

तत्पाठमाक्षिपति—किमर्थमिति । स्वातन्त्र्येण चेदस्य सूत्रस्यार्थः पूर्वमुक्तः, कृतं सूत्रपाठेनेत्यर्थः । परिहरति—पूर्वोक्तेति । न तदस्माभिरुत्सूत्रमुक्तम्, अपि तु सूत्रार्थ एवेति ज्ञापनार्थं सूत्रपाठोऽस्माकमित्यर्थः । नियमेन यः प्रतिषेधः पूर्वमेव वा पश्चादेव वा सहैव वेति तं प्रतिषेधति—अनियमेति । खलुशब्दोऽयं यस्मादर्थे । यस्माद् अनियमदर्शी ऋषिः । § 747

वार्त्तिकम्, तदुत्थानज्ञापनार्थं सूत्रपाठ इति । देशयति—पाठक्रममतिलङ्घ्य कस्मात् ? तत्रैवेदमिति । अत्रैव वा तद् भाष्यम् कस्मान्नोक्तमित्यपि द्रष्टव्यम् । परिहरति—अविशेषादिति । अथ शब्दः श्रोत्रविवरे समवेतः कथमातोद्यमसंबद्धं गमयतीत्यत आह—योऽसौ वीणावेणुशब्दयोरिति । अयं शब्दविशेषो धर्मी । वीणाङ्गुलिसंयोगजशब्दपूर्व इति साध्यो

५ हेन ] सहत्वेन nvt-C
२१ दिह ] तदिदं nvt-C
२६ ति ] निषेधयति nvt-J
३० पि ] मिति च nvt-C

धर्मः, तन्निमित्तासाधारणधर्मवत्त्वात् पूर्वोपलब्धवीणानिमित्तध्वनिवदिति । तदिदमुक्तम्—वीणानिमित्तकत्वमिति । धूमदर्शनादिति । संयोगिना हि वह्निना विशिष्टो धूमोऽनुमीयते न कारणेन, अस्तीति वर्तमानावभासानुपपत्तेरिति ॥ १५ ॥ § 748

प्रमेया च तुलाप्रामाण्यवत् ॥ २ । १ । १६ ॥ § 749

यत्पुनराक्षिप्यते यदनियतं न तत् परमार्थसत् । यथा रज्ज्वामारोपितं सर्पत्वम् । तामेव हि रज्जुं तदैव कश्चित् सर्प इति कल्पयति कश्चित् हार इति । स एव कदाचित् सर्प इति कल्पयित्वा पश्चात् हार इति कल्पयति । तथा च प्रमाणप्रमेयभावः । तस्मात् न परमार्थसन्निति । अत्रेदमुत्तरसूत्रम्—प्रमे...त् । § 750
320/tha

तद्योजनिकां करोति—प्रमाणं प्रमोयमिति चेयमिति । अयमभिसन्धिः । क्षणभङ्गपरिणामनिरासे सति स्वकारणादुत्पन्नं स्थिरं वस्तु तत्तद्वस्त्वन्तरसन्निधानात् तत्तद्धर्मयोगे सति तत्तद्बुद्धिव्यपदेशमनुभवति । समावेशं दर्शयितुं पृच्छति—यदा पुनरिति । उत्तरम्—तदा निमित्तेति । अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—प्रमे...त् ॥ § 751

इति । न केवलं प्रमाणं समाहारगुरुत्वे तुला । यदा पुनरस्यां सन्देहो भवति प्रामाण्यं प्रति, तदा सिद्धप्रमाणभावेन तुलान्तरेण यत्परीक्षितं सुवर्णादि तेन प्रमेया च तुलाप्रामाण्यवत् । यथा प्रामाण्ये तुला प्रमेया च, तथान्यदपि सर्वं प्रमाणं प्रामाण्ये प्रमेयमित्यर्थः । तदेतद् भाष्यकृद् आह—एवमनवयवेन कार्त्स्न्येन तन्त्रार्थः शास्त्रार्थ इति । क्वचित् प्रमातृत्वप्रमेयत्वप्रमाणत्वादीनां समावेशः, यथात्मनि । स हि प्रमाता च प्रमीयमाणश्च प्रमेयम् । तेन तु प्रमितेन तद्गतगुणान्तरानुमाने प्रमाणम् । क्वचित् पुनः प्रमाणत्वप्रमेयत्वफलत्वानां समावेशः, यथा बुद्धौ । क्वचित् पुनः प्रमाणत्वप्रमेयत्वयोः, यथा संशयादौ । सेयं समावेशस्य तन्त्रार्थव्याप्तिरिति । तथा च कारकशब्दा इति भाष्यम् पूरयित्वा व्याचष्टे वार्त्तिककारः—यथा च प्रमाणेति । यावन्ति यत्र निमित्तानि तावतां तत्र नैमित्तिकानां प्रवृत्तेरवश्यंभावो नियमः । स्वस्थितौ वृक्षः स्वातन्त्र्यात् कर्तेति भाष्यम् । तत्र स्वातन्त्र्यं पृच्छति वार्त्तिककारः—किं पुनः स्वातन्त्र्यमिति । इतरकारकाप्रयोज्यत्वं प्रयोजकत्वं च कारकाणां मध्ये कर्तुः स्वातन्त्र्यमुक्तम् । इह तु कारकान्तराणामभावात् तादृशं स्वातन्त्र्यं नास्तीति भावः । उत्तरम—कारकान्तरानपेक्षित्वम्, कारकान्तरापेक्षस्य हि प्रयोजकतया कथञ्चित् स्वातन्त्र्यं विवक्ष्यते, तदनपेक्षस्य पुनर्नितरां स्वातन्त्र्यमित्यर्थः । यदायं स्थितिशब्दो गतिप्रतिषेधवचन इति । यावदुक्तं भवति न यातीति, तावदुक्तं भवति तिष्ठतीति । अत्र च निषेधस्य निषेध्याधीननिरूपणतया तदुपाधिः पूर्वापरीभावो न तु स्वरूपेण निषेधस्य

२९ च ] कारकान्तराणां कर्तुः nvt-C

पूर्वापरीभावसंभव इति । यदाप्यस्तेरभिधायक इति सत्तासामान्याभिधायक 321/tha इत्यर्थः । अस्ति व्यनक्तीति, वृक्षस्य हि महत्त्वे रूपवत्त्वे सति सतासमवाय एव सत्ताव्यञ्जकत्वम्, तत्र चानपेक्ष इत्यर्थः । गेहसंबन्धानुभवः गेहसंबन्धप्राप्तिः समवायः, तद्विषया क्रिया गतिविधारकः प्रयत्नः । तेन हि स तिष्ठति । घटो गृहेऽस्तीति त्वौपचारिकः प्रयोगः । यदाप्ययमभग्नवचन इति । अत्रापि निषेध्यस्य पूर्वापरीभावोपाधिरेव निषेधस्य तथाभावः । अथवा तिष्ठतीत्यत्रापि कयाचिद् विवक्षया कारकान्तरापेक्षा अस्तु, तथापि तत्प्रोयजकत्वेनैव स्वातन्त्र्यमित्याह—समुदायेति । अवयवानां समूहः समुदायस्तदेकदेशोऽवयव इति । ध्रियत इति कर्तरि लकारः । § 752

प्रत्यभिज्ञानविषयता वा स्थितिः । तस्यां सत्यामपि कारकान्तरापेक्षायां कथञ्चित् प्रयोजकतया स्वातन्त्र्यमित्याह—पूर्वापरेति । अनेके पर्यायवन्तः प्रत्ययाः । प्रागनुभवः । अनु तत्ताश्रयस्य धर्मिणः पुनरनुभवः । अथ स्मृतिः । अथ प्रतिसन्धानमिति । § 753

वैनाशिको देशयति—चक्रेति । यदेव दण्डसंयोगेन चक्रभ्रमणं तदेवेदमुपरतेऽपि दण्डसंयोगे इत्यर्थः । परिहरति—न प्रमाणेति । नासति बलवति बाधके प्रमाणे प्रत्यभिज्ञानस्य शक्यं मिथ्यात्वम् । ज्वालादिषु तु तदस्तीत्यर्थः । न च समस्तप्रतिसन्धानप्रत्ययमिथ्यात्वे मिथ्याप्रतिसन्धानप्रत्ययो भवितुमर्हति बीजाभावादित्याहमिथ्याप्रत्ययाश्चेति । वैनाशिकः पृच्छति—अथ भवत इति । एवं ब्रुवाणः प्रत्यक्षमप्रमाणयन्न शक्यस्तेन बोधयितुमित्यनुमानमुत्तरमाह—उक्तं प्रमाणम् आत्मलक्षणे रूपेति । अनुमानान्तरमाह—कार्यस्येति । कार्यकालानुभवनं कार्यकालप्राप्तिः । वैनाशिकः शङ्कते—अनाधारमिति । प्रतीत्येति पूर्वभावं विकृत्येत्यर्थः । दुषयति—तन्नेति । आधेयस्याधारसमानकालत्वमनुभवसिद्धम् । तेनाधारेण कारणेन कार्यकालं स्थातव्यम् । अनाधारत्वं तु कार्यस्य नानुभवगोचरः, अपि तु युक्त्या साध्यम् । सा च दृष्टान्ताभावादनुपपन्ना । न च विप्रतिपत्तिमात्रादनुभवः शक्योऽपवदितुम् । क्षणभङ्गसाधनानि च निराकरिष्यन्ते । § 754

322/tha

यदि हि रूपादीनामाधारवत्त्वं निषिध्यते ततोऽस्याभ्युपगमविरोधो भवति, भूतानि पृथिव्यादीनि भौतिका रूपादय इति । अभ्युपगमान्तरविरोधमाहयथोक्तं भवद्भिरिति शेषः । न केवलं रूपादीनामाश्रितत्वं भवद्भिरभ्युपगतमुपपन्नं चेत्याह—अनाश्रिताश्चेति । § 755

पृच्छति—कर्मणिकः कारकार्थः कारकशब्दार्थः । क्रियानिमित्तं हि कारकम् । यत् पुनः क्रियाया एव व्याप्यं न तत् क्रियानिमित्तमिति न कारकम् । अकारकं च कथं कर्म, कारकाधिकारित्वात् कर्मसंज्ञाया इति भावः । उत्तरम्—क्रिया विषयत्वमिति । अनात्मसमवेतक्रियाफलशालित्वं

१२ अनु ] प्राक् अनु nvt-C
१८ बीजाभावादित्याह ] बीजादित्याह nvt-C
२० माह ] °मानं प्रमाणमाह nvt-C

क्रियाविषयत्वं कर्मत्वम् । देवदत्तसमवेतया हि क्रियया दर्शनलक्षणया वृक्षविषयोऽनुभवो जन्यते । इदमेव चानुभवस्यार्थविषयत्वं यदर्थाधीननिरूपणत्वमित्युक्तं प्रमाणलक्षण इति । तेन क्रियाविषयस्य क्रियातः प्राग्भावाद् युक्तं कारकत्वम् । एवं च विकार्यप्राप्ययोरुपपन्नःकर्मभावः, निर्वर्त्यस्य तु पटादेर्यद्यपि क्रियायाः प्राग्भावो नास्ति, तथापि तदवयवानां तन्तूनां प्राग्भावः, तेषां च तादर्थ्येन पटत्वे उपचारात् पटं करोतीति युक्तः प्रयोगः । तथा हि सहचरणादिसूत्रे § 756

वक्ष्यति कटार्थेषु वीरणेष्विति । एतेन च कर्मलक्षणेनाहिं लङ्घयति ग्रामं गच्छन् वृक्षमूलान्युपसर्पतीत्यादयोऽपि संगृहीता वेदितव्याः । नगरं गच्छति चैत्र इत्यत्र यथाप्राप्तिर्नगरसमवेता एवं चैत्रसमवेतापीति चैत्रस्यापि क्रियाजनितफलशालिनो मा भूत् कर्मत्वमित्यत उक्तम्—अनात्मसमवेतेति । आत्मविषयेऽपि च मानसप्रत्यक्षे यद्यप्यात्मनो न कर्मता तथापि ज्ञानक्रिया सकर्मिकैवात्मधर्मस्यात्मनो व्यतिरिक्तस्य कस्यचित् तत्र कर्मणोऽवभासनादिति सर्वदवदातम् । § 757

वृक्षः संप्रदानं भवतीति । पाणिनीयलक्षणानुरोधेन लौकिकप्रयोगानुरोधाच्च संप्रदानमिति, नेयमन्वर्थसंज्ञेति भावः । गुरुत्वप्रतिबन्धे कारणमिति प्रकृतोदाहरणा भिप्रायम् । तथा च गुणादीनामप्याधेयत्वाधिगतेर्द्र- 323/tha व्यादिभिराधेयभावः सिद्धो भवति । तेन न द्रव्यस्वभावः कारकमिति यदुक्तं माध्यमिकेन तदस्माकमभिमतमेव । काल्पनिकं तु कारकं न मृष्यामहे इत्यनेनाभिसन्धिना भाष्यकारेणोक्तम्—एवं च सतीति । न क्रियामात्रमिति, नावान्तरक्रियामात्रम् । यत् प्रधानक्रियासाधनमवान्तरक्रियाविशेषयुक्तमिति, तदेतदनुभाष्य वार्त्तिककारो व्याचष्टे—एवं च सतीति । तदनेन कारकसामान्यमुक्तम् । विशेषलक्षणपरं भाष्यं यत् क्रियासाधनं स्वतन्त्रमिति । तद् व्याचष्टे—यदा तु विशेष इति । § 758

स्यादेतत् । क्रियासाधनमित्येतावदेवास्तु, क्रियाविशेषयुक्तमिति वा, कृतमुभयोपादानेनेत्यत आह—सर्वस्य च कारकस्येति । यद्यवान्तरक्रियामात्रमुच्यते ततस्तस्मिन् सर्वस्य कर्तृत्वात् कारकवैचित्र्यं न स्यात्, प्रधानक्रियामात्रोपादाने च तत्र सर्वेषामवान्तरव्यापारमन्तरेण वैचित्र्यायोगाद् अत उभयोपादानं प्रयोजनवदिति । एवं लक्षणत इति भाष्यं व्याचष्टे—एवं च शास्त्रमिति । § 759

देशयति—यदीति । परिहरति—न, शक्तेरिति । पुनर्देशयति—शक्तेरिति । परिहरति—नैष दोष इति । ननु च बुद्ध्यादयोऽपि शक्तिव्यक्तिहेतवः, न चैते क्तियारूपाः किं तु गुणरूपा इत्यत आह—क्रियेत्यनेनेति । सामर्थ्यं बलम् । दुर्बलो हि जानन्नप्युपायं न व्यापारयति । यथा पाणिना कुण्ठः कुठारम् । तेन शक्तिक्रियासंबन्धयोः कारकशब्दो मुख्यः, शक्तिमात्रे तु गौण इति । प्रकृते योजयति—कारकशब्दश्चायमिति ॥ १६ ॥ § 760

४ न्नः ] कारकभावःnvt-J
७ णादिसूत्रे ] न्या सू. २ । २ । ६२

## प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ २ । १ । १७ ॥ § 761

संप्रति प्रकारान्तरेण प्रमाणान्याक्षिप्य समाधीयन्ते—अस्ति भोः कारकशब्दानामिति । अत्रैते कल्पा उपप्लवन्ते, किं प्रत्यक्षादीनामुपलब्धिः ससाधना निःसाधना वा ? यदा ससाधना तदापि किमेभिरेव प्रत्यक्षादिभिराहो 324/tha प्रमाणान्तरेण ? यदाप्येभिस्तदापि किं तयैव प्रत्यक्षव्यक्त्या, अथैका व्यक्तिर्व्यक्त्यन्तरेणेति ? तत्र प्रमाणान्तराभ्युपगमे विभागसूत्रव्याघातः, अनवस्थापातश्च । प्रत्यक्षादिभिः प्रत्यक्षाद्यन्तराणां ग्रहणेऽनवस्थापातः । तथैव व्यक्त्या तद्ग्रहणे आत्मनि वृत्तिविरोधः; न हि तयैवासिधारया सैवासिधारा छिद्यते । तस्मादसाधना प्रमाणोपलब्धिः । एवं चेत्, कृतं प्रमेयसाधने प्रमाणैः, प्रमाणवद साधनैवास्तु प्रमेयोपलब्धिरिति पूर्वः पक्षः । नासाधना प्रमाणसिद्धिः, नापि प्रत्यक्षादिव्यतिरिक्तप्रमाणाभ्युपगमो येन विभागसूत्रव्याघातः स्यात् । नापि च तथैव व्यक्त्या तस्या एव ग्रहणभ्युपेयते येनात्मनि वृत्तिविरोधो भवेत् । अपि तु प्रत्यक्षादिजातीयेन प्रत्यक्षादिजातीयस्य ग्रहणमातिष्ठामहे । न चानवस्था । अस्ति किञ्चित् प्रमाणं यत् स्वज्ञानेनान्यधीहेतुः यथा धूमादिः । किञ्चित् पुनरज्ञातमेव बुद्धिसाधनं यथा चक्षुरादि । तत्र पूर्वं स्वज्ञाने चक्षुराद्यपेक्षम् । चक्षुरादि च स्वज्ञानमनपेक्षमेव तज्ज्ञानसाधनमिति का अनवस्था ? बुभुत्सया च तदपि शक्यज्ञानम् । सा च कदाचिदेव क्वचिदिति नानवस्था । न च प्रामाण्यं प्रमाणानामप्रतीतं न प्रवृत्त्यङ्गमिति तदर्थं प्रमाणान्तरापेक्षायामनवस्थेति वाच्यम् । दृष्टार्थेषु संशयादपि प्रवृत्तौ सत्यां प्रवृत्तिसामर्थ्येन तस्य सुज्ञानत्वात् । अदृष्टार्थेषु प्रवृत्तिसामर्थ्यावधृतप्रामाण्यप्रमाणसाधर्म्येण तस्य शक्यज्ञानत्वादिति दर्शितं प्रथमसूत्रे । तस्मात् प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धिर्न चानवस्थेति सिद्धान्तः । § 762

भाष्ये भो इत्यामन्त्रणे । कुतः पुनरुपलिब्धिहेतुत्वमित्यत आह—संवेद्यानि चेति । चो हेतौ । उपलब्धिविषयत्वं कुत इत्यत आह—प्रत्यक्षं मे ज्ञानमिति ॥ १७ ॥ § 763

## तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ॥ २ । १ । १८ ॥ § 764

तद्वि…द्धिः ॥ १८ ॥ § 765
325/tha

## न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः ॥ २ । १ । १९ ॥ § 766

प्रदीपभावाभावयोर्दर्शनस्य तथाभावात् । ज्ञातृमनसोश्च दर्शनादिति भाष्यम् । तद्व्याचष्टे वार्त्तिककारः । न चायमेकान्त इति । ज्ञाता ज्ञेय इति सकर्माभिप्रायम्, न ह्यन्यसमवेता ज्ञानक्रिया येनात्मनः कर्मता स्यात्,

अपि तु ज्ञातृस्थैव । परसमवेतक्रियाफलशालि हि कर्मेत्युक्तम् । तस्मात् सुखादीनामात्मधर्माणामत्र कर्मता, आत्मनस्तु, प्रकाशमानता, तत्र विवक्षया ज्ञेयत्वाभिधानम् । मनस्तु यद्यपि स्वज्ञानं प्रति करणं कर्म च तथापि न स्वात्मनि वृत्तिविरोधः । यदि हि ज्ञानं करणं भवेत् तदात्माश्रयदोषप्रसङ्गः । स्वसत्तया च ज्ञानं प्रति करणम् । अन्यच्चास्य ज्ञानम् अन्या च सत्ता । न च तत्समवेता ज्ञानक्रिया, किं त्वात्मसमवेता । तस्मात् ज्ञेयत्वं ज्ञानसाधनत्वं च मनसो न दोषमर्हतीति ॥ १९ ॥ § 767

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ॥ २ । १ । २० ॥ § 768

ये तु प्रदीपप्रकाशो यथा न प्रकाशान्तरमपेक्षते, एवं प्रमाणान्यपि प्रमाणान्तरमनपेक्षमाणान्यपि सन्ति भविष्यन्तीत्याचार्यदेशीया मन्यन्ते, तान् प्रत्याह—क्व…न्तः । § 769

यथायं प्रसङ्गः प्रमाणानामनपेक्षत्वप्रसङ्गः, प्रदीपे प्रदीपान्तरानपेक्षया प्रकाशकत्वदर्शनात् प्रमाणान्तरानपेक्षाण्येवालोकवत् प्रमाणानि सेत्स्यन्तीति एवमर्थमुपादीयते । एवमनपेक्षत्वप्रसङ्गः । प्रमेयाण्यप्यनपेक्षाण्येव सेत्स्यन्तीत्येवमर्थमप्युपादेयः । तथा च प्रमाणाभाव इत्यर्थः । तदेवं प्रदीपदृष्टान्ताश्रयणेन प्रमाणाभावप्रसङ्गमुक्त्वा स्थाल्यादिदृष्टान्तोपादानेन तु प्रमाणस्यापि प्रमाणान्तरापेक्षेत्याहयथा स्थाल्यादिरूपग्रहणे इति । § 770

326/tha

तदेतद् भाष्यं व्याचष्टे वार्त्तिककारः—यथाप्रदीपप्रकाशः सजातीयानपेक्षः तथा प्रमाणानि सजातीयानपेक्षाणि, न पुनर्यथास्थाल्यादिरूपं प्रमाणापेक्षं तथा प्रमाणान्यपि प्रमाणापेक्षाणीति । कस्मात् पुनः स्थाल्यादिरूपं प्रमाणापेक्षमित्यत आहस्थाल्यादिरूपप्रकाशने चेति । प्रदीपप्रकाशस्तत्र प्रमाणमिति लोकसिद्धमित्यर्थः । कस्मादेवं स्थालीरूपवत् न प्रमाणानि, तान्यपि प्रमाणान्तरेण प्रकाश्यन्तामित्यर्थः । तदनेन प्रदीपदृष्टान्तेन निरपेक्षत्वम्, न तु स्थाल्यादिदृष्टान्तेन सापेक्षत्वमित्यत्र नियमहेतुर्नास्तीत्युक्तम् । नियमान्तरहेत्वभावमाह—अयं च प्रदीपप्रकाशदृष्टान्त इति । यथा हि प्रमाणानि प्रदीपदृष्टान्तेन निरपेक्षाणि, एवं तेनैव दृष्टान्तेन कस्मान्न प्रमेयाण्यपि ? ततश्च प्रमाणाभावप्रसङ्गः । न हि प्रमाणानामेव प्रदीपो दृष्टान्तो न प्रमेयाणामिति नियमहेतुरस्ति । तदनेन यथायं प्रसङ्गः इति भाष्यं व्याख्यातम् । प्रदीपप्रकाशो दृष्टान्तो भवतु इत्यनेनायमेव दृष्टान्तो नायमिति नियमो निराकृतः । पूर्वेण तु प्रदीपदृष्टान्तेन निरपेक्षत्वमेव न तु स्थालीदृष्टान्तेन सापेक्षत्वमित्ययं नियमो निराकृत इति न पुनरुक्तम् । प्रकाशकत्वादिना तु हेतुना संगृहीतः प्रदीपदृष्टान्तो नियतो भवतीति नानियमः शक्यो वक्तुम्

१५ ङ्गः ] उपादीयते प्रसङ्गः nvt-C
२३ त् ] स्थालीवत् nvt-C
३३ दृष्टान्तो ] प्रदीपप्रकाशदृष्टान्तः ?

। केवलं प्रकाशकत्वं सजातीयान्तरानपेक्षत्वे साध्ये विकल्पनीयम् किमत्यन्तसजातीयमाहो सजातीयमात्रम् यद्यत्यन्तसजातीयम् ततः सिद्धसाधनम् । न हि चक्षुरादि प्रमाणं स्वग्रहणे चक्षुराद्यन्तरमपेक्षते । अथ कथञ्चित् सजातीयम्, तदपेक्षत्वमालोकस्याप्यस्ति, तस्यापि चक्षुराद्यपेक्षत्वात् । ततश्च साध्यहीनो दृष्टान्तः, विरुद्धश्च हेतुः । विषयज्ञानमपि न विषयज्ञानेन गृह्यते, किंतु ज्ञानविषयेन ज्ञानेनेति नात्यन्तसजातीयमिति । तदनोभिप्रायेण वार्त्तिककृता उक्तम्—अनेकान्त इत्ययं दोषो न भवति दोषान्तरं तु भवतीत्यर्थः । *उत्तरग्रन्थस्तु सिंद्धान्तं दर्शयाद्भिरस्माभिरुपपादितार्थ इति न व्याख्यातः । येन प्रयुक्तोऽनवस्थामुपाददीतेति सोत्प्रासम् ॥ २० ॥ § 771

॥ इति सामान्येन प्रमाणपरीक्षाप्रकरणम् ॥

327/tha

## २.१.३ प्रत्यक्षलक्षणपरीक्षाप्रकरणम्

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २ । १ । २१ ॥ § 773

प्रत्यक्षकारणं वानेन सूत्रेणोच्येत प्रत्यक्षस्वरूपं वा ? न तावत् प्रत्यक्षकारणमित्याह—यदिदं भवता प्रत्यक्षलक्षणमुच्यत इति प्रत्यक्षकारणमित्यर्थः । कारणे सति कार्यं ज्ञानं लक्ष्यते प्रज्ञायत इति । द्वितीयकल्पं शङ्कते—अथेति । सिद्धान्तवाद्याहनोभयथापीति । लक्षणपक्ष एव सिद्धान्तिनोऽभिमतः । कारणपक्षाभ्युपगमस्तु प्रौढिवादेन द्रष्टव्यः । सकलप्रत्यक्षव्यापकमसाधारणं कारणमवधार्यते । न हीदृशमन्यत् कारणमात्ममनःसंयोगो वा, इन्द्रियमनःसंयोगो वा प्रत्यक्षस्यास्ति पूर्वस्य साधारणत्वाद् उत्तरस्य चाव्यापकत्वादिति । समाधानान्तरमाह—अर्थतो वा इत्यादिना मनः सन्निकर्षोऽपि कारणम् इत्यन्तेन । तदेवं सिद्धान्तसारमुक्तत् ॥ २१ ॥ § 774

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २ । १ । २२ ॥ § 775

नात्ममनसोरित्यादिसूत्रमपठित्वैव भाष्यकारो व्याचष्टे—न चासंयुक्ते द्रव्ये इति । सर्वं हि कारणजातं कार्योपजननाय परस्परसमवधानमपेक्षते, अन्यथा यत्र तत्र व्यवस्थितेभ्योऽपि कारणेभ्यः कार्यमुपजायेत । तदात्मनापि मनःसंबद्धेन कार्यं जनयितव्यम् । संबन्धश्चात्ममनसोः संयोग एव । भवतु वा संयोगजं ज्ञानम् । अथेन्द्रियात्मसंयोगजं कस्मान्न भवति, कृतं मनःसंयोगेनेत्यत आह—मनःसन्निकर्षेति । तस्मादात्ममनःसन्निकर्षोऽपि व-

८ *] इतरग्र° nvt-C
९ दीतेति ] सोपहासम् nvt-C
२ णं ] लक्षणं nvt-C
४ इति ] कार्यं लक्ष्यते ज्ञानमितिnvt-C. *Var*

क्तव्य इति पूर्वः पक्षः । तदिदं नात्मनसोः सन्निकर्षेत्यादिसूत्रपाठस्य पुरस्तात् कृतभाष्यम् । § 776

तदेतद् वार्त्तिककारो भाष्यम् अनुभाष्य पूर्वपक्षसूत्रं पठति— § 777
328/tha

तदिदं सूत्रमिति । सूत्रार्थमाह—आत्ममनसोरिति । पूर्वपक्षस्य क्षणमप्यवस्थानमनिच्छन्, वार्त्तिककारः प्रतिषेधमस्योक्तं स्मारयति—न, उक्तेति ॥ २२ ॥ § 778

## दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २ । १ । २३ ॥ § 779

तदेवं द्वाभ्यां सूत्राभ्यां पूर्वपक्षिते सति भावमात्रेण इन्द्रियार्थसन्निकर्षादीनामनेन कारणत्वमुक्तमिति मन्यमानः पार्श्वस्थः प्रत्यवतिष्ठते—सति चेन्द्रियार्थेति । § 780

दिग्दे...ङ्गः । न सति भावमात्रेण कारणत्वम् । आकाशादीनामपि कारणत्वप्रसङ्गात् । तादृशश्चात्ममनः संयोग इन्द्रियार्थसन्निकर्षश्चेति न कारणं युक्तमित्यर्थः । दूषयति— अकारणभावेऽपीति । नान्वयमात्रात् कारणत्वनिश्चयोऽपि त्वन्वयव्यतिरेकाभ्याम् । न च दिगादावस्ति व्यतिरेकः । नित्यत्वविभुत्वाभ्यामवर्जनीयः सन्निधिः । सेन्द्रियशरीरवर्त्यात्ममनःसंयोगस्त्वन्वयव्यतिरेकावधृतसामर्थ्यः, सुप्तस्य ज्ञानानुत्पादात् । इन्द्रियार्थसन्निकर्षे त्वसति विप्रकृष्टे व्यवहिते च ज्ञानं न जायते । इन्द्रियमनःसन्निकर्षाभावे तु नायुगपज्ज्ञानानि भवन्ति । तस्मात् नाकाशादिभिरतिप्रसङ्ग इति । § 781

तदेतद् वार्त्तिककारो व्याचष्टे—ये च सति भावात् कारणभावं वर्णयन्ति पूर्वपक्षिणः सिद्धान्तिनो वा, असति न भवतीति दैवादागतो व्यतिरेको न तु प्रयोजकः, तान् प्रति पार्श्वस्थो ब्रूते तेषां दिग्देशेति । यथा चान्द्रमसं रूपमिति । यद्यपि तत्रापि तेजस्यौष्ण्यमस्ति तथाप्यत्यन्ताभिभवेन स्वोचितार्थक्रियानुपयोगादसत्कल्पत्वमित्यर्थः ॥ २३ ॥ § 782
329/tha

## ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २ । १ । २४ ॥ § 783

एवं पार्श्वस्थे निरस्ते पूर्वपक्षी ब्रूते—यद्येवमिति । सिद्धान्त्याह—नोपसंख्येय इति । § 784

ज्ञान...धः । अत्र ज्ञानस्यात्मलिङ्गत्वमुच्यते । ज्ञानं तावत् कार्यमनित्यत्वाद् घटादिवत् । क्वचित् समवेतं च कार्यत्वाद् घटवत् । न च तत् पृथिव्याद्याश्रितं मानसप्रत्यक्षत्वात् । यत् पुनः पृथिव्याद्याश्रितं तत् प्रत्यक्षान्तरवेद्यमप्रत्यक्षमेव वा । न च तथा ज्ञानम्, तस्माद् द्रव्याष्टकातिरिक्ताश्रितम् । तदाश्रयश्च द्रव्यजातीयः समवायिकारणत्वादाकाशवत् ।

१ दिदं] तदिदं सूत्रमिति nvt-C
५ न्] °मसहमानोnvt-C
९ मानः] °मसहमानोnvt-C

तस्य च विभुत्वमात्मलक्षणेऽस्माभिरुक्तम् । अतो गुणजातीयं ज्ञानं कार्यत्वे सति विभुद्रव्यसमवायात् शब्दवत् । एवं व्यवस्थिते प्रश्नोत्तरे वार्त्तिकगते व्याख्यातव्ये ॥ आत्मसमवायादिति कार्यत्वे सति विभुद्रव्यसमवायादित्यर्थः । विभुद्रव्यसमवाय एव तस्यासिद्ध इति चेदत आह—न पृथिव्यादिगुणः स्वसंवेद्यत्वात्, मानसप्रत्यक्षवेद्यत्वादित्यर्थः । स्वपरसंवेद्यं प्रत्यक्षान्तरवेद्यं द्रष्टव्यम्, अन्यथा पृथिव्यादिगुणेन द्वित्वादिना व्यभिचारः स्यादिति । तस्मात् ज्ञानलिङ्ग आत्मा । न चासावसंयुक्तो ज्ञानं जनयति, तस्य सदातनत्वेन सदा ज्ञानोत्पादप्रसङ्गात् । तस्मात् संयोगभेदं कादाचित्कमपेक्षत इति अर्थात् सिद्ध आत्ममनः संयोग इति न सूत्रकृता उक्तः । प्रौढिवादितयैष समाधिरिति दर्शयितुमुक्तमेव परमं समाधिं स्मारयति—उक्तं चात्रेति ॥ २४ ॥ § 785

## तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २ । १ । २५ ॥ § 786

अन्यार्थमिति प्रमेयभूतमनःस्वरूपप्रतिपादनार्थम् । अन्यार्थस्यापि तदर्थप्रकाशकत्वम् । उपपत्तिर्लिङ्गम् । ईदृशं हि तल्लिङ्गं यदन्यार्थमपि मनसो
330/tha ज्ञान कारणत्वं प्रतिपादयतीति । न हि ज्ञानं स्वतन्त्रं येन स्वकारणं मनो नापेक्षेत, नापि चक्षुरादि स्वतन्त्रं ज्ञानोपजनने येन मनो ज्ञानकारणं न स्यादित्याह—न च चक्षुरादीति । तस्मादर्थप्राप्तत्वादात्ममनःसंयोग इन्द्रियमनःसंयोगश्च नोक्तौ सूत्रकारेण ॥ २५ ॥ § 787

## प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ॥ २ । १ । २६ ॥ § 788

देशयति—अथ कस्मादिति । इन्द्रियार्थसन्निकर्षेऽप्यर्थतः प्राप्तिरविशिष्टेति भावः । § 789

प्रत्य...नम् । परिहरति—प्रत्यक्षेति । सर्वानभिधाने हि प्रत्यक्षं न लक्षितं स्यादिति तल्लक्षणाय किञ्चिद् वक्तव्यम् । तत्रेन्द्रियार्थसन्निकर्ष एव वक्तव्यः समस्तप्रत्यक्षव्यापकत्वात्, नेतरौ अव्यपकत्वादतिव्यापकत्वाच्चेति परमः समाधिः ॥ २६ ॥ § 790

## सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥ २ । १ । २७ ॥ § 791

ज्ञानोत्पत्तेरिति सूत्रशेषः । प्रणिधाय संकल्प्य प्रदोषे सुप्तोऽर्धरात्रे मयोत्थातव्यमिति सोऽर्धरात्र एव प्रबुध्यते । प्रबोधज्ञानमिति, प्रबोधे निद्राविच्छेदे सति तीव्रस्पर्शस्य ज्ञानं प्रबोधज्ञानमित्यर्थः । सुप्तमनसामिति व्याख्याय व्यासक्तमनसामिति व्याचष्टे—एकदा खल्वयं विषयान्तरेति ॥ २७ ॥ § 792

४ त ] इति वदतःnvt-C
५ संवेद्यं ] परवेद्यंnvt-J
९ येष ] °तयैवnvt-C
३१ स्य ] द्रव्यस्पर्शस्य nvt-C
३२ सामिति ] व्याख्याय व्यासक्तमनसामिति नास्ति nvt-K

331/tha

तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २ । १ । २८ ॥ § 793

प्राधान्ये च हेत्वन्तरम्— § 794

तैः…णाम् । इन्द्रियैर्व्यपदेशं विग्रहसमासाभ्यां ज्ञानस्य दर्शयति— घ्राणेनेति । इन्द्रियविषयसंख्यावरोधात् तज्ज्ञानस्य तद्व्यपदेश इत्याह— इन्द्रियेति । वार्त्तिकम्प्यच्चासाधारणं तेनेति । दिगादिरप्युपाधिकल्पितेन प्राचीत्वादिना कार्यं विशेषयन् असाधारण एवेत्यभिप्रायः ॥ २८ ॥ § 795

व्याहतत्वादहेतुः ॥ २ । १ । २९ ॥ § 796

अनेन प्रबन्धेनेन्द्रियार्थसन्निकर्ष एवं कारणं ज्ञानस्य न त्वात्ममनःसन्निकर्षो न मन इन्द्रियसन्निकर्षो वा ज्ञानकारणमनेनोक्तमिति मन्वानो देशयति—व्या…तुः । § 797

व्याहतत्वादिति पूर्वपक्षसूत्रम् । अस्य तात्पर्यमाह वार्त्तिकारः—अनेनेति । नन्वियं त्रिसूत्री इन्द्रियार्थसन्निकर्षस्य प्राधान्यमाह न पुनः संयोगान्तरस्य कारणत्वं प्रत्याचष्ट इत्यत आह—इयं किलेति । कारणत्वं प्रतिषेधतीत्यभिमानः पूर्वपक्षिण इत्यर्थः । दृष्टव्याघात इति, अयौगपद्यं दृष्टं तस्य व्याघात इत्यर्थः । शेषं तु भाष्यव्याख्यया गतार्थमिति ॥ २९ ॥ § 798

नार्थविशेषप्राबल्यात् ॥ २ । १ । ३० ॥ § 799

परिहारसूत्रम्—ना…त् । § 800

अनेनेन्द्रियार्थसन्निकर्षस्य प्राधान्यमात्रमुच्यते, न त्वात्ममनःसंयोगस्येन्द्रियमनः संयोगस्य वा अकारणत्वमुच्यत इति न व्याघात इत्यर्थः । पृच्छति—असति संकल्पे प्रणिधाने चेति । प्रयत्नः प्रणिधानम् । संकल्प इच्छा । उत्तरम्—यथैवेति । नन्वस्य जात्यायुर्भोगनिमित्तत्वमवगतम्, न तु मनःप्रेरकत्वमपीत्याह—तेन ह्यप्रेर्यमाणे मनसीति । भोगो ह्यदृष्टस्य प्रधानं प्रयोजनं तन्नान्तरीयकतया जन्मायुषी अप्याक्षिपति । स्वसंबन्धिसुखदुःखसाक्षात्कारश्च भोगः । तदायतनं च शरीरम् । अप्राप्तं च मनो न तत्र भोगं च भोगविषयौ सुखदुःखे च तयोः कारणं च ज्ञानं जनयितुमर्हतीति नूनं तत्र प्राप्तिहेतोर्मनःकर्मणः कारणमदृष्टं वक्तव्यम् । अन्यथास्य सर्वद्रव्यगुणकर्मकारणता न स्यात् । मा भूत् सर्वार्थतेत्यत आह—एषितव्यं चास्येति । अणूनां विशेषणं भूतसूक्ष्माणाम् इति ॥ ३० ॥ § 801 332/tha

॥ प्रत्यक्षलक्षणपरीक्षाप्रकरणम् ॥

४ स्य ] °संख्यानुरो°nvt-C

१५ मिति ] व्याख्यातमितिnvt-C

## २.१.४ प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम्

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ २ । १ । ३१ ॥ § 803

अतः परमिदानीमिति । न ह्यवयवी नाम कश्चिदर्थान्तरभूतोऽवयवेभ्योऽस्ति, अपि त्ववयवा एव परमार्थसन्तः । तेषु च कतिपयानवयवान् गृहीत्वा तत्सहचरितानवयवाननुमाय प्रतिसंधानजेयं वृक्षबुद्धिस्तानेवावयवानालम्बमानानुमानमिति प्रत्यक्षस्यानुमानेऽन्तर्भावाद् विभागसूत्रेण न्यूनाधिकसंख्याव्यवच्छेदो नोपपद्यत इत्यर्थः । § 804

निराकरोति—न, यथासंभवं विकल्पानुपपत्तेः । एकदेशो ह्यवयविन आधार इति । एकश्चासौ देशश्चेत्येकदेशः । देशश्चाधारो न चाधेयो ह्यवयवीति कथमाधार इत्यर्थः । अहो शब्दार्थकौशलमिति शब्दे चार्थे च कौशलमित्यर्थः । अर्थे तावदकौशलमाह—अकार्येति । कार्यस्यैकस्य कारणानां तदेव कार्यं कर्तुं परस्परप्रत्यासत्तिर्भवति, यथा मृद्दण्डचक्रसूत्राणां घटे कार्ये
333/tha जनयितव्ये प्रत्यासत्तिः । कार्यणां चैकसामग्रीजन्मनां परस्परप्रत्यासत्तिः, यथा रूपरसगन्धस्पर्शानाम् । कार्यकारणयोर्वा यथाग्निधूमयोः । येषां तु न कार्यकारणभावो, नैककार्यत्वं वा, नैककारणत्वं वा, तेषां कुतो नियमवती प्रत्यासत्तिरित्यर्थः । शब्दाकौशलमाह—न च परस्परेति । अवयविनं दधदवयवान्तरमवयवान्तरमपेक्षते, ततश्चावयवाः परस्परोपकारिणो भवन्ति । अवयव्यभावे तु न परस्परोपकारिणः, कथमवयवा इत्यर्थः । § 805

न चावृक्षप्रतिसन्धानजेति । स्वस्तिमतीं हि गां गृहीत्वा कालाक्ष्यां गवि गौरिति प्रतिसन्धानं दृष्टम्, न त्वश्वं गृहीत्वाश्वान्तरे गौरिति प्रतिसन्धानं दृष्टम् । तत् कस्य हेतोः ? तयोरगोत्वात् । एवमर्वाग्भागपरभागाणामवृक्षत्वाद् वृक्ष इति प्रतिसन्धानं न भवेदित्यर्थः । यद्युच्येत मा भूद् वृक्षरूपधर्मिग्रहः पूर्वम्, अर्वाग्भागं तु धर्मिणं वृक्षविशिष्टमनुमाय प्रतिसन्धास्यतीत्यत आह—न चानुमानम् । कस्मादित्यत आह— अनुमान इति । नायमनुमाता पूर्वमनुपलभ्याग्निमनुमानेन च धूमस्य विशेषणमग्निं प्रतिपद्य प्रतिसंधत्ते अयं धूमोऽयं चाग्निरिति । अथ पूर्वं प्रतिसन्धानं पश्चादनुमानमित्यत आह—न च प्रतिसंधायेति । प्रतिसन्धानसमय एवाग्नेरवगतत्वाद् भवितव्यमत्राग्निनेति व्यर्थमनुमानं स्यादित्यर्थः । अभ्युपेत्याह—प्रतिसंधायापि चेति । § 806

किं चार्वाग्भागमयमिति । स भागवान् भागो न भवति किं तु भाग्येव । कस्मान्न पश्यतीत्यत आह—नार्वाग्भागपरभागौ संबद्धौ । एकावयविसमवायेन हि परस्परसंबद्धौ स्याताम्, न चावयव्यस्ति, नापि संयुक्तौ संयोगस्याप्यवयविनिरासमार्गेणापास्तत्वादित्यर्थः । पृच्छति—कथं पुनरिति । उत्तरम्—नित्यमर्वाग्भागेनेति । संबन्धस्तावन्नास्तीत्युक्तमेव । तमभ्युपेत्य

९ च ] शब्देऽर्थे वा nvt-C

२२ नुमाय ] वृक्षविशेषम् nvt-C

तूत्तरम्—सत्यं संबद्धाविति । सत्यपि संबन्धे अशक्यग्रहोऽसावित्यर्थः । सत्यं संबद्धावित्ययमभ्युपगमवाद एव । § 807

यच्चेदमुच्यते प्रतिसन्धानप्रत्ययजेति । पूर्वं सत्यपि वृक्षे अवयवानामवृक्षत्वान्नावयवेषु प्रतिसन्धानजा वृक्षबुद्धिरित्युक्तम् । संप्रति तु वृक्षस्यासत्त्वेन नावयवेषु वृक्ष इति प्रतिसन्धानमित्यपौनरुक्त्यम् । रूपं च मयोपलब्धं रसश्चेति । य एवोपलब्धा रसप्रत्ययोपरञ्जितः स एव रूपप्रत्य- 334/tha योपरञ्जित इत्यर्थः । प्रमाणस्य यथाभूतार्थपरिच्छेदकत्वादिति । यथा भ्रान्तमप्यनुमानमर्थसंबन्धेन प्रमाणमिति न भवति तथा प्रथमेऽध्याये दर्शितम् । प्रधानानुकारेण भ्रान्तिरिति विपरीतख्यातौ सत्याम् । सा चोपपादिता प्रथमाध्याये । § 808

न, तथाशब्दस्यार्थानाभिधानदिति । कः पुनरयं तथाशब्दार्थः, परमाणूनां रूपं वा नैरन्तर्यं वा संयोगभेदो वा उत्पादभेदो वा ? यदि रूपमात्रम्, तद् घटादिष्वपीति तेष्वपि वृक्षबुद्धिः स्यात् । अथ रूपभेदः, क्षणान्तरेणावृक्षः स्यात्, न हि तत् पूर्वं रूपम् । अथ नैरन्तर्यम्, तद् घटादिष्वप्यस्ति । न वा क्वचिदपि गन्धरसरूपस्पर्शपरमाणुव्यवधानात् । न संयोगो भवद्भिरास्थीयत इति कुतस्तद्भेदः ? उत्पादभेदोऽपि हि परमाणूनां रूपमेव । न हि परमाणुव्यतिरिक्तः कश्चिदस्ति तेषामुत्पादः । *रूपं च पूर्वं विकल्पितम् । यदि हि क्वचिदवयवसन्निवेशो वास्तवः पूर्वापरभागादिशब्दप्रवृत्तिहेतुरूपलब्धः स्यात्, ततस्तथाशब्दार्थः प्रतीयते । न तु भवतां क्वचिदेष वास्तवः, वस्तुसतां परमाणूनामभागत्वादित्यर्थः । सामान्यतोदृष्टे धर्मिविषयकमपि प्रत्यक्षं नास्तीति भ्रान्तः पृच्छति—कः सामान्यतोदृष्टस्येति । उत्तरम्—अयं विशेष इति । द्विकस्य प्रत्यक्षेण प्रसिद्धौ सामान्यतोदृष्टं प्रवर्तते त्रिकस्य तु प्रत्यक्षेण प्रसिद्धौ प्रत्यक्षतो दृष्टमिति विशेषः । सर्वस्याप्रत्यक्षत्वाद् वृक्षबुद्धिस्तु न प्रत्यक्षतोदृष्टादनुमानात् नापि सामान्यतोदृष्टादित्याह—भवत्पक्षे त्विति ॥ ३१ ॥ § 809

न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ २ । १ । ३२ ॥
§ 810

न प्रत्यक्षस्यानुमानता । कुतः ? यावदेकदेशभूतस्यार्थजातस्य ग्रहणम्
§ 811

एक देशग्रहणादुपलब्धेः § 812

इत्यत्र हेताविष्यते तावदपि प्रत्यक्षेण, अन्यथैकदेशग्रहणाभावेनानुमानानुदयात्, अनुमानान्तरेण वा तद्ग्रहणेऽनवस्थापातात् । अतस्तावतोऽर्थजातस्य 335/tha प्रत्यक्षेणोपलम्भात् सर्वं प्रत्यक्षमनुमानमिति प्रतिज्ञा हेतुना एकदेशग्रहणादुपलब्धेरित्यनेन बाधिता, एकदेशग्रहणस्य प्रत्यक्षेणानभ्युपगमे वा प्र-

१३ रेणावृक्षः ] °रेण वृक्षः nvt-J
१७ *] स्वरूपं च तेषां *Pañjikā*

माणान्तरस्य तत्रानुपपत्तेरसिद्धो हेतुः । सेयमुभयतः पाशा रज्जुरित्यर्थः । अनुमानेनैकदेशग्रहणात् नासिद्धो हेतुरित्यत आह भाष्यकारः—न चैकदेशग्रहणमिति । अनुमितिः अनुमानम् भावयितुं कर्तुम् । अनवस्थाप्रसङ्गेन हेत्वभावादिति । § 813

तदेतत् सूत्रं वार्त्तिककारो व्याचष्टे—विरुद्धश्चायमिति । नन्वेकदेशप्रत्यक्षत्वेऽपि तन्मात्रं प्रत्यक्षं न तु सर्वं प्रत्यक्षं स्यादित्यत आह—न चैवं प्रतिज्ञायते सर्वमिति । अप्रकारवदिति । अनुमानस्य हि त्रयः प्रकारा यादृशा न तादृशाः प्रत्यक्षस्येति । त्रिकालविषयत्वाच्चेति । अनेन परोक्षार्थत्वं सूचयत्यनुमानस्य । प्रत्यक्षं त्वपरोक्षार्थविषयम् । तस्मादपि भेद इत्यर्थः । लिङ्गपरामर्शज्ञानस्य प्रत्यक्षफलस्यापि प्रमाणस्य सतो लिङ्गलिङ्गिसंबन्धस्मृत्यनुग्रहोऽस्त्युत्पत्तौ । न त्वेवं प्रत्यक्षस्य प्रमाणस्य सत उत्पत्तौ वा कार्ये वा लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षेत्यर्थः । § 814

अन्यथापि चेत्यादि भाष्यं व्याचष्टे—इतश्चेति । न त्वेतदनुमानम् इत्यादि भाष्यार्थ माह—इन्द्रियेति । इन्द्रियसंबन्धाच्चार्थस्य प्रत्यक्षमुत्पद्यते, न त्वनुमानमेवमित्यर्थः । § 815

अपि चावयविनोऽसत्त्वं मन्यमानेन त्वयैकदेशमात्रोपलब्ध्या वृक्षबुद्धेरनुमानत्वमुक्तम् । न त्वियमेकदेशमात्रोपलब्धिरपि तु तस्य च तत्सहचरितस्य चावयविन उपलब्धिलक्षणप्राप्तस्य सिद्धेरित्याह—न चैकदेशोपलब्धिरिति । तदेतद्भाष्यमनुभाष्य वार्त्तिककारो व्याचष्टे—न चेति । § 816

अत्र देश्यभाष्यम्—अकृत्स्नग्रहणादिति चेत् ? उत्तरभाष्यम्—न कारणत इति । देश्यविवरणम्—न चावयवा इति । एकदेशग्रहणनिवृत्त्यर्थं हि त्वया अवयविग्रहणमास्थीयते । न चैतावता कृत्स्नग्रहणसंभवो यत एकदेशग्रहणनिवृत्तिः स्यात् । न ह्यवयविग्रहणेऽप्यवयवा कृत्स्ना गृहीता भव-
336/tha
न्ति, नाप्यवयवी, तस्यार्वाग्भागस्य ग्रहणेऽपि मध्यपरभागस्थस्याग्रहणादिति देश्यभाष्यार्थः । § 817

तदेतद् भाष्यं वार्त्तिककारो व्याचष्टे—नावयविन उपलब्धिरिति । यत् खलु बहुषु वर्तते तत् प्रत्येकं परिसमाप्त्या वा यथा कलविङ्ककण्ठगुणः, एकदेशेन वा यथास्रक्सूत्रं कुसुमेषु । न च कृत्स्नैकदेशाभ्यां प्रकारान्तरमस्ति । अनयोरन्यतरनिषेधस्यान्यतरविधाननान्तरीयकत्वात् नित्यत्वानित्यत्ववदिति । न चैकत्र कृत्स्नसमाप्तावन्यत्र तस्यैव संभवः । तथा सति कृत्स्नसमाप्तेरसंभवात् । तस्माद् योऽवयवान्तरे दृश्यते नासाववयवी । तथा चावयवा एवेति प्राप्तमित्यपि द्रष्टव्यम् । न ह्यस्य कारणव्यतिरेकेणेति । यदि ह्येकदेशान्तराण्यस्य स्युः, ततस्तेष्वपि वृत्तावेकदेशान्तरकल्पनायामनवस्थाप्रसङ्ग इत्यर्थः । पूर्वपक्षवाद्येव प्रश्नपूर्वकं क्रियातिपत्तिमाह—अथोपलभ्यमान इति । § 818

११ त] अतःnvt-C
२७ माप्त्या] समष्ट्याnvt-C
३१ वात्] °रभावात्nvt-C

उत्तरभाष्यविवरणपरं भाष्यम्—कृत्स्नमिति वै खल्वित्यादि । तदेकग्रन्थतया अङ्ग तु भवानित्यादि संबोधनोपक्रमं भाष्यं व्यवस्थितम् । § 819

तदेतद् वार्त्तिककारो व्याचष्टे—एकस्मिन्निति । अयमभिसन्धिः । यत् तावत् कुसुमेषु सूत्रमेकदेशेन वर्तमानं दृष्टमिति तदनुपपन्नम् । यदि कुसुमेषु सूत्रावयवा वर्तन्ते किमायातमवयविनः सूत्रस्य ? न ह्यन्यस्मिन् वर्तमाने अन्यद् वर्तत इति युक्तम् । न चावयविनोऽभावे भवत्येतदपि सूत्रमवयव्यवयवैर्वर्तत इति । अथ मा भूत् सूत्रं नामावयवी एकदेशास्तु कुसुमेषु वर्तन्त इति ब्रूमः । तथा च सति नैकमनेकत्रैकदेशेन वर्तते किं त्वनेमनेकत्रेति । तथा च कुसुमपरमाणावेकस्मिन् सूत्रपरमाणुरेको वर्तत इत्युक्तं भवति । न च वृत्तिरपि परमाणुभ्यामतिरिच्यते यतो भवति वर्तत इति । तस्मात् निरन्तरोत्पाद एव परमाण्वोर्वृत्तिरिति व्यवहर्तव्यः, न पुनः परमाणुस्वरूपातिरिक्ता काचिद् वृत्तिरस्ति वस्तुसती । एतेन कलविङ्कण्ठगुणवत् प्रत्येकं कृत्स्नपरिसमाप्तिर्वृत्तिरित्यपि व्याख्यातम् । तथा च वृत्तेरभावादेकदेशेन वा कार्त्स्न्येन वा वर्तत इति रिक्तं वचः । यथालोक- 337/tha
प्रत्ययं तु वृत्तेरभ्युपगमे सूत्रं कुसुमेषु नैकदेशेन वर्तते किन्तु तदेकदेशाः सूत्रं च कुसुमेषु वर्तत इति लौकिकोऽनुभवः । तत्र सूत्रस्य वृत्तिः कुसुमेषु नैकदेशेन, नापि कार्त्स्न्येन किं तु स्वरूपतः । एवमवयवेष्ववयविनोऽपि स्वरूपत एव । इयांस्तु विशेषो यत् सूत्रस्य कुसुमेषु वृत्तिं प्रति सन्ति भागा अपीति सूत्ररूपं च भागाश्च कुसुमेषु वर्तन्त इति । अवयविनस्तु स्वावयवेषु वृत्तिं प्रति नावयवान्तराणि सन्तीति रूपमात्रेण तत्र वर्ततेऽवयवीति । तस्मात् न किञ्चित् क्वचित् कार्त्स्न्येन एकदेशेन वा वर्तमानं दृष्टमिति तयोर्वृत्तिं प्रति व्यापकत्वमसिद्धम् । रूपस्यैव तु व्यापकत्वम् । तच्चावयविन्यप्यस्तीति व्यापकानुपलब्धेरसिद्धेर्नावयविनोऽवयवेषु वृत्तिनिवृत्तिरिति सिद्धम् । यथा च कृत्स्नैकदेशशब्दौ नावयविरूपे प्रवर्तेते तथोक्तं वार्त्तिककृतेति । नैकदेशेन वर्तते, न कार्त्स्न्येन वर्तते, अथ च वर्तत इति कैषा वाचो युक्तिः ? यद् यथाभूतं वस्तु तत् तथा निर्दिश्यत इत्येषेति योजना । § 820

उभयेन व्याघातादिति । एकस्यानेकवृत्तेरेकदेशेन कार्त्स्न्येन च व्याघात इत्यर्थः । स एव हि धर्मो विकल्प्यते यो विकल्प्यमानो धर्मिणं न बाधते । यथा शब्दो नित्योऽनित्यो वेति । यस्त्वधिकरणं धर्मिणमेव बाधते नासौ धर्मविकल्पो न्याय्यः, आश्रयस्याप्रसिद्ध्या तस्यानुपपत्तेरिति । § 821

यस्तु मन्यते यत् सत् तत् सर्वमनवयवम्, यथा विज्ञानम् । सच्चेदं नीलाद्यनुभूतावसितमिति स्वभावहेतुः, सत्तामात्रानुवर्तित्वाद् अनवयवत्वस्य । तथा हि एकस्य सत्त्वं विरुद्धधर्मासंसर्गेण व्याप्तम् । तद्विरुद्धश्च विरुद्धधर्मसंसर्गो नीलादीनां सावयवत्वे प्रसजन् स्वविरुद्धं विरुद्धधर्मासंसर्गं निवर्तयंस्तद्व्याप्यं सत्त्वमपि निवर्तयति । तथा हि पाण्यादिकम्पे तत्स्थानोऽव-

६ म्] इत्युक्तम्nvt-C

यव्यपि कम्पत इति तस्य जङ्घादिष्वप्यवयवेष्वविशेषावस्थानस्याप्यवयविनः कम्प उपलभ्येत । न चोपलभ्यते, तस्मात् स एव तदानीमेव कम्पते न कम्पते चेति विरुद्धधर्मसंसर्गः । अथावयवेषु कम्पमानेष्वपि नावयवी 338/tha तत्समवेतः कम्पते, ततश्चलाचलयोर्वस्त्रोदकवद् युतसिद्धिप्रसङ्गः । एवम् एकस्य चावयवस्यावरणे तत्तदवस्थानोऽवयव्यावृत इति अवयवान्तरस्थानस्याप्यावरणप्रसङ्गः, अभेदात् । न वास्य क्वचिदप्यावरणमित्यविकलो दृश्येत । अवयवस्यावरणं नावयविनस्तस्यान्यत्वात् । न ह्यन्यस्यावरणेऽन्यदावृतं भवत्यतिप्रसङ्गादिति चेत् ? न, अर्धावरणेऽप्यनावृतत्वादवयविनः प्राग्वदविकलग्रहणप्रसङ्गः । अवयवदर्शनद्वारेणावयविनो दर्शनाददृष्टावयवस्यावयविनोऽप्रतिपत्तिरिति चेत् ? न, विकल्पासहत्वात् । किं सर्वावयवदर्शनद्वारेणावयविनः प्रतिपत्तिरुत कतिपयावयवदर्शनद्वारेण ? पूर्वस्मिन् कल्पे नावयवी कदाचिदपि दृश्येत । न ह्यसर्ववित् सर्वावयवोपलम्भक्षमः, अर्वाग्भागेन मध्यपरभागयोर्व्यवधानात् । कतिपयदर्शनेन तु तदभिव्यक्तौ अल्पावयवदर्शनेऽपि बह्ववयवदर्शनवत् स्थूलोपलम्भप्रसङ्गः । रक्ते चैकस्मिन्नवयवे तत्स्थानोऽवयव्यपि रक्त इत्यवयवान्तरेऽपि तस्याभेदाद्रागोपलम्भप्रसङ्गः । अवयवमात्ररागे वा तत्स्थानस्यावयविनो रूपमरक्तं दृश्येत, सोऽयं विरुद्धधर्मसंसर्ग इति । § 822

तदनेनाभिप्रायेण वार्त्तिककारो ग्रहणाग्रहणलक्षणेन विरुद्धधर्मसंसर्गेण सर्वानेव विरुद्धधर्मसंसर्गानुपलक्षयति—ग्रहणाग्रहणेति । निराकरोति—न भेद इति । इदं तावदत्र वक्तव्यम्, यद्यनुभूतावसितं नीलमनवयवत्वेन साध्यते ततः सिद्धसाधनम् । नो खलु रूपविशेषो नीलादिरस्माकमपि सावयवो गुणत्वात् । तदाश्रयो घट इति चेत् ? ननु घट इत्यपि च रूपरसगन्धस्पर्शा एवार्थक्रियाकारिणः तथा व्यपदिश्यन्ते ते च गुणत्वेन निरवयवा एव न तु तदाश्रयोऽस्ति द्रव्यं नाम । अथ परसिद्धं द्रव्यं रूपाद्याश्रयं पक्षीकृत्य परसिद्धेनैव तस्य सत्त्वेनानवयवत्वं साधयति । सोऽयमसिद्धमसिद्धेन साधयन् महानैयायिकत्वमात्मनो दर्शयति । न हि स्वयमप्रतीतौ हेतुधर्मसाध्यधर्मिणौ परप्रत्यायनाय कल्पेते । यदाहुः § 823

> योऽपि तावत् परासिद्धः स्वयं सिद्धोऽभिधीयते ।
> भवेत् तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया ॥ इति ।§ 825

339/tha

न च प्रसङ्गसाधनेऽप्येतद् भवितुमर्हति । सत्त्वस्य सावयवत्वेन विरोधाभावात् । न चैकस्य विरुद्धधर्मसंसर्गो बाधकं प्रमाणम् । न तावदेकस्यावयविनो ग्रहणाग्रहणे, अवयवावरणेऽपि तस्य कतिपयावयवावस्थानस्य

५ स्य ] एकस्यावयस्य nvt-C
२३ क्रियाकारिणः ] एवैकार्थक्रि nvt-J
२४ व्यं ] इत्थं nvt-C
३० द् ] °नमप्येतद्nvt-J
३० स्य ] न चnvt-C
३१ र्गो ] °द्धधर्मोnvt-C

ग्रहणादेव । न च बह्ववयवस्थानस्य ग्रहण इव कतिपयावयवस्थानस्य ग्रहणे तादृशस्थौल्यानवभासादनवभासोऽवयविन इति साम्प्रतम् । परिमाणभेदो हि स्थौल्यमवयविधर्मः । न च तस्य तादृशस्यानवभासेऽवयवी नावभासितो भवति । तस्य ततोऽन्यत्वात् । तस्मादिन्द्रियसन्निकर्षमात्रादवयावनो ग्रहणम् । इन्द्रियेणार्थस्य, इन्द्रियावयवैरर्थस्य, इन्द्रियेणार्थावयवानाम्, इन्द्रियावयवैरर्थावयवानां सन्निकर्षात् परिमाणभेदग्रणमिति सामग्रीभेदादवयवितत्परिमाणभेदयोर्ग्रहणाग्रहणे उपपद्येते । एतेनार्वाग्भागसहितस्य ग्रहणेऽपि न मध्यभागपरभागसहितस्याग्रहणं कथञ्चिद् विरोधमावहतीत्युक्तं भवति । न चावयवकम्पेऽप्यवयविनः कम्पो येनावयवान्तरेऽपि कम्पप्रसङ्गः, भिन्नत्वादवयवावयविनोः । तथा सति युतसिद्धिप्रसङ्ग इति चेत् ? का पुनरियं युतसिद्धिः ? किं भेदोऽवयवावयविनोः, आहोस्विदसंबद्धस्य विद्यमानत्वम् ? यदि भेदः सोऽस्माभिरिष्यत एव । अथासंबद्धस्य विद्यमानत्वम्, तत् सत्यपि पृथग्गतिमत्त्वे नावयविनोऽस्ति । जातः संबद्धश्चेत्येकः कालः । तथा हि नावयवी अवयवासंबद्धोऽस्ति । न हि जातिमान् जात्यसंबद्धोऽस्ति । न गुणकर्मणी द्रव्यासंबद्धे स्तः । न च विशेषो द्रव्यासंबद्ध इति । § 826

ये त्वप्राप्तिसंयोगौ युतसिद्धिमाहुः, तैरवयवावयविनोरसंयोगे हेतुर्वक्तव्यः । अयुतसिद्धिरिति चेत् ? न, तस्या एवासंयोगेन बुभुत्सनादिति । रक्तारक्तत्वं च नावयविन एकस्य, तस्यारक्तत्वादेव । तत्संयोगिनस्तु महारजनस्य रक्तत्वात् तस्य च पटादरक्तादन्यत्वात् । पटो रक्त इति तु भ्रमः । न त्वनेन विभ्रमेण सर्वत्र भवितव्यम्, तस्य महारजनयोगनिमित्तत्वात् । तस्य च पटवृत्तित्वात् । पटस्य च सर्वत्राविशेषात् । पटस्य वा क्वचिदसंयोगे [340/tha] संयुक्तासंयुक्तभेदप्रसङ्गः । न हि स एव तदैव तत्रैव भवति न भवति चेति युज्यते । तस्मात् संयुक्तात् पटादन्योऽसंयुक्तः पट इति प्राप्तम् । § 827

अत्रोच्यते । एषा तावत् प्रमेयगतिः, भावाभावौ परस्पराभावात्मानौ भावनिवृत्तिरेवाभावः । अभावनिवृत्तिरेव भावः । न तु भावाभावाभ्यामन्या तयोर्निवृत्तिः । तेन नैतयोः कदाचिदपि परस्परात्मत्वं भवितुमर्हति अदर्शनात् । एवमनयोराश्रयैकत्वनानात्वे अपि यथादर्शनं व्यवस्थापनीये । यथा तस्यैव श्वैत्यस्य यदा प्रासादे सद्भावस्तदैवाभावः काक इति । एवं च य एव कुम्भः श्यामः स एव पश्चादग्निसंयोगादश्यामः । यः पुनरस्य परिमाणभेदो नासौ सति कुम्भे विनश्यति । तत्र किमेवमुच्यतां परिमाणवत् श्यामतापि न नश्यतीति ? एवं प्रमेयवैचित्र्यं दर्शनवैचित्र्यव्यवस्थापितं यथाभ्युपेयते, तथा तस्यैव संयोगस्य तस्मिन्नेवैकदा भावाभावौ व्यवस्थापनीयौ तथैव दर्शनादिति । न हि दृश्यमानस्य दृश्यमानान्तरवैधर्म्येण रूपमुपलभ्यमानं शक्यमपाकर्तुम् । मा भूद् दृश्यमानवैधर्म्येण दृश्यमानरूपान्तरापाकरणम् अविशेषात् । तद्दर्शनानुरोधात् प्रमेयवैचित्र्यसिद्धेरुपपन्नः संयोगशब्दबुद्ध्यादीनां तत्रैव त-

१३ कालः ] °त्येकोऽर्थःnvt-J
२४ राभावात्मानौ ] °रविरहात्माnvt-C
३० तां ] परिमाणावस्थापत्तावपिnvt-C
३४ म् ] दृश्यमानान्तररूपापा°nvt-J

दानीमभावो भावश्चेति । अत एवैषामव्याप्यवृत्तित्वमास्थीयते । रूपादीनां तु न दृष्टस्तत्रैव तदानीमभावो भावश्चेति तेषां व्याप्यवृत्तीनां भावाभावौ युगपदेकत्र विरोधिनाविति सिद्धो रक्तारक्तयोरेकत्राविरोधः सह दर्शनादिति ।
§ 828

यत् पुनर्यदनेकवृत्ति तन्नाना, अनेकवृत्तिश्चावयव्यभ्युपगतः इति प्रसङ्गसाधनं स्वभावहेतुः । नानात्वाभावादनेकवृत्तित्वाभाव इति च प्रसङ्गविपर्ययो व्यापकानुपलब्धिरिति । तत्र ब्रूमः । एकत्वानेकवृत्तित्वयोरविरोधेन नानात्वस्य व्योपकत्वासिद्धेर्न प्रसङ्गो नापि तद्विपर्ययः । यथैव नीले परिच्छिद्यमाने तदभावो व्यवच्छिद्यते, अन्यथा न नीलं परिच्छिन्नं स्यात् । एवं तदभावाविनाभावि पीतमपि नीलपरिच्छेदकं प्रत्यक्षं व्यवच्छिनत्ति, तथैकावयवसंसर्गे अवयविनः परिच्छिद्यमाने तदभावो व्यवच्छिद्यते तदभाववन्तश्चाव-
341/tha यवान्तरसंसर्गा इति तेऽपि व्यवच्छेत्तव्याः । तदव्यवच्छेदे तदभावोऽपि न व्यवच्छिद्येतेति स एव तदानीमेव तत्र भवेच्च न भवेच्चेति दुर्घटमापद्येत । सोऽयमेकत्वानेकवृत्तित्वयोर्विरोध इति चेत् ? हन्त, भावपरिच्छेदे तदभावो व्यवच्छिद्यत इति युक्तम्, भावपरिच्छेदलक्षणत्वात् तदभावव्यवच्छेदस्य । न हि भावादन्यस्तव भावाभावो नाम । भावान्तराणि तु कस्माद् व्यवच्छिद्यन्ते ? तदभावाविनाभावादिति चेत् ? कुतः पुनरयं भावान्तराणां भावाभावाविनाभावः ? पीतादिभावतादात्म्येन कदाचिदपि नीलस्य भावस्यानुपलम्भादिति चेत् ? यत्र तर्ह्येकावयववृत्तेरप्येकस्यावयवान्तरेषु वर्तमानस्य तादात्म्यं दृश्यते, न तत्रैकावयवसंसृष्टाभावाविनाभावोऽवयवान्तरसंसृष्टस्य । तस्मान्नैकत्वनानावृत्तित्वयोर्विरोधः । अपि चैकं विज्ञानमनेकै रूपचक्षुरालोकनमनस्कारैः कथं संबध्यते ? संबध्यमानं वा कथमेकम् ? न वास्तवः कश्चित् कार्यकारणभावो नामास्ति संबन्धः, प्रतीत्यसमुत्पादमात्रं तदिति चेत् ? अथ कस्माद् रूपाद्येव प्रतीत्य रूपज्ञानं जायते न पुना रसाद्यपि ? स्वभाव एव तेषां तादृशो यतस्तानेव प्रतीत्य विज्ञानं जायते, न पुना रासभादीनिति चेत् ? हन्त भोः स्वभावान् भिन्नान् प्रतीत्य कथमेको भावो जायते ? को विरोधः ? न हि कार्यकारणयोस्तादात्म्यं येन कारणस्वभावानुरोधः कार्यस्य भवेदिति चेत् ? तत् किमवयवावयविनोरप्यभेदः, समवायस्य वा ताभ्याम्, येनावयवभेदेऽवयविनो वा समवायस्य वाभेदो भवेदिति समः समाधिः । तस्माद् यद् यदवयविनि प्रमाणं वक्ष्यामः, तत्तदसति बाधकेऽप्रत्यूहमवयविनमवस्थापयिष्यतीति सिद्धम् । यः पुनर्मन्यते अवयवसमुदाय एवावयवीति, तं प्रत्याह भाष्यकारः—समुदाय्यशेषतेत्यादि । सुगमम् ॥ ३२ ॥ § 829

॥ इति प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम् ॥

342/tha

१३ वेच्चेति ] भवेन्न भवेद्वेति nvt-C
१९ रेषु ] वृत्तेरप्यवय° nvt-J

## २.१.५ अवयविपरीक्षाप्रकरणम्

साध्यत्वादवयविनि सन्देहः ॥ २ । १ । ३३ ॥ § 831

*परं प्रत्यसिद्धत्वमेवावयविनः साध्यत्वम् । स खल्वेवं मेने संविन्निष्ठा हि विषयव्यवस्थितिः । स एव च संविदा व्यवस्थाप्यते, यस्तस्या विषयः । स एव च विषयो यः स्वाकारमस्यामर्पयति । न च निरन्तरोत्पन्नरूपादिपरमाण्वतिरिक्तमवयव्याकारं बिभ्रतीं संविदमीक्षामहे, किं तु निरन्तरोत्पन्नरूपादिपरमाण्वाकाराणाम् । स्थौल्यं च न यद्यपि परमाणूनां प्रत्येकमस्ति तथापि प्रतिभासधर्मो बहुत्वादिवन्न पुनवरवयविनमेकमवस्थापयितुमर्हति । यदाहुः सोऽयममूल्यदानक्रयी स्वाकारं च ज्ञाने समर्पयति प्रत्यक्षतां च स्वीकर्तुमिच्छत्यवयवीति । तदेवं परं प्रत्यवयविनोऽसिद्धेर्विप्रतिपत्तिः । ततः साधकबाधकप्रमाणाभावे सति संशय इत्यर्थः । न साध्यत्वं स्वरूपेण संशयहेतुरिति मत्वा भाष्यकृद् आह—एवं च सतीति । परासिद्धत्वे सतीत्यर्थः । § 832

साध्यत्वादिति यथाश्रुतं सूत्रं गृहीत्वा वार्त्तिककारो विकल्प्याक्षिपति—किं पुनरत्रेति । कुतश्चिद् हेतोः तस्य धर्मिण अभ्यनुज्ञानम् अङ्गीकारम् अर्हति सर्वस्यैव हेतोराश्रयासिद्धत्वादिति भावः । अथाव्यतिरेक इति, सत्येव धर्मिणि तस्यावयवेभ्योऽभेदो धर्मः साध्य इत्यर्थः । अवयव्यपेक्षत्वादिति । पटमपेक्ष्य हि तन्तवोऽवयवा भवन्ति, नो खलु रण्डाकरण्डावस्थितास्तन्तवोऽवयवा उच्यन्ते इति । न च षष्ठीति । पटस्यावयवास्तन्तव इति न षष्ठी । तथा च पटस्येति विशेषणाभावे अवयवत्वमात्रं हेतुः स्यात् । स च विरुद्ध इत्यर्थः । *अनर्थान्तरभावे नावयवत्वमित्यस्योदाहरणम्—न तन्तुस्तन्तोरिति । षष्ठ्यर्थाभावे तूत्तरमुदाहरणमिति । तन्तूनां तन्त्ववयवत्वं ब्रवीतीति । तच्छब्दस्य प्रधानपरामर्शित्वादित्यर्थः । अवयवशब्दस्य चेति । पूर्वं कारण- 343/tha
मविवक्षित्वा अवयवशब्दस्य परापरशब्दवत् संबन्धिशब्दतामात्रं गृहीत्वोक्तम् । संप्रति तु कारणत्वं विवक्षित्वोच्यत इत्यपौनरुक्त्यम् । § 833

देशयति—नैव हीति । असत् क्रियमाणं निर्वर्त्यम् । न चास्माकं सत्कार्यवादिनां तदस्तीत्यर्थः । दूषयति—एतच्चेति । न हि पटाकारप्रत्ययस्तन्तुमात्रालम्बनो, रण्डाकरण्डावस्थितेष्वपि तन्तुषु प्रसङ्गात् । न च तन्तुपरिमाणभेदालम्बनः, तस्य पूर्वमपि सत्त्वात् । असत्त्वे वा सत्कार्यवादव्याहतिप्रसङ्गात् तस्यैवासत उत्पत्तेः । तस्मात् तन्तुष्वपटेषु पट इत्यकामेनापि मिथ्याप्रत्यय इति वक्तव्यम् । तथा च दूषणमिति ॥ § 834

प्रतिज्ञैकदेशश्चेति संयोगमात्रपक्षीकरणे इत्यर्थः । तान्येव तानीति तान्येवाप्रत्यासन्नानि तानि प्रत्यासन्नानि, क्षणभङ्गपरिणामप्रतिक्षेपादित्यर्थः ।

२ *] न, परंnvt-C
१५ त्वादिति ] °सिद्धेरितिnvt-C
२० *] भावेन अव nvt-K

यथा दण्डाद्यनेकं कारणमिति दण्डवेमाद्यनेकं कारणं घटपटादीनां कार्याणाम् । संयोगादिनिमित्तान्तरापेक्षमिति संयोग आदिर्येषां निमित्तान्तराणां कुम्भकारकुविन्दादीनां तानि निमित्तान्तराणि । अतद्गुणसंविज्ञानश्च बहुव्रीहिः यथा चित्रगुरिति । तेन साध्यस्यैव दृष्टान्ततेति न दोषः । विमृश्यावधारयति—वयं तु ब्रूमो विभाग उत्पन्न इति । संयोगोऽनपेक्षकर्मकारणकः कर्मकार्यत्वाद् विभागवदिति स्थिते प्रतिबन्धकापगममात्रं विभागेन क्रियत इति सिध्यति । यथा वा संयोगः साधारणकार्यद्रव्येति । यदा हि पटः पाट्यते तदा येषामवयवानामवस्थितानां संयोगानां पटाख्यं साधारणं कार्यं तस्य साधारणस्य कार्यद्रव्यस्य पटस्य च तदसमवायिकारणानां च संयोगानां केषाञ्चिद् विनाशोत्तरकालमर्धपटारम्भे तेषामेवानपेक्षाणां कारणत्वम् । विभागस्तु कर्मजन्यस्तत्र कतिपयसंयोगविनाशद्वारेण साधारणपटाख्यकार्यविनाशमात्रे व्याप्रियते । न तु विभागापेक्षा । अर्धपटे जनयितव्ये संयोगाः कारणमित्यर्थः । § 835

न हि प्रमाणमन्तरेणेति । मिथ्याज्ञानमपि प्रमाणपूर्वकं सम्यग्ज्ञानपूर्वकत्वाद् विपरीतख्यातेरित्यर्थः । वृक्षस्थितिं भावयद्भिः पूर्वापरप्रत्ययैकविषयस्य वृक्षस्य स्थितिं स्थिरतां विभावयद्भिरित्यर्थः । § 836

भेदादर्शनमिति आकारिभेदादर्शनम् । यथा घटपटावाकारिणौ भेदेन
344/tha दृश्येते, नैवमवयवावयविनौ नापि समवायसमवायिनावित्यर्थः । यस्मादयमुपनयः अवयवाश्च तन्तवोऽवयवी च पट इति । पूर्वमवयवाश्चेत्येतावन्मात्रं हेतूकृतं संप्रति त्ववयवावयविनावित्यपौनरुक्त्यम् । § 837

अन्योऽवयवार्थ इति । अवयविनोऽन्योऽवयवशब्दार्थ इत्यर्थः । प्रदेशिनोऽन्यः प्रदेशशब्दार्थ इत्यर्थः । तत्प्रदेशशब्दस्य व्यपदेशविषयत्वस्येति । तन्तवो हि पक्षीकृताः प्रधानमिति तदिति सर्वनाम्ना हेतुगतेन ते परामर्ष्टव्याः । तथा च तन्तुप्रदेशस्य व्यपदेशविषयत्वं न तन्तूनामित्यसिद्धो हेतुरित्यर्थः । § 838

तेभ्यस्तूत्पत्तेरिति कल्पितस्य हेतोर्विवरणं तन्तुभ्यस्तूत्पद्यते पट इति । § 839

उभयेन व्याघातादिति । अभ्युपगमेनानभ्युपगमेनेत्यर्थः । द्रव्यान्तरेति द्रव्यान्तरोत्पत्तिदेशव्युच्छेदो व्यवच्छेदः । यथा पटोत्पत्तिदेशादन्यो घटोत्पत्तिदेश इत्यर्थः । व्यक्त्यादिधर्मभेदेनेति आदिग्रहणेनाविर्भावसंस्थानादय उच्यन्ते । ते च कारणव्यापारात् पूर्वं नासन्निति जन्मापि तेषामपूर्वमित्यर्थः । § 840

यथा चक्रादिभ्यो रथावयवेभ्य इत्यर्थः । § 841

हिमवत्परमाणुकमिति । परमाणुग्रहणं सूक्ष्मद्रव्योपलक्षणार्थम् । न पुनः परमाणोर्द्व्यणुकादन्यत्रारम्भसंभवः । न च विवादाध्यासितः परमाणुर्न महद्द्रव्यमारभते, परमाणुत्वाद् द्व्यणुकारम्भकपरमाणुवत् । अमहत्त्वाच्च न हिमवत्परमाणुकं प्रत्यक्षं स्यात् । तस्माद्धिमवद्धिमबिन्दुभ्यां संसर्गिभ्यां संयोगादव-

यविद्रव्यमारभते । महत्त्वं चास्यावयवमहत्त्वादुत्पद्यते । तथा च चाक्षुषत्वमस्य भवति । एवं तोयदविमुक्तोदबिन्दूदधिसंयोगाद् द्रव्यान्तरोत्पत्तिः प्रतिपत्तव्या । भावोऽप्रत्यक्षः स्यादिति । भावः सत्ता । ननु यथा संयोगः संयोगिद्वयनिरूपणाधीननिरूपणस्तयोरेकस्यैवाप्रत्यक्षत्वे न प्रत्यक्ष एवमवयवाप्रत्यक्षत्वे नावयवी प्रत्यक्षः स्यादित्यत आह—न चायं पक्ष इति । संसृज्यमाननिरूपणाधीननिरूपणो हि संसर्गो युक्तः, यत् तदनिरूपणे न निरूप्यत इति । न त्ववयवी अवयवनिरूपणाधीनो यत् तेष्वनिरूपितेषु न निरूप्यत इति, त्र्यणुकस्यावयवाग्रहणेऽपि ग्रहणात् । एवं विदूरवर्तिनो हस्तिवनस्प- 345/tha त्यादेरवयवाग्रहणेऽपि ग्रहणादिति भावः । न च तत्कृतोऽस्ति भेद इति, न ग्रहणाग्रहणकृतो भेद इत्यर्थः । § 842

न हीन्द्रियमन्यस्य साङ्ख्यस्य अन्यथा सूक्ष्मत्वेन अर्थं प्रकाशयति । अन्यस्य नैयायिकस्य अन्यथा स्थौल्येन अविकल्पत्वाद् ऐकरूप्येणावस्थानादिति । § 843

प्रत्यक्षप्रमाणविरोधादिति । महाभूतानां हि मूलकारणं परमाणवः परमसूक्ष्माः । तेषामप्रत्यक्षत्वं मानसानुव्यवसायगम्यं परमसूक्ष्मविषयं मे प्रत्यक्षमिति । तदभावश्चात्मनि संयुक्तविशेषणेन मनःसन्निकर्षेण प्रत्यक्षविरोध इत्यर्थः । § 844

एके त्विति । यमेव हि त्र्यणुकं दृश्यं भवन्तोऽदृश्यावयवमाचक्षते, तमेव वयं परमाणुमाचक्ष्महे । न हि तदवयवकल्पनायामस्ति प्रमाणमिति भावः । कथमवगम्यते भिद्यते त्रसरेणुरिति, अङ्गुल्यग्राभ्यां मृद्यमानस्यास्यादर्शनं सूक्ष्मतयाप्युपपद्यते । जालसूर्यमरीचिस्थमेव हि तद्रजः कथञ्चिद् उपलभ्यते नान्यत्रेति भावः । द्रव्यत्वे सतीति सामान्यसमवायौ निवर्तयति । बाह्यग्रहणेनात्मानं निवर्तयति । अनित्यत्वाच्चेति । अनन्तावयवत्वेन मेरुसर्षवयोरभिन्नपरिमाणत्वप्रसङ्गात् । महाभूतमूलकारणमनवयवं कल्पितम् । न च द्रव्यमनवयवं विनश्यति आकाशादिवदिति नित्याः परमाणवः । त्रसरेणुस्त्वनित्य इति न परमाणुः । अनित्यत्वमेव कुत इत्यत आह—सामान्यविशेषवत इति । § 845

संहतानामिति । रूपादीनां संघातः परमाणुरिति । न चासंहतप्रतिषेध इति । अप्रतिषेधे वा त एवासंहताः परमाणव इति भावः । § 846

संयुज्यते चायं विभज्यते च अयमवयव्यन्तरेणेति । न व्यतिरेक इति । यथा भिन्नात् संयोगप्राप्त्यभावो व्यावृत्त एवमभिन्नादपि । न हि स एव तन्तुस्तेनैव तन्तुना प्राप्यत इत्यर्थः । सर्पकुण्डलोदाहरणे अन्वयी हेतुरित्यर्थः । सत्त्वरजस्तमसां न संयोगः किं तु तेषां स्वाभाविकः स कोऽपि परिणतिभेदो यतः संभूयकारित्वमित्यर्थः । § 847

346/tha

१९ हे] आतिष्ठामहे nvt-J
२४ म्] कल्पनीयम् nvt-C

गुरुत्वान्तरकार्याग्रहणादिति । अवयवगुरुत्वाद् यत् गुरुत्वान्तरमवयविनः तस्य यत् कार्यमवनतिविशेषस्तस्याग्रहणादित्यर्थः । सत्यमुपपादितः पक्षधर्म इति । कार्याग्रहणेन कार्याभावस्ततः कारणस्य गुरुत्वस्याभाव इत्यर्थः । प्रतिषेध्यं कार्यगतं रूपादि । तद् अभ्यनुज्ञातं भवतीति । तथापि कुतः प्रत्यक्षविरोध इत्यत आहकारणरूपादयश्चेति । चो हेतौ । एतेन कार्ये रूपादिप्रतिपत्तिः प्रत्युक्ता । दोषत्वेनेति । यदा हि कार्यमेवरूपादि नास्ति तदा कस्मात् तत्र रूपादिप्रतिपत्तिः प्रतिषिध्यत इत्यर्थः । यथा रूपाद्यन्तरकार्यमिति । अवयविगतानां हि रूपादीनां कार्यं रूपसंस्कारादवयविनश्चाक्षुषता एवं स्पृश्यतेति । उपन्यासः स्थापनम् । § 848

यद्यप्ययमवनमनविशेषाभावस्तुलाव्यधिकरणः, तथापि न शाब्दी तुलासंबन्धितास्य प्रतीयते किं त्ववनमनविशेषसंबन्धितेत्येतावतोक्तं—सोऽयमिति । असिद्धस्तावदिति एकदेशिनो दूषणम् । तदेतदेकदेशिदूषणं दूषयति—न तद्वत्तानुपलब्धेः । परमार्थदूषणमाह—अयमपीति । गुरुत्वमात्रोपहितानाम् द्रव्याणाम् अवनमनविशेषं न करोति तुला । § 849

द्रव्यसमाहार इति कार्यकारणद्रव्यसमाहारः । मृत्कणमृच्चूर्णशर्कराकपालकुम्भसमाहार इत्यर्थः । ननु समाहारः कुम्भस्य कारणं तच्च ज्ञातेयद्गुरुत्वमेवेत्यत आह—न चेति । § 850

ये त्वाहुः सर्वो मृत्कणादिः कुम्भपर्यवसानः कार्यसमूहः परमाणुष्वेव समवैति, ते हि मृत्कणादिकमारभ्य मृच्चूर्णान्यारभन्त इति । प्रसङ्गात् तन्मतमपाकर्तुमुपन्यस्यति—केचित् त्विति । निराकरोति—तान् प्रतीदमिति । § 851

गुरुत्वं चानुपतदिति । न च यथा प्रदीपाधीनप्रकाशा घटादयः, न तु प्रदीपः प्रदीपाधीनप्रकाशः, तस्य स्वमहिमनिषिद्धतमोऽनुषङ्गत्वात् एवं गुरुत्वाधीनपाता घटादयः । गुरुत्वं तु स्वस्य चान्येषां च गुरुत्वान्तरानपेक्षं पतनहेतुरिति वक्तव्यम् । न हि प्रदीपेन स्वात्मनि प्रकाशयितव्ये किञ्चिद-
347/tha न्यत् क्रियते । यादृशा घटादयः स्वप्रकाशोत्पादे तादृशः प्रदीपोऽपि । चक्षुषः पुनरयं स्वभावभेदो येन घटादौ प्रकाशयितव्ये प्रदीपमपेक्षते, न तु प्रदीपे प्रकाशयितव्ये प्रदीपान्तरमिति । तस्मान्न प्रदीपस्य स्वात्मनि कर्मकरणभावः । गुरुत्वं तु द्रव्यगतस्य पतनकर्मणः करणम् । तेन हि द्रव्यं पात्यते । स्वगतस्य तु पतनकर्मणः करणत्वे तदेव कर्म करणं चेति स्वात्मनि वृत्तिविरोधः । आत्मनस्तु स्वात्मनि प्रकाशयितव्ये कर्तृत्वमेव, न तु कर्मत्वमित्युपपादितमिति । तस्माद् गुणादयो विवादाधिकरणा न पतन्ति अद्रव्यजातीयत्वाद् गुरुत्ववदिति सिद्धम् । सिद्धान्त्याह—वेद पुनरिति । कारणं प्रमाणम् । रूपादयो न संयोगरूपप्राप्तिमन्तो गुणत्वात् संयोगवदित्यप्राप्तेः

६ त्वेनेति ] निषेध्यत्वेनnvt-C
९ म् ] सोऽयं व्यधिकरण इत्यधिकम्nvt-J
१४ व्याणाम् ] अणूनाम्nvt-C

रूपादिषु विनिश्चयात् तददर्शननिमित्तो रूपादिषु प्राप्तिभ्रमो द्रव्येषु प्राप्तिप्रत्ययः पारमार्थिक एवेति विनिश्चयः । तदनेनाभिप्रायेणोपसंहरति—तस्माद् व्यवस्थितमिति । शेषमतिरोहितार्थम् ॥ ३३ ॥ § 852

सर्वाग्रहणमवयव्यसिद्धेः ॥ २ । १ । ३४ ॥ § 853

स्यादेतत् । यथावयविनं नाभ्युपैति परः, एवं गुणकर्माद्यपि । तत् कथमयं प्रसङ्गः परस्य सर्वाग्रहणमित्यत आह—तदिदं सूत्रमिति । योऽपि हि तावद् गुणकर्मादि नेच्छति सोऽपि न तत्प्रत्ययमपह्नुते । अस्ति लौकिकपरीक्षकाणामवयविद्रव्यगुणकर्मादिप्रत्ययः । सोऽयमशक्यापह्नवः । तस्य च प्रत्यक्षत्वमुपपादितं प्रत्यक्षलक्षणे । अवयविद्रव्यबाधकानि च प्रमाणानि अधस्तान्निराकृतानि । सोऽयमसति बाधके स्वयं च गुणादिभिश्च सहोपलभ्यमानो न शक्यो निराकर्तुमित्यधिकरणार्थः ॥ ३४ ॥ § 854

धारणाकर्षणोपपत्तेश्च ॥ २ । १ । ३५ ॥ § 855

ते एते धारणाकर्षणे गोघटादिकमुपलभ्यमानमवयविनं साधयतः । कुतः ? निरवयवे विज्ञानाकाशादौ अवयवे च परमाणौ चादर्शनात् इदमेवं प्रयोगमारोहति । योऽयं दृश्यमानो गोघटादिरवयवी परमाणुसमूहभावेन 348/tha
विवादाध्यासितः, नासावनवयवी धारणाकर्षणानुपपत्तिप्रसङ्गात् । यो योऽनवयवी तत्र धारणाकर्षणे न भवतः, यथा विज्ञानादौ न चायं गोघटादिरर्थस्तथा तस्मान्नानवयवीति । § 856

न च विरोध इति । व्यभिचारलक्षणो दोषो विरोधः । अवयविन एव ते प्रत्येकमिति । परमाणुसमूहे तु प्रत्येकमपि न परमाणवोऽवयविन इत्यर्थः । विशेषहेत्वभावादिति । एवं हि विशेषहेतुः स्यात्, यद्यवयविनमन्तरेण क्वचिद् विज्ञानाकाशादौ संग्रहश्चोक्तलक्षणो धारणाकर्षणहेतुता वास्य दृष्टा स्यात् । न चासौ दृश्यते । काष्ठतृणोपलादयः प्रत्येकमवयविन एवेत्यर्थः । § 857

स्यादेतत् । अवयवित्वेन तुल्यत्वेऽपि कस्मादेकत्र धारणाकर्षणे नान्यत्रेत्यत आह—पांशुराशीति । समूहमात्रत्वेन तुल्यत्वे सति यथा कश्चिद् विशेषहेतुरेवमवयवित्वेन तुल्यत्वेऽपीति समानमित्यर्थः । तत्सहचरितस्य संबन्धः स्नेहद्रवत्वकारित इति । तस्माद् भाष्यकारस्य सूत्रदूषणं परमतेन द्रष्टव्यम् ॥ ३५ ॥ § 858

सेनावनवद् ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ २ । १ । ३६ ॥ § 859

अथेदानीमन्वयिन इति, अन्वयव्यतिरेकिण इति । पटोऽयमित्येकविषया बुद्धिरेकबुद्धिः । तन्तव इति नानाविषया बुद्धिरनेकबुद्धिः । स-

---

२७ न्धः ] संबन्धविशेषःnvt-C

मुचितासमुचितविषयत्वादिति । असमुचितविषयत्वादेकबुद्धेः समुचितविषयत्वाच्चानेकबुद्धेरित्याशङ्क्यात उत्तरसूत्रम्—सेना...नाम् । § 860

तथोक्तमिति । बहुत्वसंख्यैव सेना वनं चेति । यस्तु मन्यते, सेना वनमिति व्यपदेशाय तज्जनिताय वा विज्ञानाय बहुत्वसंख्या कथञ्चित् कारणं संभवति, यस्त्वयमैन्द्रियकः प्रत्ययः प्रत्येकमसंगृहीतैकत्वेषु वृक्षेष्वनुत्पन्नापेक्षाबुद्धेर्द्रागित्येकघनवनावगाही जायते तत्र कारणाभावेन बहुत्व-
349/tha स्यानुत्पादान्न बहुत्वसंख्यालम्बन इति न परितुष्यति, तं प्रत्याह—अभेदप्रत्ययस्य चेति । उपलभ्यमानरूपेष्वेव कुतश्चिन्निमित्तादनुपलभ्यमानपृथक्त्वेषु मिथ्याऽभेदबुद्धिर्भवति । न पुनः सर्वथानुपलभ्यमानेष्विति तात्पर्यार्थः । यस्तु नोभयपक्षसंप्रतिपन्नमस्ति जगति किञ्चिदेकमिति मन्यते तं प्रत्याह—एकं नास्तीति । § 861

स्यादेतत् । दूरात् काष्ठलोष्टतृणपाषाणादयः प्रत्येकं पृथक्कृता नोपलभ्यन्ते । समुदायस्तु तेषां दृश्यते । न च ते द्रव्यान्तरमारभन्ते विजातीयत्वात् । तथा मा भूवन् परमाणवः प्रत्येकं दृश्याः समूहस्तु तेषां द्रक्ष्यते विनैव कार्यान्तरारम्भमित्यत आह— गृह्यमाणाग्रहणस्य चेति । तेषामेवागृह्यमाणानामपि मिलितानां दर्शनं ये स्वेन रूपेण ग्रहणयोग्या निमित्तान्तरात्तु न गृह्यन्ते । परमाणवस्तु परमसूक्ष्मतया न स्वरूपेण ग्रहणार्हा इति मिलिता अपि न ग्रहीतव्या एव । न जातु मिलिता अपि पवनसमूहा भवन्ति चाक्षुषाः । रूपवन्महत्त्वमपि हि भावानां स्वरूपयोग्यता ग्रहणं प्रति इति भावः । *अथानुपजातविशेषाः इति । ततश्च त एवैन्द्रियका अनैन्द्रियकाश्चेति महान् विरोध इति । अत्रान्तरे कीर्तिराह स्म

को वा विरोधो बहवः संजातातिशयाः पृथक् ।
भवेयुः कारणं बुद्धेर्यदि नामेन्द्रियादिवत् ॥ § 864

इति । एतदपि वार्त्तिककृतैव अथानुपजातविशेषा इति वदता परास्तम् । न खलु स्थैर्यसिद्धौ भावानामवयविद्रव्योत्पादनमन्तरेणास्त्यन्योऽतिशयः परमाणूनाम् । न च यदागन्तुकमासाद्य परमाणवोऽवयविनं जनयन्ति तेनैव स्थूलबुद्धिम्, कृतमवयविनेति सांप्रतम् । यदाभासा हि बुद्धिस्तदस्या आलम्बनप्रत्ययः । न चेयं परस्परव्यावृत्तपरमसूक्ष्मपरमाण्वालम्बना तथा सति स्थूलमेतदेकमिति न स्यात् । न चैष प्रत्ययो विकल्पः स्पष्टप्रतिभासत्वात् । न चाविकल्पोपाधिरस्य विशदता । निर्विकल्पकेनापि तस्या ग्रहणात् । न च प्रतिभासधर्मः स्थौल्यम् नानादिग्देशस्थितस्य तस्य निरन्तरस्यानेकस्यैकेन विज्ञानेन ग्रहणं स्थौल्यम् । तत् खल्वीदृशत्वं परमाणूनां प्रतिभाससमयभावीति प्रतिभासधर्म इत्युच्यते । तथा चैष समीचीन एवानुभवः । न हि ते न परमाणवः, न च न निरन्तरोत्पन्नाः, न च न दिग्देशभिन्नाः, न

२ ङ्कात ] इतरसू°nvt-C
२० *] अथानुप...ततश्चेति त्यक्तम्nvt-J
२३ त] प्रमाणवार्त्तिके २. २२३
२९ ति ] स्थूलभेदात् तदेकnvt-C

वैकस्मिन् विज्ञाने न चकासति । तस्मात् कस्यात्रान्यथात्वम् ? यदाह,
§ 865

न च तद्दर्शनं भ्रान्तं नानावस्तुग्रहाद्यतः ।
सांवृतग्रहणं चान्यन्न च वस्तुग्रहो भ्रमः ॥§ 867

इति । अत्र तावत् तिलतण्डुलवद् गन्धरूपरसस्पर्शपरमाणुभिरन्तरित-तया नैरन्तर्यमेषां नास्ति । तस्मादन्तरालाग्रहणे विदूरादेकघनवनप्रत्ययवदयं मिथ्याप्रत्ययो रूपादिपरमाणूनां सान्तरत्वादनेकत्वाच्च । न चासति बाधके मिथ्येति युक्तम् । उक्तश्च बाधकाभावः । स्थेमा च भावानामुपपादयिष्यते । तस्मादयुक्तमेतदपीति । § 868

इदमेव च परीक्ष्यते इति भाष्यम् । सर्वत्रावयविनमपह्नुवानस्य अतीन्द्रियं चाणुसंचयमात्रमिच्छतः सेनावनाङ्गानामपि करिकुसुम्भादीनाम-तीन्द्रियाणुसंचयमात्रत्वाद् दृष्टान्ताभाव इति तात्पर्यार्थः । § 869

शङ्कते, दृष्टमिति चेत् ? सेनावनाङ्गानि तावद् दृष्टतया न शक्यान्य-पह्नोतुमिति सिद्धं निदर्शनमित्यर्थः । निराकरोति—तच्च नैवमिति । यदि दृष्टमप्रत्याख्येयमवयव्यपि दृष्ट इति सोऽप्यप्रत्याख्येयः । अथायं परीक्ष्य प्रत्याख्यायते सेनावनाङ्गान्यपि प्रत्याख्येयानीति दृष्टान्ताभावः साध्यसम-त्वादिति भाष्यार्थः । § 870

वार्त्तिकम्—यश्चायमनेकस्मिन्निति । अविद्यमानो विशेषः शुक्तौ रज-तत्वम् । तस्य दर्शनं वणिग्वीथ्यादौ । तस्य द्वारं संस्कारः । तेनाध्यारोपितः स्मारितः तद्विपरीतः शुक्तिविपरीतो धर्मो रजतत्वं येन सामान्यदर्शनेन तत् तथोक्तं तस्य भावः तत्ता सामान्यदर्शनस्येति । § 871

तिरोभूतभेदमुपमानमेव भाक्तम् । भेदोल्लेखेन तूपमानमिति विवेकः । संज्ञाज्ञानमौपमिकोदाहरणम्—यथा सिंहो माणवक इति । नन्वेतद- 351/tha
पि तिरोहितभेदतया भाक्तमेवेत्यत आह—सिंह इव सिंहः । अयमर्थः । सिंहशब्दाद् उपमानादाचारे सर्वप्रातिपदिकेभ्यः क्विबिति क्विबन्तादत्र कर्त-रि अचि कृते सिंहशब्द उपमानार्थो भवति । नानाभावे चाणूनामित्यादि भाष्यं व्याचष्टे—मिथ्याप्रत्यया अपीति । तदभावे तु प्रधानाभावे तु घ-टादौ मिथ्याप्रत्यया इति । परमाणुषु सञ्चितेष्विति । येषामपि घटोऽवयवी तैरपि परमाणुसञ्चयोऽभ्युपेयः येषामप्यवयवी नास्ति तैरपि परमाणुसंञ्चय उपेयः । सोऽयमुभयसम्मतः संचय इत्यर्थः । तेऽपि संचिता एवेति । वैभाषिकाः खलु वात्सीपुत्रा *भूतभौतिकसमूहान् पञ्चापि शब्दादीनिच्छन्ति । अतस्तेषां मते शब्दादयोऽपि सञ्चिता इत्यर्थः । अपि चास्मन्मतेऽपि

३ तः ] स्वतःnvt-C
४ णं ] नान्य°nvt-C
११ पि ] किंशुकादीनाम्nvt-J
२० स्मारितः ] तद्विपरीतधर्मोnvt-C
२२ भेदोल्लेखेन ] ज्ञायमानमौपमिकमितिnvt-C ज्ञायमानमौपमिकम् nvt-K
३१ * ] समुहात् पटादीनपिnvt-C

शब्दादीनां न मुख्यमेकत्वं संख्याया गुणस्य गुणेषु शब्दादिष्वभावात्, अपि तु भाक्तमेवेत्यत आह—शब्दादिषु चैकप्रत्यय इति । शङ्कते—सर्वत्रेति । निराकरोति—न द्वे इत्यत्रेति । समुच्चयनिवृत्तिमात्रं चेदेकत्वं द्वित्वनिषेधेन समुच्चयो निवर्तित इति तन्निवृत्तिमात्रमेकत्वमेवेति एकमनेकं वेति संशयो न स्यात् । न च तत्रोत्तरमेकमेवेति नियमार्थं भवेदिति । गतौ प्राप्तौ । शङ्कते—सर्वत्रेति । निराकरोति—नैकमित्यत्रेति । अयमभि(? )न्धिः । द्वित्वादीनामभावे समुच्चयमात्रं स्यात् । न तु समुच्चयानामवान्तरभेदः । तथा च नैक इत्यसमुच्चयसहितैकत्वनिषेधे समुच्चयः प्राप्त एवेति न संशयः स्यात् । § 872

इदं त्विह वक्तव्यम् । शब्दादौ द्वित्वाद्यभावे कथं द्वित्वादिप्रयोगः ? भाक्त इति चेत् ? किं भक्तिनिमित्तम् ? समुच्चयमात्रं चेत् ? कुतो द्वाविति नियमः ? समुच्चयविशेषादिति चेत् ? नन्वस्य नास्त्याजानतो भेद इत्युक्तम् । न चेह द्वित्वमस्ति यद्विशिंष्यात् । तथाचाकामेनापि समुच्चयानामवान्तरभेदः स्वाभाविको वक्तव्यः । तथा च स एवास्तु संशयविषयः । कृतं द्रव्ये द्वित्वादिनेति । तस्मात् संविदेव भगवती समुच्चयादिविलक्षणं द्वित्वाद्यवगाहमाना व्यवस्थापिका द्वित्वादीनाम् ।
352/tha तदनुसरणप्रकारश्च युक्तिकुशलतया वार्त्तिककृता कृत इति मन्तव्यम् । § 873

यः पुनरनुभूयमानमेकत्वं द्वित्वादींश्चानुभूयमानान् न प्रतिपद्यते, तस्य खल्वनुभवमपह्नुवानस्य निर्मर्यादतयैकत्वाधारोऽपि नास्तीति कस्य समुच्चयो द्वित्वादिः स्यात् ? समुच्चयाभावे च कस्याभाव एकत्वं स्यादित्याह—यः पुनरिति । अपि चैकत्वादीन् मुख्याननभ्युपगच्छतोऽयमपि भाक्तप्रयोगो न स्यादित्यत आह—एकत्वद्वित्वादींश्चेति । § 874

भाष्यमनुभाष्य व्याचष्टे—तेषु चैवमिति । § 875

इयत्तानवधारणादिति । प्रत्यक्षपरिमाणविषयमियत्तावधारणम् परममहतां त्वप्रत्यक्षपरिमाणानां सत्यपीयत्तानवधारणे नापरिमाणता, द्रव्यत्वेन व्योमादीनां परिमाणानुमानादिति । § 876

यथा महत्परिमाण इति । कुवलपरिमाणादामलकपरिमाणं महदिति लौकिका व्यपदिशन्ति, यथा कुवलादामलकं महदिति । न च परिमाणस्य परिमाणयोगः, अनवस्थाप्रसङ्गात् । तस्माद् भाक्तोऽयं व्यपदेशो महत्त्वं महदिति । तत् सिद्धमेतत् शब्दो भाक्तमहच्छब्दवान् गुणत्वान्महत्त्ववदिति । गुणत्वं च शब्दस्यानुमानलक्षणे प्रसाधितम् । भाक्तं च मुख्यपूर्वकमिति क्वचिन्मुख्येन महत्त्वेन भवितव्यम् । तच्चासति बाधके द्रव्ये मुख्यमिति सिद्धम् । न महत्प्रत्ययविषयत्वादिति । न तन्मात्रादपि त्वबाधितादनन्यथासिद्धादिति । तदेवाह—अपि त्विति । § 877

---

८ यः ] °कत्वसमुच्चयःnvt-C
१५ ती ] वस्तूपगमे नः शरणमित्यधिकम्nvt-C
१६ या ] °बहुलतयाnvt-C
३० त् ] तस्मिन् तत्nvt-C

अनेनानन्यथासिद्धिर्द्रव्ये महत्प्रत्ययस्य दर्शिता । तथैकादिमहत्प्रत्यया इति । समुदायमेकमाश्रित्येति शेषः । समुदायश्च समुदायान्तरप्राप्ताविति । यदा हि भिन्ना अपि समुदायिनः प्राप्त्या एकीकृता एकः समुदायः, तदा समुदायान्तरमपि समुदायान्तरेण प्राप्तमेकः समुदायः । न चैकस्यात्मना प्राप्तिः । न हि तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण प्राप्यते । ततश्च द्वयोः समुदाययोः प्राप्तिरित्ययुक्तमित्यर्थः । § 878

चोदयति—नैव जातिरस्तीति । अयमभिसन्धिः । न सामान्यं नाम वस्तुसद् यस्याश्रयो वस्तुभूतोऽनुस्रियते । तथा हि तत् पिण्डे वा वर्तते, 353/tha सर्वत्र वा । यदि सर्वत्र, सर्व एव गावः प्रसज्येरन् । यथा हि शाबलेयादयो गोत्वाभिसंबन्धाद् गाव एवं विश्वमेव तत्संबद्धमिति गौः प्रसज्येत । अथ केषुचिदेव पिण्डेषु वर्तते, ततो वक्तव्यम्, यदा क्वचिद्देशे पिण्डो जायते तदा वक्तव्यम्, कुतस्त्यं पुनरस्य गोत्वमिति । न तावत् तत्रापि पिण्डोत्पादात् पूर्वमासीत् नापि पिण्डान्तरादागतं तस्य निष्क्रियत्वात् पिण्डन्तरत्यागप्रसङ्गाच्च । न च पिण्डे जायमाने जायते, अनित्यत्वापत्तेः । पिण्डान्तरस्थाच्च गोत्वाज् जन्माजन्मस्वरूपविरुद्धधर्माध्यासेन भेदे सत्यसामान्यत्वप्रसङ्गः । तदितो महाव्यसनाद् विह्वता सांवृतमेव सामान्यमास्थेयं न पारमार्थिकमिति । परिहरति—जातिविशेषस्येति । प्रत्ययानुवृत्तिर्यद्यपि प्रत्यक्षा तथापि विप्रतिपन्नं प्रति सैव लिङ्गमुच्यते । सन्ति हि केचिद् भावा ये सहावस्थानेऽपि परस्परमसंबद्धाः, यथा समानकाला गन्धरसरूपस्पर्शाः । विज्ञानानि च बहूनि परेषां समानकालान्यप्यसंसर्गाणि, दिक्कालाकाशात्मानश्च सहावस्थाना अपि परस्परासंसर्गिणो वैशेषिकाणाम् । तथा सामान्यमपि सर्वासंबद्धमपि सर्वैः सहावतिष्ठते, यास्त्वस्य व्यक्तयस्ताभिः परं संबध्यते । तथा च यत्र जायन्ते व्यक्तयस्तत्रासंबद्धावपि स्तः सामान्यसमवायाविति । तासां जन्मैव सामान्यसमवायावच्छेदः । स च स्वकारणादननुयोज्यादिति वस्तुगतिं प्रमाणिकीं विद्वांसो नास्माद् व्यसनाद् बिभ्यतीति । बाधकान्तराणि चास्यायवयविव्याख्यानेन प्रत्याख्यातानि । तावदेव तर्ह्यधिकरणं जातेः प्राप्तमिति । ये ये वृक्षत्वादिजातिमनपेक्षा व्यञ्जयन्ति, ते ते परस्परं वृक्षादिव्यक्तितया भिद्यन्ते । यथा किंशुकाशोकचम्पकादयो भिन्नास्तरवस्तथा चार्वाग्भागमध्यभागापरभागा अपि भिन्नास्तरवःस्युः । अवयविनि तु जायमाने नायं दोषः । तस्य सर्वावयवसाधारण्येन प्रत्यभिज्ञायमानत्वात् । न चैवमवयविनोऽपि तावन्तः स्युरिति वाच्यम्, तस्यैकस्य सर्वावयवसाधारण्येन प्रत्यभिज्ञायमानत्वात् । अवयवान्तरस्य तु नावयवान्तरे प्रत्यभिज्ञानम्, तेषां वृक्षव्यक्तिहेतुत्वे 354/tha वृक्षानेकत्वप्रसङ्ग इति । § 879

२४ नुयोज्यादिति ] °दनुयोज्य इतिnvt-C
२५ नाद् ] दूषणाद्nvt-C
२९ वः ] °स्तस्य स्युःnvt-C
३० त्वात् ] °वयवसाधारण्यात्nvt-C
३२ क्तिहेतुत्वे ] वृक्षव्यक्तित्वे nvt-J

सर्वापकृष्टः संघातश्चेति व्याहतम्, संहन्यमानापेक्षयानपकर्षादित्यर्थः । सांख्यमवयवेभ्योऽनर्थान्तरमवयविनं मन्यमानं प्रति प्रयोगमाह—अर्थान्तरमिति । प्रावरणसामर्थ्यं पटस्य, तन्तूनां तु पटोत्पादनसामर्थ्यम् । तन्तुपटरूपे इति । तन्तूनां नीलपीतलोहितादिरूपं पटस्य तु चित्रम् । तत्र नीलादीनां समवायिकारणं तन्तवः, चित्रस्य तु पटः । एवं तन्तुपटयोः सावर्ण्येऽपि क्वश्चिद् विशेष उन्नेयः विशेषवत्त्वं च वैयधिकरण्येन प्रमीयमानत्वम् । तेन च भिन्नकारणत्वम् । भिन्नसमवायिकारणत्वं साध्यत इति न सिद्धसाधनं नाप्यनैकान्तिकत्वमिति । § 880

ये तु पक्षहेतू अन्यथाकारं गृहीत्वा दूषयांबभूवुः, तन्मतमुपन्यस्य दूषयतिएके त्विति ॥ ३६ ॥ § 881

॥ अवयविपरीक्षाप्रकरणम् ॥

## २.१.६ अनुमानपरीक्षाप्रकरणम्

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ २ । १ । ३७ ॥ § 883

अनुमानमिदानीमिति भाष्यम् । अत्रेदानीं पदार्थमाह वार्त्तिककारः अथेदानीमवसरप्राप्तमिति । उद्देशक्रम एव लक्षणपरीक्षयोः संबध्यत इत्यर्थः । § 884

रोधो...णम् । अप्रमाणपदस्य व्याख्यानभाष्यम् एकदापीति । प्रतिपादकं निश्चायकम् । लक्ष्यपरत्वात् लक्षणस्य लक्षणयुक्तस्य लक्ष्यस्य व्यभिचारादप्रमाणत्वे लक्षणमेव दूषितं भवतीत्यर्थः । § 885

355/tha

वार्त्तिकम्—पूर्ववदादेरुदाहरणानीति । अत्र च नदीपूरमयूरवाशिते शेषवत उदारहरणे । पिपीलिकाण्डसंचारणं चाचिरमुत्पत्स्यमानस्य वर्षस्य न कार्यम् । न ह्यनागतं कारणं भवति पूर्वोत्पन्नस्य । न च नासावक्रत्वादयोऽप्यनागतेन मरणेन क्रियन्ते । तथा सति पुत्रोऽपि पितुः कारणं स्यादिति सर्वमवदातम् । कार्यकारणभावव्यवस्थापनं लौकिकं भवेत् । नियमवान् खलु प्राग्भावः कारणत्वस्य व्यवस्थापको नियमवांश्च पश्चाद् भावः कार्यत्वस्य व्यवस्थापकः । नासिकावक्रत्वादयोऽपि मरणस्य यत् कारणं तस्य पूर्वकार्याणीति प्रत्यासत्त्यानया मरणमनुमापयन्ति । न च पिपीलिकाण्डसञ्चारणं वर्षस्य कारणमनुपलब्धसामर्थ्यात्, असत्यपि तस्मिन् वर्षस्योत्पत्तेः । वर्षमूलकारणस्य तु महाभूतसंक्षोभस्य पिपीलिकाण्डसंचारणं पूर्वकार्यम् । क्वथ्यमानाः खलु पिपीलिका भौमेनोष्मणा स्वान्यण्डानि भूमिष्ठान्युपरिष्टान्नयन्ति । तस्मात् पिपीलिकाण्डसंचारणेन कार्येण वर्षकारणमनुमाय

१ म्] व्याघातः nvt-C

यदि वर्षकारणात् कार्यं वर्षमनुमिमतेऽनुमातारः, तदा पूर्ववदुदाहरणम् । अथ कार्यकारणभावमनपेक्ष्यैव पिपीलिकाण्डसंचारणस्य स्वाभाविकं वर्षेण संबन्धमात्रमवगम्यानुमिन्वते, तदा कार्यकारणभावाभावेन सामान्यतोदृष्टस्योदाहरणमेतदित्यवगन्तव्यम् । उदाहरणव्यभिचारद्वारकमिति । लक्ष्यदूषणद्वारेण लक्षणस्य दूषणमित्यर्थः । न हि व्यभिचारलक्षणस्यानुमानाप्रामाण्यप्रतिपादकस्य अनुमानस्य व्यभिचारे किंचित् प्रमाणस्तीति ॥ ३७ ॥ § 886

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ २ । १ । ३८ ॥
§ 887

भाष्ये पिपीलिकाप्रायस्येति । प्रायशब्दः प्रबन्धार्थः ॥ ३८ ॥ § 888

॥ इत्यनुमानपरीक्षाप्रकरणम् ॥

## २.१.७ वर्तमानपरीक्षाप्रकरणम्

356/tha

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ २ । १ । ३९ ॥ § 890

तदेवमनुमानलक्ष्यपरीक्षाद्वारेणानुमानलक्षणं परीक्ष्य संप्रत्यनुमानविषयपरीक्षयानुमानपरीक्षामवतारयति भाष्यकारः त्रिकालविषयमिति । § 891

वर्त...त्तेः । तत्र वार्त्तिककारः सत्यां कालस्य सिद्धौ वर्तमानत्वं परीक्ष्यते । स एवापरीक्षितोऽद्यापि न सिध्यतीति कालस्वरूपं परीक्ष्यते—तत्र तावदिति । त्रिकारणेयमिति कारणान्तरवैकल्यं विषयस्यायोग्यत्वमभावो वा विषयस्येति त्रीण्यनुपलब्धिकारणानीति । अथ धर्मोऽपि नास्तीति । भावरूपो हि हेतुरभावाधिकरणो न भवति । अभावरूपस्य त्वभावाधिकरणत्वादविरोध इत्यर्थः । परिहरतिसाधनार्थो हीयते । न हि पराभिमतोऽभावः सर्वसामर्थ्यरहितः साधनं कस्यचिद् भवति । अस्मदभिमतस्त्वभावः परतन्त्रो भावाधिकरण एव, नानधिकरणो नाप्यभावाधिकरण इत्यर्थः । § 892

एवं कालस्य बाधकप्रमाणाभावमुक्त्वा साधकं प्रमाणमाह—परापरादीति । स्वयं विद्यमानयोरनियतदिग्देशयोः समानदिक्कयोर्वा देशतः सन्निकृष्टविप्रकृष्टयोर्वा विप्रकृष्टसन्निकृष्टयोर्वा युवस्थविरयोरेकस्मिन् शरीरावस्थाभेदानुमितातीतसूर्योदयास्तमयरूपक्रियाप्रचयबहुत्वान्तरितजन्मनि स्थविरे युवानं शरीरावस्थाभेदानुमितातीतसूर्योदयास्तमयरूपक्रियाप्रचयाल्पत्वान्तरितजन्मानमवधिं कृत्वा विप्रकृष्टबुद्धिरुत्पद्यते । तामपेक्ष्य बहुतरसवित्रुदयास्तमयविशिष्टेन कालप्रदेशेन योगाद् वर्षीयसि परत्वस्योत्पत्तिः । एवं

२ पेक्ष्यैव ] °मबुद्ध्वैव nvt-C
३ ते ] पिपीलिका...मिन्वते nvt-J
४ म् ] °दाहरणमिति मन्तव्यम् nvt-C

वर्षीयांसमवधिं कृत्वा यवीयसि सन्निकृष्टबुद्धिरुत्पद्यते । तामपेक्ष्याल्पतर-
357/tha दिनकरोदयास्तमयप्रचयविशिष्टेन काल प्रदेशेन योगाद् यवीयस्यपरत्वोत्प-
त्तिः । एतयोश्च कालपिण्डसंयोगयोः प्रत्यक्षत्वं न लोकसिद्धम् । ते एते
परापरत्वे कालपिण्डसंयोगादुत्पद्यमाने कालकारणविशिष्टमात्मानं कार्यत-
या गमयतः । सूर्योदयास्तमयक्रिया प्रचयाल्पत्वबहुत्वविशिष्टात् पिण्डादेव
परत्वापरत्वे भविष्यतः, कृतमत्र द्रव्यान्तरेण कालेनेति चेत् ? न । स-
वितृसमवेतायाः क्रियायाः पिण्डेनासंबन्धात् । संयुक्तसमवायस्त्वस्याः संबन्धः
कालेन सर्वगतेनास्ति । न चाकाशं सर्वगतमपि परापरव्यतिकराय कल्पते
तस्य स्वरूपेणाभेदात् । अपि चाकाशात्मानौ न परापरव्यतिकरकारणम्
असाधारणगुणयोगित्वात्, पृथिव्यादिवत् । तस्मात् परापरव्यतिकरकारणे
कल्पनीये । ते च द्रव्यमपारन्त्यादाकाशवत् । ते दिक्काला उच्येते ।
एवं यौगपद्यायौगपद्यचिरक्षिप्रप्रत्यया अपि काललिङ्गम् । न ह्येते क्रिया-
यां तत्कारकेषु वा भवितुमर्हन्ति, तेषु सत्स्वपि कादाचित्कत्वात् । नन्वयं
कालोऽपि नित्य इति तस्मिन् सत्यप्येते कादाचित्काः कथं कालकार-
णमपि ? यद्युच्येत एकसूर्यपरिस्पन्दावच्छिन्नकालसंबन्धिन्यः क्रियायुगपद-
नेकसूर्यपरिस्पन्दावच्छिन्नकालसंबन्धिन्यः क्रियाः क्रमवत्योऽयौगपद्यप्रत्यय-
गोचरः, एवं बहुतरानेकसूर्यपरिस्पन्दावच्छिन्नकालसंबन्धिनी क्रिया चिरप्र-
त्ययगोचरः, अल्पतरानेकसूर्यपरिस्पन्दावच्छिन्नकालसंबन्धिनी क्रिया क्षिप्र-
प्रत्ययगोचर इति । कृतं तर्हि सूर्यपरिस्पन्दस्य कालावच्छेदेन । नन्वयं
साक्षादेव क्रियामवच्छेत्स्यतीति । तथा च युगपदादिप्रत्यया भविष्यन्तीति
? तन्न, सूर्यपरिस्पन्दस्य क्रियाभिः संबन्धाभावेन तदवच्छेदकत्वानुपपत्तेः ।
न चाकाशादिसंबन्धद्वारेणास्य तदवच्छेदकत्वम् । तथा हि नाकाशादयः
क्रियायौगपद्यादिप्रत्ययनिमित्तम् असाधारणगुणयोगित्वात् घटवत् । § 893

एवं यौगपद्यादिप्रत्यया न दिक्कारणका दिग्देशनियमानपेक्षणात् काल-
पिण्डसंयोगजपरत्वापरत्ववदिति । तस्मात् सूर्यपरिस्पन्दस्य देवदत्तादिप-
रिस्पन्दस्य चास्ति कालेन सर्वगतेन संयुक्तसमवायलक्षणः संबन्धः । एत-
358/tha या च द्वारा परिस्पन्दयोरप्यस्ति संबन्ध इति । कालसंबन्धानपेक्षमेव
च सूर्यपरिस्पन्दावच्छिन्नस्य देवदत्तादिपरिस्पन्दस्य ग्रहणमुपपद्यते । यथा
दण्डीति शब्दाद् दण्डावच्छिन्नं पुरुषं प्रतीत्य तदन्यथानुपपत्त्या पश्चाद् द-
ण्डपुरुषयोः संयोगभेदोऽवगम्यते, न च संबन्धज्ञानपुरःसरं दण्डिविज्ञानम्
। एवं परत्वापरत्वे अपि कालपिण्डसंयोगनिबन्धने गृहीत्वा कालोऽनुमीय-
ते, न तु कालज्ञानपुरःसरं तज्ज्ञानम् । तत्सिद्धमरूपतया कालोऽप्रत्यक्षश्च
परत्वापरत्वाद्यनुमेयश्चेति । तस्मात् सुष्ठूक्तम्—परापरादिप्रत्ययानां चेति ।
कार्यकारणविशेषापेक्ष इति । कार्यस्य परापरादेः, तत्प्रत्ययस्य च यः कार-

२ य] मयाल्पत्वान्तरितजन्मानमवधिं कृत्या विप्रकृष्टा बुद्धिरुत्पद्यते, तामपेक्ष्य बहुरतसवित्रुदयास्तमय° इत्यधिकम्nvt-C

८ ते] °करं प्रत्यवकल्पतेnvt-C

२२ द्वारेणास्य] °द्वारमस्यnvt-C

णविशेषो बहुतराल्पतरातीततपनपरिस्पन्दावच्छिन्नकालपिण्डसंयोगः तदपेक्षः काल एकोऽपि परापरादिप्रत्ययहेतुः परापरत्वलक्षणगुणोत्पादनद्वारेणेति वर्तते कारकव्यङ्गः कालः । तस्य निष्पन्नतया व्यक्तिसाधनत्वोपपत्तेः । न तु क्रियाव्यङ्गः, तस्याः साध्यतया असिद्धत्वाद् व्यक्तिं प्रति हेतुभावाभावात् । तथा चातीतानागतमात्रदर्शनाद् वर्तमानाभावेन न त्रैकाल्यविषयमनुमानम् । तयोश्च पितापुत्रवत् परत्वापरत्ववद् ह्रस्वदीर्घत्ववच्च परस्परापेक्षा सिद्धिरन्तरेणापि वर्तमानं कालमिति पूर्वः पक्षः ॥ ३९ ॥ § 894

## तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ॥ २ । १ । ४० ॥ § 895

नातीतादिरूपता कालस्य कारकव्यङ्ग्या, तयोस्तादवस्थ्यात्, अपि तु क्रियाव्यङ्ग्या । तां खलूररीकृत्य प्रवर्तमानानयमतीतानागतवर्तमानान् प्रतिपद्यते नान्यथा । यदा खल्वयं पुरुषः फलं प्रवर्तमानपतनक्रियाविशिष्टं प्रतिपद्यते, तदा व्यपदिशति पतति फलमिति । तन्मूले चास्यातीतानागतत्वे अपतत् फलं पतिष्यतीति । न च वर्तमानं पतनमसिद्धम् येन न कालं व्यञ्ज्यात् । तदसत्त्वे कस्येदं कारणं गुरुत्वं कस्य च फलं कारकं कस्य च फलं भूमिसंयोगः कार्यम् । न च परत्वापरत्वादीनामपि सिद्धिः परस्परापेक्षा । किं तर्हि ? सन्निकृष्टबुद्ध्यपेक्षमपरत्वम्, विप्रकृष्टबुद्ध्यपेक्षं परत्वम् । 359/tha पूर्वसंख्यावच्छिन्नता च संयुक्तसंयोगानां सन्निकर्षः, परसंख्यावच्छिन्नता च विप्रकर्षः । एवं ह्रस्वदीर्घत्वे अपि परिमाणभेदो न परस्परापेक्षौ । पितापुत्रौ च प्रमाणप्रमेयव्याख्यया व्याख्यातौ । तस्मादतीतानागतयोर्वर्तमानसापेक्षत्वाद् वर्तमानस्य तदनपेक्षत्वादस्ति त्रैकाल्यमिति सिद्धान्तः ॥ ४० ॥ § 896

## नातीतानागतयोरितरेतरापेक्षा सिद्धिः ॥ २ । १ । ४१ ॥ § 897

भाष्यम्—अथापीति कस्मादतीतानागतावितरेतरापेक्षौ न भवतः कृतं वर्तमानेनेति शङ्कां सूचयति । तन्निराकरणाय सूत्रम्—नाती...द्धिः । § 898

परस्परापेक्षसिद्धेः किल वर्तमानाभावः । सैव तु नास्तीति सूत्रार्थः । कया युक्त्येति प्रश्नः । उत्तरम्—केन कल्पेन प्रकारेण अतीतः ? तदनेन वर्तमानाभावेऽतीतस्वरूपाक्षेपः कृतः । ह्रस्वदीर्घत्वादीनां परस्परापेक्षसिद्धित्वमङ्गीकृत्याहतन्नोपपद्यते विशेषहेत्वभावादिति । परमार्थतस्तु न चेतरेतरापेक्षा ह्रस्वदीर्घत्वादीनामपि सिद्धिरिति । § 899

स्वकीयां युक्तिं वार्त्तिककार आह—न च वर्तमानकालानभ्युपगमे पतत इतीति ॥ ४१ ॥ § 900

१६ म् ] कार्यःnvt-C

## वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ २ । १ । ४२ ॥ § 901

वक्ष्यमाणसूत्रावतारणपरं भाष्यम्—अर्थसद्भावव्यङ्ग्यश्चायमिति । अस्यार्थः, न केवलं पतनादिक्रियाव्यङ्ग्यो वर्तमानः कालः, अपि त्वर्थसद्भावोऽर्थस्य सत्ता अस्तिक्रियेति यावत् । तया व्यङ्ग्यः कालः । एतदुक्तं भवति—पतनादयः क्रिया वर्तमानेष्वपयान्त्युपयन्ति च । अस्तिक्रिया तु सर्ववर्तमानव्यापिनी । तदेवमस्तिक्रियाविशिष्टस्य वर्तमानस्याभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः । § 902

360/tha

वर्त...त्तेः । न चाविद्यमानं तस्य विवरणम् असदिति । न चायं वर्तमानाभाववादी विद्यमानं सत् किञ्चिदनुजानाति । § 903

अत्र वार्त्तिककारः पृच्छति—कथं पुनरिति । न हि सर्वं प्रत्यक्षं वर्तमानविषयमतीतानागतयोरपि योगिप्रत्यक्षत्वादिति भावः । उत्तरम्—यस्मादिति । नातीतानागतविषयतया प्रत्यक्षानुपपत्तिं ब्रूमः, अपि त्वतीतानागताधारतयेत्यर्थः । भाष्यमपि वर्तमानाभावे प्रत्यक्षनिमित्तं सन्निकर्षः अस्मदादिप्रत्यक्षविषयः विद्यमानो घटादिः प्रत्यक्षं प्रमाणमनाधारं सत्सर्वं नोपपद्यत इति द्रष्टव्यम् ॥ ४२ ॥ § 904

## कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥ २ । १ । ४३ ॥ § 905

अत्र भाष्यम्—उभयथा वर्तमानो गृह्यत इति । तदवतार्य व्याचष्टे वार्त्तिककारः—उपपन्नः सन् द्वेधा भिद्यत इति । क्वचित् क्रियामात्रव्यङ्ग्यः, यथास्तिति । क्वचित् क्रियासन्तानव्यङ्ग्यः पचति छिनत्तीति । अत्र हि पूर्वापरीभावः प्रतीयते । न च प्रतिक्षणमपवर्गवतः कर्मणः एकस्य पाकस्य वा छेदनस्य वा अस्ति पूर्वापरीभाव इति कर्मसन्तान आस्थेयः । सोऽपि चैकमुपसंग्राहकमन्तरेण न भवत्यत उक्तं भाष्यकृता—एकार्था क्रिया क्रियासन्तान इति, एकप्रयोजनावच्छिन्नेत्यर्थः । अत्र चाधिश्रयणादयो भवन्तु पच्यर्थाः । यथाह महाभाष्यकारः—तदभिसन्धिपूर्वकं प्रेषणमध्येषणं वा युक्तं यत् तत्सर्वं पच्यर्थ इति । रूपादिपरावृत्तिमात्रार्थत्वं वास्तु पचेः । आख्यातार्थः सर्वोऽयमध्येषणादिर्भवतु भावनाभिधानः । नोभयथापि काचिदस्ति दर्शनक्षतिः । अनागताद् व्यवच्छिनत्ति—नानारम्भ इति । अनारम्भः अननुष्ठानं न विवक्षितम् । यथा पक्ष्यतीत्यत्रेत्यर्थः । अतीताद् व्यवच्छिनत्ति—नोपरमो विवक्षित इति । यथा अपाक्षीदित्यत्रेत्यर्थः । सन्तानारम्भविवक्षायामिति । आरम्भोऽत्र चिकीर्षाभिधीयत इति न विरोधः । तदेवं वर्तमानं क्रियासद्भावमुक्त्वा तत्संबन्धव्यङ्ग्यां कारकस्य वर्तमानतामाह—यच्चेदं छिद्यमानमिति

361/tha तत् क्रियमाणं वर्तमानक्रिया संबन्धेन वर्तमानं न तु स्वरूपत इत्यर्थः । § 906

तस्य च कारकस्य वर्तमानक्रियासंबन्धमतीतानागतानपेक्षमपेक्ष्यातीतानागतत्वे क्रियायाः कारकस्यापि तद्भावव्यक्तिः, तद्धेतुकं च द्वैविध्यमिति प्रतिपादनपरं सूत्रमवतारयति—तस्मिन् क्रियमाणे— § 907

कृत…णम् । भाष्यम्—आरब्धः अभीष्टफलोरीकरणेन क्रियासन्तानः पचतीति । वक्ष्यमाणासंपृक्ततोपयोगितया क्रियासन्तानस्वरूपमाह—तत्रेति क्रियासन्ताने । ननु विद्यत इत्यत्रापि पूर्वापरीभावावगमादतीतानागताभ्यां । *संपर्क एवेत्यत आह वार्त्तिककारः—अत्र हि केवल इति । शब्दमाहात्म्यात् संपर्को न वास्तवः, वास्तवं तु वर्तमानत्वमेव । अत एवाह—केवलः शुद्धः इति । पर्यायाभिधानमात्यन्तिकं संपर्काभावं दर्शयति । यदि च क्वचिन्मुख्यं वर्तमानत्वं नाभ्युपेयते, ततस्तत्पूर्वको भाक्तोऽपि वर्तमानप्रयोगोऽपि न स्यादित्यत आह—अन्यश्च लोक इति ॥ ४३ ॥ § 908

॥ वर्तमानपरीक्षाप्रकरणम् ॥

## २.१.८ उपमानपरीक्षाप्रकरणम्

### अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ २ । १ । ४४ ॥
§ 910

यथा गौरेवं गवय इत्यतिदेशवाक्यार्थस्मृतिसहकारि सारूप्यदर्शनं साध्यस्य गवयोऽयमिति संज्ञासंज्ञिसंबन्धस्य साधनमुपमानम् । तच्चेदं नोपपद्यते विकल्पानुपपत्तेः । किं यथा गौरेवं गवय इति गवात्यन्तसाधर्म्यं विवक्षितम् तथा सति गवान्तरमेव गवयः स्यात् । तदिदमाह भाष्यकारः—न चैवं भवति यथा गौरेवं गौरिति । चो यस्मादर्थे । *यस्माद् यथा गौरेवं गवय इति वाक्यस्यार्थो न भवति यथा गौरेवं गौरिति । गवा प्रायसाधर्म्यादपि गवयोपमानं न सिध्यति महिषस्यापि गवा भूयःसाधर्म्यस्य विद्यमानत्वेन त- 362/tha
स्यापि गवयाभिधानप्रसङ्गात् । तदिदमाह—न हि भवति यथानड्वानेवं महिष इतीति । यथानड्वानेवं गवय इत्यस्य वाक्यस्यार्थो यथानड्वानेवं महिष इति यस्मान्न भवति । एकदेशसाधर्म्याद् गवा गवयोपमानं न भवति, एकदेशोपमानस्यैवानुपपत्तेरतिप्रसङ्गात् । तदिदमाह—न हि सर्वेण सर्वमुपमीयते । तथा सति सुमेरोरपि सर्षपेणोपमानप्रसङ्गात् ॥ ४४ ॥ § 911

### प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ २ । १ । ४५ ॥ § 912

प्रकरणाद्यपेक्षं हि वाक्यं स्वार्थं प्रतिपादयति, न केवलम् । तद्वशाच्च क्वचिदत्यन्तसाधर्म्यं प्रतीयते, क्वचिद्भूयःसाधर्म्यं, क्वचिदेकसाधर्म्यम् । तदिदं

७ *] संपृक्तnvt-C nvt-C
७ *] तस्माद्nvt-C
१२ मानं] एकदेशसामर्थ्यादुपमानं

प्रतीतमहिषादिकं पुरुषं प्रति यदा यथा गौरेवं गवय इति वाक्यमुच्चार्यते तथा महिषादिपरिहाण्या भूयःसादृश्यं विवक्षितमित्यवगम्य तद् वाक्यार्थं स्मरन् महिषादिषु वने गोसाधर्म्यं पश्यन्नपि न गवयसंज्ञां निवेशयति, अपि तु भूयःसाधर्म्यवति गवय एव तां निवेशयति । यस्त्वप्रतीतमहिषादिस्तं प्रति एतद्वाक्यमुपमानं न भवत्येवेति परमार्थः । यथा च प्रकरणादिवशादत्यन्तप्रायैकदेशसाधर्म्यमाश्रित्यातिदेशवाक्यानि प्रवर्तन्ते तथा चोक्तं वार्त्तिककृता । § 913

न साधर्म्यस्येत्यादि भाष्यं नियमं निषेधति । न साधर्म्यस्य कृत्स्नभावमेव वा प्रायोभावमेव वा अल्पभावमेव वा आश्रित्योपमानमतिदेशवाक्यं प्रवर्तते । किं तर्हि ? प्रसिद्धसाधर्म्याद् हेतोः साध्यसाधनभावमाश्रित्य उद्दिश्येति । एतदुक्तं भवति । न नियमः, किं तु क्वचित् किञ्चित् साधर्म्यमाश्रित्यातिदेशवाक्यं प्रवर्तते । तच्च प्रकरणाद्युन्नेयमिति । अनभ्युपगमादिति च वार्त्तिकं नियमाभिप्रायमेव । तत्क्रिययैव तत्क्रियान्तरमित्यर्थः ॥ ४५ ॥
§ 914

363/tha

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ २ । १ । ४६ ॥ § 915

यथा गौरेवं गवय इति हि वाक्यं प्रत्यक्षेण गवा गवयमप्रत्यक्षं प्रतिपादयति । न खलु श्रुतवाक्योऽपि यदा प्रत्यक्षेण गवयं पश्यति तदा वाक्यार्थावगमादधिकं किञ्चित् प्रतिपद्यते । संज्ञासंज्ञिसंबन्धोऽप्यनेन वाक्यादेवावगतः । तस्मात् प्रत्यक्षेण गवा अप्रत्यक्षस्य गवयस्य गवयसंज्ञाविशिष्टस्य प्रतीतेरुपमानस्यानुमानतेति पूर्वः पक्षः ॥ ४६ ॥ § 916

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः ॥ २ । १ । ४७ ॥ § 917

सिद्धान्तस्तु—ना…मः । § 918

गवयत्वं हि संज्ञि । न च तद् यथा गौरेवं गवय इति वाक्यात् प्रतीयते । अपि तु कस्यचिद् गवा सादृश्यम् । न च वाक्यगतो गवयशब्दस्तस्य वाचकः तथा तदानीमगृहीतसंगतित्वात् । न च सादृश्यं संज्ञि । तस्मात् प्रत्यक्ष एव गवये गवयत्वस्य प्रत्यक्षत्वात् संज्ञासंज्ञिसंबन्धपरिच्छेदः प्रमाणार्थः । उपपादितं चैतदुपमानलक्षणे । तस्मादप्रत्यक्षो गवयः प्रत्यक्षेण गवा प्रतीयत इति सिद्धमित्यर्थः । § 919

पूर्वपक्षवाद्याह—परार्थमुपमानमिति चेत् मन्यसे सिद्धान्तवादिन्, तत् न अस्ति । कुतः ? स्वयमध्यवसायात् । एवं हि परार्थं स्याद् यथा

२ रिहाण्या ] परिहाराय nvt-C
२ द् ] गतं वाक्यार्थं nvt-C
९ वाक्यं ] कृत्स्नभावमेव वाल्प° आश्रित्याति° nvt-C
१६ वा ] गवयप्रत्यक्षं nvt-C
१९ स्य ] प्रत्यक्षस्य nvt-C

गौरेवं गवय इति वाक्यं यदि परस्यैवाध्यवसायं जनयेत्, यावतोच्चारयितुरप्यध्यवसायं जनयति । तस्मात् स्वार्थमपीत्यर्थः । एतदेव दर्शयति भाष्यकारः—भवति भोः स्वयम् अप्युच्चारयितुर्वाक्याद् अध्यवसाय इति । सिद्धान्तवाद्याह—नाध्यवसाय उच्चारयितुः प्रतिषिध्यते, उपमानं तु उच्चारयितारं प्रति न भवति । कुत इत्यत आह— प्रसिद्धसाधर्म्यादिति ॥ ४७ ॥ § 920

364/tha

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ २ । १ । ४८ ॥

§ 921

वार्त्तिकं तु परार्थत्वेनानुमानादुपमानभेदमाह—परार्थत्वाच्चेति । ननु प्रत्यक्षं सारूप्यज्ञानमुपमानम्, न चैतत् परार्थमित्यत आह—न हि यथा गौरिति । अस्तु तर्हि वाक्यमेवेत्यत आह—न ह्यागमेति । भिन्नयोरप्यनुमानोपमानयोरेतावन्मात्रेण साधर्म्यमित्युपसंहारव्याजेनाह—तस्माद् यथेति । अतिरोहितमितरत् ॥ ४८ ॥ § 922

॥ इत्युपमानपरीक्षाप्रकरणम् ॥

## २.१.९ शब्दसामान्यपरीक्षाप्रकरणम्

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ २ । १ । ४९ ॥

§ 924

अत्र हि सूत्रकारेण प्रथममनुमानान्तर्गतिः परीक्षिता । न चापरीक्षितप्रमाणभावस्य सा युक्तेति वार्त्तिककारः प्रथममस्य प्रमाणभावमेव परीक्ष्यते । तस्याक्षेपः, न शब्दः प्रमाणमिति । यस्मिन् सति प्रमा भवत्येव न न भवति, तत्प्रमाणं साधकतमस्य करणत्वात् । सत्यपि शब्दे प्रमा न भवतीति तस्य साधकतमत्वं विघटयति—विषयाभावाच्चेति । प्रामाण्यं हि विषयवत्तया व्याप्तम् । सा शब्दान्निवर्तमाना प्रामाण्यमपि निवर्तयति, वृक्षतेव निवर्तमाना स्वव्याप्यं शिंशपात्वम् । द्विविधश्च विषयः प्रत्यक्षः परोक्षश्च । तत्र पूर्वः प्रत्यक्षस्य प्रमाणस्य विषयः । अप्रत्यक्षश्चाविनाभूताल्लिङ्गादवगन्तव्यः । तदनपेक्षणेऽसंबन्धाविशेषात् सर्वं सर्वस्माद् गम्येत । तथा च सर्वः परोक्षार्थप्रत्ययोऽनुमानव्याप्तः । न च प्रत्यक्षपरोक्षाभ्यामन्यो राशिरस्ति । तस्माद् विषयाभावदपि न शब्दः प्रमाणमिति । § 925

यत् तावत् सत्यप्यप्रमितेरिति, तन्न असिद्धत्वादिति । न शब्दमात्रं प्रमाणमपि तु गृहीतः स्मर्यमाणसंबन्धश्च । न चेदृशे शब्दे सति प्रमा न 365/tha
भवति । यादृशे तु सति प्रमा न भवति, नासौ प्रमाणमित्यर्थः । तन्मह-

६ ति ] न तु भवति**nvt-J**

त्प्रत्ययकर्तृत्वादिति । महत्त्वपरिमाणं हि महतो विशेषणम् । तज्ज्ञानं विशेष्ये महति प्रमाणम् । § 926

तदेवं सिद्धप्रमाणभावस्य शब्दस्यानुमानादभेदं परीक्षमाणः पूर्वपक्षयतिअनुमानं शब्द इति । § 927

शब्दो...त्वात् । यज्ज्ञानं प्रत्यक्षेणानुपलभ्यमानार्थविषयं प्रत्यक्षस्य पश्चादुपजायते तदनु—मावम्, यथाग्निमद्धूमज्ञानम्, तथा च शब्दज्ञानं तस्मादनुमानमित्यर्थः ॥ ४९ ॥ § 928

## उपलब्धेरद्विप्रवृत्तित्वात् ॥ २ । १ । ५० ॥ § 929

अद्विप्रवृत्तिकत्वं प्रकारभेदरहितत्वं प्रत्यक्षानुमाने तु परोक्षापरोक्षावगाहितया प्रकारभेदवती इत्यर्थः ॥ ५० ॥ § 930

## संबन्धाच्च ॥ २ । १ । ५१ ॥ § 931

## आप्तोपदेशसामर्थ्यात् शब्दादर्थसंप्रत्ययः ॥ २ । १ । ५२ ॥ § 932

सिद्धान्तस्वरूपमुपक्रमते—यत् तावदिति । एतेन संशयादिषु व्यभिचारेण । तेऽपि हि त्रिकालविषया इति । अन्वयव्यतिरेकोपपत्तिमात्रं प्रत्यक्षेऽप्यस्ते । प्रत्यायनाङ्गान्वयव्यतिरेकज्ञानं तु अन्यादृशं शब्दे, अन्यादृशं चानुमाने । तद्धि पक्षधर्मताद्यपेक्षमनुमाने, शब्दे तु तदनपेक्षमित्यत्र सूत्रं भवति—आप्तो...यः । § 933

यो ह्यत्यन्तादृष्टपूर्वः स्वर्गापूर्वदेवतादिः स वाक्यार्थरूपः । तथा हि § 934
366/tha

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥§ 936

इति स्वर्गो वाक्यार्थः । एवमपूर्वमपि । तत् खलु स्वर्गनरकादिभोगहेतुः पुरुषविशेषगुणः कालान्तरावस्थायी स्वफलविरोधीति वाक्यार्थ एव । एवं देवताऽपि । सा हि सूक्तहविर्भागिनी सहस्राक्षाद्युपेतदेहादिमती वाक्यार्थ एव । न चैष शब्दादृतेऽस्मदादिप्रत्यक्षादिगोचरः । न चागृहीतसंबन्धं लिङ्गमस्मिन् प्रवर्तितुमर्हति । न चागृहीते संबन्धिनि शक्यग्रहः संबन्धः । पदं तु यद्यपि पदार्थसंगतिसंविदमपेक्षते यद्यपि च पदार्थ एव पदार्थान्तरविशिष्टो वाक्यार्थः, तथापि वाक्यार्थे स्वर्गादौ पदार्थस्मरणद्वारेण प्रवर्तमानं संगतिग्र-

---

१ विशेष्ये ] तन्न ज्ञातं nvt-C; ज्ञानं विशेषे nvt-J
११ न्धाच्च ] अत्र टीका नास्ति
२० दुःखेन ] दुःखेन यन्न संnvt-J
२१ म् ] सुखं स्वर्गपदा°nvt-J
२३ स्थायी ] स्वकार्यवि°nvt-C
२५ चैष ] नैवैषःnvt-C

हानपेक्षमेव स्वर्गरूपवाक्यार्थं प्रतिपादकानि च पदानि कुर्वन्ति, लोकसिद्धं सुखजातीयमुद्दिश्य लोके सिद्धैरेव दुःखाद्यसंभेदैर्विशिष्टं स्वर्गपदवाच्यं प्रतिपादयन्ति, नापदार्थं वाक्यार्थीकुर्वन्ति । वाक्यार्थे च पदवचनं स्वर्ग इति यथा । श्रोत्रियश्छन्दोऽधीत इति । यथा च चक्षुरादयो रूपादिष्वगृहीतसङ्गतयः प्रवर्तन्ते, एवं पदार्थसंगतिग्रहापेक्षाण्यपि पदानि वाक्यार्थावबोधने न संगति ग्रहमपेक्षन्ते, कार्यव्यङ्ग्यत्वात् प्रमाणभावस्य, संगतिग्रहापेक्षेभ्योऽपि च पदेभ्यो वाक्यार्थावबोधकार्यदर्शनात् । तस्मान्न पदं तदर्थो वा वाक्यार्थावबोधे लिङ्गं तत्र संबन्धग्रहानपेक्षत्वाद् रूपादिबोधे चक्षुरादिवत् । § 937

स्यादेतत् । माभूत् प्रत्यक्षतोदृष्टमनुमानं वाक्यार्थे, सामान्यतोदृष्टं भविष्यति । यद्यपि च वाक्यार्थे साध्ये पदानामपक्षधर्मत्वं, यद्यपि च पदस्मारिताः पदार्था व्यभिचारिणः तथाप्याकाङ्क्षायोग्यतासत्तिविशेषणाः पदार्थाः स्वसंसर्गे लिङ्गं भविष्यन्ति । तथा हि यन्न दुःखेनेत्यादिभिः पदैः स्मारिताः पदार्था गुणप्रधानभावेनावस्थिताः संसर्गवन्तः आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वात् गामभ्याजेत्यादिपदस्मारितपदार्थवत् । संसर्गस्य च संसृज्यमाना एव विशेषो न पुनराजानतोऽस्ति कश्चिद् भेदः । संसृज्य- 367/tha
मानाश्च पदैरेव स्मारिता इति संसर्गविशेषप्रतिलम्भः । स एव च वाक्यार्थ इति सिद्धमानुमानिको वाक्यार्थ इति । गामभ्याजेत्यत्र पदार्थानां संसर्गवत्त्वं च वाक्यश्रवणसमनन्तरप्रयोज्यवृद्धप्रवृत्त्यनुमितपदार्थसंसर्गप्रत्ययादवगतम् । तदेतदचतुरस्रम् । पदानामेव पदार्थस्मारणावान्तरव्यापाराणां वाक्यार्थप्रमां प्रति करणतया प्रमाणत्वात् तेषां चापक्षधर्मतया लिङ्गत्वानुपपत्तेः । § 938

यदि तु पदानि पदार्थमात्रपर्यवसितवृत्तीनि न वाक्यार्थप्रत्यायनपराणि स्युः, ततो न पदार्थानामाकाङ्क्षा अस्तीति वाक्यार्थप्रत्ययो न भवेत् । न खल्वाकाङ्क्षां विना सन्निधियोग्यताभ्यामेव पदार्थाः संसृज्यन्ते, यथा अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र पुत्रसंबन्धेन निराकाङ्क्षो राजा न पुरुषेण संबध्यते । न च पदानां वाक्यार्थप्रत्ययपरत्वमन्तरेण तत्स्मारितानां पदार्थानामाकाङ्क्षास्ति । न हि यद् येन विना न भवति तत् तदाकाङ्क्षति, येन कारकं क्रियामपेक्षेत द्रव्यं वा गुणम् । तथा सति पटो भवतीति वाक्यं न निराकाङ्क्षं स्यात्, पटस्य गुणाकाङ्क्षित्वात् । तस्माद् रक्तः पटो भवतीत्यस्यैकदेशः पटो भवतीति साकाङ्क्षत्वादप्रमाणम् । एवं केवलं पटो भवतीत्यपि वाक्यं साकाङ्क्षं स्यात्, न चैवमस्ति । पटो भवतीति हि वाक्यं यं कश्चिद् गुणं गृहीत्वा अनाकाङ्क्षं प्रमाणमेव । *यदा पुना रक्तः पटो भवतीत्यस्यैकदेशो, यं कश्चिद् गुणमाक्षिप्य निराकाङ्क्षः, एवं हि विभागे सति

---

४ न्दोऽधीत ] पा. सू. ५. २. ८४
७ च ] पदभेदेभ्यःnvt-C
१५ भेदः ] कश्चिद् विशेषःnvt-C
१६ म्भः ] विशेषःnvt-C
२० त्तेः ] न लिङ्गत्वम् *Alankāraḥ*
२१ राणि ] प्रत्ययपराणिnvt-C
३१ * ] न पुनाnvt-J

निराकाङ्क्षत्वेन वाक्यभेदः स्यात् । रक्त इत्यपि हि वाक्यं यं कश्चिद् गुणिनं क्रियां च यां काञ्चिदाक्षिप्य निर्वृणुयात् । न च विशेषदर्शने सति नाक्षेप इति युक्तम् । एकवाक्यतायां सत्यां विशेषदर्शनेऽनाक्षेपः । विशेषदर्शनेऽनाक्षेपे च सत्येकवाक्यतेत्यन्योन्याश्रयापत्तेः । तस्माद् वाक्यार्थप्रतिपादनपरसमभिव्याहृतपदकदम्बस्मारितत्वेनापर्यवसानमेव पदार्थानामाकाङ्क्षेति युक्तमुत्पश्यामः । तथा च पटो भवतीत्येतावन्मात्रं निराकाङ्क्षं यं कश्चिद् गुणमाक्षिप्य
368/tha निर्वृणेति । रक्तः पटो भवतीत्यत्र तु रक्तपदस्यापि समभिव्याहारात् पटादिसंसर्गपरत्वमिति पटादिसंसर्गमन्तरेण रक्तत्वमपर्यवस्यत् पटादयश्च रक्तत्वसंसर्गं विनापर्यवस्यन्तः परस्परसंबद्धा भवन्तीति सिध्यत्येकवाक्यता । तस्मात् पदान्येव पदार्थस्मारणेन तत्संसर्गं लक्षयन्ति वाक्यार्थे प्रमाणम् । तेषां चापक्षधर्मतया न लिङ्गत्वम् । § 939

स्यादेतत् । अयं पदकदम्बकविशेषः स्मारितपदार्थसंसर्गवान् आकाङ्क्षादिमत्त्वे सति पदकदम्बत्वात् गामभ्याजेतिपदावलीवदिति नापक्षधर्मता । नैवम्, अन्योन्याश्रयापत्तेः । कर्मकारकं हि फलादन्यद् वस्तुतः सिद्धं ज्ञानलक्षणाय फलाय कल्पते । यथा अग्निमत्ता धूमस्य पर्वतस्य वाग्निसंयोगः, न त्वग्निज्ञानजनकत्वं तद्वत्ता । फलव्यङ्ग्यं हि तन्नानुपजाते फले कल्पते । तथा च फलोपजनने सत्यग्निमत्ता तद्वत्तायां च कर्मणि फलोपजननमित्यन्योन्यसंश्रयापत्तिः । न च फल कर्मणोरैक्यम् । न हि वृक्ष एव छिदा भवति । तदिह संसर्गवत्त्वं पदानां तज्ज्ञानजनकत्वं नानुमानसाध्यं भवितुमर्हति । न ह्यग्निज्ञानजनकत्वं धूमस्यानुमानसाध्यमित्युक्तम् । स्मृतिजनकत्वमप्येषां वाक्यार्थप्रत्यायनाय कल्पितं न संबन्धान्तरं व्यनक्तीति । तत् सिद्धमेतत् न पदानि वाक्यार्थबोधे लिङ्गम् अपक्षधर्मत्वान्मनोवदिति । § 940

अपि च लौकिक एवार्थः परीक्षकैरनुगम्यते । न तु स्वकृतलक्षणानुरोधेनालौकिकमास्थीयते । न च क्लेशेन कयाचित् प्रणाड्या पक्षधर्मतां कल्पयित्वा लोकः पदेभ्यो वाक्यार्थमवगच्छति, अपि तु स्वतन्त्रेभ्य एव तेभ्य इति सिद्धः शब्दस्य प्रमाणस्यानुमानाद् भेदः । आप्तोक्तत्वं तु स्वर्गादिप्रतिपादकस्यागमस्य प्रामाण्ये लिङ्गमेव । न चैतावता तदर्थ आनुमानिको भवति । न हि प्रवृत्तिसामर्थ्यानुमितप्रामाण्यस्य प्रत्यक्षस्य विषयो भवत्यानुमानिकः । अर्थविषयं हि प्रमाणं प्रामाण्यविषये च प्रवृत्तिसामर्थ्याप्तोक्तत्वे इति । एवं व्यवस्थिते अभ्युच्चयमात्रतया भाष्यवार्त्तिककारभ्यामाप्तोक्तत्वाश्रयत्वानाश्रयत्वे शब्दानुमानभेदहेतुतयोपन्यस्ते इति मन्तव्यम् । एतेन प्रवृत्तिभेदकथनेन अद्विप्रवृत्तिकत्वं व्याख्यातम् निराकार्यतया । § 941

संबन्धात् प्रतिपत्तेरनुमानं शब्द इति यदुक्तं पूर्वपक्षिणा तदनुभाष्य
369/tha दूषयति— यत्पुनरेतदिति । अस्येदमिति षष्ठीविशिष्टस्येति भाष्यम् । तस्य व्याख्यानम्वाच्यवाचकभाव इति । स्वाभाविको हि शब्दार्थयोः संब-

न्धस्त्रेधा स्यात् तादात्म्यलक्षणो वा प्रत्याय्यप्रत्यायकभावो वा प्राप्तिलक्षणो वा । तत्राव्यपदेश्यपदेन प्रत्यक्षलक्षणस्थेन तादात्म्यमपाकृतम् । शब्दार्थयोः प्राप्तिनिराकरणहेतुना चोपरिष्टादौत्पत्तिकः प्रत्याय्यप्रत्यायकभावो निराकरिष्यते । तेन प्राप्तिं निराकरोति भाष्यकारः—प्राप्तिलक्षणस्त्विति । एकेन्द्रियग्राह्ययोर्हि प्राप्तिः प्रत्यक्षा यथाङ्गुल्योः न तु शब्दार्थयोरेकेन्द्रियग्राह्यता, तस्मान्नानयोः प्राप्तिः प्रत्यक्षगम्या, वायुवनस्पत्योरिवेत्यर्थः । ननु शब्दशब्दस्यार्थः समानेन्द्रियग्राह्य एव, तत् कथं येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतीतोऽर्थ इति । अत आह—अस्ति चातीन्द्रियविषयभूतोऽपीति । शब्दग्राहकेन्द्रियमतिपतित इन्द्रियमात्रमतिपतितश्चातीन्द्रियः स च विषयभूतश्चेति कर्मधारयः । § 942

तदेतद् यस्माच्छब्दस्येति वार्त्तिकेनं व्याख्यातम् ॥ ५२ ॥ § 943

पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः ॥ २ । १ । ५३ ॥ § 944

प्राप्तिलक्षणे चेत्यादि भाष्यं व्याचष्टे—नानुमानेनापीति । उपसंपद्यते प्राप्नोति, गच्छतीति यावत् । पूर…वः ॥ आगच्छन्नुपलभ्येत मोदकादिः, न चोपलभ्यते, तस्मान्नागच्छति शब्ददेशमर्थः । ततश्च अस्मिन् पक्षे शब्देन लोकव्यवहार उच्छिद्येत । अथ शब्द इति । न तावद् गुणस्य शब्दस्य गतिरुपपद्यते । तस्मात् सन्तानवृत्त्या शब्दोऽर्थदेशं गच्छतीति वाच्यम्, तथा च नित्यत्वव्याहतिरित्यर्थः । शङ्कते—अथ नागच्छति इति । भवति विद्यत इत्यर्थः । अभूत्वा भवनं भवत्यर्थ इति मत्वा निराकरोति—नित्यश्च भवति चेतीति । शङ्किता स्वाभिप्रायमाह—अथ न गच्छतीति । निराकरोति—न सर्वार्थेति । न हि समानदेशाः समानेन्द्रियग्राह्याः प्रति नियतव्यञ्जकव्यञ्ज- 370/tha
नीया दृष्टा इत्यभिप्रायः । सामान्यस्याश्रयोपलब्धिर्व्यक्तिहेतुः । न च पुनः शब्दस्याश्रयोपलब्धिरस्ति यतः शब्दो व्यज्येत, प्रत्युत शब्देनैवाश्रयो व्यञ्जनीयः स्यात् । तथा चार्थाश्रितः शब्दस्तात्वादिभिरप्राप्तेः सर्वान् प्रति व्यक्त इत्युक्तदोषापत्तिरिति । न च शब्दस्यार्थे वृत्तिरनुभवगोचर इत्याह—न च वाच्ये वृत्तिः । आगमात् प्रतिपत्स्यत इति, निरुक्तादिरागमः । उत्तरम्—स एवात्रेति । निरुक्तादीनामर्थसंबन्धे सिद्धे प्रतिपादकत्वं भवेत् । स एव तु विचार्यत इत्यर्थः ॥ ५३ ॥ § 945

शब्दार्थव्यवस्थानादप्रतिषेधः ॥ २ । १ । ५४ ॥ § 946

पूर्वपक्षवाद्याह—शब्दा…धः ॥ ५४ ॥ § 947

---

१ स्त्रेधा ] °स्तथा nvt-C
५ योर्हि ] °ग्राह्येभ्यो हि nvt-C
२८ एवात्रेति ] एवायमिति nvt-J

## न सामयिकत्वाच्छब्दार्थ संप्रत्ययस्य ॥ २ । १ । ५५ ॥

§ 948

सिद्धान्तवाद्याह—न सा...स्य । § 949

न सामयिकत्वादिति । अभिधानाभिधेयनियमनियोग इति । अभिधानाभिधेययोर्नियमो गोशब्दस्य सास्नादिमानेवार्थ एवमश्वशब्दस्य केशरादिमानेवेति, तस्मिन् नियोगो बोद्धव्य इति भगवतः परमेश्वरस्य सर्गादौ, सोऽयं समय इत्यर्थः । तस्मिन्नुपयुक्ते ज्ञाते शब्दार्थव्यवस्था भवति । संबन्धवादिनोऽपि चायमवर्जनीय इति । येऽपि मीमांसका वैयाकरणा वा स्वाभाविकं शब्दर्थयोः संबन्धमास्थिषत तेषामपि नैष सत्तामात्रेण गमकोऽपि तु ज्ञातः सन् । विज्ञाने चायमस्य वाचक इति वास्मादयं बोध्यव्य इति वा संकेत एवोपायः । वृद्धव्यवहारोऽपि गवादिशब्दानां देवदत्तादिशब्दवत् सङ्केतपूर्व एव । तद् वरमस्तु सङ्केत एव, कृतमत्र स्वाभाविकेन संबन्धेन तन्मात्रादेव प्रयोगप्रतिपत्तिव्यवहाराणामुपपत्तेरित्यर्थः । § 950

371/tha

नन्वयं समयः केषाञ्चित् शब्दानामसति स्वाभाविकेऽर्थैः संबन्धे न कर्तुं शक्यः । निर्दिश्य ह्यर्थं ब्रूयादयमस्माद् बोद्धव्य इति । न च निर्देशोऽसति स्वाभाविके संबन्धे केषाञ्चित् शब्दानां सिध्यति । सङ्केताधीने तु वाचकत्वे सर्वेषां शब्दानामकृतसमयत्वात् किं केन निर्दिशेत् ? तस्मात् सङ्केतकरणमेव स्वाभाविकसंबन्धं प्रतिपादयति शब्दानामित्यत आह—प्रयुज्यमानग्रहणाच्चेति । परमेश्वरेण हि यः सृष्टादौ गवादिशब्दानामर्थे सङ्केतः कृतः, सोऽधुना वृद्धव्यवहारे प्रयुज्यमानानां शब्दानामविदिसंगतिभिरपि बालैः शक्यो ग्रहीतुम् । तथा हि वृद्धवचनानन्तरं तच्छ्राविणो वृद्धान्तरस्य प्रवृत्तिनिवृत्तिभयशोकहर्षादिप्रतिपत्तेस्तद्धेतुं प्रत्ययमनुमिमीते बालः । तस्य च सत्स्वप्यन्येष्वप्यर्थेषु भूतस्याभूतस्य वा श्रवणसमनन्तरं च भवतो वाक्यश्रवणहेतुतामवगच्छति तदवयवानां च पदानामावापोद्वापभेदेन तत्तदर्थप्रत्ययोपजनापायदर्शनात् तेषु तेष्वर्थेषु तेषां तेषां पदानां वाचकत्वं कल्पयति । एवं पदावयवेषु प्रकृत्यादिष्वपि द्रष्टव्यम् । सोऽयं वृद्धव्यवहारः साम्प्रतिकानां सङ्केतग्रहोपायः, सर्गादिभुवां तु महर्षिदेवादीनां परमेश्वरानुग्रहाद् धर्मज्ञानवैराग्यैश्वर्यातिशयसंपन्नानां परमेश्वरेण सुकर एव सङ्केतः कर्तुम् । तद्व्यवहाराच्चास्मदादीनामपि सुग्रहः सङ्केतः । तद्व्यवहारपरम्परागतश्चास्मदादीनामपि सङ्केतग्रहो न संबन्धस्मृतिमपेक्षते, आप्तपरम्परात एव ततो निःशङ्कव्यवहारोपपत्तेः । अत एवाह भाष्यकारः—लौकिकानामिति । § 951

स्यादेतत् । यदि शब्दानां साङ्केतिकसंबन्धो न स्वाभाविकः कृतं तर्हि साध्वसाधुविभागपरेण व्याकरणेन । स्वाभाविकं हि यस्य वाचकत्वं स साधुरसाधुश्चेतरः । सामयिकत्वे तु सर्व एव साधवोऽसाधवो वेत्य-

१७ निर्दिशेत्] निर्दिश्येतnvt-C

२५ वेषु] प्रकृतादि°nvt-C

त आह—समयपरिपालनार्थं चेदमिति पारमेश्वरसमयपरिपालनार्थमित्यर्थः, तथा च येषां पदानां येनार्थेन परमेश्वरेण कृतः समयः, तानि तत्र साधूनि, असाधूनीतरत्रेति विभागाय व्याकरणमर्थवदिति सिद्धम् । अर्थरूपस्तुषो लेशोऽर्थतुषः, स नास्ति । केवलं परैः प्राप्तिलक्षणः संबन्धः कल्पित 372/tha इत्यर्थः । तथा च स्वाभाविकसंबन्धाभावादनुमानाभेदायाविनाभावसिद्ध्यर्थं स्वाभाविकसंबन्धाभिधानमयुक्तमिति सिद्धम् । § 952

वार्त्तिकम्—स पुनः समयः कुत इति । यदि केचनापि शब्दा न प्रसिद्धसंबन्धास्ततोऽशक्यप्रतीतिः समय इति भावः । उत्तरम्—पदज्ञानात् । पदं ज्ञायते व्युत्पाद्यते अनेनेति व्युत्पत्या व्याकरणादित्यर्थः । ननु सर्वेषां शब्दानामविदितसङ्गतिः कथं व्याकरणादपि शब्दमयात् समयं प्रतिपद्यते इत्यत आह—लोकतश्चेति । वृद्धव्यवहारावधृतसमयो व्याकरणात् साध्वसाधुविभागं च प्रतिपद्यत इत्यर्थः । तदेतद् विभजते—तद्धि शास्त्रमिति । § 953

एवं तावद् दृष्टेनैव समयेनोभयसिद्धेन शब्दार्थव्यवस्थापनस्योपपत्तेर्नात्यन्तापरिदृश्यमानस्वाभाविकसंबन्धकल्पना युक्तेत्युक्तत् ॥ ५५ ॥ § 954

## जातिविशेषे चानियमात् ॥ २ । १ । ५६ ॥ § 955

संप्रत्यनुपपन्नोऽप्ययं स्वाभाविकः संबन्ध इत्याह—जाति...मात् ॥ स्वाभाविको हि संबन्धः कस्यचिच्छब्दस्य केनचिदर्थेनास्ति, न तु सर्वस्य सर्वेण । तथा सति शब्दार्थव्यवस्था न स्यात् । एवं चेत् न कृष्यार्यम्लेच्छानां नियमः स्यात् । तथा हि यवशब्द आर्यैर्दीर्घशूके पदार्थे प्रयुज्यते । ते हि यवशब्दाद् दीर्घशूकं पदार्थं प्रतिपद्यन्ते । म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते । ते हि ततः प्रियङ्गुं प्रतिपद्यन्ते । एवं त्रिवृतशब्दमृषयः स्तोत्रीयानवके प्रयुञ्जते आर्यास्तु लताविशेषे । सोऽयमनियमो न स्वाभाविके संबन्धे । न हि स्वाभाविकसंबद्ध आलोको रूपेण सहस्रेणापि शिल्पिभी रसादिसंबद्धः शक्यः कर्तुं यतस्ततो रसादयो गम्येरन् । नापि तत्र संकेतेन स्वाभाविकः संबन्धो व्यज्यते । सदेव हि व्यज्यते नासत् । नो खलु यत्र घटो नास्ति तत्र तं प्रदीपः शक्तो व्यङ्क्तुम् । सोऽयमनियमः सामयिकत्वे उपपद्यते पुरुषेच्छाधीनत्वात् तस्याश्चानियमात् । न तु स्वाभाविकेन इति । न च 373/tha वाच्यम् सर्व एव शब्दाः सर्वैरेवार्थैः स्वभावतः संबद्धाः सङ्केतेन तु नियम्यन्त इति प्रमाणाभावात् । जातिभेदेन चार्थभेदप्रत्ययस्य सङ्केतभेदादप्युपपत्तिरिति । § 956

नन्वार्यदेशवर्त्तिनां म्लेच्छानामार्यव्यवहारनिश्चितसङ्केतानां नानियम इत्यत आहवार्त्तिककारः—जातिविशेषशब्देनेति ॥ ५६ ॥ § 957

॥ शब्दसामान्यपरीक्षाप्रकरणम् ॥

---

१० यात् ] मात्रात्nvt-C
१० ते ] बुध्यतेnvt-J
१२ त ] गृह्णातिnvt-J
१९ चेत् ] °वं च तर्हिnvt-C
२८ स्वाभाविकेन ] °विकत्वेनnvt-J

## २.१.१० शब्दविशेषपरीक्षाप्रकरणम्

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ २ । १ । ५७ ॥
§ 959

अनुमानान्तर्भावे कदाचिदर्थाविनाभावात् भवेत् शब्दस्य प्रामाण्यम् । तद्बहिर्भावे तु सुलभमस्याप्रामाण्यमिति मत्वा अनुमानभेदाभिधानानन्तरमप्रामाण्यमाह पूर्वपक्षी— तद...भ्यः । § 960

तस्य इत्यादिभाष्यम् । तद् वार्त्तिककारो व्याचष्टे—तदित्यधिकृतशब्दाभिधानादिति । शास्त्रे ह्यस्मिन् निःश्रेयसाधिगमपरे तन्नान्तरीयकतया वेदप्रामाण्यव्युत्पादनमधिकृतमित्यधिकृतः शब्दो वेद इत्यर्थः । § 961

स्यादेतत् । अनृतत्वमप्रामाण्यमिति पर्यायः । तथा च प्रतिज्ञार्थ एव हेतुरित्यत आह—अप्रामाण्यमर्थस्याप्रत्यायकत्वम् । अर्थस्येत्यविपरीतस्येत्यर्थः । पुत्रकामेष्टिकारीर्यादयो हि ऐहिकफला नामुष्मिकफलाः, ऐहिकत्वेनैव तत्फलस्य चेतनेन काम्यमानत्वात् एतच्छरीरोपभोगयोग्यत्वाच्चेति । विरुद्धार्थोपस्थापकत्वेन सहासंभवो वाक्ययोर्वा पदयोर्वेति । अत्र भाष्यकारेणोदितहोमादिविधिवाक्यानां निन्दाभिर्व्याघात इत्युक्तम् । अधिकविवक्षया 374/tha वार्त्तिककार आह—अग्निहोत्रमिति । होमकालानामुदितादीनां निन्दया प्रतिषेधात् । ननु मध्याह्नापराह्णसायाह्नाः भविष्यन्ति होमस्य काला इत्यत आह—न चान्य इति । तेषामपि सर्वेषामुदितकालत्वादित्यर्थः । यस्तु उदयानन्तर एव काल उदितकाल इत्युच्यते, तथा चान्योऽस्ति काल इत्युक्ते व्याघाते न तुष्यति, तं प्रत्यन्यथा व्याघातमाह—उदितानुदितेति । अग्निहोत्रं जुहोतीत्युत्पत्तिवाक्येन विहितेऽग्निहोत्रनाम्नि होमे तदनुवादेनैकं वाक्यमुदितं कालं विधत्ते । अन्यच्चानुदितकालमपरं च समयाध्युषितकालम् । न चैक एव होमस्तदा तदा शक्यः कर्तुम् । न च कालगुणानुरोधेन प्रधानहोमस्यावृत्तिर्युक्ता । न चोदिततादिवाक्येषु होमस्याभ्यासः श्रूयते । तस्मात् परस्परव्याघातादप्रामाण्यमेव साधीय इति । नन्वेतेऽनृतत्वादयः सर्ववेदवाक्याव्यापिन इति भागासिद्धतया हेत्वाभासता इत्यत आह—दृष्टान्तत्वेनेति । अयमत्र प्रयोगः । पुत्रकामेष्टिहवनाभ्यासवाक्यानि अप्रमाणम् अनृतत्वादिभ्यः क्षणिकादिवाक्यवदिति । एवं शेषाणि वेदवाक्यानि अप्रमाणं वेदवाक्यत्वात् पुत्रकामेष्ट्यादिवाक्यवदिति । पर्युदासं साध्यमुक्त्वा तेनैव हेतुना प्रसज्यप्रतिषेधं साध्यमाह—अग्निहोत्रादिवाक्यानां वेति । तदन्यद् वाक्यं पुत्रकामेष्ट्यादि ॥ ५७ ॥ § 962

न कर्मकर्तृसाधनवैगुण्यात् ॥ २ । १ । ५८ ॥ § 963

---

२३ स्यावृत्तिर्युक्ता ] °वृत्तिरिति युक्तम्nvt-C

एवं पूर्वपक्षमुक्त्वा सिद्धान्तमुपक्रममाणः प्रथमं तावदनृतत्वं दूषयति—न क ...त् । § 964

फलादर्शनमन्यथाप्युपपद्यमानं नानृतत्वं साधयति । ततश्चासिद्धमनृतत्वं हेतुरित्यर्थः । स्यादेतत् । इष्टेश्चोदितत्वादनपेक्षेयं पुत्रजन्मकारणमिति किमस्याः कर्मकर्तृवैगुण्यं करिष्यतीत्यत आह—इष्टेः करणसाधनत्वेनेति । दृष्टसहकार्यदृष्टं कारणम्, न केवलम् । तद् दृष्टवैगुण्यादुपपन्नमभवनं फलस्येत्यर्थः । अपेक्षणीयं कर्तारमाह—पितराविति । करणमाह—इष्ट्येति 375/tha । क्रियामाह—संप्रयुज्यमानाविति । इष्ट्याश्रयं तावदिति भाष्यम् । समीहा तदङ्गसमिदादिकर्मानुष्ठानम् । तस्या भ्रेषो भ्रंशोऽननुष्ठानमिति यावत् । अविद्वान् प्रयोक्तेति, विदुषामिहाधिकारः सामर्थ्यात् । अत+एव स्त्रीशूद्रतिरश्चामसमर्थानामनधिकारः । विद्वानपि यदि द्विजातिकर्महानिहेतुं कर्म ब्रह्महत्यादि कृतवान्, तत्कृतमपि कर्म न फलाय कल्पते कर्तृत्वे वैगुण्यादिति दर्शयति—कपूयेति । कपूयं निन्दितं कर्म । आचरतीत्याचरणः पुरुषः । हविरसंस्कृतम् *अश्रृतमप्रोक्षितं वा । उपहतं श्वमार्जारादिभिः । मन्त्रा न्यूनाः क्रमविशेषेण । दक्षिणा दुरागता *चौर्यद्यूतोत्कोचादेर्दुष्टादुपायादागतेत्यर्थः । अन्वाहार्यमिह दक्षिणा । सा ततो न्यूना वा दीयते यावत्या पुरूषो न तृप्यति । स च पुरुषाहारो जरत्तरत्वेनापाक्यतया निन्दितः । मिथ्यासंप्रयोगः पुरुषायितादि । मातरि योनिव्यापदो नानाविधाः प्रजनप्रतिबन्धहेतवः । लोहितरेतसो बीजस्योपघात उपहतत्वम् । यतः प्रजनो न भवति । मिथ्याभिमन्थनं यतो नाग्निर्जायते । § 965

कर्मकर्तृवैगुण्ये आह वार्त्तिककारः—तथेष्टेः साधयितुरिति । मन्त्राणामसामर्थ्यादिति । मन्त्रादिसाधनानां पुत्रकामेष्ट्यादीनां कर्मणामित्यर्थः । ननु यदि निरपेक्षा नेष्टिः साधनं तर्ह्यनपेक्षमाणौ पितरावेव सम्यक् संप्रयुज्यमानौ पुत्रस्य जनकौ, कृतमत्र पुत्रकामेष्ट्या । § 966

अत+एव म्लेच्छादीनामपि पुत्रजन्मोपपद्यत इत्यत आह—तत्सहकारित्वादिति । नान्वयव्यतिरेकगम्यमिष्टेः साधनत्वम् अपि त्वागमगम्यम् । म्लेच्छादीनां पुत्रजन्म जन्मान्तरीयादृष्टवशादित्यागमप्रामाण्यादनुसरणीयम् । दृश्यमानकर्मकर्तृवैगुण्ये च फलानुत्पादोऽदृष्टमपेक्षणीयं सूचयति । तदनेन पुत्रकामेष्ट्यादीनामनियतफलत्वमपि सूचितं भवति । तथा च कर्मान्तरप्रतिबन्धेन कर्मकर्तृसाधनावैगुण्येऽपि फलानुत्पादः समर्थितो भवति । ऐहिकफलेषु तु कारीर्यादिषु वैगुण्यं परिहारः । अनृतत्वादप्रामा ण्यमिति 376/tha चेदिति । धर्मिविशेषणत्वेनोपयुक्तानामपि पश्चात् निष्कृष्य हेतुत्वाभिधानं न

---

४ मिति ] °क्षेयं साधयति पुत्रकारणंnvt-C
१० विदुषामिहाधिकारः ] विदुषो ह्यधि°nvt-C
१४ *] अपूतंnvt-C
१५ *] °दौत्य°nvt-C
१९ तः ] पुत्रजन्मnvt-C
२३ नं ] तास्तर्हिnvt-C
२६ म् ] सहकारित्वम्nvt-C
३१ वैगुण्यं ] साधनवैगुण्यम्nvt-C
३२ हेतुत्वाभिधानं ] निष्कृष्याभि° nvt-C

दोषावहमिति भावः । उत्तरम्—किमिदमिति नन्वर्थाप्रतिपादकत्वं प्रतिज्ञातम् । *एतदेवानृतत्वं च हेतुरिति प्रतिज्ञाहेत्वोरर्थभेद इत्यत आह—अनृतत्वं चेति ॥ ५८ ॥ § 967

### अभ्युपेत्य कालभेदे दोषवचनात् ॥ २ । १ । ५९ ॥ § 968

यत् पुनरुक्तम् उदिते होतव्यमित्यादीनामेव परस्परं व्याघात इति, तत्राह— उभयेति । त्रिषु कालविधिपरेषु वाक्येष्वेकैकेनैव वाक्येनोभयोभयवाक्यार्थप्रतिषेधानभिधानात् । नान्यथा नाप्रामाण्यमित्यर्थः । यद्यपि चैको होमः समुच्चयेन तदा तदा न शक्यः कर्तुम्, तथापि विकल्पेन करिष्यते । बहुलं हि विकल्पो लोकेऽप्युपलभ्यते । वस्तु हि व्यवस्थितं न विकल्प्यते । अनुष्ठाने चानागतोत्पाद्ये विधिप्रतिषेधविकल्पानामविरोधः स्वरूपानिष्पत्तेरिति । वाक्यार्थो न कर्तव्य इति वाक्यं तन्न कर्तव्यमित्यस्यार्थः । कामतो वा विकल्प्येत इति परस्परव्याहतार्थं कल्प्येतेत्यर्थः । अभिहितं वेति, यदनेन वाक्येन स्वसामर्थ्येनाभिहितम्, तद् वा परीक्षकैरवधृत्यानूद्यते इदमनेन वाक्येनाभिहितमिति । निर्धारयति—अभिहितेति । विहितानुवादो वेति क्वचित् पाठः । विहितो होमस्तस्यानुवादः कालविशेषविधानायेति । विहितानुवाद एव न्याय्यः कालविशेषविधानाय, न तु कालान्तरप्रतिषेधोऽर्थः कल्पितोऽर्थ इत्यर्थः ॥ ५९ ॥ § 969

### अनुवादोपपत्तश्च ॥ २ । १ । ६० ॥ § 970

एकादश सामिधेन्य उत्पत्तौ पठिताः । तासां प्रथमोत्तमयोस्त्रिर्वचनं पञ्चदशावरत्वं मन्त्रस्य प्रयोजनवतः साधयत्सप्रयोजनमिति । § 971

377/tha

तदेवं वेदाप्रामाण्यहेतूनुद्धृत्य प्रामाण्यसंभवहेतुः सूत्रकारेण वक्तव्य इति पूर्वं वार्त्तिककारः स्वत एव तावत् प्रामाण्यसंभवहेतूनाह—पुत्रकामेष्टीति ॥ ६० ॥ § 972

### वाक्यविभागस्य चार्थग्रहणात् ॥ २ । १ । ६१ ॥ § 973

सौत्रं हेतुमवतारयति—समस्तानीति ॥ ६१ ॥ § 974

### विध्यर्थवादानुवादवचनविनियोगात् ॥ २ । १ । ६२ ॥ § 975

विध्य...गात् ॥ ६२ ॥ § 976

### विधिर्विधायकः ॥ २ । १ । ६३ ॥ § 977

२ *] अनृतत्वं nvt-C
८ दा] तदा nvt-C
११ स्यार्थः] वाक्यं न कर्तव्यमित्युक्तम् nvt-C
१७ ल्पितोऽर्थ] कल्प्यते nvt-C
२० त्वं] °दशावरत्व° nvt-C

विधिर्विधायकः ॥ तस्य व्याख्यानं यद् वाक्यमिति । चोदकं प्रवर्तकम् । अत्र चारोग्यकामः पथ्यमश्नीयादित्याद्युपदेशश्रवणसमनन्तरं पथ्याशने प्रवर्तमानं प्रयोज्यवृद्धमुपलभ्य बालस्तस्य प्रवृत्तिहेतुं प्रत्ययमनुमिमीते, अस्य प्रवृत्तिः प्रवर्तकप्रत्ययपूर्विका स्वतन्त्रप्रवृत्तित्वात्, मत्प्रवृत्तिवत् । स चायमनुमाता व्युत्पित्सुः स्वात्मसिद्धमेव प्रवर्तकज्ञानमनुमिनोति, नादृष्टपूर्वम् । न हि स्वात्मसिद्धे प्रवृत्तिहेतौ दृष्टे संभवत्यदृष्टकल्पना न्याय्या । न चैष शब्दतद्व्यापारपुरुषाशयनिरुपाधिप्रवर्तकमात्रापूर्वप्रत्ययानात्मनि प्रवर्तकानवगतवान्, येन तेषु प्रवर्तकत्वशङ्काप्यवतरेत् । स्तन्यपानादिविषयककार्यप्रत्ययोऽस्य प्रवर्तक इति चेत् ? किं पुनरेतत् कार्यमिति । पुरुषप्रयत्नः कृतिः, *तद्व्याप्यमिति चेत् ? ननु कृतिरिति मानसी प्रवृत्तिः, तदुपहितं कार्यं प्रवृत्तिविषयः प्रवृत्तिफलं वा फलोद्देशेन पुरुषप्रवृत्तेः । तदवगमश्च  प्रवृत्तिहेतुः । 378/tha प्रवृत्त्यवगतिस्तर्हि प्रवृत्तिहेतुरित्युक्तं भवति । *न चाननुविधेयनियोगेष्वस्माकं व्युत्पन्नानां नास्ति प्रवृत्त्यवगमः । न चास्मात् प्रवर्तेमहि । अपि चेयं प्रवृत्तिः प्रयत्नापरनामा इच्छाद्वेषयोनिरसति कारणे न स्वज्ञानमात्रादुदेतुमर्हति । न चेच्छाद्वेषावेव प्रवृत्तिहेतू लिङादिगोचराविति साम्प्रतम् । स खलु लिङादिगोचरोऽ भ्युपेयो यः स्वज्ञानेन प्रवर्तयति न तु स्वसत्तया, शब्दस्य ज्ञापकत्वादनुत्पादकत्वाच्च । न चेच्छाद्वेषौ स्वज्ञानेन प्रवर्तयतो यतः प्रवृत्तिं प्रति स्वज्ञानाय शब्दमपेक्षेयाताम्, अपि तु सत्तया । तस्मात् तदेव लिङादेर्ज्ञाप्यम् । यज् ज्ञातं यदिच्छाद्वेषै प्रसूते, तत्र फलं निसर्गसुन्दरतया ज्ञातमात्मनीच्छां प्रसूते, एवं तदुपायोऽपि, तत् तया ज्ञातः फलसंबन्धादात्मनीच्छाम् । तस्माद् द्वयमवशिष्यते फलं तदुपायो वा । तत्र फलस्य यद्यपि स्वत+एवेच्छादिविषयत्वम्, तथापि तद्विषयेच्छां न तत्र प्रवर्तयितुमर्हति, तस्यायोग्यत्वेन प्रवृत्तिविषयत्वानुपपत्तेः । न च फलगोचरेच्छा अन्यत्र तदुपाये स्वकार्यं प्रयत्नं जनयितुमर्हति इषिप्रयत्नयोरेकविषयतया कार्यकारणयोः संप्रतिपत्तेः । न च तत्संबन्धात् तदुपायो नेष्यते येन फलेच्छाया एवोपायविषयप्रयत्नः प्रसवहेतुत्वं प्रकल्प्येत । यथाहुः § 978

अन्यदिच्छत्यन्यत्करोतीति विप्रतिषिद्धमिति ।§ 979

तस्मादिष्यमाणमपि फलं प्रवृत्तिविषयत्वाभावान्नात्मनि स्वज्ञानेन प्रवर्तकम् । तदुपायस्तु प्रवृत्तिविषयत्वादिष्यमाणत्वाच्च स्वज्ञानेन प्रवर्तक इति युक्तमुत्पश्यामः । बालानां च स्तन्यादावपेक्षितोपायताज्ञानं प्राग्भवीयव्याप्तिग्रहणजनितसंस्कारानुवृत्तिवशादुत्पन्नव्याप्तिस्मरणानां तज्जातीयत्वलिङ्गज्ञानजम-

६ सिद्धे ] स्वात्मनि पूर्वसिद्धेnvt-C
९ *] °व्याप्यत्वमितिnvt-C
१२ *] न चाननुविधेयोऽश्रद्धेय इत्यधिकम् nvt-C
१९ दिच्छाद्वेषै ] सत्यम् ज्ञानमिच्छा° nvt-C
२४ ति ] इतिप्रयत्नयोरिति मातृके; इच्छाप्रयत्नयोरिति शोधनम् nvt-C

नुमानमेव । एतच्च पूर्वाभ्यस्तस्मृत्यनुबन्धात् इत्यत्रोपपादयिष्यते । अत एव प्रयोजनलक्षणं व्याचक्षाणेनोक्तं वार्त्तिककृता— § 980

इदं सुखसाधनमिति बुद्धा सुखावाप्तये प्रयतते । इदं दुःखसाधनमिति चावगम्य दुःखहानायेति । § 981

379/tha

तस्मादपेक्षितोपायता प्रवर्तना स्वात्मनि सिद्धा वृद्धस्यापि प्रवृत्तिहेतुरित्यवगच्छति व्युत्पित्सुर्बालः । सा च लिङादिश्रवणसमनन्तरमुपजायमाना लिङाद्यर्थ इति निश्चिनोति । न चापेक्षितोपायतामात्रं प्रवृत्तिहेतुः । भवति हि यजमाननिर्वर्तिता कारीरी कृषीबलानामपेक्षितोपायः । न चैतेऽस्यां प्रवर्तन्ते तस्याः सिद्धत्वात् । तस्मात् कर्तुरपेक्षितोपायता प्रवृत्तिहेतुरित्यास्थेयम् । § 982

न च सिद्धे कर्तृतास्ति । यथाह भगवान् जैमिनिः

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् इति ।§ 984

लोके च क्रियैवापेक्षितोपायः शब्दार्थ इति तदनुसारेण अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यादयोऽपि वैदिका उपदेशा क्रियामेवापेक्षितोपायमभिदधति । सा चेयमाशुतरविनाशिन्यप्यवान्तरापूर्वव्यापारा सती चिरभाविनेऽपि फलाय कल्पते कृषिरिव निदाघसमयजन्मा हेमन्तसमयभाविने शस्यायेति नापूर्वस्यात्रापेक्षितोपायत्वं कल्पयितव्यम् । भवतु वा तदेवापेक्षितोपायप्रवृत्तिहेतुः, तथापि कर्तुरपेक्षितोपायतालक्षणसमानोपाधिप्रवृत्तिर्विधिशब्दस्तदेकोपाधिसंबन्धात् क्वचित् क्रियायां क्वचिदपूर्वे प्रवर्त्स्यति न नः काचिद् दर्शनक्षतिः । तदेवमुपदेशे नियोज्यप्रयोजनकर्मणि व्युत्पन्नः तानेव शब्दान् नियोक्तृप्रयोजनकर्मण्याज्ञादौ प्रयुज्यमानानुपलभ्याध्येषणानुज्ञावाचकत्वमप्यवगच्छति । अग्निहोत्रादिवाक्यानां तु प्रयोज्यप्रयोजनकर्मवाचिनामुपदेशत्वमेव । तस्माद् यद्यप्याज्ञाध्येषणामन्त्रणोपदेशाः सर्वे विधयः, तथापि इह उपदेशो विधिरभिमतः । तस्मात् सुष्ठूक्तम्—यद्वाक्यं विधायकमिति कर्त्रपेक्षितोपायताज्ञापकमित्यर्थः । § 985

विधिस्तु नियोगोऽनुज्ञा वेति भाष्यमनुभाष्य व्याचष्टे—विधिस्त्विति ।
380/tha यदेतत्, अग्निहोत्रं जुहुयात् स्वर्गकामः § 986

इति वाक्यमप्रवृत्तप्रवर्तकलक्षणं कर्त्रपेक्षितोपायतामज्ञातां ज्ञापयद्विधिः, तदेव तत्साधनद्रव्याद्यवाप्तिप्रवृत्तिमनुजानाति । § 987

एतदुक्तं भवति—*सन्ति हि द्रव्यार्जननियमविधयः ब्राह्मणस्य प्रतिग्रहादिना इत्यादयः । ते च रागतो धनार्जने प्रवृत्तानां ब्राह्मणानां

---

१ न्धात्] न्या. सू. ३. १. १८
४ हानायेति] १. १. २४ सुत्रस्य वार्त्तिकं द्रष्टव्यम्
९ म्] हेतुरास्थेयम्nvt-C
१२ त्वात्] जै. सू. ३. ७. १८
२० नः] समानोपाधिर्विधि...प्रवर्तत इति नnvt-C
२१ ब्दान्] नियोक्तुं प्र°nvt-C
२८ ज्ञातां] पायतां ज्ञाप°nvt-C
३० *] ये *for*सन्तिnvt-C

लौकिकानेकोपायप्रसक्तौ सत्यां नियमपराः पुरुषार्थाः न क्रत्वर्थाः । क्रतुविधयस्तु धनसाधनास्तेन विना अपर्यवस्यन्तोऽपि न धनार्जनं तन्नियमं वा प्रयुञ्जते, पुरुषार्थत्वेनैव तस्य प्रयुक्तत्वात् केवलमनुजानन्ति । तस्मात् तदेवाग्निहोत्रादिवाक्यमप्राप्तेऽग्निहोत्रादौ विधिरन्यतः प्राप्ते तु तत्साधनेऽनुज्ञेति सिद्धम् । समुच्चये वाशब्दः ॥ ६३ ॥ § 988

## स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ २ । १ । ६४ ॥ § 989

स्तुतेरुपयोगद्वयम्—प्रवृत्त्या, धर्मे कर्तव्ये विधिना प्रवृत्तौ कर्तव्यायां च सहकारिता । प्रशस्तमिति ज्ञात्वा प्रवर्तमानाः पुमांसः प्रवर्तन्तेतराम् । सा च प्रवृत्तिः श्राद्धस्य धर्मं प्रसूते, नाश्राद्धस्य । तथा च श्रूयते— § 990

यदेव प्रज्ञया श्रद्धयोपनिषदा च करोति तदेवास्य
वीर्यवत्तरं भवतीति ।§ 992

तत्र प्रवृत्तेः कार्यसहकारितामाह—स्तूयमानमिति । विधेः कार्ये सहकारितामाह—प्रवर्तिका चेति । § 993

कथं परकृतिपुराकल्पावर्थवादौ इति । चरकाध्वर्युपुरुषसंबन्धश्रवणाद् वपाहोमपृषदाज्याभिघारणयोः क्रमभेदस्याप्राप्तस्य पुरुषविशेषधर्मतया विधायकं परकृतिवाक्यम् । तथा बहिष्पवमानसोमस्तोममन्त्रसंबन्धस्य पूर्वकालपुरुषसंबन्धितया श्रवणाद् इदानीन्तनपुरुषधर्मतया विधायकं पुराक- 381/tha
ल्पवाक्यं कस्मात् न भवतीति भावः । उत्तरम्—स्तुतिनिन्दावाक्येन कस्यचिद् विधेः शेषभूतेनाभिसंबन्धादिति । न तावदेतेषु वाक्येषु सिद्धाभिधायिषु विधिश्रुतिरस्ति । तत्र किमश्रूयमाणो विधिः कल्प्यतामाहो प्रतीतेन विधिनैकवाक्यतेति । तत्र कल्पनालाघवात् प्रतीतेन विधिनैकवाक्यतैव ज्यायसी । पूर्वपक्षे विधिकल्पना तदेकवाक्यताकल्पनेति द्वयं कल्पनीयम् । उत्तरस्मिंस्तु एकवाक्यतामात्रमिति भावः । स्फुटतरस्तुतिनिन्दाप्रतीत्यभावाच्च परकृतिपुराकल्पयोः स्तुतिनिन्दाभ्यां भेदेनोपन्यास इति ॥ ६४ ॥ § 994

## विधिविहितस्यानुवचनमनुवादः ॥ २ । १ । ६५ ॥ § 995

विधिमधिकृत्य स्तुतिर्वोच्यते निन्दा वेति । यथा अश्वमेधेन यजेत इति विधेरनुवादः योऽश्वमेधेन यजेत इति । किमर्थम् ? स्तोतुम् । तरति मृत्युं तरति पाप्मानम् इति स्तुतिः । उदिते होतव्यम् इत्यस्य विधेरनुवादो य उदिते जुहोति इति । किमर्थम् ? निन्दितुम् । श्यावो वास्याहुतिमभ्यवहरतीति निन्दा । § 996

---

१ क्तौ ] °प्रयुक्तौnvt-C
२ न्तोऽपि ] °स्तेऽनूदिताः पर्य°nvt-C
३ त्वेनैव ] °र्थेनैवnvt-J
१२ तीति ] विद्या *for*प्रज्ञयाnvt-Cकरोति श्रद्धया च तदेवnvt-J

प्रयोजनान्तरमाह—विधिशेषो वाभिधीयत इति । यथा यदाग्नेयोऽष्टाकपालो 382/tha भवति इत्यादिभिरुत्पत्तिवाक्यैः षडाग्नेयादयो यागाः पौर्णमास्यमावास्याकालसंबद्धा विहिताः । ते च विधय इष्टाभ्युपायतारूपाः स्ववाक्ये चेष्टमनासादयन्तः सापेक्षाः । एवमाघाराद्युत्पत्तिविधयोऽपि कालविशेषासंबद्धा इष्टापेक्षा एव । तत्र य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते इति कालविशेषसंबन्धेनोत्पन्नानामाग्नेयादीनां षण्णामनुवादः । किमर्थम् ? यदाग्नेयोऽष्टाकपाल इत्याद्युत्पत्तिविध्यपेक्षितेष्टसंबन्धनियमार्थम् । दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत इति षण्णामेवाग्नेयादीनां कालविशेषसंबन्धोत्पन्नानूदितानां फलसंबन्धो यथा स्यात् । मा भूदाघारादीनां कालासंबन्धेनोत्पन्नानामित्येवमर्थम् । अत आघारादयः फलवत्सन्निधावफलं तदङ्गम् इति दर्शपौर्णमासाङ्गतयावतिष्ठन्त इति सिद्धं भवति । सोऽयं फलसंबन्धनियमो विधिशेषः । तदर्थमनुवाद इत्यर्थः । एवम् अग्निहोत्रं जुहोति इति विहितो होमोऽनूद्यते । किमर्थम् ? दध्यादिगुणविशेषविधानार्थम्, दध्ना जुहोति पयसा जुहोतीत्यादिषु । सोऽयं गुणविधिर्विधिशेष इति । प्रयोजनान्तरमनुवादस्याह—विहितानन्तरार्थ इति । यथा सोमो विहितो दर्शपौर्णमासौ च । तयोरानन्तर्यं विधातुमुभयानुवादः दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेत इति । एवम् अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति इति । विभागेऽर्थग्रहणात् प्रमाणं भवितुमर्हतीति प्रामाण्यं संभाव्यत इत्यर्थः ॥ ६५ ॥ § 997

383/tha

## नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ २ । १ । ६६ ॥ § 998

भाष्योक्तमनुवादस्य प्रयोजनमविदुषः पूर्वः पक्षः ॥ ६६ ॥ § 999

## शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ २ । १ । ६७ ॥

§ 1000

वार्त्तिकम् यथेति । यथा शीघ्रं गम्यतामित्युक्ते शीघ्रतरं गम्यतामिति न पुनरुक्तम्, तरपः क्रियातिशयप्रतीतेः, एवं शीघ्रं शीघ्रं गम्यतामित्यभ्यासात् क्रियातिशयप्रतीतेः सकृदुच्चरिताद्यानवगतेः क्रियातिशयस्य प्रयोजनवानभ्यासः । क्रियाविशेषणातिशयोऽपि क्रियातिशय एवेत्यर्थः । अवगतं तावत् शीघ्रं शीघ्रं गम्यतामित्यत्राभ्यासातिशयप्रतीतेरनुवादस्य विशेषः, पचति पचतीत्यादौ तु को विशेष इत्याह—कः पुनरसौ विशेषः ? यः पचति पचतीत्यादौ भवतीति । न च वक्तुरन्यथाप्रत्ययः श्रोतुश्चान्यथा, येन विप्र-

१४ विधिर्विधिशेष ] °विधिविधि° nvt-J
१७ इति ] इत्यादिः nvt-J
१८ णात् ] प्रामाण्यं nvt-C
२९ स्य ] गम्यतामित्यत्रानु° nvt-J

तिपत्तेः श्रोतुः प्रत्ययो भ्रान्त इति कल्प्येत इत्याह—यथा च श्रोतुरिति । एवमन्योऽपीति । यथा ग्रामो ग्रामो रमणीय इत्यादिरिति ॥ ६७ ॥ § 1001

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ २ । १ । ६८ ॥ § 1002

अनन्तरसूत्रावतारणपरं भाष्यं किं पुनः प्रतिषेधेति । तदनुभाष्य व्याचष्ट—किं पुनरिति । उत्तरं नेति । पृच्छति—किं कारणम् ? उत्तरं न साधनमन्तरेणेति । पुनः पृच्छति—कुतस्तर्हीति । उत्तरं प्रमाणतः । पृच्छति—तत् किं प्रमाणम् । तत्र तावद् वेदप्रामाण्यसंभावनायां प्रमाणमाह—अर्थविभागवत्त्वात् । न त्वेतद् वेदप्रामाण्ये प्रमाणम्, बुद्धादिप्रणीतेनागमेनार्थविभागवता अनैकान्तिकत्वात् । वेदप्रामाण्यप्रमाणं तु सूत्रोक्तम्—मन्त्रा...ण्यात् । § 1003
384/tha

चशब्दः पूर्वहेत्वनुकर्षणार्थ इति । पूर्वस्य प्रामाण्यसंभावनाहेतोरर्थविभागवत्त्वस्यानुकर्षणार्थः । संभावितो हि पक्षो हेतुना साध्यते न त्वसंभावितः । यथाहुः § 1004

संभावितप्रतिज्ञायां पक्षः साध्येत हेतुना । § 1005

न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥§ 1006

इति । सूत्रं व्याचष्टे—यथा मन्त्रायुर्वेदवाक्यानीति । पुरुषस्य भगवतो वेदकारस्य विशेषः प्रत्यक्षीकृतहेयोपादेयतत्त्वता च भूतदया च यथार्थचिख्यापयिषा च करणपाटवं चेति । विशेष्यते ह्यनेनैव पुरुषः पुरुषान्तरेभ्योऽनाप्तेभ्य इति । त्रिविधेन विशेषणेनेत्युपलक्षणम्, करणपाटवमपि द्रष्टव्यम् । § 1007

एतदत्राकूतम् । अनन्तान्तर्गणिकभेदाः सुखदुःखवन्तः प्राणभृद्भेदा दृश्यन्ते । न चैषां वैचित्र्यं स्वाभाविकमिति तृतीये निवेदयिष्यते । न च दृष्टकारणमात्रनिबन्धनम्, तस्य तस्य दृष्टस्य दृष्टव्यभिचारत्वात् । तस्माद् दृष्टसहायमदृष्टमस्य वैचित्र्यस्य कारणम् । तच्चापूर्वमिति च धर्माधर्माविति चाख्यायते । तच्च कस्यचित् प्रत्यक्षं मन्वादेरित्युपपादितम् । तनुभुवनादिलक्षणस्य कार्यस्य कर्ता तन्निर्माणसमर्थः समस्तवस्तुतत्त्वज्ञः क्लेशकर्मविपाकाशयापरामृष्टः परमकारुणिकः तनुभुवनादेरेव कार्यादनुमीयत इति चतुर्थे उपपादयिष्यते । सोऽयमात्मीयहिताहितप्राप्तिपरिहारोपायान् अविदुषः प्राणिनः पश्यन् प्रत्युतानेकविधदुःखदहनदह्यमानानवलोकयन् कथं न तप्येत, तप्यमानो वा हिताहितप्राप्तिपरिहारोपायतत्त्वं विद्वान् कथं नोपदिशेत् अन्यथोपदिशेद् वा । तस्मादनेन परमकारुणिकेन पृथिव्यादि सृष्ट्वा तदनु प्रजाश्चतुर्विधास्ताभ्यो हिताहितप्राप्तिपरिहारोपाय उपदेष्टव्यः । न ह्ययमनुपदिश्य स्थातुमर्हति । प्र-

१७ च ] तद्धेतुभूता भूत°nvt-C
२१ न्तः ] °र्गणिकसुखदुःखभेदवन्तःnvt-C
२३ त्वात् ] तस्य दृष्टव्य°nvt-C

जानां पितृकल्पस्य चास्योपदेशो देवर्षिमनुष्यगोचरश्चातुर्वर्ण्येन चातुराश्रम्येण चादराद् ग्राह्यश्च धार्यश्च हिताहितप्राप्तिपरिहारोपायानुष्ठानाय । तस्माद् यो वर्णाश्रमाचारव्यवस्थापक आगमो महाजनपरिगृहीतः स तत्प्रणीत आप्तोक्त-
385/tha त्वात् प्रमाणम्, मन्त्रायुर्वेदवाक्यवदिति संप्रधार्यते । कतमोऽसावागम आप्तोक्तः, किं *शाक्यभिन्नकदिगम्बरसंसारमोचकादीनामागमाः, किं वा वेदा इति ? तत्र शाक्याद्यागमानां बुद्धर्षभादयः प्रणेतार इति स्फुटतरमस्ति स्मरणं न तूक्तलक्षण ईश्वरस्तेषां कर्त्तेति । न चैते शौद्धोदनिप्रभृतयः तनुभुवनादीनां कर्तारो येन सर्वज्ञा इति निश्चीयेरन् । तदुपायानुष्ठानेन तु संभाव्येतैषां सर्वज्ञता । न च संभावनामात्रेण तत्प्रणीतेषु आगमेषु आश्वासः प्रेक्षावतां भवितुमर्हति । न चैतेषामागमा वर्णश्रमाचारव्यवस्थाहेतवः । नो खलु निषेकाद्याः श्मशानान्ताः क्रियाः प्रजानामेते विदधति । नहि प्रमाणीकृतबौद्धाद्यागमा अपि लोकयात्रायां श्रुतिस्मृतीतिहासपुराणनिरपेक्षागममात्रेण प्रवर्तन्ते, अपि तु तेऽपि सांवृतमेतदिति ब्रुवाणा लोकयात्रायां श्रुत्यादीनेवानुसरन्ति । तस्माद् भवतु वेदेषु जगन्निर्मातृकर्तृकत्वस्मृतिः, मा वा भूत्, एत एव त्वीश्वरप्रणीता इति पश्यामः । न ह्येते चैत्यवन्दनादिवाक्यवदन्यकर्तृकाः स्मर्यन्ते । न चान्य आगमो लोकयात्रामुद्वहन् महाजनपरिगृहीत ईश्वरप्रणीततया स्मर्यमाणो दृश्यते । न चेश्वरोऽनुपदिशन्नवस्थातुमर्हतीत्युक्तम् । तत् पारिशेष्याद् वेदा एव सकललोकयात्रामुद्वहन्तो हिताहितप्राप्तिपरिहारोपायमुपदिशन्त ईश्वरप्रणीता इत्यवगच्छामः । तथा ह्येत एव त्रैवर्णिकैरद्ययावत् प्रयत्नेन गृह्यन्ते धार्यन्ते च । तदनुपालनाय च महर्षिपरम्पराभिरङ्गोपाङ्गेतिहासपुराणधर्मशास्त्राणि प्रणीतानि । बुद्धादिवाक्यानि तु न लोकयात्रामुद्वहन्ति । न च तत्र लौकिकानामविगानम् । न च विगायतां सांवृतमित्युक्त्वापि तदर्थानुष्ठानम् । तस्माद् विगानात् कैश्चिदेव म्लेच्छादिभिर्मनुष्यापसदैः पशुप्रायैः परिग्रहान्नैतेषामाप्तोक्तत्वसंभवः । न चैतेषां मन्वादिवाक्यवद् वेदमूलकतया प्रामाण्यमिति सांप्रतम्, अध्येत्रध्यापयित्रनुष्ठातृकर्तृसामान्यस्य वेदमूलकत्वानुमानलिङ्गस्य स्मृतिवेदयोरिव बुद्धादिवाक्येष्वभावात् । ततः सर्वज्ञत्वसंशयेन चानुभवमूलकत्वानिश्चयात् । मन्त्रायुर्वेदेषु च प्रवृत्तिसामर्थ्यानुमितप्रामाण्येषु वैदिकशान्तिक-
386/tha पौष्टिकादिकर्माभ्यनुज्ञानात् रसायनादिक्रियारम्भे च वेदविहितचान्द्रायणादिप्रायश्चित्तोपदेशाद् आयुर्वेदेनाप्याप्तप्रणीतेन वेदानां प्रामाण्यम् अभ्युपेयते । तत् सिद्धमाप्तप्रणीता वेदाः प्रमाणमिति । अभ्युच्चयमात्रं तु कारीर्यादिषु संवाद इति । § 1008

एतदेवाभिप्रेत्य वार्त्तिककारः प्रयोगमाह—अस्य प्रयोगः । प्रमाणं वेदवाक्यानीति । प्रयोगान्तरमाह—एककर्तृकत्वेनेति । मन्त्रायुर्वेदवाक्यानि स-

---

४ दिति ] संप्रसाध्यतेnvt-C
५ *] °क्यभिक्षुकंnvt-C
२७ येन ] तत्सर्वज्ञत्वसंदेहेनnvt-C

र्वज्ञकर्तृकाणि महाजनादरे सति अलौकिकार्थप्रतिपादकत्वात् । यानि तु न सर्वज्ञपूर्वकाणि तानि नैवंरूपाणि यथा वातपुत्रीयवाक्यानीति व्यतिरेकी हेतुः । यथा च बुद्धादिवाक्यान्यलौकिकान्यपि न महाजनपरिगृहीतानि तथोक्तमनन्तरमेव । मन्त्रायुर्वेदवाक्यानां च सत्यपि प्रवृत्तिसामर्थ्ये तासां तासामौषधीनां तत्तत्संयोगभेदानां च तत्तदक्षरावापोद्धारभेदस्य च नासर्वज्ञः सहस्रेणापि पुरुषायुषैः शक्तः कर्तुं प्रथममन्वयव्यतिरेकौ । न चानिदंप्रथमतात्र परिहारः, सर्गादौ तदसंभवात् । सृष्टिमहाप्रलयौ चानुमानागमाभ्यामुपपादयिष्याम इति सर्वं रमणीयम् । तदेवं सर्वज्ञपूर्वकत्वे सति सिद्धमाप्तोक्तत्वेन मन्त्रायुर्वेदप्रामाण्यमोदनार्थो पचेदिति लौकिकवाक्यवदिति । यदि न नित्यानि कथं प्रमाणमिति । अनित्यत्वे हि पुरुषाणां विचित्राभिसन्धित्वेन भ्रमविप्रलम्भादिसंभवेऽप्रामाण्यशङ्का न शक्यापाकर्तुम् । तस्मादपौरुषेयत्वमेव पुरुषाश्रयान् दोषान् अपाकुर्वद् वेदप्रामाण्यव्यवस्थापकमिति भावः । उत्तरम्प्रतिपादकत्वादिति । आप्तोक्तत्वेनानित्यस्यापि निश्चायकत्वादित्यर्थः ।
§ 1009

केचित् त्विति । प्रमालक्षणामर्थक्रियां कुर्वत् प्रमाणम् । न च नित्यस्यार्थक्रियास्ति तस्मान्न प्रमाणमित्यर्थः । निराकरोति—तत्तु न सम्यगिति पश्याम इति । यथा च नित्यस्याप्यर्थक्रियासंभवस्तथा तृतीये वक्ष्याम इति भावः । आत्मा चेति प्रमाहेतुतामात्रविवक्षया, न तु करणत्वाभिप्रायम् । प्रमाणशब्दस्येति अत्रापि न करणत्वविवक्षा, किं तु प्रमाहेतुमात्रविवक्षेति द्रष्टव्यम् । इतरवस्तुसाधकत्वेनेति इतरस्य परमाणुगतस्यैव मूर्तत्वादेः साधकतमत्वेनेत्यर्थः । § 1010
387/tha

तदेवमेकदेशिमतमपाकृत्य स्वमतमाह—तस्मादिति । स च संसारानादित्वादिति । यद्यपि वर्णपदवाक्यानि प्रत्युच्चारणमन्यानि तथापि गत्वादिसामान्यावच्छिन्नानां गकारादीनां तत्समूहानां च पदानां पदसमूहानां च वाक्यानां शक्यो गोत्वादिसामान्यावच्छिन्नाभिः शाबलेयादिव्यक्तिभिरेव सङ्केतो ग्रहीतुमिति भावः । मन्वन्तरेति । महाप्रलये त्वीश्वरेण वेदान् प्रणीय सृष्ट्यादौ संप्रदायः प्रवर्त्यत एवेति । शेषं भाष्यं वार्त्तिकं चातिरोहितार्थमिति ॥ ६८ ॥ § 1011

॥ शब्दविशेषपरीक्षाप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां द्वितीयाध्याये प्रथमाह्निकम् ॥

११ र्तुम्] भ्रमशङ्का न शक्यापाकर्तुम् nvt-C

# २.२ द्वितीयाध्याये द्वितीयाह्निकम्

388/tha

## २.२.१ प्रमाणचतुष्ट्वपरीक्षाप्रकरणम्

न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात् ॥ २ । २ । १ ॥
§ 1014

अयथार्थ इति भाष्यम् । प्रमाणानां विभागोद्देशो यः सोऽयथार्थ इति । तदेतद् वार्त्तिककारो व्याचष्टे—प्रत्यक्षेति । § 1015

न च...ण्यात् । एवं विपर्यस्तस्याक्षेप इति भाष्यमतेन सूत्रं व्याख्याय प्रकारान्तरेणापि व्याचष्टे—संशयव्युदासार्थं वा प्रकरणम् । सूत्रं तु संशयार्थम् । न चतुष्ट्वं निश्चेतुं शक्यम् । कस्मात् ? ऐतिह्यार्थापत्तिसंभवाभावप्रामाण्यात् परैरभ्युपगतादस्माकं संशयादिति सूत्रार्थः । तात्पर्यान्तरमाह—विधीति । विभागोद्देशोऽधिकनिषेधपर इति पक्षे अयथार्थः प्रमाणोद्देश इति पूर्वं व्याख्यातम् । संप्रति तु प्रत्यक्षादिविधिपरोऽसावारम्भः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि § 1016

इति । *अधिकनिषेधस्त्वार्थ इति पक्षमालम्ब्योक्तमित्यपौनरुक्त्यम् । तात्पर्यान्तरमाह—दोषवतामिति । तात्पर्यान्तरमाह—प्रत्यक्षादिष्विति । अन्तर्भावपरात् प्रकरणात् अर्थाद्विभागोद्देशस्य यथार्थता सिध्यतीत्यर्थः । देशयति—सिद्धत्वादिति । न हि यावत् सूच्यते सूत्रकारेण तावत्सर्वमुपपादनीयं भाष्यकारादिभिरपि तदुपपादनसिद्धेरिति भावः । परिहरति—न, अवधारणप्रयोजनस्य प्रमाणान्तरनिरासस्येति । यत् सूचनमात्रादनुक्तमपि लभ्यते तत्सूत्रकारेण नोच्यते । यत्तु सूचितमपि तिरोहितमिव तत् सूत्रकारेणोद्घाटनीयमेव । न हि तत्रास्ति निश्चयोऽस्मदभिमतमेव वदन्ति भाष्यकारादयो
389/tha नान्यदिति भावः । किमत्रार्थादापद्यत इति प्रश्नः । उत्तरम्—सत्सु भवतीति । प्रत्यनीकस्य ग्रहणादिति । अपां पातप्रत्यनीकस्य *अपातस्य ग्रहणात् तद्विरोधिनः पातविरोधिनः वाय्वभ्रसंयोगस्य ग्रहणम् तदिदं किलाभावाख्यं प्रमाणम् । प्रमीयते हि मेघोदयेऽपि तोयपाताभावेन वाय्वभ्रसंयोग इति ॥ १ ॥ § 1017

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसंभवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥ २ । २ । २ ॥ § 1018

---

१२ *] °स्त्वर्थलभ्य इति पक्षमभिप्रेत्योक्तम्nvt-C

२१ *] उपात्तस्यnvt-C
२३ येऽपि] यत्तोय°nvt-C

सिद्धान्तमाह—तान्येतानीति । ननु भविष्यत्यसौ विषय उक्तलक्षणामानामगोचरः प्रमाणानाम्, प्रवर्त्स्यन्ति च तत्रैतिह्यादीनि प्रमाणान्तराणीत्यत आह—विषयाभावाच्चेति । चोदयति—अथ प्रयोजनभेदादिति । तदेतदतिप्रसङ्गापादनेन दूषयति—एवं तर्ह्यष्टत्वमिति । न तावत् सन्ति तादृशाः प्रयोजनसामान्यविशेषा यैः प्रयोजनवन्ति प्रमाणानि परस्परतो व्यावर्तयेयुः, अपि तु भेदमात्राद् व्यावर्तयन्तीति वक्तव्यम् । तथा चातिप्रसङ्गेनाष्टत्वसंख्याव्यावृत्तिरित्यर्थः । अथ विषयसामान्येति । रूपत्वादिकं विषयसामान्यं तस्य स्वासु स्वासु व्यक्तिष्वव्यतिरेक एकत्वं तस्मादित्यर्थः । निरोकरोति—न युक्तस्तर्हीति । निरुपाधानस्वरूपमेकं व्यापकत्वान्वितत्वसंज्ञित्वोपधानाश्च त्रय इति चत्वारो विषयसामान्यविशेषा इति चतुष्ट्वप्रतिषेधो न युक्त इत्यर्थः । यद्येतानीति । यद्यैतिह्यादीनि प्रमाणानि क्व प्रत्यक्षादौ किमैतिह्याद्यन्तर्भवतीति वक्तव्यम् । अप्रमाणस्य प्रमाणेऽर्भावो न भवतीति प्रमाणानीत्युक्तम् । यत् खल्वनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यं तस्य चेदाप्तः कर्ता नावधारितः, ततस्तत् प्रमाणमेव न भवतीति यदीत्युक्तम् । § 1019

शब्द…धः । अथाक्षरपरम्परेत्यवगतं तत्राप्तोपदेशः शब्द इति लक्षणं नातिवर्तते । तदिदमुक्तम्—समानलक्षणत्वादिति । पृच्छति—कथमर्थापत्तिरिति । असत्सु मेघेषु वृष्टिर्न भवतीत्यर्थादापद्यते, सत्सु भवतीति । 390/tha
इयमर्थापत्तिः । सा कथमनुमानलक्षणेन संगृह्यते ? उत्तरम्—द्वयोरिति । अत्रोदाहरणमाह—यत्र यत्रेति । § 1020

उदाहरणस्य साध्यविकलत्वमुद्भावयति—एके त्विति । यदि दिवैव न भुङ्क्ते इति कालविशेषप्रतिषेधो निश्चीयेत ततो रात्रौ भुङ्क्ते इति कालान्तरविधानं गम्येत, न तु कालविशेषप्रतिषेधनिश्चयः । *दिवा भुङ्क्ते एव नेति भोजनादिक्रियाया यान्या शयनादिका क्रिया तन्निषेधनिषेधेन रात्रिभोजनानाक्षेपादिति । दिवैव न भुङ्क्त इत्यस्यैकस्य प्राप्तौ भवेद् रात्रौ भुङ्क्त इति, क्रियान्तरनिषेधनिषेधस्य च प्राप्तौ न वक्तव्यं रात्रौ भुङ्क्त इत्यर्थः । § 1021

तदेतद् दूषयति—एतत्तु न सम्यगिति । प्राप्तिपूर्विका हि प्रतिषेधा भवन्ति । न चेह भुञ्जानस्याभुञ्जानस्य वा क्रियान्तराभावः प्रसक्तो येनासौ प्रतिषिध्यते भुङ्क्त एव नेति । न हि कश्चिद् भुङ्क्त एव, न तु भुञ्जानो न वीक्षते अपि, अन्ततोऽस्त्यादेरपि क्रियाया भावात् । व्यापृतः कदाचिन्न व्यापारान्तरं कुर्यादपि, किं पुनरव्यापृतः ? स हि व्यापारान्तराण्यव्यासक्तः करोत्येवेत्यर्थः । उपसंहरति— तस्मादिति । कालप्रतिषेधो दिवैव भुङ्क्त इत्यस्य प्रतिषेध इत्यर्थः । *क्रियान्तरनिवृत्तेरसंभवेन निराकृतत्वात् अप्राप्तत्वान्न

९ य ] धानास्त्वयःnvt-C
१६ ते ] °देश इति शब्दलक्षणान्नाति°nvt-C
२० ति ] °मुदाहरतिnvt-C
२२ * ] अपि तु दिवाnvt-C
२३ क्रिया ] आसनादिक्रियाnvt-C
२४ नानाक्षेपादिति ] भोजनाक्षेपात्nvt-C
२५ स्य ] °निषेधाः निषेधस्यnvt-C
३२ * ] °न्तरप्रतिषेधनिवृत्ते°nvt-C

प्रतिषेध इति भावः । क्रियान्तरप्रतिषेधोऽयमिति । अन्तरशब्दो विशेषवचनः । तेन भोजनक्रियाया यदन्तरं विशेषः क्रियान्तररहितत्वं भुङ्क्ते एव तस्य प्रतिषेध इत्यर्थः । सामान्यतो दृष्टमिति यत्र न कार्यकारणयोर्गम्यगमकभावः तत्सामान्यतोदृष्टमिति ॥ २ ॥ § 1022

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ २ । २ । ३ ॥ § 1023

सत्यमेतानीति भाष्यम् । तस्यार्थः । सत्यमेतान्यैतिह्यादीनि प्रमाणानि
391/tha सन्ति, न तु प्रमाणान्तरम् नैव प्रमाणान्तरमनुमानादिभ्य इत्युक्तम् । न तु प्रमाणत्वमेवामीषां न मृष्यामह इति भावः । § 1024

अर्था...त्वात् । वार्त्तिकम् अर्थापत्तिमात्रस्येति । दिवा न भुङ्क्ते इत्यादेरर्थापत्तेरैकान्तिकत्वादिति ॥ ३ ॥ § 1025

अनर्थापत्तावर्थापत्त्यभिमानात् ॥ २ । २ । ४ ॥ § 1026

स्वमतेन दूषयित्वा सौत्रं दूषणमाह—यामपि भवानिति । § 1027

अन...नात् । न सत्सु मेघेषु वृष्टिर्भवत्येवेत्यर्थः, येन व्यभिचारो दृश्येत । अपि तु असत्सु न भवतीति । तथा च न व्यभिचार इत्यर्थः ॥ ४ ॥ § 1028

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥ २ । २ । ५ ॥ § 1029

यदि तु यत्र विषयेऽर्थापत्तिरैकान्तिकी ततो विषयान्तरं कल्पयित्वानैकान्तिकं दृश्येत ततो यः प्रतिषेधविषयः प्रामाण्यमर्थापत्तेः ततो विषयान्तरमर्थापत्तेः सत्त्वं प्रतिषेधविषयं कल्पयित्वा प्रतिषेधस्याप्रामाण्यं शक्नुमो वक्तुम् । तथा च प्रतिषेधाप्रामाण्यान्नार्थापत्तेरप्रामाण्यमित्याह—प्रति...त्वात् । § 1030

एवं ह्यैकान्तिकः प्रतिषेधः स्याद् यद्यर्थापत्तेः प्रामाण्यं च सत्तां च प्रतिषेधेत्, न तु सत्तां प्रतिषेद्धुमर्हत्यनैकान्तिकत्वात् । न हि यद्यदनैकान्तिकं तत्सर्वं नास्ति, प्रमेयत्वादीनां नित्यत्वसाधने अनैकान्तिकानां सत्त्वात् । यस्मादर्थापत्तिविशेष इति । अर्थापत्तेर्विशेषः प्रामाण्यं न त्वर्थापत्तिमात्रं सत्तेति ॥ ५ ॥ § 1031

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ २ । २ । ६ ॥ § 1032

392/tha

न चानैकान्तिकत्वं प्रामाण्यप्रतिषेधेऽस्तीति यदि मन्यते पूर्वपक्षी एवं तर्हि—तत् प्रा...ण्यम् । § 1033

१४ तीति ] अपि तु सत्सु भवतीति nvt-J
२९ तिषेधेऽस्तीति ] प्रमाणेऽस्ति *Var*nvt-J; प्रामाण्यप्रमाणत्वप्रतिषेधेऽस्ति *Var*nvt-C

विप्रतिपत्तिरप्रतिपत्तिर्वा निग्रहस्थानमिति वदत इत्यर्थः । यापि मीमांसाभाष्यकृता अर्थापत्तिरुदाहृता जीवतश्चैत्रस्य गेहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनेति, तदप्यनुमानमेव । यदा खलु सन्नेकत्र नास्ति तदान्यत्रास्ति यदा वाव्यापक एकत्रास्ति तदान्यत्र नास्ति । सोऽयं स्वशरीर एव व्याप्तिग्रहः सुकरः । तथा च सतो गेहाभावेन लिङ्गेन बहिर्भावदर्शनमनुमानम् । न च तस्य सत्त्वेन गेहाभावः शक्योऽपह्नोतुम्, येनासिद्धो गेहाभावो न हेतुः स्यात्; गेहाभावेन वा सत्त्वमपह्नूयते येन सत्त्वमेवानुपपद्यमानं न स्वात्मानं बहिरवस्थापयेत् । तथा हि सत्त्वमात्रं वा विरुध्यते चैत्रस्य गेहाभावेन गेहसत्त्वं वा चैत्रस्य न तावद् यत्र क्वचन सत्त्वस्यास्ति विरोधो गेहेऽसत्तया समानविषयत्वाभावात् । देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयतया विरोध इति चेत्—न, प्रमाणविनिश्चितस्य सांशयिकेन प्रतिक्षेपायोगात् । नापि प्रमाणविनिश्चितमेवासत्त्वं पाक्षिकं तस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं वापनेतुमर्हतीति युक्तम्, गृहावच्छिन्नाभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिषिध्यते, न तु सत्त्वमात्रं तत्र तस्यौदासीन्यात् । तस्माद् गृहाभावेन सिद्धेन सतो बहिर्भावोऽनुमीयत इति युक्तम् । एतेन विरुद्धयोः प्रमाणयोरविरोधापादनं विषयव्यवस्थया अर्थापत्तेर्विषयः परास्तः, अवच्छिन्नानवच्छिन्नयोरविरोधात् । तस्मात् नानुमानात् प्रमाणात् प्रमाणान्तरमर्थापत्तिरिति स्थितम् ॥ ६ ॥ § 1034

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ २ । २ । ७ ॥ § 1035

नाभावज्ञानं प्रमाणम् । कस्मात् ? प्रमेयस्याभावस्यासिद्धेः । नो खलु सर्वोपाख्यारहितं प्रमाणज्ञानविषयभावमनुभवति, केवलं काल्पनिकोऽय- 393/tha
मभाव— व्यवहारो लौकिकानामिति पूर्वपक्षः । § 1036

सिद्धान्तमाह—अभावस्य भूयसीति । सर्वजनीनौ तावदभावप्रत्ययव्यवहारौ न काल्पनिकौ भवितुमर्हतः । न च कल्पनापि सर्वोपाख्यारहितं गोचरयितुमर्हतीत्युक्तं विपरीतख्यातिसाधनावसरे । क्षणभङ्गभङ्गावसरे च तस्योपाख्येयत्वमुपपादयिष्यते । तस्मादस्य प्रामाण्याद् युक्तः प्रमाणान्तर्भावः । § 1037

तदेतत् सर्वं वार्त्तिककारो व्याचष्टे—नाभावः प्रमाणमिति । यथोक्तं दूषयति—कश्चैवमाहेति । अभावो हि प्रमेयमुच्यते । न तत् स्वरूपेण प्रमाणम्, अपि तु तद्विषया प्रतिपत्तिः । सा च प्रत्यक्षफलमप्युपादानादिबुद्धौ प्रमाणं यथा अग्रे तथा वक्ष्यते । वर्षाभावप्रत्ययस्तु वाय्वभ्रसंयोगेऽनुमानमुक्तम् ॥ ७ ॥ § 1038

५ गेहाभावेन ] °भावदर्शनेनnvt-C
८ स्वात्मानं ] °मानमात्मानंnvt-J
१२ त्त्वं ] °श्चितोऽभाव एवnvt-C

२५ रे ] ता. टी. १. १. २
३१ म् ] ता. टी. २. २. १

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ॥ २ । २ । ८ ॥ § 1039

प्रतिपद्य चानयतीति लक्षणाभावेन विशेषणेनावच्छिन्नान्यानेतव्यत्वेन प्रतिपद्यानयति । एतदुक्तं भवति, लक्षणाभावज्ञानं विशिष्टे वाससि प्रत्ययं जनयत् साधकतमत्वाद् भवति प्रमाणमिति ॥ ८ ॥ § 1040

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥ २ । २ । ९ ॥ § 1041

भावाधीननिरूपणत्वात् प्राप्तिपूर्वकत्वाच्च प्रध्वंस एवाभावः । तस्य भावपूर्वकत्वात् नान्योऽस्त्यभाव इति मन्वानस्य पूर्वपक्षः । नापरिज्ञानादिति । प्रत्यक्षं हि प्रमाणं प्रमेयाभावं व्यवस्थापयति । तच्च प्रध्वंस इव प्रागभावेऽपि
394/tha तुल्यम् । प्रतियन्ति हि लौकिका दध्नि क्षीराभावमिव क्षीरे दध्यभावम् । ननु सूत्रं अन्येषु वासः सु लक्षणानां भावरूपाम् उपपत्तिं सद्भावमाह त्वं त्वभावोपलब्धिं ब्रूषे । तत् कुतो न विरोध इत्यत आह—अत उक्तार्थं सूत्रमिति । व्यतिरेकमुखेणास्य सूत्रस्योक्तोऽर्थः । अत एवाह भाष्यकारः—नैवमलक्षितेष्विति । लक्षणादर्शनेन हि लक्षणाभावदर्शनमुपलक्षितम् ॥ ९ ॥ § 1042

तत्सिद्धेरलक्षितेष्वहेतुः ॥ २ । २ । १० ॥ § 1043

यानि तानि लक्षितेष्विति । न कस्यचित् लक्षितस्य न सन्ति । *सन्ति चेत्—तेषामभावो व्याहतः । एतदुक्तं भवति, यत्र लक्षणानि सन्ति तत्र तेषामभावो व्याहतः । यत्र च न सन्ति तत्राप्यभावोऽनुपपन्नः, तस्य भावाधीननिरूपणस्य तदभावेऽशक्यनिरूपणत्वादिति । परिहरति—नापरिज्ञानादिति । भावज्ञानाधीननिरूपणो भवत्यभावो न तु भावाधीननिरूपणः । प्रागभावोऽपि च शक्यो भविष्यद्भावज्ञानेनान्यत्रावस्थितभावज्ञानेन वा निरूपयितुमिति न प्रागभावाभाव इत्यर्थः ॥ १० ॥ § 1044

न लक्षणावस्थितापेक्षसिद्धेः ॥ २ । २ । ११ ॥ § 1045

प्रागुत्पत्तेरभावोपपत्तेश्च ॥ २ । २ । १२ ॥ § 1046

अभावद्वैतमिति प्रकृतापेक्षम् । प्रकृतं प्रध्वंसमात्रवादिनं प्रति प्रागभावप्रतिपादनम् । परमार्थतस्तु प्रथममभावे द्वैतम्, तादात्म्याभावः संसर्गाभावश्चेति । संसर्गाभावोऽपि प्राक्प्रध्वंसात्यन्ताभावभेदेन त्रिविध इति च-
395/tha तस्त्रो विधा अभावस्येति ॥ असत्यर्थे नाभावः तत्सिद्धेरलक्षितेष्वहेतुः इति चोभे अप्येते छलसूत्रे इति । यो योऽभावः स सर्वः सत्यर्थे भवति यथा

१० माणं ] अभावप्रमेयमवस्था°nvt-J
१३ माह ] न त्वभावोपलब्धिं ब्रूतेnvt-C
१८ * ] यानि च सन्ति तेषा°nvt-C
३० नाभावः ] वर्तयन्ना°nvt-C

प्रध्वंसः । न च तथा लक्षणाभाव इति सामान्यच्छलम् । तत्सिद्धेरिति तु वाक्छलम् । यानि लक्षणानि भवन्ति कथं तान्येव न भवन्तीति हि तस्यार्थः ॥ १२ ॥ § 1047

इति प्रमाणचतुष्ट्वपरीक्षाप्रकरणम्

## २.२.२ शब्दानित्यत्वप्रकरणम्

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥ २ । २ । १३ ॥
§ 1049

तदेवं शब्दपरीक्षां प्रस्तुत्य तस्य प्रामाण्यं परीक्ष्य विभागोद्देशः परीक्षितः । संप्रति शब्दपरीक्षाशेषं वर्तयिष्यन्नाह— § 1050

आप्तोपदेशः शब्द इति ।§ 1051

संशयकारणं विप्रतिपत्तीः दर्शयन् जरन्मीमांसकानां मतमाह— आकाशगुणः शब्द इति । अभिघातप्रेरितेन हि वायुना यावद्वेगमभिप्रतिष्ठमानेन कर्णशष्कुल्यवच्छिन्ननभोभागसमवेतः शब्दो नित्यो व्यज्यत इति । तदेतद् वार्त्तिककारो व्याचष्टे—एके तावदिति । अविनश्यदाधारमपि संयोगाद्यनित्यमित्यत आह— एकद्रव्यमिति । तथापि पार्थिवानुगते रूपादिभिरनैकान्तिकम् । अत आह— आकाशगुणश्चेति । एकद्रव्यत्वे सत्याकाशगुणत्वादित्येतावतैवाभिमतसिद्धेरविनश्यदाधारत्वं तत्प्रपञ्चार्थं वेदितव्यम् । संयोगविभागनादा इति । भेरीदण्डसंयोगप्रेरितो वायुः कर्णशष्कुलीमन्तमाकाशं प्राप्तः शब्दस्य व्यञ्जकः । एवं वंशदलविभागप्रेरितो वायुः शब्दस्य व्यञ्जक इति द्रष्टव्यम् । संयोगविभागौ पारम्पर्येण, नादस्तु 396/tha
साक्षादिति । § 1052

सांख्यीयमतमाह—गन्धादिसहवृत्तिरिति । पञ्चतन्मात्रोत्पन्नभूतसूक्ष्मसमुदायारब्धपृथिव्यादिविकारो गोघटादिवृत्तिः शब्दो योग्यदेशस्थः आहङ्कारिकतया व्यापकं विषयदेशस्थं श्रोत्रेन्द्रियं विकुर्वन्नवस्थित एव गृह्यते । तदेतदाह—अपरे पुनरिति । भूतविशेषाभिघाता इति । भेरीदण्डाभिघाता इत्यर्थः । § 1053

वैशेषिकमतमाह—आकाशगुण इति । § 1054

बौद्धराद्धान्तमाह—महाभूतसंक्षोभज इति । § 1055

नासंबन्धादिति । यदा भावोऽस्ति तदा प्राक्प्रध्वंसाभावाभावान्नानित्यत्वम् । अनुत्पन्नविनष्टयोश्च प्रसङ्गादिति । न तावत् प्राक्प्रध्वंसाभावयोः

---

४ रीक्षाशेषं ] वर्तयन्ना°nvt-C nvt-J
१८ टादिवृत्तिः ] °विकारगवादिघटा°

सहभावोऽस्ति । तस्मात् प्रत्येकमेतावनित्यत्वम् । तथा चानुत्पन्ने वस्तुनि विनष्टे वानित्यत्वप्रसङ्गः । न चेदं दृष्टमिष्टं वा भावधर्मत्वेनानित्यत्वस्य प्रतीतेरनित्यो घट इति । न केवलमनित्यस्य भाव इत्येतस्मिन् पक्षे न युज्यते । षष्ठ्यर्थश्च नास्तीति । कस्माद भावस्याभावो धर्मो न भवतीत्यत आह—न च धर्मकाल इति । चो हेत्वर्थे । शङ्कते—अथेति । भवन्नेव हि यस्मात् प्राग् न भवति पश्चाच्च, तस्मात् तस्याभाव इति षष्ठ्युपपत्तिरित्यर्थः । उत्तरम्, एवमपीति । सत्यं भवन्नेव न भवतीति । न चैतावतास्याभावसंबन्धो भिन्नकालत्वात् । तस्मात् नास्मदुक्तं किञ्चित् प्रतिषिद्धमित्यर्थः । लोकविरुद्धमुद्भावयति—घटस्य प्रागभाव इति । असंबन्धेऽपि सति षष्ठीप्रयोगोऽयं भाक्तः । भावाधीननिरूपणत्वं च भक्तिरित्यर्थः । अपि च वर्तमानं वस्तु नित्यमित्युच्यते तस्य भावो नित्यता भवतु किमेतावतापीत्यत आह—वर्तमाने चेति । § 1056

विनाशोऽस्यावश्यन्तया भविष्यतीति अवश्यंभाविनो विनाशस्य सन्निधानेन संबन्धमुपचर्य मतुपः प्रयोग इत्यर्थः । § 1057

397/tha

उपलब्धिलक्षणप्राप्तस्येति । न हि सतो विनाशोऽस्ति येनासंबन्धो भावस्य देश्येत, किन्तु यथा सत आविर्भावो जन्म एवं सत एवात्यन्ततिरोभावो विनाश इति च अनित्यतेति चाख्यायते । तिरोभावस्य च सता सह समानकालतया संबन्ध उपपद्यते इति भावः । तिरोभावश्च पटादिनापि संभवतीत्युपलब्धिलक्षणप्राप्तस्येत्युक्तम् । तदेतत् सांख्यीयं मतं दूषयति—एतत्तु शून्यमभिधानमिति । प्रधानविकारत्वाद् विश्वस्य विकारस्य च प्रकृतेरनन्यत्वात् प्राधानिकस्य कस्यचिदुपलम्भान्नास्त्येव तद् वस्तु यदत्यन्तं नोपलभ्यत इति सांख्यसिद्धान्तस्तं बाधते इत्यर्थः । अपि च यथा सतो न विनाशः एवमसतोऽपि जन्म नास्ति । तथा चानुपजातविशेषस्य वस्तुनस्तिरोभावो न युक्तः । विशेषोपजनने च कथं सत उत्पत्तिर्विशेषस्यैव प्रागसत्त्वात् ? सत्त्वे वा प्रागप्युपलब्धिप्रसङ्ग इति । § 1058

ये पुनरिति । अनित्य एवानित्यता स्वार्थिकस्तल्प्रत्यय इत्यर्थः । दूषयति—एतत्तु न युक्तम् । पाणिनेरपि स्मृतिः प्रमाणाविरोधिनी तत्त्वव्यवस्थाहेतुः । न तद्विरोधिन्यपि । अस्ति च ठगादीनां स्वार्थिकत्वे प्रमाणविरोधः । तथा हि प्रकृतिप्रत्यययोः समभिव्याहारो न स्यात् । न खल्वेकार्थयोः समभिव्याहारो दृष्टः । न हि भवति वृक्षः शिंशपा इतिवद् वृक्षस्तरुरिति प्रयोगः । कथं तर्ह्येको द्वौ बहव इति चेत्—न, लिङ्गविशेषव्यक्त्यर्थत्वाद् विभक्तिप्रयोगस्य । एवं यावकादिष्वपि विरुद्धजात्यन्तरव्यवच्छेदः प्रत्ययार्थो वेदितव्यः । यथा च व्याचक्षते शाब्दाः याव एव यावक इति । तदिदमुक्तम्— अनुपलभ्यमान-

१ म्] °मेव तावदनित्य° nvt-C °मेव तावन्नित्य° nvt-C *Var*
३ स्मिन्] इति परमेतस्मिन् nvt-C
६ स्मात्] प्राग् भवति nvt-J
११ स्तु] अनित्यम् nvt-J
११ भावो] अनित्यता nvt-J

भेदानामप्यनुमानतो भेद इति । किमनुमानम् ? षष्ठ्या भेदविषयत्वमिति त्वतलभिप्रायम्, नित्यत्वानित्यत्वयोः प्रकृतत्वात् । तस्य भावस्त्वतलौ इति त्वतलोः षष्ठीसमर्थादुत्पत्तेः । सर्वविषयं त्वनुमानमुक्तमिति । § 1059

अवध्यपेक्षानपेक्षेति सत्तैवोभयान्तावध्यपेक्षा भवत्यनित्यता, सैव च तदनपेक्षा नित्यता । अवधिश्चोपलक्षणं न विशेषणम् । तच्च भिन्नकालमपि भवत्येव । यथा मृतायां मातरि देवदत्तायां देवदत्तापुत्रो यज्ञदत्त इति 398/tha भूतपूर्वगत्या देवदत्ता स्वपूत्रमुपलक्षयति । यदा च कार्यत्वं समवायस्तदोभयान्तावच्छिन्ना सत्ता नित्यता । यदा तु पूर्वान्तावच्छिन्ना सत्तैवोत्पत्तिस्तदापरान्तावच्छिन्ना सत्ता अनित्यतेति न हेतुलक्षणव्याख्यानावसरोक्तेन विरोध इति । कारणमित्यभिधीयत इति समवायिकारणाभिप्रायम् । समस्तकारणव्यापकं तु लक्षणं कार्योत्पादस्य पुरस्तान्नियमेन सद्भाव इति द्रष्टव्यम् । कार्यात्मलाभहेतुः समवाय इति । कार्यात्मलाभः स्वकारणसमवेतत्वं तस्य हेतुः समवायः । समवायाद्धि समवेतत्वं भवति । समवायः कारणविशिष्टः कार्यत्वमिति । § 1060

आदि...च्च । निमित्तकारणभेदानुविधानमुत्पत्तिधर्मकत्वं गम्यगमकयोरभेदविवक्षया । निमित्तकारणनि च भेरीदण्डसंयोगादयः । तद्भेदात् खलु शब्दो भिन्नो भवति । शङ्कते—संयोगविभागेति । यथा हि कारणभेदेन भेदो दृश्यत एवं व्यञ्जकभेदेनापि मणिकृपाणदर्पणादिव्यज्यमानस्य मुखस्य भेदो दृष्टः । तस्मात् संशय इति । § 1061

श्रोत्रं तावन्न शब्ददेशं गच्छत्यमूर्तत्वादिति । कर्णशष्कुल्यवच्छिन्नं हि नभः श्रोत्रम् । न च कर्णशष्कुली मूर्तापि सती वक्तृवक्त्रमुपसर्पति । प्रत्यक्षं हि कर्णशष्कुली श्रोत्रस्था गृह्यते, न तु वक्तृस्था । तस्माद्गच्छदपि कर्णशष्कुल्युपधानविरहान्न नभोमात्रं श्रोत्रम् । तस्मान्मा कर्णशष्कुली यासीत्, तदुपकृतं तु नभो गच्छतीति यो मन्यते तं प्रत्येतदुक्तमिति द्रष्टव्यम् । क्रियाकारणगुणसमवायादिति नोदनाभिघातसमवायादित्यर्थः । नायं निरपेक्षार्थ इति । यद्यपि समवायिकारणं पतने कर्तव्ये *गुरुत्वमपेक्षते, तथापि चरमभाविनिमित्तान्तरं नापेक्षत इति निरपेक्षशब्दस्यार्थः । यद्यपि प्रतिबन्धकापगमो भवति चरमभावी, तथापि न निमित्तान्तरम् । प्रतिबन्धे हि सति गुरुत्वं न करोति कार्यमौत्सर्गिकम् । न पुनः प्रतिबन्धकापगमस्यापि तत्र निमित्तभावकल्पना युक्ता, *तदन्वयव्यतिरेकस्यान्यथासिद्धेरिति । भावरूपं वा चरमभाविनिमित्तान्तरं नापेक्षत इत्यनपेक्षार्थः । विषयाभावाच्चेति । 399/tha क्रियोत्पादं प्रति योग्यता क्रियाविषयः । तामाश्रित्य क्रिया भवति । सा च मूर्तिः । न चासावसर्वगतद्रव्यपरिमाणलक्षणा आत्माकाशादौ सर्वगते समस्ति । तस्मान्नैते क्रियावन्त इत्यर्थः । ततोऽन्त्यस्यातिमान्द्यादिति । नान्त्यः

३ मिति] द्रः १. १. ५
९ रोक्तेन] द्रः वा, ता. टी. १. १. ३४
१२ त्वं] °णसंबन्धित्वम्nvt-C
२६ *] गुरुत्वं द्रव्यम°nvt-J
३० *] तदन्वयस्या°nvt-J

शब्दान्तरमारभते । न केवलमसौ स्वकारणं शब्दं नाशयति, किन्तु सोऽपि स्वकारणेन शब्देन नाश्यते । तदिदमनयोः कार्यकारणविरोधित्वम् । आद्यस्तु कार्येणैव नाश्यते, मध्यमानां त्वनियम इति । § 1062

जरन्मीमांसकमतमुत्थापयति—एक एवेति चेदिति । एक एव तेषां शब्दो नभोगुणो नभो वितत्यावस्थितः परिमाणवदित्यर्थः । शब्दसंस्कारपक्षं कक्षीकृत्य दूषणमाह—न सर्वैरुपलब्धिप्रसङ्गादिति । न किम इति प्रश्नस्येत्यर्थः । शब्दस्याकाशवृत्तित्वादिति । आकाशस्य सर्वगतत्वेन तत्र व्यक्तः सर्वत्रैव व्यक्त इति सर्वत्र सर्वेषामुपलम्भस्तदवस्थ एवेत्यर्थः । अभ्युपेत्यैकदेशमाह—एकदेशाभिव्यक्तौ चार्थप्रत्ययो न स्यात्, वर्णसाध्यस्य कार्यस्यैकदेशेनाकरणात् । यथा नानावर्णे पदे एकवर्णाभिव्यक्तौ नार्थप्रत्यय इति ।
§ 1063

स्यादेतत् । एकदेश एव वर्णः । तथा च वर्णसाध्यं कार्यमेकदेशः शक्त एव कर्तुमित्यत आह—सर्व एव व्यापका भवन्तीति एतस्मिन् पक्षे वर्णैकदेशव्यक्तिः अभ्युपगम्यते । तस्माद् व्यापकाद् वर्णादव्यापक एकदेशोऽन्य इत्यर्थः । न न्वस्त्वेकदेश एवार्थप्रत्यायक इत्यत आह—न च वर्णैकदेशः शक्यो निरूपयितुम् । अल्पीयसापि हि प्रयत्नेन वर्णमुच्चरितं मतिर्न गृह्णाति गृह्णती वा वर्णमेव गृह्णाति, न तु तदेकदेशं कदाचिदपीत्यर्थः । निरूपणमभ्युपेत्याह—न च निरूपितादिति । § 1064

बहवस्तर्हि वर्णा व्यज्यन्तां तन्निरूपणाच्चार्थो गम्यते इत्यत आह—एतेनेति । यस्तु मन्यते न वस्तुतोऽस्त्येकदेशः शब्दस्य, किंतु संस्कारस्याव्याप्यवृत्तित्वमेवैकदेशो भवत्पक्षे शब्दस्याव्याप्यवृत्तित्वमिव नभस एकदेश इति तं प्रति दोषान्तरमाह— कोलाहलं च स्यादिति । यद्युच्येत
400/tha कश्चिदेव ध्वनिः कश्चिदेव शब्दं व्यनक्ति । ततश्च न कोलाहलमिति, तत्राह—नियमश्च न स्यादिति । समानदेशानामपि रूपरसादीनां व्यञ्जकनियम इत्यत उक्तम्—समानेन्द्रियग्राह्याणामिति । तथापि भिन्नदेशानां समानेन्द्रियग्राह्याणामपि न सहसा सर्वेषां व्यक्तिरित्यत उक्तम्— समानदेशानामिति । शङ्कते—यद् यस्य व्यञ्जकमिति । न हि व्यञ्जकानां व्यञ्जकत्वं व्यक्तेरन्यतः प्रतीयते सा च नियतेति व्यञ्जकानामपि नियमसिद्धिरित्यर्थः । परिहरति— तन्नादृष्टत्वात् । अन्येषामेवंभूताना व्यञ्जकानां व्यङ्ग्यानां चानियमो दृष्ट इहापि नियमं विघटयति । कार्याणां तु समानदेशानामपि समानेन्द्रियग्राह्याणामपि रूपादीनां संख्यादीनां च दृष्टः कारणनियम इति शब्दानामपि नियतकारणतयोत्पत्तिनियम उपपद्यत इति भावः । समस्तवस्त्वव्यवधानेन सामान्यानां सर्वसामान्यसङ्गतं समस्तं वस्त्विति मन्वानः शङ्कते—सामान्यवदिति । सर्वार्थाव्यवधानेऽपि किञ्चिदेव वस्तु केनचिदेव सामान्येन संबद्धं न सर्वं सर्वेणेत्याशयवान् निराकरोति—नानभ्युपगमादिति । यद्यप्येकदेशस्थानां समानेन्द्रियग्राह्याणां सत्त्वनरत्वब्राह्मणत्वानां स्वरूपभेदसंस्थानयोनिव्यङ्ग्यानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वे तथापि समानदेशत्वाभावान्न

३७ त्वे ] °व्यङ्ग्यत्वम् nvt-J

व्यभिचारः । सत्त्वस्य पदार्थत्रयसमवायादधिकदेशतया नरत्वस्य ब्राह्मणवत् क्षत्रियादिष्वपि सद्भावात् । ब्राह्मणत्वस्य तु क्षत्रियादिपरिहाण्या कठादिष्वेव भावाद् न्यूनाधिकदेशतया न समानदेशत्वमिति । एतेन श्रोत्रसंस्कारेऽप्यनियमो बोद्धव्यः । यथोन्मीलनसंस्कृतमिन्द्रियं समानदेशान् स्वग्राह्यान् सकृदेव दर्शयति, न तु किञ्चिदेवेति सर्वमवदातम् । § 1065

अपि च सर्वस्य शब्दस्य ताल्वादिसंयोगव्यङ्ग्यत्वे तदुपरमे विदूरे शब्देनोपलब्धव्यं न चोपलभ्यते । वायुसन्तानव्यङ्ग्यत्वे तु प्रागुक्तो नियमाभाव एव दोष इति आशङ्कोत्तराभ्यां दर्शयति—यदि चेति । अपि चायं नित्यः शब्दः प्रादेशिको वा स्याद् व्यापको वा ? उभयथापि दोष इति शङ्कोत्तराभ्यामादर्शयति— निमित्तसन्निधाने चेति । § 1066

401/tha

स्यादेतत् । माभूद् वायुसन्तानो व्यञ्जकः सन्ति खलु वायुगुणा नादास्तेऽस्तेऽस्य शब्दस्य व्यङ्कार इत्यत आह—नादोपलब्धौ चेति । न तावन्नादो नाम वायुगुणः कश्चिदुपलभ्यते । अभ्युपेत्यापि ब्रूमः, नादोपलब्धावपि यत्र वायुस्तत्र तद्गुणोऽङ्गीकर्तव्यः । न च विप्रकृष्टेन पुरुषेण शब्दोपलब्धौ तत्र वायुरस्ति तद्गुणो वा नादः, वायुसन्तानगमनं चास्मिन् पक्षे नेष्यते । तस्माद् विप्रकृष्टेन पुरुषेण शब्दोपलब्धेर्न व्यञ्जको नाद इति । § 1067

स्यादतत् । मा भूद् वायुसन्तानो मा च भूत् तद्गुणो नादः शब्दस्य व्यञ्जकः, वायवीयास्तु संयोगविभागा व्यञ्जका भवन्तीत्यत आह—एतेनेति । § 1068

यस्तु मन्यते, प्रत्यभिज्ञेव भगवती शब्दस्थेमसाधिनी, तदानुगुण्याय व्यापिनः शब्दस्य गुणस्य द्रव्यस्य वा प्रयत्नप्रेरिता वायवो यावद्वेगं प्रतिष्ठमानाः श्रोत्रं श्रोत्रावच्छिन्नं वा शब्दविशेषं संस्ककुर्वन्तो व्यञ्जका इति कल्प्यते । न च समानदेशानां समानेन्द्रियग्राह्याणां नियतव्यञ्जकव्यङ्ग्यत्वं न दृष्टमितीमं प्रसङ्गं प्रत्यभिज्ञा मृषति, सोऽयमनया बाधितविषयो विलीयत इति तं प्रत्याह—कृतकवदुपचारात् । अत्र चोपचारेण प्रयोगेण तत्कारणं शब्दभेदप्रत्ययमुपलक्षयति । अस्ति हि शुकसारिकामनुष्यवक्त्रप्रभवेषु गकारादिषु स्फुटतरा रूपतो भेदप्रथा पुंसाम् । एवं स्त्रीपुंसप्रभवेषु स्त्रीपुंसभेदप्रभवेषु च । न चेयमौपाधिकी न तु रूपत इति वाच्यम् । तथा हि औपाधिकत्वमानुभविकं वा स्याद् यथा कुङ्कुमारुणा तरुणीति । उपपत्तिगोचरतो वा, यथा कृपाणधारायां जले च प्रतिबिम्बहेतौ रोचिष्णुतायां दीर्घश्यामतायां मुखस्य न तावदानुभविकम् । विदितोपाधेः खल्वेतद् भवति, यथा विदितकुङ्कुमस्य कुङ्कुमारुणेति । शुकादिभेदमविदुषोऽपि च काण्डपटाद्यावृते शुकादौ शब्दभेदप्रत्ययो भवति यत एतदुन्नीयते शुकेनोदीरिता इयं मञ्जुत-

२ रिहाण्या ] परिहारात् nvt-C
७ ते ] °नोपलभ्यते nvt-J
२७ था ] रूपभेदप्रत्ययाःnvt-C
२८ त ] स्वरूपतnvt-C; रूपतः

*Pañjikā*
३३ ते ] उन्नयतिnvt-C

मा गाथेति । नाप्यौपाधिकमुपपत्तिगोचरः । न हि शब्दस्वरूपसमवायिनो भेदस्यौपाधिकत्वे किञ्चिदस्ति प्रमाणं मुखस्येव मणिदर्पणकृपाणगतस्य । नो 402/tha खलु विरुद्धपरिमाणेषु दर्पणादिषु विरुद्धपरिमाणानां प्रतिबिम्बा नामुत्पादः संभवति । शब्दानां तु संयोगविभागशब्दयोनीनां युक्तस्तद्भेदेन रूपतो भेदः । § 1069

स्यादेतत् । तीव्रमन्दत्वादयो धर्माः परं भिद्यन्ते, न तु तदाश्रयः शब्दः । न ह्यन्यस्य भेदोऽन्यद् भेत्तुमर्हति, अतिप्रसङ्गात् । न हि रूपरसादीनां युगपद्भाविनां वा क्रमभाविनां वा संयोगविभागादीनां भेदेऽपि द्रव्यं भिद्यते । कथमेकस्यैव शब्दस्यापर्यायेण तीव्रमन्दत्वादिविरुद्धधर्मसंसर्ग इति चेत् ? अत एवौपाधिकोऽस्तु मुख्यस्येवाभेदिनोऽपर्यायेण कृपाणादिषु दीर्घपरिमण्डलत्वादिः । अत्रोच्यते—न वयं धर्मभेदमात्रेण धर्मिणो भेदमाचक्ष्महे किं तु किमत्र धर्ममात्रभेदप्रथा उत धर्मिभेदोऽपि प्रथत इति निपुणं निरूप्यताम् । अस्ति हि गौर्गौरिति प्रथानुगमेऽपि कृष्णकपिलकपोतिकासु गोषु धर्मिभेदावभासिनी प्रख्या । अस्ति च धर्ममात्रभेदावगाहिनी प्रथा धर्मिणमभिन्नमाकलयन्ती । यथा शालप्रांशुः पृथूपलविशालवक्षाः प्रलम्बभुजो नीलोत्पलपलाशश्यामः सिंहास्यो नवाम्भोदध्वनिर्गम्भीरमधुरघोषश्चकोरेक्षणः क्षत्रिययुवेति । सेयं शुकसारिकामनुष्येषु युगपद्गकारानुच्चारयत्सु तीव्रमन्दानुनासिकादिगकारावगाहिनी प्रख्या किमेकमेव क्षत्रियुवानमिव गकारमनेकधर्मवन्तमालम्बते एको गकारो नानाधर्मेति । किं वा यथेयं कृष्णा गौरियं शुक्ला गौरियं कपिला गौरिति तथा तीव्रोऽयं गकारो मन्दोऽयं गकारोऽनुनासिकोऽयमिति भवन्त एव विदांकुर्वन्तु । सेयं गोत्वमिव कपिलादिषु गोविशेषेषु गत्वं तीव्रमन्दादिगव्यक्तिभेदेष्वालम्बमाना प्रत्यभिज्ञा च भेदप्रथा चोपपत्स्यते । अपि च युगपत्तीव्रमन्दत्वादिलक्षणविरुद्धधर्मसंसर्गादपि गकाराणां परस्परतस्तपनखद्योतोद्योतवद्भेदमनुमीमहे । न चायं विरुद्धधर्मसंसर्गो न गकारादिनिवेशी किं त्वौपाधिकः । उपाधयश्च भिद्यन्त एव, न तु गकार इति सांप्रतम् । गकारसमवायिनः प्रतीयमानस्यासति बाधके औपाधिकत्वकल्पनायोगात् प्रत्यभिज्ञानस्य च गत्वसामान्यालम्बनत्वेनोपपत्तेः
403/tha । अपि चौपाधिकपक्षे ताल्वादिसंयोगविभागधर्मो वा तदभिघातप्रेरितध्वनिधर्मो वा तीव्रत्वानुनासिकत्वादिः शब्दे समारोप्यत इत्यास्थेयम् । न चारोप्यमजानतामारोपः संभवति । न च ध्वनीनां ताल्वादिसंयोगविभागानां वा धर्माः श्रोत्रेण शक्या ज्ञातुं तदन्यधर्मवत् । न चैते तदानीं प्रमाणान्तरेणोपनीयन्ते *स्मृत्या वा येनारोप्येरन् । न च ध्वनिभेदसंस्कारवशादेव श्रोत्रस्यैतादृशः सामर्थ्यभेद आविरस्ति, यत आरोप्याग्रहेऽपि भ्रमो भवति । न च मण्डूकवसाक्ताक्षाणामिवानवगतास्मृतोरगाणामपि प्रथमाक्षिसन्निपाताद्

७ द् ] भेदेनान्योnvt-C
१४ ख्या ] °दावगाहिनी प्रथाnvt-C
१५ क्षाः ] पृथुलवि°nvt-C
१८ ख्या ] प्रथाnvt-C
३१ क्या ] ग्रहीतुंnvt-C
३२ * ] स्मृताnvt-C
३४ च ] न चेति नास्तिnvt-J

वंशेषूरगारोप इति साम्प्रतं सर्वासामेव भ्रान्तीनां प्रमाणगृहीतारोप्यारोपविषय—ग्रहणपुरःसरत्वनियमात् । तदनुसारेण च मण्डूकवसाक्ताक्षाणामपि वंशेषूरगभ्रमो व्याख्येयः । वंशानां तावदस्ति भूयः सारूप्यमुरगेण, तेन ते तत्साधारणेन रूपेण गृहीताः शक्नुवन्ति स्मारयितुमुरगम् । एवमपि यदन्येषां भ्रमो न भवति तत्र सर्पाकारव्यावृत्तवंशाकारग्रहो हेतुः । मण्डूकवसाञ्जनं तु वंशाकारपिधानमात्रहेतुः । न च प्रथमाक्षसन्निपातादेव सर्पभ्रम इति प्रामाणिकं क्षणभेदस्य दुर्ज्ञानत्वात् । न चागृहीतसर्पस्य भवतीति शक्यम्, तस्मिन् जन्मनि जन्मान्तरे वा सर्पग्रहसंभवात् । ध्वनिधर्मस्त्वनुनासिकत्वादिः अस्मिन्निव जन्मनि जन्मान्तरेऽप्यशक्यग्रह एव । तस्माद् वर्णसमवेतोऽनुनासिकत्वादिः प्रतीयमानो वर्णधर्म एव नौपाधिकः । तथा च युगपद्विरुद्धधर्मयोगात् परस्परमन्यत्वं गकारादीनामिति सिद्धम् । § 1070

तदनेनाभिसन्धिनोक्तम्—कृतकवदुपचारादिति । § 1071

तदेतद् वार्त्तिककारो व्याचष्टे—तीव्रं मन्दमिति चेति । कृतकमुपचर्यत इति । शब्दविषयत्वेन विरुद्धधर्ममुपलक्षयति । अपरानपि शब्दानित्यत्वहेतूनाह— कृतकवदुपचारादित्यनेनेति । सामान्यवत इत्येतावतैव जात्यादिनिराकरणे सिद्धे विशेषग्रहणं साधर्म्यं सामान्यमिति भ्रमनिरासार्थम् । तद्धि प्रमेयत्वस्वरूपसत्त्वादिकं गुण इव जात्यादावस्तीति । विशेषपदेन तु जातिग्रहणान्निवर्तितं भवति । उपलभ्यस्येति तूपरिष्टात् स्पष्टीभविष्यति । 404/tha शङ्कते—तीव्रशब्दस्येति । तीव्रत्वधर्मान्वयव्यतिरेकानुविधायिप्रवृत्तिस्तीव्रशब्दो न शब्दं धर्मिणमभिधातुमर्हतीति यथोक्तमात्रस्याक्षेप इत्यर्थः । निराकरोति—न शब्दशब्दसमानाधिकरणस्येति । एतच्च व्यक्त्याकृतिजातयश्च पदार्थ इत्यत्र प्रतिपादयिष्यते । § 1072

शङ्कते—व्यञ्जकस्येति । स्वकारणात् खलु व्यञ्जकाच्छब्दज्ञानमुत्पन्नं तीव्रं मन्दं चेति । तेन तीव्रज्ञानज्ञेयः शब्दोऽपि तीव्र इव मन्दज्ञानज्ञेयः शब्दोऽपि मन्द इव भासते । न त्वाजानतोऽस्य तीव्रत्वं मन्दत्वं वा येन भिद्येतेत्यर्थः । निराकरोति— नाभिभवेति । अन्यत् खल्वन्येन समानजातीयेनाभिभूयते, न तु तदेव तेन । न हि मध्यन्दिने मन्दोल्काप्रकाशसंबन्धी घटः पटुना सावित्रेण प्रकाशेन प्रकाशमानमात्मानमात्मनाभिभवति । एवं गकारोऽपि तीव्रध्वनिप्रकाश्यो न मन्दध्वनिप्रकाश्यं गकारमात्मानमभिभवेत्, यदि त्वयं मन्दध्वनिप्रकाश्यो गकारस्तीव्रध्वनिप्रकाश्याद् गकारदन्यो भवति । ततो मध्यन्दिनोल्काप्रकाशः सवितृप्रकाशेन चाल्पत्वादभिभूयत इति युज्यते । तदिदं शेषं भाष्ये उक्तमिति । § 1073

---

४ णेन ] तेन चैते तन्मात्रेणnvt-C
७ म् ] शक्यं वक्तुम्nvt-C
११ म् ] युक्तम्nvt-C
१६ म् ] °निराकरणार्थम्nvt-C
१७ त्त्वादिकं ] प्रमेयत्वसत्त्वा°nvt-C
२१ दार्थ ] न्या सूः २. २. ६६
२८ ति ] प्रकाश्यमान आत्मनामात्मानमभि°nvt-J
३१ काशेन ] इवान्यत्वा°nvt-J

सत्यम्, अन्यदन्येनाभिभूयते । तथापि न गकारस्य नानात्वमपि तु तद्ग्रहणानाम् । तेषां चाभिभाव्याभिभावकभावो न गकारस्येत्यनेनाभिप्रायेण शङ्कते—ग्रहणमिति । निराकरोति—न ग्रहणभेदस्येति । अर्थभेदाधीननिरूपणो ग्रहणभेदो नार्थभेदमन्तरेण शक्यो निरूपयितुम् । न च भेदेनानिरूपितः शक्योऽभिभाव्याभिभावकभावेन प्रत्येतुमित्यर्थः । नित्यं ग्रहणभेदः स्यात् इति, ग्रहणभेददर्शनाभ्युपगमे नियतमर्थभेदोऽभ्युपगन्तव्यः । तथा च सर्वमेव भिद्यत इति नाभिन्नं किञ्चिद् भवेत् । भेदोऽपि न स्यादभेदाश्रयत्वाद् भेदस्येत्यर्थः । अभिभवानुपपत्तिश्चेति, यस्मिन्नेव क्षणे पूर्वं ज्ञानमुत्तरेणोत्पद्याभिभवनीयं तदैव तेन विनाश्यते, न चासतोऽभिभव इत्यर्थः । § 1074

सांख्यमतेऽपि नाभिभवसंभव इत्याह—अभिभवेति । पराजितं सांख्यं
405/tha दृष्ट्वा नास्माकमयमस्त्यनुयोग इति मन्वानो मीमांसकः पुनः शङ्कते—सर्वत्रेति । निराकरोति—नेति । § 1075

सांख्यश्चोदयति—यदि सन्तानवृत्तिरिति । परिहरति—शब्दसन्तानस्य निमित्तभेदाभिमुख्येनादौ प्राप्तेरिति । निमित्तभेदो भेरी शङ्खताल्वादिश्च, तदाभिमुख्येन यः कर्णशष्कुल्यवरुद्धस्य नभसः श्रोत्रस्य भागः स्थितस्तस्मिन्नादौ य उत्पन्नः शब्दः तस्य तत्र प्राप्तेः पूर्वादिदिगवस्थितशङ्खादिजन्मायं शब्द इत्यनुमीयते । एतदुक्तं भवति, विशिष्टदिग्देशावस्थितशङ्खादिप्रभवशब्दसन्तानजन्यस्य तस्य शब्दस्य स कोऽपि धर्मभेदः श्रोत्रगोचरः, यस्मात् तस्य शब्दस्य विशिष्टदिग्देशावस्थितशङ्खादिप्रभवत्वमनुमीयते । न चासौ सामान्यविशेषोऽव्यपदेशान्नास्ति । न हीक्षुक्षीरगुडादीनां मधुरत्वावान्तरसामान्यभेदाः प्रत्यक्षवेदनीयाः शक्या अव्यपदेश्यतया प्रत्याख्यातुम् । अनुभवश्च समानः । तस्मादानुमानिकः शब्दे दिग्देशप्रत्यय इति । यः शब्दसन्तान इति । संतनोतीति सन्तानः । आद्यः शब्दो यो जायते स संतनोतीति संबन्धः । यस्मात् तन्निमित्तात् तदभिमुखेन भागेनेति योजना । आद्यशब्देति । तदभिमुखभागयुक्तः शब्द इति । § 1076

तदेवं स्वमतमुक्त्वा परमतमाह—एके त्विति । परोक्षे वक्तरीति शेषः । यद्यपि जात्यन्धानामपि कथंचिदभिमुखपृष्ठपार्श्वागतः शब्दविवेकः संभवति, तथापि पूर्वापरादिदिग्विभागो नास्तीत्यत उक्तम्—जात्यन्धानामिति ॥ १३ ॥ § 1077

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ॥ २ । २ । १४ ॥ § 1078

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः ॥ २ । २ । १५ ॥ § 1079

---

२१ त्याख्यातुम्] निराकर्तुम्nvt-J द्र. काव्यादर्शः १, १०२

एतद्याभावे नास्तीति । न सत्तासंबन्धो नोभयान्तापरिच्छिन्नत्वमित्यर्थः ॥ १५ ॥ § 1080
406/tha

## सन्तानानुमानविशेषणात् ॥ २ । २ । १६ ॥ § 1081

## कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ॥ २ । २ । १७ ॥ § 1082

ननु यद्यन्यद् व्यापकत्वं नास्ति कथं तर्हि भवद्भिः केषाञ्चिद् व्यापकत्वमव्यापकत्वं च केषाञ्चिदिष्यत इत्यत आह—वयं तु व्याप्तिमङ्गुलिरूपस्येति । यत्र यत्राश्रयोपलब्धिस्तत्र तत्र यद्वस्तूपलब्धियोग्यं सदुपलभ्यते तद् व्यापकम् । तेन बलाकाव्यापकमपि शौक्ल्यं मन्दमन्दालोके बलाकायामुपलभ्यमानायामपि नोपलभ्यते योग्यताभावात् । ईदृशं तु संयोगादीनां व्यापकत्वमशक्यं गुणत्वेन साधयितुमनुपलब्धिविरोधादित्याह—न पुनः शब्दादय इति । उपलब्धियोग्या इति शेषः । सर्ववस्तुविषयं च स्वाभिमतं व्यापकत्वाव्यापकत्वं संक्षिप्याह— समुदितस्थानानामिति । समुदितस्थाना हि सत्तादयो गोत्वादयश्च व्यापका एकसमुदाय्युपलम्भेऽप्युपलब्धेः । संयोगादयस्तु समुदितस्थाना अप्यव्यापकाः । न ह्येते समुदायिन्येकस्मिन्निरूप्यन्ते, अपि तु समुदितेष्वेव । एकाश्रयाणां रूपादीनां व्यापकानामव्यापकानां च शब्दबुद्ध्यादीनामाश्रयोपलब्धावुपलब्ध्यनुपलब्धी व्याप्त्यव्याप्ती इति योजना । एकसमुदायीत्यत्रैकग्रहणमशेषसमुदायिग्रहणनिवृत्त्यर्थम् । न त्वेको विवक्षितः, तद्ग्रहणं वा । तेन कतिपयावयवोपलब्ध्या तदनुपलब्ध्या चोपलभ्यमानोऽवयवी व्यापकत्वेनोक्तो भवति । मूर्तिमत्त्वादिभ्य इत्यादिशब्देन स्पर्शवत्त्वाव्यापित्वादीनि गृह्यन्ते । कार्याकाशसंयोगो विप्रतिपत्तिविषय इति । यदि कार्याकाशसंयोगमात्रं पक्षीक्रियते ततो विनश्यदाधारद्रव्यवर्तिनः संयोगस्येष्यत एव यावद्द्रव्यभावित्वमित्यपसिद्धान्तः स्यादित्यत उक्तम्— विप्रतिपत्तिविषय इति । तेनैवानैकान्तिकं स्यादित्यत उक्तम्—अविनश्यदाधारत्व इति । तथापि पटस्य नीलीद्रव्यसंयोगेन यावद्द्रव्यभाविनानैकान्तिकं स्यादित्यत उक्तम्— 407/tha
क्रियावद्द्रव्यवृत्तित्वे चेति । विवक्षितपरस्परविभागहेतुः क्रियावत्त्वमिह ग्राह्यम् । क्वचित् पठ्यते—विप्रतिपत्तिविषया विभागिन आकाशादयः क्रियावद्द्रव्यसंयोगित्वात् परमाणुवदिति । अत्र यद्याकाशादयो विभागिन इति साध्येत तत आत्मादिभिरपि विभागिनः स्युरित्यपसिद्धान्तः स्यादित्यत उक्तम्—विप्रतिपत्तिविषया इति । ततो मूर्तेन विभागिन इत्यभिमतं लभ्यत इति । संयोगस्य चाव्याप्यवृत्तित्वमिति । प्रदेशवतोः खल्वामलकयोः संयोगोऽव्याप्यवृत्तिरिति अव्याप्यवृत्तिता संयोगस्याकाशादावपि प्रदेशवद्द्रव्यसामान्यम् ।

२० ब्देन ] °दिग्रहणेनnvt-C
२२ त ] °गस्येत्यस्त्यतnvt-C
३० विभागिन ] विभागो नnvt-C

तेनाकाशादौ प्रदेशोपचार इत्युक्तम् । संप्रति सामान्यान्तरमुपचारबीजमाह—एकस्य चेति । यथा घट एकोऽनेकमूर्तद्रव्यसंयोगी प्रदेशवानेवमाकाशमित्यर्थः । § 1083

कतमस्मिन्नर्थ इति प्रश्नः । तस्यार्थः

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः ।
सन्तानानुमानविशेषणात् ।
कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् । § 1087

इति सूत्रैरेवानैकान्तिकत्वपरिहारादस्मिन्नर्थे सूत्रं न श्रूयते इति न युक्तमिति । उत्तरम्—निष्प्रदेशमाकाशमिति । न हि कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् इति सूत्रमाकाशादीनामप्रदेशवत्त्वं साक्षाद् ब्रूत इत्यर्थः । एवं स्थिते भाष्यकारीये प्रश्ने वार्त्तिककारः स्वमुत्तरमाह—अर्थतोऽधिगतेरिति । विषयान्तरं प्रश्नोत्तरयोराह—शब्दसन्तानेति । § 1088

भाष्यकारीयमुत्तरमाह—शास्त्रेति । द्वौ पक्षौ न व्यवस्थापयतीति भाष्यस्यायमर्थः, निष्प्रदेशत्वमात्मादीनां शब्दसन्तानं च साक्षादाचक्षाणः सूत्रकारः पक्षं व्यवस्थापयेन्न तु तेनैतदभिहितमिति । अनुमानतरोः पञ्चानां
408/tha रूपाणां चतुर्णां वा संपदः शाखा बहव इत्यर्थः ॥ १७ ॥ § 1089

## प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ २ । २ । १८ ॥ § 1090

सतोऽनुपलब्धिकारणाभाव इति । प्राक्प्रध्वंसाभावाभ्यां व्यभिचारो मा भूदिति सत इत्युक्तम् ॥ १८ ॥ § 1091

## तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ २ । २ । १९ ॥ § 1092

अथ जातिवादिनः सूत्रद्वयम्—तद...पत्ति । § 1093

आवरणानुपलब्धेस्तावदुपलब्धिर्न संभवति, अनुपलब्धिस्वरूपविरोधात् । तस्मादावरणानुपलब्धिरेव वक्तव्या । तथा चावरणानुपलब्धेरभावे सत्यावरणोपलब्धिः तया त्वावरणसद्भावः ज्ञानस्य निरालम्बनत्वायोगात् ॥ १९ ॥ § 1094

## अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भात् ॥ २ । २ । २० ॥ § 1095

द्वितीयं सूत्रम्—अनु...म्भात् । § 1096

५ भिचारः ] न्या. सू. २. २. १५
६ णात् ] न्या. सू. २. २. १६
७ ब्देनाभिधानात् ] न्या. सू. २. २. १७
१३ तीति ] प्रतिष्ठापयतीति भाष्यपाठःnvt-J

यदि पूर्वोक्तदोषभयादनुपलभ्यमानाप्यावरणानुपलब्धिरस्ति तथा सत्यनुपलब्धेरनैकान्तिकत्वान्नावरणाभावोऽनुपलम्भादिति । तदिह द्वाभ्यां सूत्राभ्यामनैकान्तिकत्वं देशितम् । अस्यावतारभाष्यम्—एवं च सति तत्त्वमिति । § 1097

तदेतद् वार्त्तिककारो व्याचष्टे—एवं चेति । सूत्रयोस्तात्पर्यं प्रश्नपूर्वकमेकत्र दर्शयति—कोऽस्य वाक्यस्येति । अत्र सिद्धान्ती पृच्छति—कथं पुनरिति । जातिवाद्याह—किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वादिति । सिद्धान्त्याह—एवं सतीति । यद्यावरणानुपलब्धिरुपलभ्यते मानसेन प्र- 409/tha
त्यक्षेण, नानैकान्तिकत्वं न चावरणसद्भावः । उत्तरवाक्यमिति । जात्युत्तरवाक्यमित्यर्थः । नास्योत्थानमस्तीति । न सूत्रद्वयस्याप्युत्थानमस्तीत्यर्थः । § 1098

ननु पूर्वेणैव सूत्रेणावरणोपपत्तौ दर्शितायां कृतमनुपलम्भादपीत्यनेन सूत्रेणेत्यत आह—अभ्यनुज्ञावादेनेति । § 1099

पूर्वसूत्रेण अनुपलब्धेरनुपलम्भादभाव उक्तः । इह त्वनुपलम्भादपि यद्यनुपलब्धेर्नाभाव इत्यभ्यनुज्ञाय अनैकान्तिकत्वमुच्यते इति नापार्थकमेतत् सूत्रमित्यर्थः । सूत्रगतोऽपिरभ्युपगमांशमवद्योतयति । एतदेवाह भाष्यकारःयद्यनुजानाति भवान् इति । तदनेन सूत्रद्वयेनानैकान्तिकत्वमुच्यत इति स्थितम् ॥ २० ॥ § 1100

## अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ २ । २ । २१ ॥

§ 1101

अस्योत्तरसूत्रम्—अनु…हेतुः । § 1102

जातिवादी अनुपलब्धेरनुपलब्धिर्नास्ति विरोधादिति मन्यते । तत्र विधिविषयप्रमाणगोचरतानुपलब्धौ विरुध्यते । न तु निषेधगोचरप्रमाणविषयतापि । ततश्चोपलब्धिं निषेधता प्रमाणेन मनसानुपलब्धिग्रहणं न विरोधमावहति । तदयं सूत्रार्थः । अनुपलब्धेः आवरणानुपलब्धेः अनुपलम्भात्मकत्वाद् आवरणोपलब्धिनिषेधात्मकत्वात् तदनुपलब्धेरनुपलम्भादित्ययमावरणोपपत्तौ न हेतुः, असिद्धत्वात् । निषेधविषयेण प्रमाणेनैवानुपलब्धेरनुपलम्भादिति । § 1103

तदेतद् भाष्यकृद् आह—यदुपलभ्यत इति । यदुपलभ्यते विधिविषयेण प्रमाणेन तदस्ति, यन्नोपलभ्यते निषेधविषयेण प्रमाणेनोपलभ्यते तन्नास्तीति । तस्मादनुपलम्भात्मकं निषेधविषयप्रमाणागम्यमसदिति स्थितम् । उपलब्ध्यभावश्चानुपलब्धिः । सेयमभावात् नोपलभ्यते विधिविषयेण प्रमाणेन । शेषं सुगमम् । § 1104

---

१५ नुज्ञाय ] °र्नाभावादिति । तदनेनाभ्यनुज्ञाया nvt-C
२७ म्भादिति ] °रुपलम्भा° nvt-J
२९ आह ] °कारो व्याचष्टे nvt-C
३२ भावात् ] °मभावत्वात् nvt-C

410/tha

अस्य वार्त्तिककारः परमतात्पर्यमाह—अतथाजातीयेनेति । अनुत्तरं जात्युत्तरमित्यर्थः । यथाजातीयक इति । उपलभ्यस्य हि शब्दस्यासत्यनुपलम्भकारणे प्रागूर्ध्वं चोच्चारणादनुपलभ्यमानस्यानित्यस्य सधर्मा नान्य आत्मादिर्दृष्टोऽनित्य इति । ननु प्रागूर्ध्वं चोच्चारणात् मा भूच्छब्द इत्येतावतापि नित्यान्तरवैधर्म्येण कस्मान्न नित्यः शब्दः । न ह्यात्माकाशादयो नित्याः सर्वथा सर्वेषां सधर्माणः । मा भूदेषामभेद इत्यत आह—उक्तं चेति । § 1105

अनित्यत्वसाधनमाह—अनित्य इति । प्रत्यक्षत्वादित्युच्यमाने गोत्वादिभिर्व्यभिचारः स्यादत उक्तम्—व्यापकद्रव्यसमवायित्वे सतीति । तथाप्यात्मसमवायिनैकत्वेन व्यभिचारः । अत उक्तम्—अव्यापकस्येति । अमूर्तत्वादित्युच्यमाने घटादिभिः प्रदेशवद्भिः प्रथमे क्षणेऽनुत्पन्नपरिमाणैर्व्यभिचारः । अत उक्तम्—सर्वदेति । तथापि क्रियागुणादिभिर्व्यभिचारः, तेषामपि हि समवायिकारणं प्रदेश इत्यत उक्तम्—द्रव्यस्य सत इति ॥ २१ ॥ § 1106

अस्पर्शत्वात् ॥ २ । २ । २२ ॥ § 1107

तदेवं स्वपक्षे साधनमुक्त्वा विप्रतिपत्तिनिमित्तं परपक्षसाधनमुपन्यस्य निराकरोति—अथ शब्दस्येति ॥ अस्प...त्वात् ॥ २२ ॥ § 1108

न कर्मानित्यत्वात् ॥ २ । २ । २३ ॥ § 1109

नाणुनित्यत्वात् ॥ २ । २ । २४ ॥ § 1110

अस्पर्शत्वेन कर्मणैवोभयतो व्यभिचारे लब्धे नित्येन अणुना व्यभिचारोद्भावनं कृतकत्वानित्यत्ववत् समव्याप्तिकत्वनिराकरणार्थं द्रष्टव्यम् ॥ २४ ॥ § 1111

411/tha

संप्रदानात् ॥ २ । २ । २५ ॥ § 1112

अयं तर्हि हेतुः—सं...नात् । § 1113

इति । संप्रदीयमानत्वादित्यर्थः ॥ २५ ॥ § 1114

तदन्तरालानुपलब्धेरहेतुः ॥ २ । २ । २६ ॥ § 1115

अध्यापनादप्रतिषेधः ॥ २ । २ । २७ ॥ § 1116

दातृप्रतिग्रहीत्रोरन्तराले शब्दोऽस्ति अध्यापनाद् गुरुणा शिष्याय दीयमानत्वाद् धनुर्वेदविदाचार्येण शिष्याय दीयमानेष्वादिवदिति ॥ २७ ॥ § 1117

---

१० स्येति ] अव्यापकस्यासमवाये सतीति, तथाप्यात्मसमवायित्वस्येति nvt-C

११ भिचारः ] अनुत्पन्नपरिमाणैः nvt-J

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥ २ । २ । २८ ॥ § 1118

अभ्यासात् ॥ २ । २ । २९ ॥ § 1119

यद्यन्यन्नाम जगति किञ्चिद् भवेत् ततोऽन्यत्वेऽप्यभ्यासोपचारादित्यनेनानैकान्तिकत्वमुद्भाव्येत । तदेव तु नास्तीति वाक्छलेन प्रत्यवतिष्ठते— § 1120

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ २ । २ । ३० ॥ § 1121

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभावः ॥ २ । २ । ३१ ॥ § 1122

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥ २ । २ । ३२ ॥ § 1123

412/tha

तस्य परिहारसूत्रम्—तद...द्धेः । § 1124

तयोरन्यानन्ययोर्मध्येऽनन्यस्यान्यापेक्षत्वसिद्धेरित्यर्थः । न चान्यत् स्वरूपादनन्यदिति परस्मादप्यनन्यद् भवितुमर्हति । न हि नीलमात्मनोऽनन्यदिति पीतादप्यनन्यदिति । अन्यदेव हि पीतान्नीलमिति परमार्थः । § 1125

अयं तावत् प्रत्ययः पुरुषान्तरे निवर्तमानो दृष्ट इति । यदा खल्वेकस्य तत्प्रत्ययो भवति तदावश्यं न पुरुषान्तरस्य तस्मात् तत्प्रत्ययाव्यावृत्तिरसिद्धैवेति । एवमेतदिति । सत्यं विशेषदर्शनं तत्प्रत्ययनिवृत्तिहेतुः । तदभावे तु विशेषादर्शनस्य न शक्यं संशयहेतुत्वं निवारयितुमित्यर्थः । यत्पुनरेतद्गोशब्देन गोशब्द इति । गोशब्दो गोशब्द इत्येकावभासः प्रत्ययो नैकमन्तरेण भवितुमर्हति । अथ भ्रान्तः कस्मान्न भवतीत्यत आह—न च गोशब्दस्येति । भ्रान्तत्वे हि ततो गोशब्दादर्थप्रत्ययो भ्रान्तः स्यात्, यथा समारोपितधूमभावाया मशकवर्तेर्धूमध्वजानुमानम् । तस्मादभ्रान्तो गोशब्दैकत्वप्रत्ययः स्थायितामस्य सूचयतीत्यर्थः । दूषयति—एतदपीति । युक्ता तु कारणसामान्यात् तत्प्रत्ययस्याव्यावृत्तिरिति । गोशब्दबुद्धेः कारणमालम्बनं गोशब्दस्तस्य सामान्यं गत्वमोत्वं गोशब्दत्वमिति यावत् । तस्मात् प्रत्ययस्याव्यावृत्तिर्युक्ता गोशब्दो गोशब्द इतोवंरूपा । कथमिति प्रश्नः । गोबुद्धौ गोबुद्धिप्रत्ययो न व्यावर्तते । जात्यभिप्रायमेकवचनं गोबुद्धाविति । यथा हि गोबुद्धिषु भिन्नास्वपि परस्परं गोबुद्धिर्गोबुद्धिरित्यनुगतावभासिनी

१७ स्य ] तस्मात् प्रत्य° nvt-C
२० ब्देन ] गोशब्देनेति nvt-J
२० भासः ] °त्येकाकारः nvt-C
२७ स्मात् ] प्रत्ययस्य व्यावृ° nvt-C

प्रख्या गोबुद्धित्वसामान्योपधाना स्वकारणभूता गोबुद्धीरालम्बते, एवं गोशब्दो गोशब्द इति बुद्धिरपि गोशब्दत्वोपधाना गोशब्दव्यक्तीः, न पुनर्गोशब्दव्यक्तिमेकामनेकदेशकालव्यापिनीम् । न चास्या गोशब्दबुद्धेरित्यत्रापि जातावेकवचनम् । गोशब्दो गोशब्द इति बुद्ध्यनुगतिः सामान्यनिबन्धना अनुगतित्वे सति गोशब्दबुद्धिसंबन्धित्वाद् गोशब्दबुद्धिर्गोशब्दबुद्धिरित्यनुगतबुद्धिवदिति । § 1126

413/tha

भिन्नमभेदेन विद्वान् *यश्चानुपलब्धविशेष एव निवर्तते, तं प्रति तस्य वस्तुनः किं विशेषोऽस्ति नास्तीति भवन्त एव प्रष्टव्याः । उभयत्र दोषमाह— यद्यस्तीति । द्व्यात्मकमिति भिन्नमभिन्नमित्यर्थः । अशेषपुरुषविषयतयेति आधारतयेत्यर्थः ॥ ३२ ॥ § 1127

विनाशकारणानुपलब्धेः ॥ २ । २ । ३३ ॥ § 1128

कारणद्रव्यविभाग इति । विभागेनासमवायिकारणसंयोगविनाशो लक्षितः, तत्कार्यत्वात् ॥ ३३ ॥ § 1129

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ २ । २ । ३४ ॥ § 1130

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ २ । २ । ३५ ॥ § 1131

अनपदेशोऽहेतुरित्यर्थः । उभयमितीति । यदा क्रमेलकं विषाणित्वादश्वत्वेन साधयति, तदास्य न विषाणं नापि तत्संबन्धः । यथा विषाणित्वं क्रमेलकेऽसिद्धं तथा अनुमानेन विनाशकारणोपलब्धौ तदनुपलब्धिरसिद्धेति । *अश्वविषाणसंबन्धस्याभावादिति अश्वत्वविषाणित्वयोर्यतः कोऽपि संबन्धोऽश्वेषु सिद्धो नास्ति, तस्माद् विरोधादनुमानमसदशोभनमित्यर्थः । तस्माद् यथा विरुद्धाद्धेतोरनुमानमसदेवमसिद्धादपीत्यर्थः । § 1132

शङ्कते—कर्मत्ववदिति चेत् । निराकरोति—तच्च न आश्रयस्यानित्यत्वात् । कर्मत्वस्याश्रयः कर्म तस्यानित्यत्वादित्यर्थः । शब्दस्य नित्यस्याश्रवणमनुपप-
414/tha न्नम् अश्रवणकारणानुपपत्तेरिति ब्रूमः । तन्नाश्रयानित्यत्वादिति ग्रहणकवाक्यं विभजते—कर्मत्वस्य पुनरिति । § 1133

प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य शब्दस्य निरोधक इति भाष्यम् । तस्यार्थः । प्रतिघातिद्रव्यं कुड्यादि । तत्संयोगो नभसः । एतदुक्तं भवति,

१ ख्या ] प्रथा nvt-C
३ ब्द ] गोव्यक्ति° *Pañjikā*
७ * ] पश्चादनुपलब्ध°nvt-J
२१ * ] अश्वत्वविषाणत्वयोः nvt-C °षाणयोःnvt-J
२१ कोऽपि ] कोऽपि*Om*nvt-J
२२ सिद्धो ] सिद्धेषुnvt-J
२२ र्थः ] °मेतदशो°nvt-C

घनतमद्रव्यसंयुक्तं नभो न शब्दस्य समवायिकारणतां प्रतिपद्यते । ततश्च सन्नप्यसमवायिकारणं शब्दो न शब्दान्तरमारभते । तस्य च स्वकारणात् तत्कारणस्य च तस्माद् विनाशो भवतीति द्रष्टव्यम् । एवमन्यत्रापीदृश एव शब्दविनाशहेतुरूहनीय इति । § 1134

इतश्च शब्दो नित्य इत्याह—घण्टायामभिहन्यमानायामिति । यदि हि घण्टास्थेन व्यञ्जकेनान्यवृत्तिना वावस्थितेन सन्तानवृत्तिना वा नित्यः शब्दो व्यज्येत, ततः तारतारतरतारतममन्दमन्दतरमन्दतमादिश्रुतिभेदो न स्यात् । नित्यस्य च शब्दस्य न स्वाभाविको भेदो नाप्यौपाधिक इत्युपपादितमधस्तात् । यदि तु तारतमादयस्तावन्त एव शब्दा नित्याः, ततस्तावन्त एव युगपदवगम्येरन् अविशेषादेको ह्येषां व्यञ्जकः स्थिर इति । अथ सन्तानवृत्तिः, तथापि सर्व एव तत्सन्ततिपतिताः समर्था इत्याद्येनैव सर्वे व्यज्येरन् । न च समानदेशानां समानेन्द्रियग्राह्याणां व्यञ्जकनियमो युक्त इत्युक्तमधस्तात् । कारणत्वे तु घण्टास्थस्य सन्तानवृत्तेर्युक्तं यत्तारतमादिभेदेन कारणभेदात् कार्यभेद इति तात्पर्यार्थः । युगपदनेकशब्दोपलब्धिप्रसङ्ग इति । अनेकस्य तारतमादेः शब्दस्योपलब्धिप्रसङ्ग इत्यर्थः । घण्टास्थस्य चाभिव्यक्तिकारणं कथमन्यत्र वर्तमानम् इति श्रोत्रे वर्तमानमित्यर्थः । § 1135

द्वितीयं कल्पमुपन्यस्य दूषयति—अथान्यगतमिति । घण्टासंबन्ध्येष शब्द इति हि तावल्लौकिकप्रत्ययः । सोऽयमन्यगते शब्दस्य व्यञ्जके यथैकस्यां घण्टायां भवति, एवं घण्टान्तरेष्वपि तत्प्रत्यासन्नेषु भवेदविशेषात् । तस्मादेकघण्टास्थत्वे नियमहेतुर्वक्तव्य इति । असति च शब्दभेदे श्रुतीनामिति शब्दज्ञानानामित्यर्थः । नाद इति वायुधर्मोऽभिधीयत इति । शङ्कते— 415/tha व्यामोहप्रत्यय इति । यथा हि वस्तुतः स्वच्छधवले स्फटिकमणौ लाक्षारसावसेकतिरस्कृतधवलिम्नि लोहितः स्फटिक इति प्रत्ययः, एवमभिव्यञ्जकवृत्तिस्तारतमत्वादिर्भ्रान्त्या शब्दे प्रतीयते इत्यर्थः । निराकरोति—न विशेषहेत्वभावादिति । न हि समीचीनात् प्रत्ययात् तारोऽयं शब्द इति प्रत्ययस्य कश्चिद् विशेषहेतुरस्ति बाधकप्रत्ययो येनैष मिथ्याप्रत्ययः स्यादित्यर्थः । न च निर्बीजा भ्रान्तिरपि भवितुमर्हति । दीर्घत्वादिभ्रमाणां तु शब्देऽस्ति बीजमित्याह—यदि चायमिति । यानि खलु दीर्घाणि वंशप्रभृतीनि तेषामवयवोपचयः समानजातीयोपचयः । इहाप्यविरतश्रुतौ शब्दसन्ताने विवृतकरणनिष्पन्ने समस्ति समानजातीयोपचय इति तत्साधर्म्याद् दीर्घत्वभ्रमः । एवं शब्दसन्तान एव तारो महानित्युच्यते । तत्राप्यस्ति समानजातीयोपचयोऽस्ति च स्फुटतरत्वम् । महानपि हि स्फुटतरोऽयमपि तथेति महानित्युच्यते । § 1136

१० अविशेषादेको ] युगपदेव...विशेषाभावादे°nvt-C
१२ स्तात् ] द्रः टी २. २. १३
१७ स्य ] कल्पमाशङ्क्यnvt-C
२१ इति ] वायुर्वा वायुधर्मो°nvt-J
२९ श्रुतौ ] °भृतौnvt-C

शङ्कते—तुल्यमिति चेत् । यथा ह्यनित्यवादिनो घण्टास्थमवस्थितं सन्तानवृत्ति वा न युगपत् तारमन्दानुत्पादयति किं तु क्रमेणैव, एवं नित्यानपि शब्दान् क्रमेण व्यङ्क्तीत्यर्थः । निराकरोति—न तन्निमित्तस्य कदाचिद्भावात् । न तावन्नित्यवादिभिस्तारत्वादिधर्मभेदेन शब्दभेदोऽभ्युपेयते । तथा चैकेनावस्थितेन घण्टास्थेन सन्तानवृत्तिना व्यज्यमान एकस्मिन् शब्दे नित्ये श्रुतिभेदः कादाचित्को नोपपद्येत । शब्दे त्वनित्येऽन्यस्मिन्नन्यस्मिन् क्रियमाणे सन्तानवृत्तिना कारणेन तद्भेदात् कार्यत्वात् कादाचित्कत्वाच्च श्रुतिभेदोपपत्तिरिति वैषम्यमित्यर्थः । तच्च कारणमिति । निमित्तकारणमित्यर्थः । पाणिसंश्लेषमपेक्षमाणादिति । स्पर्शवद्वेगवद्द्रव्यसंयोगाद् घण्टायां कर्म, कर्मवद्घण्टाकाशसंयोगात् तादृशाच्छब्दश्चेत्येकः कालः । तत्कर्म पाण्यभिघातमपेक्षमाणं विभागसमकालं संस्कारं वेगाख्यं करोति । सा घण्टा चलन्त्याध्यात्मिकं वायुमुपगृह्णाति । घण्टातदवयवसंपृक्ता वायुपरमाणव
416/tha एवाध्यात्मिको वायुः । तदुपग्रहो घण्टायाः स्ववेगमपेक्षमाणाया वायुसंयोगाद् वायौ क्रियोत्पादकत्वम् । ततश्चानिलकर्मणो घण्टानिलसंयोगो वायुगतवेगापेक्षः पुनर्घण्टायां कर्मारभते । तदिदमाह—सा च वायुनाभिहता पुनः कर्म करोति । तदेवं वायुघण्टासंयोगो घण्टावेगापेक्षो घण्टाकाशसंयोगश्च शब्दमारभत इति द्रष्टव्यम् । ततः कर्मणा संस्कारः संस्कारेण पुनः कर्म शब्दश्चेत्यपि द्रष्टव्यम् । सुगममन्यत् ॥ ३५ ॥ § 1137

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ २ । २ । ३६ ॥ § 1138

देशयति—अथ घण्टास्थ इति । न खलु निमित्तकारणविनाशे कार्योच्छेदः, माभूत् कुलालादिनिवृत्तावपि घटादिनिवृत्तिरित्यर्थः । परिहरति—न ब्रूम इति । यद्यपि निमित्तनिवृत्तावपि कार्यं निवर्तते यथा अपेक्षाबुद्धिनाशाद् द्वित्वादि, तथापि निमित्तनिवृत्तावपि तदनिवृत्तिमभ्युपेत्यैष परिहार इति मन्तव्यम् ॥ ३६ ॥ § 1139

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २ । २ । ३७ ॥ § 1140

सिंहावलोकितन्यायेन पूर्वोक्तं हेतुं दूषयति—विनाशेति । § 1141

विना…ङ्गः । प्रत्यक्षेण शब्दविनाशकारणानुपलब्धेश्चावस्थाने शब्दस्य शब्दोपलब्धेरपि नित्यत्वप्रसङ्गः । न हि तस्या अपि विनाशकारणं प्रत्यक्षेणोपलभ्यत इति । तदनेन विनाशकारणानुपलब्धेरित्यस्य अनैकान्तिकत्वमुद्भावितम् ॥ ३७ ॥ § 1142

१२ संपृक्ता ] संयुक्ताnvt-C
३१ स्य ] °ब्धिरित्यस्य nvt-C

अस्पर्शत्वादप्रतिषेधः ॥ २ । २ । ३८ ॥ § 1143
१417/tha

संप्रति सांख्यं प्रत्यवतिष्ठते । कम्पसमानाश्रयस्येति । अनुवृत्तो नादः शब्दोऽनुनाद इति । वैयधिकरण्ये हि प्रतिघातिद्रव्यप्रश्लेषेण समानाधिकरणस्यैव संस्कारस्योच्छेदः स्यात् । न व्यधिकरणस्य शब्दस्य । व्यधिकरणस्य तूच्छेदाभ्युपगमेऽतिप्रसङ्गः स्यात् । तस्मात् कम्पसन्तानसंस्कारसमानाश्रयः शब्दोऽभ्युपगन्तव्यः । तदनेनाकाशाश्रयत्वं शब्दस्य प्रतिषिद्धम् । तदेतद् वार्त्तिककारो व्यचष्टे—व्यधिकरणत्वादयुक्तमिति । § 1144

अस्योत्तरसूत्रम्—अस्प...धः । § 1145

प्राप्यकारित्वमिन्द्रियाणाम् उपपादितम् । घण्टाद्याश्रयश्च शब्दो न श्रोत्रं प्राप्नोति । एवं हि प्राप्नुयाद् यदि घण्टा कर्णशष्कुलीमागच्छेत् । कर्णशष्कुली वा घण्टाम् । न चैतदुभयमस्ति । न चाहङ्कारिकमिन्द्रियं व्यापीत्युक्तम् । तस्माच्छब्दाधारोऽस्पर्शो व्यापी चाकाशः । तदाधारः शब्दः श्रोत्रमायाति सन्तानवृत्त्येति युक्तम् । तथा च श्रवणमस्योपपन्नम्, नान्यथेति । तदेतद् वार्त्तिककृद् विभजते—अस्पर्शेति । येन केनचिदिति, मन्दतरेण वा मन्दतमेन वा कारणशब्देनेत्यर्थः । § 1146

अनेकः संस्कार इति एतत् तत्त्वं शब्दभेदादिति । एकस्य हि संस्कारस्य धर्मभेदकल्पनायां कल्पनागौरवप्रसङ्गः । संस्कारस्तावदेको धर्मी धर्मभेदाश्चेति । तदिह धर्मभेदस्थानेऽस्तु संस्कारभेदः । कृतमत्रैकेन धर्मिणा । न च संस्कारभेदेषु धर्मभेदाः कल्पनीयाः । संस्कारभेदमात्रादेव कारणात् कार्यभेदोपपत्तौ तद्गतधर्मभेदकल्पनावैयर्थ्यादिति भावः । यस्य च वैशेषिकस्य एकः संस्कारस्तस्येषोः पातः प्राप्नोति । संस्कारस्य हीषोर्मूर्तद्रव्यसंयोगो विनाशकोऽविनाशको वा ? विनाशकश्चेद् आद्येनैव मूर्तद्रव्यसंयोगेन तद्विनाशाद् अगत्वैव यावद् गन्तव्यमिषोः पातप्रसङ्गः । द्वितीये तु कल्पे कृतकस्यापि संस्कारस्य विनाशकारणाभावेनाविनाशान्न कदाचिदपि पातः स्यात् । प्रयोगश्च इष्वादिवेगः क्षणिको वेगत्वाद् घटादिगतवेगवदिति ॥ ३८ ॥ § 1147

418/tha

विभक्त्यन्तरोपपत्तेश्च समासे ॥ २ । २ । ३९ ॥ § 1148

सांख्यानां हि रूपरसगन्धस्पर्शशब्दसमुदायो वीणावेणुशङ्खादिद्रव्यम् । तत्र समासे समुदाये स्थित एव शब्दो व्यज्यत इति दर्शनम् । तस्मिन् समुदाये सांख्याभिमते विभक्त्यन्तरोपपत्तेश्च न व्यज्यते शब्दः । यदि समुदाये व्यज्येत शब्दः, विभक्तिश्च षड्जधैवतगान्धारादिभेदेन, विभागान्तरं च

१. हीति द्रव्यप्रश्लेषात् nvt-C

३ श्लेषेण ] एतदिति वार्त्तिकानुरोधात्nvt-J
९ म् ] व्यवस्थापितं प्राक् nvt-C
१६ त् ] एतदिति वार्त्तिकानुरोधात्nvt-J

षड्जजातीयस्यैव तारमन्दादिरूपं नोपपद्येत । न हि तद्गतानां गन्धादीनामेकस्मिन्नेव द्रव्ये वीणादौ नानाजातीयत्वम्, एकजातीयानां वा प्रतिक्षणं भेदो दृश्यते । तस्माद् विभक्त्यन्तरोपपत्तेर्न समासे व्यज्यते शब्दः । अपि त्वाकाशगुणः क्रियत इति साम्प्रतम् । सूत्रव्याख्ययैव भाष्यवार्त्तिके व्याख्याते ॥ ३९ ॥ § 1149

॥ इति शब्दानित्यत्वप्रकरणम् ॥

## २.२.३ शब्दपरिणामप्रकरणम्

विकारादेशोपदेशात् संशयः ॥ २ । २ । ४० ॥ § 1151

तदेवं रूपादिसन्निविष्टः शब्दो व्यज्यते इति सांख्यमते दूषिते स एव सांख्यो वर्णेषु प्रकृतिविकारभावश्रुतेर्मृत्सुवर्णादिवत् परिणामिनित्या वर्णा इति यदि प्रत्यवतिष्ठते तत्र परीक्षामारभते—द्विविधश्चायं शब्द इति । § 1152

विका…यः । विकारोपदेशोऽपि न ध्वनिमात्रे शब्देऽस्तीति न तस्य परिणमिनित्यतामापादयितुमर्हति । केवलं वर्णात्मन्यापादयेद् यद्यसन्देहः स्यात्

419/tha । अस्ति तु तत्रापि संशयः । तथा हि इको यणचि इत्यादिकं विकारोपदेशं व्याचक्षत एके, अन्ये त्वादेशोपदेशम् । तदत्र व्याख्यातृविप्रतिपत्तेः संशयः । तन्नापरीक्ष्य शक्यमवधारयितुमित्यर्थः । तत्र परीक्षायाम् । § 1153

आदेशोपदेशस्तत्त्वमित्यवधारयति—आदेशोपदेश इति । सुवर्णजातीयाः खल्ववयवा अन्यतमव्यूहपरित्यागेनान्यतमं व्यूहमापद्यमाना रुचक इति वा वर्धमानक इति वा कटक इति वा परिणमन्ते । अस्ति हि तेषु सर्वेषु सुवर्णजातीयानामवयवानामनुगमः । न तु यकारे इकारस्य वा तदारम्भकस्य वा अवयवस्यानुगममीक्षामहे । तस्माद् विकाराभावादादेशत्वमस्य निश्चिनुम इति । § 1154

उपपत्त्यन्तरं चाविकारे दर्शयति—भिन्नकरणयोश्चेति । यदि हीकारविकारो यकारः स्याद् यकारप्रयोगायेकारमुपाददानास्तत्कारणं विवृतकरणं पूर्वमुपाददीरन्, तन्निरपेक्षास्तु यकारं प्रयुयुक्षमाणा ईषत्स्पृष्टकरणमुपाददते । तस्मात् नेकारविकारो यकार इत्युत्पश्यामः । § 1155

उपपत्त्यन्तरं चाह—अविकारे चेति । कारकज्ञापकयोर्हि त्वोरविशेषमाह—उभयत्रेति । § 1156

उपपत्त्यन्तरमाह—प्रयुज्यमानेति । यथा हि क्षीरं कालविपाकापेक्षं दधि भवद् दृश्यते, न तथेकारो यकारो भवन्नित्यर्थः । § 1157

यदि न विकारः कथं तर्हि शब्दान्वाख्यानम् इको यणचि § 1158

२ वा ] द्रव्ये वीणादौ नानाजातीयानां चnvt-C
७ यः ] सन्देहःnvt-C
१८ माणा ] प्रयोक्ष्यमाणाnvt-C
१९ श्यामः ] इत्यवस्यामःnvt-J

इत्यत आह—अविकारे चेति । इकः प्रयोगप्रसङ्गे संहितायां यणः प्रयोगमाह तत् सूत्रम्, न पुनरिग्विकारं यणमित्यर्थः । ननु मा भूद् विकारः, परिणामोऽर्थान्तरं तु भविष्यति यतो नित्या वर्णा भविष्यन्तीत्यत आह—एतावच्चैतदिति । परिणामो वा इत्यापाततः । कार्यकारणभावो वेति परमार्थः । न जातु क्षीरं तदवयवा वा दधिरूपेण परिणमन्ते । न ह्यवयवा अवयविस्वभावाः । तस्मात् कार्यकारणभाव एव तात्त्विकः । स च वर्णेषु 420/tha
नास्ति इगनपेक्षस्य यणो निष्पत्तेः । तस्मादिक्प्रयोगप्रसङ्गे संहितायां यणः प्रयोग इत्यन्वाख्यानार्थः । § 1159

इतश्चायमादेशोपदेश इत्याह—वर्णसमुदायेति । वर्णस्यैकस्य वास्तवत्वात् कदाचिद् विकार उच्येत । बुद्धिसमाहारमात्रस्य तु तत्समुदायस्य न विकारसंभवः । तस्मात् तत्राकामेनाप्यादेशोपदेशो वक्तव्यः । स वरं कॢप्तत्वादेकस्मिन्नप्यस्तु वर्ण इत्यर्थः ॥ ४० ॥ § 1160

प्रकृतिविवृद्धौ विकारविवृद्धेः ॥ २ । २ । ४१ ॥ § 1161

इतश्च न प्रकृतिविकारभावः—प्रकृ…द्धेः । § 1162

प्रकृतिविवृद्धाविति । महद्भिः खलु तूलपिण्डैरारब्धस्तूलपिण्डो महान् । अल्पैरारब्धोऽल्प इति दृष्टम् । तद्वदिहापि दीर्घकारविकारस्य यकारस्य ह्रस्वेकारविकाराद् भवितव्यं विशेषेण । न चास्ति विशेषः । तस्मान्न प्रकृतिविकारभाव इत्यर्थः ॥ ४१ ॥ § 1163

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ २ । २ । ४२ ॥ § 1164

अस्याक्षेपसूत्रम् । न्यून…तु । अल्पेन हि न्यग्रोधबीजेनारब्धो न्यग्रोधतरुर्महान् । अतोऽतिमहता माननारिकेलबीजेनारब्धो नारिकेलतरुरल्पः । नारिकेलबीजैरेव परस्परापेक्षया समैरारब्धः सम इति ॥ ४२ ॥ § 1165

द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः ॥ २ । २ । ४३ ॥ § 1166

421/tha

अस्य प्रत्याख्यानसूत्रम्—द्विविधस्यापि हेतोरिति यदि च न्यूनसमाधिकोपलब्धेरिति साधनं तदा द्विविधस्य हेतोरभावाद् दृष्टान्तमात्रस्य चासाधकत्वात् प्रतिदृष्टान्तस्य च संभवादित्येतद् दूषणम् ॥ ४३ ॥ § 1167

---

१० उच्येत ] उपपद्यते nvt-C
१६ ब्धोऽल्प ] °ब्धः स्थूलः पिण्डोऽल्पश्चारब्धो महानल्पः nvt-C
२२ ब्धो ] ततोऽतिमहता वा नारि° nvt-C
२३ या ] °पेक्षमाणसमै° nvt-C

## नातुल्यप्रकृतीनां विकारविकल्पात् ॥ २ । २ । ४४ ॥

§ 1168

यदि तु न्यूनसमाधिकोपलब्धेरित्यनेनानैकान्तिकोद्भावनं प्रकृत्यनुविधानस्य क्रियते तदा दूषणपक्षे नातुल्यप्रकृतीनां विकारविकल्पादिति दूषणमनैकान्तिकदोषस्यासंबद्धत्वं नाम । न्यूनसमाधिकत्वे तु प्रकृत्यनुविधानं विकाराणामप्रच्युतम् । तथा हि अतुल्यायाः प्रकृतेर्विकारा विकल्प्यन्ते प्रकृतिभेदम् अनुविधीयन्ते । न जातु न्यग्रोधबीजान्नारिकेलपादपो भवति, भवति च न्यग्रोधबीजान्न्यग्रोधपादपः । एतदुक्तं भवति—प्रकृतिभेदानुविधानं विकारभेदानां ब्रूमो न पुनस्तद्विवृद्धिह्रासाभ्यां तद्विवृद्धिह्रासौ, येनानैकान्तिकत्वमुद्भाव्येत । तस्मादनैकान्तिकोद्भावनमसंबद्धमित्यर्थः । § 1169

न त्विवर्णमनुविधीयते यकार इति भाष्यम् । तस्यार्थो न त्विवर्णभेदमनुविधीयत इति । तस्मादनुदाहरणं न्यूनसमाधिकभावेन द्रव्यविकार इति ॥ ४४ ॥ § 1170

## द्रव्यविकारवैषम्यवद् वर्णविकारविकल्पः ॥ २ । २ । ४५ ॥

§ 1171

अस्याक्षेपसूत्रम्—द्रव्यविकार इति । द्रव्य...कल्पः । न प्रकृतिभेदमवश्यमनुविधीयन्ते विकाराः द्रव्यत्वेन तुल्यत्वेऽपि प्रकृतीनां विकारवैषम्यदर्शनात् । एवं वर्णत्वेन तुल्यत्वेऽपि विकारवैषम्यम् । तथा च दीर्घह्रस्वाभ्यां वैषम्येऽपि विकारसाम्यं भविष्यति प्रकृतिसाम्य इव विकारवैषम्यम् इति भावः ॥ ४५ ॥ § 1172

422/tha

## न विकारधर्मानुपपत्तेः ॥ २ । २ । ४६ ॥ § 1173

तत्प्रत्याख्यानसूत्रम्—न विकारधर्मेति । यद्यपि प्रकृतेर्द्रव्यत्वमभेदस्तथापि विकारभेदे प्रकृतिभेद एवोपयुज्यते, न पुनः सन्नपि प्रकृतेरभेदः । तद्विकाराणां तु यदभिन्नं रूपं द्रव्यत्वं तत्र तस्योपयोग इति स्थिते परिहारे, अन्वयाग्रहणं परिहार उक्तः ॥ ४६ ॥ § 1174

## विकारप्राप्तानामपुनरापत्तेः ॥ २ । २ । ४७ ॥ § 1175

इतश्च न सन्ति वर्णविकारा इत्याह विकारेति । नो खलु क्षीरविकारो दधि पुनः क्षीरं दृष्टमित्यर्थः । अननुमानादिति प्रमाणाभावमुपलक्षयति ॥ ४७ ॥ § 1176

---

८ पः ] वा नारिकेलबीजात् nvt-J
२० साम्यं ] विकारवैषम्यं nvt-C
२६ णं ] इति स्थिते अन्वयग्रहणंnvt-C

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ २ । २ । ४८ ॥ § 1177

अस्याक्षेपः सुवर्णादीनामिति । सूत्रम् । साधनपक्षे दूषणम्—व्यभिचारादिति ॥ ४८ ॥ § 1178

न तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ २ । २ । ४९ ॥ § 1179

दूषणपक्षे दोषमाह—सुवर्णादाहरणोपपत्तिश्चेति । न त...त् । § 1180

तथा हि ये सुवर्णजातीया अवयवा रुचकत्वमापन्नाः, त एव पूर्वव्यूहपरित्यागेन वर्धमानकतामापन्नाः पुना रुचकत्वमापद्यन्ते । तदवयवानां तत्र प्रत्यभिज्ञायमान त्वात् । न त्विहेकारो यकारानुगत इकारयकारानुगतो 423/tha
वान्यः कश्चिद्धर्मी दृश्यते य इत्वं परित्यज्य यत्वमापद्यते । वर्णत्वं चानुगतमपि न धर्मि किं तु धर्म एव । न च निवर्तमान इकारो यकारस्य धर्मी भवितुमर्हति, धर्मधर्मिणोः समानकालत्वादित्यर्थः ॥ ४९ ॥ § 1181

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥ २ । २ । ५० ॥ § 1182

ननु दध्यत्रेति प्रयोगे कदेकारस्योत्पद्य निरोधः ? तथा दधि अत्रेति प्रयोगे कदा यकारस्योत्पद्य निरोध इत्यत आह—तदेतदवगृह्य सन्धान इति । अवग्रहोऽसंहिता । दधि अत्रेत्युच्चार्य दध्यत्रेत्युच्चार्यते, दध्यत्रेति वा सन्धाय यदा दधि अत्रेत्यवगृह्यते इत्यर्थः ॥ ५० ॥ § 1183

नित्यानामतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ २ । २ । ५१ ॥ § 1184

जातिवादी प्रत्यवतिष्ठते—नित्यपक्षेतावदिति । नित्या...धः । यथा हि सत्यपि नित्यत्वे केचिदतीन्द्रियाः, यथा परमण्वाकाशादयः । केचिदैन्द्रियकाः, यथा गोत्वादयः । एवं सत्यपि नित्यत्वे परमाण्वाकाशादयो न प्रकृतिविकारभूताः । वर्णास्तु प्रकृतिविकारभावमापत्स्यन्ते नित्या अपीत्यर्थः । § 1185

सेयं विकल्पसमा जातिरित्याह—विरोधादिति । नो खल्वैन्द्रियकत्वानैन्द्रियकत्वाभ्यामस्ति कश्चिन्नित्यत्वस्य विरोधः प्रकृतिविकारभावेन त्वस्ति । न हि अस्ति संभवः कार्यश्च नित्यश्चेति ॥ ५१ ॥ § 1186
424/tha

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ २ । २ । ५२ ॥ § 1187

११ र्मी ] धर्मो nvt-C

अनित्यपक्षे जातिवाद्याह—अनवस्थायित्वे चेति । यथा सत्यप्यनवस्थायित्वे वर्णा इन्द्रियेण संबध्य स्वविषयं ज्ञानं जनयन्ति, एवं विकारमपि करिष्यन्तीत्यर्थः । § 1188

सेयं साधर्म्यसमा जातिरित्याह—असंबन्धादिति । कतिपयक्षणावस्थानेन वर्णानां क्षणिकानामपि स्वविषयज्ञानहेतुभावो युज्यते । अवगृह्य चिरं स्थित्वा यदा सन्धीयते, सन्धाय वा चिरं स्थित्वा यदावगृह्यन्ते, तदा वर्णानामनित्यानां न तावन्तं कालमवस्थानमस्तीति नोपलब्धिहेतुत्वेन विकारकर्तृत्वं वर्णानां तुल्यम् । तस्मादसंबन्धाद् असमर्था वर्णोपलब्धिर्वर्णविकारप्रतिपादन इत्यर्थः । मा भूद् वर्णोपलब्धिर्विकारेण साक्षात्संबद्धा । आदेशविरोधितया तन्निवृत्त्या पारिशेष्याद् विकारं साधयिष्यतीत्यत आह—न च वर्णोपलब्धिरिति ॥ ५२ ॥ § 1189

### विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ २ । २ । ५३ ॥ § 1190

तदेवं जात्युत्तरद्वयमुत्थितमारितं कृत्वा भाष्यकारः अत्रैवार्थे सूत्रं पठति—विका ...धः । § 1191

वार्त्तिकम्—उपलभ्यमानस्य चेकारस्य यत्वानुपपत्तेरिति । अवगृह्य चिरं स्थित्वा सन्धाय यदा यत्वं तदोपलभ्यमानतेकारस्य नास्तीत्यर्थः ॥ ५३ ॥ § 1192

### प्रकृत्यनियमात् ॥ २ । २ । ५४ ॥ § 1193

इतश्च वर्णविकारनुपपत्तिः—प्रकृत्यनियमादिति । क्षीरजातीयस्य हि
425/tha दधिजातीयो विकारो न पुनः कदाचिदपि दधिजातीयस्य क्षीरजातीयो विकार उपलब्धः । इह तु यथेकारजातीयस्य यकारजातीयो विकारो दध्यत्रेति दृश्यते, एवं यकारजातीयस्यापि विकार इकारजातीयो दृश्यते यथा व्यधेः सति प्रसारणे यकारस्येकार इति । तस्मादनियमादपि न प्रकृतिविकारभाव इत्यर्थः ॥ ५४ ॥ § 1194

### अनियमे नियमान्नानियमः ॥ २ । २ । ५५ ॥ § 1195

अत्र छलवादी प्रत्यवतिष्ठते—अनियमे नियमादिति ॥ ५५ ॥ § 1196

### नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ २ । २ । ५६ ॥ § 1197

तदेतस्य वाक्छलत्वमापादयति—निय...धः । नियमानियमयोः सामानाधिकरण्यं विरुध्यते । न त्वाधाराधेयभाव इत्यर्थः ॥ ५६ ॥ § 1198

---

२२ ब्धः ] तीया विकारा उपलभ्यन्तेnvt-C

२४ धेः ] व्यथेःnvt-C

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः ॥ २ । २ । ५७ ॥ § 1199

तदेवं प्रकृतिविकारभावं निराकृत्य विकारवचनव्यक्तिं शब्दानामादेशपक्षे समर्थयति—न चेयं वर्णविकारोपपत्तिरिति । गुणा...राः । एकस्याप्रयोगे अन्यस्य प्रयोगो विकार इति सामान्यलक्षणम् । तस्य विशेषानाह—स भिद्यत इति । उपमर्दो नामेति, यथास्तेर्भूरिति । लेशः इति । स्त इत्यत्र अस्तेरकारलोपे सकारमात्रस्य लेशस्यैकदेशस्य व्यवस्थानम् । श्लेष आगमः प्रकृतेः प्रत्ययस्य वा । अत्रापि केवलस्याप्रयोगे शिष्टस्य प्रयोग इत्येतावता 426/tha विकारसामान्यलक्षणं योजनीयम् । एतेन वार्त्तिकमपि व्याख्यातमेवेति ॥ ५७ ॥ § 1200

॥ शब्दपरिणामप्रकरणम् ॥

## २.२.४ शब्दशक्तिपरीक्षाप्रकरणम्

ते विभक्त्यन्ताः पदम् ॥ २ । २ । ५८ ॥ § 1202

तदेवमुक्तेन प्रबन्धेन वर्णानामनित्यतां तत्प्रसङ्गेन चावर्णात्मकानामप्यनित्यतां प्रतिपाद्य शब्दप्रामाण्योपयोगि पदं निरूपयति—ते वि...म् ॥ § 1203

एवं किल केचित् पश्यन्ति, न वर्णाः प्रतिपादयन्त्यर्थान् । ते हि प्रत्येकं वा अर्थधियमादधीरन्, नागदन्तका इव शिक्यालम्बनम्; मिलिता वा ग्रावाण इव पिठरधारणम् । तत्र न तावत् पूर्वः कल्पः, प्रत्येकमर्थप्रत्ययानुत्पादात् वर्णान्तरोच्चारणानर्थक्याच्च । नापि संहताः, एकवक्तृप्रयोगे क्रमनियमेन संघातानुपपत्तेः । अनेकवक्तृप्रयोगेऽपि सत्यपि यौगपद्ये अर्थप्रत्ययानुत्पादात् । नापि क्रमवत्पूर्ववर्णानुभवभावितसंस्कारसहितोऽन्त्यवर्णप्रत्ययहेतुरिति साम्प्रतम्, भावनापरनाम्नः संस्कारस्य स्वोत्पादकानुभवविषयगोचरस्मृतिजननादन्यत्र सामर्थ्यादर्शनात् । न हि गजानुभवजनितः संस्कारः करोति स्मृतिं तुरङ्गमे । अपि चेयमन्त्यवर्णश्रुतिः स्वार्थसङ्केतस्मृत्यपेक्षा वार्थप्रत्ययमादधीत, अनपेक्षा वा ? तदपेक्षत्वे तत्काले अन्त्यवर्णश्रुतिरुपरता क्षणिकत्वेनेति कया सङ्केतस्मृतिरपेक्षते ? अन्त्यवर्णश्रुतिसमये च सङ्केतस्मृतिरनागतेति किमन्त्यवर्णप्रत्ययोऽपेक्षेत ? सङ्केतस्मृत्यनपेक्षत्वे 427/tha अगृहीतसङ्केतस्यापि प्रथमश्राविणोऽर्थप्रत्ययप्रसङ्गः । न हि चिरुध्वस्तस्यानपेक्षितस्मृतेः सङ्केतग्रहस्यास्ति कश्चिदुपयोग इति । न च भावनाख्यसंस्कारसहितोऽन्त्यवर्णः प्रत्यायकोऽर्थस्य नाप्यन्य एव कश्चित् पूर्ववर्णानुभवजनितः संस्कारः प्रोक्षणादिभिरिव व्रीह्यादेरन्त्यवर्णप्रत्ययसहकारीति

७ म्] व्यवस्थापनम्nvt-C
९ म्] लक्षणीयम्nvt-C
२ न्धेन] क्रमेणnvt-C
५ न्] अन्वयधिय°nvt-C
८ योगेऽपि] °कर्तृकप्र°nvt-C

युक्तम्, अनेकादृष्टकल्पनाप्रसङ्गात् । स एव तावददृष्टचरः कल्पनीयस्तस्य चानेकत्वमिति । सोऽयं वर्णेभ्योऽर्थप्रत्ययो भवन्ननुपपद्यमानः तदतिरिक्त-स्फोटानुभव आयतते । अस्ति हि भिन्नेष्वपि वर्णेषु वाक्यमेकमेकं पदमिति वा सर्वजनीनोऽनुभवः । न चासौ भिन्नवर्णालम्बनो भवितुमर्हति, एकस्य नानात्वविरोधात् । तस्माद् वर्णातिरिक्तमेकं पदं वाक्यं वा आलम्बते । तच्च प्रत्येकमेव ध्वनयोऽभिव्यञ्जयन्ति । केवलं पूर्वे ध्वनयः स्वरूपमाभासयन्ति चरमस्तु व्यक्तम् । न चेयमर्थे विधा संभविनी प्रत्यक्षज्ञाननियतत्वात् । व्यक्ताव्यक्तावभासितायाः पदे प्रत्यक्षे उपपत्तिः, अर्थस्य तु पदगम्यस्याप्र-त्यक्षस्य मानान्तरेण ग्रहणमस्ति । अग्रहणं वा न तु स्फुटास्फुटत्वाभ्यां योगः । अपि च यस्मिन्ननुवर्तमाने यद् व्यावर्तते तत् तस्माद् भिद्यते, यथा सुवर्णावयवेष्वनुवर्तमानेषु कटकमुकुटादयः । अनुवर्तमानेषु तु वर्णेषु व्यावर्तन्ते पदभेदा यथा नदीदीनजराराजेत्वादयः । तस्मात् तेऽपि वर्णेभ्यो भिन्ना इति । तान् प्रत्याह—ते विभक्त्यन्ताः पदम् इति । त एव वर्णा एव पदम्, न तु तदतिरिक्तं स्फोटाख्यमित्यर्थः । § 1204

इदमत्राकूतम् । न तावद् वर्णातिरिक्तः पदात्मा कश्चिदुपलभ्यते प्रत्य-क्षेण । पदमिति तु व्यपदेशः तानेव वर्णान् बहूनप्येकस्मृतिबुद्धिसमारोहितया वा एकार्थधीहेतुतया वा अभिन्नकारकावस्थावत्तया वालम्बते भाक्तः । न चैवमन्योन्यसंश्रयः । नर्ते पदावधारणादर्थाधिगमो न चार्थाधिगममन्तरेण
428/tha पदावधारणमिति । एकस्मृतिबुद्धिसमारोहिणां वर्णानामसत्यर्थवत्तयाव-बोधे सुज्ञानत्वात् । तन्मात्रस्य च स्वार्थेन सङ्केतग्रहणस्यापि सुकरत्वात्, तदुत्तरकालत्वाच्च पदमिति कारकशब्दप्रवृत्तेः । इतरथा सर्वेषु कारकश-ब्देषु दुर्वारमितरेतराश्रयत्वं कार्यसंबन्धोपहितमर्यादत्वात् कारकाणाम्, तद-नुपातित्वाच्च तच्छब्दानाम् । तस्माद् व्यपदेशमात्रानुरोधेन नैकैकवर्णमात्राव-भासिनीषु श्रोत्रजासु बुद्धिषु तदाहितवासनालब्धजन्मायां चानुभूतवर्णसंक-लनात्मिकायां स्मृतिबुद्धावप्यप्रथमानो वर्णविभागोपमर्देन न शक्यः पदात्मा प्रत्यक्ष इति वक्तुम् । नापि निर्भागस्य स्फुटास्फुटत्वे वा भागविपर्यासो वा युज्यते । नो खलु सर्वथादृश्यमानं नाम स्फुटम्, नापि समारोपविष-यः । न हि सामान्यात्मनाप्यगृहीता शुक्ती रजतसमारोपगोचरः । न च निर्भागे पदात्मनि गृहीते किञ्चिदस्यागृहीतमवशिष्यते यदग्रहणादव्यक्तत्वं वा समारोपो वा भवेत् । न च तदेव तदैव तेनैव गृहीतमगृहीतं च संभवति । तस्मात् न प्रत्यक्षस्य तदाभासस्य वा गोचरः पदात्मा, नाप्यनुमानस्य अर्थप्रत्ययलिङ्गजन्मनः, परस्पराश्रयप्रसङ्गात् । न तावत् सत्तामात्रेण पदात्मा

---

३ ते ] °भवमायततेnvt-C
३ मेकं ] वाक्यमिदमेकंnvt-C
६ न्ति ] स्वरूपमाभासयन्तेnvt-C
८ त्तिः ] अनुपपत्तेःnvt-J
१२ यः ] यथा...त्यादयः*Om*nvt-C
१९ मारोहिणां ]
°सत्यप्यथार्थवत्तया°nvt-J
२८ रः ] रजतत्वसमारोपविषयःnvt-C

अर्थप्रत्ययमाधत्ते मैष धात् नित्यत्वेन नित्यमेनम् । तस्मात् स्वज्ञानेन, तच्च स्वज्ञानसमर्थप्रत्ययात् । तथा च सत्यर्थप्रत्यये पदप्रत्ययः, पदप्रत्यये च सत्यर्थप्रत्यय इति व्यक्तमन्योन्याश्रयत्वम् । न चेयमर्थधीर्वर्णेभ्यो नोदेतुमर्हति । ते हि पूर्वमनुभूताः प्रत्येकमनुभूतताक्रमोपसृष्टा एकस्मृतिबुद्धिसमारोहिणः शक्नुवन्त्यर्थधियमाधातुम् । न चाक्रमानुक्रमविपरीतक्रमाणामविशेषो वर्णानां पूर्वानुभवसन्निवेशानुसारित्वात् स्मृतेः । तत्सन्निवेशस्य च विशेषाद्विशेषोपपत्तिः । अभेदेऽपि च वर्णानां नदी दीनेत्यादौ पदभेद उपपत्स्यते विनापि स्फोटकल्पनां क्रमभेदानुविधायित्वात् पदभेदस्य । अर्थप्रत्ययकारकत्वं च न वर्णमात्राणामपि तु क्रमन्यूनातिरेकाद्युपहितानाम् । तत्तदुपधानं च तुल्यत्वेऽपि वर्णानामन्यदन्यदिति पदभेदसिद्धिः । तस्माद् दृष्टेभ्य एव वर्णेभ्यो 429/tha
दृष्टप्रकारानुपातिभ्योऽर्थप्रत्ययोत्पत्तिरुपपद्यमाना नादृष्टं स्फोटात्मानं दृश्यमानवर्णभेदापह्नवेन कल्पयितुमर्हतीति सिद्धं § 1205

ते विभक्त्यन्ताः पदम् इति ।§ 1206

यथादर्शनं विकृता इति भाष्यम् । गुणान्तरापत्त्यादिभिरादेशरूपेण विकृतत्वम् । यथादर्शनं यथाप्रमाणम् । न तु प्रकृतिविकारभावेन, तस्य प्रमाणबाधितत्वादित्यर्थः । § 1207

वार्त्तिकम्—अर्थप्रत्ययस्तर्हि न प्राप्नोतीति, स्फोटवादिन उक्तोऽभिप्रायः । उत्तरम्—अन्त्यवर्णप्रत्ययादिति । वर्णेषु प्रत्ययो वर्णप्रत्ययः । अन्त्यश्चासौ वर्णप्रत्ययश्चेति अन्त्यवर्णप्रत्ययः सकलवर्णावगाहिनी स्मृतिः । सा च प्राचः प्रत्येकं वर्णानुभवानपेक्ष्यान्त्या भवति । यद्येवमगृहीतसङ्केतानामप्यसावस्तीति तेषामप्यर्थप्रत्ययप्रसङ्गः स्यादित्यत आह—पूर्ववर्णप्रतिसन्धानप्रत्ययापेक्षात् इति । सङ्केतग्रहणसमयः पूर्वः, तद्भाविनो वर्णाः पूर्वे । तेषां प्रतिसन्धानं यावतां यादृशानां यज्जातीयानां गृहीतः सङ्केतस्तादृशास्तावन्तस्तज्जातीया एवैते इत्येवमाकारम् । तदेव प्रत्ययस्तदपेक्षात् । न चासावगृहीतसङ्केतानामप्यस्तीति सन्नप्यन्त्यवर्णप्रत्ययो नार्थस्य प्रतिपादक इत्यर्थः । अभिधेयस्य क्रियान्तरयोगाद् विशिष्यमाणरूपः शब्दो नाम । अन्तरशब्दो विशेषवनः क्रियाविशेषयोगाद्धेतोरित्यर्थः । एतदुक्तं भवति, यस्याभिधेयं क्रियाविशेषसंबन्धेन विना न पर्यवस्यति तन्नाम । आख्यातार्थस्तु यद्यपि क्वचित् क्रिययापि संबध्यते, यथा अभिक्रामं जुहोति, भुक्त्वा व्रजति इत्यादिषु, तथापि जुहोति व्रजतीत्यादयो न क्रियासंबन्धमन्तरेण न पर्यवस्यन्ति, अपि तु तत्समभिव्याहृता अपि संबध्यन्ते । नामार्थस्तु न पूर्वापरीभूतस्वप्रधानक्रियापदार्थमन्तरेण पर्यवस्यति । अत एवाहुः— § 1208
430/tha

७ त्तिः ] °पत्तेःnvt-J
७ र्णानां ] न हि हिनेत्या°nvt-C द्र॰वि. प. पृः ३८
८ स्य ] कारकभेदाभिधायित्वात् पदस्यnvt-J
२५ क ] प्रत्यायकः nvt-C

यत्रान्यत् क्रियापदं न श्रूयते, तत्रास्तिर्भवन्तीपरः प्रयोक्तव्यः । तथा च ब्राह्मणेऽभिक्रामं भोक्तुं भूक्त्वेत्यादयश्च समुच्चयाद्यर्थाः क्रियाविशेषमन्तरेणापर्यवस्यन्तो नामत्वेन सिद्धा भवन्ति । अस्योदाहरणमाह—यथा ब्राह्मण इति । उदाहरणस्यार्थमाह—क्रियाकारकसमुदायः कारकसंख्याविशिष्टः । अत्र हि क्रियाशब्देन ब्राह्मणस्य भावो ब्राह्मणस्य भावो ब्राह्मणत्वमभिमतं भावशब्दस्य क्रियार्थत्वात् । भविता च ब्राह्मणः कारकम् । तयोर्ब्राह्मणत्वब्राह्मणयोः समुदायः । स च कारकस्य भवितुर्ब्राह्मणस्यैकत्वसंख्यया विशिष्टो ब्राह्मण इत्यस्मात् नामपदाद् गम्यत इत्यर्थः । आख्यातलक्षणमाह—क्रियाकालयोगाभिधायिक्रियाप्रधानमाख्यातम् । क्रियायाः कालयोगः पूर्वापरीभावः । कालयोगाद्धि संभवति तदभिधायि । तदनेन पाक इत्यादेर्नामपदाद् व्यवच्छिनत्ति । एवमपि भुक्त्वा भोक्तुमित्यादावपि नाम्नि प्रसङ्गः । अस्ति हि तत्रापि फलावधिपूर्वापरीभूतकर्मक्षणप्रचयप्रत्ययः । अन्यथा ओदनमिति कर्मसंबन्धो न स्यादत उक्तं क्रियाप्रधानमिति । स्वनिष्ठा ह्याख्याताात् क्रिया प्रतीयते नान्यतन्त्रा । भोक्तुमित्यादौ तु क्रियान्तरमन्तरेण उपर्यवस्यन्ती क्रिया गम्यते । व्रजतीत्यादौ तु न तथा । तदिदं क्रियाप्राधान्यम् । तदनेन पचति पचेत पच्यते स्थीयत इत्यादि सर्वमाख्यातं संगृहीतं भवति । न क्वचिदपि नाम्नि प्रसङ्गः । यदप्यस्त्यादि नामाख्यातप्रतिरूपकं, तत्रापि सन्नित्यस्यार्थे सिद्धरूपे तद् वर्तते । न पुनः पूर्वापरीभूतक्रियार्थत्वमिति द्रष्टव्यम् । § 1209

यस्मान्नाम्ना सर्वं पदं व्याप्यते इति । बाहुल्यं व्याप्त्यर्थः । प्रायेण हि वाक्ये बहूनि नामपदानि, आख्यातं पुनरेकमेवैकस्मिन् वाक्ये, आख्यातभेदे वाक्यभेदादिति । अधिकरणमाक्षिपति—न पदादर्थाधिगतिरिति । पदेन हि विशेषो वाभिधीयते सामान्यं वा ? तत्र विशेषाभिधानं तावद् दूषयति—विशेष इति । अनवस्थानमनवधारणमिति । सामान्याभिधानमास्थायाह—न
431/tha पदस्येति । दूषयति—न सामान्य स्येति । व्यवहाराय हि वाक्यमुच्चारयन्ति वृद्धाः, न तु व्यसनितया । न चास्ति सामान्यसाध्यः कश्चिद् व्यवहारः, किं तु सर्वो व्यवहारो विशेषसाध्यः । न चास्य पदं वाचकम्, तद् वाक्यमेव वाक्यार्थस्य वाचकमिति न पदार्थचिन्तावसर इत्याक्षेपः । समाधत्ते—न सामान्यविषयत्वे सतीति । न तावत् पदातिरिक्तमस्ति वाक्यं नामेत्युक्तमधस्तात् । न च वर्णमालैव पदार्थप्रतिपादनावान्तरव्यापारानपेक्षा वाक्यार्थबोधनीति युक्तम् । अनपेक्षितसंके तग्रहायास्तस्यास्तदवबोधने प्रथमश्राविणोऽप्यविदितसंकेतस्य वाक्यार्थबोधप्रसङ्गः । *संकेतग्रहापेक्षत्वे वाक्यार्थेन सहानन्त्यव्यभिचाराभ्यां वाक्यस्य संकेतग्रहासंभव इत्यकामेनापि पदानां स्वार्थे संकेतोऽभ्युपगन्तव्यः । तस्मात् पदानां सामान्यमर्थः । त-

१ व्यः ] द्र॰ महाभाष्ये २. ३. १. ४, २. ३. १. ११, २. ३. ४६. ४
२ र्थाः ] °द्यपेक्षाःnvt-C
३ सिद्धा ] संगृहीताnvt-C
१२ त्रापि ] कालावधि°nvt-C
१४ रेण ] न पर्यवस्यन्तीतिnvt-C
२७ इत्याक्षेपः ] °पार्थः nvt-C
३१ *] यतः सं° nvt-C

त्प्रतिपादनावान्तरव्यापाराणां च यथा वाक्यार्थप्रतिपादकत्वं तथास्माभिः तत्त्वबिन्दौ निपुणतरमुपपादितम् । सेयं पदात् सामान्यप्रतीतिः गौरिति वा अश्व इति वा सर्वगवीषु सर्वाश्वेषु चोपसर्पन्ती शुक्ल इति वा कृष्ण इति वा विशेषश्रुत्या नियम्यत इत्यर्थः । पृच्छति—कथं पुनरियमिति । तिष्ठति गच्छतीत्यादयोऽपि न पदत्वेन विशेषे वर्तितुमर्हन्ति संबन्धग्रहासंभवात् । तस्मादेतेऽपि सामान्यवचना इति भावः । उत्तरम्—नैवेयमिति । तदेवं पदस्य सामान्यवाचकत्वनिश्चयादाकृतिव्यक्त्योश्च पदात् प्रतीतेर्वादिनां विप्रतिपत्तेर्भवति संशयः किं त्रितयमर्थ आहो अन्यतम इति । एवं तावत् सामान्यावगमाद् वाचकत्वं विनिश्चित्य चिन्तान्तरावतारो दर्शितः । संप्रति द्वितयावगमात् पदस्य वाचकत्वशङ्कैव नास्ति । तस्माद् युक्तश्चिन्तान्तरावतार इत्याह—भवतु वेति । प्रतीतिसिद्धमनुजानाति—क्रिया च तत्साधनं चेति, भविता गौरित्यर्थः ॥ ५८ ॥ § 1210

व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥ २ । २ । ५९ ॥ § 1211

किमन्यतमः पदार्थ उत सर्वमिति भाष्यम् । तत्रान्यतमार्थमाह वार्त्तिककारः किं व्यक्तिरिति ॥ ५९ ॥ § 1212

432/tha

याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद् व्यक्तिः ॥ २ । २ । ६० ॥ § 1213

अत्र याशब्दादिप्रयोगसामर्थ्याद् व्यक्तिरेव पदार्थ इत्येके मन्यन्ते । स्यादेतत्, व्यक्तिवदाकृतिरपि भिद्यत इत्याकृतेरप्यभिधायकं कस्मान्न भवतीत्यत आह—आकृतेरपीति । § 1214

गोत्वं च जातिरुपाधिर्भविष्यति । तेन नातिप्रसङ्गः । न चोपाधेरभिधानम् । अनभिहितस्यापि तच्छब्देनोपहितावच्छेदकत्वदर्शनात् । यथा गार्गिकया श्लाघत इत्यत्र श्लाघोपाधिविहितो वुञ् न श्लाघामाहेति भावः ॥ ६० ॥ § 1215

न तदनवस्थानात् ॥ २ । २ । ६१ ॥ § 1216

तमिमं व्यक्त्यभिधाननियमवादिनमपाकरोति—नानेनेति ॥ ६१ ॥ § 1217

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥ २ । २ । ६२ ॥ § 1218

---

९ विनिश्चित्य ] चिन्तावतारः nvt-J
१० तार ] °श्चिन्तावतार nvt-J

नाप्रतीत उपाधिरुपहितावच्छेदाय प्रभवति । न च गार्गिकयेत्यत्रोपाधिर्बुञाभिहितोऽपि न प्रतीयते श्लाघत इति पदान्तरेण तस्याभिधानात् । यत्र तु श्लाघत इति न प्रयुज्यते न तत्र बुञो भावाभिधायिनः साधुत्वमस्ति । सेयं व्यधिकरणेऽनुपाधौ गतिः । समानाधिकरणे तु पश्चादावुपाधौ प्रत्ययान्तरशब्दवाच्यत्वमेव, यथा दृतिहरिः श्वेति । अत्र हि दृतिहरिरित्येतावतैव
433/tha पशौ लब्धे तद्विशेषनियमाय श्वेति प्रयुज्यते । न च प्रयोगादेवोपाधेर्गम्यमानत्वादनभिधानमिति साम्प्रतम् । तदुपाध्यनभिधायिनस्तत्र प्रयोगे नियमस्य पर्यनुयोज्यत्वात् । अननुयोज्यत्वे तु अनादेर्लोकप्रयोगनियमस्य सर्वेषामेव शब्दानामनभिधायकत्वप्रसङ्गः । प्रयोगनियमादेव हि तेभ्योऽर्थो गंस्यते । अथाप्रतिपादकस्य प्रयोगनियमो नोपपद्यत इति यत्र प्रयोगनियमः तत्प्रतिपादकत्वमित्यभ्युपेयते, तदुपाधावपि समानम् तथा च स्मरति भगवान् कात्यायनः— तदन्तवाच्यः समानशब्दोऽयम् § 1219

इति । समानशब्दः समानाधिकरणशब्दः, य उपाधिरसौ प्रत्ययान्तशब्दवाच्य इत्यर्थः । तस्माद् व्यक्तिनियमे अप्रतीता जातिरशक्ता । न च गोशब्दादन्यदस्याः प्रत्यायकमस्तीति, सापि तेन प्रत्यायनीयेति सिद्धं न व्यक्तिमात्रं पदार्थ इति । सह …रः । § 1220

कटार्थेषु वीरणेषु व्युह्यमानेषु इति भाष्यम् । कटं करोतीति निर्वर्त्यस्य कटस्य कर्मत्वमनुपपन्नं कारकाधिकारिकत्वात् कर्मसंज्ञायाः, क्रियानिमित्तस्य च कारकत्वात्, असिद्धस्य च क्रियायाः पूर्वं निमित्तभावायोगात् । तस्मात् तादर्थ्यनिमित्तादेष कटशब्दः कटार्थेषु वीरणेषु व्युह्यमानेषु वर्तते । वीरणानां च रच्यमानानामस्ति कटक्रियापूर्वभावित्वेन निमित्तभाव इति ॥ ६२ ॥ § 1221

## आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥ २ । २ । ६३ ॥ § 1222

यदि न जात्या विना व्यक्तिनियम इति जातिरभिधेया, हन्त भोः साप्याकृत्या *नियम्यत इत्याकृतिरेवाभिधीयतामित्याह—यदि तर्हीति । आकृ…द्धेः । § 1223

एतदपि दूषयति—अत्रापि तदेवोपस्थितं न तदनवस्थानादिति । संस्थानेनापि व्यज्यमाना जातिरेकार्थसमवायाद् व्यज्यते च व्यवस्थाप्यते च । सा तु व्यक्तिसंस्थानाभ्यां व्यावर्तमानाभ्यामनुवर्तमाना ताभ्यां भिन्नभिन्न-
434/tha बुद्ध्याध्यववसीयते, तादृशी च व्यक्तिसंस्थानाभिधानानपेक्षेणापि पदेन शक्या बोधयितुम् । संस्थानं तु व्यक्तिवद् भिन्नम् आनन्त्यव्यभिचाराभ्यामशक्य-

२ र्बुञाभिहितोऽपि ] °र्ब्युञानभि°nvt-J
४ णेऽनुपाधौ ] °णे उपाधौ ?
८ स्य ] प्रयोगस्यnvt-C
९ ते ] तेभ्योऽप्यर्थोऽवगम्यतेnvt-C
१४ तीता ] °नियमा या अप्र°nvt-J
१८ त्वात् ] °कारीयत्वात्nvt-C
२० ते ] रच्यमानेषु प्रयुक्तःnvt-J
२६ * ] नियन्तव्येत्या°nvt-C
३१ ते ] मानाऽभिन्नबुद्ध्याऽव°nvt-C

संकेतग्रहणं जात्यभिधानानपेक्ष्यमशक्यं पदेन बोधयितुमिति न संस्थानापरनामा आकृतिः पदार्थ इत्यर्थः । नापि जातिद्वारेण व्यक्तिवदाकृतिः पदार्थो जात्या सहासंबन्धादित्याह—यस्य च जात्या योग इति ॥ ६३ ॥ § 1224

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ॥ २ । २ । ६४ ॥ § 1225

अस्तु तर्हि जातिरेव पदार्थः । तत्र हि सुकरः संगतिग्रहो व्यभिचाराभावात्, व्यक्त्याकृत्योस्तु व्यभिचारः । जात्यभिधायिनश्च व्यक्तावाकृतौ चौपचारिकः प्रयोगो भविष्यतीत्यभिप्रायेणाह—अस्तु तर्हीति । शेषमस्यातिरोहितार्थम् । व्यक्त्या …तिः । § 1226

एकमनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः । उभयेन व्याघातादिति । यद्येकमनेकत्र वर्तमानं प्रतिव्यक्ति सर्वात्मना वर्तते, नैकमनेकत्र वर्तत इति किन्तु अनेकमनेकत्रेत्यापन्नम् । एवं चानुयोगाधिकरणव्याघातः । अथैकमनेकत्र वर्तमानं प्रतिव्यक्त्येकदेशेन वर्तते, तथापि नैकमनेकत्र वर्तते किं त्वनेकमनेकत्रेति एकदेशानामनेकत्वादिति । सोऽयमुभयेन व्याघात उक्तोऽवयविवादे ॥ ६४ ॥ § 1227

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ २ । २ । ६५ ॥ § 1228

व्यक्त्याकृतिजातयस्तु पदार्थः ॥ २ । २ । ६६ ॥ § 1229
435/tha

तदेवमन्यतमाभिधानानियमं निराकृत्यानियमाभिधानं सिद्धान्तमाह—व्यक्त्या …र्थः । § 1230

इदमत्राकूतम् । गोशब्दोच्चारणानन्तरं विदिनसंगतेरेकपदे व्यक्त्याकृतिजातिनिर्भासः प्रत्यय उदयमासादयति । न तु यथा गङ्गायां घोषः प्रतिवसति इत्यत्र गौर्वाहीक इत्यत्र वा वाक्ये गङ्गात्वगोत्वापगमोत्तरकालं वाक्यार्थे तत्संबन्धानुपपत्तेस्तदविनाभावेन वा लक्ष्यमाणगुणयोगेन वा तीरं वा वाहीको वावगम्यते, तथेहावगतिः । प्रयोगप्राचुर्यादत्यन्ताभ्यासेनातिशीघ्रतया सन्नपि प्रत्ययक्रमो न लक्ष्यते शीघ्रतरबाणहेतुकशतपत्रशतव्यतिभेदवदिति चेत्—न, असति बाधके बलीयसि प्रत्ययाभेदप्रथायामन्यथाकरणायोगात् । तथा च सति न क्वचिदप्यभेदो व्यवतिष्ठेत । तथा च भेदोऽपि न स्याद् अभेदाश्रयत्वाद् भेदस्य । अपि च रूपिशून्या रूपावगतिः रूपं च द्रव्यस्य जातिः । तेन रूप्यमाणत्वाद् रूपि द्रव्यम्, न च येन यद्रूप्यते तदनवगमे तस्यावगमः, यथा नार्थमन्तरेण बुद्धेरुपलम्भनम् । तस्मात् जात्युपलम्भो द्रव्योपलम्भैकदेशो न द्रव्योपलम्भमन्तरेण केवलः संभवति

१ क्यं] °धानमनपेक्ष्य न शक्यम् nvt-C
६ हो] संकेतग्रहः nvt-C
१२ म्] सर्वात्मना वर्तते इति किन्तु अनेकमनेकत्र वर्तत इति प्राप्तम् nvt-C

। तस्मादेकोपलम्भगोचरत्वान्न जातिजातिमतोर्लक्ष्यलक्षणभावः । स चोपलम्भः शब्दज्ञानानन्तरं जायमानः शाब्दः । न च वाच्यम् एकोपलम्भगोचरत्वेऽपि जातिव्यक्त्योर्जातिरेव वाच्या न व्यक्तिः, एकवाच्यत्वेऽप्युभयोपलम्भोपपत्तावुभयवाच्यत्वकल्पनानुपपत्तेरिति । कार्यव्यङ्ग्यं हि कारकाणां सामर्थ्यं कार्य एव नाकार्ये । कार्यं चानुभवः । स चैक एवेति न सामर्थ्यभेदकल्पना । तद्द्वारेण तु कर्मण्यप्युच्यते पदमर्थे समर्थमिति । कार्यं च द्वारमेकमिति विषयभेदेऽपि सामर्थ्यमेकमेव । अपि च पुरुषसंकेताधीनवृत्तीनां पदानां न किञ्चिदन्यत् सामर्थ्यं नाम प्रमाणगोचरः यदेकमनेकं वा स्यात् । एतेन निरूढलक्षणायां शब्दस्य जात्यभिधानोपक्षीणस्य न व्यक्तौ सामर्थ्यं कल्पनीयम् । अन्यत्राव्यापृतस्य तत्रार्थस्यैव सामर्थ्यमिति यदाहुः, तदपि परास्तम्
436/tha । स खल्वर्थः प्रतीतो वा व्यक्तिं गमयेद् अप्रतीतो वा ? अप्रतीतस्य गमकत्वे सदैव व्यक्त्यवगतिप्रसङ्गः, कारणस्य नित्यत्वात् । प्रतीतस्य तु गमकत्वे दुरुत्तरमात्माश्रयत्वम् । न हि जातिप्रत्ययादन्यो व्यक्तिप्रत्यय इत्युक्तम् । तस्मात् साधु पारमर्षं **सूत्रं व्यक्त्याकृतिजातयस्तु पदार्थ** इति । § 1231

संप्रति अन्यापोहपदार्थवादिनमुत्थापयति—**न व्यक्त्याकृतिजातयः पदार्थ इति केचिदिति । अथ द्रव्यादिवृत्तित्वाद्** इति । गवाश्वस्य तु नाश्रयाश्रयिभाव इति भावः । **जातिमन्मात्राभिधायकोऽपि सच्छब्दो न भवति । कस्मात् ? अस्वतन्त्रत्वादिति ।** जातिमन्तो घटादयः, न चैते घटादिशब्दादिव निरपेक्षात् सच्छब्दात् प्रतीयन्ते, किन्तु सच्छब्दाद् घटादिषु बुद्धिः परिप्लवते । घटादिशब्दापेक्षस्तु सच्छब्दो घटादिनिश्चयहेतुः । तस्माद् घटादिशब्दपरतन्त्रत्वान्न तद्वतो वाचक इत्यर्थः । § 1232

**अथ वेति ।** यद् यत्र परतन्त्रं प्रवर्तते तत् तस्य न वाचकम्, यथा गङ्गागवादिशब्दास्तीरबाहीकादेः । तथा च जातिशब्दा जातिमति । तस्मान्न जातिमद्वाचकाः । ते हि जातिमपेक्ष्य जातिमति वर्तन्ते इतीदृशं वा अस्वातन्त्र्यमित्यर्थः । अथ जात्यनपेक्षः कस्मान्न तद्वति प्रवर्तते इत्यत आह—**उक्तं चात्रेति ।** अस्तु तर्हि औपचारिक एव तद्वति प्रत्यय इत्यत आह—**तद्वति चेति ।** यथा आधिपत्यलक्षणो गुणः स्वामिनो जितकाशिनि भृत्येऽप्यस्तीति तत्र स्वामिशब्दः प्रवर्तते, न तथा जातिगुणयोगो व्यक्तेरित्यर्थः । अपि चान्यशब्दोऽन्यत्र प्रवर्तमानः प्रथमं तावदन्यधियमुत्पादयति, अथान्यत्र प्रवर्तते यथा गोशब्दो गवि बुद्धिमुत्पाद्य वाहीके प्रवर्तते । न चेह जातिशब्दस्य जातौ तद्वति च क्रमेण प्रवृत्तिः । न चौपचारिकस्य वृत्तियौगपद्यमित्याह—**क्रमवृत्त्यभावाद् युगपदसंभवाच्च ।** गुणोपरागं दूषयति—**अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च ।** गुणोपरागाद् यथा नीलः स्फटिक इति ज्ञानमयथार्थमेवं सर्वमेव शब्दज्ञानं विना बाधकमयथार्थमेव स्यादित्यर्थः

७ वृत्तीनां ] °संकेतापेक्षवृत्तीनांnvt-C
२५ र्थः ] तादृशं पारतन्त्र्य°nvt-C
३१ वृत्तिः ] जातिशब्दो जातौ तद्वातिक्रमेण प्रवृत्तःnvt-C

। एकस्वलक्षणाभिधानं दूषयति—असाधारणेति । अशक्यसमयत्वाच्चेत्यपि द्रष्टव्यम् । § 1233

तदेवम् अन्यापोहवादिनमुत्थाप्य दूषयति—अत्रास्माभिरिति । व्यक्त्या 437/tha कृतिजातयस्तिस्रोऽस्माकं पदार्थः । गुणप्रधानभावस्तु क्वचिदेव कस्यचित् । जातिमद्व्यक्त्यभिधाने द्विविधमप्यस्वातन्त्र्यं न संभवति शब्दानाम् । न तावद् व्यक्तिज्ञाने जनयितव्ये तदर्थं जातिज्ञानं पूर्वमपेक्षते शब्द इति संभवति द्वयोरप्येरविज्ञानवेद्यत्वनियमेन पौर्वापर्यायोगात् । नापि विशेषवाचकं पदं विना जातिशब्दानां बुद्धिपरिप्लवात् तद्विनिश्चयाय विशेषशब्दापेक्षया अस्वातन्त्र्यम्, स्वविषये जातिशब्दाद् बुद्धेरपरिप्लवात् । जातिमद्व्यक्तिमात्रमस्य हि विषयो न चात्र बुद्धिपरिप्लवः । व्यक्तिनियमस्तु न विषय इति न तत्र बुद्धिपरिप्लवो दुष्यति । दूराद्धि आरोहपरिणाहवद्द्रव्यमात्रं गोचरः प्रत्यक्षस्य । न तु स्थाणुः पुरुषो वा । न चात्र बुद्धिपरिप्लुतिः प्रत्यक्षक्षतिं कांचनावहति । न चास्मिन् पक्षे जातिशब्दो व्यक्त्याकृत्योः परशब्दो येनौपचारिकः स्यात् । न च सामानाधिकरण्यं न कल्पते, जातिव्यक्तिशब्दयोरेकार्थाभिधायिनोर्वैयधिकरण्यायोगात् । तस्मात् सर्वमवदातम् । § 1234

एवम् अनेकान्तवादे परोक्तदोषाप्रसङ्गमभिधाय दूषणवाक्यं परोक्तं दूषयन् दोषाभावमाह—न चैते दोषा इति । सत्ताशब्द इति । सत्तायाः शब्द इति वा विग्रहः, सत्तारूपः शब्द इति वा ? तत्र पूर्वस्मिन् कल्पे सत्ताया न वाचकः सत्ताशब्द इति व्याघातः । उत्तरस्मिन्नपि कल्पे न वाचकः सत्ताया इत्यनेन व्याघातः, सत्ताया इत्यनेन शब्देन सत्तामभिधत्से अथ च तस्य वाचको न सत्ताशब्द इति ब्रूषे, ततो व्याघातः । सत्ताशब्द इति चोपलक्षणार्थं सत्ताया न वाचक इति द्रष्टव्यम् । शङ्कते— भवदभिप्रायेणेति । निराकरोति—नेति । यद्यस्मदभिप्रायार्थं प्रतिपद्यसे, अर्थप्रतीत्यधीनोऽभ्युपगम इति अभ्युपगमं ब्रूषे, तथा च न निषेद्धुमर्हसीति भावः । § 1235

अथ निषेद्धुं प्रत्येमि, न पुनरभ्युपैमीत्याशङ्कामाह—यच्चेदमिति । दूषयति— तदपि नेति । अतथाभूतस्य अपुरुषभूतस्य स्थाणोः तथाभाविभिः पुरुषैः सामान्ये सति अध्यारोपिततद्धर्मणोऽध्यारोपितः पुरुषत्वादिधर्मो यस्य स तथोक्तः । तस्य प्रधानार्थः पुरुषः । तदाकारा प्रतीतिरित्यर्थः । सत्तायाः प्रधानसाधनवाचिनेति । सत्ताया भावस्य प्रधानं साधनं व्यञ्जकतया भवितृ 438/tha द्रव्यम् तद्वाची खलु सच्छब्दः । सत्ताशब्दस्तु द्रव्योपसर्जनभाववाची । न तस्य द्रव्यवाचिना सामानाधिकरण्यमित्यर्थः । सामानाधिकरण्यस्यासिद्धिः सद्द्रव्यशब्दयोरिति । सिद्धिः प्रतीतिः । सा भवन्मते न स्यादिति यदुक्तं कैश्चित् तदपि अनेन सामानाधिकरण्यव्यवस्थापनेन प्रत्युक्तम् । § 1236

व्याख्यातः निराकार्यत्वेन । स्वयम्प्रक्लृप्तां वाचोयुक्तिमिति । जातिशब्द इति सदादिशब्देषु स्वयम्प्रक्लृप्ता या वचनव्यक्तिः तां प्रतिषेधति । तत्र

६ ब्द ] °क्षन्ते शब्दाःnvt-C
८ ब्दानां ] शब्दात्nvt-J
२७ णो ] सति अध्यारोपितःnvt-C

चास्माकं सिद्धसाधनमित्यर्थः । सच्छब्दो जातिशब्दः, तस्य च भेदवाचकत्वं अस्य संमतमिति मन्वानो देशयति—यदि तर्हीति । सुगमः परिहारः । तथापि नान्वयी न व्यतिरेकी चेति । ये ये अनन्ता न ते जातिशब्दवाच्या इति न दृष्टान्तः, सर्वभेदपक्षीकरणात् । नापि यो जातिशब्दवाच्यो न तत्रानन्त्यम्, यथा गोत्वादिकमिति शक्यं वक्तुं जातेरेव भवन्मते व्योमारविन्दायमानत्वादिति भावः । शङ्कते—अथापीति । तथा सत्यन्वयी दृष्टान्तो लभ्यत इति भावः । निराकरोति—अयमपि नेति । विशेषणोपादानविरोधात् । न हि भेदमन्तरेण किञ्चिदस्ति वस्तुसद् यतो विशेषणं व्यावर्तयेदिति भावः । § 1237

हेतुभावानभ्युपगमादिति । न हि शब्दोऽर्थप्रत्यायने लिङ्गं येन व्यभिचारेण दुष्येत् । न च प्रत्यायकमात्रं व्यभिचारेण दुष्यति चक्षुरादीनामपि नीलादिव्यभिचारेण पीतादौ वर्तमानतया व्यभिचारिणामप्रत्यायकत्वप्रसङ्गात् । संकेतग्रहस्तु सत्यपि भेदानां व्यभिचारे एकैकजातिक्रोडीकृततया सुकर एवेति भावः । भेदवाचकत्वप्रतिषेधादिति । भेदवाचकत्वे निषिद्धे द्रव्यवाचकत्वं निषिद्धं भवति द्रव्यस्य भेदत्वात् । ततश्च सच्छब्दो द्रव्यशब्द इति व्याघात इत्यर्थः । § 1238

उक्तोत्तरमेतत् सच्छब्दद्रव्यशब्दयोरेकविषयत्वदिति । विशेषमात्रं विषयः सदादिशब्दस्य न पुनर्नियतोऽयमेव नान्य इति विशेषशब्देन चासौ समानाधिकरणेन नियम्यते, न तु प्राप्यते इति भावः । सत्ताशब्देन द्र-
439/tha व्यगुणकर्माणि नाक्षिप्यन्ते । सामानाधिकरण्ययोग्यतयेत्यर्थः, तदन्तरेण तदनुपपत्तेः । आक्षेपमात्रं तु शक्यं वक्तुमित्याह—शक्यं वक्तुमिति । पृष्ट्वा सच्छब्दस्य गुणप्रधानभावेन त्रयोऽर्था इति सूत्रकारन्यायेनावधारयति—सदिति चायमिति । अर्थकृत इति । अर्थः कार्यं तत्कृतः । एतदुक्तं भवति, यस्य कार्येण संबन्धस्तत्प्रधानम् । यस्य तु कार्यसंबन्धावच्छेदकत्वं तदङ्गमिति । एतेनेति । अर्थत्रयाभिधानेन । § 1239

न हि स्वामिप्रत्ययो भृत्ये भवति, अपि तु तदर्थक्रियाकारितया स्वामिव्यपदेशमात्रमित्यर्थः । नात्र क्रमो न युगपत्प्रत्यय इति, भेदाधिष्ठाने क्रमयौगपद्ये नैकस्मिन् सत्ताविशिष्टद्रव्यप्रत्यये संभवत इति । एतेनेति सच्छब्दस्य सत्ताविशिष्टद्रव्यवाचित्वाभिधानेन अयथार्थज्ञानोत्पत्तिप्रसङ्गादिति प्रत्युक्तम् । परमार्थस्वच्छधवले हि स्फटिके नीलीद्रव्योपधानात् नीलप्रत्ययो भवतु भ्रान्तः तस्य परमार्थतो नीलगुणासमवायात् । सत्तासमवायस्तु द्रव्यादीनां पारमार्थिक इति न द्रव्यादिषु सदिति प्रत्ययस्य मिथ्यात्वमित्यर्थः । § 1240

न हि कश्चिच्छब्द इति । स्वलक्षणानामशक्यसमयतया न कश्चिदपि शब्दो भवतो वाचकोऽभ्युपेयत इत्यर्थः । न च जातिशब्दस्येति जातेर-

२ त्वं ] नास्यnvt-C
१२ पीतादौ ] नीलाभावे सितादौnvt-J
१९ इति ] विशेष...प्राप्यत इति नास्तिnvt-C
३५ तो ] तद्वाचकत्वेना°nvt-C

भावादिति भावः । न जातिशब्दो भेदानां वाचक इति । कस्य तर्हीति पूर्वं भेदान् प्रधानीकृत्योक्तं संप्रति तु जातिशब्दानित्येतावता अपौनरुक्त्यम् । § 1241

नास्ति विवाद इति । अन्यापोहजात्योर्लक्षणाभेदे नाम्नि विवाद इत्यर्थः । § 1242

द्रव्यसच्छब्दयोश्च सामानाधिकरण्यम्, न च भेदवाचकाः शब्दा इति व्याहतमिति । द्रव्यमिति हि विधिरूपम् । एवं सदित्यपि विधिरूपं तच्छब्दौ तयोर्वाचकौ तयोरन्यापोहार्थत्वं व्याहतम् । विधिशब्दौ चान्यापोहार्थाविति च न संभवति । न च भेदानभिधायिनोः सामानाधिकरण्यमपि युज्यते । भिन्नाभ्यां हि निमित्ताभ्यामेकस्मिन्नर्थे, भेदरूपे वर्तमानौ समानाधिकरणौ स्यातां भेदं चेन्नाभिवदतो न तत्र प्रवर्तेयाताम् । अप्रवर्तमानौ च भिन्नप्रवृत्तिनिमित्तमात्रपर्यवसितौ गौरश्च इति वत् न समानाधिकरणौ भवितुमर्हतः 440/tha
। सोऽयमपरो व्याघातः, भेदानभिधानं च सामानाधिकरण्यं चेति । तदनेन व्याघातद्वयमुक्तम् । तदेतद् व्याघातद्वयं निराचिकीर्षुराशङ्कते—उपचारतो न व्याघात इति चेत् । तदेतद् विभजते— द्रव्यसच्छब्दाविति । तदनेन प्रथमो व्याघातः परिहृतः । द्वितीयं व्याघातं शङ्कित्वा परिहरति—तावेताविति । ब्रूतः प्रतिपादयतोऽध्यवस्यत इति यावत् । § 1243

एतदत्राकूतम् । *विकल्पयोनयो हि शब्दास्तदेवाभिनिविशन्ते यद्विकल्पानां गोचरः, कार्यकारणयोः सामानादिकरण्येन संप्रतिपत्तेः । चतुष्टयी चेयं विकल्पानां सदसद्धर्मिसद्धर्मावगाहिनां जातिः गौरीश्वरो नीलं नित्यमित्येवमादीनां न च विकल्पानां गोचरः, यो विकल्प्यते देशकालावस्थाभेदेष्वेकत्वेनानुसन्धीयते तदेवेदमिति । स एव च शब्दगोचरः, तत्र शब्दानां शक्यसंकेतत्वात् । न च स्वलक्षणानि त्रैलोक्यविलक्षणान्येवमिति तानि न विकल्पविषयः । न च सामान्यं नाम किञ्चिदस्ति यद्विषयः स्यात् । अत एव न तद्वन्ति स्वलक्षणान्यपि तेषां सामान्यानामभावे तद्वत्तायाः स्वलक्षणेष्वभावात् । अपि चास्तु सामान्यं वस्तुसत् । तथापि नित्यत्वादनुपकार्यतया स्वलक्षणाधारत्वानुपपत्तिः । आधारत्वमपि हि करणत्वमेव । पतनधर्माणो हि बदरादयः कुण्डादिभिरपतनधर्माणः क्रियन्ते । न च नित्यं क्रियत इति नाधेयम् । तथा च वृक्षत्वशिंशपात्वे स्वतन्त्रे एव सामान्ये स्वशब्दाभ्यामवगमिते न गौरश्व इतिवत् सामानाधिकरण्यं भजेताम् । अपि च भवतु नित्यस्याप्युपकार्यत्वेनाधेयत्वम्, तथाप्येतद् विकल्पनीयम्—किं येनैव स्वभावेन तत्स्वलक्षणं वृक्षत्वमुपकरोति तेनैव शिंशपात्वमपि, अथ स्वभावान्तरेण ? *यदि स्वभावान्तरेण, *स्वभावभेदेन स्वभाविभेदादन्यत् स्वलक्षणं शिंशपात्वाधारोऽन्यच्च

४ नाम्नि ] नास्तिnvt-C
११ णौ ] भवेतां भेदं चेन्नाभिधत्तो नैकत्र वर्ते°nvt-C
१८ *] तुल° विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः । कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यमी ॥
२१ मादीनां ] स चnvt-J
३२ *] अथ हिnvt-C
३३ *] स्वभावभेदादन्यत्nvt-C

वृक्षत्वाधार इति पुनरपि गौरश्व इतिवत् सामानाधिकरण्याभाव एव । अथैकेन स्वभावेन स्वलक्षणं सर्वसामान्योपकारि, तथापि स्वभावाभेदेनोप-
441/tha काराभेदे तदुपकारा धीनस्वभावानां सामान्यानां मध्ये एकसामान्यवतः स्वलक्षणस्य एकेन शब्देन विकल्पेन वा ग्रहणे सर्वेषां तदेकोपकारनिबद्ध-स्वभावानां सामान्यानां ग्रहणात् सद्द्रव्यपार्थिववृक्षशिंशपाविकल्पानां शब्दानां च पर्यायत्वप्रसङ्गः । यथाह

एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे ।
दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रहः ॥§ 1246

इति । § 1247

तस्मान्न सामान्यवद्भेदगोचरा विकल्पाः । स्वलक्षणभेदगोचरत्वनिषेधेन ज्ञानतद्ग्राह्याकारगोचरत्वमप्यपास्तम् । स्वाकारमबाह्यं बाह्यमध्यवस्यन् विकल्पः स्वाकारबाह्यत्वविषय इति चेत् ? यथाह— § 1248

स्वप्रतिभासेऽनर्थेऽध्वसायेन प्रवृत्तिरिति ।§ 1249

अथ कोऽयमध्वसायः ? किं ग्रहणम्, आहोस्वित् करणम्, उत योजना, अथ समारोपः ? तत्र स्वाभासमनर्थमर्थं कथं गृह्णीयात्, कुर्याद् वा विकल्पः ? न हि पीतं नीलं शक्यं ग्रहीतुं कर्तुं वा शिल्पकुशलेनापि नाप्यगृहीतेन स्वलक्षणेन स्वाकारं योजयितुमर्हति विकल्पः । न च स्वलक्षणं विकल्पग्रहगोचर इति चोपपादितम् । नापि स्वाकारमनर्थमर्थ आरोपयति । न तावदगृहीतः स्वाकारः शक्य आरोपयितुमिति तद्ग्रहणमेषितव्यम् । *तत्र किं गृहीत्वा आरोपयति अथ यदेव स्वाकारं गृह्णाति, तदेवारोपयति ? न तावत् पूर्वः पक्षः, न हि विकल्पविज्ञानं क्षणिकं क्रमवन्तौ ग्रहणसमारोपौ कर्तुमर्हति । उत्तरस्मिंस्तु कल्पे विकल्पस्वसंवेदनप्रत्यक्षाद् विकल्पाकारादहङ्कारास्पदादनहङ्कारास्पदं समारोप्यमाणो विकल्पो नास्वगोचरो न शक्योऽभिन्नः प्रतिपत्तुम् । नापि बाह्यस्वलक्षणैकत्वेन शक्यः प्रतिपत्तुं विकल्पविज्ञानेन स्वलक्षणस्य बाह्यस्याप्रतिभासनात् । तस्मादेष विकल्पविषयो न ज्ञानं न ज्ञानाकारो नापि बाह्य इत्यलीक एवास्थेयः । यथाह भद-
442/tha न्तधर्मोत्तरः बुद्ध्या कल्पेकया विविक्तमपरैर्यद्रूपमुल्लिख्यते बुद्धिर्नो न बहिः
§ 1250

इति, तथापि विकल्पज्ञानाद् बाह्याभिमुखी प्रवृत्तिस्तदर्थिनां न स्यात् । तस्मादलीकबाह्यत्वमेषां विषयः । बाह्यभेदाग्रहश्चास्य बाह्यत्वं न पुन-

२ थापि ] °भेदे तदुप°**nvt-C**
१६ लेनापि ] शिल्पिशतेनापि**nvt-C**
१८ नापि ] न च**nvt-C**
२० * ] तत् किं**nvt-C**
२० अथ ] तदैव गृह्णाति**nvt-C**
२३ माणो ] विकल्पो न स्वगोचरो**nvt-J**
२७ हिः ] तदेव च पदं निःसत्त्वमाभासते । --- यस्तत्त्वं जगतो जगाद विजयी निःशेषदोषद्विषो वक्तारं तमिह प्रणम्य शिरसापोहः स विस्तार्यते ॥ इति श्लोकशेषांशः । द्रः तात्पर्यविवरणपञ्जिका, पृः ४१ ।
२९ थापि ] विज्ञानाद्**nvt-C**
२९ र्थिनां ] °स्तद्व्रतां**nvt-C**

र्बाह्याभेदग्रहः । विकल्पगोचरे बाह्ये तदभेदग्रहस्याशक्यत्वात् । तस्मात् निर्विकल्पकपृष्ठभाविनो विकल्पाः तदुपनीतबाह्यस्वलक्षणभेदं स्वग्राह्यालीकस्यागृह्णन्तः तदभिमुखं प्रवर्तयन्ति व्यवहर्तॄनर्थिनः । पारम्पर्येण तत्संबन्धात् प्राप्तेर्न विसंवादयन्ति लोकम् । तेषां च विकल्पविषयाणां न तैरेव विकल्पैः परस्परतो भेदो गृह्यते, नापि विकल्पान्तरैरिति भेदाग्रहादभेदमभिमन्यते पुरुषः । तदभेदाच्चावमर्षाणामभेदः, तदभेदाच्च तद्धेतूनामविकल्पधियामप्यभेदः । तदभेदाच्च स्वलक्षणानामप्यविकल्पधीविषयाणामप्यभेदः । यथाह—
§ 1251

एकप्रत्यवमर्षस्य हेतुत्वाद् धीरभेदिनी ।
एकीधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥§ 1253

इति । तत् सिद्धमलीकं बाह्यं विषयो विकल्पानां शब्दानां चेति । तच्चेदमन्यव्यावृत्तिरूपं भावाभावसाधारण्याद् अत्यन्तविलक्षणानां सालक्षण्यापादनाच्च तादृूप्यानुभवाच्च । तथा हि—यद् भावाभावसाधारणं तदन्यव्यावृत्तिरूपयेव, यथा अमूर्तत्वम् । तत् खलु विज्ञाने च शशविषाणे च साधारणम् । तथा च विवादाध्यासिता विकल्पविषया घटपटादय इति स्वभावहेतुः । गौरस्ति गौर्नास्तीति हि भावाभावसाधारणो गवादिर्विकल्पविषयो विधिरूपस्वलक्षणवद्भावासाधारण्ये नास्तीत्यनेन न संबध्येत विरोधात् । अस्तीत्यनेनापि न संबध्येत पौनरुक्त्यात् । *एवमभावासाधारण्येऽपि 443/tha
नास्तीत्यनेन न संबध्येत पौनरुक्त्यात् अस्तीत्यनेनापि न संबध्येत विरोधात् । भावाभावसाधारणग्रहणं च नानिमित्तं नाप्यन्यनिमित्तम् । न हि विधिरूपविषयस्य तत्स्वरूपविषयस्य वा विधिधर्मानुपातिनः तत्र निमित्तभावः संभवति । तस्मात् निमित्तवत्तया साधारणग्रहणं व्याप्तं विपक्षात् निमित्तवत्त्वस्य व्यापकस्यानुपलब्ध्या निवर्तमानमन्यव्यावृत्तिविषयत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः । अपि चात्यन्ताविलक्षणानां सालक्षण्यम् अन्यव्यावृत्तिकृतमेव । यथा गवाश्वमहिषमातङ्गानामत्यन्तविलक्षणानामपि सिंहव्यावृत्त्या सालक्षण्यम् । तथा च बाह्यस्य स्वलक्षणस्य विधिरूपस्य परमार्थसतोऽपरमार्थसतात्यन्तविलक्षणेन सालक्षण्यमिति स्वभावहेतुः । बाह्यं हि विधिरूपमप्यगोव्यावृत्तम् । विकल्पविषयोऽपि चेदगोव्यावृत्तस्ततः सालक्षण्यम्, नान्यथा । तथा च सालक्षण्यमपि निमित्तवत्तया व्याप्तं तदनुपलब्ध्या विपक्षाद् व्यावर्तमानं स्वसाध्येन व्याप्यत इति प्रतिबन्धसिद्धिः । अपि चायमनुभूयत एव विकल्पविषयोऽन्यव्यावृत्तिरूपः । तथा हि तदप्रतिभासे गां बधानेति देशितोऽश्वं बध्नीयाद् गोरश्वादभेदेनाप्रतिभासनात् । प्रतिभासे वा कथं नागोव्यावृत्तेः प्रतिभासः ? तस्मादन्यापोहगोचरौ शब्दविकल्पाविति । तदेतदुक्तं वार्त्तिककृता तावेतावसदद्रव्यव्युदासरूपेण प्रवर्तमानावेकमर्थं ब्रूत इति । एकं स्वलक्षणम्

१ रे ] विकल्पागो°nvt-J
११ लीकं ] बाह्यत्वंnvt-J
१८ * ] केवलंnvt-J पुस्तकेऽस्ति ।
१९ विरोधात् ] केवलंnvt-J पुस्तकेऽस्ति ।

अध्यवस्यतः । अध्यवसायश्च स्वविशयस्य स्वलक्षणस्य भेदेनाग्रह इत्युक्तम् । § 1254

अत्रोच्यते । जातिस्तावद् उपपादितसद्भावा तत एव तद्वती व्यक्तिरपि परमार्थसती । स्वाभाविकश्च संबन्धो व्यक्तेर्जात्या सह नोपकारमपेक्षते । अपि चानित्यस्याप्युपकार्यता क्षणभंगभंग उपपादष्यिते । यथा चैकोपाधिग्रहेऽपि नोपाध्यन्तरविशिष्टग्रहस्तथोपपादितं प्रत्यक्षलक्षणावसरे । न चात्यन्तासतः केनचिदसरूपस्य प्रथोपपद्यत इति सारूप्यनिमित्तां भ्रान्तिमुपपादयता वार्त्तिककृता उक्तम् । उपपादितं चास्माभिः । तस्मात् जातिमत्यो
444/tha व्यक्तयो विकल्पानां च शब्दानां च गोचरः, तासां *तद्वतीनां रूपमतज्जातीयव्यावृत्तमित्यर्थः । अतस्तदवगतेर्न गां बधानेति चोदितोऽश्वादीन् बध्नाति । न च शब्दार्थस्य जातेर्भावाभावसाधारण्यं नोपपद्यते । सा हि स्वरूपतो नित्यापि देशकालविप्रकीर्णानन्तव्यक्त्याश्रयतया भावाभावसाधारणी भवति अस्ति नास्तिसंबन्धयोग्या । वर्तमानव्यक्तिसंबन्धिता हि जातेरस्तिता । अतीतानागतव्यक्तिसंबन्धिता च नास्तितेति । सन्दिग्धव्यतिरेकित्वादनैकान्तिकं भावाभावसाधारण्यमन्यथासिद्धं चेति । जातिमती व्यक्तिर्विकल्पगोचरो नालीकमिति कस्य वस्तुना सह सादृश्यायान्यव्यावृत्तिरूपता आस्थीयेत ? अपि चालीकस्य समस्तसामर्थ्यविरहिणोऽत्यन्तविसदृशस्य समर्थेन स्वलक्षणेन विधिरूपेण किं सादृश्यम् ? अन्यव्यावृत्तिरिति चेत् ? नन्वन्यव्यावृत्तिर्भाविकी स्वलक्षणस्य स्वभावो वा अन्यो वा ? न तावत् स्वभावो विधिरूपेण विरोधात् । अविरोधे वा विधिनिषेधयोरेकत्वाद् विधिरूपतानिषेधेनालीकस्य स्वलक्षणसारूप्यायान्यव्यावृत्तिरूपतोपपादनमनर्थकम् । विधिरूपेणातुच्छेन तुच्छस्य सारूप्यमनुपपन्नमिति चेत्, हन्त भोः स्वलक्षणस्यास्ति किं तुच्छमपि रूपं येनालीकस्य तुच्छस्य सारूप्यं स्यात् । तथा सत्ययमेकस्य स्वलक्षणस्य तुच्छातुच्छस्वरूपविरुद्धस्वभावद्वयसमावेशमभ्युपगच्छन् श्लाघनीयप्रज्ञो देवानां प्रियः । न च स्वलक्षणादन्यव्यावृत्तिरलीकमन्यव्यावृत्तं स्वलक्षणेन सरूपयति । तथा सति हस्तिमशकावपि रासभः सरूपयेत् । धर्मो न च स्वलक्षणधर्मो व्यावृत्तिर्भवद्भिरभ्युपेयते । § 1255

स्यादेतत् । अध्यवसीयमानमपि स्वलक्षणं न परमार्थसत् । अपि तु तदपि कल्पितम् । तस्मात् तस्य विधिनिषेधरूपता न विरुध्येत । वस्तुनि हि विरुद्धधर्माध्यासो विरुध्यते नावस्तुनि, तेन तस्य विधिरूपपरित्यागेन निषेधरूपतामुपादायालीकस्य सारूप्यमुपपद्यते । यथाह— § 1256

यच्च गृह्यते यच्चाध्यवसीयते ते द्वे अप्यन्यव्यावृत्ती न वस्तुनी इति । अथालीकस्य स्वलक्षणस्यालीकसादृश्ये किं सिध्यति ? न तावत् त-
445/tha त्र प्रवृत्तिः, असतः प्रवृत्तिविषयत्वायोगात् । सतस्तु प्रवृत्तिविकल्पस्य न

५ अपि ] च नित्य°nvt-J
७ स्य ] असद्रूपस्यnvt-C
९ * ] तद्वतीनांnvt-C
३५ स्य ] °त्तिविषयस्यnvt-J

सादृश्यमसता, सादृश्ये वा वृथालीकस्वलक्षणस्याभ्युपगमः । अथ न वयमलीकं स्वलक्षणान्तरमातिष्ठामहे, किं त्वलीकस्यैव दाहपाकादिसामर्थ्यारोपम् । न चैतत्स्वलक्षणं तस्य सर्वतो व्यावृत्तस्याभिलापसंसगायोग्यत्वेन विकल्पविज्ञानप्रतिभासाभावात् । अभिलापसंसर्गयोग्यस्य चान्वयिनोऽस्वलक्षणत्वात् । तस्मात् तस्यान्वयिनोऽन्यव्यावृत्तिरूपस्यासमर्थस्यापि सामर्थ्यं समारोप्य तत्तदर्थिनो व्यवहर्तॄन्, *प्रवर्तयन्तो विकल्पाः, पारम्पर्येण च वस्तुसंबन्धात् समर्थं वस्तु प्रापयन्तो न विसंवादयन्ति लोकमिति युक्तमुत्पश्यामः । § 1257

अथास्य अतदर्थक्रियासामर्थ्यारोपः किं दृष्टार्थक्रियास्वलक्षणसालक्षण्येन, आहोस्विदनादिवासनावशात् ? तत्र स्वलक्षणेन सर्वतो व्यावृत्तेन समर्थेन समस्तसामर्थ्यविरहिणोऽन्वयिनो न किञ्चिदस्ति सारूप्यम् । अगोव्यावृत्त्या तु सारूप्ये विधिरूपेणापि प्रसङ्गः तस्यास्ततो भेदाभावादित्युक्तम् । अनादिवासनावशात् तु तदारोपे प्रथमदर्शिनोऽपि नारिकेलद्वीपाद् आगतस्य वह्नौ दाहपाकादिसामर्थ्यविज्ञानप्रसङ्गः । वह्निस्वलक्षणाद् दाहपाकादिकारिणो भेदाग्रहादलीकस्य तद्रूपसमारोप इति चेत् ? स किं स्वलक्षणे गृह्यमाणे अगृह्यमाणे वा ? न तावद् गृह्यमाणे, तस्य विकल्पज्ञानागोचरत्वादित्युक्तम् । तत्समयभावित्वविकल्पकं तत्त्वं गृह्णदपि न विकल्पे स्वविषयं निवेशयति तस्य ततोऽन्यत्वेन तद्वार्तानभिज्ञत्वात् । एवं विकल्पविज्ञानमपि समनन्तरोत्पन्ननिर्विकल्पकव्यापारपरामर्शेऽपि न स्वलक्षणं गोचरयितुमर्हति तस्याभिलापसंसर्गयोग्यप्रतिभासविषयत्वादित्युक्तम् । समनन्तरप्रत्ययादविकल्पादुत्पत्तेस्तद्व्यापारपरामर्शादतद्गोचरोऽपि तद्गोचर इवाभासत इति चेत् ? अनुभववासनाप्रभवेषु विकल्पेषु भवेदपीयं गतिर्न तु परोक्षार्थावगाहिष्वविद्यावासनाप्रभवेषु संभवति । अपि चानुभववासनाप्रभवस्यापि तद्गोचरत्वाभिमानस्तस्मिन्नप्रथमाने तदुत्पत्तिमात्रान्न भवितुमर्हति । अगृह्यमाणे तु वह्निस्वलक्षणे 446/tha ततो भेदाग्रहेण तद्रूपारोपे त्रैलोक्यरूपारोपप्रसङ्गो नियमहेतोरभावात् । न हि तदानीमगृह्यमाणतया त्रैलोक्याद् वह्निस्वलक्षणस्य कश्चिद् विशेषः । वह्निस्वलक्षणविषयनिर्विकल्पकप्रभवत्वेन तु तन्नियमे अविद्यावासनाप्रभवेषु प्रधानेश्वरादिविकल्पेषु तदभाव इति नियमो न स्यात् । न चाग्रहेण तदारोपसंभव इत्युक्तम् । तस्माद् अलीकस्य बाह्यत्वं विकल्पगोचर इति रिक्तं वचः । § 1258

अपि च ज्ञानाकारवत् स्वलक्षणवच्चालीकबाह्यत्वमपि न विकल्पगोचरो भवितुमर्हति । तद्धिकल्पनाधीनम् । उत्पन्नायां कल्पनायामुत्पन्नमिव विनष्टायां विनष्टमिव विकल्पनाभेदे भिन्नमिव न शक्यमेकत्वेन प्रतिपत्तुम् । भेदानवमर्षादिति चेत् ? किमस्यानवमृष्टमप्यस्ति तत्त्वम् ? ओमिति

६ *] प्रवर्तन्ते लोकवि°nvt-C
१५ म्] °ज्ञानगोचरत्वाभावादि°nvt-C
१६ त्त्वं] तद्nvt-J
१८ र्शेऽपि] पारम्पर्येऽपिnvt-C
२० रोऽपि] व्यापारपारम्पर्या°nvt-C
२१ वेषु] °नाभावेषुnvt-C
२७ हेण] चाग्रहणेnvt-J
३२ त्तुम्] प्रतिकर्तुम्nvt-C

चेत् ? न तर्हि कल्पितम् । ननु नास्य भेदोऽपि भाविकः । भावो हि भेदाभेदाभ्यां युज्यते न त्वलीकम् । मा भूद् भेदोऽस्य भाविकः । कल्पनाधीनं तु तदलीकं तद्भेदाद् भिन्नं प्रतिपत्तव्यम्; अन्यथा तदधीनत्वानुपपत्तेः । इदमेव हि तस्य विकल्पितस्य कल्पनाधीनत्वं यत् कल्पनाभेदाभेदाद्यनुविधानं नाम, तदधीनत्वे तु कल्पितत्वानुपपत्तेरनलीकत्वप्रसङ्गात् । तन्मा नाम भूतामस्य स्वाभाविके नानात्वैकत्वे, न तु भिन्नकल्पनानुपाति शक्यमेकत्वेन प्रतिपत्तुमिति भिन्नं प्रतिपत्तव्यम् । तत्सिद्धं विकल्पागोचरत्वमलीकबाह्यत्वस्य अभिलापसंसर्गायोग्यत्वात् सुखादिस्वलक्षणवत् । अभिलापसंसर्गयोग्यं हि तत्, तेनाशक्यसमयत्वात् सुखादिलक्षणवदिति । शक्यसमयतया खल्वभिलापसंसर्गयोग्यता व्याप्ता अन्यथातिप्रसङ्गात् । सालीकबाह्यतायाः प्रतिविकल्पं भिन्नाया व्यावर्तमानाभिलापसंसर्गयोग्यत्वमपि व्यावर्तयतीति प्रतिबन्धसिद्धिः । अपि चेदमलीकमगोव्यावृत्तिरूपं वा तद्धर्मो वा ? अगोव्यावृत्तिरूपं चेत्—न, तदसिद्धेऽगवि शक्यं ग्रहीतुम् । अगौश्च 447/tha गोनिषेधात्मेति गोः सिद्धिमपेक्षत इति दुरुत्तरमितरेतरा श्रयत्वम् । तद्धर्मत्वे वा गोत्वमेवास्तु भाविकं तद्धर्मो विधिरूपः, कृतमलीकेनाविधिरूपेण । तद्धर्माणां तद्भाविकत्वसाधनं च निराकृतम् । तस्य च भावाभावसाधारण्यमुपपादितम् । तद्विस्तराद् बिभ्यतोऽपि बहुतरविस्तरे पतिता स्म इत्यास्तामेतत् नास्तिकमानोपमर्दनमिति । § 1259

उपचारतो न व्याघात इति चेदिति शङ्कायाः परिहारवार्त्तिकम्—न मुख्यासंभवादिति । सर्वत्र मुख्यपूर्वक उपचारो वा समारोपो वा दृष्टः । तव तु राद्धान्ते न विधिविषयः कश्चिदस्ति मुख्यः शब्दो वा विकल्पो वा सर्वस्य निवृत्तिगोचरत्वात् । न चाध्यवसेयो विधिः संभवतीत्युपपादितम् अधस्तादिति भावः । न चान्यापोहपक्ष उपचारो युक्तः, उभयोः प्रधानशब्दत्वादिति । न हि सिंहत्वं नाम किञ्चिदस्ति सिंहव्यक्तिषु यन्माणवकेषु न स्यात् अपि तु अप्रसह्यकारित्वादिव्युदासेन सिंहशब्दः सिंहव्यक्तिषु वर्तते । न चायमप्रसह्यकारित्वव्युदासो माणवके नास्तीति सिंहव्यक्तिष्विव माणवकेऽपि सिंहशब्दो मुख्य एव स्यादिति । § 1260

किं गौरगौरिति । अश्वादिरित्यर्थः । *प्रेषप्रत्ययपूर्विका प्रेषस्य प्रेषविषये प्रवृत्तिः संप्रतिपत्तिः, अङ्गव्यतिरिक्तस्य चाङ्गिन इति सेनावनादिबहुत्वसंख्यादीनां भवद्भिरभ्युपगमादित्यर्थः । § 1261

क्रियारूपत्वाच्चापोहस्य विषयो वक्तव्य इति । कर्म विषयः क्रियायास्तद् वक्तव्यमित्यर्थः । कथमन्यविषयादिति । कथमन्यविषयादपोहात् अगोविषयाद् गवि प्रतिपत्तिरित्यर्थः । अथागोरिति । अस्ति हि काचित् क्रिया यान्यस्य वान्यविषया च यथा विज्ञानम् आत्मनोऽर्थः विषयं वेत्यर्थः ।

१ भावो ] स्वाभाविकःnvt-C
२ भाविकः ] स्वाभाविकःnvt-C
१० ता ] °संसर्गायो°nvt-C
१६ नं ] बाधनंnvt-J
२८ * ] प्रेष्यप्र°nvt-C
३४ म् ] आत्मनोऽर्थविषयं चे°nvt-J

निराकरोति—केन गोरिति । क्रिया हि चेतनानां प्रयत्नपूर्वा भवति । अपोहलक्षणा च क्रिया निषेधरूपा निषेधश्च प्राप्तिपूर्वकः । न हि गोरगोत्वं केनचित् प्रसञ्जितं यत् प्रेक्षावता व्यपोह्येत इत्यर्थः । कथं चागवीति । अगवीति पदेन योऽयं प्रतिषेधो नासौ गोप्रतिपत्तिमन्तरेण भवतीत्यर्थः । 448/tha आख्यानानुपपत्तेरर्थप्रत्ययो न युक्त इति । अपोहरूपार्थप्रत्ययो न युक्त इत्यर्थः । § 1262

किमपोहो वाच्योऽथावाच्य इति । अपोहादिशब्देनेत्यर्थः । यदि वाच्य इति । स्वरूपेणैवापोहो वाच्यो न चापोहापोहेनेत्यर्थः । § 1263

स्यादेतत् । यद्यन्यापोहेन शब्दो न वर्तते कथं तर्हि द्व्यादिविशेषेषु अनेकशब्द एकापोहेन वर्तते ? न ह्यत्रानेकत्वं नाम गोत्वमिव किंचिदस्ति सामान्यमित्यत आह—अनेकमिति चास्य पदस्य द्व्यादिविषयत्वात् सामान्याधिगतौ एकत्ववर्जितसंख्यात्वसामान्याधिगतौ विशेष आश्रयितव्यः । संख्यात्वसामान्यमेवैकत्ववर्जितं तत्र द्व्यादिविशेषाधिगतिहेतुर्न पुनरन्यापोहमात्रमित्यर्थः । न ह्यसति सामान्यशब्दाद् एकत्ववर्जितसंख्यासामान्यवाचकादनेकशब्दाद् विशेषाश्रयणे अन्यापोहमात्राद् विशेषाधिगतिरिति योजनीयम् । अब्राह्मणादिशब्दानामपीयमेव गतिः । तत्रापि हि पुंस्त्वसामान्यमेव ब्राह्मणवर्जितक्षत्रियादित्रयासमवेतम् ब्राह्मणशब्दार्थ इति । नीलोत्पलशब्दयोश्च प्रधानत्वादिति । अनीलानुत्पलव्युदासौ हि प्रधानौ नीलोत्पलशब्दावाहतुः । न ह्येतयोरस्ति विशेषणविशेष्यभावः परस्परासंबन्धादिति भावः । एतेन नीलोत्पलशब्दयोरस्मिन् सिद्धान्ते प्रधानार्थत्वव्युत्पादनेन राजपुरुषशब्दौ व्याख्यातौ प्रधानार्थत्वेन । अत्रापि ह्यराजापुरुषव्यवच्छेदयोर्नावच्छेद्यावच्छेदकभावः । नापि स्वस्वामिभाव इत्यर्थः । समानाधिकरणार्थश्चेति शब्दविकल्पयोः परमार्थसद्वस्तुसंस्पर्शासंभवादित्यर्थः ॥ ६६ ॥ § 1264

## व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ॥ २ । २ । ६७ ॥ § 1265

यत्र हि व्यक्त्याकृतिजातीनां समावेशः, तत्र व्यक्तिनिर्धारणायेदं लक्षणम् । तेनाकाशाद्यनवरोधेऽपि न दोषस्तत्राकृतेरभावादिति भाष्यमतम् । यदाह 449/tha भाष्यकारः, न सर्वं द्रव्यं व्यक्तिरिति । यद्यपि गुरुत्वादयः सामान्यगुणाः, तथापि गुणान्तरेभ्यो व्यावर्तमाना गुणविशेषा इत्युच्यन्ते । अव्यापिन इति सर्वगतस्य द्रव्यस्य परिमाणं व्यवच्छिनत्ति । मूर्च्छिताः परस्परं संयुक्ता अवयवा यस्य तन्मूर्च्छितावयवम् । § 1266

कथं पुनरित्यादिभाष्यमाक्षिपति वार्त्तिककारः अधिगतत्वादिति । स्वरूपावगमपूर्वकत्वाद् वाच्यप्रतिपादनस्य स्वरूपावगमोऽपि तन्नान्तरीयकत्वात् सिद्ध इत्याक्षेपाभिप्रायः । निराकरोति—न, निमित्तत्रैविध्ये सति तद्विशेष-

५ यो ] °रूपोऽर्थ°nvt-C
८ र्थः ] न त्वनपोहेनेत्यर्थःnvt-J
१७ म् ] ब्राह्मणबर्जित...समवेतंnvt-J
२० नेन ] प्रधानार्थत्वेन व्युत्पा°nvt-C
३२ त्वाद् ] वाक्यप्र°nvt-C

विषयज्ञापनार्थत्वात् प्रश्नस्य शब्दप्रवृत्तिनिमित्तानां त्रैविध्ये सति तद्विशेष एव विषयः तज्ज्ञापनमर्थः प्रयोजनं यस्य प्रश्नस्य स तथोक्तः । एतदुक्तं भवति, सिद्धं कृत्वा भेदमभिधेयत्वं त्रयाणां प्रतिपादितम् । संप्रति स एव भेदः प्रतिपाद्यते इति । § 1267

सूत्रमिति । बहूनामर्थानां सूचनादिति भावः । अत्र भाष्यव्याख्यानमुपन्यस्यति—व्यज्यत इति । दूषयति—एतत्तु नेति । व्यक्तिः पदार्थ इत्येतत् प्रकृतम् । तत्र यथावयविनो व्यक्तेः शब्दार्थत्वम्, एवमाकाशादीनां चोत्क्षेपणदीनां रूपादीनां च । तस्मात् तथा लक्षणं व्याख्येयं यथा सर्वः संगृह्यते, अन्यथा सूत्रकारोऽकुशलः स्यात् । तदर्थमाह—वयं तु ब्रूम इति । अत्रेदं व्याख्यानम् । व्यक्तिरिति लक्ष्यनिर्देशः । शेषं लक्षणम् । गुणविशेषा इति द्वेधा समासः । गुणाश्च ते विशेषाश्चेति प्रथमो विग्रहः । तेनाकृतिर्निराकृता संगृहीताश्च रूपादयो भवन्ति । तथाप्युत्क्षेपणादेः कर्मव्यक्तेरसंग्रह इति द्वितीयो विग्रहः, गुणेभ्यो विशेषा गुणविशेषा गुणेभ्यो व्यावृत्ता उत्क्षेपणादय इति यावत् । तथापि न द्रव्यं संगृह्यते इत्यत आह—आश्रय इति । तच्छब्दाध्याहाराद् गुणविशेषाश्रयो द्रव्यमित्यर्थः । प्रतिपदमिति गुण इति च विशेष इति च आश्रय इति चेति पदानि । अथ वा गुणविशेषाणामाश्रय इति । गुणा रूपादयो विशेषाः कर्माणि गुणेभ्य इत्यर्थात् । तेषामाश्रयश्चेति
450/tha द्वन्द्व एव तेषामित्यप्यर्थाद् गम्यते । तत्र मूर्च्छत इति मूर्च्छनं संबन्ध इह चासौ समवाय इति ॥ ६७ ॥ § 1268

## आकृतिर्जातिलिङ्गाख्या ॥ २ । २ । ६८ ॥ § 1269

जातिश्च तल्लिङ्गानि च जातिलिङ्गानि, तान्याख्यायन्ते यया सा आकृतिः । शिरःपाण्यादिव्यूह आकृतिर्जातिं मनुष्यत्वादिकमाचष्टे । *नासिकाललाटचिबुकादीनां शिरोऽवयवानां व्यूहो मनुष्यत्वजातिलिङ्गं शिर आचष्टे । शिरसा पादेन हि गामनुमिन्वन्तीति भाष्यम् । यद्यपि गोत्वं प्रत्यक्षमेव नाकृतिव्यङ्ग्यं तथापि विप्रतिपद्यमानं प्रत्युच्यते अनुमिन्वन्तीति न पुनः सर्वा जातिराकृत्या लिङ्ग्यते । मृत्सुवर्णरजतादिका हि रूपविशेषव्यङ्ग्या जातिर्नाकृतिव्यङ्ग्या । ब्राह्मणत्वादिजातिस्तु योनिव्यङ्ग्या । घृततैलादीनां जातिस्तु गन्धेन वा रसेन वा व्यज्यते । अत एव न सार्षपादीनां तैलत्वमस्ति, तद्व्यञ्जकयोर्गन्धरसभेदयोरभावात् । भाक्तस्तु तैलशब्दप्रयोगः । क्षीरजातिरपि रसव्यङ्ग्यैव । अत एव आमिक्षायाः क्षीरत्वं न तु वाजिनस्य तद्व्यञ्जकस्य रसभेदस्य वाजिनेऽभावाद् आमिक्षायां च भावादिति ॥ ६८ ॥ § 1270

## समानप्रसवात्मिका जातिः ॥ २ । २ । ६९ ॥ § 1271

---

७ क्तेः ] पदार्थ°nvt-C
८ च ] °शादीनां चnvt-C
२१ न्ते ] जातिलिङ्गे ते आख्यायेतेnvt-J
२२ * ] शिरोनासि°nvt-C
२४ मेव ] आकृति°nvt-J

प्रसूत इति प्रसवः समानबुद्धेर्भिन्नेषु प्रसोत्री जातिः। अत्र च या जातिः, सावश्यं समानप्रत्ययं प्रसूते। न पुनर्या समानप्रत्ययं प्रसूते सा जातिः, पाचकादिषु व्यभिचारादिति। व्यक्त्याकृतिभ्यां भेदकत्वमात्रेण चैतल्लक्षणं न तु सर्वथा वेदितव्यम्। § 1272

यस्तु वैयात्यात् प्रत्यक्षेऽपि विप्रतिपद्यते तं प्रत्यनुमानान्याह— गवादिष्वनुवृत्तिप्रत्यय इति। व्यपदेशः संबन्धिना संबन्धान्तरस्य विशेषणम्। पुरुषो व्यपदिश्यते राज्ञ इत्यनेनेति। गोर्गोत्वानुवृत्तिप्रत्यया इति। पूर्वम- 451/tha
नुवृत्तप्रत्ययमात्रं पक्षीकृतम्। इह तु गोर्गोत्वानुवृत्तिप्रत्यय इत्यपौनरुक्त्यम्। § 1273

कीर्तिता इति। पदार्थलिङ्गं विवक्षितमनन्तरत्वात्। अन्यत्र तु यथालिङ्गं प्रयोग इति नपुंसकमनपुंसकेनेति नपुंसकत्वं नाशङ्कनीयमिति ॥ ६९ ॥ § 1274

॥ शब्दशक्तिपरीक्षाप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां द्वितीयाध्याये द्वितीयाह्निकम् ॥

॥ द्वितीयाध्यायः समाप्तः ॥

# ३ तृतीयाध्यायः

452/tha

## ३.१ तृतीयाध्याये प्रथमाह्निकम्

### ३.१.१ इन्द्रियभेदप्रकरणम्

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ ३ । १ । १ ॥ § 1278

अत्र भाष्यं परीक्षितानि प्रमाणानि। प्रमेयमिदानीं परीक्ष्यत इति वृत्तानुकीर्तनं प्रमेयपरीक्षां वर्तिष्यमाणां प्रति वृत्तायाः प्रमाणपरीक्षाया हेतुभावं दर्शयितुम्। प्रमाणेन हि प्रमेयं परीक्ष्यते नान्येन। न च तदपरीक्षितं प्रमेयपरीक्षायै प्रभवति। तस्मात् प्रमाणपरीक्षा हेतुः। हेतुमती च प्रमेयपरीक्षेति। द्वादशविधं च तत् प्रमेयमिति कस्मात् प्रथमत आत्मैव परीक्ष्यते न प्रमेयान्तरमित्यत आह—तद्यात्मादीत्यात्मा विचार्यत इति। आत्मैव हि

११ योग ] प्रत्यय nvt-C
६ मिति ] °विधं प्रमेयम्, तत्nvt-C

प्रमेयेषु प्रथममुद्दिष्टश्च लक्षितश्चेति । तदनुरोधादात्मैव प्रथमं परीक्ष्यते, न प्रमेयान्तराणीति । अत्र च यद्यपि स्वरूपेणात्मन्येव परीक्षां प्रतिजानीते, तथापि लक्षणपरीक्षाद्वारेण लक्ष्यपरीक्षणात् लक्षणपरीक्षैव द्रष्टव्या । यथा चेयमात्मलक्षणपरीक्षा तथोपरिष्टाद् दर्शयिष्यति । § 1279

तदेतद् वार्त्तिककारो व्याचष्टे—आनन्तर्यादिति । किं पुनः प्रयोजनं प्रमेयपरीक्षायाः ? न हि निष्प्रयोजनं परीक्षन्ते प्रेक्षावन्त इत्यत आह—यद्विषयोऽहङ्कार इति । अहङ्कार इत्यात्मादिविषयं मिथ्याज्ञानं निर्दिशति । शरीराद्यभेदेनात्मदर्शनं खलु संसारं प्रवर्तयतीत्युक्तं द्वितीयसूत्रे । अनेन प्रमेयपरीक्षायाः प्रयोजनवत्त्वं दर्शितम् । § 1280

अत्र भाष्यकारेण *विचारपूर्वरूपं संशयो दर्शितः । किं देहेन्द्रियमनोबुद्धिसंघातमात्रमात्मेति संशयकारणं चोक्तं व्यपदेशस्येति । यद्यपि वृक्षप्रासादयोरवयविसमुदाययोरन्ययोरेवान्येनावयवेन समुदायिना च व्यपदेशः,
453/tha तथाप्यवयवव्यभावं समुदायं च समुदाय्यव्यतिरिक्तं मन्यमानस्य परस्योदाहरणं द्रष्टव्यम् । § 1281

तदेतद् वार्त्तिककार आक्षेप्तुं पृच्छति—किं पुनरस्येति । उत्तरम्—किं शरीरेति । आक्षिपति—नेति । समानधर्मणो धर्मिणो दर्शनात् संशयो न पुनरदर्शनादित्यर्थः । समाधत्ते—नेच्छादिसूत्रेति । इच्छादयो हि कार्यत्वात् लिङ्गमात्मन इति दर्शितम् । तान्येव तु लिङ्गानि दर्शयिष्यन्त्येषितारं परीक्षिष्यन्ते । किं देहेन्द्रियव्यतिरिक्त एषितैभ्यः सिध्यति, आहोस्विदभिन्न इति युक्तो विचारः । § 1282

अपि चायमात्मशब्दाभिधेयो धर्मी सर्वतन्त्रसिद्धः केवलमस्य शरीरेन्द्रियादिभेदाभेदे वादिनां विवाद इत्याह—अविप्रतिपत्तेश्चेति । ननु चात्मासत्त्वे परैः प्रमाणान्यजातत्वादीन्युपन्यस्तानि, तत्र कथं न तत्सत्त्वे विप्रतिपत्तिरित्यत आह—असत्त्वप्रतिपादकप्रमाणासंभवाच्चेति । वाद्येवासौ न भवति यो धर्मिणि विप्रतिपद्यते । न हि धर्मिणि विप्रतिपद्यमानस्यास्ति किञ्चित् प्रमाणं सर्वस्य तस्याश्रयासिद्धेरप्रमाणत्वात् । अभावस्य च भावाधीननिरूपणस्यात्यन्तासद्भावानिरूपणेनानिरूपणात् । तस्माद् धर्म्यभाववादी न लौकिको नापि परीक्षक इत्युन्मत्तवदुपेक्षणीय इति भावः । § 1283

*धर्म्यसिद्धिवादीनां प्रमाणमुपन्यस्यति—न नास्तीति । निराकरोति—नास्त्यात्मेति । यत् पुनरपरे समादधुः § 1284

अनादिवासनोद्भूतविकल्पपरिनिष्ठितः ।
शब्दार्थस्त्रिविधो धर्मी भावाभावोभयाश्रयः ॥§ 1286

४ ति ] दर्शयिष्यतेnvt-C
१० * ] °रूपःnvt-C
१३ तिरिक्तं ] °व्यनति°nvt-C
१३ स्य ] मन्वानस्यnvt-C
१९ न्ते ] दर्शयन्त्येषितारं परीक्ष्यन्तेnvt-C
२२ भेदाभेदे ] शरीरेण सह भेदा°nvt-C
२९ * ] धर्म्यसत्त्ववा°nvt-J

भावाश्रयो यथा नीलमिति । अभावाश्रयो यथा शशविषाणमिति । उभयाश्रयो यथा अमूर्तमिति । अमूर्तं हि भवति विज्ञानं भवति च शशविषाणम् ।

तस्मिन् बाह्यानुपादाने साध्येऽस्यानुपलम्भनम् ।
तथा हेतुर्न तस्यैवाभावः शब्दप्रयोगतः ॥§ 1289

इति । सोऽयमात्मविकल्पो बाह्योपादानो न भवतीति । यथा नीलविकल्पो बाह्यनीलोपादानः, नैवमात्मविकल्पो बाह्योपादानो भवतीत्यर्थः ।
§ 1290

अत्रैवं भवान् प्रष्टव्यो जायते किमात्मविकल्पस्य बाह्योपादानत्वमात्रं प्रतिषिध्यते, किं वा बाह्यात्मोपादानत्वम् ? पूर्वस्मिन् सिद्धसाधनम् । मा भूदात्मविकल्पो बाह्यनीलाद्युपादानः, किं नश्छिन्नम् ? उत्तरस्मिंस्तु कल्पे क्वायं बाह्यात्मा सिद्धः, यदुपादानत्वं विकल्पस्य प्रतिषिध्यते ? सिद्धश्चेत् क्वापि नास्यात्यन्ताय प्रतिषेधः । असिद्धश्चेत् कथमप्रतीतस्य निषेधः ? प्रतीतो विकल्पे बाह्ये निषिध्यते चैत्र इव गेहे चत्वरतले निषिध्यते इति चेत् ? एवमपि यत्र प्रतीतस्तत्र न निषिध्यते, यथा भवद्भिरेवोक्तम् न तस्यैवाभावः शब्दप्रयोगतः इति । बाह्यश्चात्मा विकल्पेन नोपदर्शित इति प्रसक्त्यभावान्न शक्यो निषेद्धुम् । अप्रदर्शितोऽप्यध्यवसित इति प्रसक्त एवेति चेत् ? अथ कोऽयमध्यवसायो नाम ? ग्रहणादतिरिक्तः ग्राह्यस्य स्वाकारस्य वा अलीकस्य वा बाह्याध्यारोप इति चेत्—न, बाह्याऽविषया विकल्पा बाह्यमारोपयन्तीति चित्रम् । न हि आरोपविषयारोप्ये अजानान आरोपयितुमर्हतीत्यसकृदावेदितम् । अपि चालीकं प्रतीयमानं यथा न निषेद्धुं शक्यं प्रतीयमानत्वाद् एवमस्य बाह्यत्वमपि । मिथ्यात्वात् प्रतिषिध्यत इति चेत् ? किमलीकमपि सत्यं यत् तदुलङ्घ्य तस्य बाह्यत्वं प्रतिषेद्धुमध्यवसितोऽसि ? *बाह्यभेदाग्रहस्तु तदध्यवसायो न प्रसञ्जक इति न निषेधगोचरः । न च ज्ञानाकार आत्मा परमार्थसन् बाह्यत्वेनारोप्यमाणः प्रतिषिध्यत इति सांप्रतम् । विज्ञाननये सर्वथा बाह्यस्याग्रहे तत्समारोपासंभवात् । अत्यन्तासतश्च बाह्यस्य विज्ञानानात्मनो ग्रहे तथा विधेनासता विज्ञानानात्मना विज्ञानग्राह्येण किमपराद्धं येन तद्ग्राह्यं न स्यादिति विज्ञाननयो दत्तजलाञ्जलिः प्रसज्येत । न चायमात्मा पूर्वापरकालावस्थायी क्षणिक विज्ञानाकारो 455/tha
भवितुमर्हति, येन तदाकारो बाह्यत्वेन प्रतिषिध्येत । तस्माद् अन्यत्र दृष्टमन्यत्र समारोपप्रसञ्जितं प्रतिषिध्यत इति युक्तम् । स च समारोपः क्वचित् स्वकारणप्रभवः क्वचित् प्रतिषिध्यते यथेन्द्रियादिदोषादुत्पन्नरजतज्ञानस्य

१८ अथ ] ननु विकल्पस्य कोऽयम्nvt-C
२० न्तीति ] बाह्यविषया विकल्पा बाह्यमारोपयन्ति चेतिnvt-J
२४ *] बाह्यभेदग्रहस्त°nvt-C
२६ ये ] विज्ञानमये हिnvt-C
२७ ता ] अविज्ञा°nvt-J
२९ विज्ञानाकारो ] °विकल्पाकारोnvt-C
३१ त्र ] समारोप्य प्रति°nvt-C

शुक्तिकायां नेदं रजतमिति । क्वचित् पुनराहार्यो यथा नेह गेहे चैत्र इति । तस्मादात्मनो *देशकालावस्थान्तरे विकल्पविज्ञाने वा असंभवादत्यन्तासतो न समारोपः, तदभावादात्मन्येव नास्ति । अस्ति चेत् कथमत्यन्ताय निषेधः ? तस्माद् आत्मा नास्तीति पदयोर्व्याघातः । यद्यप्यात्मा नास्तीति पदानि, तथापि नास्तीत्यस्यैकपद्यं विवक्षित्वा पदे इति द्विवचनोपपत्तिः । पद्यते गम्यतेऽनेनार्थ इति हि विवक्षित्वा पदसमुदायोऽपि पदमुच्यते । § 1291

यद्यपि पटादीनां देशान्तरादौ निषेधस्तथापि आत्मनोऽत्यन्ताय भविष्यति । न हि प्रतिषेधान्तरधर्ममवश्यं प्रतिषेधान्तरमनुबध्नातीत्यत आह—सर्वश्चाय-मिति । उपपादितमेतदधस्ताद् यथा नानारोपितप्रतिषेधो यथा चाननभूतम-शक्यमारोपयितुमिति । न क्वचिदात्मन्यनाधारत्वमुक्तमिति स्वातन्त्र्यादात्मनः । सामान्यादयस्तु पिण्डादिपारतन्त्र्यनिरूपणाः पिण्डाद्याधारा इति पृच्छति—किमयमिति । यन्न क्वचिदस्ति तदत्यन्तासद् यथा शशविषाणम् । तथा चायम् । तस्मादत्यन्तमसन्निति भावः । उत्तरम्—न नास्तीति । न तावत् न क्वचिदस्तीति वाक्यमात्मानं स्वरूपेण निषेधति देशरूपविशेषप्रतिषेधात् । शङ्किता आह—केयं वाचोयुक्तिरिति । उत्तरवाद्याह—एषा वाचोयुक्तिरिति । एषा वक्ष्यमाणार्था । तमर्थमाह—यद् यथाभूतमिति । न हि पदार्थानां सत्ता देशवत्त्वेन व्याप्ता, येन देशवत्त्वं निवर्तमानं तां निवर्तयेदिति भावः । न च कालविशेषप्रतिषेधोऽपीति । कालान्तरप्रतियोगी एकैकः कालः कालविशेषः । तत्प्रतिषेधोऽप्यात्मनि न युक्तः । न हि यथा घटादिष्ववच्छेदार्थः कालस्तथा
456/tha नित्य आत्मनि । प्रध्वंसाभाववान् घटः खल्वासीत् न तथा आत्मा । प्राग-भाववान् घटो भविष्यति न तथा आत्मा । अतीतप्रागभावोऽनागतप्रध्वंसश्च घटो वर्तमानः । न च तथात्मा । तस्मान् नास्यावच्छेदार्थं त्रैकाल्यमुपाव-र्तते । अतीतानागतव्यपवृक्तवर्तमानक्रियाव्यङ्ग्यः कालोऽस्ति सदा नित्यानां यतः अस्त्यात्मा, विद्यते व्योमेति भवति । तस्मादवच्छेदकत्रैकाल्याप्राप्तेर्न त्रैकाल्यप्रतिषेधः, अतीतानागतव्यपवृक्तक्रियाव्यङ्ग्यस्य च वर्तमानस्याशक्य-प्रतिषेधत्वात् नात्मनि कालप्रतिषेध इति स्थितम् । आत्मप्रतिषेधं चेति । आत्मेति हि पदं लोकसिद्धम्, पद्यते हि तेन कश्चिदर्थभेदः । येन च कश्चिदर्थः पद्यते, न तदनर्थकं भवितुमर्हतीति । § 1292

किमसतः सता साधर्म्यमिति । न हि भवतां सिद्धान्ते सर्वोपाख्याविर-हितमसत्प्रमेयमपीति भावः । अथ शरीरदेरात्मत्वं कल्पितं निषिध्यते श-रीरादयो नात्मन इति तत्राह—आत्मसामान्यं चेति । अथ शरीरादीति । अहङ्कारस्तावत् परमार्थतः शरीरादिविषयः स्थूलोऽहं कृशोऽहं गौरोऽहमिति प्रत्ययात् । तमिमम् आत्मनि कल्पयित्वा विपर्यस्यति तदनुरूपं व्यपदिश-ति व्यवहरति च । सोऽयं विपर्ययः प्रतिषिध्यते नास्त्यात्मेति । निराक-रोति—एवं च शरीरादीति । न ह्यहङ्कारसमारोपविषयसत्त्वमनभ्युपगच्छ-

२ *] देशकालान्तरे वस्तुनि विकल्पनम्, विज्ञाने चासंnvt-C    ३ न्येव] आत्मेत्येव ?nvt-J

तः समारोप उपपद्यते । तस्मात् तत्प्रतिषेधतो व्याघात इत्यर्थः । चतुर्णामुपादानरूपत्वात् तमस इति । रूपरसगन्धस्पर्शाश्चत्वारो घटादिरूपेण विपरिणतास्तेषामुपादानरूपं तम उपादीयत इत्युपादानम् । उपादेयरूपत्वादिति क्वचित् पाठः । स तु सुगमः । सोऽयं वात्सीपुत्राणां वैभाषिकाणां सिद्धान्तः । तेन विरोध इत्यर्थः । सुगममन्यत् । § 1293

अथायं भावप्रतिषेध इति । न जन्ममात्रप्रतिषेधोऽपि त्वात्मनो भावः सत्ता प्रतिषिध्यते इत्यर्थः । स्वतन्त्रस्य धर्मस्य समवायादन्यस्य अदर्शनाद् इति । निकायो देवमनुष्यतिर्यगादीनामनौत्तराधर्येणावस्थितः संघातः तद्विशिष्टाभिरित्यर्थः । § 1294

कार्यं कारणं वेति । यदि विषाणमवयवस्तदा कारणं यदि तु केशनखादितुल्यत्वेनानारम्भकत्वात् नावयवः, ततः कार्यम् तस्मात् तत् प्रभवतीति । उक्तमप्यर्थं पुनर्विकल्पयन् पर्यनुयोगार्थमाह—इदं च शशविषाणं 457/tha
नास्तीति ब्रुवाण इति । सामान्यप्रतिषेधः विषाणसंबन्धमात्रप्रतिषेध इति । विशेषप्रतिषेधः कार्यकारणभावलक्षणसंबन्धप्रतिषेध इति । § 1295

विषयस्वभावभेदानुविधायीति । अहमिति हि ज्ञानं मानसं विषयस्य आत्मनो यः स्वभावभेदः कर्तृत्वभोक्तृत्वादिरूपः जानेऽहं भुञ्जे इत्यादिस्तदनुविधायि । एतदुक्तं भवति, न केवलमात्मस्वरूपमात्मज्ञानस्य विषयस्तथा सति परसमवेतक्रियाफलशालित्वाभावेनात्मनः कार्यत्वाभावेनाकर्मतया तद्व्याप्यज्ञानस्यापि निवृत्तिप्रसङ्गात् । यदा तु धर्मवदात्मविषयं ज्ञानं भवति तदा धर्माणां परसमवायिक्रियाफलसंकलिततया कर्मत्वात् न कर्माभावेन जानातेर्निवृत्तिरिति । जानातिरात्मधर्मकर्मा आत्मानमपि गोचरयतीति सूक्तं विषयस्वभावभेदानुविधायीति । अहङ्कारालम्बनेति । आलम्ब्यतेऽनेनेत्यालम्बनं विज्ञानम् अहङ्कारेण च विषयिणा विषयमुपलक्षयति । देशयति—ननु भवत्यहं गौर इति । परिहरति—न भवतीति ब्रूम इति । न व्यपदेशमात्रं देहाद्यव्यतिरिक्तात्मसद्भावसाधनमस्माभिरुक्तं येनानैकान्तिकं भवेत्, अपि त्वनुभवः । स च न शरीरादिष्विदमो विषयेष्वस्ति, अपि त्वसंभिन्नेदंविषयोऽहंप्रत्ययः शरीराद्यतिरिक्त एवास्ति । स चात्मा । शरीरादयस्तु मतुब्लोपादभेदोपचाराद् वा अहमा विषयीक्रियन्ते । ममात्मेति तु व्यपदेशमात्रं न पुनः शरीरादिष्विव ममकारस्तत्र मुख्यो भेदेनाप्रतिभासनात् । राहोः शिर इतिवत्तु ममकार आत्मनि द्रष्टव्यः । अत एवाह—ममप्रत्ययेति, न पुनर्ममकारमात्रम् । तस्मात् सर्वं रमणीयम् । विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिर्बाधितेति यावत् । § 1296

कः साधनार्थ इति कः साधनशब्दस्यार्थः । अथानुपलब्धिरपि नास्तीति । भावरूपो धर्मोऽसति विरुध्यते, न त्वभावरूपः, उभयोः समानशील-

१५ मिति ] विज्ञानंnvt-C
१६ भोक्तृत्वादिरूपः ] °त्वलक्षणःnvt-C
२१ जानातेर्निवृत्तिरिति ] परसमवेतक्रियाफलशालितया तद्व्याप्तस्य ज्ञानस्यापि निवृ°nvt-C
२१ सूक्तं ] युक्तंnvt-C

त्वादित्यर्थः । निराकरोति—कः साधनार्थोऽनुपलब्धेरिति । असत्यास्तुच्छाया
458/tha अनुपलब्धेः कः साधनत्वरूपोऽर्थ इत्यर्थः । शङ्कते—अथ कल्पितस्येति । नानुपलब्धिस्तुच्छा किं तु तत्त्वान्तरं सत् । सा तु कल्पिताश्रयतया नाश्रयासिद्धेत्यर्थः । एतद्विकल्प्य निराकरोति— कथं कल्पितस्येति । न हि तात्त्विक्यनुपलब्धिः परमार्थसदाश्रया कल्पितसत्त्वस्य धर्मिणो धर्मो भवितुमर्हतीत्यर्थः । द्वितीयं कल्पमाशङ्कते—अथासत्त्वेनेति । निराकरोति—सिध्यत्यनुपलब्धिरिति । असत्त्वेन हि कल्पितस्य पारमार्थिकं भावत्वमुपेतव्यम् । असत्यसत्त्वकल्पनाया अयोगात् । तथा च भावाश्रयानुपलब्धिस्तात्त्विकी सिध्यत्येव । यदर्थं त्वसौ तदेव पारमार्थिकम् असत्त्वमात्मनो न सिध्यति असत्त्वस्य काल्पनिकत्वाभ्युपगमाद् भवद्भिरित्यर्थः । अपि चायमसत्त्वेन सन्तमात्मानं कल्पयित्वा अत्यन्तासत्त्वमनुपलब्धेरस्य साधयितुमध्यवसितः । *तच्चान्यधर्मेण अनुपलब्ध्या न सिध्यति । न जातु स्थाणुधर्मेण कल्पितेन पुरुषे स्थाणुत्वं पारमार्थिकं शक्यं साधयितुमित्याह—किमर्थं चायमात्मेति ।

§ 1297

रूपादिशब्देभ्योऽन्यत्वे सतीति । यदि हि पदत्वादित्युच्येत रूपादिशब्दैरनैकान्तिकत्वं स्यादत उक्तम्—रूपादिशब्देभ्योऽन्यत्वे सतीति । *यद्येकपदत्वादित्युच्येत रूपादिशब्दैरनैकान्तिकत्वं स्यादत उक्तम्—रूपादिशब्देभ्योऽन्यत्वे सतीति । तथापि रूपविज्ञानवेदनासंज्ञासंस्कारा इत्ययं शब्दो रूपादिवाचको यः शब्दो रूपं वेदना संज्ञा विज्ञानमित्यादिस्ततोऽन्योऽसमस्तादन्यः समास इति । तेनानैकान्तिकत्वमत उक्तम्—एकपदेति । तेन रूपादिवाचकैकपदव्यतिरिक्तं यद्यदेकपदं तत्तद् रूपादिव्यतिरिक्तस्य वाचकम्, यथा घटादिपदम् । तथा चात्मपदम् । तस्मात् तदपि तथेति । एतेनेति । आत्मशब्दसाध्यत्वेनैवासंभिन्नेदंप्रत्ययः । अहंप्रत्ययो व्याख्यातः । शङ्कते—असिद्ध इति । घट इति रूपादय एवैकोदकाहरणावच्छिन्ना उच्यन्ते, न तु रूपाद्यतिरिक्तो घटो नाम कश्चिदस्तीत्यर्थः । निराकरोति— अत्रोक्तमिति । उपादायरूपत्वात् तमस इति । यथा दाय इति देयमुच्यते
459/tha एवमुपादायेत्यनेनोपादेयमिति । सविषयत्वं सद्विषयत्वं सिद्धान्तिनोक्तमिति मन्वानश्चोदयति—तमःशब्दस्य सविषयत्व इति । यद्यप्यभावविषयत्वे अपि न निर्विषयत्वं तथापि देशकाभिमानमनुविदधानः परिहरति—न सूत्रार्थेति ।

§ 1298

पुनर्दृष्टान्तो नास्तीति । पूर्वमात्मानुपकारकत्वे साध्ये दृष्टान्ताभाव उक्तः पुनरिहोच्यत इत्यर्थः । देशयति—अथात्मशब्द इति । यो यो वर्णात्मकः स सर्वोऽनित्यविषयो यथा घटादिशब्दः, तथा चानित्यत्वे सति तद्विज्ञानमेव स्यात् नात्मेति फलत आत्मप्रतिषेध इत्यर्थः । एतदपि दूषयति—तथापीति । नित्यशब्दस्तावन्नित्यमाचष्टे अन्यथा तत्प्रतिषेधानुपपत्तेरित्यर्थः ।

७ म् ] सत्त्वमनुमन्तव्यम्nvt-C
१२ * ] तच्चास्य सधर्मेणnvt-C
१६ * ] यदि हिnvt-J
३५ र्थः ] °था न तत्प्रतिषेध°nvt-C

शङ्कते—अथेति । सिद्धसाधननिवृत्त्यर्थं शरीरादिव्यतिरिक्तविधिविषय इति । निराकरोति—तथापीति । रूपादिस्कन्धपञ्चकातिरिक्तं नास्तीति भवतां राद्धान्तस्तदतिरिक्ताभ्युपगमे विरुध्यते इत्यर्थः । § 1299

यदि विवक्षितार्थव्यतिरेकेणेति । वादिनो हि शरीरेन्द्रियबुद्धिवेदनासंघातस्य पारार्थ्यं विवक्षितम् । परार्थाश्चक्षुरादय इति ब्रुवतो न संघातपरार्थत्वं तच्चेह पक्षधर्मताबलात् सिध्यदस्याभिप्रायेण व्याप्यते । न तु साक्षाद्विवक्षितम् । तद्वदिहाभिप्रायव्याप्तं विवक्षितमारोप्य यद्यनन्वयविरोधौ देश्येते, ततः सर्वानुमानोच्छेदप्रसङ्गः । एतच्च ईश्वरसिद्धौ निपुणतरमुपपादयिष्यते । अथानुमानेन बाध्यत इति । संघातत्वानुमानमेवाभिप्रेतविपरीतसंघातपरार्थत्वपक्षो व्यवस्थालक्षणानिष्टप्रसङ्गरूपतर्कसहायमस्य बाधकं प्राणादिसत्त्वाद्यनुमानं वेति । एकदेशेन चैकदेशान्तराणामिति ब्रुवतो वार्त्तिककारस्य गृहप्रासादादयो नावयविनो विजातीयानामनारम्भकत्वादित्यभिमतम् । § 1300

दर्श...णात् । अकार्यकारणभूतानां चेति । यथा हि कालाक्षीं गामीक्षितवतः स्वस्तिमत्यां गवि भवति प्रतिसन्धानम्, न चैतयोरस्ति कार्यकारणभाव इत्यर्थः । भाष्यम्—भिन्ननिमित्ताविति । भिन्नमिन्द्रियं निमित्तं 460/tha
ययोः । अनन्यकर्तृकौ आत्मैककर्तृकौ समानविषयौ द्रव्यमेकं विषय इत्यर्थः ॥ १ ॥ § 1301

## न विषयव्यवस्थानात् ॥ ३ । १ । २ ॥ § 1302

पूर्वपक्षसूत्रम्—न वि...नात् ॥ यद्भावाभावानुविधायिनौ ज्ञानभावाभावौ तच्चेतनम् । इन्द्रियभावाभावानुविधायिनौ च ताविति तदेव चेतनमिति भावः । § 1303

सिद्धान्तभाष्यम्—संदिग्धत्वादहेतुः । अनन्यथासिद्धावन्वयव्यतिरेकौ कारणत्वमात्रे प्रमाणम्, न तु कर्ता न चेतनश्चेतनं वा करणमित्यत्रेत्यर्थः ॥ २ ॥ § 1304

## तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ । १ । ३ ॥ § 1305

विषयव्यवस्थानं च विरुद्धमिन्द्रियादीनामचैतन्यस्य साधनादित्याह— यच्चोक्तमिति । तद्व...धः ॥ सर्वज्ञ इत्यस्य विवरणं सर्वविषयग्राही सर्वेषामिन्द्रियाणां प्रमाणान्तराणां च ये विषयास्तद्ग्राही । इन्द्रियान्तराणि प्रमाणान्तराणि च पुनर्व्यवस्थितविषयाणि तेनार्वाग्दृगपि सर्वज्ञ इति सिद्धम् । तत्रेदमभिज्ञानमिति । असाधारणं चिह्नमभिज्ञानमुच्यते । तच्चाप्रत्याख्येयमनुभवसिद्धत्वात् । चेतनवृत्तमभिज्ञानमप्रत्याख्येयमुदाहियत इति योजना । अनियतपर्यायम् अनियतक्रममित्यर्थः । अनेकविषयमर्थजातमिति । अनेकः पदार्थो विषयो यस्यार्थजातस्य तत् तथोक्तम् । क्वचित् पाठोऽनेकविधम-

५ त्वं ] न त्वसंहतपरा°nvt-J

र्थजातमिति । स सुगम एव । आकृतिमात्रं त्विति सामान्यमात्रमित्यर्थः ।
§ 1306

461/tha *चैतन्यं त्वात्मनः स्वातन्त्र्ये सत्यव्यवस्थानाच्चक्षुरादिवदिति, प्रमाणसंशयविपर्यासस्मृतिषु योऽनुस्यूत एक उपलभ्यते स चेतनः स्वातन्त्र्ये सत्यव्यवस्थानात् । यस्त्वचेतनो नासौ स्वातन्त्र्ये सत्यव्यवस्थितो यथा चक्षुरादीति व्यतिरेकी हेतुः । यद्यव्यवस्थानादित्येतावन्मात्रमुच्येत, ततो मनसानैकान्तिकः स्यादत उक्तम्—स्वातन्त्र्ये सतीति । अथ वा कृतमव्यवस्थानेन स्वातन्त्र्यमेव केवलमस्तु चैतन्यसाधनमित्याह—नाचेतन आत्मेति । आत्मेति प्रमाणसंशयविपर्ययस्मृतिष्वनुस्यूतमनुभूयमानमुपलक्षयति । निराकृतमप्यर्थं प्रकारान्तरेण पुनरुपन्यस्य निराकरोति—पृथिव्यादिनित्यत्वसाधन इति ।
§ 1307

तदेतच्चेतनवृत्तं देहादिभ्यो व्यावर्तमानं तदतिरिक्तं चेतनं साधयतीति स्थितम् । नेच्छाद्याधारत्वं देहादीनामिति ॥ ३ ॥ § 1308

॥ इन्द्रियभेदप्रकरणम् ॥

## ३.१.२ शरीरव्यतिरेक्यात्मप्रकरणम्

शरीरदाहे पातकाभावात् ॥ ३ । १ । ४ ॥ § 1310

सूत्रान्तरमवतारयति भाष्यकारः—इतश्च व्यतिरिक्त आत्मा न देहादिसंघातमात्रमिति । § 1311

शरी…वात् । प्राणातिपाते पातकाभावप्रसङ्गादिति । अयं च यद्यपि भूतचैतनानिकानां नानिष्टप्रसङ्गस्तथापि शाक्यान् प्रति द्रष्टव्यः । ते हि प्राणातिपातकृतं पातकमिच्छन्ति । एवं च न बुद्धिरात्मेति वक्तव्ये देहादिग्रहणं विचित्राभिसन्धित्वात् पुंसाम् । यदि कश्चिद् भूतचैतनिकोऽपि प्राणातिपातकृतं पातकं नेच्छेत् तमपि प्रति दूषणं भविष्यतीत्येवमर्थमिति मन्तव्यम् । § 1312

462/tha

वार्त्तिकम्—अकृतकृताभ्यागमनाशदोष इति । येनाकृतं कर्म प्राणातिपातः तस्य पातकाभ्यागमो येन च कृतं तस्य नाश इत्यर्थः । शास्त्रचोदितं फलमनुष्ठातरि § 1313

इत्ययमुत्सर्गो यत्र पुनः शास्त्रमन्यस्य फलमाह यथा श्राद्धे वैश्वानरीयेष्ट्यादौ तत्र भवतु पुत्रकृतस्य श्राद्धस्य पितृगामि फलम्, पितृकृताया वा जातेष्टेः पुत्रगामि फलमिति । भावना स्मृतिहेतुः संस्कारः । यत्कायेति । येन कायेनोपलक्षितः कश्चिच्चित्तसन्तानः स कायान्तरवर्त्यपि फलं भुङ्क्ते इत्यर्थः ।

३ *] त्वं चैतन्यंnvt-C
३ दिति] °दिति हेतुः ।nvt-C
८ णं] भवत्येवम° nvt-C
११ रि] द्रः पूर्वमीमांसासूत्र ३. ७. १८
१५ न्तानः] °सन्तानो यत्कायचित्तसन्तानः तेन कायेनोपलक्षितो यश्चित्तसन्तानःnvt-J

एकनिमित्तानां प्रत्ययानां प्रतिसंधानाद् इति । उक्तमेतद् यथा नर्तकीभ्रूलताभङ्ग एकस्मिन् बहूनां प्रतिसंधानमिति । सर्वावस्थोपलब्धेरिति । सर्वास्ववस्थासु बीजावयवानामुपलब्धेः परमाण्ववस्थत्वे त्वनुपलब्धिः स्यात् । तस्मान्न बीजावयवाः पच्यमाना अङ्कुरोत्पत्तौ परमाण्ववस्था भवन्ति, अपि त्ववयविन एव पच्यन्त इत्यर्थः । परमाण्ववस्था बीजावयवा न बीजत्वादिजातिविशेषवन्तमारब्धुमर्हन्तीत्युक्तं सिद्धान्तिनेति मत्वा देशयति—यदि तर्हीति । परिहरति—नानेनैवोक्तोत्तरत्वादिति । प्रतिसंधानाय बीजत्वजातीयानवयवान् लक्षयितुमस्माभिर्बीजावयवानां परमाण्वन्तो विभागो निषिद्धः । कल्पादौ त्वारम्भे परमाणूनां न प्रतिसन्धानमस्ति । न हि पूर्वसर्गे ये बीजमारेभिरे सांप्रतमपि त एवारभन्ते नान्य इति प्रतिसंधाननियमः, अपि त्वन्येभ्योऽपि भवन्तीति भावः । पैलुकण्ठः शङ्कते—आ मध्यात् पाकानुपपत्तिरिति चेत् ? परिहरति—नाप्रतिबन्धादिति । सान्तराण्येवावयविद्रव्याणीत्यर्थः । अथायमवयवानुप्रवेशो द्रव्यस्य विनाशकः कस्मान्न भवतीत्यत आह—यदि चायमवयवानुप्रवेश इति । भाजनगतानामपां भाजनविनाशे अवस्थानमेव न स्यात् । सान्तरत्वे तु तावत्य एवापो भाजने स्यन्दन्ते यावतीभिर्बहिः शीतस्पर्शोपलब्धिर्भवति, मात्रया च तत्र कालपरिपाकवशादनवस्थानमपि । विनाशे तु सहसानवस्थानमपां भाजनगतानां भवेदित्यर्थः । व्यवहिते चाव्यवहिते च 463/tha
स्फटिभाजने न द्रव्ये तुल्योपलब्धिरिति । § 1314

शङ्कते—सुखी स्यामिति तत्क्रियेति चेत् ? यद्यपि विशरारवः स्कन्धाः तथाप्यनाद्यविद्यावासनावशोऽयमेकमहङ्कारास्पदं सत्त्वं नित्यमभिमन्यमानः सुखी भवेयं दुःखी मा भूवमिति तृष्णक् प्रवर्तते इत्यर्थः । निराकरोति—तन्न, अननुभूतत्वादिति । यथा च क्षणिकानां विज्ञानानां परस्परवार्तानभिज्ञतया न प्रतिसन्धानक्षमत्वं तथोपपादितमस्माभिरात्मलक्षणावसर इति । न अनागतानामनुत्पत्तेः सत्त्वादिति । न च ब्रह्मचर्यादिपरिपाकसहितेन ज्ञानक्षणेनासमर्थो ज्ञानक्षणो जन्यते, स च न ज्ञानान्तरं प्रसूत इत्यनागतानुत्पत्तिरसमर्थस्य च क्षणस्य स्वभावतो विनाश इति युक्तम्, असमर्थक्षणस्योत्पादस्यैव केवलात् सहकारिसापेक्षाद् वानुपपत्तेः । यथा चैतत् तथा क्षणभङ्गभङ्गावसरे उपपादयिष्यते ॥ ४ ॥ § 1315

## तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ३ । १ । ५ ॥

§ 1316

वैनाशिको नैयायिकपक्षवत् सांख्यपक्षेऽपि हिंसातत्फलानुपपत्तिमापादयितुं हिंसा तत्फलसंभवं पूर्वपक्षयति—इयं तु हिंसेति । व्यक्तेरिति

१८ ब्धिरिति ] व्यवहिते द्रव्ये स्फटिकभाजने न तुल्यो° nvt-C
२० मानः ] सत्त्वमित्यभि° nvt-C
२१ क् ] अनुत्पत्तिः संस्काराणाम् nvt-J
२५ रं ] कार्यान्तरं nvt-J
२७ त्तेः ] °स्यैव सहकारिसापेक्षत्वानपेक्षत्वानुपपत्तेः nvt-C

। सदेव हि कार्यं कारणेन व्यज्यते, न त्वसत् क्रियते इत्यर्थः । परिहरति—नेति । त्रिविधोऽप्ययं धर्मलक्षणावस्थारूपः परिणामो नित्याद् धर्मिणो न भिद्यते इति परिणामानित्यत्वं धर्मिनित्यत्वेन विरुध्यते । अविरोधाय वा धर्मिणोऽप्यनित्यत्वाभ्युपगमे वैनाशिकपक्षोक्तदोषप्रसङ्ग इत्यर्थः । गुण इति । ऋजुत्ववक्रत्वे खलु अङ्गुल्यवयवसंयोगविशेषौ सत्येव द्रव्यारम्भकसंयोगे उदयव्ययवन्तावनुभूयेते इति । § 1317
464/tha

तदेतत् नैयायिकपक्षदूषणं सांख्यपक्षेऽप्यापाद्य नैयायिकं पृच्छति—अथात्मनो नित्यस्येति । नैयायिक आह—सुखदुःखे इति । नित्यादात्मनो व्यतिरिक्ताभ्यां पुण्यपापाभ्यामात्मधर्माभ्यामनित्याभ्यामात्मधर्माविव सुखदुःखे जन्येते इत्यर्थः । एतदुक्तं भवति । नित्यस्यानित्यधर्माधानमेवोपकारो न तु नित्यस्वरूपकरणं येन तदनित्यं स्यात् । धर्मश्च धर्मिणो भिन्नो न तु धर्मिस्वभावः । यथा च भेदाविशेषे सत्यपि धामधूमयोरेव कार्यकारणभावो न वह्निक्रमेलकयोर्वस्तुस्वभावनियमात् एवं भेदाविशेषेऽपि आत्मनः पुण्यपापयोरेव धर्मधर्मिभावो नात्माकाशयोः पुण्याकाशयोर्वेति लेशमात्रमत्रोक्तम् । विस्तरस्तु क्षणभङ्गभङ्गे भविष्यतीति । नानेकान्तादिति । वाद्यभिमतपरमाणुनित्यत्वग्राहि प्रमाणदार्ढ्याभिप्रायेणानैकान्तिकत्वमुक्तम् । न तु बौद्धराद्धान्ते नित्यः परमाणुरिति । अत एवापरितोषेणान्यथासिद्धिमाह—चर्मणश्चानित्यत्वमिति । तद्वतां च उपलादीनाम् अवस्थानादिति । नासति विनाशप्रत्यये विनाशेऽस्ति किञ्चित् प्रमाणम् । उपलादिषु चावयवविभागविनाशाभ्यां प्राग् न विनाशोऽनुभूयते क्षणभङ्गश्च निषेत्स्यत इति भावः ।
§ 1318

आरब्धकार्याणां द्रव्यान्तरानारम्भिका इति अवयव्यारम्भकात् संयोगाद् भेद उक्तः । विक्रियायां च दृष्टान्ताभाव इति । धर्मोत्पादमन्तरेणाविनश्यतो धर्मिस्वरूपस्य विक्रियायामित्यर्थः । शङ्कते—यद्येवमिति । यद्येवंभूतो विकारः यादृशो घटादीनां श्यामतानिवृत्तौ लोहितोत्पादे विकारः तादृशो नात्मन इति यदि शङ्कसे इत्यर्थः । निराकरोति—आत्मन्यपीति । न बाह्येन्द्रियग्राह्य एव विकारोऽपि तु धर्मान्तरोत्पत्तिमात्रम् । तच्चात्मन्यप्यस्तीति ॥ ५ ॥ § 1319

## न कार्याश्रयकर्तृवधात् ॥ ३ । १ । ६ ॥ § 1320

465/tha

वैकल्यं वा प्रमापणं वेति । यथा शरीरमुपघ्नन् हिनस्त्येवं चक्षुराद्युत्पाटयन् हिनस्त्येवेति । पृच्छति—कुत एतदिति । स्वरूपतो हिंसासंभवे भाक्ती हिंसा न युक्तेति वैनाशिकस्याभिसन्धिः । उत्तरम्—हिंसाफलोपभोगस्येति । वैनाशिकस्यापि विशरारूणां भावानां न स्वरूपतो हिंसा कारणजन्येति

५ विशेषौ ] खलु गुणौ प्रचयसंयोगविभागविशेषौ nvt-C

१२ पि ] वह्निधूमयो° nvt-C

विलक्षणोत्पादो हिंसेति वक्तव्यं तत्र कारणव्यापारसंभवात्, तथा च तत्रापि हिंसा भाक्तीति भाक्तस्योभयत्राप्यविशेषाद् यतरस्मिन् पक्षे कृतविप्रणाशाकृताभ्यागमदोषो नास्ति स पक्षोऽभ्युपेतव्यः । स च नित्यात्मपक्षः । तस्मात् पारिशेष्यात् तत्सिद्धिरिति । § 1321

ज्ञानचिकीर्षाप्रयत्नानां समवायः कर्तृत्वमिति । उपायतद्व्यापाराणामनभिज्ञो हि चिकीर्षन्नपि न कर्ता । एवमभिज्ञोऽप्यचिकीर्षन्नकर्ता । तथा चिकीर्षन्नप्यलसतया अप्रयतमानो न कर्तेति । सुखदुःखसंवित्समवाय इति । स्वसुखदुःखेति द्रष्टव्यम् । अस्ति हि परकीयसुखदुःखसाक्षात्कारो योगिनां न चैते भोगिनः ॥ ६ ॥ § 1322

॥ इति शरीरव्यतिरेक्यात्मप्रकरणम् ॥

## ३.१.३ चक्षुरद्वैतप्रकरणम्

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ३ । १ । ७ ॥ § 1324

इतश्च देहादिव्यतिरिक्त आत्मा कुतः ? सव्य...नात् ॥ तत्र मानसमनुव्यवसायलक्षणं प्रत्यभिज्ञानं भाष्यकारो दर्शयति—तमेवैतर्हीति । व्यवसायं बाह्येन्द्रियजं प्रत्यभिज्ञानमाह—स एवायमर्थ इति । अस्यैव चानुव्यवसायः पूर्वः । § 1325

तदेतत् प्रकरणं वार्त्तिककारो दूषयति—सिद्धत्वादनारम्भ इति । युक्तोऽन्यः समुच्चयः शास्त्रे । अयमभिसन्धिः । काणस्तथा न पश्यति पिहितैकलोचनो वा यथा अविकलेन्द्रियः । तत्र यदि सव्यदक्षिणाधिष्ठानभेदभिन्नं चक्षुः, न चैतद् द्वयमणुना मनसा युगपदधिष्ठातुं शक्यमित्यन्यतरदधिष्ठेयम् । तथा च सर्व एवैकैकेन चक्षुषा पश्यतीति पिहितैकलोचनेन तुल्योपाम्भोऽविक- 466/tha
लाक्षस्य स्यात्, न चैवमस्ति । एकत्वे तु तदुभाभ्यामधिष्ठानाभ्यां विनिर्यत् क्वचिदपि मनसाधिष्ठितमेवेत्यविकलाक्षस्य न विकलाक्षवदुपलम्भप्रसङ्गः । तस्मादेकमनेकाधिष्ठानं चक्षुरिति । प्रकरणविरोधश्चेन्द्रियपञ्चत्वादिति । न चैतदेकस्मिन् शरीरे जात्यभिप्रायं घ्राणादीनां व्यक्तीनां चतसृणां व्यक्त्यन्तरेण समभिव्याहारोपपत्तेर्न तु जात्या । न हि भवति ब्राह्मणयुधिष्ठिरावागताविति किं तु ब्राह्मणराजन्याविति वा वसिष्ठयुधिष्ठिराविति वेति ॥ ७ ॥ § 1326

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ३ । १ । ८ ॥ § 1327

तदेतच्चक्षुरैक्येनाक्षिपति—नैक...त् ॥ ८ ॥ § 1328

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ३ । १ । ९ ॥ § 1329

समाधत्ते—एक…त्वम् ॥ विनाशाविनाशलक्षणविरुद्धधर्मसंसर्गात् नानात्वमित्यर्थः । विनष्टेऽप्येकस्मिन्नधिष्ठाने योऽविनष्टोऽवशिष्यते तेन प्रत्ययमात्रं काणस्येव भवति ॥ ९ ॥ § 1330

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ ३ । १ । १० ॥
§ 1331

आक्षेप्ताह—अव…तुः ॥ १० ॥ § 1332

दृष्टान्तविरोधादप्रतिषेधः ॥ ३ । १ । ११ ॥ § 1333
467/tha

समाधाता आह—दृष्टा…धः ॥ तृतीयं व्याख्यानमाह—अथ वा एकविनाशस्यानियमादिति । एकत्वे चक्षुषो विनाशनियमो न स्यात् । सव्यस्यैव चक्षुषो न दक्षिणस्यैव वेति । एकत्वात् सव्यविनाशे दक्षिणस्यापि विनाशप्रसङ्गात् । दृश्यते चायं नियमः । तस्माद् द्वावर्थौ पृथगावरणौ पृथगुपघातौ चेति । अपि च यदि चक्षुरेकं मध्येन नासावंशेनावपीडितम्, ततोऽङ्गुल्यावपीडितं यथैकमर्थं भिन्नमिवावभासयति अवपीडने च निवर्तमाने भिन्नावभासितावर्थौ संदधातीव तथा नासावंशावपीडितं भिन्नमिव दर्शयेत्, तन्निवृत्तौ संदध्यादिवेत्याह—अवपीडनाच्चैकस्य चक्षुष इति । रश्मिभेदाद् विषयसन्निकर्षस्य भेद इत्यर्थः । अङ्गुल्यवपीडितेन चक्षुषा दृष्टान्तेन विरोधादित्यर्थः । एकविनाशे इतराविनाशो वा दृष्टान्तः । तेन विरोधादिति । स खलु दृश्यमानश्च एकान्तावधारणाद् अन्तश्चेति दृष्टान्त इति सूत्रार्थः । § 1334

न च नासावंशावपीडनेन सर्वेषां सर्वदा सर्वत्र द्विचन्द्रवद्विभ्रमप्रसङ्गः, आगन्तुकमवपीडनं भ्रमहेतुर्नौत्पत्तिकमिति कार्यदर्शनात् कल्प्यते ॥ ११ ॥
§ 1335

इन्द्रियान्तरविकारात् ॥ ३ । १ । १२ ॥ § 1336

तदेवं प्रतिसन्धानद्वारेणात्मनि प्रत्यक्षं प्रमाणयित्वा अनुमानमिदानीं प्रमाणयति— अनुमीयते चायमिति । विप्रतिपन्नं हि प्रति प्रतिसन्धानमनुमानमुक्तम् । परमार्थतस्तु अनुभवानुसारमार्गोऽसाविति मन्तव्यम् । इन्द्रि…त् ॥ कस्यचित् फलस्य चिरविल्वादेरम्लस्याम्लेन रसेन सहचरितं रूपं वा गन्धं वानुभवति । अथ तत्सहचरितं रसमनुस्मरति । स्मृत्वा चेच्छति । इच्छातोऽस्य रसनेन्द्रियविकारो दन्तोदकसंप्लवलक्षणः प्रवर्तते । तद्दर्शनाच्चास्येच्छानुमीयते । इच्छया च स्मृतिः । सेयं स्मृतिरसत्यात्मनि सर्वेन्द्रियविषयवेदिनि न भवितुमर्हतीति ॥ १२ ॥ § 1337
468/tha

१ र्गात्] धर्माध्यासात् nvt-C
१० वेति] दक्षिणस्येति nvt-C
१४ र्थौ] °भासौ तावर्थौ nvt-C

## न स्मृतेः स्मर्तव्यविषयत्वात् ॥ ३ । १ । १३ ॥ § 1338

अस्याक्षेपसूत्रम्—न स्मृ...त् ॥ स्मृतिरात्मानं कारणत्वेनावगमयेत्, विषयत्वेन वा ? न तावत् कारणत्वेन तस्याः संस्कारकारणत्वात् । न विषयत्वेन स्मर्तव्यविषयत्वात् । स्मृताच्च तस्मादिन्द्रियान्तरविकारोत्पत्तिरित्यर्थः ॥ १३ ॥ § 1339

## तदात्मगुणसद्भावादप्रतिषेधः ॥ ३ । १ । १४ ॥ § 1340

समाधत्ते—तदा...धः ॥ असत्यात्मनि स्मृत्यनुत्पत्तिं दर्शयित्वा स्मर्तव्यार्थविषयैव स्मृतिर्नात्मादिविषयेति पूर्वपक्षिणोऽवधारणं खण्डयति—अपरिसंख्यानाच्च स्मृतिविषयस्येति । मानसानुव्यवसायजनितसंस्कारकारणासु चतसृष्वपि स्मृतिषु नार्थमात्रं विषयः । अपि तु ज्ञानज्ञातृज्ञेयानि सर्व एव विषयाः । चतुर्षु च वाक्येषु एकत्र कारकान्निष्कृष्टा ज्ञानक्रिया, यथा अमुष्मिन् मम ज्ञानमभूदिति अगृह्यमाणोऽप्यर्थः स्मृतिसन्निधापनामुष्मिन्नित्युच्यते । कारकादनिष्कृष्टाप्येकत्र पूर्वापरीभूतभावनाप्रधाना ज्ञानक्रिया गम्यते, यथा अज्ञासिषमहममुमर्थमिति । अन्यत्र ज्ञानभावने कारकादनिष्कृष्टे कर्तृप्रधाने यथा ज्ञातवानहममुमर्थमिति । अन्यत्र तु ज्ञानभावने कारकादनिष्कृष्टे कर्मप्रधाने यथा असावर्थो मया ज्ञात इति । समानार्थमिति । ज्ञानज्ञेयज्ञातृप्रकाशनं समानमित्यर्थः । एवं तावदगृह्यमाणेऽर्थे स्मृतिः प्रदर्शिता । अथ प्रत्यक्षेऽर्थे स्मृतिः प्रदर्श्यते—अथ प्रत्यक्षेऽर्थ इति । स्मृतिरिति प्रत्यभिज्ञानमाह स्मृतिच्छायावाहित्वात् । अद्राक्षमिति *पूर्वानुभूतमर्थमर्थदर्शनं परामृशति । तेनार्थदर्शनानुभवः कल्प्यताम् । *अनुभवानुभवकल्पना तु कुतस्त्येत्यत आह—न खल्वसंविदिते स्वे दर्शने इति । अपि त्वर्थदर्शनं तद्दर्शनं च संविदिते एवेत्यर्थः । कुत एतदित्यत आह—स्यादेतदद्राक्षमिति । यस्मादनुभवानुभवपुरःसरं यत्राद्राक्षमेतदिति भवति नूनं तत्रानुभवानुभ- 469/tha वप्रथाप्यभूदिति कल्पनीयमित्यर्थः । इतोऽपि न शरीरगुणः स्मृतिः बाल्ये अनुभूतस्य वार्धके स्मरणात् । अन्यद्धि बालशरीरमन्यच्च वृद्धशरीरमिति । आस्तां तावत् प्रत्यभिज्ञानं सादृश्यमपि दुर्विज्ञानम् । न च परमाणूनां चैतन्यम् । ते हि प्रत्येकं वा चेतयेरन् मिलिता वा ? पूर्वस्मिन् कल्पे अनेकचैतन्ये एकस्मिन् शरीरे नैकमत्यनियमो भवेत् । न हि नानाचेतनानामैकमत्यनियमो दृष्टः । मिलितानां तु चैतन्ये परमाणूनामावापोद्वापभेदेन मेलकस्य नानात्वात् स एवान्योपलब्धस्यान्येन स्मृत्यभावप्रसङ्गः । तस्मान्न शरीराधारा चेतनेति । § 1341

परेषां कारिकां दूषयति वार्त्तिककारः—एतेन न तच्चक्षुषि नो रूप इति प्रत्युक्तम् । आत्मनः पारिशेष्यात् सिद्धेः स्मृत्याधारत्वव्युत्पादनेनेत्यर्थः । यत्राधिकरणे तज्ज्ञानं निष्ठितं भवेत्, न तदधिकरणमस्ति न च नास्तीति

---

१९ *] पूर्वार्थम°nvt-C
२० *] अनुभवकल्पना°nvt-C
२८ मो] नैकमित्य° nvt-C

व्याहतम् । स्यादेतत् । नायं विशेषप्रतिषेधो न चक्षुषि विज्ञानं न रूप इति, किन्तु ये चक्षुराद्याश्रयं विज्ञानं मन्यन्ते तन्मतं प्रतिषिध्यते । आधारवत्त्वं तु न प्रतिषिद्धमप्रसक्तत्वादित्यत आह—कस्य वेति । अपि चैषा कारिका आत्माभावविवक्षया प्रयुक्ता आत्मसत्त्वमेव प्रतिपादयन्ती विवक्षितविरुद्धेत्याह—अयं च विज्ञानस्येति । § 1342

तदेवं भाष्यमतेनेन्द्रियान्तरविकारादिति सूत्रं व्याख्याय वार्त्तिककारः स्वमतेन व्याचष्टे—अथ वा एकस्येति । उक्तमेव प्रतिसन्धानं पुनरिन्द्रियान्तरविकारद्वारेण दर्शयति सूत्रम् । यथा च प्रतिसन्धानं देहेन्द्रियादिव्यतिरिक्तमात्मानं प्रतिपादयति तथाधस्तादेव विवृतमित्याह—उक्तन्यायमिति ॥ १४ ॥ § 1343

॥ चक्षुरद्वैतप्रकरणम् ॥

## ३.१.४ आत्मनो मनोव्यतिरेकित्वप्रकरणम्

470/tha

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ ३ । १ । १५ ॥
§ 1345

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ ३ । १ । १६ ॥
§ 1346

मतिः स्मृत्यनुमानादिज्ञानम् । यद्यपि चेदं प्रातिस्विकसंस्कारादिकारणकं तथाप्यवश्यमनेनेन्द्रियजेन भवितव्यम्, ज्ञानत्वात् । रूपादिज्ञानवदिति । तच्चेन्द्रियमसति चक्षुरादौ भावात् मतेश्चक्षुराद्यतिरिक्तं मन इत्युच्यते । *मतेः साधनं मन इति ॥ १६ ॥ § 1347

नियमश्च निरनुमानः ॥ ३ । १ । १७ ॥ § 1348

ननु भवतु करणान्तरं मनः, तत्तु कथमिन्द्रियान्तरसहकारि कथं चाणुपरिमाणमित्यत आह—तच्च ज्ञानायौगपद्यलिङ्गमिति । § 1349

वार्त्तिकम्—यदि सर्वं विज्ञानं ससाधनमुच्यते मनस्यपीति । न च तत्र मन एव करणमात्मनि वृत्तिविरोधात् । तदन्यस्य करणत्वे तस्येन्द्रियान्तरत्वे तज्ज्ञानायापीन्द्रियान्तरमुपासनीयमित्यनवस्था । अनिन्द्रियजत्वे तु मतावपि संस्काराद्येव कारणमस्तीति कृतमत्र मनसेति भावः । परिहरति—ओमितीति । यथा कारणसत्तया कार्यं जनितं कारणं ज्ञापयति एवं मनःसत्तया मनोलिङ्गज्ञानं जनितं मनो ज्ञापयति । तच्च लिङ्गजं मनोज्ञानं मनःसत्ताहेतुकम् । न च स्वात्मनि वृत्तिविरोधः । न हि मनःसत्तायां मनः

८ *] मते…इतिnvt-J
१४ त्वे] तस्ये…त्वेnvt-J

करणं मनोज्ञाने वा मनोज्ञानं करणं येन स्वात्मनि वृत्तिविरोधः स्यात्, केवलं वा मनः स्वज्ञाने करणं येनैकस्य कर्मकरणत्वे स्याताम् । अपि तु मनोज्ञाने लिङ्गज्ञानसहितं मनः करणम्, तत्स्वरूपं तु लिङ्गज्ञानसहितादिति न स्वात्मनि वृत्तिविरोधः । नाप्येकस्यैव केवलस्य कर्मकरणभाव इति 471/tha भावः । स्यादेतत् । लिङ्गज्ञानसहितस्य मनसः करणत्वे माभूदेकस्यैव कर्मकरणभावः स्वरूपेण कर्मत्वात्, लिङ्गज्ञानसाहित्येन च करणत्वात् । यदा तु योगिना प्रत्यक्षेण मनो गृह्यते तदा कथमेकस्य कर्मकरणभाव इत्यत आह—यस्य तु मनःप्रत्यक्षम् इति ॥ १७ ॥ § 1350

॥ मनोव्यतिरेकित्वप्रकरणम् ॥

## ३.१.५ आत्मनित्यत्वप्रकरणम्

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः ॥ ३ । १ । १८ ॥ § 1352

शास्त्रार्थभूताभ्युदयनिःश्रेयसोपयोगिनं परलोकिनं परिचिक्षिषुः परीक्षाहेतुभूतं संशयमाह—किं पुनरयमिति । § 1353

अत्र वार्त्तिककारः संशयं दूषयन् प्रकरणान्तरारम्भमाक्षिपति—एतस्मिन्नर्थे इति । देहेन्द्रियबुद्धिवेदनाभ्यो व्यतिरेकमात्मनो दर्शयता बाल्यकौमारयौवनवार्द्धकभेदेऽपि चैकात्मप्रतिसन्धानमर्थादुपपादयता शरीरनाशादूर्ध्वमात्मसद्भावो दर्शित एव । तावता च नः प्रयोजनम् । तत् किमवशिष्यते यत्र संशयो यत्कृते च प्रकरणोत्थापनमित्यर्थः । समाधत्ते—नानारभ्यमिति । सिद्धेऽपि देहादिव्यतिरेके बाल्यादिषु चानुगमे किमयमात्मा आशरीरोत्पत्तेरा च प्रायणाद् यावद्देहसन्तानभावभावी आत्मा आहोस्विदुपरतेऽपि देहादिसंतानेऽनुवर्तेत एवेत्येष विमर्शोऽद्यापि न निराकृत इति तन्निरासायेदं प्रकरणमारभ्यत इत्यर्थः । § 1354

472/tha

भाष्यम्—देहभेदादिति । ल्यब्लोपे पञ्चमी । बाल्यकौमारयौवनवार्द्धकदेहभेदमभिसमीक्ष्य प्रतिसन्धानादस्यावस्थानं सिद्धमित्यर्थः । पूर्वा...त्तेः ॥ वार्त्तिकम्—अभिप्रेतविषयप्रार्थनाप्राप्ताविति । अभिप्रेतविषयप्राप्ताविति वक्तव्ये प्रार्थनाग्रहणम् इष्यमाणतमत्वं सूचयति । नेष्यमाणप्राप्तौ हर्षोऽपि त्विष्यमाणतमप्राप्तौ, तेनाभिप्रेतविषयस्य प्रार्थनायां सत्यां प्राप्तेरित्यर्थः । हानाशक्यतेति विषयेण विषयिणीं बुद्धिमुपलक्षयति । अनिष्टो विषयो मरणादिः । तस्य साधनमहिव्याघ्रादिः । तस्योपनिपातः सन्निधानम् । तस्मिन् सति तद्व्याघ्रादिजिहासोरशक्यहानमेतदिति बुद्धिर्भयम् । सा हि कम्पादि जनयति

३ लोकिनं ] परलोकम् nvt-C
२१ म्पादि ] कस्यापि nvt-C

। इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोकः । तस्यैव पुरुषस्य यः प्राप्त्यशक्यः तत्र प्रार्थना शोकः । य इष्टो विषयः प्राप्तुमशक्यस्तत्र प्रार्थना इदं मे उपपद्यतां भवत्विति । इत्थंभूता चेयं प्रार्थना न स्वरूपेण शोक इत्यत आह—इष्टविषयवियोगे सतीति । अनर्हणेनेति यावत् । तदयमर्थः । इष्टवियोगे सति तत्प्राप्त्यशक्यताज्ञानं शोक इति । अनर्हणेन प्राप्त्यशक्यताज्ञानं शोचतः सूचयति—प्रत्यक्षबुद्धिनिरोध इति । प्रत्यक्षग्रहणेन ग्रहणमात्रमुपलक्षयति । तदनुगृहीतः स्मृत्यनुगृहीतः । तदनुसन्धानविषय इति । अनुसन्धीयत इत्यनुसन्धानं स्मृते यदनुसन्धेयं तद्विषय इत्यर्थः । तथापि स्मृतिप्रत्यभिज्ञानयोरविशेष इत्यत आह—वर्तमानस्य विषयस्य दृश्यस्य तद्भावविषय इति । दृष्टो हि निरालम्बनो बालः स्खलन् मातुरङ्कात् पतनस्यानिष्टसाधनत्वमनुस्मृत्येदं च पतनमिति परामृष्य तस्यानिष्टसाधनत्वमनुमाय रुदन् मातुर्मङ्गल्पमुरःसूत्रं विक्षिप्य हस्तौ वेपमान आलम्बमानः । तदस्यानया चेष्टया भयशोकावनुमीयेते इत्यर्थः ॥ १८ ॥ § 1355

पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः ॥ ३ । १ । १९ ॥ § 1356

473/tha

दृष्टेन विशेषितत्वादिति । दृष्टशब्देन विशेषितो व्यवस्थापितः कार्यकारणभावो न शक्यो व्युदसितुमित्यर्थः । अथात्मन उत्पत्तिनिरोधानुमानमिति । यद्विकारि तदुत्पत्तिनिरोधधर्मकं दृष्टम्, यथा पद्मम् । तथा चात्मा । तस्मादनित्य इत्यर्थः । यदि धर्मोपजननमात्रं विकारः स आकाशादिष्वपीत्यनेकान्तः । धर्मधर्मिणोश्च भेदान्न धर्मोपजननापायौ धर्मिणि युज्येते इति नानित्यत्वानुमानं विकारात् । अस्माकं त्वात्मनित्यत्वेऽनुमानमस्तीत्याशयेन नित्यत्वानुमानमाह—तन्न युक्तमिति । सर्वदामूर्तत्वादिति । घटादयोऽपि प्रथमे क्षणे भवन्त्यमूर्ताः । परिमाणविशेषो हि मूर्त्तिः । न च द्रव्यसमानकाला उत्पत्तिर्गुणानामिति तन्निवृत्त्यर्थं सर्वदेति उक्तम् ॥ १९ ॥ § 1357

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥ ३ । १ । २० ॥ § 1358

पञ्चात्मकानां पद्मादीनां विकाराः पञ्चात्मकविकारा इति ॥ २० ॥ § 1359

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ ३ । १ । २१ ॥ § 1360

सामान्यतोऽधिगतस्य विशेषज्ञापनार्थमिति हर्षादिना सामान्यत इच्छामात्रमवगतम् । तद्विशेषस्तु स्तन्याभिलाषो रागश्चात्रोक्त इत्यर्थः ॥ २१ ॥ § 1361

१२ मानः ] उपाददानः nvt-C
२३ मे ] एकस्मिन्nvt-C

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥ ३ । १ । २२ ॥ § 1362

न पूर्वाभ्यस्तस्मृत्यनुबन्ध एव प्रवृत्तिकारणम्, अयसोऽयस्कान्तोपसर्पणे तदभावात् । यदि च बालकस्य पूर्वाभ्यस्तस्मृत्यनुबन्धो भवेत् जात्यन्धबधिरादयः तज्जन्मानुभूतान् गन्धस्पर्शान् जात्यन्तरानुभूतान् रूपस्पर्शादीनपि 474/tha व्याचक्षीरन्नित्यभिप्रायः । विकल्प्य दूषयति—किमिदमिति । यौवनाद्यवस्थायां हि चेतनस्य प्रवृत्तिः क्षीरादौ पूर्वाभ्यस्तस्मृत्यनुबन्धहेतुका प्रतीतेति बाल्यावस्थायामपि चेतनस्य तद्धेतुकैव भवितुमर्हति । तेन हेतुना चेतनप्रवृत्तेः स्वाभाविकसंबन्धापगमाद् वह्निनेव धूमस्य । एवं व्यवस्थिते यत्र स्मृतेः कार्यं दृश्यते तन्मात्रविषयैव बालस्य स्मृतिरनुमीयते नान्यत्र । न च य एकस्य स्मरति तेनापरमपि स्मर्तव्यमिति कश्चिन्नियमहेतुरस्ति, येन जात्यन्धबधिरादयो रूपादिभेदानाचक्षीरन् अदृष्टपरिपाकोद्बोधितस्य संस्कारस्य तन्नियमेन नियमोपपत्तेः । अद्यत्वेऽपि चानुभूतेषु कस्यचिदेव स्मरामो न सर्वस्येति ॥ २२ ॥ § 1363

नान्यत्र प्रवृत्त्यभावात् ॥ ३ । १ । २३ ॥ § 1364

भाष्यम्—न च स्तन्याभिलाषलिङ्गमन्यदिति । स्तन्याभिलाषो लिङ्गं यस्य निमित्तान्तरस्य तत् तथोक्तम् । अन्यत्र लोष्टादौ लोष्टादेरिति यावत् षष्ठीसप्तम्योरभेदार्थत्वात् । एतदुक्तं भवति । लोष्टादेरन्यस्यायस्कान्ते प्रवृत्त्यभावाद् अयसश्च प्रवृत्तेर्न निर्निमित्तमुपसर्पणमिति पूर्वं व्याख्यातम् । संप्रति त्वन्यथा व्याचष्टे—अयसः खल्वपीति निपातसमुदायः कल्पान्तरं द्योतयति ॥ २३ ॥ § 1365

वीतरागजन्मादर्शनात् ॥ ३ । १ । २४ ॥ § 1366

पूर्वानुभूतविषयानुचिन्तनमिति । एकविषयः स्मृतिप्रवाहो विजातीयप्रत्ययासंभिन्नश्चिन्तनम् । तच्चानुभवस्य पश्चाद् भवतीत्यनुचिन्तनम् । न च तत् स्मृतिमन्तरेण भवति । न हि तत्र प्रवाहः प्रवाहिणं विनास्ति । तदेवानुचिन्तनम् । पूर्वानुभूतविषयप्रार्थना संकल्पः । प्रार्थनार्थः संकल्पः 475/tha प्रार्थनासंकल्पः । स च पूर्वानुभूतविषय इत्यर्थः । § 1367

अथास्मिन्नेव जन्मनि इन्द्रियजो विषयानुभवोऽन्वयव्यतिरेकावधारितेष्टोपायतासहकारी कस्माद् रागहेतुर्न भवतीत्यत आह वार्त्तिककारः—न च विषयावगमासमर्थेष्विति । तदनेन पूर्वानुभवश्च विषयाणामन्यस्मिन् जन्मनीति भाष्यं व्याख्यातम् ॥ २४ ॥ § 1368

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ ३ । १ । २५ ॥ § 1369

---

१२ न्] अदृष्टापरि°nvt-J
१३ चिदेव] स्मरत्यात्माnvt-C
१९ श्च] सनिमित्तमुप°nvt-C

अत्रायमुदितानुवाद इति भाष्यम् । तस्यार्थः—उदितमिदं चोद्यम् अयस्कान्तदृष्टान्तेन चोद्येन । तथापि तस्यानुवादो निदर्शनार्थः । पूर्वमयस्कान्तो निदर्शनम्, इदानीं तु घटादीनामुत्पद्यमानानां रूपादयो निदर्शनमिति तदर्थ इत्यर्थः । चोद्यस्योदितानुवादत्वात् परिहारोऽप्युदितानुवाद एवेति । § 1370

ननु च सगुणद्रव्योत्पत्तिवदिति साधनपक्षे मा भूत्, अनैकान्तिकापादनपक्षे तु को दोष इत्यत आह—वार्त्तिककारः—अनैकान्तिकपक्षे सूत्रम् । न, कस्मात् ? उक्तोत्तरत्वात् । उक्तोत्तरमेतद् यत इति ॥ २५ ॥ § 1371

## न सङ्कल्पनिमित्तत्वाद्रागादीनाम् ॥ ३ । १ । २६ ॥ § 1372

तन्मयत्वाद्राग इति । अभ्युपेत्यादृष्टकारणत्वं रागादीनां पूर्वं परिहृतम् । परमार्थतस्तु तन्मयत्वाद्राग इत्यर्थः । स्यादेतत्, यदि पूर्वाभ्यस्तस्मृत्यनुबन्धाद् रागादीनामुत्पादो हन्त, मनुष्यजन्मानन्तरं प्राप्तकरभभावस्य मनुष्यजन्मोचितानां भावनानामानन्तर्यात् तदनुरूपा एवास्य रागादयो भवेयुर्न करभानुरूपाः । करभजातेरस्य विजातीयजन्मसहस्रव्यवहितत्वादत आह—
476/tha जातिविशेषाच्चेति । कर्मणः संस्कारोद्बोधकत्वात् करभजात्यर्थेन कर्मणा जन्मसहस्रव्यवहितापि करभभावनोद्बोध्यते नानन्तरापि मनुष्यभावना प्रायणाभिभूतेति भावः । § 1373

अपि च मनुष्यत्वेन तुल्यत्वेऽपि प्रज्ञामेधाप्रकर्षनिकर्षभेददर्शनात् प्राग्भवीयाभ्यासकल्पना । अद्यत्वेऽपि हि शास्त्राभ्यासस्तद्गोचरप्रज्ञामभिवर्धयन् अन्वयव्यतिरेकाभ्यामनुभूयते । सोऽयमिह जन्मन्यकृतशास्त्राभ्यासस्य तद्विषयः प्रज्ञामेधातिशयः प्राग्भवीयमभ्यासातिशयं स्वकारणमवगमयति । जडस्य तु तिर्यगादिजातिशतव्यवधानपरिम्लानप्राग्भवीयसंस्कारस्य प्रज्ञामेधानिकर्ष इति कल्पनीयम् । तस्मात् नित्यस्यात्मनः कर्माविद्यानिबन्धनोऽनादिरेषोऽनेकविधशरीरपरिग्रहपरित्यागप्रवाहोऽपवर्गान्त इति सिद्धम् ॥ २६ ॥ § 1374

॥ इति आत्मनित्यत्वप्रकरणम् ॥

# ३.१.६ शरीरपरीक्षाप्रकरणम्

## पार्थिवं गुणान्तरोपलब्धेः ॥ ३ । १ । २७ ॥ § 1376

आत्मानन्तरमुद्दिष्टं शरीरं परिचिक्षिषमाणोऽवान्तरसंगतिमाह भाष्यकारःअनादिश्चेतनस्य शरीरयोगत्युक्तम् । परीक्षोपयोगिनिर्वेदसाधनत्वमाह—स्वकृत कर्मेति । परीक्षापूर्वस्य संशयमाह—किं घ्राणदिवदिति । एकद्वित्रिचतुः पञ्चप्रकृतिकतामास्थिषत शरीरस्य वादिनः, सोऽयं संख्याविकल्पः । § 1377

२१ तु] जनस्यnvt-C

अत्र वार्त्तिककारः स्वातन्त्र्येण शरीरपरीक्षायां संगतिमाह—आत्मानन्तरमिति । भाष्यमतेन संगतिमाह—अथ वेति । अवान्तरसंगतेस्तात्पर्यमाह—तस्मिन् परीक्ष्यमाण इति । § 1378

पार्थि…ब्धेः । मानुषं शरीरं पार्थिवं गन्धवत्त्वात् पार्थिवपरमाणुवदिति । न कारणं कार्यस्यात्मा । तत् कथमेकात्मकमित्यत आह—एकात्मक- 477/tha
मित्येकस्वभावम् । स्वो भावो भवितॄणां जातिः । एकजातीयसमवायिकारणत्वे हि तत् तदेकजातीयं स्यात् नान्यथेत्यर्थः । § 1379

अथ परोक्तान् हेतूननन्यथासिद्धयिष्यन् प्रथमं तावत् सुहृद्भावेनाह—न त्विदमबादिभिरिति ॥ २७ ॥ § 1380

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ ३ । १ । २८ ॥ § 1381

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥ ३ । १ । २९ ॥ § 1382

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥ ३ । १ । ३० ॥ § 1383

परोक्तसाधनमन्यथासिद्धमुक्त्वा बाधकमुक्तं भाष्यकृता । तदनुभाष्य वार्त्तिककारो व्याचष्टे—तदिदमनेकप्रकृतीति । पृथिव्युपदकाभ्यामारभ्यमाणमगन्धं कारणगन्धस्यैकस्यानारम्भकत्वात् । अयमभिसन्धिः, पृथिव्याप्यपरमाणू तावन्नैकं द्व्यणुकमारब्धुमर्हतः तयो रूपरसस्पर्शवत्त्वेन तदारम्भसंभवेऽपि गन्धवत्त्वाभावप्रसङ्गात् एकपार्थिवाणुसमवेतस्य गन्धस्यैकत्वेनानारम्भकत्वात् । नापि पार्थिवपरमाणुद्वयमेकश्च पाथसीयः परमाणुरित्यणूनामारम्भकत्वे गन्धवत्त्वोपपत्तिरिति साम्प्रतम्, परमाणूनां बहूनामनारम्भकत्वात् । तथा हि त्रयः परमाणवो न कार्यद्रव्यमारभन्ते परमाणुत्वे सति बहुत्वसंख्यायुक्तत्वाद् घटपरिगृहीतपरमाणुप्रचयवत् । आरम्भकत्वे तु तेषां घटोपगृहीतानां कपालशर्कराचूर्णक्रमो घटनाशे नोपलभ्येत । द्व्यणुके च विजातीयानारम्भकत्वे सिद्धे तेनैव दृष्टान्तेनान्यत्रापि विजातीयेनारम्भो निषेद्धः । एतेन पार्थिवावयवानां महतां बहूनां पाथसीयावयवैः शरीरारम्भः प्रत्युक्तः, विजातीयानामनारम्भकत्वस्य दृष्टान्तधर्मिणि विनिश्चयादिति । त- 478/tha
दनेन वार्त्तिककृता षड्विंशतिकल्पा निराकृता इति । यदि पुनरेकैकं कारणं स्यात्, ततः किं भवेदित्यत आह—एककारणत्वे त्विति । नित्यं निरपेक्षमेकं कारणमिति सततोत्पत्तिः कार्यस्य भवेत् । कारणविनाशात् तद्विभागाद् वा द्रव्यं विनश्यति । न चैकस्य कारणस्य नित्यस्य विनाशोऽस्ति । न च विभागः तस्य सद्वितीयवस्त्वाश्रयत्वात् । एकस्य व सद्वितीयाभावाद् विनाशकारणाभावेन कृतकनित्यत्वप्रसङ्गः । रूपमसहायमेकमवयविनि न रूपमारभत

इति नीरूपोऽवयवी । तथा च रूपसंस्काराभावेनावयवी नोपलभ्येतेत्यर्थः ॥ ३० ॥ § 1384

श्रुतिप्रामाण्याच्च ॥ ३ । १ । ३१ ॥ § 1385

स्मृतिः उत्पत्तिरित्यर्थः । न्यायसिद्धमर्थं श्रुतिः उपोद्बलयति न पुनरस्य प्रापिका, सांख्यराद्धान्तावलम्बनेनाप्यस्याः कथञ्चिदुपपत्तेः ॥ ३१ ॥ § 1386

॥ इति शरीरपरीक्षाप्रकरणम् ॥

## ३.१.७ इन्द्रियभौतिकत्वप्रकरणम्

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः ॥ ३ । १ । ३२ ॥ § 1388

उद्देशलक्षणक्रमानुरोधात् शरीरानन्तरमिन्द्रियाणां परीक्षां प्रतिजानीते भाष्यकारः—अथेमानीन्द्रियाणि प्रमेयक्रमेणेति । तत्र परीक्षापूर्वरूपं संशयमाह— किमाव्यक्तिकानि आहोस्विद्भौतिकानीति । उपलक्षणं चैतत् । यदापि भौतिकानि तदापि किं कृष्णसारं यदेतदुपलभ्यते तदेवेन्द्रियम् आहो तदधिष्ठानं तैजसमित्यपि संशयो द्रष्टव्यः । विप्रतिपत्तेः संशयः । तत्र पूर्वः
479/tha सांख्यनैयायिक योर्विप्रतिपत्तेः । उत्तरस्तु सौगतनैयायिकयोरिति । आव्यक्तिकत्वमाहङ्कारिकत्वं द्रष्टव्यम् । अहङ्काराद्धि बुद्धिविकाराद् वैकारिकाद् एकादशेन्द्रियाणि जायन्त इति सांख्या । आव्यक्तिकत्वं त्वव्यक्तस्य मूलकारणत्वादुक्तम् । विप्रतिपत्तिबीजं पृच्छति—कुतः संशय इति । विप्रतिपत्तिमाह कारणे कार्योपचारात् । उत्तरम्—कृष्णसारे सतीति । § 1389

वार्त्तिकम्—किमाव्यक्तिकानि ? तस्य व्याख्यानम्—आहङ्कारिकाणीति । कृष्ण…यः ॥ कृष्णसारे सत्युपलम्भात् कृष्णसारमेव चक्षुरिति बौद्धाः । व्यतिरिच्य चोपलम्भात् तदतिरिक्तम् । तच्चाहङ्कारिकम् अहङ्कारस्य विभुत्वेनाप्रतिघातात् । भौतिकत्वे तु काचाभ्रपटलादिभिर्भौतिकैः प्रतिघातप्रसङ्गादिति सांख्याः । § 1390

न प्रदीपादिभिरनेकान्तादिति । वर्तिदेशस्थेन पिण्डितेन तेजसा प्रदीपेनानेकान्तात् । प्रभा हि विसारिणी तं तमर्थं प्राप्य प्रकाशयति, न तु प्रदीप इत्यर्थः । विषयीभावादिति चेदिति । उत्पादविशेष एव स तादृक् चक्षुरर्थक्षणयोर्यतोऽप्राप्तयोरपि विषयविषयिभावाद् वेद्यवेदकत्वम् । न चायं व्यवहितविप्रकृष्टयोरिति न तयोर्वेद्यवेदकभाव इत्यर्थः । निराकरोति—नोक्तोत्तरत्वात् । स एवार्थो विप्रकृष्टो न विषयः, सन्निहितश्च विषय इत्येकस्य विषयीभावः तदभावश्चायुक्तः । क्षणभङ्गश्च निषेत्स्यत इति भावः ॥ ३२ ॥ § 1391

महदणुग्रहणात् ॥ ३ । १ । ३३ ॥ § 1392

तत्र सांख्यमुत्थाप्य बौद्धपक्षं दूषयति—अभौतिकानीति । कृष्णसाराधिकग्रहणे विवक्षिते अर्थग्रहणं संपातायातम् । न तु तदत्र विवक्षितम्, असाधकत्वादिति । मह...णात् ॥ धाना अङ्कुरः । अभौतिकं तु *व्यापकत्वादिति । तद्यथा विज्ञानाद्यभौतिकं महच्चाणु च गृह्णातीत्यर्थः ।
§ 1393

480/tha

एकदेशिमतेन दूषणमाह—न भौतिकेषु प्रदीपादिषु इति । ननु बुद्धिर्यदि महदण्वोः प्रकाशनं तत् किमिदानीं सर्वस्यैवाप्रकाशनमित्यत आह—अवधारितस्य ह्यर्थस्येति । न च हानोपादानोपेक्षाबुद्धयोऽण्व्यो महत्यो वेति भावः । पूर्वपक्ष्याह—नेन्द्रियेऽपि समानत्वादिति । तदेवमेकदेशिनोऽसाधारणत्वापादने पूर्वपक्षिणा दूषिते परमसिद्धान्ती आह—अभूतात्मकं व्यापकं चेति । सांख्यः शङ्कते—वृत्तिरिति । इन्द्रियाणां वृत्तयो ज्ञानहेतवः प्रतिषिध्यन्त इत्यर्थः । युगपदनेकविज्ञानप्रसङ्गाच्चेति । यद्यपि सांख्यीये राद्धान्ते दीर्घां शष्कुलीं भक्षयतो युगपदनेकज्ञानोत्पत्तिरभिमता तथापि क्वचित् क्रमोऽपि दृश्यते स न स्यात् । वृत्तिमतोऽवस्थाने तदभिन्ना वृत्तिरप्यवतिष्ठत इति तन्मात्राधीनोत्पत्तीनां विज्ञानानां क्रमो न स्यादिति भावः । उभयं नेष्यत इति । वृत्तिभ्योऽनन्यत्वं वृत्तिमतो नेष्यते, नापि वृत्तीनामनन्यत्वं वृत्तिमत इत्यर्थः ॥ ३३ ॥ § 1394

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥ ३ । १ । ३४ ॥ § 1395

नैयायिकः सांख्यं दूषयति—रश्म्य...णम् ॥ आहङ्कारिकत्वे चक्षुर्न प्रतिहन्यते यदि ततः काचाभ्रपटलान्तरितप्रकाशनवत् कुड्यान्तरितमपि प्रकाशयेत् न चैवमस्ति । तस्मात् कृष्णसाराधिष्ठानं तेज एव भौतिकं प्राप्य गृह्णाति कुड्यान्तरितं त्वर्थमप्राप्तं न गृह्णाति । काचाभ्रपटलान्तरिते तु वक्ष्यति । भूयोऽवयवसन्निकर्षानुग्रह इति । इन्द्रियावयवानामर्थावयवैः इन्द्रियावयवानामर्थेन अर्थावयवानामिन्द्रियेण इन्द्रियस्यार्थेनेति ॥ ३४ ॥ § 1396

तदनुपलब्धेरहेतुः ॥ ३ । १ । ३५ ॥ § 1397

तदनुपलब्धेरिति । नोपलब्धिलक्षणप्राप्तमनुपलभ्यमानं शक्यमनुमातुं नरविषाणादिनामप्यनुमानप्रसङ्गादित्यर्थः ॥ ३५ ॥ § 1398
481/tha

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ ३ । १ । ३६ ॥ § 1399

३ क्षिते ] अणुग्र° nvt-J
५ * ] विभुत्वादिति भाष्यपाठः nvt-C

परिहारः—नानुमीयमानस्येति । नानु…तुः ॥ सत्यम् । उपलब्धिलक्षणप्राप्तमनुपलभ्यमानं न शक्यमनुमातुम् । न तु महत्त्वाद्येवोपलक्षणप्राप्तेरपि तु रूपविशेषोऽपि । न चासौ विशेष उद्भवसमाख्यातः कृष्णसाराधिष्ठानस्य चक्षुषोऽस्तीत्यर्थः ॥ ३६ ॥ § 1400

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३ । १ । ३७ ॥ § 1401

आचार्यदेशीयानां मतमाह—अपरे त्विति । दूषयति—एवं तर्हीदमिति । यत्रोपलब्धिस्तत्रैतदिति सूत्रार्थः । ततो महत्त्वादिषु मध्ये यत्किञ्चिदेकं वक्तव्यं सूत्रकारेण यत्रोपलब्धिस्तत्रैतदित्यर्थस्यैकस्मादेव सिद्धेरनेकोपादानवैयर्थ्यम् । तस्मात् समस्तार्थयोग्यतार्थाभिधानपरं सूत्रम् । ननु यथासूत्रं महत्त्वाद्युपलब्धिकारणमस्ति चाक्षुषस्य रश्मेरिति कस्मादयं नोपलभ्यते इत्यत आह—द्रव्यगुणधर्मेति ॥ ३७ ॥* § 1402

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३ । १ । ३८ ॥ § 1403

अनेकरश्मिसन्निपाते स्पर्शस्योद्भूतौ सत्यां द्रव्यं दह्येत रूपोद्भूतौ च सत्यां व्यवहितत्वात् आदौ निपतितेन चक्षुरन्तरेण द्रव्यस्यानुपलब्ध्या भवितव्यम् । शङ्कते—अथानेकेति । नानानयनावयवैरेकोऽसौ नयनावयव्यारभ्यत इत्यर्थः । निराकरोति—एवं सतीति । नानानयनावयवैरारब्ध एकोऽसौ नयनावयवी समग्रासमग्रचक्षुःपुरुषसाधारण इत्युपलब्धिस्तुल्या स्यादित्यर्थः ॥ ३८ ॥ § 1404

482/tha

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ ३ । १ । ३९ ॥ § 1405

न रात्रावप्यनुपलब्धेः ॥ ३ । १ । ४० ॥ § 1406

न हि यद् यस्याभिभावकं तत् तस्य व्यञ्जकमिति । रात्रौ यद् लोष्टतेजसोऽभिभावकं दिवा कथं तदेवास्य व्यञ्जकं येन तदभावाद् रात्रौ लोष्टतेजो नोपलभ्येत इत्यर्थः । अपिशब्दाद् गम्यत इति । न रात्रावपीति सूत्रगतादित्यर्थः ॥ ४० ॥ § 1407

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ३ । १ । ४१ ॥ § 1408

---

८ स्मादेव] °तदित्येकस्मादेव nvt-C
९ रं] संभावनायोग्यताभि° nvt-C
९ थासूत्रं] यथाश्रुतं nvt-C
११ *] इतः परं

अनेकद्रव्यः…रूपोपलब्धिरिति वै. सू. ४. १. ९ न्यायभाष्योद्धृतं न्यायसूत्रत्वेन समुल्लिखन्ति केचन ॥

सोऽयं चाक्षुषो रश्मिः किमभिभवात् नोपलभ्यते, किं वानुद्भूतेरित्यत आह भाष्यकारः । उपपन्नरूपा चेयम् । अनभिव्यक्तितोऽनुपलब्धिरिति योजना । अनभिव्यक्तितः अनुद्भूतेरित्यर्थः । अत्र हेतुः बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेः । विषयश्च स्वरूपमात्मनोऽन्यच्च । एतदुक्तं भवति । यदुपलब्धौ बाह्यप्रकाशमनुग्राहकमपेक्षते, तस्यानुद्भूतेरेवानुपलब्धिर्न त्वभिभूतेः । यथा हेमन्ते विषक्तावयवस्याप्यस्य द्रव्यस्य । आप्यं हि द्रव्यं विषक्तावयवं स्वविषयोपलब्धौ बाह्यप्रकाशानुग्रहमपेक्षमाणं दृष्टम् । चक्षुरपि च विषयोपलब्धौ बाह्यप्रकाशमपेक्षते निरालोके तस्याप्रवृत्तेः । तस्माद् विषयोपलब्धौ बाह्यप्रकाशानुग्रहापेक्षत्वात् तदनुद्भूत्या न प्रतीयते न पुनरभिभूत्येति सिद्धं प्रकृतम् । तदेतद् वार्त्तिककारो व्याचष्टे—तस्य विद्यमानस्येति ॥ ४१ ॥
§ 1409

## अभिव्यक्तौ चाभिभवात् ॥ ३ । १ । ४२ ॥ § 1410

483/tha

तमिमं विशेषं मध्यन्दिनोल्काप्रकाशादावविद्वान् पृच्छति—कस्मात्पुनर्नायनस्येति । अस्योत्तरम्—अभि...वात् ॥ अभिभवनीयस्वरूपमाह—यदुद्भूतरूपमिति । तद्वैधर्म्यमनुद्भूतरूपस्याह—अनुद्भूतरूपश्चेति । अनुद्भूतरूपस्याभिभवाभावे निदर्शनमाह—यदनुद्भूतरूपमिति । बाह्यप्रकाशानुग्रहापेक्षस्य चाभिभवाभावे निदर्शनमाह—यच्च बाह्यप्रकाशानुग्रहापेक्षमिति । कृष्णसारं रश्मिमदित्युच्यमाने प्रसन्नान्धस्यापि कृष्णसारं रश्मिमत् साध्येत । तथा चापसिद्धान्त इत्यत आह—विप्रतिपत्तिविषय इति । तेन विप्रतिपत्तिविषयः कृष्णसारं रश्मिमदिति साध्यनिर्देशः । उपलब्धौ निमित्तत्वादित्युच्यमाने गन्धादिभिरनैकान्तिकं स्यादत उक्तम्—रूपोपलब्धाविति रूपसाक्षात्कार इत्यर्थः । तथापि सन्निकर्षादिभिरनेकान्तोऽत उक्तम्—द्रव्यत्वे सतीति । तथापि मनसानेकान्तोऽत उक्तम्—नियतस्य साधनाङ्गस्येति । असाधारणस्य साधनाङ्गत्वे सतीति मनसस्तु साधारणस्य साधनाङ्गस्य रूपोपलब्धौ निमित्तत्वम् । साधनं समुदायस्तदङ्गमवयवः । अथ वेति । द्रव्यत्वे सति नियतत्वे चार्थप्रकाशकत्वादित्युच्यमाने घ्राणादिभिरनेकान्तः स्यादत उक्तम्—स्फटिकादिव्यवहितेति ॥ ४२ ॥ § 1411

## नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ३ । १ । ४३ ॥ § 1412

मानुषं चक्षू रश्मिमदिति । रूपाद्युपलब्धिनिमित्तत्वादिति सावधारणं रूपादीनामेवेति । तेन न मनसानेकान्तः । तथापि सन्निकर्षेणानेकान्त इत्यत उक्तम्— अप्राप्तिस्वभावत्व इति । इतश्च भौतिकानीन्द्रियाणीति । चक्षूरसनत्वग्घ्राणानीत्यर्थः । तथापि श्रोत्रस्य रूपं न ज्ञायते कीदृशं तदित्य-

१ वात् ] अभावात् nvt-C
६ व्यं ] अविषक्ता° nvt-J
१४ माह ] °भवनीयस्य रूप°nvt-J
२० सारं ] °सारं रूपं चnvt-C

त आह—भूतं श्रोत्रम् । अर्थप्रकाशकत्वादित्युच्यमाने मनसानेकान्तोऽत आह—प्राप्तेति । न हि रूपादिभिः सहास्ति मनसः प्राप्तिः । तथापि म- 484/tha नस्येवानेकान्तः । आन्तरं हि सुखादि मनः प्राप्य प्रकाशयति । अत आह—बाह्येति । तथापि सन्निकर्षादृष्टादिभिरनेकान्तोऽत आह—द्रव्यत्वे सतीति । § 1413

शङ्काभाष्यम्—जातिभेदवदिन्द्रियभेद इति चेत् ? निराकरोति—धर्मभेदमात्रं चानुपपन्नम् । वृषदंशनयनस्य रश्मिमत्त्वं धर्मो मानुषनयनस्य त्वतद्वत्त्वमिति योऽयं धर्मभेदः स एव मात्रम् । तच्चानुपपन्नम् । चोऽवधारणे भिन्नक्रमः । अनुपपन्नमेवेति योजना । कुतोऽनुपपन्नमित्यत्र हेतुमाह—आवरणस्येति । यथा हि धूमवत्त्वं पर्वते रसवत्यां चान्यत् तथाप्येष विशेषोऽस्याग्निमत्त्वानग्नित्वे प्रत्यप्रयोजकः । एवं विडालत्वमनुष्यत्वे अप्रयोजके इत्यर्थः ॥ ४३ ॥ § 1414

अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ ३ । १ । ४४ ॥ § 1415

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ३ । १ । ४५ ॥ § 1416

अप्रतीघातात् सन्निकर्षोपपत्तिः ॥ ३ । १ । ४६ ॥ § 1417

सोऽप्रति हन्यमान इति । स रश्मिः अप्रतिहन्यमानः काचेन काचं व्यतिभिद्यार्थेन संबध्यते काचान्तर्गतेन ॥ ४६ ॥ § 1418

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥ ३ । १ । ४७ ॥ § 1419

वार्त्तिकम्—अव्यूह्यमानावयवद्रव्यानुप्रवेश इति । यस्य द्रव्यस्य भर्जनकपालादेः अवयवा न व्यूह्यन्ते पूर्वोत्पन्नद्रव्यारम्भकसंयोगनाशेन द्रव्यान्तरजनकसंयोगोत्पादनं व्यूहनं तन्न क्रियन्ते । तस्य द्रव्यस्य भर्जनकपालादेः अव्यूह्यमानस्य अवयवव्यूहनमवयविनोऽपीति अव्यूह्यमानस्येत्युक्तम् । तस्य भर्जनकपालादेः अन्तरावयवैर्योऽभिसंबन्धो वह्नेः सोऽप्रविघातः । § 1420
485/tha

एतदुक्तं भवति—सान्तरत्वादवयविद्रव्याणां तदविनाशेनाग्नेर्येऽनुप्रवेशः सोऽप्रतिघात इति । प्रवेशेऽविघातमुक्त्वा निःसरणेऽप्यविघातमाह— अन्तर्व्यवस्थितस्य वा द्रव्यस्य मधूदकादेः बहिरवस्थितहस्तादिप्राप्तिः । तस्य कीदृशस्य बहिरित्यत आह—अव्यूह्यमाना अवयवा यस्य द्रव्यस्य कलसादेः तस्य बहिरिति ॥ ४७ ॥ § 1421

२५ विघातः ] अविघातः nvt-J

नेतरेतरधर्मप्रसङ्गात् ॥ ३ । १ । ४८ ॥ § 1422

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः ॥ ३ । १ । ४९ ॥ § 1423

द्रव्यान्तरासंपृक्तद्रव्यसमवायः स्वच्छतेत्यर्थः । प्रसङ्गात् प्रतिबिम्बभ्रमोत्पादक्रममाह—आदर्शादिष्विति । यदभिमुखमग्रमिति । द्रष्टुः पुरुषस्याभिमुखं नयनरश्मेः परावृत्तस्याग्रं तदभिमुखं मुखादि पश्यति । सारूप्यनिबन्धनत्वाद् विभ्रमाणां सारूप्यमिहाप्याह—यथाग्रतोऽवस्थितस्य पुरुषस्य मुखं लोचनरोचिरग्रसंबद्धमभिमुखम् एवमेतदपीति । नन्वादर्शे प्रतिहतश्चेत् नयनरश्मिः परावृत्तः कथं पश्चादभिमुखमुखविभ्रमहेतुः ? हन्त भोः पातमात्रादादर्शज्ञानेन भवितव्यम् पश्चात् प्रतिबिम्बविभ्रमेण, न चैवमस्ति यौगपद्यप्रतिभासादित्यत आह—आदर्शेति । कुतस्तर्हि मणिकृपाणदर्पणतलेषु नानानिर्भासः प्रतिबिम्बावभास इत्यत आह—आदर्शरूपानुग्रहात् त्विति ॥ ४९ ॥ § 1424

॥ इन्द्रियभौतिकत्वप्रकरणम् ॥

## ३.१.८ इन्द्रियनानात्वप्रकरणम्

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ ३ । १ । ५० ॥ § 1426

486/tha

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ३ । १ । ५१ ॥ § 1427

संप्रति तेषामेवेन्द्रियाणामेकानेकत्वे परीचिक्षिषुः संदिग्धे—अथापि खल्वेकमिति । प्रश्नपूर्वकं सूत्रमवतारयति—कुतः संशयः ? § 1428

स्थाना...यः । तत्र केचिदिदं सूत्रं भाष्यमतानपेक्षं यथाश्रुति व्याचक्षते । तद्दूषणपुरासरं भाष्यव्याख्यानं ग्रहीतु यथाश्रुति व्याख्यानं परेषां सूत्रपाठपूर्वकमुपन्यस्यति—एके त्विति । दूषयति—अनुपपन्नरूपश्चायमिति । अत्र हि यथाश्रुति स्थानान्यत्व इति निमित्तसप्तम्या नानात्वस्य बीजं स्थानान्यत्वमुक्तं न त्वेकत्वस्येति । एकत्वस्य तु बीजं नानास्थानत्वं यथोक्तम् । अवयविनानास्थानत्वादिति अवयवीत्येकत्वमुपलक्षयति । स्थानान्यत्वं च स्थानानामन्यत्वमुच्यते । नानास्थानत्वं च नानास्थानानि यस्येत्यन्यपदार्थः स्थानान्यत्वादन्यः । न च धर्मद्वयं साक्षात् संशयकारणमित्येकतर-

१३ च ] स्थानस्यान्य°nvt-C

स्यैकानेकसाधारण्यं वाच्यम् । तत्र यदि तावदेवं क्रियते—संशयः स्थानान्यत्वे नानात्वेकत्वदर्शनादिति तदा सूत्रार्थालोचनेन एकत्वे स्थानान्यत्वस्यादर्शनान्न समानधर्मः, सूत्रं खल्वेकत्वे नानास्थानत्वमाह न स्थानान्यत्वम् । अनेकत्वमात्रे हि तदुक्तं सूत्रकारेण स्थानान्यत्वे नानात्वादिति । अथ नानास्थानत्वे सत्येकानेकत्वदर्शनात् संशय इति ? एतद् दूषयति—तदा द्रव्यं नानास्थानमनेकं न किञ्चिद् दृष्टं सूत्रे । अवयविनानास्थानत्वादिति हि सूत्रं नानास्थानत्वेनैकत्वमाह, न तु नानात्वमपि । यत् पुनर्घटाद्यनेकं न तन्नानास्थानमुक्तं सूत्रकृता । अपि तु स्थानान्यत्वं तस्य सूत्रकृता उक्तं स्थानान्यत्वे नानात्वादित्यनेन । दूषणमुपसंहरति—सोऽयं संशय उभयथानुपपन्न इन्द्रियेषु यथाश्रुतसूत्रपरिग्रहेण । उभयथा इति स्थानान्यत्वेन नानास्थानत्वेन चेत्यर्थः । तदेवं परव्याख्यानं दूषयित्वा भाष्यकारीयस्य व्याख्यानस्य युक्तत्वमाह—487/tha स्थानेषु तु युक्तः । स्थानेष्विति निमित्तसप्तमी । नानास्थानत्वनिमित्त इन्द्रियेस्यैकत्वानेकत्वसंशयो युक्तः । नानास्थानं खल्वेकमवयविद्रव्यं दृष्टमनेकं च भिन्नभाजनगतं तालफलमिति । इन्द्रियविषयं नानास्थाननिमित्तकं संशयमाह—किं नानास्थानानि इन्द्रियाणि उत नानास्थानमेकमिन्द्रियमिति । तदिदमुक्तं भाष्यकारेण, बहूनि च द्रव्याणि नानास्थानानि दृश्यन्ते, नानास्थानश्च सन्नेकोऽवयवीति । तेनेन्द्रियेषु भिन्नस्थानेषु संशय इति । सूत्रेऽपि स्थानान्यत्वे इत्यनेन नानास्थानत्वमेवोपलक्षणीयमित्यविरोधः । यथाश्रुतस्तु न सूत्रार्थ इत्याह—इन्द्रियेषु तु न स्थाननानात्वात् संभवति नापि नानास्थानत्वादिति । किं त्विन्द्रियविषयो नानास्थानत्वादेव संशयो भाष्यकारीयः साधीयानित्यर्थः । तदेवं परोक्तं संशयबीजं दूषयित्वा भाष्यकारीयं संशयबीजं दर्शयित्वा वार्त्तिककारः स्वातन्त्र्येण संशयबीजमाह—शरीरव्यतिरेकात् सत्त्वाच्च संशय इति ॥ ५१ ॥ § 1429

त्वगव्यतिरेकात् ॥ ३ । १ । ५२ ॥ § 1430

पूर्वपक्षं गृह्णाति—त्वग...कात् ॥ कः पुनरयमव्यतिरेक इति । घटादिप्राप्तं चक्षुस्त्वचो व्यतिरिच्यत एवेति भावः । उत्तरम्—सर्वाधिष्ठानसंबन्ध इति । सौत्रस्याव्यतिरेकशब्दस्य व्याख्यानान्तरमाह—सति भावो वेति । तदनेन यस्यां च सत्याम् इति भाष्यं व्याख्यातम् । चो विकल्पार्थः । सिद्धान्तभाष्यम्—नेन्द्रियेति । लोकविरोध इति । लोक्यते ज्ञायतेऽनेनेति लोकः प्रमाणम्, तद्विरोध इत्यर्थः ? अनेकेन चानिन्द्रियेणेति । शरीरं पार्थिवं भूतान्तरसंपृक्तं च तद् इन्द्रियाधिष्ठानानि शरीरावयवभूतानि पृथिव्यादिना प्राप्तानीत्यनेकान्तः । न व्याघातादिति परदोषोद्भावनपरम् । न पुनः सिद्धान्तिनस्त्वगवयवत्वमिन्द्रियान्तराणामभिमतमिति ॥ ५२ ॥ § 1431
488/tha

१४ तं] फलमिति nvt-C

न युगपदर्थानुपलब्धेः ॥ ३ । १ । ५३ ॥ § 1432

एवं भाष्यकारीय सिद्धान्तमुक्त्वा सौत्रं सिद्धान्तमाह—सूत्रेण चाभिसंबन्धः सिद्धान्तस्य । न यु...ब्धेः ॥ § 1433

सूत्रं व्याचष्टे, नैतदस्ति एकमिन्द्रियमिति । कस्मात् ? युगपदर्थानुपलब्धेरिति । तदेतत् सूत्रं भाष्यदृष्ट्या व्याचष्टे वार्त्तिककारः—यस्यैकमिन्द्रियमिति । तदेतद् व्याख्यानं दूषयति—नैकेन्द्रियग्राह्याणामिति । भाष्यव्याख्यानं दूषयित्वा सूत्रम् अन्यथा व्याख्यातुं भूमिरचनां करोति—एवं ब्रुवाण एकेन्द्रियवादीति । सामि अर्धम् । एकमपि इन्द्रियमर्धं प्राप्य गृह्णाति । अप्राप्य चार्धमेकदेशमिति यावत् । करणधर्ममतिक्रामन्तं प्रति युगपदुपलब्धिप्रसङ्गो दूषणमित्यर्थः ॥ ५३ ॥ § 1434

विप्रतिषेधाच्च न त्वगेका ॥ ३ । १ । ५४ ॥ § 1435

एकत्वप्रतिषेधादेव पारिशेष्यान्नानात्वं सेत्स्यतीत्यत आह—नासाधना क्रियेति । एकत्वं च कथमिति । न शक्यः पक्षो दूषयितुमित्युक्तम् । न च साधननिराकरणमात्रात् साध्यं निवर्तते । मा भूद् धूमनिवृत्तौ वह्निनिवृत्तिरित्यर्थः । पृच्छति—कथं तर्हीति । उत्तरम्—प्रतिषेधाच्चानन्तरमिति । यद्यप्यनन्तरशब्दप्रयोगे पञ्चमी न स्मर्यते तथाप्यन्यशब्दस्याध्याहारेण पञ्चमी व्याख्येया । अनन्तरं प्रतिषेधादन्यः स्थापनाहेतुरिति योजना । अथवेति । व्यतिरेकी हि हेतुर्द्वयोर्विरुद्धयोरेकतरनिषेधेन एकतरं व्यवस्थापयति—यथा नैरात्म्यनिषेधेन जीवच्छरीरस्य सात्मकत्वमिति ॥ ५४ ॥ § 1436

इन्द्रियार्थपञ्चत्वात् ॥ ३ । १ । ५५ ॥ § 1437

सूत्रम् आक्षिपति—इदं तु सूत्रामिति । एष न्यायोऽनया वचोभङ्ग्या सूत्रित इत्यर्थः ॥ ५५ ॥ § 1438
489/tha

न तदर्थबहुत्वात् ॥ ३ । १ । ५६ ॥ § 1439

पूर्वपक्षिणः सूत्रम्—न, त...त्वात् ॥ पूर्वपक्षमाक्षिपति—न विरोधादिति । पूर्वपक्षिणः समाधानं नासाधनाद् इति ॥ ५६ ॥ § 1440

गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः ॥ ३ । १ । ५७ ॥ § 1441

सिद्धान्तः—गन्ध...धः ॥ ५७ ॥ § 1442

विषयत्वाव्यतिरेकादेकत्वम् ॥ ३ । १ । ५८ ॥ § 1443

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ३ । १ । ५९ ॥ § 1444

यस्याधिष्ठानं भिन्नम् इति । *नियतम् । एतदुक्तं भवति—रूपव्यञ्जकस्य कृष्णसारमेवाधिष्ठानं न कर्णशष्कुल्यादि । एवमन्यत्रापि द्रष्टव्यम् । यस्य पुनः सिद्धान्तिनः । अधिष्ठानभेदः तथा च तदधिष्ठानस्येन्द्रियस्यापि भेदः तस्य एकाधिष्ठानविनाशेन तद्गतस्येन्द्रियस्य विनाशेऽपि अधिष्ठानान्तराश्रयस्य इन्द्रियान्तरस्य अवस्थानमिति न एकाधिष्ठाननाशे सर्वाधिष्ठाननाशात् सर्वेन्द्रियनाशलक्षणः तथैकाधिष्ठानावस्थाने सर्वेन्द्रियावस्थानलक्षणो दोष इति । इष्टानिष्टोपेक्षणीय इति । उपेक्षणीयस्यापि पुरुषार्थत्वं भवति केनचित् प्रकारेण । यदि हि तत्र पुरुषः प्रवर्तते ततो निष्फले कर्मणि प्रवृत्तौ पुरुषस्तप्येत । दुःखं कर्मेत्यनुभवो लोकस्य उपेक्षणीयत्वे तु तन्न तस्य भवतीति ॥ ५९ ॥ § 1445

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ३ । १ । ६० ॥ § 1446

490/tha तत्र पार्थिवं घ्राणं रूपरसगन्धस्पर्शेषु नियमेन द्रव्यत्वे सति गन्धस्यैव व्यञ्जकत्वाद् बाह्यपार्थिववदिति । यथा हि मृगमदगन्धव्यञ्जकाः कुङ्कुटोद्घारादयः पार्थिवा इत्यर्थः । न चातपेनानेकान्तः । न ह्यातपो गन्धस्य व्यञ्जकोऽपि तु जलाभिभूतो गन्धो द्रव्याणां नोपलभ्यते केवलं जलमातपोऽपनयति, न तु द्रव्यस्य गन्धमभिव्यनक्ति । तस्मान्नानेकान्तः । एवं रसनमिन्द्रियमाप्यं गन्धादिषु मध्ये नियमेन रसस्य व्यञ्जकत्वाद् दन्तान्तरस्यन्दमानोदकबिन्दुवत् । न खलु विशुष्यदास्यो मोदकादिरसमनुभवति । एवं तैजसं चक्षुः गन्धदिषु मध्ये नियमेन रूपस्य व्यञ्जकत्वात् प्रदीपवत् । एवं वायवीयं त्वगिन्द्रियं गन्धादिषु मध्ये नियमेन स्पर्शव्यञ्जकत्वात् स्वेदोदबिन्दुशीतस्पर्शव्यञ्जकव्यजनपवनवत् । नियमग्रहणं मनोनिवृत्त्यर्थम् । गन्धादिषु मध्ये इति चावधारणसिध्यर्थम्, अन्यथा घ्राणादीनां गन्धत्वादिव्यञ्जकत्वेनावधारणं न स्यात् । तदेतदाह—एवं शेषेष्विति । एवं चेन्द्रियपञ्चत्वे हस्तपादपायूपस्थवाचामिन्द्रियत्वनिषेधोऽपि संसूचितः इन्द्रियलक्षणविरहात् । यच्छरीरसंयुक्तं संस्कारकदोषव्यतिरिक्तं साक्षात्प्रतीतिसाधनं तदिन्द्रियमिति हीन्द्रियलक्षणम् । न चैतदस्ति हस्तादिषु । तज् ज्ञानेन्द्रियाणां लक्षणम्, इमानि तु कर्मेन्द्रियाणीति चेत् ? हन्तैषामिन्द्रियत्वे लक्षणान्तरं वक्तव्यम् । शरीराश्रितमसाधारणकार्यकारीन्द्रियमितीन्द्रियलक्षणमिति चेद् ? वक्तव्यमेषामसाधारणं कार्यम् । उक्तम् वचनादानविहरणोत्सर्गानन्दाः पञ्चानाम् इति । नन्वादानविहरणोत्सर्गास्तावद् वक्त्रहस्तादिभिरपि शक्याः कर्तुम् । अपि चास्ति कण्ठहृदयामाशयपक्वाशयादीनां निगरणादितत्तदसाधारणं कार्यमिति तान्यपीन्द्रियाणि प्रसज्येरन्निति । तस्माद् यत्किञ्चिदेतदपीति ॥ ६० ॥ § 1447

॥ इन्द्रियनानात्वप्रकरणम् ॥

३ *] भिन्नं नियतम्nvt-C
२२ ध्ये] स्पर्शस्यैव व्य° nvt-C
२६ निषेधोऽपि] संगृहीतः nvt-J

## ३.१.९ अर्थपरीक्षाप्रकरणम्

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥ ३ । १ । ६१ ॥ § 1449

491/tha

अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥ ३ । १ । ६२ ॥ § 1450

क्रमप्राप्तमर्थलक्षणं परीचिक्षिषमाणोऽर्थलक्षणं स्मारयति, गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टमिति । लक्षितमिति वक्तव्ये संमुग्धाभिधानम् । सामान्यादुद्दिष्टमित्युक्तम् । तत्र परीक्षामुखं संशयमाह—उद्देशश्च नियोगेति । नियोगादीनां रूपमाह—तत्र नियोग इति । तदेवं विमृश्य नियोगसमुच्चयौ परित्यज्य विकल्पमालम्बते सूत्राभ्याम्—अतो विशेषणार्थमिति—गन्ध...व्याः ॥ अप्ते...रः ॥ विशेषणार्थमिति सूत्रयोस्तात्पर्यमुक्तम् । तदेव स्फुटयति नियमार्थे इति । उत्तरेष्वबादिष्वेकैकशोऽपकर्षो गन्धादीनां स्पर्शपर्यन्तानाम् । तथा हि चतुर्षुगन्धापकर्षः अप्स्वपकृष्टस्य च गन्धस्य पुनरुद्भवो नास्ति अद्भ्य उत्तरे तेजसि रसस्यापकर्षः । एवमपकृष्टयोश्च गन्धरसयोः पुनरुद्भवो नास्तीति तेजस उत्तरे वायौ रूपापकर्ष इति । एवमपकृष्टानां गन्धरसरूपाणां पुनरुद्भवो नास्तीति वायोरुत्तरस्मिन्नाकाशे स्पर्शस्यापकर्षः । तदिदमुक्तम्—एकैकश इति । अव्युत्पन्नोऽयमुत्तरशब्दो न तु तरबन्तः । तेन बहूनां निर्धारणेऽप्युपपन्नार्थ इति । भवतु तरब्निर्देशः तथापि न दोष इत्याह—भवतु वेति । क्वचित् पाठः तन्त्रं वेति । स यथाभाष्यं स्फुटार्थ एव ॥ ६१—६२ ॥ § 1451

न सर्वगुणानुपलब्धेः ॥ ३ । १ । ६३ ॥ § 1452

पूर्वपक्षी नियोगपक्षमुत्थापयति—न स...ब्धेः ॥ पृथिव्यादिप्रकृतीनां घ्राणादीनां गन्धादिप्रतिनियम एवमुपपद्यते । यदि गन्धमात्रगुणा पृथिवी रसमात्रगुणा आप इत्यादि, न त्वन्यथा । अन्यथा तु पार्थिवेन घ्राणेन गन्धवद् रसरूपस्पर्शा अपि व्यज्येरन् अविशेषादित्यर्थः ॥ ६३ ॥ § 1453

492/tha

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ३ । १ । ६४ ॥ § 1454

---

६ मिति ] १. १. १४
१६ न्तः ] °शब्दोऽनन्तरवचनः nvt-C
१८ पाठः ] तन्त्रं वेति nvt-C
२२ म ] °दिप्रतिव्यक्तिनि° nvt-C

विष्टं ह्यपरं परेण ॥ ३ । १ । ६५ ॥ § 1455

संसर्गस्य द्व्याश्रयत्वेऽपि न द्वयोः समानत्वम्, यथाग्निधूमयोः संबन्धोऽन्यथाग्नेः । स हि व्यापकः । धूमे धूमध्वजस्य भाव एव नाभावः । धूमस्तु व्याप्यः । तस्य वह्नावेव भावो नान्यत्रेति । एवमपरं पृथिव्यादि परेणावादिना विष्टं व्याप्तम् । नाबादिमन्तरेणास्ति पृथिवी । तेन पृथिव्यामबादिगुणानां रसादीनां नियमेनोपलम्भो न त्वबादिषु पृथिवीगुणानाम् । एवमप्स्वनलादिगुणा व्याख्येयाः । विष्टत्वं संयोगविशेषो व्याप्तिरित्यर्थः । भाष्यम्—तच्चैतद् भूतसृष्टाविति । भूतसृष्टिप्रतिपादकेषु पुराणेषु । नैतर्हीति । नेदानीमननुभवादित्यर्थः ॥ ६५ ॥ § 1456

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ३ । १ । ६६ ॥ § 1457

सिद्धान्ती विकल्पवाद्येतद् दूषयति—न पा...त्वात् ॥ त्रिविधं हि द्रव्यं चाक्षुषमिष्यते पार्थिवमाप्यं तैजसं च । तत्र रूपवत्त्वेन तैजसमेव चाक्षुषं स्यात्, नेतरदरूपत्वात् । न च रूपिद्रव्यसंसर्गाच्चाक्षुषत्वमरूपयोरपि पार्थिवाप्ययोरिति *युक्तम्, नभोनभस्वतोरपि चाक्षुषत्वप्रसङ्गात् । अस्ति हि रूपवता तेजसा तयोः संयोग इति । अथवा पार्थिवाप्यसंबन्धिनो रसभेदस्य रूपभेदस्य चैकानेकविधत्वेन प्रत्यक्षत्वादित्याह भाष्यकारः रसयोर्वेत्यादिना उपपद्यत इत्यन्तेन । पुनस्तस्यैव व्याख्यानान्तरमाह—स्पर्शयोरिति । पार्थिवाप्ययोरित्यस्योदाहरणमात्रार्थत्वात् पार्थिवतैजसोरित्यपि व्याख्यानमुक्तम् । § 1458
493/tha

व्याख्यानान्तरमाह—अथ वेति । कार्यस्य व्यवस्थितगुणस्य दर्शनात् कारणमपि व्यवस्थितगुणमनुमीयते । न च सर्वत्र संसर्गो येनान्यस्य गुणोऽन्यत्रोपलभ्यते विवेकस्यासंसर्गस्य दर्शनादिति । व्याख्यानान्तरमाह—दृष्टश्चेति । चो विकल्पार्थः । नियोगस्तु निरनुमान इत्याह—निरनुमानं तु विष्टं ह्यपरं परेणेत्येतदिति । § 1459

यच्चोक्तं भूतसृष्टौ वेदितव्यं नैतर्हीति, तद् दूषयति—नियमकारणाभावादिति । नियमो गन्ध एव पृथिव्यामित्येवमादिः । तस्य कारणं प्रमाणं नास्ति तद्बाधकस्यैव प्रमाणस्योक्तत्वात् । तस्माद् भूतसृष्टिः कथञ्चिदुपचारतो व्याख्येयेति । विष्टत्वं संयोगः । स च द्वयोः समान इति । अन्यगुणो यदन्यत्रोपलभ्यते तत् किं संयोगादाहो व्याप्तेः ? यदि व्याप्तेः, नायोगोलके वह्निसंपृक्ते वह्निगुणा गृह्येरन् तयोर्व्याप्यव्यापकभावाभावात् । धूमे च गगनतलावलम्बिनि भूमिष्ठेन वह्निना व्याप्तेर्वह्निगुणा गृह्येरन्, तयोर्व्याप्यव्यापकभावात् । तस्मादत्यन्तसंयोगो हेतुः । स चोभयोरविशिष्ट

२ न ] द्वये nvt-C
३ थाग्नेः ] °ऽग्नौ nvt-J
७ व्याख्येयाः ] °गुणो व्याख्यातः nvt-C
१४ * ] वाच्यम् nvt-C
३२ संयोगो ] °दन्यसं°nvt-C

इति तेजसा संपृक्तत्वाद् वायोरपि रूपवत्त्वेन चाक्षुषत्वप्रसङ्ग इति ॥ ६६ ॥
§ 1460

पूर्वपूर्वगुणोत्कर्षात् तत्तत्प्रधानम् ॥ ३ । १ । ६७ ॥ § 1461

प्रधानपदार्थं व्याचष्टे भाष्यकारः—विषयग्राहकत्वम् गन्धादिर्विषयः । तदेव विषयग्राहकत्वं कुतस्तत्राह—गुणोत्कर्षात् तदभिव्यक्तिसामर्थ्यात् । विषयग्राहकत्वं चेत् प्राधान्यम्, *तत् सर्वेषामविशिष्टम् । सर्वेषामेवेन्द्रियाणां विषयग्राहकत्वादित्याशयवान् वार्त्तिककारो भाष्यकारीयं व्याख्यानममृष्यमाणः पृच्छति—का प्रधानता । स्वमतेनोत्तरमाह—चतुर्गुणत्वादिरिति । एतदुक्तं भवति—यस्माच्चतुर्गुणत्वेन पार्थिवं घ्राणं रसनादिभ्यः प्रधानं तस्मादस्यागन्धवत्त्वं नास्ति येन गन्धं न गृह्णीयात् । नन्वेवं रसवत्त्वादिकमप्यस्ति घ्राणस्येति रसादिकमपि गृह्णीयादित्यत उक्तम्—गुणोत्कर्षादिति । सर्वेषां 494/tha
समवायाविशेषेऽपि गन्धस्यैव घ्राण उत्कर्ष इति गन्धमेव गृह्णाति, तेनागन्धवत्त्वनिषेधपरं प्राधान्याभिधानं न पुनर्गन्धग्रहणे गन्धवत्त्वं प्रयोजकमपि तु गन्धस्योत्कर्ष इति सिद्धम् । तत्रोत्कर्षपदार्थं पृच्छति वार्त्तिककारः—को गुणोत्कर्षः ? उत्तरम्—स्वगुणाभिव्यक्तिसामर्थ्यम्, स्वो गुणो घ्राणस्य गन्धः तज्जातीयतया चन्दनादिसमवेतोऽपि गन्धः स्व इत्युच्यते । न पुनः स्वगुणमेवाभिव्यनक्ति घ्राणम् । घ्राणसमवेतस्य हि गन्धस्यादृष्टवशात् तादृशो निर्माणभेदो येन सजातीयं चन्दनादिसमवेतं गन्धमभिव्यनक्ति, यथा मृगमदादिगन्धं पार्थिवद्रव्यान्तरसमवेतो गन्ध इति । अत एवाह—येन गुणेन यद् द्रव्यमुत्कृष्यते स तज्जातीयाभिव्यञ्जकत्वादुत्कृष्टो भवति । तस्मिन् द्रव्य इति शेषः । यः पुनर्गन्धगुणत्वाद् इति गन्धमात्रगुणत्वादेव घ्राणं गन्धस्य व्यञ्जकं न तु गन्धस्योत्कर्षादित्यर्थः । तस्य वादिनः सर्वेषामेव पार्थिवानां गुणानामुपलब्धिप्रसङ्गः घ्राणग्राह्यत्वप्रसङ्ग इत्यर्थः ॥ ६७ ॥ § 1462

तद्व्यवस्थानं तु भूयस्त्वात् ॥ ३ । १ । ६८ ॥ § 1463

ननु भवतोऽपि कुतो व्यवस्थेति सूत्रम् अवतारयितुं पृच्छति—कस्मात् पुनरिति । तद्व...स्त्वात् ॥ अर्थनिर्वृत्तीति । अर्थः पुरुषार्थः । प्रविभक्तस्येति इतरेभ्यो विशिष्टस्य । संस्कारकारित इति । अदृष्टकारितः ॥ ६८ ॥ § 1464

सगुणानामिन्द्रियभावात् ॥ ३ । १ । ६९ ॥ § 1465

शङ्कते—यदि पुनरिन्द्रियस्य गन्ध इति । निराकरोति—तेनैव तस्येति ॥ ६९ ॥ § 1466
495/tha

१ त्वाद् ] संयुक्तस्यnvt-C
६ *] तत् सर्वेषामेव°nvt-C
९ नादिभ्यः ] °दिभ्य आप्यादिभ्यःnvt-C
१६ न्धः ] तज्जातीयश्चन्द° nvt-C
२५ कुतो ] व्यवस्थितिरिति nvt-C

तेनैव तस्याग्रहणाच्च ॥ ३ । १ । ७० ॥ § 1467

तदेतद् ग्रहणकवाक्यं सोपस्कारं व्याचष्टे—यदीन्द्रियं स्वगन्धं गृह्णीयात् ते तव दर्शने नासाविन्द्रियगन्धः । अथेन्द्रियगन्धः ततो नेन्द्रियग्राह्यः स्यात् । कस्मात् नेन्द्रियग्राह्य इन्द्रियगन्ध इत्यत आह—गन्धं च गृह्णदिति । चो हेतौ । न चात्मसाधनं करणमस्तीति । मनस्तु लिङ्गवदात्मनि करणं न केवल-मित्युक्तम् । तुल्यत्वमापादयितुं सिद्धान्ती पूर्वपक्षिणमनुयुङ्क्ते—कस्मात् पुन-रिदं न देश्यत इति । पूर्वपक्ष्याह—न देश्यत इति । सिद्धान्तवाद्याह—तुल्यं घ्राणेन स्वस्य गन्धस्याग्रहणमिति । तुल्यतामेवापादयति—एतदप्यदेशनीय-मिति ॥ ७० ॥ § 1468

न शब्दगुणोपलब्धेः ॥ ३ । १ । ७१ ॥ § 1469

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ३ । १ । ७२ ॥ § 1470

तद्गुणत्वमेव शब्दगुणत्वमेव दिक्कालयोरिति चेत् ? नाम्नि विवादः दिक्कालयोर्हि शब्दगुणत्वे सत्यसाधारणगुणयोगित्वेन न परापरव्यतिकरकार-णत्वं पृथिव्यादिवद् भवितुमर्हतीति । तथा च शब्दगुणं परादिप्रत्ययकारणं चाकाशमेवेति नाम्नि विवादः । दिक्कालौ तु परापरव्यतिकरकारणे कल्प-नीयौ ततो व्यतिरिक्तावित्यर्थः । अपि चाकाशमिच्छत आकाशप्रत्याख्यानं वा । सामर्थ्यानुपलब्धेरिति । रूपादिसाक्षात्कारे हि इन्द्रियाणामिन्द्रियत्वमेव स्वरूपसामर्थ्यम् । तच्चक्षुरादिद्रव्यस्य दृष्टं न गुणादीनामित्यर्थः ॥ ७२ ॥ § 1471

॥ इति अर्थपरीक्षाप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां
तृतीयाध्याये प्रथमाह्निकम् ॥

# ३.२ तृतीयाध्याये द्वितीयाह्निकम्

496/tha

## ३.२.१ बुद्ध्यनित्यताप्रकरणम्

कर्माकाशसाधर्म्यात् संशयः ॥ ३ । २ । १ ॥ § 1474

परीक्षितानीन्द्रियाण्यर्थाश्च, बुद्धेरिदानीं परीक्षाक्रमः । क्रमः स्थानम् । वृत्तवर्तिष्यमाणानुकीर्तनं हेतुहेतुमद्भावज्ञापनार्थम् । अर्थेन्द्रियपरीक्षा च

बुद्धिपरीक्षायां यथोपयुज्यते तथा बुद्धिपरीक्षायामेव स्फुटीभविष्यति । कर्मा...यः ॥ संशयमाक्षिपति—अनुपपन्नरूप इति । यद्युपलभ्यमानज्ञानविषयः संशयः, सोऽनुपपन्नः । सांख्यानामपि तदनित्यत्वस्याभिमतत्वात् । अथ सांख्याभिमतमहत्तत्त्वबुद्धिविषयः, तस्य सत्त्व एव विप्रतिपत्तिरिति कुतस्तद्गतधर्मविचारः ? सति धर्मिणि धर्माश्चिन्त्यन्ते न सन्दिग्धसत्त्व इति भावः ।
§ 1475

समाधत्ते—दृष्टिप्रवादेति । सांख्यानां हि दर्शने प्रवादो महदन्तःकरणं बुद्धिरिति । तदुपालम्भार्थं दूषणार्थं प्रकरणमिति । अयमभिप्रायः, नेह नित्यानित्यविचारः प्रधानतः, अपि त्वनया द्वारा वृत्तेरतिरिक्ता सांख्याभिमता बुद्धिर्निराक्रियते । सामान्यतो बुद्धिमात्रस्य नित्यानित्यत्वविचारेण । यदि हि नित्या बुद्धिः स्यात्, ततो वृत्तिभ्य उदयव्ययवतीभ्योऽतिरिक्तं महत्तत्त्वमन्तःकरणं स्यात् । अथ तु नित्यत्वसाधनानि प्रतिसन्धानादीनि न बुद्धिनित्यत्वस्येशते, ततो वृत्तय एव बुद्धयो न तु तदतिरिक्तं बुद्धितत्त्वं सिध्यतीति सिध्यति बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् इति बुद्धेर्लक्षणम् । तथा चास्य लक्षणेन संगतिः, इतरथा तु प्रधानतो नित्यानित्यत्वविचारो न लक्षणेन संगच्छेत इति ॥ १ ॥ § 1476
497/tha

## विषयप्रत्यभिज्ञानात् ॥ ३ । २ । २ ॥ § 1477

साधनं च प्रचक्षते—विष...नात् ॥ इति । वृत्तिमान् किल विषयं प्रत्यभिजानन्नात्मानमपि प्रत्यभिजानाति । न च चेतनो वृत्तिमान् तस्य कूटस्थनित्यत्वात् अन्यथा पूर्वापरावस्थाभेदवान् न कूटस्थनित्यः स्यात् । परिणामिनित्या तु बुद्धिरुदयव्ययवदनेकवृत्तिमती युज्यत इति भावः ॥ २ ॥ § 1478

## साध्यसमत्वादहेतुः ॥ ३ । २ । ३ ॥ § 1479

सिद्धान्त्याह—साध्य...तुः ॥ इति । वृत्तयो हि वृत्तिमतो भिन्नाः । तेन तासामनित्यत्वेऽपि न वृत्तिमान् कौटस्थ्यात् च्यवेत । तथा च प्रत्यभिज्ञातात्मैव प्रत्यभिज्ञानान्नित्यः सिध्यति, न त्वन्तःकरणं बुद्धिसंज्ञकम् । न हि तत्प्रत्यभिज्ञाने प्रकाशत इत्यर्थः । § 1480

क्रियानाधारत्वाच्च करणस्येति । प्रधानक्रियानाधारः करणम् । प्रधानक्रियाचेयमुपलब्धिः । अतो यदाधारा सा प्रतीयते स कर्ता न करणम् । तथा च प्रतत्यभिज्ञानाद्युपलब्ध्या तदाधारः कर्ता आत्मा सिध्यति नित्यो नान्तःकरणमित्यर्थः । क्रियामात्राभिमानेन च शङ्कते—स्वक्रियेति । प्रधानक्रियामालम्ब्य निराकरोति—सत्यं भवतीति । ननु यदि भेदविव-

१ रीक्षायां ] °क्षणं प्रति nvt-C
३ त्वात् ] °स्याभ्युपगमात् nvt-C
२९ अतो ] स्वतोnvt-C
३१ नित्यो ] न तु क°nvt-C
३१ ते ] °भिधानेन श°nvt-C

क्षया कर्त्रादिशब्दप्रवृत्तिरभेदविवक्षायां च कारकशब्दप्रवृत्तिः । कथं तर्हि कर्ता कारकं करणं कारकमित्यादिसामानाधिकरण्यं भेदाभेदविवक्षयोर्विरुद्धार्थत्वादित्यत आह—कारकशब्देनापीति । नाभेदविवक्षा विशेषाणां किन्तु सामान्यविवक्षा, भिद्यत इति भेदः, न भेदोऽभेद इति सामान्यस्याभिधानात् । तथा च सामान्यविवक्षया प्रवृत्तः शब्दस्तद्भेदाभिधानाद् भेदवाचिना सामानाधिकरण्यं प्रतिपद्यमान इतरेतरव्यावृत्ते विशेषेऽपादानादौ 498/tha प्रवर्तते, अन्यस्य कारकविशेषस्य कारकशब्देन सामानाधिकरण्यासंभवात् । पूर्ववदिति द्वितीयाध्यायोक्तं कारकविशेषलक्षणं स्मारयति । चोदयति—यद्यन्यकारकेति । कारकाणामुपादानेन खलु प्रवर्त्तितः कर्त्ता कारकाण्युपादत्ते । तस्मादितराप्रयोज्यत्वमस्यासिद्धमित्यर्थः । परिहरति—न प्रयुज्यते फलस्य प्रयोजकत्वादिति । नाप्रयोज्यमात्रं कर्तारं ब्रूमः । अपि तु कारकाप्रयोज्यम् । न च फलं कारकमित्यर्थः । § 1481

उपेत्य प्रत्यभिज्ञानमन्तःकरणे तस्येति । प्रत्यक्षं चेत् प्रत्यभिज्ञानं नैकत्वे किं त्वनुमानम् । ततो यद् यत् प्रत्यभिज्ञायते तत् तदेकमिति न निदर्शनमस्ति । न हि तस्यैकत्वमन्यतो निश्चितमतः प्रत्यभिज्ञानात् । नाप्यनेकत्वं दृष्टम् । तथा चासाधारणतया हेत्वाभास इत्यर्थः । प्रत्यभिज्ञानस्वरूपावधारणे च सति विरुद्धः हेत्वाभासो बुद्ध्यनित्यत्वसाधनादिति । शेषं निगदेनैव व्याख्यातम् । चेतनाध्यवसायाभेदश्च *बुद्धिलक्षणेऽस्माभिर्विचारितः ॥ ३ ॥ § 1482

न युगपदग्रहणात् ॥ ३ । २ । ४ ॥ § 1483

वृत्तिमतोऽवस्थानाद् वृत्त्यवस्थानप्रसङ्ग इति सूत्रार्थः ॥ ४ ॥ § 1484

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ३ । २ । ५ ॥ § 1485

क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥ ३ । २ । ६ ॥ § 1486

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥ ३ । २ । ७ ॥ § 1487

499/tha

न गत्यभावात् ॥ ३ । २ । ८ ॥ § 1488

आक्षेप्तुर्वचनम्—ममाप्येवं कस्मान्नेति । समाधातुर्वचनम्—न, करणभेदे दृष्टत्वादिति । करणभेदे हि सत्येकस्य कर्तुर्युगपदनेकं कार्यं दृष्टम् । सांख्यानां चान्तःकरणं कर्तृ व्यापकं चेति सर्वेन्द्रियव्यापकेनान्तःकर-

८ द्वितीयाध्यायोक्तं ] २।१।१६
११ मात्रं ] नाप्रयुज्यमानं nvt-C
१८ *] द्रः न्यायालङ्कारः २।१।१

णेनाधिष्ठितानीन्द्रियाणि युगपदेव कार्याणि कुर्युः । अस्माकं त्वन्तःकरणस्य करणत्वादेकेन्द्रियग्राह्येऽपि न युगपत् कार्योत्पाद इति विशेषः । § 1489

गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं न लिङ्गान्तरेणानुमीयते इति भाष्यस्य गत्यभावाच्च विभुनोऽन्तःकरणस्येति प्रतीकमनूद्य तस्यार्थमाह—प्राप्त्यर्थस्य गमनस्याभावादिति । नायुगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति येन प्रमाणेन प्रतिषिद्धमपि प्रत्यययौगपद्यं प्रतिपद्येत । तस्माद् विभुन्यन्तःकरणेऽवश्यंभावि प्रत्यययौगपद्यम् । न चैतद् दृष्टम् । तस्मादन्तःकरणमण्वित्यर्थः । ननु दीर्घां शष्कुलीं भक्षयतः पञ्चानामपि ज्ञानानां युगपदुत्पादो दृष्ट इति कोऽयं प्रसङ्गः ? अन्तःकरणस्य विभुत्वे युगपदुत्पादः प्रसज्येतेत्यत आह—न च युगपत्प्रत्ययोत्पत्ताविति । अतिशीघ्रतया युगपदुत्पादाभिमानो न तु तत्र यौगपद्यं भाविकमित्यर्थः । § 1490

पुरुषो जानीते नान्तःकरणमिति स्वमतसमाधानपरं भाष्यं व्याचष्टे—यस्य पुनर्वृत्तिवृत्तिमतोरिति । यदपि सांख्या आचख्युर्विषयान्तरव्यासक्तेऽन्तःकरणे चक्षुरादिसंबन्धस्याप्यज्ञानादन्तकरणवृत्तिर्ज्ञानमिति तन्निराकरणपरं भाष्यम्—एतेन विषयान्तरव्यासङ्ग इति । तदनुभाष्य वार्त्तिककारो व्याचष्टे—एतेनेति । तत्रैतेनेत्यस्योपजीव्यार्थमाह—पुरुषो जानीते नान्तःकरणमिति हेतुना विषयान्तरव्यासङ्गः अन्तःकरणस्य प्रत्युक्तः । व्यासक्तो हि स भवति यो जानीते । न चान्तःकरणं जानीते किन्तु पुरुष इति तस्येदृशो व्यासङ्गो नान्तःकरणस्य, अन्यादृशस्त्वन्तःकरणस्य व्यासङ्गो न निषिध्यत 500/tha
इत्यर्थः ॥ ८ ॥ § 1491

## स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥ ३ । २ । ९ ॥

§ 1492

चोद्यभाष्यम्—एकमन्तःकरणं नाना वृत्तय इति । तद् व्याचष्टे—एकमन्तःकरणं नानावृत्तय इति नैतदिति । सम्यगाचष्टे जानीते संचक्षाणकः सांख्यः । संख्या हि समीचीना बुद्धिः, तया वर्तते इति सांख्यः । एतदुक्तं भवति—यद्यपि वृत्तयो नाना प्रतिभान्ति, तथापि भ्रान्तिरियमन्तःकरणादेकस्मादभिन्नानां नानात्वानुपपत्तेः । तस्मात् स्फटिकस्य यथैकस्यापि तापिच्छजपाकर्णिकारादिकुसुमोपधानभेदाद् भेद औपाधिकः, एवमन्तःकरणमणेरपि स्वच्छस्येन्द्रियप्रणाडिकया तत्तदर्थोपरक्तस्यौपाधिकं नानात्वम्, वृत्तिरिति च प्रत्यय इति ज्ञानमिति चाख्यायते इत्यर्थः । § 1493

तदेतद् दूषयति—स्फटि...नः ॥ नानेकान्तादिति । योऽपि वृत्तीनामौपाधिकं भेदमाह, तेनाप्युपाधयोऽर्था आजानतो भिन्ना वक्तव्याः । तथा च भेदस्य द्विधा दर्शनादनेकान्तो दृष्टान्तो नैकार्थस्य साधकः । § 1494

न हेत्वभावादिति भाष्यं व्याचष्टे—यथाश्रुति सूत्र इति । न केवलं साधनाभावः, बाधकं चात्रास्तीत्याह—विकल्पानुपपत्तेश्चेति । न परपक्षस्य

६ पि ] प्रत्यययायौ°nvt-J    ९ इति ] क्वायंnvt-J

प्रतिषेधमात्रेण स्वपक्षसिद्धिरस्तीत्याशयवान् पृच्छति—अथ भवताम् इति । उत्तरम्—ज्ञानानां क्रमेणेति । स्यादेतत् । प्रत्ययनानात्वाभिमानो भविष्यति हेतुरेकत्वे वृत्तीनाम् । एकत्वं वृत्तीनां प्रत्ययनानात्वाभिमानविषयत्वात् स्फटिकवदिति । तस्मान्न हेत्वभाव इत्यत आह—एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य एकानेकविषयाधिगतिः कथमिति । नानात्वाभिमानोऽपि दृष्टान्तवदसाधकोऽनैकान्तिकत्वात् । तदेवमन्तरा परकीयामाशङ्कां निराकृत्य पुनरपि वृत्तिभेदं साधयति—यश्चायमभिन्न इति । यद्यर्थोपधानभेदात् प्रत्ययेषु 501/tha भेदो नाज्ञानतः, तत एकस्मिन्नर्थे न प्रत्ययभेदः *प्रथेतोपधानभेदाभावादित्यर्थः । कश्चिद् देशयति—स्फटिक इति । परिहरति—न नैरन्तर्यदर्शनादिति । नीलीद्रव्यलेपस्यापि सान्तरत्वं नीलः स्फटिक इति साक्षात्कारानुमेयमिति भावः । इतोऽपि प्रत्ययभेद इत्यत आह—यस्य च प्रत्ययाभेद इति । प्रमाणस्य करणस्य भेदः प्रत्ययलक्षणकार्यभेदोन्नेयो नासति प्रत्ययभेदे भवितुमर्हति । शङ्कते—विषयभेदादिति । एतदुक्तं भवति, प्रातिस्विको हि भेदो विषयाणां यदि प्रमाणभेदहेतुः हन्तैतस्यानन्त्यात् प्रमाणानामनन्तो भेदः स्यात्, न तु त्रित्वम् । तस्मादवान्तरसामान्यं विषयाणामास्थेयम् । न च तदपि स्वरूपमात्रनिष्ठं विषयाणां संभवति, एकस्मिन्नपि विषये प्रमाणानां संप्लवात् । तस्मात् प्रत्ययभेदोपहितसीमानो विषयास्त्रित्वे व्यवतिष्ठमानाः प्रमाणान्यपि त्रित्वे व्यवस्थापयन्ति । सामग्रीत्रयान्वयव्यतिरेकानुविधायिनश्च प्रत्ययास्त्रयो भवन्ति । तथा च त्रिविषयत्वात् प्रमाणानि त्रीणि । तदिदमुक्तम्—विषयभेदादिति । निराकरोति—तन्नेति । प्रमाणाभेदे सामग्रीत्रयाभेदे तदनुविधायिनां प्रत्ययानामभेदात् । न हि प्रत्ययभेदमन्तरेण सामग्रीभेदः शक्यो विज्ञातुम् । तस्मात् प्रत्ययसामग्र्यभेदेऽपि विषयभेदानधिगतेर्न विषयभेदस्त्रित्वाधिगमोपायः प्रत्ययभेदमन्तरेणेति । शङ्कते—विषयतादात्म्यादिति चेत् ? प्रत्ययप्रत्येतव्ययोरभेदादुपपन्नः प्रत्येतव्यभेदप्रथा इत्यर्थः । निराकरोति—तन्नेति । अपि च प्रत्ययाभेदे प्रकारवत्त्वाभावाद् यथाध्यवस्यति बुद्धिः तथा चेतयते पुरुष इति व्याघातः । कुतः—अप्रकारवत्त्वात् । भिन्नो हि प्रकारवान् भवति नाभिन्न इत्यर्थः । अन्तःकरणस्य बुद्धेः प्रत्ययानामभेदे बुद्धिस्थं प्रत्ययमुपलभत इति विरोध इति ॥ ९ ॥ § 1495

॥ बुद्ध्यनित्यताप्रकरणम् ॥

## ३.२.२ औपोद्घातिकं क्षणभङ्गप्रकरणम्

502/tha

८ *] प्रत्ययो° nvt-C
१७ सीमानो] °पहितसामान्या nvt-C
२३ मोपायः] °धिगमो वा nvt-C
२४ था] प्रत्ययभेद° nvt-C
२८ बुद्धिस्थं] बुद्धिस्तं nvt-C

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः ॥ ३ । २ । १० ॥ § 1497

तदेवं स्वमतेन सांख्यपक्षं दूषयित्वा बौद्धैस्तु यत् सांख्यीये राद्धान्ते दूषणमभिहितं तद् दूषयितुं बौद्धमतमुपन्यस्यति—स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इत्येतदमृष्यमाणः क्षणिकवाद्याहेति स्फटि...तुः ॥ यत् सत् तत्सर्वं क्षणिकं यथा शरीरं तथा च स्फटिक इति जरन्तो बौद्धाः । शरीरस्य च कालपरिपाकवशेन स्थौल्यस्य ह्रासस्य च दर्शनात् प्रतिक्षणं सूक्ष्मः परिणतिभेदोऽनुमीयते स चान्तरा विनाश एवेति । यस्यापि स्फटिकादेस्तादृशं स्थौल्यं वा ह्रासो वा न दृश्यते तस्यापि सत्त्वेन शरीरवदेव प्रतिक्षणं विनाशोत्पादावनुमीयेते इति । § 1498

स्यादेतत् । यदैवोपचयापचयौ शरीरस्य दृश्येते तदैवोत्पादविनाशौ भविष्यतः, पूर्वं च तत्प्रबन्धकल्पनायां किं प्रमाणमित्यत आह—यस्य खलु प्रतिक्षणमिति । अस्य प्रयोगः, प्रतिक्षणं शरीरम् अन्यच्चान्यच्चेति । पटस्य हि कुङ्कुमादिद्रव्यसंयोगे सत्यन्तेऽरूणिमलक्षणो विशेषो दृश्यते । न चास्यारुणिमा प्रतिक्षणभावीत्यत उक्तम्—बाह्यप्रत्ययाभेदे सतीति । अभिन्नो हि शरीरोपचयहेतुः प्रतिदिनमुपयुज्यमानोऽन्नपानप्रचयो यथा पाकजोत्पत्तावौष्ण्यापेक्षो वह्निसंयोगः, बाह्यः प्रत्ययः कारणम्, पटे तु रागोत्पत्तौ कुङ्कुमादिद्रव्यसंयोगः सांप्रतिको विशिष्ट इत्यर्थः ॥ १० ॥ § 1499

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥ ३ । २ । ११ ॥

§ 1500

503/tha

सिद्धान्तसूत्रम्—निय...ज्ञा ॥ तदेतद् व्याचष्टे—तदिदमुपचयापचयेति । न हि धूमदर्शनानुमितो वह्निः क्वचित् पर्वत इत्यदृश्यमानेऽपि धूमे पर्वतत्वमात्रेण पर्वतान्तरेऽपि वह्निमनुमिन्वते अनुमातार इत्यर्थः । शङ्कते—यत्रोपलब्धिरिति । क्षणिकत्वं पूर्वापरभागविकलकालकलामात्रावस्थायित्वम् । न च तादृशं क्षणिकत्वं नैयायिकानां क्वचिदपि संमतमिति न सिद्धसाधनमित्यर्थः । निराकरोति—सत्यमिति । कस्मात् पुनरस्मदभिमतैव क्षणिकता न सिध्यत्युपचयापचयप्रबन्धदर्शनादित्यत आह—उपचयापचयप्रबन्धदर्शनं चान्यथाभवदिति । चो हेत्वर्थः । शङ्कते— तुल्यमिति । निराकरोति—नासाधनादिति । एकान्तनिश्चयं विना न साधनम्, दूषणं तु सन्देहापादनेनापीति सोऽयं साधनदूषणयोर्विशेष इत्यर्थः ॥ ११ ॥ § 1501

४ भिहितं ] बौद्धैर्यत् सांख्यराद्धान्ते दूषणमुक्तं nvt-C
५ माणः ] °मान इतीदममृष्यमाणः nvt-C
२२ त ] प्रवर्तते nvt-C

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३ । २ । १२ ॥ § 1502

उत्तरसूत्रमवतारयति—अथावश्यं साधनं वक्तव्यमिति । नोत्प...ब्धेः ॥ उत्पत्तिविनाशकारणं ज्ञापकम् । अवयवोपचयापचयौ न क्षणिकपक्षे युज्येते निरन्वयोत्पादविनाशयोरुपचयापचयप्रत्ययाभावादिति । उपचयापचयोत्पत्तिविनाशकारणोपलब्धेरिति । उपचयापचयौ च तावुत्पत्तिविनाशकारणे चेति कर्मधारयः । § 1503

उत्पत्तिविनाशकारणोपलब्धेरित्यस्य व्याख्यानान्तरमाह—अथ वा कारणमिति । समवायिकारणं हि कार्यात् पूर्वं च कार्यकाले चेति लोकसिद्धम् । तच्चैतत् क्षणिकत्वेऽनुपपन्नमित्यर्थः । एककालानुभाविनी, अनुभवः प्राप्तिः एककालप्राप्ते इत्यर्थः । भिन्नलोकमर्यादः शङ्कते—आधाराधेयभावस्येति । निराकरोति—नानेकान्तात् । भवतामपि राद्धान्ते रूपं सप्रतिघं कार्यमाधारवच्च । यदि तु रूपमप्यनाधारं मनुषे, ततस्ते स्वसिद्धान्तव्याकोप इत्याह—स्पर्शस्तदाश्रय इति च व्याघात इति । सर्वं तदेककालानुभावि
504/tha सिद्धं भवतीति । शङ्कते—सिद्धः कार्यकारणभावः क्षणिकेष्वपीति कार्यस्यानाधारत्वप्रसङ्गे । न हि क्षणिकत्वे कार्यकारणभावो न सिध्यति । स तु सिद्धः क्षणिकत्वपक्षेऽपि कारणविनाशसमकालत्वेन कार्योत्पादस्य कार्यकारणयोः समानकालत्वादित्यर्थः । निराकरोति— न हेत्वर्थापरिज्ञानादिति । एतावता प्रयासेन त्वया कार्यकारणभावः क्षणिकानां समर्थ्यते । न चायमक्षणिकत्वे हेतुः । अपि त्वाधाराधेयभावः, स चायमशक्यसाधनः । को नु खल्वयं कारणविनाशः कारणाभावो वा, विनाशकारणसान्निध्यं वा ? पूर्वस्मिन् कल्पे कार्यकारणयोः कुतः समानकालता ? उत्तरस्मिन्नप्युत्पन्नस्य पश्चाद् विनाशकारणसान्निध्येऽपि कुतः सतः क्षणिकता ? न चोत्पद्यमानताविनश्यत्तयोस्तुल्यकालत्वमनुभवविरोधात् । कार्यस्य च तदैवोत्पद्यमानत्वे कार्यकारणभावाभावः सव्यदक्षिणशृङ्गवदिति भावः । अपि च दृष्टान्तोऽपि साध्यविकल इत्याह— तुलाधारस्येति । ये अवयवकर्मणी नामोन्नामौ न तयोः कार्यकारणभावः, यत् त्ववयविकर्म न तत्र यौगपद्यं नापि कार्यकारणभाव एकत्वादित्यर्थः । गुरुत्वप्रयत्नसंयोगा उन्नतेरिति । विधारकः प्रयत्नस्तुलाधारस्य, तदपेक्षः संयोगः संयुक्त संयोगो गुरुत्वं च तत्संयुक्तावयवान्तरवर्तिकारणमुन्नतेस्तुलावयवस्य, अवनतेरपि द्रव्यं गुरुत्ववत्सुवर्णादि परिमीयमाणं तत्संयोगानुगृहीतो रज्जुतुलासंयोगः कारणम् ॥ १२ ॥ § 1504

क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः ॥ ३ । २ । १३ ॥ § 1505

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ ३ । २ । १४ ॥ § 1506

१२ च्च] अभिधर्मकोशः १।२९

चोदयति—न नास्ति शीतोष्णस्पर्शभेदस्येति । परिहरति—स तु निमित्तान्तरादिति । पुनश्चोदयति—अप्तेजोऽवयवानुप्रवेशो न युक्त इति । स्वगता महाभूतविशेषाः तदवयवाः पृथिव्यादयः । ते हि परस्परतो विशिष्यन्त इति विशेषाः । परिहरति—न युक्तमिति । यदि प्रतिक्षणमन्यत्वमात्रेण 505/tha विशेषस्ततः काष्ठक्षणानामपि भूम्यश्मलोहवद्विशेषोपलम्भः स्यात् । यथा हि काष्ठाक्षणादकस्माल्लोहादिक्षणा भिद्यन्ते एवं काष्ठक्षणान्तराण्यपि । तस्मात् पार्थिवत्वेऽपि स्वमतो विशेषाविशेषावास्थेयौ यतो भूम्यश्मादिभ्यो व्यावर्तन्ते, न व्यावर्तन्ते च काष्ठक्षणान्तरेभ्यः काष्ठक्षणाः । तस्मादेव विशेषादक्षणिकत्वेऽपि काष्ठभूम्यश्मलोहानामुपपन्न उत्तरोत्तरो विशेष इति वृथा क्षणिकत्वकल्पनेति । § 1507

असाधनं भूतस्वभावः क्षणिकत्वसिद्धावित्यर्थः । दूषणान्तरमाह—विरुद्धश्चायं हेतुः उत्तरोत्तरविशेषदर्शनादिति । *भवतां किल भूतानामन्योन्यव्यावर्तकं लक्षणं खरस्नेहोष्णेरणात्मकानि भूतानीति । खरा पृथिवी स्नेह उदकम् उष्णं तेजः ईरणं समीरणो गतिमानिति यावत् । तथोत्पादे तु काष्ठ भूम्यश्मलोहानामङ्गीक्रियमाणे एकमेव खरोष्णं खरोष्णेरणात्मकं स्यादिति संकीर्णत्वाद् भूतलक्षणव्याघात इति । कठिनमिति खरां पृथिवीमुपलक्षयति । अस्मत्पक्षे तु न व्याघात इत्याह—यस्य पुनरिति । न केवलं पृथिव्यादिलक्षणेन विरुध्यते, अपि तु शीतोष्णस्पर्शभेदेन नानात्वस्य साधनेन पूर्वोक्तेनापीत्याह—विरुद्धश्चायमिति । पृच्छति—कथम् ? उत्तरम्—एकस्य विशेषाभ्युपगमात् । येनैव विशेषेण पूर्वं नानात्वमभ्युपगतं शीतोष्णादिना भेदेन तेनैव संप्रत्येकत्वमपीत्यर्थः । सिद्धान्तमभ्युपेत्येति पूर्वेण हेतुना योऽभ्युपगतोऽर्थः, तद्विरोधितया विरुद्ध इत्यर्थः । शङ्कते—अथ मन्यसे न विशेषमात्रमिति । मा भूद् रूपं सप्रतिधमुपादानमिति रूपस्यैकस्य नानात्वमिति भावः । निराकरोति—नाभिप्रायेति । यस्त्ववयवानुप्रवेशे देशयेदुष्णजले वह्निस्पर्शवद् रूपग्रहोऽपि स्यादयोगोलक इवेति तं प्रति एकदेशिमतेन परिहारमाह—जलेऽग्निरूपग्रहणप्रसङ्ग स्त्विति, तद् दूषयति—तन्नेति । युक्तं यन्मध्यन्दिने सवितृप्रकाशेनोल्बणेन मन्द उल्काप्रकाशोऽभिभूयते सजातीयत्वे सत्युल्बणत्वात् । तोयरूपं तु नोल्बणं न च सजातीयमभास्वरत्वात्, तेजस- 506/tha स्तु भास्वरत्वात्; तस्मान्नाभिभव इत्यर्थः । परमार्थपरिहारमाह—अपि तु तेजसश्चातुर्विध्यात् । किंचिदुद्भूतरूपस्पर्शं तेजो भवति । यथासवितृप्रकाशः शरदि दिवा । किंचिदनुद्भूतरूपस्पर्शं यथा चाक्षुषं तेजः । किंचिदुद्भूतरूपमनुद्भूतस्पर्शं च यथा प्रदीपप्रभायां तेजः । किंचिदनुद्भूतरूपमुद्भूतस्पर्शं यथा तोयगतं तेजः । यथा वा निशीथे निदाधसमये तेजः, यतो मेदस्विनः स्विद्यन्तीति । § 1508

७ विशेषाविशेषावास्थेयौ ] स्वतो विशेषावा°nvt-C
१२ *] अभिधर्मकोशे १।१२
१५ रोष्णं ] खरोष्णेnvt-C
२० विशेषेण ] पूर्वस्मात्nvt-C
२१ र्थः ] °त्येकत्वाभ्युपगमादित्यर्थःnvt-C

प्रतिज्ञार्थं यथासंभवं विकल्प्य दूषयति—या चेयं प्रतिज्ञेति । अथ वर्तमानं स्फटिकमभ्युपगम्य यदतीतं स्फटिकान्तरं तत् पक्षीकृत्य वर्तमानात् तदन्यदिति साध्यते । निराकरोति—एवं सतीति । यदि लिङ्गं स्वसत्ताज्ञानाभ्यां गमकं तदा सत्यपि ज्ञानेऽतीतधर्मस्य सत्ता नास्तीति न गमक इति भावः । यदि पुनः स्वज्ञानमात्रेण गमकं लिङ्गमुच्येत तदा दूषणान्तरमाह—वर्तमानाच्चेति । § 1509

तद्विरोध्याश्रयविनाशानुविधानेन विनश्यन्तीति । विरोधीति गुणाभिप्रायम् । गुणो हि विरोधिना गुणान्तरेण विनाश्यते आश्रयविनाशेन चेति सर्वसाधारणम् । आश्रयग्रहणं चोपलक्षणार्थम् । तेनासमवायिनिमित्तकारणविनाशेनापि यथा संभवमुन्नेतव्यमिति । शङ्कते—विनश्यदवस्थेति । मा भूत् प्रदीपो दृष्टान्तः, विनश्यदवस्थे तु द्रव्ये कर्मोत्पन्नमुत्पत्त्यनन्तरमेवापवृज्यते अत ईदृशं कर्म दृष्टान्तो भविष्यतीत्यर्थः । निराकरोति—नकर्मण इति । कर्मापलापनिबन्धनो ह्ययं क्षणिकवादस्तदभ्युपगमे न भवितुमर्हति । स्थिराद् द्रव्यादागन्तुककर्मसहितादेव कार्योत्पादोपपत्तेरिति । निराकरणान्तरमाह—अनभ्युपगमाच्चेति तादृशस्यापि कर्मणः क्षणिकत्वस्यास्माभिः । तथा हि द्रव्यस्य विनश्यत्ता कर्मोत्पाद इत्येकः कालः । अथ द्रव्यस्य विनाशः, न च कारणोत्पादसमये कार्योत्पाद इति द्रव्यविनाशानन्तरं कर्मनाश इति सिद्धं क्षणद्वयावस्थानं कर्मण इति । शङ्कते—विनाशहेत्वभावादिति चेत् ? अयमभिसन्धिः—स्वकारणादयं भावो विनश्वरस्वभावो वा जायतेऽविनश्वरस्वभावो वा ? विनश्वरश्चेद्, विनाशं प्रति न हेतुमपेक्षेत । न हि नीलं
507/tha स्वकारणादुत्पन्नं नीलत्वे हेतुमपेक्षते तस्यैव तादूप्यात् । अविनश्वरश्चेत्, तथापि नास्य हेतुशतैरपि शक्यो विनाशः कर्तुम् । न हि नीलमुत्पन्नं पीतं शिल्पिशतेनापि शक्यं कर्तुम् । अपि चायं विनाशो भावस्य कारणैराधीयमानो भावाद् भिन्नोऽभिन्नो वा जन्येत । अभिन्नत्वे भाव एवासाविति विनष्टोऽपि भावः प्राग्वदुपलब्ध्यर्थक्रिये कुर्यात् । न च भावाभावयोः कारणभेदे सति संभवत्यभेदः । तन्तुसंयोगभेदेभ्यो हि पटो जायते तन्तुविमोक्षाद् वा तन्तुविनाशाद् वा पटाभाव इति कारणभेदः । भावाभिन्नत्वे तु जायतामभावो भावस्य किमायातम् ? न हि क्रमेलकोत्पादने पीलवो निवर्तन्ते । अभावेन भावस्तिरोधीयते इति चेत् ? न, तिरोधानस्यापि भावादभेदे पूर्ववदुपलब्ध्यादिप्रसङ्गः । भेदेऽपि तिरोधानस्यान्यस्योत्पादे अन्यस्य न किञ्चिदुत्पन्नं विनष्टं वेति भावतादवस्थ्यादुपलब्ध्यादिप्रसङ्गः । अपि च यद् येषां ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा यथा कृपाणस्यायोमयत्वे । ध्रुवभावी च कृतकानां भावानां नाश इति विरुद्धव्याप्तोपलब्धिः । ध्रुवभाविता हि प्रतिषिध्यमानहेत्वन्तरापेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्तोपलब्धा, सेह प्रतीयमाना निरपेक्षत्वमुपस्थापयन्ती हेत्वन्तरापेक्षितां प्रतिक्षिपति । ये हि हेत्व-

२४ न्येत ] जायतेnvt-C
२६ न्तुविमोक्षाद् ] °वियोगाद्nvt-C

न्तरापेक्षा न ते ध्रुवभाविनो यथा वाससि रागादयः कुसुम्भादिसंयोगसापेक्षा नावश्यम्भाविन इति । तस्मादभावस्य सर्वोपाख्याविरहितस्य विकल्पितस्य क्रियानुपपन्नेति । अभावं करोतिक्रियाया अभावेन संबन्धानुपपत्तेर्नञ्संबन्धो भावं न करोतीति । यथाह—

न तस्य किञ्चिद् भवति न भवत्येव केवलम् § 1511

इति । तस्माद् विनाशकारणाभावादुत्पन्नमात्र एव भावो विनश्यतीति सिद्धः क्षणभङ्ग इति । § 1512

तदेतन्निराकरोति—नविकल्पानुपपत्तेः । अयमभिसन्धिः । यत् तावद् विकल्पितं स्वहेतुभ्यो भावा विनश्वरा, अविनश्वरा वा जायन्त इति तत्र ब्रूमः किं पुनरिदं विनश्वरत्वं भावानामभिमतमायुष्मतः, किं विनाशस्वभावत्वम् आहो विनाशार्हत्वं नित्येभ्यो व्यावृत्तं रूपम् ? न तावत् पूर्वः कल्पः 508/tha
परस्परपरिहारवतोर्भावतन्नाशयोस्तादात्म्यानुपपत्तेः । तादात्म्ये च विनाशवद् भावोऽपि द्वितीयादिषु क्षणेषु वर्तेतेति साधु क्षणिकत्वं समर्थितमत्रभवता भावानां नित्यत्वमुपपादयता । भावसमये वा विनाशोऽपि भावात्मास्तीत्यत्यन्ताभावो भावस्य भवेदिति सुव्यवदातं तत्त्वं भावानाम् । न च भाव एकक्षणस्थितिधर्मा नाशो द्वितीयादिक्षणेष्विति साम्प्रतम्, प्रथमद्वितीयक्षणावच्छेदलक्षणविरुद्धधर्मसंसर्गेण भेदात् । द्वितीयं तु कल्पमनुमन्यामहे । नन्वेवं विनाशार्हाश्चेद् भावाः स्वकारणादुत्पन्नाः, हन्तोदयानन्तरमेवापवृज्येरन् ? नापवृज्यन्ते । विनाशार्हा अपि पटादयस्तन्तुविनाशाद् वा तन्तुविमोक्षाद् वा स्वकारणाधीनजन्मनो विनङ्क्ष्यन्ति । न हि तण्डुलाः पचेलिमा इति विनैव दहनसलिलसंयोगप्रचयभेदं विक्लिद्यन्ति । काष्ठानि वा भिदेलिमानीति कुठाराभिघातमन्तरेण दलन्ति । यो मन्यते त एव तण्डुलाः पचेलिमा ये समर्थदहनोदकपिठरसहभुवः, तदनन्तरं हि पुलाकाः प्रादुर्भवन्ति, यदनन्तरं तु न प्रादुर्भवन्ति न ते पचेलिमा इति । तस्योत्तरम् अक्षणिकार्थक्रियामुपपादयन्तो वक्ष्यामः । § 1513

तस्माद् विनश्वराणामुत्पत्तेः स्वकारणान्न विनाशकारणापेक्षा भावानामिति युक्तम् । केवलं भावादन्यस्य नाशस्य कारणाभावं ब्रुवाणः पर्यनुयोज्यो भवान् किमकारणत्वात् नाशस्य नास्तित्वं रोचयते, किं वा नित्यताम् ? तत्रोक्तं साक्षाद्दूषणं वार्त्तिककृता—भवतां शाक्यानांपक्षे अकारणंद्विधा, नित्यं व्योम शशविषाणादि चात्यन्ततुच्छम् । अस्माकं तु नित्यमेव । भवदभिमतस्य तस्य तुच्छस्याभावस्यानङ्गीकारादस्मदभिमतस्य तु भवद्भिरनङ्गीकृतत्वेन नास्तीत्यध्यारोप्य राशिरेक उक्तः । उत्पन्नस्य विनाश इति सर्वजनीनं तद्विपरीतं भवत्पक्षे प्राप्नोति । नन्वस्तु भावाभावयोः सहावस्थानं को दोष इत्यत आह—ततश्च भावानामिति । शङ्कते—अथाविनाशित्वादिति । प्रयोजनक्ष-

६ भावो ] उत्पन्न एवाभावोnvt-C
१५ दातं ] सुष्ठुव°nvt-C
१९ न्तुविमोक्षाद् ] °विभागाद्nvt-C
२७ णाभावं ] भावादन्यदकारणंnvt-C

तिरियं यदकारणत्वे विनाशस्यैष दोष इति न तु दोषभयेन स्फुटतरप्रमाण- 509/tha बाधितं कारणवत्त्वं विनाशस्य शक्यमङ्गी कर्तुमिति भावः । गूढाभिसन्धिः सिद्धान्ती पृच्छति—विनाशो न विनश्यतीति कुत एतत् ? चोदक आह—विनष्टानामिति । सिद्धान्ती बौद्धमतमालम्ब्याह—न हि विनाशाभावो भाव इति । यस्य पटाभाव एव तुच्छस्तस्य तदभावे का कथा तस्य तुच्छादपि तुच्छतरत्वादिति भावः । स्वमतमास्थायाह—अपि च विनाशः कारणवांश्चेति । शेषं सुबोधम् । यदप्यकारणवत्त्वे कारणमुक्तं भावाद् भिन्नश्चेदभावो जन्येत भावतादवस्थ्यमिति, तत्रोच्यते—नाभावस्योत्पादे भावस्यापरा निवृत्तिः किं त्वभावोत्पाद एव तन्निवृत्तिरिति । कथमन्यस्योत्पादेऽन्यस्य निवृत्तिः ? अत्र स्वभावभेदैरुत्तरं वाच्यं ये परस्परपरिहारावस्थितयः ते स्वहेतुभ्यो जायन्ते । न हि स्वतोऽन्यस्याङ्कुरस्य वह्निर्न कारणमित्यन्यत्वाविशेषाद् भस्मनोऽपि न कारणमिति । स्वभावभेदेन तु कार्यकारणभावनियमसमर्थनं परस्परपरिहारस्थितिनियमेऽपि तुल्यम् । यथा चोत्पादस्य पुरस्तादखिलसामर्थ्यरहितस्याङ्कुरप्रागभावस्योपकारं कञ्चिदकुर्वन्तोऽपि बीजादयोऽङ्कुरमारभन्ते तदुत्पादस्यैव तत्प्रागभावनिवृत्तिरूपत्वात् । एवं तदभावहेतवोऽपि भावरूपे अकिञ्चित्करा अपि तदभावमादधति । न चेद् भावरूपे किञ्चित्कृतं तदभावहेतुभिः । अथ भावः प्रागिव स्वाभावसमये कस्मान्न स्वरूपे उपलम्भार्थक्रिये करोति । अथोत्पादात् प्रागिवोत्पन्नोऽप्यङ्कुरः कस्मादुपलम्भार्थक्रिये करोति ? उत्पत्तेः प्रागङ्कुरो नासीत् तेन नाकार्षीदुत्पन्नस्त्वस्ति, तस्मात् करोतीति चेत् ? हन्त भावोऽपि यदासीत् तदाकार्षीत्, इदानीं तु विनष्ट इति नास्ति, तेन न करोति । यथा च भावोत्पाद एव तत्प्रागभावस्य नास्तिता एवमभावोत्पत्तिरेव भावस्य नास्तिता । उपजनापायधर्मतया भावाद् अभेदो विनाशस्य ततो न सदसद्रूपतया द्वैराश्यं विश्वस्येति चेत् ? कोऽयमुपजनः ? यदि स्वकारणसमवायः सत्तासमवायो वा, सोऽभावे नास्ति । अथ स्वरूपप्रतिलम्भः, तथापि तावन्मात्रस्य साम्येऽपि अवान्तरभेदेन द्वैराश्योपपत्तेः । 510/tha तस्मात् यथा सत्त्वस्य साम्येऽपि द्रव्यगुणकर्माणि तेन तेन तत्त्वेनान्योऽन्यस्य भिद्यन्ते, एवं प्रमेयत्वाभिधेयत्वकार्यत्वकारणवत्त्वेनाविशेषेऽपि सद्भिः सहासतां सत्तातद्विरहरूपभेदाद् भेद इति सिद्धम् । यापि ध्रुवभाविता विनाशस्य तत्र ब्रूमः ध्रुवभावित्वेन विनाशस्य हेत्वन्तरानपेक्षत्वं ब्रुवाणो नाहेतुकत्वं वक्तुमर्हति हेत्वन्तरनिराकरणेन हेतुना निराकरणात् । विशेषनिषेधस्य शेषाभ्यनुज्ञानहेतुत्वात् । अपि च ध्रुवभावित्वमसिद्धमनैकान्तिकं वा । इदं भवान् पृष्टो व्याचष्टां किं घटसन्तानात् सभागात् कपालसन्ततिर्ध्रुवभाविनी न वा ? न चेत् ? न विनाशोऽपि घटस्य ध्रुवभावी । न खलु विसभागक्षणोत्पादनम-

७ त्वे ] कारणत्वेnvt-C
१६ ति ] °मारभन्तेnvt-C
१७ स्मान्न ] स्वरूपोप°nvt-C
१८ अथोत्पादात् ] प्रागप्युत्प°nvt-C
२६ स्य ] सत्त्वेनnvt-J
३० णात् ] हेतुमात्रानि°nvt-J
३१ हेतुत्वात् ] °नुज्ञाफलकत्वात्nvt-C

न्तरेण घटविनाशमीक्षामहे मांसचक्षुषः । तथा चासिद्धा ध्रुवभाविता विनाशस्य । अथ ध्रुवभाविनी, तस्यामेव तर्हि विसभागसन्ततौ ध्रुवभाविन्यामपि मुद्गरादिहेत्वपेक्षेत्यनैकान्तिकं ध्रुवभावित्वं नानपेक्षत्वेन व्याप्तमिति न हेत्वन्तरापेक्षित्वं निषेद्धुमर्हतीति । तदेतद् यश्चाकारणे विनाशे दोषः स चापरिहार्य इत्यनेन वार्त्तिकेन सूचितम् । § 1514

एवं तावदन्यत्वे साध्ये दोष उक्त इति । यद्यपि क्षणिकत्वमपि पूर्वमुक्तं दूषितं च तथापि क्षणिकत्वाभिधानं तत्रान्यत्वपरमन्यत्वमेव तु तत्र प्रधानम् । इदानीं तु क्षणिकत्वमेव प्रधानतया साध्यमित्येतावता प्रकरणभेद इति । विशेषणं सिद्धान्तविरोधीति । *यद्यनाशुविनाशिनोऽपि केचन भावा भवेयुः ततो विशेषणमाशुविनाशिन इति कल्पेत, तथा च सिद्धान्तविरोध इत्यर्थः । मत्वर्थीय इति । क्षणिक इति । अत इनिठनौ इति मत्वर्थीयष्ठन् । अनन्तरेण विनाशेन विशिष्यमाण इति उपलक्ष्यमाणः । सर्वान्त्यं कालमिति । पूर्वापरभागविकलकालकलैकाज्योतिर्विद्यासिद्धा सर्वान्तः काल इति संज्ञामात्रं न तु वास्तवम् । वास्तवी तु क्षणिकताभिमतेति । § 1515

पक्षवचनं दूषयित्वा हेतुं दूषयति—येऽपि हेतव इति । अत्र आदिग्रहणेन सत्त्वकृतकत्वादयः संगृहीता वेदितव्याः । तत्र यत् सत् तत् क्षणिकं 511/tha
यथा घटः । संश्च विवादध्यासितः शब्दादिरिति स्वभावहेतुः सत्तामात्रानुबन्धित्वात् क्षणिकत्वस्य । कथं पुनः सत्तामात्रानुबन्धसिद्धिः क्षणिकतायाः ? उच्यते, सत्त्वं नामार्थक्रियाकारित्वं भावानां नान्यत् । न ह्यस्ति संभवः संश्च भावो न चार्थक्रियाकारीति । तथा हि स सार्वज्ञस्य विज्ञानस्यालम्बनप्रत्ययो भवेन्न वा ? न चेत् नास्ति, सर्वज्ञो वा न सर्वज्ञः तस्यैवाज्ञानात् । आलम्बनप्रत्ययश्चेत् कथं नार्थक्रियाकारीति ? न च सत्तासामान्यं नामास्ति किञ्चित्, नापि तत्समवायो यतः सन्नित्युच्यते । तत्सद्भावे वा न भवतां सामान्यविशेषसमवायाः सन्तो भवेयुः, तेषां सामान्याधारत्वानभ्युपगमात् । प्रमाणग्राह्यतापि प्रमाणविषयता प्रमाणं प्रत्यालम्बनप्रत्ययत्वमेव । तच्चार्थक्रियाकारित्वान्नान्यदिति सिद्धमर्थक्रियाकारित्वमेव सत्त्वमिति । तच्च क्रमाक्रमाभ्यां व्याप्तं तृतीयप्रकारविरहात् । तथा हि भावानां तासु तास्वर्थक्रियासु क्रमाक्रमौ परस्परपरिहारवन्तौ चकास्तः । तथा च क्रमाक्रमात्मकं प्रकारान्तरमपि यदीदृशाभ्यामेवानुभूतावसिताभ्यां क्रमाक्रमाभ्यां करम्बितमङ्गीक्रियेत ततो दृश्यमानयोरपि क्रमाक्रमयोः परस्परसंकरप्रसङ्गः । करम्बितावेव हि क्रमाक्रमाविमावपीति दृश्यमानः क्रमोऽक्रमात्मकः, अक्रमश्च क्रमात्मकः प्रतिभासेत । न च तथा प्रतिभासते । एतेन प्रत्यक्षमेव परस्परपरिहारवन्तौ क्रमाक्रमौ परिच्छिन्दत् सर्वत्रैवानयोः संकरं प्रतिक्षिपति । यदि हि क्वचिदप्यनयोस्तादात्म्यं भवेदिहापि तावेव क्रमाक्रमाविति संकीर्णौ गृह्येयाताम् । तस्मात् अनयोरिह संकरानुपलम्भ एव देशान्तरे कालान्तरे च संकरं निषेधति । तादात्म्यनिषेधे च दृश्यत्वविशेषणानपेक्ष-

७ त्वाभिधानं] तवान्यपरम्nvt-C
९ *] °शुतरविनाशि°nvt-J

त्वादनुपलब्धेः दृश्यमानस्तम्भतादात्म्येन स्वयमदृश्यानां पिशाचादीनां दृश्यानां च प्लवङ्गादीनामविशेषेण प्रतिषेधात् । यथाह— विशेषणं चावाच्यम् इति । अनेवंभूतक्रमयौगपद्यव्यतिकरवती प्रकारान्तरे क्रमयौगपद्ये एव न भवतः 512/tha । न हि शब्दाभेदेन वस्तुनोऽप्यभेदः । मा भूद् गोशब्दसामानाधिकरण्येन वागादीनामपि विषाणित्वप्रसङ्गः । § 1516

स्यादेतत् । मा भूतां क्रमयौगपद्ये अस्त्वन्य एव क्रमाक्रमाभिधानः क्रमयौग— पद्याभ्यामन्यः प्रकारो यमास्थाय भावाः स्थिरा अप्यर्थक्रियायामुपयोक्ष्यन्ते, न त्वेषां प्रकारान्तरवदर्थक्रियापि पिशाचायमानैव । तथा चेत् किं नश्छिन्नम् ? दृश्यमानास्त्वनुभूतावसिताः परस्परव्यावृत्तक्रमयौगपद्ययोरन्यतरप्रकारसमालिङ्गितशरीरा अर्थक्रिया न प्रकारान्तराद् भवितुमीशते । न च प्रकारान्तरमपीति । तथा हि यत्र यत्प्रकारप्रतिषेधेन यदितरप्रकारव्यवस्थाननियमस्तत्र न प्रकारान्तरसंभवः । यथा नीलप्रकारनिषेधेनानीलप्रकारव्यवस्थायां पीते । अस्ति च क्रमयौगपद्ययोः अन्यतरप्रकारनिषेधेनान्यतरप्रकारव्यवस्थानियमो निषिध्यमानप्रकारविषयीकृते सर्वत्र कार्यकारणे इति विरुद्धोपलब्धिः । निषिध्यमानप्रकारान्तरसंभवविरुद्धो हि द्वयोरन्यतरनिषेधेनान्यतरव्यवस्थाननियम इति प्रकारान्तरासंभवाद् भावानामर्थक्रिया क्रमाक्रमाभ्यं व्याप्ता । तौ च स्थिरान्निवर्तमानावर्थक्रियामपि व्यावर्तयतः, वृक्षतेव निवर्तमाना शिंशपात्वम् आराद्दृश्यमानादेकशिलामयाद् भूभृत्कटकादिति प्रतिबन्धसिद्धिः । तथा हि न तावदक्षणिकः क्रमेणार्थक्रियां कर्तुमर्हति । स्वेनैव हि रूपेण भावा अर्थक्रियासूपयुज्यमाना दृश्यन्ते । यतो यद्वस्तु यत्कार्यान्वयव्यतिरेकानुविहितभावाभावं तद्वस्तु तत्कार्यप्रसव समर्थम् । रूपं च तस्य कार्येणानुकृतान्वयव्यतिरेकमिति रूपमेव समर्थम् । तच्च द्वितीयादिषु क्षणेष्विव प्रथमेऽपि क्षणे सदिति द्वितीयादिक्षणजन्यं कार्यकलापं प्रथम एव क्षणे निष्पादयेत् समर्थस्य क्षेपायोगादिति नाक्षणिकस्य क्रमवद्व्यापारता युज्यते । § 1517

स्यादेतत् । समर्थोऽपि क्रमवत्सहकारियोगात् क्रमेण करोतीति ? तदयुक्तं विकल्पासहत्वात् । किमस्य सहकारिणः कश्चिदुपकारमादधति न 513/tha वा ? आदधाना अपि भावाद् भिन्नमभिन्नं वा ? तत्र भिन्नोपकाराधाने भावे सत्यनुत्पत्तेरुपकारे च सत्युत्पादात् । एवं कार्यस्योपकार एव जनको न जनको भावः । न चोपकारसहकारी भाव एव कार्यस्य जनको नोपकारमात्रमिति वाच्यम्, उपकारस्योपकारान्तरजनने अनवस्थापातात् । अजनने तु सहकारिभावाभावात् । अभिन्नोपकाराधाने च भाव एव जन्येत ।* स च प्रागप्यासीदिति सहकारिवैयर्थ्यम् । अनुपकारकत्वे वा

१ ब्धेः ] °विशेषणादनुप°nvt-C
३ ती ] °व्यतिरेक°nvt-C
८ क्रियापि ] °न्तरवत् किमर्थक्रि°nvt-J
१० रीरा ] °पद्यरूपप्रकारद्वयसमालिङ्गितरूपाःnvt-C
१३ योः ] च तयोःnvt-C
२५ ते ] प्रसज्यतेnvt-C
३३ * ] जनयेत्nvt-C

सहकारिणो न भावेनापेक्षेरन्नित्युत्पन्नमात्र एव भावः कार्यमुत्पादयेत्, समर्थस्य क्षेपायोगात् । क्षेपे वा न पश्चादपि कुर्यादविशेषात् । यदि मन्येत अनुपकारका अपि भवन्ति सहकारिणो यतस्तैः सह भावः कार्यं करोति । न च भावेन नापेक्ष्यन्ते, तैर्विना कार्यस्यानुत्पत्तेरिति । ननु स्वरूपेण चेत् कार्यजनको भावः, कस्मान्नैतानन्तरेण जनयति, तेभ्यः प्रागपि स्वरूपसद्भावात् । सहकारिरूपेण वा जनकत्वे सहकारिण एव जनका न जनको भावः । न चोभयभावाभावानुविधानादर्थक्रियाभावाभावयोरेकैकस्माच्च व्यभिचारादुभयाधीनतेति सांप्रतम्, भावे सत्यनुत्पादात् कार्यस्य भावस्य व्यभिचारात् चरमभाविनिमित्तसहकारिसमवधाने सति भावादेव सहकारिसमवधानस्यैव चरमभाविनोऽव्यभिचारेण कारणत्वावधारणात् । § 1518

एतेनैतन्निरस्तं भवति यदाहुरेके § 1519

स्वहेतोर्विलम्बकारी भावो जात इति नोत्पन्नमात्रः करोतीति |§ 1520

सा हि विलम्बकारिता अस्य स्वभावः सहकारिसमवधानसमयेऽप्यस्ति न वा ? अस्ति चेत् तदापि न कुर्यात् । नास्ति चेत् कथं स्वभावविनाशे भावो न नष्टः ? अथास्य विलम्बकारिता न स्वभावः, कथमुत्पन्नमात्रो न कार्यं कुर्यादिति । तस्मान्न क्रमेणार्थक्रिया भावानां नापि यौगपद्येन । तस्माद् यावत् कार्यं तेनाक्षणिकेन प्रथमे क्षणे संपादितं तावत् सर्वं द्वितीयादिष्वपि क्षणेषु संपादयेत्, तावत् कार्यसम्पादनस्वरूपस्य द्वितीयादिष्वपि क्षणेषु भावात् । न च सम्पादितं शक्य सम्पादनमिति यद् द्वितीयादिषु क्षणेषु सम्पादयति तत् 514/tha
प्रथमक्षणे सम्पादितादन्यदिति *क्रम एवावर्तते । तथा चोक्तो दोषः । युगपत् कृतकृत्यस्य वा द्वितीयादिषु क्षणेषु कर्तव्याभावान्नार्थक्रियासामर्थ्यमस्तीत्यसत्त्वेन क्षणिकत्वापत्तिः । तस्मादक्षणिके सत्त्वे व्यापकयोः क्रमाक्रमयोरनुपलम्भाद् व्यापकानुपलब्ध्या निवर्तमानं सत्त्वमक्षणिकात् क्षणिकत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः । नीलमेव चानुभूतावसितं समारोपिताक्षणिकभावमक्षणिकं तादृशनीलस्वरूपोपलम्भ एव तत्राक्षणिके क्रमयौगपद्यानुपलम्भः, यथा भूतलस्वरूपोपलम्भ एव समारोपितदृश्यत्वस्य घटस्यानुपलम्भः । भूतलं च तथोत्पन्नं घटाभावः । न त्वभावो नाम कश्चिद् विग्रहवानस्ति यः प्रतिपत्तिगोचरः स्यात्, अपि तु व्यवहर्तव्यः परम् । § 1521

स्यादेतत् । क्षणिको भावोऽर्थक्रियाजनकस्वभावो न वा ? न चेत्, असन्नेव । तज्जननस्वभावश्चेत्, किमस्य सहकारिभिः ? उत्पन्नमात्रमेव बीजमङ्कुरं जनयेत् । ननूत्पन्नो बीजक्षणः समर्थो जनयेदेवाङ्कुरम् । कुतः पुनः समर्थस्योत्पत्तिः ? पूर्वस्माद् बीजक्षणात् । तर्हि तत्सन्तानवर्तिनां सर्वेषां बीज-

५ रेण ] न कस्मान्नेमान°nvt-C
७ स्माच्च ] °रेकस्माच्चnvt-C
९ भिचारात् ] कार्यस्य व्यभिचारेणnvt-C
२० * ] क्रमा एवावर्तन्त इति तत्र चो°nvt-C

त्वाविशेषादङ्कुरजननसामर्थ्यमिति कुसुमानन्तरलब्धजन्ममात्रमेव बीजमङ्कुरं जनयेत् ? नैवम्, पूर्वपूर्वक्षितिबीजपवनादिक्षणसमवधानोत्पन्नातिशयवदुत्त-रोत्तरक्षणपरम्परालब्धजन्मा अन्त्योबीजक्षणः समर्थः समर्थक्षित्यादिलक्षण-सहभूरनपेक्ष एवाङ्कुरं जनयति । न चास्य क्षित्यादिसहभुवस्तदनपेक्षस्यापि तैर्विना कार्यकरणं तदेकसाग्यधीनस्य तदभावेऽभावात् । न वा सहकारिता क्षित्यादीनां तैरेव सहाङ्कुरजननात्, तेषामपि कार्यात् पूर्वभावस्य नियम-तोऽविशेषात् तन्मात्रत्वादेव च कारणतायाः । न च निरपेक्षाणामपि प्रत्येकं कार्यान्तरारम्भणं तन्मात्रस्य तेभ्य उपलब्धेस्तत्रैव सामर्थ्यनियमात् । न च कृतकरणतयेतरेषामक्रिया सहक्रियायां कृतमित्यसम्भवात् । न च स्वकार-णबललब्धसन्निधयो भावाः प्रेक्षावन्तः शक्यमिदमस्मास्वेकेनापि कर्तुं कृतं नः
515/tha सर्वेषां सन्निधानेनेत्यालोच्य निवर्तितुमीशते । न च स्वकारणभेदमात्रं कार्य-भेदहेतुः, अपि तु सामग्रीभेदः । तस्मिन् सति कार्यभेदोपलब्धेः अभिन्ना चेह सामग्रीति न कार्यभेदप्रसङ्गः । परस्परसमवधानं चोपसर्पणप्रत्ययेभ्यः क्षित्यादीनामिति । न च क्षणिकस्यार्थक्रियाविरोधादसाधारणता हेतोः । न च साध्यधर्मिणि दृश्यमाने शब्दादौ व्याप्तिसाधनादेव साध्यसिद्धेरसाधनाङ्गं हेतुवचनम् । न खलु सर्वोपसंहारवती व्याप्तिर्दृश्यमात्रविषया भवितुमर्हति । शक्यं हि शङ्कितुं परेणादृश्यमानानां सत्त्वमक्षणिकाद् न व्यावर्त्तितं त्वयेति सत्त्वमनैकान्तिकं क्षणिकत्वसाधन इति । तस्माद् यद् दृश्यमदृश्यं वा तत् सर्वं क्षणिकमिति दर्शनीया व्याप्तिः । § 1522

नन्वेवमपि शब्दादेर्विवादास्पदीभूतस्य व्याप्तिदर्शनबलादेव सिद्धा क्षणिक-तेति तदवस्थमेवासाधनाङ्गत्वं हेतुवचनस्य ? मैवम्, असत्यपि शशविषाणादौ यत्सद् दृश्यमदृश्यं वा तत् सर्वं क्षणिकमिति, यथा सर्वोपसंहारवती व्याप्तिः । न च शशविषाणादयोऽपि भवन्ति क्षणिकाः, एवं सत्यपि विवादास्पदीभूते शब्दादौ व्याप्तिसिद्धावपि न सिध्यति क्षणिकतेत्यवश्यं दर्शयितव्यमेतेषां क्ष-णिकत्वसाधनाय सत्त्वमिति नासाधनाङ्गता हेतुवचनस्येति । § 1523

अत्रोच्यते । न सत्त्वं क्षणभङ्गसिद्धावङ्गमसाधारणत्वात् सन्दिग्धव्य-तिरेकित्वाद् वा । *यथा हि क्रमाक्रमाभ्यां व्याप्तं सत्त्वं तदनुपलम्भेनाक्ष-णिकाद् व्यातर्वत एवं तदेव सापेक्षनिरपेक्षत्वाभ्यां व्याप्तं तदनुपलम्भेन क्ष-णिकादपि व्यावर्तते । तस्माद् गन्धवत्त्ववदसाधारणं सदसाधनाङ्गम् । तथा हि अन्त्यक्षणप्राप्तानि क्षितिपवनपाथस्तेजोबीजानि समर्थानि प्राग्भावनियतानि नियतचरमोत्पादानामवनिजलानलानिलाङ्कुराणां कारणं भवद्भिरभ्युपेयन्ते । तान्यमूनि परस्परानपेक्षाणि वा जनयेयुः, सापेक्षाणि वा ? ननु निर-पेक्षाण्येवान्त्यक्षणप्राप्तानि क्षित्यादीन्युत्तरस्मिन् पुञ्जे जनयितव्य इत्युक्तम् । तत् किमनभ्युपगतविकल्पेन सापेक्षाणि निरपेक्षाणि चेति । तत् किमिदा-

१३ चेह ] भेद° nvt-C
२४ श्यं ] °कता तेनावश्यं nvt-C
२७ * ] तथा nvt-C
२८ देव ] सापेक्षत्वानपे° nvt-C

नीं समर्थबीजक्षणजनकोऽपि बीजक्षणोऽनपेक्ष एव । ओमिति चेत् ? 516/tha
नन्वेवं सर्व एव पूर्वबीजक्षणा निरपेक्षाः स्वकार्योपजनन इति कृतं सहकारिभिः । ननूक्तं नैते प्रेक्षावन्तः, किं तु स्वप्रत्ययाधीननियतसन्निधयो न क्षणमपि व्यवधेरीशत इति । तत् किमयं कृषीबलोऽपि न प्रेक्षावान् ? प्रेक्षावान्, यतः प्रयत्नेन कुसूलादवतार्य बीजमावपति भूमौ परिकर्मितायां क्षित्यादिसहभुव एव बीजक्षणस्यातिशयोत्पादनपरम्पराया अङ्कुरप्रसवसामर्थ्यात् । कुसूलस्थात् तु सहस्रेणापि वर्षैरङ्कुरानुत्पादात् तत्रावपतीति चेत् ? अथ किमयं न स्वसन्तानमात्रप्रभवः समर्थो बीजक्षणः ? तथा चेत् कथं सन्तानान्तरं नापेक्षेत स्वकार्ये । नन्वपेक्षत एव, किं तु स्वोत्पादे न पुनः स्वकार्ये । तत्र चास्यानपेक्षत्वमुपेयते, न तु स्वोत्पादे । ननूत्पत्तावप्यस्य जागर्ति स्वसन्तानवर्ती पूर्व एव निरपेक्षः । एवं तस्य तस्य पूर्वः पूर्वः क्षणसन्ततिपतित एवानपेक्षो जागर्त्युपजनन इति कुसूलनिहितबीज एव स्यात् कृती कृषीबलः, कृतमस्य कृषिकर्मणा दुःखबहुलेन । तस्मात् परस्परापेक्षाणामेवान्त्यक्षणप्राप्तानां कार्यजनकत्वमकामेनाप्युपेयम् । अपि चान्त्यक्षणप्राप्तं बीजमनपेक्ष्य अङ्कुरावनिपवनपाथस्तेजांसि जनयत् किं येनैव रूपेणाङ्कुर जनयति तेनैव तदितराण्यपि ? किं वा रूपान्तरेण ? न तावत् तेनैव, क्षित्यादीनामङ्कुरस्वाभाव्यापत्तेः । न खलु भवतां कारणाभेदे भेदवत्कार्यं भवितुमर्हति, कार्यभेस्याकस्मिकत्वप्रसङ्गात् । यथोक्तं भवद्भिरेव

अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः
कारणभेदश्च§ 1525

इति । नापि सामग्रीभेदः, तस्या अप्यभेदात् । अन्यथा सहभावनियमाभावात् । स्वकारणादासादितः कश्चिदेव स्वभावभेद एकस्तादृशो यस्मान्नानाकार्याणि जायन्ते । तस्मान्नाकस्मिकत्वं कार्यनानात्वस्य नाप्यतिप्रसङ्गः तादृशस्य तस्यासार्वत्रिकत्वात् । न च कार्यकारणयोरभेदो येन कारणभेदाभेदावनुपतेतां कार्यभेदाभेदौ । तस्माद् यथा केभ्यश्चिदेव बहुभ्यः कार्यमेकं जायते तथैकस्मादेव कुतश्चिद् बहूनि जनिष्यन्ते कार्याणीति चेत् ? मुधैव तर्हि नानादेशवृत्तिरेकोऽवयविसामान्यसंयोगादिरर्थस्तपस्वी भवता आयासितः । न हि नानात्वेऽपि देशानां तदाश्रितः सामान्यादिरर्थो नाना भवितुमर्हति, तस्य तेभ्योऽभिन्नत्वात् । रूपान्तरेण बीजमङ्कुरादितरेषां क्षित्यादीनां जनकम् । तथा हि बीजमङ्कुरस्योपादानं तत्सारभागाविक्रिययाङ्कुरस्योत्पत्तेः । क्षित्यादिषु तु जनयितव्येषु सहकारि, पूर्वे तु क्षित्यादयः क्षित्यादीनां यथास्वमुपादानानि तद्विक्रियया तदुत्पत्तेरिति चेत् ? अथ स-

५ र्मितायां ] °कर्षितायांnvt-C
१४ म् ] °भ्युपेयम्nvt-J
२५ न्ते ] जनयिष्यन्तेnvt-C
२७ आयासितः ] अपासितःnvt-C
२८ त्वात् ] भिन्न°nvt-J

हकारितोपादानते किमेकं तत्त्वं नाना वा ? एकं चेत्, कथं रूपान्तरेण जनकम् ? नानात्वे त्वनयोर्बीजाद् भेदोऽभेदो वा ? भेदे कथं बीजस्य जनकत्वं ताभ्यामेवाङ्कुरादीनामुत्पत्तेः ? अभेदे वा कथं न भेदो बीजस्य भिन्नतादात्म्यात् । *एतयोर्वा कथं नाभेदो भिन्नार्थतादात्म्यात् । तस्मादङ्कुराद् भिन्ने क्षित्यादौ जनयितव्ये तदुपादानं पूर्वमेव क्षित्यादिसमसमयभावि बीजेनापेक्ष्यते । एवं बीजमपि समसमयभाव्येव सहकारिकारणं क्षित्यादिभिरपेक्ष्यते । नान्यथा कार्यभेदसिद्धिरित्यनिच्छताप्यभ्युपेतव्यम् । न चानुपकारकमपेक्षागोचर इति च भवद्भिरेवोपपादितम् । न च क्षणस्योपकारकत्वसम्भवोऽन्यत्र जननात् तस्याभेद्यत्वात् । न च समसमयभाविनोर्जन्यजनकत्वमस्ति सव्येतरगोविषाणयोरिव । तस्मात् स्वसन्तानमात्रादेव कार्योत्पादप्रसङ्गात् कार्यभेदानुपपत्तेश्चानुपकारिण्यपेक्षाविरहाच्च क्षणिकस्यापि सापेक्षस्यानपेक्षस्य वा नार्थक्रिया सम्भविनीत्यसाधारणसत्त्वं न क्षणभङ्गसिद्धावङ्गम् । § 1526

अथ मा भूदसाधारणता सत्त्वस्येत्यनुपकारकेष्वपि कार्यकरणायापेक्षाभ्युपेयते, तेषामपि कार्येणानुकृतान्वयव्यतिरेकत्वात् । न त्वनेन क्रमेणाक्षणिकोऽपि भावोऽनुपकारकानपि सहकारिणः क्रमवतः क्रमवतैव कार्येणानुकृतान्वयव्यतिरेकानपेक्षिष्यते । करिष्यते च क्रमवत्सहकारिवशः क्रमेण कार्याणि । समर्थस्यापि चापेक्षणीयासन्निधेः कार्यक्षेप उपपत्स्यते । न चैतावता सहकारिसमवधानादेवोत्पत्तिमतः कार्यसिद्धिः, कृतमेषां रूपेणेति वाच्यम्, तत्सहितादेव तत उत्पत्तिदर्शनात्, रूपे सत्यप्यनुत्पादात् । समवधाने तु सत्युत्पादादेव कार्यस्य समवधानमेव हेतुः, न पुना रूपम-
518/tha पीति चेत् ? तत् किमिदानीं रासभादितुल्यता बीजरूपस्य ? ओमिति चेत् ? अथ कस्मात् गर्दभादीनन्तरेणेव बीजरूपं विनापि नाङ्कुरो जायते । तत्समवधानस्य तत्कारणत्वादिति चेत् ? तत्समवधानस्य च कारणत्वे कथं तन्निवेशि रूपमपि न कारणम् । न चावर्जनीयतया तन्निवेशः समवधानमात्रस्य बीजादिरूपमन्तरेणापि तत्र तत्र भावात् । विशेषस्तु समवधानस्य रूपमेव बीजादीनाम् । तस्माद् यथोभयाधीननिरूपणा व्याप्तिरयोगव्यवच्छेदेन व्यापके निरूप्यते, व्याप्ये भाव एव व्यापकस्य नाभाव इति व्याप्ये पुनरन्ययोगव्यवच्छेदेन व्यापक एव भावो व्याप्यस्य नान्यत्रेति । एवं कार्यकारणभावोऽप्युभयाधीननिरूपणोऽपि कारणे अयोगव्यवच्छेदेन निरूप्यते । कार्योत्पादस्य पुरस्ताद् भाव एव कारणस्य नाभाव इति । कार्ये पुनरयोगव्यवच्छेदेन, कारण एव सति भावो नान्यस्मिन्निति अनुभवानुसारान्निश्चीयते । तथैव लौकिकपरीक्षकाणां संप्रतिपत्तेः । न च कारणतैव सत्ता किं तु स्वरूपं नीलादेरनुभूतावसितम्, तद्धि तेनैव रूपेण

४ *] तयोर्वैकरूपत्वमेव तादा°nvt-C
२५ त्वे] °वधाने कारणेnvt-C
२७ स्य] °धानेnvt-C

स्वाभावव्यवच्छिन्नं तासु तास्वर्थक्रिसूपयुज्यते, न पुनरर्थक्रियाकारितैव स्वरूपम् । मा भूदनेकार्थक्रियाकारिणोऽपर्यायेण रूपभेदः । तस्माद् यद्यस्ति सर्वज्ञस्ततः स्वरूपेणैव सन् भावस्तज्ज्ञानस्यालम्बनप्रत्ययो भविष्यति । अथ तु नास्ति तथापि सद्रूपो जनित्वा आपाततोऽकिञ्चित्करोऽपि पश्चात् कुतश्चिन्निमित्तादासाद्य सहकारिप्रत्ययान् तासु तास्वर्थाक्रियासूपयोक्ष्यते । तत् सिद्धमेतत् क्षणिकस्यापि क्रमाक्रमाभ्यां यथायोगमर्थक्रियोपपत्तेर्व्यापकानुपलब्धेरसिद्धेः सन्दिग्धव्यतिरेकमनैकान्तिकं सत्त्वं शाक्यानां क्षणिकत्वे साध्ये भावानाम् । अस्माकं त्वन्यथासिद्धमसिद्धप्रभेद एवेति । न च जनकत्वाजनकत्वलक्षणविरुद्धधर्मसंसर्गो नानात्वे हेतुर्भवितुमर्हति । जनकत्वं नाम न वस्तुस्वभावोऽपि तु तद्धर्मः । धर्मश्च धर्मिणो वस्तुतो भिद्यते । न चान्यस्य भेदोऽन्यस्य भेदायालमतिप्रसङ्गात् । अन्यत्वाविशेषे कथं तस्यैव धर्म इति चेत् ? अत्र वस्तुस्वभावैरेवोत्तरं वाच्यम् । यथान्यत्वाविशेषेऽपि कार्यं धूमो 519/tha
हुतभुजः एव, न बीजस्येत्युक्तम् । न च कृतकत्वमपि क्षणिकत्वे हेतुरन्यथासिद्धेः सहेतुकेऽपि विनाशे तदुपपत्तेश्च । न चोत्पत्तिविनाशयोस्तादात्म्यं भावस्यात्यन्ताभावप्रसङ्गादित्युक्तम् । तदिदमुक्तं वार्त्तिककृता—तेऽप्यसिद्धा वान्यथासिद्धा वा विरुद्धा वा भवन्तीत्यहेतव इति । अन्त्यक्षणविशेषदर्शनं पूर्वक्षणधर्मत्वेनासिद्धत्वादसिद्धम् । सत्त्वकृतकत्वे अन्यथासिद्धे, विरुद्धत्वं च सर्वस्यैव हेतोः क्षणिकत्वे साध्ये । तथा हि सत्त्वं कृतकत्वं वा त्रैलोक्यव्यावृत्ततयाननुगतं देशतः कालतो वा न साधनं तस्याशक्याविनाभावज्ञानतया लिङ्गभावाभावात् । अन्वयमुखेन व्यतिरेकमुखेन वा अविनाभावग्रहस्यैकस्मिन् क्षणेऽशक्यत्वात् । तस्माद् देशकालानुगतं सत्त्वं कृतकत्वमन्यद् वा हेतूकर्तव्यम् । तच्च विधिरूपं वा भवत्वन्यव्यावृत्तिरूपं वा नानाकालमेकमक्षणिकं क्षणिकत्वेन स्वसाध्येन विरुध्यत इत्युक्तम्—विरुद्धा वेति । अन्ते विशेषदर्शनादित्यस्य तु विरुद्धत्वमनन्तरं वक्ष्यति । उपेत्य विशेषवत्त्वस्य सिद्धत्वमनैकान्तिकत्वमाह—उपेत्य वेति । हेतोरसिद्धत्वविरुद्धत्वे दर्शयितुमाह—अन्ते विशेषेति । § 1527

दर्शनादर्शनलक्षणस्य हेतोरन्यथासिद्धतेत्याह—योऽप्ययं हेतुरिति । § 1528

भावाभावयोस्तद्वत्त्वादिति । संयोगभावाभावयोरिह बुद्धेर्भावाभाववत्त्वात् । § 1529

प्रदीपस्य देशान्तरे उत्पाद इति, एतदपि न बुध्यामह इति । क्षणिकस्य प्रदीपस्य यदि स्वसन्तानमात्रप्रतिबद्धं देशान्तरे कार्योत्पादकत्वं ततः सर्व एव प्रदीपक्षणा देशान्तरे प्रदीपमुत्पादयेयुः, न केचन प्रघनोदर एवेति । अथोपसर्पणप्रत्ययवशात् प्रघनोदरादन्यत्रापि कार्यमुत्पादयन्ति ? ननूपसर्पणप्रत्ययः

४ द्रूपो ] तद्रूपःnvt-C
६ त् ] अक्षणिक°nvt-J
२४ स्य ] °वत्त्वेnvt-C
२९ त्त्वात् ] °र्भाववत्त्वादि°nvt-C
३२ दि ] सन्तानमात्रप्रभवत्वं निबद्धंnvt-C

प्रदीपे कश्चिदुपकारमाधत्ते न वा ? न तावदाधत्ते क्षणस्याभेद्यत्वेनोपकृतानुपकृतत्वासंभवात् । अनाधाने च सहकारिभावाभावात् । अनुपकारकस्य सहकारित्वेऽतिप्रसङ्गादिति भवतामेव गिरः । न च विशिष्टप्रदीपक्षणजनन-
520/tha मेवोपकारः सहकारिणां तस्य पूर्वस्मादेवोपादानादुपपत्तेः सहकार्यनपेक्षणात् । न खलु तस्यैव तत्कारणस्याप्युपकारकाः सहकारिणो भवितुमर्हन्ति । एवं पूर्वेषामपि प्रदीपक्षणानां तत्पूर्वपूर्वप्रदीपक्षणमात्रसामर्थ्यभुवा न सहकारिणा किञ्चिदाधीयत इति सर्व एवैकस्मिन् प्रघाने कार्यं कुर्युः, देशान्तरे वा । यदि पुनरनुपकारिणोऽपि कार्यानुविहितभावाभावतया क्षणिकेन प्रदीपेन कार्यक्रियां प्रत्यपेक्षन्ते तदक्षणिकपक्षेऽपि तुल्यमित्यभिप्रायः । विपश्चितं चैतदस्माभिः ब्रह्मतत्त्वसमीक्षान्यायकणिकाभ्यामित्युपरम्यते । § 1530

न किलाकाशे पततो लोष्टादेरिति । लोष्टश्येनादेस्तुल्यानां गुरुत्ववतां द्रव्याणामेकस्य गुरुत्वप्रयत्नक्षेपाः कारणम् । तथा हि सौधस्योपरिस्थितेन पुरुषेण भूमौ चरन्तं पारावतमुद्दिश्य यदाधःश्येनः क्षिप्यते तदा श्येनस्य पारावतजिघृक्षाजनितः प्रयत्नश्च गुरुत्वं च क्षेपश्चाशुतरपतनहेतवः । अक्षिप्तस्य तु गुरुत्वप्रयत्नावाशुपतनहेतू । अप्रयतमानस्य गुरुत्वमात्रं पतनहेतुरिति । औलूक्यमतेऽपि न दोष इत्यत आह—एकश्च संस्कार इति । § 1531

अयुगपत्कालाः प्रत्यया एकविषया इत्युच्यमाने घटपटादिप्रत्ययाः प्रदीपादिप्रत्ययाश्च क्रमवन्त एकविषयाः प्रसज्येरन्नित्यत आह—विप्रतिपन्ना इति । समानशब्दवाच्यत्वादित्यनेकान्तः । संभवन्ति हि समानशब्दवाच्याः प्रत्ययाः अक्षोऽक्ष इति । न च समानविषयाः देवनादीनां तद्विषयाणां भेदादत आह—तत्प्रत्ययसामानाधिकरण्ये सतीति । तथापि प्रदीपप्रत्ययैरेवानेकान्त इत्यत आह— अव्युत्थायीति । व्युत्थातुं भ्रमितुं शीलमस्येति व्युत्थायि भ्रान्तमिति यावत् । अभ्रान्तत्वं चास्य क्षणिकत्वसाधननिराकरणेन द्रष्टव्यम् । अव्युत्थायितत्प्रत्ययसामानाधिकरण्येनैव सिद्धे समानशब्दवाच्यत्वं प्रपञ्चः ॥ १४ ॥ § 1532

## न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ ३ । २ । १५ ॥

§ 1533

521/tha

भाष्यम्—गुणान्तरप्रादुर्भाव इति । द्रव्यं तावत् सदेव, गुणोऽपि सन् केवलमनुद्भूत आसीत् । एकश्चोद्भूतो गुणः । तत्र य उद्भूतः स तिरोभवति । तिरोभूतश्चोद्भवति । पूर्वगुणस्य निवृत्तौ तिरोभूतौ गुणान्तरमुत्पद्यते उद्भवतीत्यर्थः ॥ १५ ॥ § 1534

५ काः ] °स्याप्यनुपकार° nvt-J
७ घाने ] प्रधाने nvt-C
९ भिप्रायः ] °मिति संक्षेपः nvt-C
२९ य ] उद्भूतस्तिरोभवतिnvt-C

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ ३ । २ । १६ ॥ § 1535

अत्र तु प्रतिषेध इति । क्षीरावयवा एव हि क्षीरविनाशे सत्युत्पन्नपाकजा *दधिलक्षणं द्रव्यमुत्पादयन्ति । यदि तु सर्वं कार्यं सदेव कारणव्यापारात् प्रागपि, व्यर्थः कारणव्यापारः, अभिव्यक्तेरपि कार्यायाः सत्त्वात् । असत्त्वे वा यथा सैव न सती क्रियते, एवं कार्यान्तराण्यपीति । विपश्चितं चैतदस्माभिः न्यायकणिकायाम् ॥ १६ ॥ § 1536

क्वचिद् विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ ३ । २ । १७ ॥ § 1537

अभ्यनुज्ञाय च निष्कारणमिति । विनाशोत्पादवत्त्वात् समानधर्मात् संशयः । दधिक्षीरयोर्विनाशोत्पादावकारणौ दृष्टौ कुम्भस्य चोत्पादविनाशौ सकारणकौ । तदिह स्फटिके विनाशोत्पादौ सकारणौ निष्कारणौ वेति सन्देहः । तद् यदि सकारणाववेति प्रमाणतो निश्चीयते, ततो विनाशकारणानुपलब्धेः स्फटिकस्य कुम्भवद्विनाशो नास्तीति निश्चीयते । तदिदमुक्तं भाष्यकारेण—न पुनर्यथा विनाशकारणाभावादिति । § 1538

निरधिष्ठानं चेति । धर्मिणमाश्रित्य तत्समानधर्मा दृष्टान्तो भवति । स्फटिकोत्पाद विनाशौ च धर्मिणौ । तत्समानधर्मतया क्षीरदधिविनाशोत्पादयोर्दृष्टान्तत्वेन भवितव्यम् । न पुनः स्फटिकोत्पादविनाशौ धर्मिणौ गृह्येते । तस्मान्न तत्समानधर्मतया दृष्टान्तौ भवत इति । *अभ्यनुज्ञाय च स्फटिकोत्पादविनाशौ इति । कुम्भो दृष्टान्तः प्रामाणिकत्वात् । न तु दधिक्षीरविनाशोत्पादौ तयोरकारणत्वस्य सकारणत्वग्राहिणा प्रमाणेनापास्तत्वादित्यर्थः । यदि तु द्रव्यसमवायादित्युच्येत ततस्तोयादिपरमाणुसमवेतै रूपादिभिरनेकान्तः स्यादित्यत आह—व्यापकेति । तथाप्यात्मत्वसामान्येनानेकान्तोऽत आह—गुणत्वे सतीति । तथाप्यात्मसामान्येनानेकान्तः, अत आह— गुणत्वे सतीति । तथाप्यात्मपरिमाणेनानेकान्तोऽत आह—प्रत्यक्षतयेति । अस्मदादीनामिति शेषः । गुणत्वादिविशेषणयोगात् प्राग् व्यापकग्रहणस्योपयोगः । अस्मदादिप्रत्यक्षत्वादित्युच्यमाने सामान्यसमवायाभ्यामनेकान्तः स्यादित्यत आह—जातिमत्त्वे सतीति । आश्रितत्वादित्यत्रापि जातिमत्त्वे सति प्रत्यक्षत्वे चेत्यनुषञ्जनीयम् । अनित्या बुद्धिः प्रत्यक्षत्वादित्युच्यमाने मनसा व्यभिचारोऽत आह—अयोगीति । तथाप्यात्मना व्यभिचारोऽत उक्तं करणभावे सतीति । हानादिबुद्धौ बुद्धिः करणं भवति । शब्दश्चार्थप्रत्यये करणम् । अत्रापि जातिमत्त्वे सतीत्यनुषंक्तव्यम्, तेन न गन्धत्वादिभिरनेकान्तः ॥ १७ ॥ § 1539 522/tha

॥ इति क्षणभङ्गप्रकरणम् ॥

४ *] विलक्षणंnvt-C
१९ *] nvt-J पुस्तक एव
२१ र्थः ] nvt-J पुस्तक एव
२४ सामान्येनानेकान्तः ] °त्मपरिमाणेना°nvt-C

### ३.२.३ बुद्धेरात्मगुणत्वप्रकरणम्

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥ ३ । २ । १८ ॥
§ 1541

चिन्तान्तरमवतारयति—इदं तु चिन्त्यत इति । नन्वात्मपरीक्षायामात्मगुणत्वं बुद्धेर्व्यवस्थापितं तत् कस्मात् पुनः परीक्ष्यत इत्यत आह भाष्य-
523/tha कारः—प्रसिद्धोऽ पीति । यद्यप्ययमर्थः परीक्षितः, तथाप्यवान्तरविशेषपरिज्ञापनार्थं पुनः परीक्षत इत्यर्थः । चोदयति बार्त्तिककारः—न गुणेति ॥ परिहरति—अनित्यत्वे सतीति । विमृश्य सिद्धान्ती पक्षं गृह्णाति—सन्निकर्षोत्पत्तेरिति । नेन्द्रि...नात् ॥ चोदयति—अद्राक्षमित्येतन्नेति । परिहरति—स्मृतावपीति ॥ १८ ॥ § 1542

युगपज्ज्ञेयानुपलब्धेश्च न मनसः ॥ ३ । २ । १९ ॥ § 1543

देशयति—अस्तु तर्हीति । युग...सः ॥ परिहरति—युगपदिति । यत् करणत्वेनानुमितं तत् करणत्वमपोद्य न कर्तृ भवितुमर्हतीत्यर्थः । युगपज्ज्ञेयानुपलब्ध्या यत् समधिगतमिति भाष्यमाक्षिपति—विशेषणोपादानादिति । समाधत्ते—न सर्वस्येति । पुनराक्षिपति—एवमपीति । विशिष्टस्य करणस्य ज्ञानगुणत्वनिषेधः करणान्तरस्य ज्ञानगुणत्वमापादयति, न चात्मा करणमित्यर्थः । समाधत्ते—अन्यस्योपपत्तेरिति । एतदेव विवृणोति—अनवस्थितत्वादिति । प्रमातैव कदाचित् प्रमाणं कदाचित् प्रमेयमित्यर्थः । पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्तीति । यादृशोऽयं पुरुषः, तादृशोऽयमपीति पुरुषान्तरेण प्रसिद्धेन पुरुषान्तरपरिच्छेद इति । पृच्छति—यदि न तस्य करणस्य, कस्य तर्हीति । उत्तरम्—ज्ञस्य वशीत्वात् । कर्तुः स्वातन्त्र्यादित्यर्थः । कर्तृकरणादिसमवधाने हि चैतन्यं कर्तर्येव दृष्टं न करणादौ यथा मृद्दण्डचक्रसलिलसूत्रकुलालसमवधाने कर्तुरेव कुलालस्य न तु मृदादीनामिति । वशीज्ञाता, वश्यं करणमिति भाष्यम् । तदनुपपन्नम्, ज्ञातुरपि क्वचिद्, वश्यत्वदर्शनात्, यथा देवदत्तं कटं कारयति यज्ञदत्त इत्यत आह—न चायं ज्ञातरीति । यदि तु कश्चित् ज्ञानगुणं मन इच्छेत् तं प्रति भाष्यम्—ज्ञानगुणत्वे चेति । घ्राणादिसाधनस्येति भाष्यं व्याचष्टे—यथा ज्ञातुरिति । तथा च मन्तुर्मतिसाधनं यत् तन्मनः करणम् । अथ तदपि कस्माच्चेतनं न भवतीत्यत आह—उभ-
524/tha योरिति । विभु चान्तःकरणं ज्ञानगुणम् अन्तःकरणान्तररहितमिति शेषः । विकरणधर्मेति भाष्यम् । विशिष्टं करणं धर्मो यस्य स विकरणधर्मा अस्मदादिकरणविलक्षणकरणो येन व्यवहितविप्रकृष्टसूक्ष्मादिवेदी भवतीत्यर्थ ॥ १९ ॥ § 1544

---

२५ चेति ] तद् व्याचष्टे—ज्ञानगुणत्वे चेतित्यधिकम् nvt-J

तदात्मगुणत्वेऽपि तुल्यम् ॥ ३ । २ । २० ॥ § 1545

अणु मनोऽन्तःकरणमपश्यंश्चोदयति—तदात्मगुणत्वेऽपीति ॥ २० ॥ § 1546

इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः ॥ ३ । २ । २१ ॥ § 1547

परिहरति—न प्रसङ्ग इति ॥ २१ ॥ § 1548

नोत्पत्तिकारणानपदेशात् ॥ ३ । २ । २२ ॥ § 1549

यदि पुनरित्यादि भाष्यं पूरयित्वा व्याचष्टे—यदि पुनरिति । नोत्प...शात् ॥ नोत्पत्तीति । नात्र प्रमाणमपदिश्यते प्रत्युत बाधकं प्रमाणमस्तीत्यर्थः । व्याख्यानान्तरमाह—अयुगपदुत्पत्तौ वेति । व्याख्यानान्तरमाह—विदेहेति । शरीरवृत्तित्वे हि मनसः सर्वं ज्ञानं शरीरायतनस्यात्मनो भवेत् । यदा तु मन एव नास्ति तदेन्द्रियार्थसन्निकर्षस्यात्मनश्च शरीराद् बहिरपि भावाद् विदेहप्रत्ययोत्पादप्रसङ्ग इति । अन्तःकरणप्रत्याख्याने चेति । यदि सर्वाण्यपि ज्ञानानि न युगपदुपजायन्ते, तथापि स्मृतीनामवश्यं युगपदुत्पादप्रसङ्ग इति पूर्वस्मादस्य विशेषः । व्याख्यानान्तरमाह—यदा चेन्द्रियमात्मा चार्थेन युगपत्संबद्धाविति । असति इन्द्रियमनःसन्निकर्षे व्यभिचारिणां कारणत्व- 525/tha
कल्पनायां विनिगमनाहेतोरभावादिति भावः ॥ २२ ॥ § 1550

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ ३ । २ । २३ ॥ § 1551

अत्र पूर्वपक्षसूत्रे चकारः पूर्वपूर्वपक्षसूत्रापेक्षयेत्याह—तदात्मगुणत्व इति । अतः परस्य निगद एव व्याख्यानम् ॥ २३ ॥ § 1552

अनित्यत्वग्रहणाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥ ३ । २ । २४ ॥ § 1553

यदनन्तरमपवृज्यते पुरुषः सा अन्त्या बुद्धिः स्थितिहेत्वभावाद्विनश्यतीति । स्थितिहेतू धर्माधर्मौ तयोरभावादिति । अथ तयोरभावः कस्मादित्यत आह—कालात् । अन्त्यसुखदुःखोपभोगकालं प्राप्येत्यर्थः । अथ वा स्वजनितात् संस्कारादेवान्त्याया बुद्धेर्विनाश इत्याह—संस्काराद् वा । संस्कारस्य तु स्थितिहेत्वदृष्टाभावाद् विनाशो भवतीति भावः । पृच्छति—कथं कालात् इति । उत्तरम्—यावन्त्यस्य जन्मन इति । चरमस्य देहस्येत्यर्थः । देशयति—यदि कारणस्येति । अत्र तावदेकः परिहार इति । एकः प्रधानः परिहारः । परिहारान्तरं त्वेकदेशिमतेनाप्रधानमित्यर्थः । अपि च न स्मृतयो युगपदुत्पद्यन्ते परिच्छेदत्वाद् गन्धरसरूपस्पर्शशब्दज्ञानवदित्याह— परिच्छेदत्वाच्चेति ॥ २४ ॥ § 1554

२ अणु ] अथnvt-C

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ ३ । २ । २५ ॥ § 1555

एकदेशिपरिहारमाह—अपरे त्विति ॥ २५ ॥ § 1556
526/tha

नान्तःशरीरवृत्तित्वान्मनसः ॥ ३ । २ । २६ ॥ § 1557

दूषयति—एतत्तु न सम्यगिति । नान्तः…सः ॥ न हि मनः क्वचिदाश्रितम् इति । न क्वचित् समवेतम् । संयोगमात्रं चातिप्रसक्तमित्यर्थः । नापि वृत्तिः स्वकार्यसामर्थ्यम् इति । शरीर एव मनः स्वकार्यं करोति, नान्यत्रेति शरीराश्रितं मन इत्युच्यत इत्येतदपि नास्ति, इन्द्रियार्थसन्निकर्षस्य मनःकार्यस्य शरीराद् बहिर्भावादित्यर्थः । तमिममाक्षेपं समाधत्ते—अत्र ब्रूम इति । येनात्मना यच्छरीरं कर्मोपार्जितं तत्संयुक्तस्य मनसो वैशेषिकज्ञानादिलक्षणकार्यकारित्वं न तदसंयुक्तस्येति शरीराश्रितत्वं मनसो नान्यदित्यर्थः ॥ २६ ॥ § 1558

साध्यत्वादहेतुः ॥ ३ । २ । २७ ॥ § 1559

चोदयति—साध्य…तुः ॥ २७ ॥ § 1560

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ ३ । २ । २८ ॥ § 1561

परिहरति—स्मर…धः ॥ २८ ॥ § 1562

न तदाशुगतित्वान्मनसः ॥ ३ । २ । २९ ॥ § 1563

पुनश्चोद्यम्—न त…सः ॥ २९ ॥ § 1564

न स्मरणकालानियमात् ॥ ३ । २ । ३० ॥ § 1565
527/tha

पुनः परिहारः—न स्म…मात् ॥ ३० ॥ भाष्यम्—चिन्ताप्रबन्धः स्मृतिप्रबन्धः । कस्यचिदेवार्थस्य लिङ्गभूतस्य चिह्नभूतस्यासाधारणस्येति यावत् । चिन्तनं स्मरणम् । आराधितं सिद्धं चिह्नवतः स्मृतिहेतुर्भवतीति । इतश्च शरीरसंयोगापेक्षमेव मनः स्मृतिहेतुर्नेतरथेत्यह—शरीरसंयोगानपेक्ष इति ॥ ३० ॥ § 1566

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥ ३ । २ । ३१ ॥ § 1567

१४ ति ] चोद्यम् nvt-C
१७ ति ] परिहारः nvt-C

शरीरान्न बहिर्मन इत्यत्रैकदेशिपरिहारमुपन्यस्यति—आत्म…षः ॥ ३१ ॥ § 1568

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३ । २ । ३२ ॥ § 1569

दूषयति—व्यास…नम् ॥ ३२ ॥ § 1570

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम् ॥ ३ । २ । ३३ ॥ § 1571

प्रातिभवदिति । स्मृत्युत्पादस्य पुरस्तात् प्रणिधानादीनां स्मृतिकारणानामसंवेदनादात्ममनः संयोगात् संस्कारापेक्षात् स्मृतीनां युगपदुत्पादप्रसङ्गः प्रातिभवदित्याक्षेपः । समाधानमाह—सतः स्मृतिहेतोरिति । § 1572

अदृश्यमानमपि कारणम् । तत्क्रमश्च कार्योत्पादक्रमेणानुमीयत इति प्रातिभमपि पुरुषकर्मविशेषापेक्षादात्ममनःसन्निकर्षादुपजायमानं नाकारणं न चाक्रमवदिति प्रधानभूतामुपपत्तिमवतारयितुं पृच्छति भाष्यकारः—प्रातिभमिदानीमिति । § 1573

अत्रोत्तरमाविलं दत्त्वा शङ्कते—हेत्वभावादयुक्तमिति चेत् ? उत्तरसारमाह— न करणस्येति । यद्यपि क्वचिद् व्रश्चनस्य युगपद् दारुद्वयसंयोगे 528/tha युगपच्छिदाद्वयं भवति, तथापि व्रश्चनावयवभेदात् करणभेद उन्नेयः । अथ वा करणान्तराणि युगपत् कार्याणि कुर्वन्तु, प्रत्ययकरणं तु क्रमेणैव प्रत्ययान् करोतीति तत्र न व्यभिचारः । तदुक्तम्—प्रत्ययपर्याय इति । तस्मात् करणमेकं न क्वचिदपि युगपत् कार्यायालम् । कर्ता पुनरेकोऽपि करणभेदेन युगपद् बहूनि कार्याणि करोतीत्याह—न ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्ययyौगपद्यादिति । विविधं करणं धर्मो यस्य स तथोक्तः । तद् व्याचष्टे वार्त्तिककारः—न चायं नियम इति । योगी खलु ऋद्धौ प्रादुर्भूतायां सेन्द्रियाणि शरीराणि तेषु तेषु लोकेषु निर्माय मुक्तात्मनामादाय मनांसि मोक्षाय त्वरमाणो युगपत् स्वकर्मणोपार्जितान् सुखदुःखभेदान् अद्विषन्न सक्तो भुङ्क्ते तदस्यैकस्यापि करणभेदाद् युगपज् ज्ञानानि भवन्तीति । § 1574

अयं च द्वितीयः प्रतिषेधः ज्ञानसंस्कृतात्मप्रदेशभेदस्यायुगपज्ज्ञानोत्पादकस्य । अवस्थितेति । यत्रात्मप्रदेशेऽस्य ज्ञानानि नानाविषयाणि जातानि तत्संस्काराश्च तत्रैव अवस्थितशरीरस्य । तदनेन शरीरान्तर्गतस्य मनसस्तत्र प्रदेशे संयोग उपपादितः । § 1575

तदिदमाह वार्त्तिककारः—यदि च ज्ञानसमवेतात्मप्रदेशासन्निकर्षादिति । अतश्च अव्यापकत्वाद् अपरिहार इत्यर्थः । आचार्यदेशीयानां तु स्मृतियौगपद्यप्रसङ्गमाशङ्कत—अवस्थितशरीरस्यैव संस्काराः समानदेशा

१ ति ] इत्यत्रैकदेशिमतम्nvt-C द्रः अलङ्कारः पृः ५८४

३३ त ] प्रसङ्गमाहnvt-C

इत्ययुक्तम् । कुतः ? आत्मप्रदेशानामद्रव्यान्तरत्वात् सर्वसंस्काराणां समानदेशत्वे प्रत्यययौगपद्यप्रसङ्गोऽपरिहार्यः । न ह्यात्मनो घटस्येव प्रदेशास्ततोऽन्ये सन्ति, किं त्वात्मैव । स चैक इति सर्व एवात्मवर्तिनः समानदेशा इत्यर्थः । तदिदमुक्तं भाष्यकारेण—आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे स्मृतियौगपद्यस्यप्रतिषेधानुपपत्तिरिति । § 1576

शब्दसन्ताने त्विति शङ्कानिराकरणभाष्यम् । तुशब्दः शङ्कां निराकरोति
529/tha । तदेतद् भाष्यं वार्त्तिककारो व्याचष्टे—संस्कारप्रत्यासत्त्येति । पृच्छति—का प्रत्यासत्तिरिति । उत्तरम्—न ब्रूम इति । निष्प्रदेशत्वेऽप्यात्मनः संस्कारस्याव्याप्यवृत्तित्वमुपपादितम् । तेन शब्दवत् सहकारिकारणस्य सन्निधानासन्निधाने कल्पेते एवेत्यर्थः ॥ ३३ ॥ § 1577

## ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३ । २ । ३४ ॥

§ 1578

संप्रति बुद्धिरेव किमिच्छादिसमानाधिकरणा न वेति विचार्यते । तत्र सांख्यदर्शननाशकानां । विप्रतिपत्तेः संशयः । तद्विप्रतिपत्तिमाह—पुरुषधर्मो ज्ञानमन्तःकरणस्य त्विति । पुरुषचैतन्यमेकमेव कूटस्थनित्यं सत् तत्तदर्थाकारपरिणतबुद्धिसत्त्वप्रतिबिम्बविभ्रमवशाद् भिन्नमिवोपजनापायधर्मकमिव ज्ञानमिति च वृत्तिरिति चाख्यायते । इच्छाद्वेषादयस्तु वस्तुतः उपजनापायधर्माणोऽन्तःकरणस्येति दर्शनम् । तत्प्रतिषिध्यते—ज्ञस्ये...त्योः ॥ प्रति वृत्त्याश्चतीति प्रत्यक् स चात्मा चेति प्रत्यगात्मा तस्मिन् । एतदुक्तं भवति, *ज्ञातृसामानाधिकरण्येनोपलब्धेरन्यदीयानां चेच्छादीनामन्यस्याप्रत्यक्षीकरणात् तत्करणे वा मैत्रगतानामपि चैत्रेण ग्रहणप्रसङ्गाद् अन्तःकरणवृत्तीनां च गुणान्तराणां नित्याप्रत्यक्षत्वादात्माश्रिता एवेच्छादयो नान्तःकरणाश्रया इति ॥ ३४ ॥ § 1579

## तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥ ३ । २ । ३५ ॥

§ 1580

अत्रान्तरे लब्धावकाशो भूतचैतनिकः प्रत्यवतिष्ठते—तल्लि...धः ॥ यदि यस्यारम्भनिवृत्ती तस्येच्छाद्वेषौ, यस्य चैतौ तस्य चैतन्यम्, हन्त आयातम-
530/tha नेन क्रमेण भूतचैतन्यमस्मदभिमतं भूतेष्वेव कायाकारपरिणतेषु आरम्भनिवृत्तिदर्शनादित्यर्थः ॥ ३५ ॥ § 1581

## परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३ । २ । ३६ ॥ § 1582

३ न्ति ] संभवन्तिnvt-C
५ स्याविशेषे ] °शेषे सतिnvt-C
१४ कानां ] °र्शनवैनाशिकानांnvt-C
१७ मिति ] धर्मकं विज्ञानमितिnvt-C
१९ तीति ] प्रत्यगात्मा तस्मिन्nvt-C
२० * ] ज्ञानसामा°nvt-C

परश्वादिष्वित्यस्य तात्पर्यमाह वार्त्तिककारः—परश्वादिष्विति । भूतचैतनिकः तल्लिङ्गत्वादिति हेतुं स्वपक्षसिध्यर्थमन्यथा व्याचष्टे—अयं तर्हीति । शरीरेष्ववयवव्यूहभेददर्शनाच्च लोष्टादिषु शरीरारम्भकाणामणूनां प्रवृत्तिभेदोऽनुमीयते । ततश्चेच्छाद्वेषौ, ताभ्यां चैतन्यमिति । त्रसं जङ्गमं विशरारु अस्थिरं कृमिप्रभृतीनां शरीरम् । स्थावरं स्थिरं शरीरं देवमनुष्यादीनाम् । तद्धि चिरतरं वा ध्रियते । तदेतद् दूषयति—कुम्भादिषु मृदवयवानामिति । कुम्भाद्यारम्भिकाणां मृदां व्यूहभेदादारम्भदर्शनाददर्शनाच्च सिकतानामारम्भनिवृत्त्योरनैकान्तत्वम् ॥ ३६ ॥ § 1583

## नियमानियमौ तु तद्विशेषकौ ॥ ३ । २ । ३७ ॥ § 1584

तदेवं भूतचैतन्यसाधनं दूषयित्वा भूतेभ्योऽन्यस्य चैतन्ये साधनमाह—निय…कौ ॥ तयोरिच्छाद्वेषयोर्नियमानियमौ विशेषकौ । अयमेव चेच्छाद्वेषयोर्विशेषो यद् भूताश्रयत्वमनयोर्व्यावर्त्य तदितराश्रयत्वव्यवस्थितिः । तत्रानियमं तावदाह—ज्ञस्येच्छाद्वषनिमित्ते प्रवृत्तिनिवृत्ती स्पन्दास्पन्दौ, न स्वाश्रये नेच्छाद्वेषयोराश्रये । किं तर्हि ? प्रयोज्ये परश्वादौ आश्रये दृष्टे । तत्र प्रयुज्यमानेषु एव भूतेषु प्रवृत्तिनिवृत्ती स्यातां न सर्वेषु प्रयोजकेष्वपि शरीरादिष्विति । सेयम् अनियमोपपत्तिः असार्वत्रिकत्वमनियम इति । एतदुक्तं भवति शरीरमिच्छाज्ञानद्वेषानाधार इच्छादिजनितस्पन्दास्पन्दाधारत्वात् परश्वादिवदिति । § 1585

तदेवमनियमं भेदकं व्याख्याय नियमं व्याचष्टे—यस्य तु चार्वाकस्य दर्शने ज्ञत्वाद् भूतानामिच्छाद्वेषनिमित्ते आरम्भनिवृत्ती स्वाश्रये शरीरादौ तस्य 531/tha चार्वाकस्य । यथा भूतानां गुरुत्वादि गुणान्तरनिमित्ता प्रवृत्तिः पतनादिलक्षणा, तस्यैव गुरुत्वादेर्गुणान्तरस्य प्रतिबन्ध आधारद्रव्यसंयोगेन, तस्माच्च निवृत्तिः अपतनादिका भूतमात्रे भवति नियमेन व्याप्ता न तु शरीरोपगृहीतेष्वेव भूतेषु, एवं भूतमात्रेज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृती स्वाश्रये स्याताम् । एतदुक्तं भवति—ये ये पृथिव्यादिधर्मास्ते ते यावत्पृथिव्यादिभाविनो दृष्टाः यथा गुरुत्वादयः, ज्ञानेच्छादयोऽपि चेत् पृथिव्यादिधर्मास्तैरप्यवश्यं यावत्पृथिव्यादिभाविभिर्भवितव्यं न तु घटादौ दृश्यन्ते । तस्मान्न पृथिव्यादिधर्मा ज्ञानादय इति । § 1586

अत्र च भाष्यकृता सार्वत्रिकत्वप्रसङ्गविवक्षया नियमशब्दः प्रयुक्तः, असार्वत्रिकत्वविवक्षया त्वनियमशब्दः । वार्त्तिककृता तु प्रयोज्य एवेत्यवधारणं विवक्षित्वा प्रादेशिके नियमशब्दः प्रयुक्तः सार्वत्रिके तूक्तनियमरूपावधारणाभावादनियमशब्द इति विवक्षाभेदाश्रयणाद् अविरोध इति । § 1587

यस्तु नियमं मदशक्त्या व्यभिचारयेत्, यथा किल किण्वादयः परिणामविशेषवन्तो मदिराभावमापन्ना मदयन्ति एवं कायाकारेण परिणतानि

---

२४ भूतेषु ] एव भूतेषुnvt-J

पृथिव्यादीनि चेतयन्ते नान्यथा, तेन घटादिष्वप्रसङ्ग इति, तं प्रत्याह—एकशरीरे चेति । यथा मदिरावयवेषु प्रत्येकमेव मदशक्तिरस्ति न पुनः समुदायमात्रसमवायिनी, एवं शरीरावयवेष्वपि प्रत्येकमेव चैतन्येन भवितव्यम्, न च वैयात्यात् काये समुदायाश्रयमेव चैतन्यं नावयवाश्रययमिति शक्यमास्थातुं त्रिचतुरावयवच्छेदेऽपि चैतन्योपलम्भात् । तस्मादवयवानां प्रत्येकं चैतन्ये शरीर एकस्मिन् बहवश्चेतनाः स्युः । भवतु किं नो बाध्यत इति चेत् ? न, विरुद्धाभिप्रायत्वेन स्वतन्त्राणां न किञ्चिदपि कार्यं जायेत । न च बहूनामेकाभिप्रायनियमो दृष्टः । काकतालीयन्यायेन स्यादेकाभिप्रायत्वं न पुनरस्य नियमो दृष्टचर इति प्रसिद्धत्वाद् दूषणमेतदुपेक्ष्य प्रत्ययव्यवस्था न भवेदिति दूषणमुक्तम् । एकस्मिन् शरीरे प्रत्ययानां परस्परप्रतिसन्धानं 532/tha पश्यामो न शरीरान्तर इति व्यवस्था । सेयं यद्येकस्मिन् शरीर एक एव चेतनो न चासौ शरीरान्तरे ततो भवेन्नान्यथेत्यर्थः । क्वचित् पाठः प्रत्ययव्यवस्थानानुमानं स्यादिति । स सुगम एव । § 1588

नियमानियमाविति यदुक्तं तत्रानुमानप्रयोगं सूचयति भाष्यकारः—दृष्टश्चान्यगुणनिमित्तः प्रवृत्तिविशेष इति । हिताहितप्राप्तिपरिहारहेतुः परिस्पन्दः प्रवृत्तिविशेषः । सोऽयं प्रयोगः । त्रसस्थावरशरीरेषु प्रवृत्तिविशेषः स्वाश्रयव्यतिरिक्ताश्रयगुणनिबन्धनम्, प्रवृत्तिविशेषत्वात् परश्वादिगतप्रवृत्तिविशेषवदिति । न केवलं शरीरस्य प्रवृत्तिविशेषोऽन्यगुणनिमित्तः, भूतानामपि तदारम्भकाणां प्रवृत्तिविशेषोऽन्यगुणनिबन्धन एवेत्याह—तदवयवव्यूहलिङ्ग इति । § 1589

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानादिति च समान इति यथा हीन्द्रियार्थयोर्विनाशेऽपि ज्ञानावस्थानान्नेन्द्रियार्थयोर्गुणो ज्ञानमेवं बाल्यकौमारयौवनवार्धकावस्थासु शरीरविनाशेऽपि ज्ञानावस्थानान्न शरीरगुणो ज्ञानमित्यर्थः । अपि च, ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ३ । २ । ३४ इत्यत्रारम्भनिवृत्तिशब्देन न प्रवृत्तिनिमित्तमात्रमभिमतमस्माकम्, अपि तु हिताहितप्राप्तिपरिहारार्थः परिस्पन्दः । तमिमं प्रवृत्तिविशेषमविज्ञाय त्वया प्रवृत्तिसामान्येन प्रत्यवस्थितमित्यप्रतिपत्तिस्ते निग्रहस्थानमित्याह भाष्यकारः—क्रियामात्रमिति । तद् वार्त्तिककारो व्याचष्टे अन्यथाभिधानाच्च । अयुक्तमिति शेषः ॥ ३७ ॥ § 1590

## यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ३ । २ । ३८ ॥ § 1591

स्यादेतत् । यथोक्तहेतुत्वादित्यादयो वक्ष्यमाणसूत्रगता हेतवो भूतेन्द्रियचैतन्यप्रतिषेधेऽपि समाना इति कस्मान्मनोमात्रे चैतन्यं प्रतिषिध्यते 533/tha न मनस इति ? अत आह—भूतेन्द्रियमनसामिति । यथो...सः ॥ यथोक्तहेतुत्वादिति व्याचष्टे—इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्

१ तेन ] घटादिषु प्र°nvt-J
१३ स्यादिति ] °स्थानुमानंnvt-J
२५ न्दः ] °रार्थस्पन्दविशेषःnvt-C

इत्यत आत्मलक्षणात् प्रभृति तल्लक्षणपरीक्षापर्यवसानं यावद् यदुक्तं तत् संगृह्यते । अत्र च हेतुशब्देन इच्छादिसूत्रं सुसंगृहीतं भावप्रत्ययेन हेत्वर्थविषया परीक्षोपलक्षिता । वार्त्तिकम्—यथोक्तहेतुत्वादिति दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् इत्येवमादीनां हेतूनाम् उक्तहेतुत्वं तस्मादिति योजना । तदनेन भाष्यगतप्रभृतिपदार्थो विवृतः । नन्वेते यथोक्ता हेतवः परैः प्रतिषिद्धा इत्यत आह—अप्रतिषेधात् । वाङ्मात्रेण प्रतिषिद्धा न वस्तुत इति । धारणप्रेरणव्यूहनक्रियासु यथायोगं शरीरेन्द्रियाणि परतन्त्राणि भौतिकत्वाद् घटादिवदिति । मनश्च परतन्त्रं करणत्वाद् वास्यादिवदिति कस्यचित् प्रयत्नवशात् प्रवर्तन्ते, चैतन्ये पुनः स्वतन्त्राणि स्युः । तथा च पारतन्त्र्यप्रसाधकानुमानविरोध इति भावः । § 1592

यस्तु कश्चिदभ्युपेतवेदप्रामाण्यः पुरुषमचेतनं फलभागिनमभ्युपगम्य शरीरादीनां चैतन्यं रोचयते तं प्रति तेषामचैतन्ये हेतुमाह—अकृताभ्यागमाच्च । उपदेशफलं हि कर्तरि कर्त्रपेक्षितोपायताभिधानलक्षणत्वादुपदेशस्य । यथाह स्मात्र भगवान् जैमिनिः शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् इति । उपपादितं चैतदस्माभिः विधिर्विधायकः २. १. ६३ इत्यत्रान्तरे । स्वर्गकामो यजेत इति च कर्त्रभिप्रायक्रियाफलावगमात् तत्रैवात्मनेपदस्मरणात् य एव कर्मणः कर्ता स एव तत्फलस्य भोक्तेति सर्वैरास्तिकपथानुसारिभिरभ्युपेयम् । शरीरादीनां चैतन्ये चेतनस्य स्वातन्त्र्यात् त एव कर्मणः कर्तारः, न 534/tha
तेषां भस्मसाद्भूतानामामुष्मिकस्वर्गादिफलशालितासंभव इत्यात्मनोऽचेतनस्य तद्भागिता अभ्युपगन्तव्या । तथा चैतैः शरीरादिभिः कृतं कर्म पुरुषेण भुज्यते इति शास्त्रप्रतिक्षिप्ताकृताभ्यागमकृतनाशदोषप्रसङ्गः । अचैतन्ये तु शरीरादीनां तदतिरिक्तस्य च पुरुषस्य चैतन्ये पुरुषः स्वातन्त्र्यात् कर्ता । तत्प्रयोज्यतया शरीरादीनि तत्साधनानीति तत्साधनस्य पुरुषस्य स्वकृतकर्मफलोपभोग इति न शास्त्रव्याकोपः, नापि प्रेक्षावत्प्रवृत्तिविरोध इति भावः ॥ ३८ ॥ § 1593

## परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ३ । २ । ३९ ॥ § 1594

अथायं सिद्धोपसंग्रहः उपसंहार इत्यर्थः । परि...श्च ॥ उपपत्तिपदार्थव्याख्यानम् अप्रतिषेधादिति । भाष्यम्—कायस्य भेदाद् विनाशादिति । अप्रतिसंहितमिति, पूर्वेद्युरर्धकृतानामपरेद्युः परिसमापना दृष्टा मयारब्धं मयैव परिसमापनीयमिति प्रतिसन्धाने, अप्रतिसन्धाने तु न परिसमापयेत् । परिसमापने वा चैत्रारब्धमपि मैत्रः परिसमापयेत् यतः स्वयमारब्धात् परैरारब्धम् अव्यावृत्तम् अविशिष्टं स्वस्यापि परत्वाद् अपरिनिष्ठितं च कर्मजातं स्यात् । तथा हि वैश्यस्तोमे वैश्य एवाधिकृतो न ब्राह्मणराजन्यौ, एवं राजसूये राजैव न ब्राह्मणवैश्यौ । एवं सोमसाधनके यागे ब्राह्म-

१२ माच ] अकृता° nvt-C द्रः भा, वा, टीnvt-J

ण एवाधिकृतो न राजन्यवैश्यौ । शूद्रश्चानधिकृत एवेति परिनिष्ठा । सा बुद्धिसन्ततिमात्रे न स्यात् । कुतः ? सत्त्वक्षणानां सर्वेषामेव त्रैलोक्यवैलक्षण्येन भेदात् । अन्यापोहसामान्यस्य अपास्तत्वादित्यर्थः । अप्रतिसंहितत्वे हेतुमाह—स्मरणाभावादिति ॥ ३९ ॥ § 1595

**स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ३ । २ । ४० ॥** § 1596

535/tha

त्रिकालव्यापिनी ज्ञानशक्तिरेव ज्ञस्वाभाव्यम् । तच्चाकाशादिभ्यो व्यावृत्तं त्रिकालव्यापि स्वरूपमेवात्मनः ॥ ४० ॥ § 1597

**प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ३ । २ । ४१ ॥** § 1598

स्मृतिहेतूनामयौगपद्यादित्येतत् सिंहावलोकितन्यायेन पृच्छत्यनन्तरं सूत्रम् अवतारयितुं स्मृतिहेतूनामिति । तात्पर्याभिधानपुरःसरं सूत्रम् अवतारयति—स्मृतिकारणानामिति । प्रणि...भ्यः ॥ भाष्यम्-सुस्मूर्षया मनसो धारणमिति । तेषु तेषु विषयेषु प्रसक्तस्य मनसस्ततो निवारणमित्यर्थः । सुस्मूर्षितलिङ्गानुचिन्तनं वा साक्षाद् वा तत्र धारणं तल्लिङ्गे वा प्रयत्न इत्यर्थः । निबन्धः खल्विति । यथा अत्रैव प्रमाणादयोऽर्था एकग्रन्थोपात्ता अन्योन्यस्मृतिहेतवः । आनुपूर्व्या वा । यथा प्रमाणपदार्थं स्मृत्वा प्रमेयं स्मरति । इतरथा वा । यथा निग्रहस्थानानां स्मृत्वा प्रमाणानां स्मरति । निबन्धस्य व्याख्यानान्तरमाह—धारणेति । धारणाशास्त्रं जैगीषव्यादिप्रोक्तं तत्कृतः प्रज्ञातेषु एव वस्तुषु नाडीचक्रहृत्पुण्डरीककण्ठकूपनासाग्रतालुललाटब्रह्मरन्ध्रादिषु स्मर्तव्यानां बीजरूपसंस्थानास्त्राभरणभृतां च देवतानाम् उपनिक्षेपः समारोपः । तथा च तत्र देवताः समारोपितास्तास्तत्तदवयवग्रहणात् स्मर्तव्या इत्यर्थः । अभ्यासजनितः संस्कार आत्मगुणः अत्र अभ्यासशब्देनोच्यते । तेन पट्वादरप्रत्ययावपि स्मृतिहेतू संगृहीतौ भवतः, तयोरप्यभ्यासवत्संस्काराधानद्वारेणैव स्मृतिहेतुत्वात् । अत्र च स्मृतिकारणानां नासमावेशो विवक्षितः । तेन संस्कारेण स्मृतिहेतूनां सर्वेषामेव प्रणिधानादीनां समावेश एव । निबन्धादिभिस्तु सह यथायोगं समावेशासमावेशावूहनीयाविति । अयत्नत उपलब्धं लिङ्गं पुनरिति । संयोगिन उदाहरणं धूमोऽग्नेरिति । समवायिन
536/tha
उदाहरणं कुड्यादिव्यवहिताया गोः अव्यवहितं प्रत्यक्षं विषाणम्, गवा समस्ति विषाणस्य समवाय इति समवायि विषाणमुक्तम् । न तु तद्गवि

२ णानां ] सल्लक्ष° nvt-C
३ र्थः ] °स्य च निवर्त्तितत्वा° nvt-C
२२ व्या ] स्मर्यन्तnvt-C
२४ संगृहीतौ ] तेनादरप्रत्ययावपि संगृ°nvt-C
२५ अत्र ] अपिnvt-C

समवायि गोरेव स्वावयवे विषाणादौ समवायात् । एकार्थसमवायीत्यस्य एकार्थस्य समवाय एकार्थसमवायः । स यस्यास्ति स एकार्थसमवायीत्यर्थः । तदिदमुदाहरणम्—यथा पाणिः पादस्येति । एकस्य खलु चैत्रावयविनः समवायः पादे च पाणौ च, तौ पाणिपादावेकार्थसमवायवन्तौ तत्रैकेनैकार्थसमवायवता प्रत्यक्षेणाप्रत्यक्ष एकः स्मर्यत इति । यदा त्वेकस्मिन्नर्थे समवाय इत्यर्थः तदा रूपं स्पर्शस्येत्युदाहरण् । स्वाभाविकाविनाभावयुक्तं लिङ्गं सांकेतिकं तु चिह्नमिति विशेषः । ग्रामणीः नायकः । यद्यपि सर्वत्रैव प्रणिधानादौ संबन्धः संप्लवते तथापि प्रणिधानादिपरिहाण्या संबन्धान्तरे गोबलीवर्दन्यायेन संबन्धशब्दो वर्तते । न च संबन्धपदेन सर्वसंग्रहादनर्थकमितरपदोपादानमिति वाच्यम्, उक्तमत्र भाष्यकृता अन्यत्र स्ववाक्यलाघवं नाद्रियते सूत्रकार इति । शिष्यधीप्रसादश्चैवं भवति विशिष्याभिधानादिति । आनन्तर्यादिति । ब्राह्मे हि मुहूर्ते प्रबोधानन्तरमुत्थानं ततो मौनं ततो विडुत्सर्गः ततः शौचं ततो मुखप्रक्षालनदन्तधावनादीनि । वियोगादिति शोकमुपलक्षयति । ततोऽपि शोकविषयस्य स्मरति । एककार्यादिति । यथा सप्तदशावराणामृद्धिकामानामेकं सत्रं कार्यम् । तत्रैकं यजमानं दृष्ट्वा यजमानान्तरं स्मरति । अतिशयात् यथा ब्रह्मचारी उपनयनविद्याविनयाद्यतिशयोत्पादकमाचार्यं स्मरति । प्राप्तेः तद् यथा प्रासर्पकः यतोऽनेन मृष्टमन्नं प्राप्तं प्राप्तव्यं वा तमभीक्ष्णं स्मरति । इच्छा स्नेहः । स तु भ्रात्रादिषु । द्वेषः प्रतिकूले दारादौ, ताभ्यामपि च तद्विषयं स्मरति । क्रियया कार्येणेत्यर्थः । धर्माद् वेदाभ्यासजनिताद् जातिं स्मरति पूर्विकाम् । एवं जातमात्रस्य सुखादिसाधनस्मरणं धर्माधर्माभ्यां द्रष्टव्यम् । ननून्मादादयोऽपि स्मृतिहेतवो लोकसिद्धाः, तत् किं तेऽपि नोक्ता इत्यत आह—निदर्शनमात्रं चेदं स्मृतिनिमित्तानामिति ॥ ४१ ॥ § 1599

॥ बुद्धेरात्मगुणत्वप्रकरणम् ॥

## ३.२.४ बुद्धेरुत्पन्नापवर्गित्वप्रकरणम्

537/tha

कर्मानवस्थायिग्रहणात् ॥ ३ । २ । ४२ ॥ § 1601

तदेवं सिंहावलोकितं समर्थ्य प्रकृतायामेव बुद्धौ विचारान्तरमारभते— अनित्यायां च बुद्धाविति । द्रव्याश्रितत्वादित्युच्यमानेऽपि पिठरादिगते रूपादिभिर्व्यभिचारोऽत आह—व्यापकद्रव्याश्रितत्वादिति । तथाप्यात्म-

---

३ विनः ] खल्वत्रा° nvt-C
१७ था ] प्रार्थकः nvt-C
१७ तोऽनेन ] मिष्टं nvt-C
२० निताद् ] °नितेन धर्मेण nvt-C
२३ स्मृतिनिमित्तानामिति ] °तिहेतूनामिति nvt-C

त्वादिभिरने— कान्तोऽत आह—*जातिमत्त्वे सतीति । तथापि विभुत्वेन परिमाणेनानेकान्तोऽत आह—अस्मदादिप्रत्यक्षत्वे सतीति । कर्मादिसन्तानविषया बुद्धय आशुतरविनाशिन्यः । अत्र यदि प्रकाशकत्वादित्युच्येत तत आत्मनानेकान्तः स्यादत आह—करणत्वे सतीति । तथापि मनःश्रोत्रादिभिरनेकान्तोऽत आह—प्रत्यर्थेति । एका बुद्धिरेकविषया न विषयान्तरविषया । एवमन्या अपि बुद्धयः स्वविषयमात्रे पर्यवसिताः । न च मनः श्रोत्रादि तथा, नानाविषयत्वात् तस्येति । ननु प्रत्यर्थनियतत्वमव्यापकं युगपदनेकार्थसन्निकर्षे सति नानाविषयाप्येका बुद्धिरुपजायतेऽत आह—प्रतिक्षणं कर्मणोऽपूर्वस्यार्थस्योत्पत्तौ सत्यां तत्कार्याया बुद्धेः क्रमेणोत्पत्तौ कारणक्रमानुविधानात्, कार्यक्रमस्य प्रत्यक्षबुद्धेर्विषयकारणत्वात् । एकैकश्चासौ विषयः क्रमोत्पादवान् कारणमिति क्रमवतीनां बुद्धीनां सर्वासामेव सिद्धं प्रत्यर्थनियतत्वम् । नियमश्च तज्जातीयकर्मान्तरापेक्षया न तु द्रव्यापेक्षया । तेन कर्मबुद्धेर्द्रव्यादिविषयत्वेऽपि प्रत्यर्थनियमाविरोधः । प्रत्यर्थनियमविशेषणयोगाच्च प्रागात्मनाऽनैकान्तिकत्वशङ्कायां करणत्वं विशेषणमिति । § 1602

प्रयोगान्तरमाह—अथवेति । सुखत्वादिभिरनैकान्तिकत्वं मा भूदित्यत उक्तं गुणत्वे सतीति । रूपादिभिर्व्यभिचारनिवृत्त्यर्थमुक्तम्—अबाह्येति ।
§ 1603

538/tha

कर्मा...णात् ॥ अवस्थितग्रहणेऽपि प्रत्यक्षनिवृत्तेर्ध्वंसिनीति । यद्यपि शक्यं वक्तुं स्पर्शादिबुद्धिरेकैवैतावन्तं कालमवस्थिता व्यवधानादिनार्थसन्निकर्षविनाशाद् विनङ्क्ष्यति, निमित्तकारणविनाशोऽपि हि कार्यविनाशहेतुर्दृष्टः, अपेक्षाबुद्धिविनाशाद् द्वित्वविनाशवदिति, तथापि क्षणिकत्वे हेत्वन्तरादेव सिद्धे बुद्धीनामभ्युच्चयमात्रतयैतद् द्रष्टव्यम् । तथा हि क्षणविध्वंसिवस्तुविषयबुद्धिक्षणिकत्वसमर्थनेनैव स्थायिवस्तुविषयबुद्धिक्षणिकत्वसमर्थनमपि सूचितम् । स्थिरगोचरा बुद्धयः क्षणिकाः, बुद्धित्वात् कर्मादिबुद्धिवदिति । बुद्धिरेव स्मर्त्री ग्रहीत्री चेत्यात्मभावं बुद्धावारोप्य शङ्कते—स्मृतेरवतिष्ठत इति चेदिति । निराकरोति—नात एवेति । न हि बुद्धिः स्मर्त्री येन तदभावे स्मृतिर्नोत्पद्येत, अपि त्वात्मा । स च नित्यः । बुद्धिसद्भावस्तु स्मृतिविरोधीत्यर्थः अथ यदि बुद्धिर्नास्ति कुतस्तर्हि स्मृतिरुत्पद्यते ? न ह्यकारणं कार्यं भवति । न चात्ममात्रं कारणम् । मा भूदात्मनो नित्यत्वेन स्मृत्युत्पादोऽपि नित्यः । तस्मात् स्मृत्युत्पादोऽपि लिङ्गं बुद्ध्यवस्थान इत्यत आह—अन्यतश्च तद्भावादिति ।
§ 1604

स्यादेतत् । बुद्धिजः संस्कारश्चेत् स्मृतिहेतुरथ यावत्संस्कारं स्मृतिः स्यादित्यत आह—ततः प्रणिधानादीति । न संस्कारोऽस्तीत्येतावता स्मृतिर-

१ *] सामान्यवत्त्वे nvt-C
९ बुद्धेः] °रयुगपदुत्पत्तौ कारण° nvt-C
३३ ता] °स्तीत्येव nvt-C

पि तु तत्प्रबोधात् । तत्प्रबोधश्च कदाचित् प्रणिधानादेरित्यर्थः ॥ ४२ ॥
§ 1605

अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥ ३ । २ । ४३ ॥ § 1606

बुद्धिस्थैर्यवाद्याह—यद्यनवस्थायिनीति ॥ ४३ ॥ § 1607

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ३ । २ । ४४ ॥ § 1608
539/tha

दूषयति—नविरोधादिति । बुद्धिमात्रस्य स्थायित्वं प्रतिज्ञाय विद्युत्संपातजाताया *पटादिबुद्धेरनवस्थायित्वाभिधानं विरुद्धमित्यर्थः । अव्यक्तग्रहणस्यान्यथासिद्धत्वं चाह—अव्यक्तग्रहणस्येति । धर्मिग्रहणहेतोर्भेदात् । *अव्यक्तश्च यो धर्मिग्रहणे हेतुः सामान्यमात्रवन्तं धर्मिणं गृह्णाति तद्वशादव्यक्तग्रहणम्, यस्तु सामान्यविशेषवन्तं तद्वशाद् व्यक्तग्रहणमित्यर्थः । धर्मिणं त्वनाश्रित्य स्वे विषये ग्रहणानां तदसंभवाच्च अव्यक्तत्वासंभवादित्यर्थः । धर्मिणमनाश्रित्येत्यविद्वान् शङ्कते—लोकविरोध इति चेदिति । धर्मिग्रहणमाश्रित्य निराकरोति—नान्यथेति । दोषान्तरमाह—अनेकान्ताच्चेति । वार्त्तिकव्याख्यानेनैव भाष्यं व्याख्यातम् ॥ ४४ ॥ § 1609

न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् ॥ ३ । २ । ४५ ॥ § 1610

॥ इति बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥

## ३.२.५ बुद्धेः शरीरगुणव्यतिरेकप्रकरणम्

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ३ । २ । ४६ ॥ § 1612

शरीरेति । पूर्वं हि भूतेन्द्रियमनसां चैतन्यं साक्षात् निराकृतमुपक्षेपात् शरीरस्य, संप्रति तु शरीरस्यैव साक्षात् चैतन्यं निरस्यत इति तात्पर्यभेदादपुनरुक्तम् । वस्तुतस्तु पौनरुक्त्ये परिहारं भाष्यकारः प्रकारान्तरेण वक्ष्यति । तद्गुणत्वं तत्रोपलब्ध्या सिध्यति अबाधितयेति शेषः । द्रव्ये...यः ॥ ४६ ॥
§ 1613

१ श्च ] कादाचित्कः कादाचित्कत्वात् nvt-C
८ * ] घटादि° nvt-C
९ * ] यो ग्रहणहेतुः nvt-J
११ म् ] °दव्यक्तं ग्रहणम् nvt-J
११ शाद् ] व्यक्तं ग्र° nvt-J
१२ र्थः ] व्यक्तत्वादि nvt-C
२ क्षेपात् ] °पात् तु nvt-C
४ रिहारं ] °त्त्यपरि° nvt-C

यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ३ । २ । ४७ ॥ § 1614
540/tha

न कारणानुच्छेदाच्चेतनायाः शरीरमस्याः कारणम् । तच्चानुच्छिन्नम् । संस्कारस्य तु कारणोच्छेद इति द्रष्टव्यम् ॥ ४७ ॥ § 1615

न पाकजगुणान्तरोत्पत्तेः ॥ ३ । २ । ४८ ॥ § 1616

तच्च—न पा…त्तेः ॥ इति । नात्यन्तिकः परमाणौ वा पिठरे वा रूपाभाव इत्यर्थः ॥ ४८ ॥ § 1617

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ३ । २ । ४९ ॥ § 1618

तदेवमात्यन्तिकानात्यन्तिकत्वं वैधर्म्यमुक्त्वा सप्रतिद्वन्द्वित्वासप्रतिद्वन्द्वित्वं वैधर्म्यान्तरमाह—इतश्चेति । प्रति…धः ॥ प्रतिद्वन्द्विसिद्धेः पाकजानां तद्व्यभिचारोद्भावनेन चैतन्यस्य यावच्छरीरभावित्वादप्रतिषेधः ॥ ४९ ॥ § 1619

शरीरव्यापित्वात् ॥ ३ । २ । ५० ॥ § 1620

प्रत्ययव्यवस्थाप्रसङ्गात्—यथा देवदत्तस्य ज्ञानं न यज्ञदत्तः प्रतिसन्धत्ते किं तु देवदत्त एवेति व्यवस्था । एवमेकस्मिन् शरीरेऽवयवान्तरज्ञानमवयविनो वा ज्ञानं न प्रतिसंदधीत इत्यर्थः ॥ ५० ॥ § 1621

न केशनखादिष्वनुपलब्धेः ॥ ३ । २ । ५१ ॥ § 1622

दृष्टान्तसूत्रमिति । न करचरणादयश्चेतनाः शरीरावयवत्वात् केशन-
541/tha खादिवदिति दृष्टान्तार्थं सूत्रमित्यर्थः ॥ ५१ ॥ § 1623

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥ ३ । २ । ५२ ॥ § 1624

त्वक्पर्यन्तत्वादिति शरीरावयवत्वं केशनखादीनां हेतुरसिद्धः । इन्द्रियाश्रयत्वं हि शरीरलक्षणम् । तद् यत्र शरीरसमवेतं तेनेन्द्रियाश्रयेणावश्यं भवितव्यम् । त्वक्पर्यन्तश्चावयवसमूहस्तथा न तु केशनखादयस्तादृशा इति न शरीरावयवा इत्यर्थः ॥ ५२ ॥ § 1625

शरीरगुणवैधर्म्यात् ॥ ३ । २ । ५३ ॥ § 1626

न रूपादीनामितरेतरवैधर्म्यात् ॥ ३ । २ । ५४ ॥ § 1627

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ३ । २ । ५५ ॥ § 1628

---

३ तु ] कारणस्यो°nvt-C
१५ धीत ] संधत्तेnvt-C

रूपादीनामितरेतरवैधर्म्यमननुसंहितं च शरीरगुणत्वेनानन्वितमित्यर्थः । न हि येषां चाक्षुषत्वरासनत्वादिरूपवैधर्म्ययोगस्ते न शरीरगुणा इति दृष्टम् । अव्यावृत्तं च शरीरगुणानां तादृशवैधर्म्यदर्शनात् । *तस्मादशरीरगुणत्वान्वयव्यतिरेकाभावाद् वैधर्म्यमात्रमेतत् । बाह्यकरणप्रत्यक्षाप्रत्यक्षशरीरगुणवैधर्म्यं मानसप्रत्यक्षत्वम् । अन्वयव्यतिरेकि तु चेतनायाः शरीरगुणत्वसाधनं न भवति अपि तु तदन्यगुणत्वसाधनमित्यर्थः, विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाहेतुत्वादिति । § 1629

ये हेतव इति बहुवचनं हेत्वेकदेशविवक्षया । न शरीरगुणश्चेतना अयावद्द्रव्यभावित्वाद् इत्युच्यमाने संस्कारेणानेकान्त इत्यत उक्तम्— निमित्तान्तराभाव इति । 542/tha तथापि पाकजेन गुणेनानेकान्त इत्यत आह—विरोधिगुणादर्शने चेति । शरीरव्यापित्वादिति । न साधनमिति । प्रसङ्गो हि न साधनं हेतोरभावात् । यथाहुः अस्ति प्रसङ्गो न प्रसङ्गः साधनम् इति । बाह्यकरणाप्रत्यक्षत्वादिति । न च गुरुत्वादिभिरनेकान्तः । तेषां खल्वप्रत्यक्षत्वमेव, न तु बाह्यकरणप्रत्यक्षत्वमिति भावः ॥ ५५ ॥ § 1630

॥ इति बुद्धेः शरीरगुणव्यतिरेकप्रकरणम् ॥

## ३.२.६ मनःपरीक्षाप्रकरणम्

ज्ञानायौगपद्यादेकं मनः ॥ ३ । २ । ५६ ॥ § 1632

मनःस्वरूपपरीक्षायां भाष्यवार्त्तिके निगदेनैव व्याख्याते ॥ ५६ ॥ § 1633

न युगपदनेकक्रियोपलब्धेः ॥ ३ । २ । ५७ ॥ § 1634

*संस्त्यायनं स्थानम् ॥ ५७ ॥ § 1635

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ॥ ३ । २ । ५८ ॥ § 1636

यथोक्तहेतुत्वाच्चाणु ॥ ३ । २ । ५९ ॥ § 1637

॥ इति मनःपरीक्षाप्रकरण् ॥

## ३.२.७ शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम्

543/tha

३ गुणानां ] अशरीर°nvt-J
३ *] तस्मात् श°nvt-J
१४ तु ] °करणाप्रत्य° nvt-J
४ *] संस्त्यानम् nvt-C

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ३ । २ । ६० ॥ § 1639

मनसि विचार्यमाणे कः संबन्धः शरीरोत्पत्तिनिमित्तविचारस्येत्यत आह— मनसः खल्विति । मन एवाधिकरणविचारेणापि परीक्ष्यत इति नासंबन्धः शरीरोत्पत्तिनिमित्तविचारस्य । परित ईक्षा परीक्षा । सा च स्वरूपतश्च संबन्धितश्च । शरीरं च मनःसंबन्धि । तदधिकरणत्वान्मनसः । तस्मात् मनस एवेयं परीक्षा या शरीरस्येत्यर्थः । § 1640

पूर्व...त्तिः ॥ उत्पत्तिसमकालमिति । सममिव समम् । उत्पत्त्यनन्तरमित्यर्थः । क एवमाह न ददातीति । यदि समग्रं भवति तत उत्पत्त्यनन्तरं *ददात्येवेत्यर्थः । विपच्यमानः कर्माशय इति स्वफलं भोजयन्नित्यर्थः । यानि वा प्राण्यन्तराणि तस्य कर्मणः समानोपभोगीनीति । तद् यथा किन्नरत्वनिर्वर्तनीयं कर्म स्त्रीपुंसभोग्यं स्त्रीपुंसयोरन्यतरकर्मप्रतिबन्धे फलं न ददातीति । यानि च प्राण्यन्तराणि स्नेहविषया भ्रात्रादयः तस्य कर्मणो भोगीनीति कर्मफलानामन्नाद्यश्वग्रामादीनां भोगित्वात् कर्मभोगीनीत्युच्यन्ते तेषां प्राणिनां कर्मभिरभाग्यादिशब्दवाच्यैः प्रतिबन्धात् । तस्य वा कर्मणः सहकारि धर्माधर्मलक्षणं निमित्तं नास्तीति । अयमर्थः । दृष्टानां सेवादिकर्मणां व्यभिचाराद् ग्रामादिलाभेऽदृष्टं कारणं कल्पनीयम् । यथाहुः तच्चैव तत्र कारणं शब्दश्च इति । दृष्टं सेवादि च कारणम् । शब्दश्चेति विषयिणा तद्विषयमदृष्टमुपलक्षयति । ते च ग्रामादयः । तस्माददृष्टादुपजायमाना अन्तरा विघ्ननाशाय कोपशमाय देवतानमस्कारादिजनितमपि धर्ममपेक्षन्ते । तस्मात् प्राग्भ-
544/tha वीयेण धर्मेण स्वफल निर्वर्त्तनाय धर्मान्तरं सहकार्यपेक्ष्यते । सहकारिणां च वैचित्र्यात् प्रतिबन्धापगमहेतोरपि सहकारित्वाविरोधः । तेन कर्मणः सहकारिनिमित्ताभावात् प्रतिबद्धमदृष्टं फलं न जनयतीत्यर्थः । तस्य वा कर्मणः सहकारिणः कारणस्य गरीयसा कर्मान्तरेण प्रतिबन्धात् फलस्यानारम्भः । एवं स्वकर्मणां सहकारिनिमित्ताभावप्रतिबन्धावुक्त्वा समानोपभोगसत्त्वान्तरकर्मणामपि सहकारिनिमित्ताभावप्रतिबन्धौ दर्शयति—सत्त्वान्तरकर्मणां चेति । § 1641

रूपादिमत्त्वादित्युच्यमाने परमाणुभिरनेकान्तः स्यादत आह—बाह्यकरणग्राह्यत्वे सतीति । इन्द्रियग्राह्यत्वे सतीत्येतावतैव सिद्धे इन्द्रियग्राह्यराशेर्बाह्यकरणग्राह्यं राश्यन्तरमित्येतावन्मात्रविवक्षया बाह्यकरणग्राह्यत्वे सतीत्युक्तम् ॥ ६० ॥ § 1642

भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ॥ ३ । २ । ६१ ॥ § 1643

न साध्यसमत्वात् ॥ ३ । २ । ६२ ॥ § 1644

---

९ *] दास्यत्ये°nvt-C
९ य] कर्मातिशयःnvt-C
१० भोगीनीति] °गानीतिnvt-C
१३ ग्रामादीनां] अन्नाद्यग्रामा°nvt-J
२५ चेति] वेतिnvt-C
२८ सिद्धे] अग्राह्यरा°nvt-C

सिकतादिदृष्टान्तस्य साध्यसमत्वेनैव पुरुषार्थक्रियासामर्थ्यादित्यस्य हेतोरनैकान्तिकत्वोद्भावनमपि प्रत्युक्तम् । सिकतादीनामपि कथञ्चित् पुरुषार्थहेतुत्वात् तत्सर्गः पुरुषगुणपूर्वक इत्युक्तम् ॥ ६२ ॥ § 1645

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ३ । २ । ६३ ॥ § 1646

मा भूद् वा पुरुषगुणपूर्वकत्वं सिकतादिसर्गस्य तथापि शरीरस्योत्पत्त्यादि परिभावयन्तः सिकतादिभ्यो वैषम्यं वीक्षमाणास्तद्विलक्षणकारणत्वमेव प्रतिपद्यामहे । तथा च सिध्यति पुरुषगुणनिमित्ततेत्याह—विषमश्चायमुपन्यास इति । नोत्प... त्रोः ॥ ननु माता पितरौ न साक्षात् शरीरोत्पत्तौ कारणमित्यत आह—मातापितृशब्देन लोहितरेतसी इति । अनुभवनीये इति भव्यगेयादि पाठात् कर्तरि कृत्यः ॥ ६३ ॥ § 1647 545/tha

तथाहारस्य ॥ ३ । २ । ६४ ॥ § 1648

इतोऽपि वैषम्यमित्याह—तथा...स्य ॥ पूर्वसूत्रप्रतीकेन पूरयति—उत्पत्तिनिमित्तत्वादिति प्रकृतम् । कललकण्डरमांसपेश्यादयो लोहितरेतसोः शरीरारम्भकयोः परिणामभेदाः ॥ ६४ ॥ § 1649

प्राप्तौ चानियमात् ॥ ३ । २ । ६५ ॥ § 1650

दम्पत्योः संयोगः प्राप्तिः । तस्यामनियमः शरीरोत्पादस्य तस्मात् । दृष्टस्य व्यभिचारादस्ति तददृष्टं यतः शरीरसर्ग इत्यर्थः ॥ ६५ ॥ § 1651

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥ ३ । २ । ६६ ॥ § 1652

पार्श्वस्थः शङ्कते—सर्वात्मभिरिति । ननु यदीयेनादृष्टेन यच्छरीरमुपात्तम्, तत् तस्यैव भोगायतनं नान्यस्येति नानियम इत्यत आह—न च पुरुषगत इति । आत्ममनःसन्निकर्षजौ हि धर्माधर्मौ । सन्निकर्षश्च मनसः सर्वात्मभिः साधारण इति । सर्वेषामेव धर्माधर्मौ, न पुनः कस्यचिदेवासाधारणावित्यर्थः । अस्योत्तरम्—शरीरेति । § 1653

शरी...र्म ॥ उक्तेनैवाभिप्रायेण शङ्कते—तत्स्थता एकपुरुषस्थता कुत इति चेत् ? उत्तरम्—न स्वसंयोगेति । पुनः पृच्छति—संयोगे कुतो नियम इति । यथै वैकेनात्मना मनः संयुक्तम् एवमात्मान्तरैरपि । एवं यथैकेन 546/tha मनसा स आत्मा संयुक्त एवं मनोऽन्तरैरपीति नात्ममनःसन्निकर्षेऽस्ति विशेष इत्यर्थः । उत्तरम्—न मनोनियमहेतुत्वादिति । अदृष्टनियमनिबन्धनो हि मनोनियमः । मनोनियमनिबन्धनश्चादृष्टनियमः । अनादित्वाच्च बीजाङ्कुरवदन्योन्याश्रयो न क्षतिमावहतीत्यर्थः ॥ ६६ ॥ § 1654

---

३१ र्थः ] °न्याश्रयं नैवाप्रक्लृप्तिमा°nvt-J

## एतेनानियमः प्रत्युक्तः ॥ ३ । २ । ६७ ॥ § 1655

तदेवमात्मगुणनिबन्धने शरीरसर्गे व्यवस्था दर्शिता । ये तु मेनिरे न कर्मनिबन्धनः शरीरसर्गः, अपि तु प्रकृत्यादिनिबन्धनः । प्रकृतयो हि स्वयमेव धर्माधर्मरूपनिमित्तानपेक्षाः सत्त्वरजस्तमस्तया प्रवृत्तिशीलाः स्वं स्वं विकारमारभन्ते । प्रतिबन्धापगममात्रे तु धर्माधर्मावपेक्षन्ते । तद् यथा कृषीवलः केदारादप्पूर्णात् केदारान्तरमपूर्णमापिप्लावयिषुरपां सेतुमात्रं भिनत्ति । तास्तु निम्नाभिसर्पणस्वभावा अपहतसेतवः स्वयमेव केदारमाप्लावयन्ति । एवमापूरयन्ति प्रकृतयोऽपि विकारानिति । यथाहुः निमित्तमप्रयोजकं प्रकृतीनामावरणभेदस्तु ततः क्षेत्रिकवत् इति । तान् प्रत्याह—एते...क्तः ॥ एतेन कर्मसापेक्षाणां भूतानां शरीरसर्गे अनियमाभिधानेन तन्निरपेक्षाणां व्यतिरेकमुखेन अनियमः प्रत्युक्तः । नियमो व्याप्तिः साधारणविग्रहवत्त्वं सर्वात्मनाम् । अनियमस्त्वव्याप्तिः कस्यचिदात्मनः किंचिच्छरीरं कस्यचित् किञ्चिदिति । प्रकृतिनिबन्धने हि शरीरसर्गे तस्या एकत्वात् सर्वात्मसाधारण्याच्च न शरीराणामस्त्यसाधारण्येहेतुः । भूतग्रहणं तु प्रकृत्युपलक्षणार्थम् । न केवलमकर्मनिमित्ते शरीरसर्गे साधारणविग्रहवत्त्वं दोषः, अपि तु मोक्षोऽपि न स्यादिति दर्शयितुं स्वपक्षे मोक्षमुपपादयति—उपपन्नश्चेति । 
547/tha सांख्यपक्षे तु न मोक्षः स्यादिति दर्शयति—कर्मनिरपेक्षेष्विति ॥ ६७ ॥
§ 1656

## तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥ ३ । २ । ६८ ॥ § 1657

शङ्कते—तददृष्टकारितमिति चेत् इति । तद...र्गे ॥ उपभोग्यशब्दाद्यदर्शनं प्रकृतिपुरुषभेदादर्शनं चादृष्टमुच्यते । तत्कारितमित्यर्थः । निराकरोति—एतस्मिन्निति । यथा प्रागदर्शनमेवं निरोधसमाधेः पश्चादप्यदर्शनमित्यपवृक्तोऽपि पुनः संसरेदित्यर्थः । § 1658

शङ्कामुत्थाप्य दूषयति—चरितार्थतेति । ननु न शब्दाद्युपभोगं पुरुषार्थं ब्रूमो येन चरितार्थता स्यात्, अपि तु गुणपुरुषभेददर्शनम्, तच्चाद्यापि न भवतीत्यारभते शरीरमिति देशयति—पुरुषार्थेन च हेतुनेति । चोऽवधारणे पुरुषार्थत्वेनैवेत्यर्थः । परिहरति—तस्य चाकरणादिति । चस्त्वर्थे देश्यनिवृत्तौ । यदर्थं शरीराण्यारभते तन्न कृतमन्यत्तु कृतमिति किं केन संगतमित्यर्थः । शङ्कते—दिदृक्षाविशेष इति । दर्शनं हि नञा पर्युदस्तमतस्तन्मूलां दिदृक्षां ब्रूते । सा चापवर्गे नास्ति । तस्मान्नापवृक्तः संसरतीत्यर्थः । निराकरोति—न प्रागिति । एतदुक्तं भवति दिदृक्षा हि बुद्ध्याश्रया नासत्यां बुद्धावस्ति । प्रकृतिपरिणामश्च बुद्धिः । तथा च सत्यां दिदृक्षायां बुद्धिः, बुद्धौ

---

३ नः ] °त्यापूरात्nvt-J
८ न्ति ] °माप्लावयन्तिnvt-C
१३ किञ्चिदिति ] °दात्मनः किञ्चिदितिnvt-J

सत्यां दिदृक्षेति परस्पराश्रयप्रसङ्गः । न चात्रानादिता परिहारः, सृष्ट्यादौ द्वयोरभावात् । अस्माकं तु महाप्रलयसमयेऽपि धर्माधर्मसंस्कृतोऽस्त्यात्मा मनश्चेति विशेषः । सत्कार्यमादाय शङ्कते—सर्वशक्तिमत्त्वादिति । निराकरोति—न, अपवर्गाभावप्रसङ्गादिति । शिष्टं विभजते—दिदृक्षावन्नानात्वदर्शनमप्यस्तीति । न तदर्थं प्रकृतेः प्रवृत्तिः, तथा च न संसारस्तत्प्रध्वंसश्चापवर्गः संसाराभावान्नास्तीत्यपवर्गाभाव इत्यर्थः । एतदेव स्फुटयति—विद्यमाने च नानात्वदर्शने तदर्थं प्रधानस्य प्रवृत्तिरयुक्ता । ततः संसाराभावात् तत्प्रध्वंसोऽपवर्गो न स्यादिति भावः । तमेवापवर्गाभावं तद्विरोधिसंसारसत्त्वेन 548/tha
दर्शयति—यदा च नानात्वदर्शनमिति । निदानानुच्छेदेन निदानिनो नोच्छेद इत्यर्थः । पुनर्विकल्पं दर्शयति— अज्ञानमदर्शनमिति चेति । विवेकज्ञानाभावस्य तुल्यत्वादित्यर्थः । शेषमतिरोहितार्थमिति । § 1659

अपरे तु आर्हता अदृष्टं परमाणुगुणं वर्णयन्ति । पार्थिवानामणूनां मनसश्च गुणोऽदृष्टम् । तत्र पार्थिवाद्या अणवः स्वादृष्टप्रयुक्ताः शरीरमारभन्ते । मनश्च स्वगुणप्रयुक्तं तच्छरीरमाविशति । तच्च स्वकादेवादृष्टात् पुद्गलस्य सुखदुःखोपभोगं साधयति, न तु पुद्गलस्य धर्मोऽदृष्टमिति सांख्यवत् तेषामपि दिगम्बराणां पुनःस्तत्प्रसङ्गोऽपवर्गे । एतदुपपादयति—परमाणुगुणस्येति ॥ ६८ ॥ § 1660

## मनःकर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः ॥ ३ । २ । ६९ ॥

§ 1661

अपि चास्मिन् दर्शने प्रायणं न स्यादित्याह—मनःकर्मनिमित्तत्वादिति । मनः...दः ॥ अस्मद्दर्शने तूपपद्यते प्रायणमित्याह—वर्तमानशरीरारम्भककर्माशयक्षये तु भविष्यद्देहान्तरारम्भककर्माशयान्तरादपसर्पणं मनस इति युक्तं प्रायणम् । उभयहेतुरिति उपसर्पणापसर्पणहेतुरित्यर्थः ॥ ६९ ॥ § 1662

## नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ३ । २ । ७० ॥ § 1663

ननु भवतु संयोगाव्युच्छेदः किं नो बाध्यत इत्यत आह शरीरस्य नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः । नित्य...त्तेः ॥ संयोगाव्युच्छेदादित्यर्थः । ननु सदकारणवन्नित्यम् इति कथं सकारणं शरीरं नित्यं भवेदित्यत आह शरीरस्य नित्यत्वप्रसङ्ग इति प्रायणानुपपत्तिं ब्रूमः विनाशानुपपत्तिमित्यर्थः 549/tha
। यादृच्छिके अकारणके प्रायणे प्रायणभेदो न स्यात् । दृष्टश्च प्रायणभेदः, कश्चिद् गर्भस्थ एव प्रैति, कश्चिज्जातमात्रः, कश्चित्कुमारक इत्यादिरिति । अकारणस्य नित्यं सत्त्वमसत्त्वं वा स्यात् गगनवत् तत्कुसुमवदित्यर्थः ॥ ७० ॥ § 1664

---

२ येऽपि ] प्रलयसमयेnvt-C
५ न ] °श्चापवर्गाभावान्ना°nvt-C
७ च ] तत्त्वदर्शनेnvt-J
२८ र्थः ] पत्तेरित्यर्थः nvt-C

अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ३ । २ । ७१ ॥ § 1665

अकारणत्वादित्यस्य हेतोरनैकान्तिकत्वेन प्रत्यवतिष्ठते—अणुश्यामतावत् इति । अणु...त् ॥ ७१ ॥ § 1666

नाकृताभ्यागमप्रसङ्गात् ॥ ३ । २ । ७२ ॥ § 1667

निराकरोति—एतच्च नेति । प्रमाणेनाविषयीकृतमकृतं प्रत्युत प्रत्यक्षागमप्रतिषिद्धमिति यावत्, तस्याभ्यागमोऽभ्युपगमः, तत्प्रसङ्गादित्यर्थः । न च परमाणुश्यामताप्यकारणा पार्थिवरूपत्वात् लोहितादिरूपवदित्यनुमानेन तस्या अपि पाकजत्वाभ्युपगमादिति भावः । यथाश्रुति वा सूत्रार्थः । अकृतस्य कर्मणः फलोपभोगप्रसङ्गादिति । यदा खलु परमाणुगुण एव नित्यः शरीराद्यारम्भकः, तदासौ नित्यत्वात् न केनचित् क्रियते । तस्याकृतस्यैव फलं पुरुषैरुपभुज्यते । ततश्चायमास्तिकानां विहितप्रतिषिद्धप्रवृत्तिनिवृत्तिप्रचयोऽनर्थकः । शास्त्रप्रणयनं चाप्यनर्थकं भवेदिति भावः । एतच्च विस्तरोक्तं भाष्ये । तस्यार्थो निगदव्याख्यातः । § 1668

॥ इति शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां तृतीयाध्याये द्वितीयाह्निकम् ॥

॥ तृतीयाध्यायः समाप्तः ॥

# ४ चतुर्थाध्यायः

550/tha

## ४.१ चतुर्थाध्याये प्रथमाह्निकम्

### ४.१.१ प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्

प्रवृत्तिर्यथोक्ता ॥ ४ । १ । १ ॥ § 1672

अथ मनःपरीक्षानन्तरमुद्देशलक्षणक्रमानुरोधेन प्रवृत्तिः परीक्षितुं युक्ता, सा कस्मान्न परीक्ष्यत इति शङ्कानिराकरणाय सूत्रमित्याह—मनसोऽनन्तरमिति— § 1673

६ मिति ] °गमविरुद्धमिति nvt-C
१२ रोक्तं ] अतिविस्तृतं nvt-C

प्रवृ…क्ता ॥ अस्य शेषः—तथा परीक्षिता । यथा लक्षिता तथा परीक्षितेत्यर्थः । पृच्छति—किं पुनरिति । प्रमेयमात्मादि मनोऽन्तं परीक्षितम्, न पुनः प्रवृत्तेः स्वरूपं वा कार्यं वा परीक्षितमिति भावः । उत्तरम्—यावद्धर्माधर्माश्रयम् इति । एकद्रव्येति । एकस्मिन्नेवात्मनि वर्तत इत्यर्थः । अवस्थिता न तु बुद्ध्यादिवदाशुतरविनाशिनीत्यर्थः । आत्मसमवायादिति । कार्यत्वे सतीति द्रष्टव्यं विशेषणम् । तेन न सामान्यविशेषाभ्यां व्यभिचारः । प्रायणादिति । आदिशब्देन सुखादिक्षयोऽपवर्गश्च गृह्यते । संसारापवर्गहेतुभूतात्मसद्भावासद्भावाभ्यामिति शेषः । एवमाद्युक्तमिति । आदिग्रहणेनात्मसमवेता प्रवृत्तिर्न तु पृथिव्याद्याश्रयेति *दर्शितमिति ॥ १ ॥ § 1674

## तथा दोषाः ॥ ४ । १ । २ ॥ § 1675

प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह—तथा दोषाः ॥ उक्ता इति शेषः । प्रवृत्तितुल्यतया प्रवृत्तिपरीक्षयैव तावद्दोषाणां सत्त्वं परीक्षितमित्यर्थः । कार्यरूपप्रवृत्तितुल्यतामाह—बुद्धिसमानाश्रयत्वादिति । अभीष्टविषयचिन्तनादि प्रभवाः खल्वमी दोषा नार्थचिन्तनबुद्धिव्यधिकरणा भ- 551/tha
वितुमर्हन्ति । तथा सति चैत्रस्याभीष्टविषयानुचिन्तने मैत्रस्य रागः प्रवर्तेत । तस्माद् बुद्धिसमानाश्रयत्वादात्मगुणाः । आत्मगुणत्वाच्च कार्यप्रवृत्तितुल्यतया प्रवृत्तिपरीक्षयैव तावद्दोषाः परीक्षिता इत्यर्थः । इदं च प्रवृत्तितुल्यत्वमपरं दोषाणामित्याह—संसारस्यानादित्वादिति । एतच्चोक्तं वीतरागजन्मादर्शनात् इत्यनेन, तथोद्देशपरीक्षापरेण द्वितीयसूत्रेण । यत्तेषां दोषाणां परीक्षितं तदाह—सम्यग्ज्ञानाच्चेति । स्यादेतत्, गुणत्वेन ह्यात्मगुणा इति सिध्यति । तदेव तु कुत इत्यत आह—कार्यत्वे सतीति । इन्द्रियान्तरं मन इति । मानसप्रत्यक्षैश्चात्मत्वसुखत्वादिभिरनैकान्तिकत्वं मा भूदित्यत उक्तं कार्यत्वे सतीति विशेषणम् । अचाक्षुषप्रत्यक्षत्वादित्यत्रापि कार्यत्वे सतीति विशेषणमनुषञ्जनीयम् ॥ २ ॥ § 1676

॥ इति प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥

### ४.१.२ दोषत्रैराश्यप्रकरणम्

## तत् त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ४ । १ । ३ ॥ § 1678

तदेवं बहु परीक्षितं दोषाणाम् । यत्तु किञ्चिदेषामपरीक्षितमस्ति तत् परीक्षितुमुपक्रमते—प्रवर्तनालक्षणा दोषा इत्युक्तम्, तथा च मानादय इति

३ वृत्तेः ] रूपंnvt-J
९ * ] दर्शयतिnvt-C
१२ द्दोषाणां ] बहुत्वंnvt-J
१४ मी ] चिन्तन प्र…खल्विमेnvt-C
१४ दोषा ] नानुnvt-J
१७ र्थः ] तत्प्र…यैव परीक्षिता इ°nvt-J
२० गुणा ] गुणत्वे सत्या°nvt-J
२३ तीति ] विशेषणं*Om*nvt-J

। रागद्वेषमोहा एव दोषाः । न च मानादयस्तेष्वन्तर्भवन्ति बुद्धिव्यपदेशभेदात् । प्रवर्तनालक्षणत्वं तु तेषामप्यस्ति । तस्मादतिव्यापकत्वात् लक्षणमेतदयुक्तम् । युक्तत्वे वा लक्षणसूत्रेमानादयोऽपि दोषवत् पठनीया इति पूर्वपक्षः । सिद्धान्तवाद्याह— नोपसंख्यायन्ते संगृहीतत्वादिति । रागद्वेषमोहानां 552/tha सामान्यत्रयाणां कामादयो विशेषाः । तथा चोपपन्नो बुद्धिव्यपदेशभेदः संग्रहश्चेति भावः । § 1679

तत्त्वे...भावात् ॥ अस्वस्वत्वादानेच्छा अस्वामिदानपूर्विका स्पृहा । पुनर्भवप्रार्थना तृष्णा । हेतुभूता प्रवृत्त्यादिद्वारेण पुनर्भवप्रतिसन्धानस्येति । प्रमाणविरुद्धेति अन्यायेनेत्यर्थः । परस्य ज्ञातेर्ममाप्येतदिति बुद्धिरभिनिवेशः । तत्प्रतिषेधाभिप्रायो ज्ञातिविशेषस्येर्ष्येत्युच्यते । अमर्षलक्षणो द्वेष इति । नन्वयं कृतापकारस्य या असहिष्णुता सोऽमर्ष इति द्वेषस्यैष विशेष इत्युक्तम्, कथं स एव द्वेषसामान्यमुच्यते इत्यत आह—असहिष्णुता दुःखस्य दुःखसाधनानां चेति । मिथ्याप्रतिपत्तिलक्षणो मोह इति । संशयोऽपि हि वा यथावस्थिते पदार्थे अयथाभावप्रतिपत्तिर्भवति । व्यवस्थितं हि वस्तु अव्यवस्थिततया गृह्णाति संशयः । एवं पण्डितमानिनो मीमांसकदुर्दरूढस्याभिमान इति ॥ ३ ॥ § 1680

### नैकप्रत्यनीकत्वात् ॥ ४ । १ । ४ ॥ § 1681

आर्यप्रज्ञेति भाष्यम् । आरात् तत्त्वाद् याता आर्या । आर्या चासौ प्रज्ञा चेति आर्यप्रज्ञा । सम्यग् बोधः संबोधः ॥ ४ ॥ § 1682

### व्यभिचारादहेतुः ॥ ४ । १ । ५ ॥ § 1683

एकयोनयो हि रूपादयो न चैषामेकत्वम् । यदि पुनस्तत्र रूपादीनां परस्परभेदसिद्धये कश्चित् कारणभेद आस्थीयते, स रागादिष्वपि समान इति भावः ॥ ५ ॥ § 1684
553/tha

### तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ ४ । १ । ६ ॥ § 1685

नासति निदोनोच्छेदे निदानिनामुच्छेद इति रागद्वेषयोर्निदानिनोरुच्छेदाय तन्निदानत्वं मोहस्य दर्शयति—सति चार्थान्तरभाव इति । तेषां...त्तेः ॥ तेषां मोहः पापीयान् । कुतः ? नामूढस्येतरोत्पत्तेः । अमूढस्येतरोत्पत्तिर्न भवति यत इत्यत्रार्थे नामूढस्येतरोत्पत्तेरित्युक्तम् । मोहाद् विषयस्य सुखसाध-

३ म्] °त्र लक्षणमेतद् युक्तम्nvt-C
१० तिषेधाभिप्रायो] ज्ञानिपिशाचस्ये° nvt-C
११ यं] अयम् nvt-J
१३ योऽपि] अपि *Om* nvt-C
१३ वा] वा nvt-J
२३ भावः] ४-५ सूत्रयोः मुद्रितग्रन्थस्थित टीकापाठविपर्यासः nvt-C संस्करणे विशोधितः,nvt-J मातृकापाठस्तदनुकूलः ।

नत्वानुस्मृतिः दुःखसाधत्वानुस्मृतिश्च । संकल्पाः रञ्जनीयाः कोपनीया इति कर्तरि कृत्यो भव्यगेयादिपाठात् । § 1686

वार्त्तिकम्—मूढो मुह्यतीति । मूढ इति मोहवासनावान् । भवतु तन्निदानोच्छेदादुच्छेदो निदानिनः, निदानस्यैव तु कुत उच्छेद इत्यत आह—तत्त्वज्ञानाच्चेति । प्रतिपक्षाभ्यासान्निदाननिवृत्तिरित्यर्थः ॥ ६ ॥ § 1687

निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥ ४ । १ । ७ ॥ § 1688

न दोषलक्षणावरोधान् मोहस्य ॥ ४ । १ । ८ ॥ § 1689

दोषनिमित्तत्वादिति हेतोरप्रयोजकत्वमाह—न दोषलक्षणावरोधादिति । न दो…स्य ॥ तथाभावः तज्जातीयत्वम् । अतथाभावः अतज्जातीयत्वम् ॥ ८ ॥ § 1690

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ४ । १ । ९ ॥ § 1691

अनैकान्तिकत्वमाह—निमित्तनैमित्तिकोपपत्तेश्चेति । निमि…धः ॥ ९ ॥ § 1692

॥ इति दोषत्रैराश्यप्रकरणम् ॥

### ४.१.३ प्रेत्यभावपरीक्षाप्रकरणम्

554/tha

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ ४ । १ । १० ॥ § 1694

उत्पादोच्छेदौ प्रेत्यभावः । न चात्मनो नित्यस्य तौ स्तः । तस्मादस्मिन् दर्शने न युक्तः प्रेत्यभावः । वैनाशिकानां तु सत्त्वोत्पादनिरोधाभ्यां युक्तः प्रेत्यभावः । प्रेत्येति ल्यब् मुखं व्यादाय स्वपितीतिवद् द्रष्टव्यः । तथा च भूत्वा प्रायणमिति भवनप्रायणयोः समानकर्तृकत्वमप्युपपन्नमिति पूर्वपक्षः । पूर्वाभ्यस्त सूत्रे आत्मनित्यत्वव्यवस्थापनात् । सत्त्वोत्पादोच्छदे च कृतहानाकृताभ्यागमदोषेणाभ्युदयनिःश्रेयसार्थाप्रवृत्तेः ऋष्युपदेशानर्थक्यप्रसङ्गाच्च । देहेन्द्रियबुद्धिवेदनासंबन्धोत्पादविनाशौ नित्यस्यात्मनो जन्मप्रायणे । तथा चोपपन्नः प्रेत्यभाव इति सिद्धान्तः ॥ १० ॥ § 1695

---

२ गेयादिपाठात्] पा. सू. ३. ४. ६८
५ र्थः] निदानोच्छेद इ° nvt-C
७ च] कृतनाशा° nvt-C
७ वृत्तेः] सार्थमप्रवृत्तिः nvt-C
८ ङ्गाच्च] °प्रसङ्गश्च nvt-C

व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ४ । १ । ११ ॥ § 1696

प्रेत्यभावविचारप्रस्तावेनेदमपरं विचारयति—येयं मृत्त्वोत्पत्तिर्नाम सा कथमिति चेत् ? अत्र हि प्रावादुकानां नानाविधा विप्रतिपत्तयः सन्ति । तत्राभिमतं पक्षं तावत् सूत्रकृद् गृह्णाति व्यक्तादिति । व्यक्ताद्...ण्यात् ॥ अग्रे विप्रतिपत्तीर्निवारयिष्यति । शरीरेन्द्रियविषयोपकरणाधारमित्येकवद्भावेन नपुंसकत्वम् । प्रत्यक्षगृहीतसंबन्धप्रभवमनुमानं प्रत्यक्षेऽप्युपदिशति प्रत्यक्षमूलकत्वादिति । ननु भवतु शरीरं पृथिव्यादि व्यक्तं महत्त्वानेकद्रव्यवत्त्वरूपविशेषेभ्यः । तन्मूकारणं परमाणवः कथं व्यक्ता इत्यत आह—तत्सामान्यादिति । रूपादिमत्सामग्रीपूर्वकं शरीरम् इत्यर्थः ॥ ११ ॥ § 1697
555/tha

न घटाद्घटानिष्पत्तेः ॥ ४ । १ । १२ ॥ § 1698

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥ ४ । १ । १३ ॥ § 1699
॥ इति प्रेत्यभावपरीक्षाप्रकरणम् ॥

## ४.१.४ शून्यतोपादानप्रकरणम्

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ ४ । १ । १४ ॥
§ 1701

अतः परं प्रावादुकानां तीर्थिकानां दर्शनान्युपन्यस्य कानिचिद् प्रतिषिध्यन्ते कानिचिदभ्यनुज्ञायन्त इति । तत्र तावद् एके प्राहुः—अभा...वात् ॥ अभावाद् भावोत्पत्तिः । कुतः ? नानुपमृद्य प्रादुर्भावो यतस्तस्मादित्यर्थः । विश्वं हि शून्यताया एव जायते । एवं किल श्रूयते—असदेवेदमग्र आसीदिति । अत एवाद्याप्यसत एव जन्म दृश्यते न सतः । तत् कस्य हेतोः ? अभावस्तत्र कारणमिति । उपलक्षणं चेदं नानुपमृद्य प्रादुर्भावादिति, असत उत्पादादित्यपि द्रष्टव्यम् । तस्मादसदुपादानं विश्वमिति सिद्धम् ॥ १४ ॥ § 1702

व्याघातादप्रयोगः ॥ ४ । १ । १५ ॥ § 1703

अत्र सिद्धान्ती गुढाभिसन्धिराह—व्याघा...गः ॥ उपमृद्य प्रादुर्भवतीति व्याघात इति ॥ १५ ॥ § 1704
556/tha

---

२ येयं ] प्रेत्योत्पत्ति° nvt-C
४ त् ] तावत्पक्षं गृह्णाति nvt-C
९ म् ] गवादीति शरीरम् nvt-J
३ तीर्थिकानां ] च इत्यधिकम nvt-C
३ स्य ] °न्यस्तानि nvt-C
४ न्ते ] तत्रेत्यधिकम् nvt-C
७ आसीदिति ] द्रः छान्दोग्योपनिषत् ६.२.१

नातीतानागतयोः कारकशब्दप्रयोगात् ॥ ४ । १ । १६ ॥
§ 1705

तदभिसन्धिमविद्वान् पूर्वपक्षी दूषयति—न, अ…गात् ॥ इति । उपमृद्य प्रादुर्भवतीति भाक्त एष प्रयोगो न मुख्य इत्यर्थः । भिन्नस्य कुम्भस्य कपालानीति तु यद्यपि न साक्षात् कारकशब्दस्तथापि षष्ठ्या संबन्धाभिधानात् तस्य च क्रियागर्भत्वात् क्रियायाश्च कारकनान्तरीयकत्वात् पारम्पर्येण कारकशब्दता द्रष्टव्या । का पुनर्भक्तिः ? यया योगादुपसंगृह्णाति बीजमङ्कुर इति भवति प्रयोग इत्यर्थः । पृच्छति—कः पुनरङ्कुरेण बीजोपमर्दार्थः ? उत्तरम्—अनन्तरोत्पत्त्यर्थः । उपमर्द्योपमर्दकयोरप्यानन्तर्यम्, अनयोरपीति एतत्सामान्यमित्यर्थः । पुनरपि गूढाभिसन्धिरेव सिद्धान्ती उक्तमर्थं स्मारयति—अत्रोक्तमिति । अभिप्रायमुद्घाटयति—यदपीदमुच्यते इति । नौपचारिकं प्रयोगं व्यसेधामः कारकशब्दानाम्, *अपि तु यथा भविष्यन्नङ्कुरः सम्प्रति असन्न बीजमुपमृद्नाति, एवं बीजाभावोऽसन्नाङ्कुरं करोतीति ब्रूमः । तदिदमाह—अपि त्वसतः कारणादुत्पत्तिर्न युक्तेति । ननूक्तम्— उपमृद्य प्रादुर्भावात् ४।१।१४ इत्यनेनानन्तर्यं बीजविनाशाङ्कुरोत्पादयोः सूचितं बीजविनाशानन्तर्याच्चाङ्कुरोत्पादस्य बीजविनाशकार्यत्वमित्यत आह—यत्पुनरेतदानन्तर्यसामर्थ्यादिति । अनन्यप्रयुक्तमानन्तर्यं कार्यकारणभावसाधनम् । इदं तु व्यूहानन्तर्यप्रयुक्तमिति नाभावस्य कारणत्वं गमयितुमर्हतीत्यर्थः । यदि व्यूहान्तरकार्योऽङ्कुरः, अथ कस्माद् अविनष्टे पूर्वव्यूहे न भवतीत्यत आह—न चाविनष्टे पूर्वव्यूहे इति । ननु यदि बीजावयवव्यूहान्तरमङ्कुरोत्पादहेतुर्न बीजम्, कस्मादङ्कुरार्थिनः कृषीबला बीजमुपाददत इत्यत आह—एवं चेति । बीजावयवोपादाने अवर्जनीयतया बीजमागच्छदशक्यप्रत्याख्यानमित्यर्थः ॥ १६ ॥ § 1706

557/tha

न विनष्टेभ्योऽनिष्पत्तेः ॥ ४ । १ । १७ ॥ § 1707

तदेवमर्थं परिशोध्यात्रैवार्थे सूत्रं योजयति—अस्य चार्थस्येति । न वि…त्तेः ॥ न विनष्टेभ्यो बीजेभ्योऽङ्कुरस्य अनिष्पत्तेः । बीजविनाशश्चेदङ्कुरोत्पत्तिहेतुः, अथ विनष्टे बीजे तदवयवेषु परस्परविच्छिन्नेष्वसति तेषां व्यूहान्तरे न कस्मदङ्कुरो भवति, भवति तु सति तेषां व्यूहे ? तस्माद् विनष्टेभ्योऽङ्कुरानुत्पत्तेरसति व्यूहे न बीजविनाशः कारणमिति सूत्रार्थः ॥ १७ ॥ § 1708

---

८ दर्थः ] का पुनर्भक्तिः…प्रयोग इत्यर्थ इत्यस्य पृच्छति-कः पुनः…मर्दार्थ इत्यतः प्रागुपन्यास औचित्यात् सत्यपि आदर्शविरोधे ।nvt-C पुस्तकेऽपि तथा ।
१० र्थं ] उक्तं nvt-C
१२ * ] किं तु nvt-C

क्रमनिर्देशादप्रतिषेधः ॥ ४ । १ । १८ ॥ § 1709

क्रमनिषेधाद् इत्यस्य हेतोरस्मत्पक्षेऽप्यप्रतिषेधः, तत्राप्यानन्तर्यस्य तुल्यत्वात् । तथापि विनिगमनायां को हेतुरित्यत आह—अभावश्चेदङ्कुरोत्पत्तिकारणं स्यात्, अनुपाख्येय इति शेषः । न हि अनन्वयविनष्टयोः शालियवबीजयोः कश्चिद् विशेषोऽस्ति येनैकस्माच्छाल्यङ्कुरो नान्यस्मादिति । नो खल्वभावानामस्त्याजानतो भेदः । अपि च कारणानां शक्तिभेदात् कार्याणि भिन्नशक्तीनि । यदा तु कारणानामेवाभेदस्तदा कुतस्तच्छक्तीनां भेदः ? तथा च कार्याणि भिन्नशक्तीनि न स्युरित्याह—अनन्वितं च कार्यं सर्वाभिरिति । यदप्यसत उत्पादादभावस्योपादानत्वं तदपि कार्याणां भिन्नत्वेन भिन्नशक्तिकत्वेन च प्रत्युक्तम्, तत्प्रागभावानां स्वाभाविकभेदविरहात् । अपि च प्रागभावानामनादित्वेन कार्योत्पादस्याप्यनादित्वप्रसङ्गः । भावरूपकारणसहकारित्वं त्वभावस्य न निषिध्यते अस्मदभिमतस्योपाख्येयस्य । अत एव पाकजानां रूपादीनां पूर्वरूपादिध्वंसनिमित्तत्वमभ्युपेयते । श्रुतिस्तु
558/tha पूर्वपक्षाभिप्राया । तथा च सिद्धान्ते श्रुत्यन्तरम्—*सदेव सोम्येदमग्र आसीदिति कथमसतः सज्जायेतेति । शून्यताविवर्तश्च विश्वप्रपञ्च इति तु दर्शनमसत्ख्यात्यनिर्वचनीयख्यातिनिरासेनापाकृतम् । अपि च सर्वशून्यत्वे ख्यातुरभावात् ख्यातेरभावः । तस्मान्न शून्यतोपादनस्तद्विवर्तो वा विश्वप्रपञ्च इति सिद्धम् ॥ १८ ॥ § 1710

॥ इति शून्यतोपादानप्रकरणम् ॥

## ४.१.५ ईश्वरोपादानताप्रकरणम्

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ ४ । १ । १९ ॥
§ 1712

अथापर आह—ईश्वरः…दर्शनात् ॥ मा भूदयं नामरूपप्रपञ्चः शून्यतोपादानः, अपि तु ब्रह्मोपादानो भविष्यति । ब्रह्मैव हि प्रपञ्चरूपेण परिणमते मृत्तिकेव घटशरावोदञ्चनादिभेदेन । न चैवं नित्यत्वव्याघातः । *परिणामेऽपि तत्त्वाविघातात्, तल्लक्षणत्वाच्च नित्यतायाः । यदाह—*यस्मिंस्तत्त्वं न विहन्यते तदपि नित्यमित्येकं दर्शनम् । अपरं च ब्रह्मैवानिर्वचनीयानाद्यविद्योपधानभेदान्नामरूपप्रपञ्चभेदेन विवर्तते मुखमिवैकमनेकमणिकृपाणदर्पणादिभेदादनेकविधप्रतिबिम्बभेदेनेति । तदेतद् दर्शनद्वयमनेन सूचितम् । ईश्वरो ब्रह्म ईशनादियोगात् । चेतनाशक्तिः क्रियाशक्तिश्चेशना । सा चास्ति

६ भेदः ] को नु…भेद इति**nvt-C**
७ क्तीनि ] शक्तियुक्तानि**nvt-C**
१३ जानां ] पाकजादीनां**nvt-C**
१४ *] छान्दोग्योपनिषत् ६।२।२
५ नादिभेदेन ] °दिभावेन**nvt-C**
५ *] °मोऽपि**nvt-J**
६ *] महाभाष्यम् १।१।१

ब्रह्मणीति ब्रह्म ईश्वरः कारणं जगतः । श्रूयते हि तदैक्षत बहु स्यां प्रजायेयेत्यादि । सा खल्वियं श्रुतिश्चेतनस्य जगत्कारणतामाह । न चाभावो वा प्रधानं वा परमाणवो वा चेतयन्ते । ननु जीवा एव चेतनाः तत्कर्मनिबन्धनो नामरूपप्रपञ्चो भविष्यति, कृतमत्र भगवतेश्वरेणेत्यत उक्तं—पुरुषकर्माफल्यदर्शनादिति । पुरुषश्चेत् चेतयेत् नैवं निष्फलं कर्मारभेत । *तन्निष्फलत्वं 559/tha त्वविद्वान् प्रवर्तमान कथं चेतनो नाम ? तस्मात् पुरुषकर्माफल्यदर्शनाद् ईश्वरः कारणमित्यर्थः ॥ १९ ॥ § 1713

## न पुरुषकर्माभावे फलानिष्पत्तेः ॥ ४ । १ । २० ॥ § 1714

तदेतद्दर्शनद्वयमपाकरोति—न पु…त्तेः ॥ इदमत्राकूतम् । न तावन्मृत्तिकेव नामरूपप्रपञ्चरूपेण ब्रह्म परिणमते । तद्धि सर्वात्मना वा परिणमते एकदेशेन वा ? तत्र सर्वात्मना परिणामे तत्त्वविघातादनित्यत्वम् । एकदेशपरिणामे तु सावयवत्वात् तदेवानित्यत्वम् । अथ तत्त्वेनानुगतस्य परिणामः, तच्च ब्रह्म । न तर्हि ब्रह्मणः परिणामः । न च निर्भागस्यैकस्य स्वसंवेदनप्रत्यक्षस्य विपरीतज्ञानगोचरत्वसंभवः । सामान्यतो ग्रहे स्वरूपभेदाग्रहे च तदन्यरूपारोपेण विभ्रमो दृष्टः शुक्तिकादौ, न जातु शुक्तिस्वरूपं विद्वान् रजतमिति विपर्यस्यति । न च निरंशे स्वसंवेदनप्रत्यक्षे ब्रह्मणि तत्स्वरूपाग्रहः सामान्यग्रहो वा संभवति । तस्माद् ईश्वरो जगद्भेदेन विवर्तते इत्ययुक्तम् । निमित्तं तु स्यादीश्वरो जगतः । स चेदनपेक्ष एव जगत्कारणमित्युच्यते, तत्रेदमुपतिष्ठते—न पुरुषकर्माभावे फलानिष्पत्तेरिति । अस्य व्यतिरेकमाह वार्त्तिककारः—ईश्वरश्चेत् कारणं भवेदिति । एकरूपं कार्यं स्यादित्याह— ईश्वरस्येति । कर्मणि ईश्वरोऽनीश्वरः स्यात् । तथा च तत्कारणानि नेश्वरेण प्रयुज्यन्त इत्यनेकान्तो वक्ष्माणो हेतुरित्यर्थः ॥ २० ॥ § 1715

## तत्कारितत्वादहेतुः ॥ ४ । १ । २१ ॥ § 1716

तदेवमीश्वरोपादानत्वं च ब्रह्मविवर्तत्वं च निरपेक्षेश्वरनिमित्तत्वं च निराकृत्य अभिमतं पक्षं गृह्णाति—तत्का…तुः ॥ परमाणूपादानस्य जगतः पुरुष- 560/tha कर्मापेक्ष ईश्वरो निमित्तकारणम् । यच्च तेनापेक्षणीयं पुरुषकर्म तदपीश्वरनिमित्तकमेव । न च यदपेक्ष्यते तस्यानिमित्तत्वमित्युपरिष्टात् प्रवेदयिष्यते । तस्माद् ईश्वरकारितत्वात् पुरुषकारस्य तत्सहाय ईश्वरो निमित्तकारणं जगत इत्यस्य पक्षस्य निराकरणे पुरुषकर्माभावे फलानिष्पत्तेरित्यहेतुः निरपेक्षेश्वरनिमित्तकत्वनिराकरणे तु हेतुरेवेत्यर्थः । § 1717

---

१ हि ] छान्दोग्योपनिषत् ६२३

३ वा ] प्रकृतिर्वाnvt-J

५ * ] निष्फलं विद्वान्nvt-C

१३ स्य ] अपरिणामःnvt-J

१५ हे ] रूपविशेषाग्रहेnvt-C

२५ च ] ब्रह्म…त्वं च*Om*nvt-J

भाष्यम्—गुणविशिष्टमात्मान्तरमिति । गुणानीश्वरस्य ज्ञानादीनुपपादयिष्यति वार्त्तिककारः । आत्मकल्पाद् इति । अत्रात्मप्रकारादात्मजातीयत्वादिति यावत् । संसरद्भ्य आत्मभ्यो विशेषमाह—अधर्मेति । नन्वस्य कर्मानुष्ठानाभावात् कुतो धर्मः, तथा चाणिमादिकमैश्वर्यं कार्यरूपं विनैव कर्मणेत्यकृताभ्यागमप्रसङ्ग इत्यत आह—संकल्पानुविधायी चास्य धर्म इति । प्रवर्तयतु, किमेतावता इत्यत आह—एवं च स्वकृताभ्यागमस्यालोपेनेति । मा भूद् बाह्यानुष्ठानं संकल्पलक्षणानुष्ठानजनितधर्मफलमस्यैश्वर्यं जगन्निर्माणलक्षणमिति नाकृताभ्यागमप्रसङ्ग इत्यर्थः । § 1718

स्यादेतत् । प्रयोजनं विना न प्रेक्षावतां प्रवृत्तिः । न च प्राप्तसमस्तप्रापणीयस्यास्ति प्राप्तव्यं किञ्चिदीश्वरस्य । तस्मात् कृतमस्य जगन्निर्माणेनेत्यत आह—आप्तकल्पश्चेति । मा भूदस्य भगवतः स्वार्थः, परानुग्रहार्थं तु जगन्निर्माणे प्रवर्त्स्यतीत्यर्थः । अत्रैव दृष्टान्तमाह—यथा *पितापत्यानाम् । अयं पिता स्वापत्यानां यथा पितेत्यर्थः । दार्ष्टान्तिके योजयति—तथा पितृभूत ईश्वर इति । § 1719

नन्वात्मान्तराण्यनित्यज्ञानयोगीनि दृष्टानि, तद्वैलक्षण्यादीश्वरो नात्मजातीयो भवितुमर्हतीत्यत आह—न चात्मकल्पादिति । यद्यप्यात्मान्तराण्यनित्यबुद्ध्यादियोगीनि, अयं च नित्यज्ञानादियुक्तः, तथाप्यात्मजातीय एव, बुद्ध्यादिगुणयोगित्वात् । अन्यथा तोयादिपरमाणूनामतोयत्वादिप्रसङ्गो नित्य-
561/tha रूपादियोगात् । हिमकरकादिगतानां रूपादीनामनित्यत्वोपलब्धेरिति । यदि चायं बुद्ध्यादिगुणैर्नोपाख्यायेत प्रमाणाभावादनुपपन्न एव स्यादित्याह—बुद्ध्यादिभिश्चेति । § 1720

स्यादेतत् । यदि कारुण्यादीश्वरो जगन्निर्माणे प्रवर्तते, हन्त भोः सुखिनमेव सृजेन्न तु दुःखिनम् । न च क्षेत्रज्ञगतधर्माधर्मसहकारितया निर्माणवैचित्र्यं वाच्यम् । धर्मस्य तदनधिष्ठितस्य स्वकार्याकरणेन कारुणिकेन तदधिष्ठानायोगात् । तस्मात् सुखिदुःख्यादिभेदेन जगद्वैचित्र्यदर्शनात् नानुकम्पाप्रयुक्त ईश्वरः करोतीत्यत आह—स्वकृताभ्यागमलोपेन प्रवर्तमानस्येति । अयमभिसन्धिः । कारुणिकोऽप्ययमात्मान्तरातिशयितमहिमापि न वस्तूनां सामर्थ्यमन्यथा कर्तुं पारयति । तेनाधर्मेणोत्पत्तिमता नेश्वरप्रभावादपि नित्येन भवितुं युक्तम् । न च स्वफलविरोधिना फलमप्रदाय विनंष्टुमपि शक्यम् । अतः क्षेत्रज्ञानां नियतिमलङ्घयता ईश्वरेण नाधर्मः शक्योऽनधिष्ठातुम् । तस्मात् कारुणिकोऽप्ययं वस्तुस्वभावमनुविधीयमानो धर्माधर्मसहकारी जगद्वैचित्र्यं विधत्ते । तदिदमुक्तम्—स्वकृताभ्यागमलोपेनेति । पुरुषैर्यत् कर्म कृतं तत्फलाभ्यागमलोपेन प्रवर्तमानस्येत्यर्थः । § 1721

वार्त्तिके ईश्वरप्रक्रियेति । प्रक्रिया प्रकरणम् ईश्वरनिमित्तत्वविचार इत्यर्थः । अथ विद्यमानः प्रतिबन्धान्न प्रवर्तयतीति । सुखाय पुरुषार्थेन

८ मिति ] °निर्माणफलमितिnvt-C    १२ * ] पितुरप°nvt-J

प्रधाने प्रवर्तयितव्ये अधर्मः पुरुषार्थस्य प्रतिबन्धकः । एवं दुःखाय पुरुषार्थेन प्रधाने प्रवर्तयितव्ये धर्म इत्यर्थः । § 1722

न चायं हेतुस्तस्मान्निवर्तते इति । अयमचेतनत्वलक्षणो हेतुः क्षीरान्न निवर्तत इत्यर्थः । § 1723

परिस्पन्दः क्रिया । सा च मूर्त्यनुविधायिनी नामूर्ते सर्वगत ईश्वरे संभविनीति मन्वानः शङ्कते—क्रियानावेशादकारणमिति चेत् इति । अपरिस्पन्दा अपि ज्ञानचिकीर्षाप्रयत्ना आख्यातपदवाच्यतया भवन्ति क्रिया ईश्वर इत्यभिसन्धिना परिहरति—न विकल्पानुपपत्तेरिति । यदा च युगपदनेकानि द्रव्याणि संहन्यन्ते, तदाऽसाधारणकार्यव्यावृत्तेभ्यः संयोगेभ्य इति । असाधारणं कार्यम् एकैकस्य तन्तुद्वयसंयोगस्य द्वितन्तुकम्, तस्माद् 562/tha व्यावृत्तेभ्यः संयोगेभ्यः सह साधारणस्यैव कार्यस्य पटलक्षणस्योत्पादादित्यर्थः । न केवलमुत्पन्नक्रियेषु क्रियोपरतौ द्रव्योत्पादः कदाचिदनुत्पन्नक्रियेष्वपि द्रव्येष्ववस्थितसंयोगेभ्यः पूर्वद्रव्योपरतौ द्रव्यान्तरोत्पाद इत्याह—एकावयवविभागे त्विति । तुशब्देन पूर्वस्मादुत्पन्नोपरतक्रियाद् विशेषो दर्शितः । किमक्रियावतामेवारम्भः ? नेत्याह—कानिचित् पुनरिति । अन्यतरकर्मजान्नोदनात् संयोगान्निवृत्ते कर्मणि इतरस्मिन् द्रव्ये कर्मनिवृत्तिसमकालमेव द्रव्यमुत्पद्यते इति । § 1724

तत्स्वाभाव्यात् प्रवर्तत इत्यदुष्टमिति । चेतनोऽप्ययं परानुग्रहस्वभावोऽपि वस्तुस्वभावमनुरुध्यमानः कर्माशयानुरोधेन जगद्वैचित्र्यं विधत्ते । न चावश्यं सुकृते प्रवृत्तिमिवावश्यं दुष्कृते पुंसां प्रवृत्तिं विहन्तीत्यर्थः । अद्यत्वेऽपि च चेतनानां विचित्रस्वभावत्वं दृष्टं सदसन्मध्यमानां जनानाम् । § 1725

अथ नित्यमैश्वर्यं धर्मवैयर्थ्यं न तद् धर्माद् भवतीति । ततश्च ईश्वरस्यैश्वर्यं स्वकृतकर्मफलं वेदितव्यमित्ययुक्तं भाष्यमिति भावः । परिहरति—नित्यमिति ब्रूमः । तस्य हि ज्ञानक्रियाशक्ती नित्ये इति ऐश्वर्यं नित्यम् । अणिमादिकं त्वनित्यम्, तदभिप्रायं च भाष्यकारस्य धर्मफलत्वाभिधानम् । प्रत्यात्मवृत्ति धर्माधर्मसन्निचयाधिष्ठानं प्रत्यात्मवृत्तिसंकल्पानुविधायिन ईश्वरधर्मस्य प्रयोजनमिति । अभ्युपेत्येश्वरधर्ममेतदुक्तं भाष्यकृता । परमार्थतस्तु नेश्वरस्य धर्मसद्भावे प्रमाणमस्ति, नित्याभ्यामेव ज्ञानक्रियाशक्तिभ्यां सकलकार्योत्पादसिद्धेरित्याशयवान् आह—न चेश्वरे धर्मोऽस्तीति । § 1726

बुद्धिमत्त्वात् तर्हि आत्मान्तरमिति । आत्मान्तरं शरीर्यन्तरमभिप्रेतमिति । स च शरीरसंबन्धो वर्तमानः केषाञ्चिद् यथा संसारिणाम्, केषाञ्चिदतीतो यथा मुक्तानां शुकप्रह्लादादीनाम् । तदनेनेश्वरेण बुद्धिमता अवश्यं भाव्यं शरीरिणेति देश्यार्थः । नात्मान्तरं *न शरीरीत्यर्थः । कुतः ? गुणभेदात् । 563/tha

२० श्यं ] सुकृते...वश्यंnvt-J
२७ याधिष्ठानं ] धृत्यात्मवृत्ति° nvt-C,nvt-J*Omits either*
३४ *] शरीर्यन्तरमित्यर्थःnvt-C

नित्याश्चेदस्य बुद्ध्यादयः कृतं शरीरग्रहणेन तदुत्पादार्थेनेति भावः । नन्विदमेव बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्तन्ते इति । पक्षधर्मताबलात् तर्कसहायात् नित्यबुद्धिमत्त्वमस्य सिध्यतीत्यर्थः । प्रत्यर्थनियमासंभवाद् इत्यादिना तर्कः प्रमाणसहायो दर्शितः । § 1727

एवं तावद् गुणभेदेनाशरीरित्वमीश्वरस्य दर्शितम् न चैतस्य शरीरयोगो विकल्पमपि सहत इत्याह—अथ बुद्धिमत्तयेति । अतीतानागतवर्तमानविषया प्रत्यक्षेति साक्षात्कारवतीत्यर्थः । न पुनरक्षमाश्रिता नित्यत्वात् । उपलक्षणं चैतत् । नानुमानि की चेति नैन्द्रियकी नौपमानिकीत्यपि द्रष्टव्यम् । अक्लिष्टेति । क्लेशोऽविद्या तदरूषितेत्यर्थः । § 1728

मूर्तिमद्द्रव्यसंबन्धित्वादिति संयोगित्वादित्यर्थः । तथा च न रूपादिभिर्व्यभिचारः । *एतावदत्राभिसंहितमाचार्यस्य, *त्रयो हि खलु भावा जगति भवन्ति । प्रसिद्धचेतनकर्तृकाश्च यथा प्रासादाट्टालगोपुरतोरणादयः । प्रसिद्धतद्विपर्ययाश्च यथा परमाण्वाकाशादयः । सन्दिग्धचेतनकर्तृकाश्च यथा तनुतरुमहीमहीधरादयः । तत्र च प्रमेयत्वाद् वा वादिविप्रतिपत्तेर्वा साधकबाधकप्रमाणाभावे चेतनकर्तृत्वे संशयः । न च प्रत्यक्षानुपलब्धिमात्रमत्र बाधकं भवितुमर्हति । स्वभावविप्रकर्षिणां सतामपि प्रत्यक्षानुपलब्धेः परमाण्वादीनाम् । तथा च विवादाध्यासितास्तनुतरुगिरिसागरादय उपादानाभिज्ञकर्तृका उत्पत्तिमत्त्वात् अचेतनोपादानत्वाद् वा, यद् यदुत्पत्तिमदचेतनोपादानकं वा तत्सर्वमुपादानाद्यभिज्ञकर्तृपूर्वकं यथा प्रासादादि । तथा च विवादाध्यासितास्तनुतरुगिरिसागरादयः । तस्मात् तेऽपि तथेति । न चैषामुत्पत्तिमत्त्वमसिद्धम्, सावयवत्वेन वा, महत्त्वे सति क्रियावत्त्वेन वा वस्त्रादिवत् तत्सिद्धेः । न चैतावता वैनाशिकानां कर्मणा चेतनेन, मीमांसकानां वा क्षेत्रज्ञेन चेतनेन चेतनकर्तृकत्वसिद्धेः पृथिव्यादीनां सिद्ध-
564/tha साधनं चेतनत्वेऽपि हि तेषां पृथिव्याद्युपादानाद्यनभिज्ञत्वात् । तज्ज्ञत्वे वा स एवास्माकमीश्वरः । ईदृशमस्तु सिद्धसाधनं को हि क्लेशं विना न वाञ्छितसिद्धिमिच्छेत् ? न च साध्यहीनो दृष्टान्तः । पटादीनामप्युपादानाभिज्ञकुविन्दादिकर्तृकत्वात् । अत एव न विरुद्धता हेतोः । एवं हि सा भवेत् यद्युपादानाद्यनभिज्ञकर्तृकाः घटपटादयो भवेयुः । न चैतत्परेषामपि संमतम् । § 1729

स्यादेतत् । अर्थाक्षिप्तस्य विशेषस्य शरीरादिमत्त्वादेः प्रमाणविरोधाद् विरुद्धता । यथा तृणादिविकारकारित्वाद् अग्निमद्धिमम् इत्यत्र वह्निमत्त्वाक्षिप्ततृणादिविकारोपयुक्तवह्निगतोद्भूतोष्णस्पर्शविरुद्धस्य शीतस्पर्शस्य प्रत्यक्षेणोपलम्भाद् बाधितो विरुद्धो हेतुः । तथा ह्यस्य क्षित्याद्युपादानादिविषयं ज्ञानमात्ममनःसन्निकर्षशरीरादिकारणकं नासति तस्मिन् भवतीति त-

९ विद्या ] तददूषि°nvt-C
गुण्डितरूषिते—अमरकोशः ।

११ *] एतावदभिप्रेत°nvt-C
११ *] ये खलुnvt-C

दनेनाक्षिप्तम् । तद्यात्र प्रमामबाधितमिति । तन्निवृत्तौ ज्ञानमप्यस्य निवर्तते उष्णत्वोद्भूतिविनिवृत्ताविव दाहको वह्निरवश्याय इति । न, अव्यापकनिवृत्तावव्याप्यनिवृत्तेरयोगात् । कारणं चेदव्यापकं कार्यस्य, हन्त हता तर्हि व्याप्यव्यापकसंकथा । भवेदेतद् यदि क्षित्याद्युपादानज्ञानमप्यस्य कार्यं स्यात्, नित्यं तु तदभ्युपेयते इति न शरीरनिवृत्तावपि निवर्तितुमर्हति, अव्यापकनिवृत्तेरव्याप्यस्यानिवृत्तेः । अन्यथा नाश्ववान् मैत्र इति गोमानपि न स्यात् । न च बुद्ध्यादीनामनित्यानां बहुलमुपलब्धेर्नित्या बुद्धिरसंभविनीति सांप्रतम् । न हि प्रत्यक्षाः पाथसीया हिमकरकादयस्तद्गता रूपादयोऽनित्या इति तदारम्भकैः पाथःपरमाणुभिः तद्गतैर्वा रूपादिभिरनित्यैर्भवितव्यम् । सदकारणतया तु नित्यतोभयत्रापि तुल्या । न च शरीरादिसहभावेन ज्ञानस्य तत्र तत्रोपलम्भात् शरीरादीनां ज्ञानं व्याप्यमिति युक्तम् । स्वाभाविसंबन्धशालिता हि व्याप्यता । सा चोपाधिविरहे भवति । अस्ति च शरीरादिसहभावे ज्ञानस्योपाधिः कार्यत्वम् । कार्यं हि ज्ञानं स्वकारणं शरीरादि नातिवर्तते । नित्यं तु तदतिवर्तमानमपि साहित्योपलम्भं न विरुणद्धि । तस्माद् यथा अनित्यः शब्द उत्पत्तिमत्त्वात् घटवदिति प्रयुक्ते कश्चित् साध्यदृष्टान्तयोर्धर्मवैचित्र्यात् प्रत्यवतिष्ठते—यदि घटसाधर्म्याद् उत्पत्तिमत्त्वादनित्यः शब्दः, हन्त 565/tha
तस्मादेव रूपादिमतापि तेन भवितव्यम्, न चेदयं घटसाधर्म्येण रूपादिमान् एवमनित्योऽपि मा भूदिति । एवं च प्रत्यवतिष्ठमान उत्कर्षसमजातिवादी पराजीयते । एवमेवंवाद्यप्युत्कर्षसमजातिवादितया पराजेतव्यः साधर्म्यमात्रेणाप्रयोजकेन प्रत्यवस्थानात् । तस्य च सर्वानुमानेषु सुलभतया सर्वानुमानोच्छेदापादकत्वात् । § 1730

स्यादेतत् । उत्पत्तिमत्त्वमुपादानाद्यभिज्ञकर्तृपूर्वकत्वमात्रव्याप्तं घटादिषु दृष्टं तावन्मात्रमेव पृथिव्यादीनां गमयेत् । नित्यसर्वविषयज्ञानवत्कर्तृत्वं तु कुतस्त्यम् ? न हि तद्घटादौ दृष्टान्तधर्मिणि दृष्टम् । अथ रूपाद्युपलब्धेः क्रियात्वेन चक्षुरादिसाधनत्वानुमानमपि कथम् ? न हि च्छिदादयः क्रिया इन्द्रियादिसाधना दृष्टाः, तासां कुठारादिसाधनत्वात् । अथ दृष्टान्तधर्मिण्यदृष्टमपीन्द्रियसाधनत्वं पक्षधर्मताबलात् सिध्यति । रूपाद्युपलब्धिगतं हि क्रियात्वं तदेव करणं गमयेद् यत् तदुपलब्धिनिर्वर्तनसमर्थम्, न च कुठारादयस्तन्निर्वृत्तिसमर्था इति पक्षधर्मताबलात् कुठारादिविलक्षणमदृष्टचरमपि चक्षुराद्युपस्थापयतीति तदत्रापि समानम् । न ह्यपरिमेयानियतदिग्देशेन्द्रियकातीन्द्रियकत्रसस्थावरादिलक्षणकार्योत्पादयौगपद्यमसति सर्वविषयविज्ञाने तन्नित्यत्वे वा सेद्धुमर्हति । नो खल्वीदृशं पारमेश्वरं विज्ञानं कार्यशरीरेन्द्रियादिकार्यं संभवति, शरीराद्युत्पत्तेः प्रागस्याचैतन्येन *तत्प्राक्कालकार्यजातोत्पादाय ईश्वरान्तरकल्पनाप्रसङ्गात् । एवं ततः प्राक् ततः

२५ क्रियात्वेन ] चक्षुराद्यनु°nvt-C
२६ ना ] दृष्टाःnvt-J
३० तीति ] तदितरत्रापिnvt-C
३३ विज्ञानं ] °शरीरादि°nvt-C
३३ * ] कार्यान्तरोत्पा°nvt-C

प्रागित्यनेकालौकिककल्पनायाः वरमेकमेवालौकिकं बुद्धिनित्यत्वं कल्पितम् । एतेनैव शरीरेन्द्रियनित्यत्वकल्पनापि प्रत्युक्ता । § 1731

एतेन यदेके ब्रुवते—

> सन्निवेशादिमत्सर्वं बुद्धिमद्धेतु यद्यपि ।
> प्रसिध्येत् सन्निवेशादेरेककारणता कुतः ॥ § 1734

इति तददपि पराकृतम् । तेषां प्रसिध्येत् सर्वज्ञनिराक्रियामनोरथो यदि पिशितचक्षुषः परमाणून् क्षेत्रज्ञान् तत्समवेतान् वा कर्माशयान् द्रष्टुमीशते, न चैतदस्ति । तस्मादतीन्द्रियार्थदर्शिनोऽस्मदादिविलक्षणा बहवः कल्पनीयाः । तद् वरमस्त्वेक एव तादृशः कल्पनालाघवायेति । § 1735

न च कादाचित्कपरिपाकादृष्टवत् क्षेत्रज्ञपरमाणुसंयोगादेव तनुभुवनादिकार्योत्पादोपपत्तेः कृतं चेतनकर्तृकत्वेनेति वाच्यम् । उत्पत्तिमत्त्वस्योपादानाद्यभिज्ञकर्तृपूर्वकत्वेनोपाधिविरहिणः स्वाभाविकप्रतिबन्धसिद्धेः । न चाविज्ञातानामिन्द्रियमनसां विज्ञानोत्पादसाधनानामनधिष्ठानस्य वत्सवृद्धिनिमित्तस्याप्यचेतनस्य क्षीरस्य स्वातन्त्र्येण प्रवृत्तेश्च वने विटपादीनां च विना प्रयत्नमुत्पादस्य च दर्शनाद् व्यभिचार इति सांप्रतम्, सर्वेषामेव तेषां विवादास्पदीभूतत्वेन पक्षनिक्षेपात् । न च शशशृङ्गस्यास्तितावदनुपलब्धिविरोधादपक्षधर्मता धर्मिणो दर्शनानर्हतया भगवतस्तद्विरोधानुपपत्तेः अन्यथा सर्वानुमानोच्छेदप्रसङ्गात् । शृङ्गस्य तु शशशिरोवर्तिनो वत्सादिगतस्येव दर्शनार्हस्यानुपलब्धिनिराकृतस्य साधनानर्हत्वात् । § 1736

स्यादेतत् । नोत्पत्तिमन्मात्रं स्वभावप्रतिबद्धं बुद्धिमद्धेतुत्वेन किन्तु तद्विशेषः, यद्दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिरुत्पद्यते, तस्य च दृष्टेः सोपजायते । यद् बुद्धिमद्भावाभावानुविधायिभावाभावं दृष्टं घटादि च तथा, न तूत्पत्तिमन्मात्रं तनुभुवनाद्यपि, तस्य तद्भावाभावानुविधानादर्शनात् । तदेतेन विशेषणोपाधिना प्रयुक्तां बुद्धिमद्धेतुकत्वव्याप्तिमुपजीवदुत्पत्तिमत्त्वसामान्यं न तेन स्वभावप्रतिबद्धमिति न तद्गमयितुमर्हति । अन्यथा धूमप्रयुक्तां धूमध्वजव्याप्तिमुपजीवतः पाण्डुतादेः कुमुदकपोतकादिगतादपि धूमकेतनानुमानप्रसङ्गादिति । § 1737

अत्रोच्यते । इदमत्र निपुणं भवन्तो निरूपयन्तु किं बुद्धिमदन्वयव्यतिरेकानुविधानं विशेष उताहो तद्दर्शनम् । यदि पूर्वः कल्पः, स बुद्धिमद्धेतुकत्वं तनुभुवनादीनामातिष्ठमानैरभ्युपेयत एव । न हि कारणं
567/tha कार्याननुविहितभावाभावमन्यो वक्तुमर्हत्यह्रीकात् । अथ तद्दर्शनं न तद्ध्यक्रियादर्शिनः कृतबुद्धिसंभवः । य एव हि पटोऽनेन बुद्धिमद्धेत्वन्वयव्य-

१ नायाः ] कल्पनया nvt-C कल्पनायांnvt-J
१ मेवालौकिकं ] एकमेवालौकिकंnvt-J
६ पि ] परिहृतम्nvt-C
२२ द्भावाभावानुविधायिभावाभावं ] बुद्धिमद्भावाभावंnvt-C
२३ स्य ] सद्भावासद्भावानु°nvt-C
२६ पि ] °केतुना°nvt-C

तिरेकानुविधायी दृष्टः, स एव तत्कार्यो न तु विपणिवर्ती । तज्जातीयस्य तदन्वयव्यतिरेकानुविधानदर्शनाददृष्टान्वयव्यतिरेकानुविधानमपि तज्जातीयं तथेति चेत् ? हन्त उत्पत्तिमद् घटादि बुद्धिमदन्वयव्यतिरेकानुविधायीत्यन्यदपि तज्जातीयं तनुभुवनादि तथा भवद् दण्डेन न पराणुद्यते । घटजातीयमुत्पत्तिमद् बुद्धिमत्पूर्वमिति चेत् ? ननु प्रासादादि न तद्धेतुकं भवेत् अघटजातीयकत्वात् । अथ यज्जातीयं बुद्धिमदन्वयव्यतिरेकानुविधायि दृष्टम् तज्जातीयमेवादृष्टान्वयव्यतिरेकमपि बुद्धिमद्धेतुकम् । तत् किमिदानीं कार्यजातीयं प्रासादादि बुद्धिमद्धेतुकं न दृष्टं येनोत्पत्तिमत्तनुभुवनादि तथा न स्यात् । न खलु तज्जातीयत्वे कश्चिद् विशेष इति । यत्तु मृद्विकारत्वेन वल्मीकस्य घटादिवत् कुलालकार्यत्वं न भवति तत्कुम्भकारस्य दृश्यस्य प्रत्यक्षानुपलम्भविरोधात् । अदृश्यचेतनपूर्वकत्वं तु तस्योपेयत एव । § 1738

स्यादेतत् । नोत्पत्तिमात्रमुपादानाभिज्ञकर्तृकत्वेन व्याप्तम्, अपि तु यदस्मदादिशक्यज्ञानोपादानादि । न च तथा तनुभुवनाद्युत्पत्तिमदपि, तस्माद् व्याप्तिविरहान्न तत्पूर्वकमिति । तदयुक्तम्, उत्पत्तिमत्त्वतदुपादानाद्यभिज्ञकर्तृकत्वयोः प्रथममन्वयव्यतिरेकाभ्यां व्याप्तौ सिद्धायां तदुपादानादिशक्यज्ञानत्वादिकल्पनायाः कार्यज्ञानविषये व्यवस्थापनात् । व्याप्तिबलेन ज्ञानसामान्यसिद्धौ पक्षधर्मताबलेन तन्नित्यत्वसिद्धिरित्युक्तम् । तेनोपाधेरनुस्रियमाणस्यानुपलब्धेः स्वभावप्रतिबद्धमुत्पत्तिमत्त्वं बुद्धिमद्धेतुकत्वेन । न च स्वभावप्रतिबद्धमुत्पत्तिमत्त्वं स्वसम्बन्धिनमतीत्यापि वर्त्स्यतीति शक्यं शङ्कितुम् । तथा सति स्वभावहानिप्रसङ्गः । § 1739

स्यादेतत् । न सर्वज्ञपूर्वकाः क्षित्यादयः प्रमेयत्वसत्त्वादिभ्यः घटादिवदित्यनुमानानि सन्ति प्रतिपक्षसाधनानीति सत्प्रतिपक्षतया प्रकृतमनुमानाभासम् । अत्रोच्यते । किमनेन सर्वज्ञपूर्वककत्वं निषिध्यते उत ज्ञातृमात्रपूर्वकत्वं सर्वज्ञग्रहणं तूपलक्षणार्थम् । यदि पूर्वः कल्पः, तत एकदेशदर्शिपूर्वकत्वं साधितं स्यात् । तथा चापसिद्धान्तः । न च शक्यमपि । न ह्यस्मदादिनार्वाग्दृशा शक्याः 568/tha पृथिव्यादयः कर्तुम् । ज्ञातृमात्रपूर्वकत्वे तु निषेध्ये घटादिभिर्व्यभिचारः । यच्चेश्वरो नाधिष्ठाता परमाण्वादीनामशरीरित्वाद् मुक्तात्मवत्, ऐश्वरं वा ज्ञानं न सर्वविषयम् अनित्यं च, ज्ञानत्वाद् अस्मदादिज्ञानवत् इत्यनुमानं तत्पक्षधर्मतासिद्ध्यर्थमीश्वरसिद्धिं तद्बुद्धिमत्त्वं चापेक्षमाणं तत्प्रसाधकप्रमाणविरुद्धमात्मानमेव तावन्नासादयितुमर्हति, प्रागेव तद्विरोद्धुम् । न ह्यागमानुमाने जगत्कर्तृत्वनित्यसर्वविषयबुद्धिमत्त्वमन्तरेण केवलमीश्वरं साधयतः । तथा च ताभ्यां विरुद्धं भवदनुमानं नोत्पत्तुमर्हतीति सिद्धम् । बुद्धिवदिच्छाप्रयत्नावप्यस्य नित्यौ सकर्तृकत्वसाधनान्तर्गतौ मन्तव्यौ, ज्ञानचिकीर्षाप्रयत्नसमवायल-

११ त्वं ] चेतनहेतुत्वंnvt-J
१६ लेन ] ज्ञानमात्र°nvt-J
१९ तीत्यापि ] अतिपत्यापिnvt-J
२४ पूर्वः ] पक्षःnvt-C
३१ रेण ] °त्वव्यतिरेकेणnvt-C
३३ व्यौ ] वेदितव्यौnvt-C

क्षणत्वात् कर्तृत्वस्य । तेषां च परस्पराविनाभावादन्यतमसिद्धावितरयोः सिद्धेः । तदेवमुत्पत्तिमत्त्वादेव पक्षधर्मतासहायादेवंभूतेश्वरसिद्धिरित्युक्तम् । § 1740

भवतु वा तस्मादुपादानाद्यभिज्ञकर्तृकत्वमात्रसिद्धिः । परिशेषानुमानात् तु *व्यतिरेकसिद्धेर्विशेषसिद्धिः । तथा हि तनुभुवनाद्युपादानाद्यभिज्ञः कर्ता नानित्यासर्वविषयबुद्धिमान्, तत्कर्तुस्तदुपादानाद्यनभिज्ञत्वप्रसङ्गात् । न ह्येवंविधस्तदुपादानाद्यभिज्ञो दृष्टः, यथास्मदादिः । तदुपादानाद्यभिज्ञश्चायम् । तस्मात् तथेति । नो खलु परमाणुभेदान् प्रति क्षेत्रज्ञसमवायिनश्च कर्माशयभेदानपरिमेयान् अन्यः शक्तो ज्ञातुमृते तादृशादीश्वरादिति विपश्चितमधस्तात् । परपुरुषसमवेतावपि धर्माधर्मावधिष्ठातुं शक्नोति संबन्धात् । न हि साक्षात् संयोगसमवायावेव संबन्धौ संयुक्तसंयोगिसमवायस्यापि तद्भावात् । संयुक्ताः खल्वीश्वरेण परमाण्वादयः । तैश्च क्षेत्रज्ञाः । तत्समवेतौ धर्माधर्माविति । संयुक्तसमवायो वा क्षेत्रज्ञेनेश्वरस्य संयोगात् अजसंयोस्याप्युपपादितत्वात् । धर्माधर्मौ परमाणून् वा स्वधर्मोपग्रहमन्तरेणापि चेश्वरः स्वकार्यारम्भाभिमुखान् करिष्यति विषविद्याविदिव विषशकलं क्रियारम्भाभिमुखम् ।
569/tha एतेन चेतनोपादानत्वमपि व्याख्यातम् । वार्त्तिककृता तूपलक्षण तया चेतनत्वं हेतुरुक्तः । उत्पत्तिमत्त्वादयोऽपि हेतव ऊहनीयाः । § 1741

इमं च न्यायमाम्नाय उपोद्बलयति— *एतस्य वाक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः । *द्यावाभूमी जनयन् देव एकः । *तदैक्षत बहुस्यां प्रजायेय । इत्यादिः स्मृतिश्च भवति—

*अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ § 1744

अकारणत्वेन चेश्वरज्ञानस्य नित्यतां दर्शयति श्रुतिः—

*अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम् ॥ § 1748

इत्यादिका । एतयैवाशरीरित्वमपि दर्शितं भवति । परिशिष्टं तु वार्त्तिककृता स्वयमेव विपश्चितमित्युपरम्यते ॥ २१ ॥ § 1749

॥ इतीश्वरोपादानताप्रकरणम् ॥

---

४ *] व्यतिरेकिद्वितीयनाम्नो विशेष°**nvt-J**
४ हि] तनुभुवनाद्यभिज्ञः**nvt-C**
१७ *] बृह° उप° ३.८.९
१८ *] ऋ. वे. १०. ८१. ३
१८ *] छान्दो° उप° ६.२.३
२० *] महाभारते ३.३०.२८
२२ *] श्वेता° उप° ३.१९

## ४.१.६ आकस्मिकत्वप्रकरणम्

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥ ४ । १ । २२ ॥ § 1751

कण्टकादीनां संस्थानविशेषवतां निमित्तादर्शनेनानिमित्ततां मन्वानस्तेनैव दृष्टान्तेन शरीरादीनामपि संस्थानभेदवतामनिमित्ततां मन्वानः पूर्वपक्षयति— अनिमित्ततः …दर्शनात् ॥ इति । अदृश्यमाननिमित्तानां शरीरकण्टकादीनां 570/tha
पक्षनिक्षेपात् पक्षेण व्यभिचारानुद्भावनात् उद्भावने वा सर्वानुमानोच्छेदप्रसङ्गात् सर्वत्र तस्य सुलभत्वात् उभयसिद्धेन निमित्तवत्पटादिदृष्टान्तेन संस्थानभेदवत्त्वात् कण्टकशरीरादीनामपि *निमित्तवत्त्वानुमानमिति सिद्धान्तः ॥ २२ ॥ § 1752

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ ४ । १ । २३ ॥ § 1753

सिद्धान्त्येकदेशिमतमुपन्यस्य दूषयति—अनिमित्त…निमित्ततः ॥ अपरे त्विति ॥ २३ ॥ § 1754

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ ४ । १ । २४ ॥ § 1755

स्वयं वार्त्तिककारः कण्टकादीनामनिमित्ततां विकल्प्य दूषयति— कण्टकादीनां चानिमित्तं जन्मेति । प्रतिपाद्यप्रतिपादकन्यायस्येति । प्रतिपाद्यः पुरुषः कर्म प्रतिपादकश्च पुरुषः कर्ता, कर्तृकर्मणी च कारके । कारकं च क्रियाया निमित्तमिति प्रतिपाद्यप्रतिपादकविषयो न्यायः । स चायमनिमित्तं शरीरादीनां जन्मेति प्रतिजानानेनानेनाभ्युपेयते । अन्यथा ते मूकतैव स्यादिति । तदिदमुक्तम्, सर्वं चानिमित्तं प्रतिपादयसि चेति व्याहतम् । न केवलं प्रतिपाद्यप्रतिपादकन्यायाभ्युपगमात्, इतोऽपीत्याह— वाक्योपादानाच्चेति । प्रतिपादननिमित्तं वाक्यमुपादत्से अभिधत्से चानिमित्तं सर्वमिति व्याघात इत्यर्थः । तथा प्यन्यतरधर्मासिद्ध इति । अन्यतरेण साध्यधर्मेणानिमित्तत्वाख्येनासिद्धोऽनिमित्तत्वस्यैवासिद्धेः । ननु प्रतिवादिनो वाङ्मात्रेण न सिद्धमसिद्धं भवत्यतिप्रसङ्गादित्यत आह—संस्थानविशेषवत्त्वस्य भावात् । पटादिदृष्टान्तेन कण्टकादीनां सनिमित्तकत्वे प्रामाणिकत्वे न वाङ्मात्रासिद्धेरसिद्धिरिति । कस्मात् पुनः पूर्वः पक्षः स्वयं सूत्रकारेण न 571/tha
निराकृत इत्यत आह भाष्यकारः, स खल्वयं वादोऽकर्मनिमित्त इति ॥ २४ ॥ § 1756

॥ आकस्मिकत्वप्रकरणम् ॥

---

७ टादिदृष्टान्तेन ] संस्थानवत्त्वात्nvt-J
८ * ] निमित्तवत्त्वमितिnvt-C
११ स्य ] उद्भाव्यnvt-C
२७ सिद्धिरिति ] वाङ्मात्रादसिद्धेरिति nvt-C

## ४.१.७ सर्वानित्यताप्रकरणम्

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ ४ । १ । २५ ॥ § 1758

अन्ये तु मन्यन्ते—सर्वम्...त्वात् ॥ हेतोर्गमकत्वं दर्शयितुं पृच्छति—किमनित्यमिति । उत्तरम् यस्य कदाचिद्भावः । हेत्वर्थं विवृणोति—उत्पत्तीति । यद् उत्पत्तिधर्मकमनुत्पन्नं नास्ति तद् उत्पन्नं चास्ति, विनाशधर्मकं च विनष्टं नास्ति अविनष्टं चास्ति । तस्मात् पूर्वापरयोः कालयोरभावान्मध्ये च भावात् सिद्धं कदाचिद्भावलक्षणमनित्यत्वमुत्पत्तिविनाशधर्मकत्वादित्यर्थः । साध्यधर्मिरूपं पृच्छति—किं पुनरिति । उत्तरम्—भौतिकं चेति । अत्र तावत् स्वयं वार्त्तिककार उत्तरमाह—सर्वमनित्यमिति । सूत्रस्य दृष्टान्तार्थत्वादिति । अर्थशब्दो निमित्तवचनः, दृष्टान्तनिमित्तत्वात् सूत्रस्य प्रतिज्ञाहेतूपन्यासपरस्य । न दृष्टान्तं विना हेतुः प्रतिज्ञार्थस्य गमको यत इत्यर्थः । एतदेव विभजते—सर्वमनित्यमिति । निराकरणान्तरमाह—उत्पत्तिविनाशधर्मकत्वादिति चायमिति ॥ २५ ॥ § 1759

नानित्यतानित्यत्वात् ॥ ४ । १ । २६ ॥ § 1760

सिद्धान्त्येकदेशीमतमुपन्यस्य दूषयति—नानि...त्वात् ॥ इति ॥ २६ ॥ § 1761

572/tha

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ ४ । १ । २७ ॥ § 1762

नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात् ॥ ४ । १ । २८ ॥ § 1763

परमसिद्धान्तं सूत्रोक्तमाह—अयं खल्विति । अथोच्यते न वयं सर्वमनित्यं साधयामः, अपि तु यस्य यस्यानित्यता नामास्ति धर्मः तत्सर्वमनित्यमिति । ततश्चाकाशादीनां नित्यत्वेऽपि नास्मत्पक्षक्षतिरिति । तदेतत् सिद्धसाधनेन दूषयति—अनित्यताभावाच्च सर्वमनित्यं न दोष इति । यस्य सन् धर्मी स्वं तद्योगादनित्यः स्यात् स एव कदाचिन्नास्तीत्यत आह—अनित्यत्वं नाम धर्मः, सोऽसति धर्मिणि न भवतीति । स्यादेतत् । उत्पत्तिविनाशधर्मकत्वावगतावनित्यताधर्मयोगात् तावद् घटादि भवत्यनित्यम् । तेनैव दृष्टान्तेन सत्त्वादाकाशादयोऽपि भविष्यन्त्यनित्या इति देशयति—अथ पुनरिति । परिहरति—तस्याप्युत्तरपदसिद्ध्या तत्पदार्थस्य नित्यत्वस्य सिद्धेरिति ॥ २८ ॥ § 1764

॥ सर्वानित्यताप्रकरणम् ॥

२६ म् ] °गतावनित्यतायोगाद् घटादि भवत्व° nvt-C

२८ सिद्ध्या ] °सिद्धिवत् nvt-J

## ४.१.८ सर्वनित्यत्वनिराकरणप्रकरणम्

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ ४ । १ । २९ ॥ § 1766

अयमपर एकान्तः—सर्वं...त्वात् ॥ सर्वं नित्यम् । कस्मात् ? पञ्चभूतनित्यत्वात् । पञ्चभूतात्मकं खल्वेतद् गोघटादिकार्यमुपलभ्यते । व्यपदिशन्ति हि मृद्धटो मृच्छरीरमिति । भूतानि च नित्यानि, तेषामुच्छेदस्य नैयायिकैरनभ्युपगमात् । तेन भूतात्मनां गोघटादीनां नित्यतेति पूर्वः पक्षः ॥ २९ ॥ § 1767

573/tha

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ४ । १ । ३० ॥ § 1768

भूतेभ्यो भौतिकानि भिन्नानि । न हि परमसूक्ष्माः परमाणवो गोघटादयः, परमाणुवत्तेषामप्यतीन्द्रियत्वेन सर्वाग्रहणप्रसङ्गादित्युक्तं द्वितीयेऽध्याये । तस्माद् *ग्रहणाग्रहणलक्षणविरुद्धधर्मयोगाद् अन्ये भौतिका भूतेभ्यः । तथा च तेषामुत्पत्तिविनाशकारणोपलब्धेर्न नित्यत्वं भूतनित्यत्वेऽपीति सिद्धान्तमाह—नोत्पत्ति... लब्धेः इति ॥ ३० ॥ § 1769

तल्लक्षणावरोधादप्रतिषेधः ॥ ४ । १ । ३१ ॥ § 1770

भूतसारूप्येण तादात्म्यं मन्यमानः पुनरपि पूर्वपक्षवाद्याह—तल्लक्षणा... षेधः ॥ तल्लक्षणावरोधाद् गोघटादीनां भूतनित्यत्वेन नित्यत्वस्याप्रतिषेधः ॥ ३१ ॥ § 1771

नोत्पत्तितत्कारणोपलब्धेः ॥ ४ । १ । ३२ ॥ § 1772

भूतसारूप्यं गोघटादीनां भूतकार्यत्वेऽप्युपपद्यमानं न भूतात्मकत्वमवगमयतीत्याशयवानाह—नोत्पत्ति...लब्धेः ॥ इति । अपि च यद्युत्पत्तिविनाशौ न भावानां वस्तुसन्तौ कथं प्रेक्षावतामभिमतोत्पत्तिकारणे अनभिमतविनाशकारणे च तदर्थिनां प्रवृत्तिरित्याह—उत्पत्तिविनाशकारणेति । अपि चाव्यापको हेतुरित्याह— शब्दकर्मबुद्ध्यादीनां चाव्याप्तेः । अव्यापकश्च अनेकान्त उक्तः । पक्षो हि सर्वं नित्यमिति । तस्मिन्नस्य सत्त्वासत्त्वाभ्यामनेकान्तः, अनेकः सत्त्वासत्त्वलक्षणः अन्तोऽस्येत्यनेकान्त इति । तदेतद् वार्त्तिककारो वक्ष्यत्यर्थदृष्ट्या पक्षस्यान्तद्वयेऽवस्थानादिति । हेतोरन्तद्वये सत्त्वासत्त्वरूपे पक्षस्यावस्थानादिति योजना । § 1773

574/tha

असति बाधके मिथ्यात्वकल्पनायामतिप्रसङ्ग इत्यमुमर्थं शङ्कानिराकरणाभ्यामाह—सप्नविषयेत्यात्यादिना । भाष्योक्तमर्थमुक्त्वा स्वयं वार्त्तिककार

१० *] °णाग्रहणवि° nvt-C

१० योगाद्] °धर्माध्यासयो° nvt-C

आह—*सर्वस्य चेति । *यावद् येन प्रतिपाद्यत इति । प्रतिपादनेन क्रियत इत्यर्थः । शेषमतिरोहितार्थम् ॥ ३२ ॥ § 1774

न व्यवस्थानुपपत्तेः ॥ ४ । १ । ३३ ॥ § 1775

तदेवं सांख्यानां मतमपास्य स्वायम्भुवानां मतमपाकर्तुमुपन्यस्यति—अपरे तु सर्वं नित्यमित्यन्यथा वर्णयन्ति । त्रिविधः खल्वयं धर्मिणः परिणामो धर्मलक्षणावस्थारूपः । तद् यथा सुवर्णं धर्मि, तस्य धर्मपरिणामो वर्धमानरुचकादिः, धर्मस्य तु लक्षणपरिणामोऽनागतादिः । यदा खल्वयं हेमकारो वर्धमानकं भङ्क्ता रुचकादिमारचयति, तदा वर्धमानको वर्तमानतालक्षणं हित्वा अतीततालक्षणमापद्यते । रुचकं त्वनागततालक्षणं हित्वा वर्तमानतामापद्यते । वर्तमानतापन्न एव तु रुचको नवपुराणभावमापद्यमानोऽवस्थापरिणामवान् भवति । नवपुराणावस्थाश्च वर्तमानलक्षणाश्रया लक्षणपरिणामाः । सोऽयं त्रिविधः परिणामो धर्मिणः । धर्मलक्षणावस्थाश्च धर्मिणो भिन्नाश्चाभिन्नाश्च । तथा च ते धर्म्यभेदात् तन्नित्यत्वेन नित्याः । भेदाच्चोत्पत्तिविनाशविषयत्वमित्युभयमुपपन्नम् । § 1776

ननु यद्युपजनापायधर्मकत्वं धर्माणां हन्तोत्पत्तेः प्राक तेषामसत्त्वाद् विनाशाच्चोर्ध्वमसत्त्वात् कथं सर्वनित्यत्वसिद्धिरित्यत आह भाष्यकारः— यच्चोपजायते तत् प्रागप्युपजनादस्ति धर्मिरूपेणेति शेषः । तन्निवृत्तमप्यस्तीति । अत्रापि धर्मिरूपेणेति शेषः ॥ § 1777

575/tha निराकरोति—न व्यव...पत्तेः ॥ उपजनापाययोः स्वरूपतः कालतो विशेषतः संबन्धितोऽनागतत्वादितश्च व्यवस्थानुपपत्तेरित्यर्थः । एतदुक्तं भवति न तावद् भेदाभेदौ परस्परपरीहारव्यवस्थितधर्माणावेकत्र समाविशतः । तस्मादुपजनापायव्यवस्थायै भेदं धर्मलक्षणावस्थानां धर्मिण इच्छता तेषामनित्यत्वमभ्युपेतव्यम् । § 1778

सांख्यवत् सत्कार्याभ्युपगमेन तु नित्यत्वव्यवस्थापने वार्त्तिककार आह—यच्च निवर्तते तन्निवृत्तमप्यस्तीति ब्रुवाण इति सुगमम् ॥ ३३ ॥ § 1779

॥ इति सर्वनित्यत्वनिराकरणप्रकरणम् ॥

## ४.१.९ सर्वपृथक्त्वनिराकरणप्रकरणम्

सर्वं पृथग् भावलक्षणपृथक्त्वात् ॥ ४ । १ । ३४ ॥ § 1781

१ *] सर्वस्य च इति या वाक्येन प्रति°nvt-J यावदद्येन प्रतिपाद्यत इति च प्रतीकद्वयं वार्त्तिके नोपलभ्यते ।
१ *] सर्वस्य च इति या वाक्येन प्रति°nvt-J यावदद्येन प्रतिपाद्यत इति च प्रतीकद्वयं वार्त्तिके नोपलभ्यते ।
१३ ते] °भेदान्नित्याःnvt-C
२० तः] विशेष्यतःnvt-J

अयम् अन्य एकान्तो बौद्धानाम् सर्वं...पृथक्त्वात् ॥ सर्वं पृथक्, कस्मात् ? भावलक्षणपृथक्त्वात् । न रूपाद्यतिरिक्तं द्रव्यं नाम किञ्चिदस्ति, नाप्यवयवातिरिक्तः कश्चिदवयवीति सौत्रान्तिका वैभाषिकाश्च प्रतिपेदिरे । *वार्त्तिकम्—अस्य प्रयोग इति । कुम्भशब्दोऽनेकविषय इति । पारमार्थिकानेकविषयः, काल्पनिकं तु कुम्भस्यैकत्वं न वार्यते । तथा चैकपदमित्येकपदेन न व्यभिचारः, तस्यापि पारमार्थिकानेकविषयत्वादित्यर्थः ॥ ३४ ॥ § 1782

## नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ४ । १ । ३५ ॥ § 1783

तान् निराकरोति—नानेक...निष्पत्तेः ॥ अनेक विधैर्लक्षणैः संबद्धस्यैकस्य भावस्य घटादेरवयविनो निष्पत्तेरिति । स्यादेतत् । घटादिशब्देभ्यो रूपादीनां च बुध्नादीनां च बहूनामवगमात् कथमेकार्थतेत्यत आह—आधारधेयभावेनेति । यदि नानार्थतापि भवति घटादिशब्दानां तथापि 576/tha
प्रत्येकमेकत्वं तदर्थानामशक्यापह्नवमिति न पूर्वपक्षिणोऽभिमतसिद्धिरिति ॥ ३५ ॥ § 1784

## लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ४ । १ । ३६ ॥ § 1785

अथापीति अपि चेत्यर्थ । लक्षण...प्रतिषेधः ॥ अणुसमूहे चागृह्यमाण इति । परमसूक्ष्मत्वेनातीन्द्रियत्वादित्यर्थः । अथाप्येतदनुक्तमिति । अपि च भावलक्षणपृथक्त्वादिति हेतुमुक्त्वा बौद्धेन पश्चादेतदुक्तम् । किं तदुक्तमित्यत आह—नास्त्येको भावो यस्मात् समुदाय इति । एतदनूक्तं दूषयति—एकानुपपत्तेर्नास्त्येव समूहः । अनूक्तं विवृणोति—नास्त्येको भावो यस्मात् समूहे भावशब्दप्रयोगः । अस्य दूषणं विवृणोति—एकस्यानुपपत्तेरिति । एतत् प्रपञ्चयति—एकसमुच्चयो हीति । नास्त्येको भाव इति यस्य भावस्यैकत्वप्रतिषेधः प्रतिज्ञायते, समूहे भावशब्दप्रयोग इति ब्रुवता स एवाभ्यनुज्ञायते । ननु समूहोऽभ्यनुज्ञायते न त्वेको भाव इत्यत आह—एकसमुच्चयो हि समूह इति । तदनेन प्रतिज्ञया हेतोर्व्याघात उक्तः । संप्रति प्रतिज्ञाया हेतुना व्याघात इत्याह—समूहे भावशब्दप्रयोगादिति चेति । § 1786

उपेत्य तूच्यते अनेकार्थत्वमप्यत्रासंभवीति *समूहभेदस्य चानवस्थानादिति । यदि समूहमात्रमेव न त्वेकं किञ्चिदस्ति । तथा सति घटलक्षणे समूहे भेद्यमाने नाल्पतरतमादिभेदः प्रतीयेत, घटादिकपालशर्कराचूर्णपरमाणूनां समूहत्वेनानन्तावयवत्वादयं महान् अयमल्पोऽल्पतरोऽल्पतम इति

४ *] अत्र पाठक्रमविपर्ययः nvt-J पुस्तकेऽपि । सnvt-C पुस्तकानुसारं विशोधितः ।
१३ सिद्धिरिति] आधाराधेयभावेनेति प्रतीकस्य ३५ सूत्रवार्तिके दर्शनात् स्यादेतदित्यादि अभिमतसिद्धिरित्यन्ताटीकाखण्डोऽपि तत्सूत्रटीकायां सन्निविष्टः ।
२७ *] समूहे भेद°nvt-C
२८ मेव] °मेवंnvt-C
३० म] °ऽल्पोऽल्पतर इतिnvt-C

विभागो न स्यात् । तस्मादनेन तारतम्यं समर्थयमानेन क्वचित् समूह- 577/tha निवृत्तिर्वाच्या । न चासावसमूहमेकमन्तरेण इत्येकोऽभ्युपेयत इत्यर्थः । उक्तमर्थमविद्वान् शङ्कते—अथ मन्यस इति । रूपादीनां समुदाय इति चत्वारि वा द्रव्याणीति चावान्तरदर्शनभेदविवक्षया द्रष्टव्यम् । *उक्तार्थप्रदर्शनेनोत्तरम्—एतस्मिन् वै दर्शने इति । अथानन्तं समुदायं प्रतिपद्यस इति । निराकृतस्यापि पुनराशङ्का आगमविरोधमापादयितुम् । एकानुपपत्तौ नानेकोपपत्तिरिति । *यत्तदनेकमुक्तमेतत् त्याज्यमिति । शेषं भाष्यव्याख्यायां व्याख्यातम् ॥ ३६ ॥ § 1787

॥ इति सर्वपृथक्त्वनिराकरणप्रकरणम् ॥

## ४.१.१० सर्वशून्यत्वनिराकरणप्रकरणम्

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ४ । १ । ३७ ॥ § 1789

संप्रति शून्यतावादिनम् उत्थापयति—अयमपर एकान्तः । सर्वम्......... सिद्धेः ॥ सर्वमभाव इति प्रतिज्ञा । अत्र हेतुः भावेष्वितरेतराभावसिद्धेरिति । सर्वमिदं प्रमाणप्रमेयप्रमातृप्रमितिरूपमभावस्तुच्छं भावेष्वितरेतराभावसिद्धेरिति । वार्त्तिककारो व्याचष्टे—असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात् । प्रमाणादयः खल्वमी परस्परानात्मकतया असदिति प्रत्ययस्य नञश्च गोचरा इत्यनुभूयन्ते । अतस्तद्वाचिनां शब्दानां तत्सामानाधिकरण्यम् । ततः प्रमाणादयोऽसन्तः अनुत्पन्नप्रध्वस्तपटवत् । अपि चामी भावा नित्या अनित्य वा ? नित्यत्वे सर्वसामर्थ्यरहितस्यासत्त्वम् । न हि नित्यं क्वचित् कार्य उपयुज्यते क्रमाक्रमानुपपत्तेरित्युक्तम् । अनित्यत्वे तु विनाशस्वभावाश्चेद् द्वितीयादिष्विव क्षणेषु प्रथमक्षणेऽपि न स्युः । सत्त्वे वा नामी विनाशस्वभावाः । अतत्स्वभावत्वे वा क्षणान्तरेऽपि न नश्येयुः । नो खलु नीलं स्वकारणादुपजातं जातु कारणसहस्रैरपि शक्यं पीतं कर्तुमिति विनाशस्वभावकत्वमकामेनाप्यनित्यानामेषितव्यम् । तस्माद् 578/tha भावानां शून्यतैव पारमार्थिकी, कल्पनया त्ववस्तुसत्या सन्त इवावभासन्त इति युक्तमुत्पश्यामः । तथा च सर्वे भावा इति । सर्वे भावशब्दा इत्यर्थः । प्रयोगश्च सर्वे भावशब्दा असद्विषया असत्प्रत्ययप्रतिषेधशब्दाभ्यां सामानाधिकरण्यात् । अनुत्पन्नप्रध्वस्तघटवाचकशब्दवदिति ॥ ३७ ॥ § 1790

न स्वभावसिद्धेर्भावानाम् ॥ ४ । १ । ३८ ॥ § 1791

अत्र तावदुत्सूत्रं भाष्योक्तं दूषणं वार्त्तिककार आह—प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोश्च व्याघात इति । अभिन्नविभक्तिकत्वमिति । अभिन्नार्थकविभ-

३ मुदाय ] समूहnvt-J
४ *] उक्तार्थदर्श°nvt-C
७ *] एतदनेकमभिमतं त्याज्यम्nvt-J

क्तिकत्वं न त्वभिन्नविभक्तिकत्वमेव विभिन्नविभक्तिकानामपि सामानाधिकरण्यात् । यथा चैत्रः पठतीति, यथा वा न त्वां तृणाय मन्य इति । नासति तत्प्रत्ययेन भवितुमिति । न ह्यत्यन्तासन्निरुपाख्यं सर्वमिति वा भाव इति वा *अभिधानस्यापि गोचरः । उपपादितं हि द्वितीयसूत्रे एव यथा असद्वा अनिर्वचनीयं वा न ख्यातिगोचरोऽपि तु सदेव सदन्तरात्मना । तथा च कुतोऽत्यन्तासतः कल्पनागोचरत्वमपीति । शेषं भाष्ये इति । प्रतिज्ञाहेत्वोर्व्याघातो भाष्ये प्रपञ्चित इति । § 1792

उत्सूत्रमुक्त्वा भाष्यकारः सौत्रं दूषणं वक्तुमाह—सूत्रेण चाभिसंबन्धो दूषणस्य । न स्वभावसिद्धेर्भावानाम् ॥ सर्वमभाव इति नास्ति । कस्मात् ? स्वभावसिद्धेर्भावानां स्वभावो धर्मो द्रव्यादीनां सदादिः । अथवा स्वभावः स्वरूपं भावानां येनामी भावाः स्वभावाद् व्यावर्तन्ते तस्य सिद्धेः, अथवा असन्निति प्रत्ययस्य गव्यश्वात्मनेति विशेषणात् । अगौरित्यस्य च गां परिहृत्याश्वादिभिः संबन्धात् गोभावसिद्धिः एवमश्वादिष्वपीति । स्वभावसिद्धेर्भावानां नाभाव इत्यर्थः । न स्वभावसिद्धेरिति सूत्रमनूद्य वार्त्तिककारः स्वरूपमात्रेण व्याख्याय प्रश्नपूर्वकं तात्पर्यमस्य दर्शयति—पूर्वसूत्रस्येति । कश्च स्वो भाव इत्यादिना सिद्धो भाव इत्यन्तेन सूत्रस्य व्याख्यानत्रयं भाष्य- 579/tha
कारीयं वार्त्तिककारो दर्शयति । सामान्यो धर्मः समानो नित्यत्वादिरित्यर्थः । प्रश्नपूर्वकमसत्प्रत्ययप्रतिषेधसामानाधिकरण्यं भावस्योपपादयति—कथं तर्हीति । असच्छब्दः खल्वभावविशेषणं सदेवाभिधत्ते, एवमसत्प्रत्ययोऽप्यभावविशेषणं सदेवावलम्बते । यथा शुक्लशब्दः शुक्लगुणविशिष्टे पटे वर्तते, तथा चासत्प्रत्ययाभिधानयोरुपपन्नं भाववाचिना पदेन सामानाधिकरण्यमित्यर्थः । भावश्च कश्चिन्नित्यः कश्चिदनित्यः । तत्र नित्यस्यार्थक्रियाकारित्वमुपपादितं क्षणभङ्गभङ्गे । अनित्योऽपि न विनाशस्वभावो भावः, किं तु स्वकारणादयं सत्स्वभावो भावो जातः, कारणान्तरात् तु विनश्यति । यत् तूक्तम्, नीलं न शक्यं पीतं कर्तुमिति, तत्र ब्रूमः, शक्य एव नीलः पटः पीतः कर्तुम् । आमः श्यामो घटो वह्निसंयोगाद् रक्तः । अथ नीलत्वं न पीतत्वं शक्यं कर्तुम्, ननु भावोऽपि किमभावः कर्तुं शक्यः ? यथैककुम्भाधिकरणे श्यामरक्तत्वे पर्यायेण भवतः, एवं कपालाधिकरणौ कुम्भभावाभावाविति न दोषः ॥ ३८ ॥ § 1793

## न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ४ । १ । ३९ ॥ § 1794

स्वभावसिद्धेरिति यदुक्तं तदाक्षिपति शून्यवादी—न स्व......त्वात् ॥ सर्व एव हि भावा भिन्नस्वभावाः, भिन्नत्वं चैषामन्यापेक्षम् । तथा हि नीलं भिन्नं पीतापेक्षया न तु स्वभावतः । एवं ह्रस्वदीर्घत्वपरापरत्वपितापुत्रत्वादयः

---

४ *] अभिमानस्या°nvt-J
११ भावाः] स्वाभावाद्nvt-J
१२ वा] तस्य सिद्धेः अथवाnvt-J
१३ सिद्धिः] °सिद्धेःnvt-C
३३ या] °पेक्षं nvt-J

परस्परापेक्षा द्रष्टव्याः । यच्च परापेक्षं तन्न स्वाभाविकं यथा जपाकुसुमापेक्षः स्फटिकस्यारुणिमेत्याक्षेपः ॥ ३९ ॥ § 1795

व्याहतत्वादयुक्तम् ॥ ४ । १ । ४० ॥ § 1796
580/tha

समाधत्ते—व्याह.........क्तम् ॥ एतद् व्याचष्टे—यदीति । ननु यद्यनेन क्रमेणोभयाभावो भवति, भवतु सिद्धमेव नः समीहितमित्यत आह— अपेक्षायामनपेक्षायां चेति । परिमाणभेदो हि दीर्घत्वं ह्रस्वत्वं वा स च भावानामौत्पत्तिकः केवलं तस्यातिशयानतिशयौ परस्परग्रहणाधीनौ । तथा हीक्षुयष्टेर्वेणुयष्टितो ह्रस्वत्वं पूर्वसंख्यायोगिहस्तपरिमितत्वमनतिशयः वेणुयष्टेस्तु दीर्घत्वातिशयः परसंख्यायोगिहस्तपरिमितत्वम् । तच्चेदं प्रतियोगिनिरूपणाधीननिरूपणम् । न तु प्रतियोग्यधीनोत्पत्तीति न वस्तुधर्मोऽयं परापरापेक्षो भिन्नत्वं च भेदः । स च वस्तु विशेषणं नोत्पत्तौ वस्त्वन्तरमपेक्षते, किं तु स्वनिरूपणे । एवं पितृत्वमपि पितरि व्यवस्थिता जननशक्तिरेव, सा जन्यनिरूपणाधीननिरूपणा, न तु तदधीनोत्पत्तिः । विपश्चितं चैतदस्माभिः *ब्रह्मतत्त्वसमीक्षायाम् । परत्वापरत्वादयस्त्वपेक्षाबुद्धिनिमित्ततया परापेक्षोत्पादा अपि लोकयात्रामुद्वहन्तो न शक्याः प्रत्याख्यातुम् । न चैतावता तदधिकरणं भावो न निरपेक्ष इति सर्वमवदातम् । § 1797

स्यादेतत् । अपेक्षामात्रमेव दीर्घत्वादयो भविष्यन्ति, कृतमेषां वस्तुस्वभावेनेत्यत आह—स्वभावसिद्धौ चासत्यामिति । अपेक्षासामर्थ्यम् अपेक्षाप्रयोजनयोगः । स्वयं वार्त्तिककारो दूषणान्तराण्याह—सर्वथा चायं व्याहत इति । निगदव्याख्यातम् ॥ ४० ॥ § 1798

॥ इति सर्वशून्यतावादप्रकरणम् ॥

## ४.१.११ संख्यैकान्तवादनिराकरणप्रकरणम्

सङ्ख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ ४ । १ । ४१ ॥ § 1800

उत्तरसूत्रावतारपरं भाष्यम् अथेमे संख्यैकान्तवादाः । संख्या एकान्तो
581/tha येषु वादेषु ते तथोक्ताः । अथ शून्यतावादानन्तरं ते परीक्ष्यन्त इत्यर्थः । तत्र प्रथमं ब्रह्माद्वैतवादमुत्थापयति—सर्वमेकम् । कुतः ? सदविशेषात् । इदमस्याकूतम् । न तावदयं नामरूपप्रपञ्चः प्रकाशाद् भिन्नः सन् प्रकाशितुमर्हति जडस्य स्वयंप्रकाशासंभवात् । न च प्रकाशयोगात् प्रकाशत इति युक्तम् । न खल्वान्तरेण प्रकाशेनास्य कश्चिद् योगः संभवति । विषय-

२ मेत्याक्षेपः ] °पेक्षं...रक्तत्वमित्याक्षेपार्थः nvt-C
१४ *] ब्रह्मतत्त्वसमीक्षायाम् *Om* nvt-J
१४ रापेक्षोत्पादा ] °क्षोत्पत्तिका nvt-C

विषयिभावः संबन्ध इति चेत्— न, तत्राकिञ्चित्करस्य विषयित्वासंभवात् । न चार्थे ज्ञानं फलं जनयतीति सांप्रतम्, अतीतानागतयोरर्थयोस्तदसंभवात् । न च न तयोर्विषयभावः । तस्माज् ज्ञानाद् भिन्नस्य नामरूपप्रपञ्चस्य न प्रकाशसंभव इति ज्ञानस्यैवायं विवर्त इति युक्तमुत्पश्यामः । न च प्रकाशात्मनो घटपटादयः । एवोदयव्ययधर्माणः परस्परव्यावृत्ताः सन्तीति सांप्रतम्, तद्व्यावृत्तिग्रहे प्रमाणाभावात् । *सा हि यद् यतो व्यावर्तते तदुभयग्रहे गृह्यते । न च विज्ञानानि विलक्षणानि स्वरूपमात्रावसितानि परस्परवार्त्तानभिज्ञानि ज्ञानान्तरमपि ग्रहीतुमुत्सहन्ते प्रागेव स्वस्माद् व्यवर्तयितुम् । न च निषेध्यनिषेधाधिकरणग्रहणकारणो व्यावृत्तिग्रहः स्वकारणेन समसमयोत्पादो भवितुमर्हति, तादृशोः सव्येतरविषाणवत् कार्यकारणभावाभावात् । न चैकं विज्ञानं क्षणिकं निषेध्यनिषेधाधिकरणे गृहीत्वा पश्चान्निषेधं गृह्णातीति युक्तम् । क्षणिकस्याक्रमस्य क्रमवद्व्यापारायोगात् । न चैकं विज्ञानं निषेध्यनिषेधाधिकरणे गृह्णाति । अथ ज्ञानान्तरं निषेधतीति युक्तं चैत्रगृहीतेऽपि तस्मिन् मैत्रस्य निषेधज्ञानप्रसङ्गात् । न च ज्ञानस्वरूपग्रह एवान्यनिषेधग्रह इति सांप्रतम् । एवं हि स भवेद् यदि स्वरूपतदन्यव्यावृत्त्योरेकत्वं स्यात् । तत्र व्यावृत्तिस्वभावो वा भावो भावस्वभावा वा व्यावृत्तिः ? तत्र पूर्वस्मिन् कल्पे व्यावृत्तेस्तुच्छत्वात् तत्स्वभावा भावास्तुच्छाः स्युः । ततश्च वचोभङ्ग्यन्तरेण शून्यवादप्रसङ्गः । उत्तरस्मिंस्तु कल्पे विधिरूपो भाव एव व्यावृत्तिरिति विधिरूपतया च ते न व्यावर्तन्त इति न व्यावृत्ता भावाः परस्परं परमार्थतः । तदिदमुक्तं—सदविशेषादिति । § 1801

अनाद्यनिर्वचनीयाविद्यानिबन्धनं तु भावानां भेदं न व्यसेधामः । न च ज्ञातुरपि *ज्ञानाद् भेदग्राहकमस्ति प्रमाणम्, उक्तादेव क्रमात् । तस्मान्न ज्ञेयानां परस्परतश्च ज्ञानाच्च भेदः । नापि ज्ञातुर्ज्ञानादस्ति भेदः, 582/tha नापि ज्ञानानामन्योन्यस्य । तस्मात् प्रकाश एव स्वयंप्रकाशः कूटस्थनित्य आनन्दघनोऽनाद्यविद्योपदर्शितविविधविचित्रनामरूपप्रपञ्चो ब्रह्मेत्यद्वैतसिद्धिः । अत्र च श्रुतयो भवन्ति— एकमेवाद्वितीयं ब्रह्म । नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । इत्यादिकाः । § 1802

तदेवमैकान्किकमेकत्वमुपन्यस्य द्वित्यमैकान्तिकमाह—सर्वं द्वेधा । कुतः ? नित्यानित्यभेदात् । न च नित्यानित्याभ्यामन्यो राशिरस्ति यमास्थाय पदार्थास्त्रित्वादिके व्यवतिष्ठेरन्निति । § 1803

मतान्तरमाह—सर्वं त्रेधा । तदेव दर्शयति—ज्ञाता ज्ञेयं ज्ञानमिति । ज्ञप्तिरपि ज्ञायमानत्वाज् ज्ञेयतां नातिपतति इति भावः । § 1804

मतान्तरमाह—सर्वं चतुर्धा । तद् दर्शयति—प्रमाता प्रमाणं प्रमेयं प्रमितिरिति । यदि प्रमितिर्नाम तत्त्वं प्रमाणादिभ्यो भिन्नं नास्थीयते प्रमायाः

६ *] सःnvt-C
७ सितानि] °वस्थितानि°nvt-C
१४ ह] एवास्यnvt-C
१८ भाव] रूपाभावःnvt-J
२२ *] ज्ञानेन्द्रियं ग्रा°nvt-C
२२ उक्तादेव] विशेषात्nvt-C
३० मास्थाय] °माश्रित्यnvt-C
३२ ति] ज्ञेयान्नातिरिच्यतेnvt-C
३४ भिन्नं] नाश्रीयतेnvt-C

प्रधानक्रियाया अभावात् कथं प्रमात्रादयः ? कथं च प्रधानक्रियामन्तरेणैषामेकवाक्यता स्यात्, कारकवैचित्र्यं वा ? प्रमायाश्च फलत्वावस्थाया उपरि प्रमेयव्यपदेशं न वारयामः । न चैतावता तत्त्वान्तरं न भवति । § 1805

एवं यथासंभवमन्येऽपीति प्रकृतिपुरुषाविति वा, पञ्चस्कन्धा इति वा, पशुपाशतदुच्छेदेश्वरा इति वेत्यादयः । § 1806

तत्र परीक्षां संख्यैकान्ततानिराकरणरूपान्तां दर्शयति सूत्रेण—संख्यै...पत्तिभ्याम् ॥ अनवयवेन सर्वम् चेदेकं द्वेधा वा त्रेधा वा चतुर्धा वेति प्रतिज्ञार्थः, ततस्तदतिरिक्तं साधनं वाच्यम् । न हि साध्यमेव साधनं भवति । तथा च साधनस्य तदतिरेकान्न संख्यैकान्तसिद्धिः । न
583/tha च किञ्चिदपि स्वसंवेदनमस्ति ज्ञानप्रदीपादीनामपि परसंवेद्यत्वात् । यथा च ज्ञानातिरिक्ता अप्यर्था विषयास्तथा विज्ञानवादनिराकरणावसरे वक्ष्यते । न च विज्ञानादर्थस्य भेदोऽशक्यग्रहः । तथा हीदं नीलमुपलभ इत्यनहङ्कारास्पदमसातादिरूपं च नीलं प्रत्यात्मम् अनुभवगोचरः । एवं नीलादीनामपि परस्परम् । अन्यथा पटमानयेति देशितो नयने निमील्य शयीत, शयीथा इति वा चोदितस्तोयमाहरेत् । कस्यचित् कुतश्चित् कथञ्चिद् विवेकाभावात् । न चानिर्वचनीयानाद्यविद्यानिबन्धनोऽयं सर्वो भेदव्यवहार इति सांप्रतम् । अनिर्वचनीयख्यातेः पूर्वमेवापाकृतत्वात् । तस्मात् सर्वजनसंवेदनसिद्धोऽयं भेदप्रत्ययो न कारणमुखनिरीक्षणेन युक्तो निराकर्तुम् । अपि तु स्पष्टदृष्टात् कार्याद् भेदप्रत्ययलक्षणात् कार्यात् तादृशं तत्कारणं कल्पनीयम्, यादृशेन कारणेन प्रपञ्चप्रत्ययोऽप्रत्यूहमुत्पत्तुमर्हति । तच्च प्रत्यक्षमेव । तथा हि तन्नीलं परिच्छिन्दत्पीतादिभ्योऽस्य भेदं परिच्छिनत्ति संयुक्तविशेषणतालक्षणादिन्द्रियार्थसन्निकर्षात् । नीलं हि नीलमित्यनुभवन् *अयं प्रमाता पीतादिकं च पीतादिकमित्यनुभवन् वा स्मरन् वा शक्नोति निषेध्यनिषेधाधिकरणतया समाकलयितुं रूपमात्रेणागृहीतपरस्परभेदमपि । न हि तन्न भेदेन प्रथत इत्यभेदेन प्रथेत । येनानयोर्नीलपीतयोर्गृहीतस्वरूपयोरवध्यवधिमद्भावो न स्यात् । तथा च तौ गृहीत्वा प्रत्यक्षेण शक्योऽनयोर्भेदो ग्रहीतुमित्यसांप्रतमेतत् ।

अन्योन्यसंश्रयाद् भेदो न प्रमान्तरसाधनः ।
*नास्मिन्निदं नायमयमिति भेदं विना न धीः ॥§ 1809

इत्येतेन प्रमातुरपि प्रमाया भेदो व्याख्यातः । प्रमातारस्त्वनेकविधसुखदुःखोपभोगव्यवस्थानाद् बधिरान्धकाणादिकोविदजाल्मसंसारिमुक्तविभागोपपत्तेश्च भेदवन्तोऽनुमीयन्ते एकस्मिन्नपर्यायेण विरुद्धधर्मसंसर्गासंभ-

११ च ] °क्तोऽप्यर्थो विषयः nvt-C
११ रे ] निरासाव° nvt-C
१५ यीथा ] इति देशिते तोयम् nvt-C
१७ ख्यातेः ] °वनिराकृ° nvt-C
२० ति ] °त्यूहमुत्पद्येत nvt-C
२३ * ] अयं प्रमाता nvt-J
२६ योर्भेदो ] शक्तस्तयोर्भेदं nvt-J
२९ * ] नास्मि° nvt-J
२९ मिति ] भेदाद् nvt-J

वात् । कल्पनया कथंचित् संभाव्यमानोऽप्ययं गोमयपायसीयन्यायमावहति । तदेवं प्रत्यक्षादिविरोधादनुत्पन्नार्थाः श्रुतयः § 1810

584/tha

एकमेवाद्वितीयम् § 1811

इत्याद्याः प्रथमां वृत्तिमतिलङ्घ्य जघन्यामालम्बन्ते § 1812

यजमानः प्रस्तरः § 1813

आदित्यो वै यूपः § 1814

इत्यादिवत् । यदाह भगवान् जैमिनिः गुणवादस्त्विति । तत्सिद्धिरिति चेति । तस्मात् नाद्वैतमिति ॥ ४१ ॥ § 1815

न कारणावयवभावात् ॥ ४ । १ । ४२ ॥ § 1816

साध्यात्साधनस्य भेदेन च संख्यान्तरैकान्ता अप्यपाकृतार्था इत्युक्तम् । अत्र पूर्वपक्षवाद्याह—न का...भावात् ॥ तद् व्याचष्टे—कारणस्य साध्यावयवभावात् । एकस्य वा द्वयादीनां वा कश्चिदेकदेशः साधनम् । तथा च न संख्यान्तरं न च साधनभाव इत्यर्थः ॥ ४२ ॥ § 1817

निरवयवत्वादहेतुः ॥ ४ । १ । ४३ ॥ § 1818

निराकरोति—निरवयवत्वादहेतुः ॥ अवयवभावादिति यदि साध्यस्य कश्चिदवयवो भवेत्, न संख्यैकान्तः स्यादिति सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किंचिदपवृज्यते व्यावर्तते यतस्तत्साधनं न स्यादित्यर्थः । अथ कस्मात् न साध्यमेव हेतुरित्यत आह—आत्मनि चेति । चो हेतौ । अपि चैते संख्यैकान्ताः प्रत्यक्षादिप्रमाणविरोधान्मिथ्यावादा इत्याह—ते खल्विमे संख्यैकान्ता इति । खलुशब्दः समुच्चये वक्रकोटरशिरःपाण्यादिविशेषकारितो योऽर्थभेदः स्थाणुपुरुषादिः तत्प्रत्याख्यानेनेत्यर्थः । अथ विशेषकारितार्थभेदाभ्यनुज्ञानेन वर्तन्ते तथाप्येकान्तत्वं जहति एकत्वादिसंख्याया अनैकान्तिकत्वमित्यर्थः । अथ सामान्यकारित इति संख्यामात्रमङ्गीक्रियते न पुनरस्या ऐकान्तिकत्वमित्यर्थः । तदस्माकमभिमतमेवेत्याह—तथापि न 585/tha
किंचिद् बाध्यत इति । ये त्वाहुः सत्तासामान्यमेव तत्त्वं भेदास्तु काल्पनिका इति, तान् प्रत्याह—न च भेदमन्तरेणेति । यथाहुः § 1819

निर्विशेषं न सामान्यं भवेच्छशविषाणवत् इति । § 1820

स्यादेतत् । प्रेत्यभावपरीक्षायां क एषामवसरो यदेते एकान्तवादाः परीक्ष्यन्त इत्य आह—त इति । अद्वैतादिष्वेकान्तेषु प्रेत्यभावो न तात्त्विको भवेदपि तु काल्पनिकः । न केवलं प्रेत्यभावोऽपि तु षोडशापि पदार्थाः ।

---

१० रैकान्ता ] अप्यपहृतार्थाnvt-C हेतुःnvt-J
१७ नं ] न*Om*nvt-J
१८ अथ ] कस्मात् साध्यमेव न

तस्मादेतेषां यत्तत्त्वज्ञानं तस्य प्रविवेकार्थं ज्ञेयप्रविवेकेन ज्ञानप्रविवेक इति तदर्थमेते परीक्षिता इति ॥ ४३ ॥ § 1821

॥ संख्यैकान्तवादनिराकरणप्रकरणम् ॥

## ४.१.१२ फलपरीक्षाप्रकरणम्

**सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४ । १ । ४४ ॥**
§ 1823

तदनेन प्रबन्धेन प्रेत्यभावः परीक्षितः । अथोद्देशक्रमानुरोधात् फलमिदानीं परीक्ष्यते । तत्राग्निहोत्रादीनां फलमनन्तरभावि वा कालान्तरे वेति संशयः । एतदुक्तं भवति । कर्मानन्तरं दुःखं च लोकपङ्क्त्यादि चोपलभ्यते । प्रशंसन्ति हि लौकिका धार्मिकोऽयं साधुतम इति, तत् किमेतावदेवास्य फलमस्तु अथामुष्मिकं स्वर्गादीति ? किं प्राप्तं स्वर्गादिफलत्वे कर्मणः स्वरूपेणाकारणत्वात् चिरनिवृत्ते तस्मिंस्तदुत्पत्तेः अपूर्वकल्पनायां च प्रधानाङ्गापूर्वाणि भूयांसि कल्पनीयानि । न च तान्यप्युत्पन्नमात्राणि जनयन्ति फलमिति तत्सहकार्यन्तराणि कल्पनीयानीत्यदृष्टकल्पनागौरवात् तदनन्तरदृष्टफलाबाधनाच्च नामुष्मिकं फलं स्वर्गादि, अपि त्वनन्तरदृश्यमानमेव । तत्रापि दुःखफलत्वे उपदेशत्वव्याघाताल्लोकपङ्क्तिलाभख्यात्यादिकमेव फलम्, तच्च सुखहेतुतया कथञ्चित् स्वर्गादिपदेनोच्यते । दृष्टो हि सुखहेतौ स्वर्गप-
586/tha दप्रयोगो लोके । यथा चन्दनं स्वर्गः सूक्ष्माणि वासांसि स्वर्ग इति प्राप्तम् । एवं प्राप्ते ब्रूमः स्वर्गपदस्य तावदर्थवादतः,

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥§ 1826

इति सुखं प्रति वाचकत्वमवधारितम् । न च तद्वाचकत्वेनैव चन्दनादौ तत्प्रयोगोपपत्तावनेकार्थत्वकल्पना युक्ता । यदाहुरन्यायश्चानेकार्थत्वमिति । तस्मान्मुख्योऽयं स्वर्गशब्द उक्तभेदे सुखे । तथा च स्वर्गकाम इत्यत्र मुख्यार्थसंभवे नोपचरितार्थता युक्ता । न चानेकादृष्टकल्पनाभयात् मुख्यार्थपरित्यागो न्याय्यः, प्रमाणसिद्धे नियोगपर्यनुयोगानुपपत्तेः । यथाहुः
§ 1827

श्रुतसिद्ध्यर्थमश्रुतोपलब्धौ यत्नवता भवितव्यम्, न तु श्रुतशैथिल्यमादरणीयमिति । तथा § 1828

प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि ।§ 1829

५ च ] °पङ्क्त्यादि°nvt-C
१२ व्याघाताल्लोक ] पङ्क्ति°nvt-C
१७ च ] सुखं स्वर्गप°nvt-J

न चानन्तरदृश्यमानं लोकपक्त्यादि होमाद्यनुष्ठानफलम्, अपि तु तदुपलम्भफलम् । अदाम्भिकानां प्रच्छन्नमनुतिष्ठतामपि लोकपक्त्यादेरभावात् । तस्मात् सुष्ठूक्तं—न सद्यः कालान्तरोपभोग्यत्वात् इति ॥ ४४ ॥ § 1830

न सद्यः कालान्तरोपभोग्यत्वात् ॥ ४ । १ । ४५ ॥ § 1831

वार्त्तिकं—सद्यस्तापादिफलेति । अतद्गुणसंविज्ञानोऽयं बहुव्रीहिस्तापादीति । तेन लोकपक्त्यादिकमवरुध्यते । स्वर्गः फलं श्रूयत इत्ययुक्तम् । स्वर्गकाम इति स्वर्गस्य पुरुषविशेषणत्वेन श्रवणादसाध्यत्वात् । अत आह—देशितया च क्रिययेति । आप्तोपदेशः खल्वयमुपदेश्यस्य कर्मणोऽभिमतोपायतामाह । तत्र कर्मणोऽभिमतापेक्षायां पुरुषविशेषणस्याप्यपेक्षितत्वात् साध्यत्वमिति सिद्धम् । एवं हि लोकपक्त्यादिरग्निहोत्राद्यनुष्ठानसाध्यो भवेद् यदि तत्कामस्य स्वर्गकामस्येवाग्निहोत्राद्यनुष्ठानं देश्येत । न चैतदस्तीत्यत आह—न 587/tha च तापादिकाम इति । लोकपक्त्यादिकाम इत्यर्थः । शेषमतिरोहितार्थम् ॥ ४५ ॥ § 1832

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४ । १ । ४६ ॥ § 1833

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात् ॥ ४ । १ । ४७ ॥ § 1834

भाष्यम्—तथा प्रवृत्त्या संस्कारो धर्माधर्मलक्षणो जन्यत इति । नैष पुरुषसंस्कारः स्नानादिजन्य इव बोद्धव्यः, अपि तु पुरुषधर्मतामात्रेण संस्कार इत्युच्यते । परमार्थतस्त्वयं धर्मः पुरुषाश्रयोऽपि कर्मणा फले जनयितव्ये तस्यावान्तरव्यापार इति ॥ ४७ ॥ § 1835

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥ ४ । १ । ४८ ॥ § 1836

इदमिदानीं चिन्त्यते किमेतत् फलमुत्पत्तेः प्राक् असद् वा सद् वा सदसद वा अनुभयं वेति । अत्र समस्तपक्षाक्षेपेण फलाभावमभिधित्सुः पूर्वपक्षयति । तदिदं फलं निष्पत्तेः प्राक् । नास...र्म्यात् ॥ नासन्न सन्न सदसत् नाप्यनुमयं सदसत् कस्मान्न भवतीत्यत आह—सदसतोर्वैधर्म्यात् परस्परविरुद्धधर्मत्वात् । धर्मः स्वभावः स्वभावविरोधादित्यर्थः । अथानुभयं कस्मान्न भवतीति । अत आह—नाप्युभयविपरीतमिति ॥ ४८ ॥ § 1837

उत्पादव्ययदर्शनात् ॥ ४ । १ । ४९ ॥ § 1838

---

६ ते ] °दिकमुच्यतेnvt-C
११ इति ] ४७ तमसूत्रीयष्टीकाभागः ४४तमसूत्रीयटीकायां न सद्यः कालान्तरोपभोग्यत्वादित्यतः परम्, वार्त्तिकं सद्यस्तापादिफलेत्यतः पूर्वं मातृकासु प्रक्षिप्तम् । तत्तु न सम्यक् । अनवसिते ४४तमसूत्रटीकाभागे ४७तमसूत्रटीकासन्निवेशस्यानौचित्यात् ।

588/tha

सिद्धान्त्याह—प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा । ननु नासदुत्पद्यते न सन् निरुध्यत इत्याचक्षते सांख्याः । तत्कथमेतदित्य आह—उत्पादव्ययदर्शनात् ॥ यथा नित्यस्वरूपायाश्चितिशक्तेर्नोत्पादो न च व्यय एवं फलस्यापि नित्यस्य तौ न स्यातामित्यर्थः । न हि सत्पक्ष इति सत्कार्यपक्ष इत्यर्थः । न किञ्चिज्ज्ञायत इति । न प्रतिज्ञादिवाक्यात् किञ्चित् तत्त्वज्ञानं संभवति । किञ्चिच्च सन्देहादि न विनश्यति इति अज्ञानतिरोभावः संशयविपर्ययतिरोभावः । कारणस्य हि प्रधानस्य स्वलक्षणं महान् । लक्ष्यते हि महता प्रधानमिति । एवं तस्याप्यहङ्कारः तस्य पुष्टिः स्थूलतेत्यर्थः । पश्चाद् भवतीति केवलकारणावस्थायाः पश्चादिति ॥ ४९ ॥ § 1839

## बुद्धिसिद्धं तु तदसत् ॥ ४ । १ । ५० ॥ § 1840

यच्चोक्तम् उपादाननियमादिति तदयं यदि पुरुषस्योपादाननियमः *पटार्थी तन्तूनेवोपादत्ते न वीरणम् । कटार्थी च वीरणमिति, *ततः तदुपादानानां तत्र तत्र कार्ये सामर्थ्यपरिज्ञानात् । तच्च सामर्थ्यमानुमानिकम् । तदिदमुच्यते—बुद्धिसिद्धं तु तदसत् ॥ इति । तदसद्भावि कार्यमनेनैव कारणेन जन्यते, नान्येनेत्यनुमानाद् बुद्धिसिद्धमेवेत्यर्थः । अथासत्कार्यपक्षे तन्तव एव पटस्योपादानं न वीरणादीत्ययं नियमो न स्यात् इति ब्रूषे तदयुक्तम् । असत्त्वाविशेषेऽपि स्वकारणादुत्पन्नं किञ्चिदेव किञ्चित्कार्यं जनयितुं समर्थं नान्यदित्ययं स्वभावविशेषादुपपत्स्यते इति । अपि च सत्कार्यपक्षे प्रधानोपादानत्वाद् विश्वस्य तस्य चाभेदात् कारणात्मकत्वाच्च कार्यजातस्य सर्वं सर्वात्मकमितीदमिह नेदमिदमिदानीं नेदमिदमेवं नेदमिति नियमो न
589/tha स्यात्, कस्यचित् कदाचित् कुतश्चिद् विवेकहेतोरभावात् । तस्मादस्ति रासभेऽपि विषाणमित्यत्र तस्यासत्त्वं ब्रुवाणः स्वसिद्धान्तं बाधत इत्याह—असत्त्वाच्च खरविषाणं नोत्पद्यत इति ब्रुवाणः इति । सत्त्वे चासत्त्वे च समाने यस्य *कारणमस्ति तदुत्पद्यते इति समानत्वं गुडजिह्विका । परमार्थतस्त्वसत्त्वे कारणसामर्थ्यनियमादुत्पत्तिनियमः कल्पते, सर्वात्मना सर्वस्य सत्त्वे तु न नियमहेतुरस्तीति उक्तप्रायम् । देशयति—अथासत्कार्ये किं प्रमाण् ? न ह्यनुमानमस्मिन्नर्थे प्रमाणं भवितुमर्हति, आश्रयासिद्धेः । नापि प्रत्यक्षम्,

---

१ द्धा ] न्यायभाष्यnvt-J*uses*निष्पत्ति*for*उत्पत्ति*here. But the Ṭīkā*nvt-J*uses*उत्पत्ति°
२ त ] विनश्यतिnvt-J
५ न ] आदि*Om*nvt-C
५ ति ] जायतेnvt-J
११ *] पदार्थान् nvt-C, पटार्थी nvt-Cnvt-V
१२ टार्थी ] वीरणकटार्थोnvt-C
१२ *] तत्र उपा°nvt-J
१६ न ] वीरणानीत्य°nvt-J
१८ ते ] °दुपपद्यत°nvt-C
२१ स्यात् ] °मितीदं नेदमिदानीं नेद°nvt-C
२२ त्र ] मिति । तत्रnvt-C
२४ *] कारणत्वम°nvt-C
२४ इति ] समानत्वंnvt-J

तेनाप्यसतः स्वातन्त्र्येणानिरूपणादिति भावः । विदिताभिप्राय उत्तरमाह—*न सत्त्वे न चासत्त्वेऽनुमानमस्ति । यथास्माकमाश्रयासिद्धिदोषादसत्त्वे कार्यस्य नानुमानम्, एवं भवतामपि कार्यस्य सत्त्वे नानुमानमाश्रयासिद्धेरेव । कुतस्तर्ह्यनुमानमित्यत आह—धर्मिण्यविप्रतिपत्तेः अनुमानमस्तीति योजना । तथा सत्याश्रयोऽस्य सिध्यतीत्यर्थः । पुनः पृच्छति—क्वेति । यदि धर्मिण्यविप्रतिपत्तिः, क्व तर्हि विवादः ? उत्तर—यदुभयेति । धर्म्यधिकरणान् सत्कार्यवादिनामेव अवान्तरविवादान् विभजते—तान् प्रतीति । तन्तुमात्रं पट इति । तन्तुभ्योऽभिन्न इत्यर्थः । कार्यात्मनेति कार्यं कारणाद्भिन्नाभिन्नमित्यर्थः । § 1841

असत्कार्यपक्षस्तु स्वाभिमतः स्फुटत्वादवान्तरप्रतिबन्धभावाच्च नोपन्यस्तः । उपपादित इति द्वितीयेऽध्याये । प्रागुपलब्धिकालादिति । कारणव्यापारात् प्रागित्यर्थः । संस्थानविशेषशून्यतामात्रविवक्षया तुर्यादिदृष्टान्तो न तु प्रागभावोऽत्र विवक्षितः । शक्तिविशेषावस्थिता इति । कारणव्यापारात् प्रागिति शेषः । अत्र सिद्धसाधनं वयमपि ब्रूमहे । स्वव्यापारात् पटोत्पत्तिनिमित्तात् प्राक् तन्तवः शक्तिविशेषावस्थिता एवेति परेषां सत्कार्यसाधनमुपनयस्यति—विद्यमानाभिव्यक्त्यर्थास्तन्तवस्तदर्थिना नियमेनोपादानात् खनित्रादिवत् । यथा हि खनित्रं विद्यमानमेवोदकं मृदपनयनेन व्यनक्तीति । तदेतद् दूषयति विद्यमानस्या भिव्यक्तिरसतीति व्यक्तिवत् कार्येऽपि प्रसङ्गः । 590/tha यथा व्यक्तेरसत्या एवोत्पादस्तथा कार्यस्याप्यसत एवोत्पाद इत्यर्थः । खनित्रादिवदिति च दृष्टान्तः साध्यविकल इत्याह—यदपीति । साऽप्राप्तिः कुतो भवतीति वक्तव्यमिति । प्राप्तिः खलु संयोगः । स च गुणः । गुणश्च द्रव्यविनाशाद् विनश्येद् विरोधिगुणान्तरोपादानाद् वा । तत्र तावदावरणद्रव्यम् आव्रियमाणं वोदकं न विनष्टम्, येन तयोः संयोगो विनश्येत् । ततस्तद्विरोधिगुणान्तरोत्पादो वक्तव्यः । स एव च संयोगविरोधी गुणो विभाग इत्युच्यत इत्यर्थः । प्राप्तेरभावोऽप्राप्तिरिति पक्षं दूषयित्वा पर्युदासपक्षमाशङ्क्य दूषयति—अथ प्राप्तेरिति । पुनः शङ्कते—अथ भिन्नदेशोत्पत्तिमिति । न वयं संयोगं विभागम् वा गुणमुपेमः, किं तु भिन्नदेशोत्पन्न एव द्रव्ये विभागो निरन्तरोत्पन्न एव संयोग इत्यर्थः । निराकरोति—भिन्नदेश इम इति । विशेषणोपादानान्न भिन्नदेशोत्पत्तिर्विभागः । कस्मात् ? उत्पन्ने उत्पन्नमिति भिन्नदेशतया भिन्नमिति विशेषणं हि स्वानुरक्तं प्रत्ययं विशेष्ये जनयति, न त्वन्यानुरक्तम् । न खलु नीलं विशेषणमुत्पले रक्तप्रत्ययं जनयत्यभ्रान्तस्येत्यर्थः । अपि च क्षणभङ्गं भावानां व्यासेदद्भिरस्माभिर्भिन्नदेशोत्पत्तेः प्रतिषेधान्न भिन्नदेशोत्पत्तिर्विभागः । § 1842

१ *] नासत्त्वे न सत्त्वे°nvt-C
३ पि] भावेऽपिnvt-C
३ यासिद्धेरेव] °द्धत्वादेवnvt-J
७ वादिनामेव] अवान्तरवि°nvt-J
१० भावाच्च] °प्रतिपत्त्य°nvt-J
११ ब्धिकालादिति] °कारणादितिnvt-C
१५ स्थिता] °वच्छिन्नाnvt-C
२२ रोपादानाद्] °न्तराद् वा nvt-C

शङ्कते—क्षणिकत्वाद् विभागस्येति । उत्पद्य हीन्द्रियसन्निकर्षाद् विभागेन स्वविषयं ज्ञानं जनयितव्यम् । न चैतावन्तं कालमसावस्ति, क्षणिकत्वेनोत्पन्नापवर्गित्वादित्यर्थः । निराकरोति—न सामान्याभिव्यक्तीति । एतद् विभजते— पूर्वं तावदुत्पन्नो विभागः सामान्यं व्यनक्तीति । स्वकारणसमवायः सत्तासमवायो वोत्पत्तिः । तद्विशिष्ट उत्पन्न इत्युच्यते । येषां सामान्यग्रहपुरःसरं विशेषज्ञानं, तन्मते न सामान्यं व्यनक्ति, तदुत्तरकालं च स्वप्रत्ययं जनयतीत्युक्तम् । एतदुक्तं भवति, न वयं बौद्धा इव पूर्वापरभागविकलकालकलामात्रावस्थितिलक्षणां क्षणिकतां विभागादीनामाचक्ष्महे, किं त्वाशुतरविनाशलक्षणाम् । सा च द्वित्रादिक्षणस्थायिनी चिरस्थायिभ्यो घटादिभ्यो व्यावृत्ता शक्या वक्तुमिति ॥ ५० ॥ § 1843
591/tha

आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतुः ॥ ४ । १ । ५१ ॥ § 1844

देहाद्यतिरिक्तमात्मानं नित्यं परलोकिनमसन्तं मन्यमान आह— आश्रय... अहेतुः ॥ मूलसेकफलोत्पादयोरेकवृक्षाश्रयत्वम् । कर्मणस्तु होमादेराश्रयः शरीरम् । न चामुष्मिकस्य स्वर्गादेस्तच्छरीरमाश्रयः, तस्मिन्नष्टेऽस्य भावात् । तस्मादाश्रयव्यतिरेकात् स्वर्गादेर्वृक्षफलोत्पत्तिवदित्ययं दृष्टान्तः स्वर्गफलत्वे होमस्याहेतुरित्यर्थः ॥ ५१ ॥ § 1845

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ४ । १ । ५२ ॥ § 1846

अस्त्यात्मा सर्वोपभोगसमर्थः शरीरादिव्यतिरिक्तः कर्तेत्युपपादितमित्याशयवान् आह—प्रीते...षेधः ॥ ५२ ॥ § 1847

न पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥ ४ । १ । ५३ ॥ § 1848

अस्तु स्वर्गाद्यात्माश्रयम्, तथाप्यव्यापको हेतुः पुत्रादिफलेभ्यो निवृत्तेरिति देशयति—न पुत्र...निर्देशात् ॥ ५३ ॥ § 1849

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ ४ । १ । ५४ ॥ § 1850

परिहरति—तत्संबन्धात्...पचारः ॥ स्वर्गोऽपि तावत् स्वर्गतया न काम्यते, किं तु भोग्यतया । एवं सति कैव कथा पुत्रादिषु । तेऽपि भोग्यतयैव काम्यन्ते । न च तत्स्वरूपम् भोग्यमिति तत्साध्यं सुखं भोग्यम्

७ इव ] पूर्वापरकालमात्रा° **nvt-C**
९ स्थायिनी ] °स्थायिनां **nvt-C**
१० व्यावृत्ता ] व्यावृत्तात्मा **nvt-C**
१७ यं ] अदृष्टान्तः**nvt-J**
१९ अस्त्यात्मा ] स्वर्गोप°**nvt-C**
२९ न ] न तु स्वरूपं**nvt-C**

। तस्मात् पुत्रादिसंबन्धात् तदुत्पत्तेः सुखोत्पत्तेः तेषु फलेषु यथा फलशब्द- 592/tha
प्रयोगस्तथा तेषु पुत्रादिष्वित्यर्थः । सूत्रार्थकथनेनैव भाष्यवार्त्तिके व्याख्याते ॥ ५४ ॥ § 1851

॥ इति फलपरीक्षाप्रकरणम् ॥

## ४.१.१३ दुःखपरीक्षाप्रकरणम्

### विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ४ । १ । ५५ ॥

§ 1853

फलानन्तरं दुःखं परीक्षणीयम् । तत्रयं परीक्षा । भवतु दुःखं बाधनालक्षणमनुभूयमानम् । यत् पुनरिदं सुखं प्रत्यात्ममनुकूलवेदनीयम्, तत्कथं दुःखम्, अनुभवविरोधात् । शरीरेन्द्रियविषयबुद्धयश्च यदि दुःखहेतुतया दुःखं, कस्मात् सुखहेतुतया सुखमेव न भवन्ति ? सेयमतिभीरुता सकललोकयात्राविरोधिनी । यथाहुः न हि मृगाः सन्तीति शालयो नोप्यन्ते । न च भिक्षवः सन्तीति स्थाल्यो नाधिश्रीयन्त इति । तस्मान् मांसार्थीव कण्टकानुद्धृत्य मांसमश्नन्नानर्थं कण्टकजन्यमाप्नोतीति, एवं प्रेक्षावान् दुःखमुद्धृत्येन्द्रियादिसाधनं सुखं भोक्ष्यते । सन्ति च त्रिविधदुःखपरिवर्जनहेतवो दृष्टाः परिदृष्टसामर्थ्या अन्वयव्यतिरेकाभ्यामित्यभिप्रायवान् पूर्वपक्षी गुडजिह्विकया संशयान इव पृच्छति—तत् किमिदमिति ? सिद्धान्तिन उत्तरम्—अन्य इत्याह सूत्रकार इति । तेनैवाभिप्रायेण पूर्वपक्षी पृच्छति—कथम् ? उत्तरं—न वै सर्वलोकसाक्षिकमिति । अयं तु दुःखभावनोपदेशः किमर्थमित्यत आह भाष्यकारः—दुःखहानार्थः । किं भूतस्य *दुःखभावनमित्यत आह—जन्ममरणप्रबन्धस्य अनुभवः प्राप्तिः । तन्निमित्ताद् दुःखोपदेशपरिशीलनेन निर्विण्णस्यालंप्रत्ययवतः, अत एव दुःखं जिहासत इति योजनीयम् । स्वाभिप्रायेण पूर्वपक्षी पृच्छति—कया युक्त्या ? उत्तरम्—
सर्वे खलु सत्त्वनिकाया इति । *उपपत्तिः सुखदुःखहेतुभूता विषयसम्पत्तिः 593/tha
तस्याः स्थानानि भुवनानि । आ सत्यलोकादा चावीचेरिति । एतदुक्तं भवति, यदि दुःखवर्जनेन शक्येत सुखमादातुम्, ततस्तादृशं सुखमनुकूलवेदनीयं कः प्रज्ञावान् प्रजह्यात् ? न तु तादृशमस्ति सुखं क्वचिदपि, सर्वस्य तस्य दुःखाविनाभाविनः केवलस्योपादानाशक्यत्वात् । न हि मधुविषसंपृक्तमन्नं विषमपनीय शक्यं मधुमात्रयुतमुपादातुमिति । तस्मान्नेदं सुखस्य प्रत्याख्यानमपि तु सुख एव दुःख संज्ञाभावनमुपदिश्यते ऋषिणा । अत्र हेतुरुपादीयते—विविध...त्पत्तिः ॥ जन्मन उत्पत्तिर्जन्मोत्पत्तिः । सा दुःखमेव भावयितव्या विविधबाधनायोगादिति ॥ ५५ ॥ § 1854

३ म् ] दुःखपरीक्षणम्nvt-C
१५ * ] दुःखहानमि°nvt-C
१९ * ] उत्पत्तिःnvt-C
२५ ते ] ऋषिणाnvt-J
२६ ते ] °ते ऋषिणाnvt-C

न सुखस्याप्यन्तरालनिष्पत्तेः ॥ ४ । १ । ५६ ॥ § 1855

कस्मात् पुनर्दुःखमेव स्वरूपतो न भवतीत्यत आह—न सुखस्याप्यन्तरालनिष्पत्तेः ॥ न खल्वयं दुःखोद्देशो दुःखस्य कथनम्, सुखस्य प्रत्याख्यानम् ॥ ५६ ॥ § 1856

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ॥ ४ । १ । ५७ ॥ § 1857

इतश्च दुःखसंज्ञाभावनम् न तु सुखस्य प्रतिषेधो दुःखोद्देशेनेत्याह—बाधना… अप्रतिषेधः ॥ यस्मादिदं मे सुखसाधनमिति वेदयन् प्रार्थयते सुखसाधनम्, तच्चोक्ताद् बहुप्रकाराद् दोषाद् बाधनाहेतुरिति दुःखभावनोपदेशनमिति । कामं काम्यं कामयमानस्य यदा कामः समृध्यति संपन्नो भवति, अथानन्तरमेनं पुरुषमपरः काम इच्छा क्षिप्रं प्रबाधते स्वर्गादिप्राप्तावपि स्वाराज्यादि कामयते । एवं तत्प्राप्तौ प्राजापत्यादीति । अस्येच्छा तदुपाय-
594/tha प्रार्थनादिना दुःखेन प्रबाधत इत्यर्थः । समन्ताद् उदनेमि यथा भवति तथा भूमिं लभत इति योजना ॥ ५७ ॥ § 1858

दुःखविकल्पे सुखाभिमानाच्च ॥ ४ । १ । ५८ ॥ § 1859

नन्वयं यद्यप्यन्तराले सुखान्यनुभवति, तथापि तत्तद्दुःखसंभेदमाकलयन् अनुपदिष्टोऽपि स्वयमेव निर्वेत्स्यते कृतमस्य दुःखभावनोपदेशेनेत्यत आह—दुःखवि…भिमानाच्च ॥ शास्त्रशिष्टानां विवेकिनां खलु विविधबाधनानुषङ्गाद् अनवयवेन सुखमात्रं दुःखमेवेति विनिश्चयः । अक्षिपत्रकल्पा हि ते । तद् यथेषीकतूलसंपर्कादप्यक्षिपत्रं दूयते, न तु गात्रावयवान्तराणि, तथा मृदुचित्ततया विवेकिनो दूयन्ते । अविवेकिनस्तु प्रणयकलहकुपितकुरङ्गशावलोचनाङ्गनालक्तकरसार्द्रपादपल्लवपातमपि शिरसि रहसि सुखमभिमन्यमाना घनपुलककञ्चुकाञ्चिततनवः सान्द्रानन्दाश्रुप्लवननयना निवृण्वन्तीति तान् प्रत्ययमुपदेशोऽर्थवानित्यर्थः । जायस्व म्रियस्व चेति संधावतीति । पुनः पुनर्जायते पुनः पुनर्म्रियते, जनित्वा म्रियते, मृत्वा जायते । तदिदं संधावनव्यापारप्रचय इत्यर्थः । § 1860

चोदयति—यद्येवं कस्माद् दुःखं जन्मेति नोच्यत इति । यदि दुःखभावनोपदेशो जन्मनि, एवं सत्येवकारः किमर्थ इत्यर्थः । परिहरति—जन्मविनिग्रहार्थीय इति । जन्मविनिग्रहो जन्मनिवृत्तिः स एवार्थः । तत्र प्रवर्तत इति जन्मविनिग्रहार्थीयः । यथा च मत्वर्थीय इति । एतदुक्तं भवति जन्म दुःखमेवेति भावयितव्यम् । नात्र मनागपि सुखबुद्धिः कर्तव्या । *अनेकानर्थपरम्परापातेनापवर्गप्रत्यूहप्रसङ्गादिति ॥ ५८ ॥ § 1861

॥ दुःखपरीक्षाप्रकरणम् ॥

---

१७ मेव ] निवर्त्स्यति° nvt-C
२० त्रं ] °पात्रं nvt-J
३२ *] परम्परायामप° nvt-C

## ४.१.१४ अपवर्गपरीक्षाप्रकारणम्

595/tha

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ४ । १ । ५९ ॥ § 1863

दुःखोद्देशानन्तरमपवर्गः उद्दिष्टो लक्षितश्चेति शेषः । स प्रत्याख्यायते— ऋणः.........वर्गाभावः ॥ तद् व्याचष्टे भाष्यकारः । ऋणानुबन्धादिति । अस्ति हि

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोहेन मोक्षमिच्छन् व्रजत्यधः ॥§ 1866

तत्र ऋणत्रयापाकरणेनैव वयःसमाप्तेर्मोक्षनिवेशक्षणो नास्तीत्यपवर्गाभाव इत्यर्थः । क्लेशानुबन्धान्नास्त्यपवर्गः । नानुच्छिन्ननिदानः संसारः शक्य उच्छेत्तुमित्यर्थः । प्रवृत्त्यनुबन्धादित्यस्यापीयमेव व्याख्या ॥ ५९ ॥ § 1867

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ ४ । १ । ६० ॥ § 1868

एवं पूर्वपक्षयित्वा सिद्धान्तमुपक्रमते—अत्राभिधीयते यत् तावद् ऋणानुबन्धादिति । जायमान इत्यस्य प्रधानार्थतानुपपत्त्या गुणशब्दत्वं साधयितुं दृष्टान्तलाभाय ऋणशब्दस्य प्रथमं गुणशब्दत्वमाह—प्रधानशब्दानुपपत्तेरिति । प्रधा...पपत्तेः ॥ तद् व्याचष्टे—ऋणैरिति । नायं प्रधानशब्द इति । ऋणवानिव परतन्त्रस्तेषु तेषु कर्मसु नाधिकारीति निन्दा । तदभावे तु स्वतन्त्र इति प्रशंसा । एवं जायमान इति गुण शब्दो न मुख्य इति । कस्मात् पुनर्न मुख्य इत्यत आह—मातृतो *जातमात्रस्य बालकस्यानधिकारात् । कस्मादनधिकार इत्यत आह—अर्थिनः शक्तस्य चाधिकारात् । कस्मादर्थिन 596/tha
इत्यत आह—कर्मविधौ अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादौ कामसंप्रयोगश्रुतेः । न च बालकः सुखदुःखाप्तिपरिहारकामोऽपि विवेकेन स्वर्गपुत्रपश्वन्नादि कामयत इति । शक्तस्य च प्रवृत्तीति । न ह्यशकनीयमर्थमशक्तं प्रति वेद आप्तोपदेशरूपो विधातुमर्हति । न च बालकः शक्तोऽविद्वत्त्वादिना । अत+एव तिर्यग्देवर्षिपङ्गुशूद्रत्र्यार्षेयाणामनधिकारः सामर्थ्याभावात् । न केवलं वैदिकोऽयमीदृशो व्यवहारोऽपि तु लौकिकोऽपीत्याह—न भिद्यते च लौकिकात् । तद् व्याचष्टे—लौकिकस्तावदिति । उपपन्नानवद्यवादीति । उपपन्नं प्रमाणेन अनवद्यं पुनरुक्तदोषेण अनपेक्षितमुपदेष्टव्यस्य यन्न भवति तदित्यर्थः । न्यायप्राप्तमिममर्थं लिङ्गदर्शनमुपोद्बलयतीत्याह—गार्हस्थ्यलिङ्गं च मन्त्रब्राह्मणं कर्माभिवदतीति । गार्हस्थ्यस्य लिङ्गं पत्नी यस्मिन् कर्मणि

१८ *] जातमात्रस्यैवानधि°nvt-C

तत् तथोक्तम् । पत्न्यवेक्षितमाज्यं भवति पत्न्य उद्गायन्ति क्षौमे वसानावग्नी आदधीयाताम् इत्येवमादि । § 1869

तदनेन गार्हस्थ्यात् पूर्वावस्था तावदृणानुबद्धा न भवतीत्युक्तम् । संप्रत्युत्तरावस्थापि न ऋणानुबद्धेत्याह—यदा चार्थिनोऽधिकारस्तदा अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः । तेन यदुक्तमृणापाकरणेन वयःपर्यवसानान्नास्ति मोक्षे निवेशस्यावसर इति अपाकृतं भवतीति । अविपरिणामपदार्थव्याख्यानं न निवर्तत इति । तुरीयस्येत्यस्य व्याख्यानं चतुर्थस्येति । प्रायेण पञ्चसप्ततौ वत्सरेष्वतिवाहितेषु विषयतृष्णा तनूभवति । अत्यन्तसंयोगे तु जरया ह वा एष इत्यनर्थकम् । मृत्युना वेत्यनेनैव सिद्धेरिति शेषः । यद्युच्यते अशक्ततोपलक्षणपरमेतत् जरया ह वा मृत्युना वेति । तेन कस्यानर्थक्यमित्यत आह—अशक्तो हि विमुच्यत इत्येतदपि नोपपद्यते इति । § 1870

597/tha

वार्त्तिकम्—यावज्जीवसंयोगे हि जरया ह वेत्यनर्थकमिति । मृत्युना ह वेत्यनेनैव गतार्थत्वादित्यनुक्त्वा भाष्योक्ता द्वितीया युक्तिरुक्ता वार्त्तिककृता यस्मात् स्वयमशक्तस्य इत्यनेन । § 1871

यज्ञसाधनत्वादिति । यज्ञकर्तृत्वादित्यर्थ । एतदेव स्फुटयति—यस्माद्यजमानो यज्ञाङ्गं भवति । यथाह भगवान् जैमिनिः पुरुषकर्मार्थत्वात् इति । § 1872

स्यादेतत् । यद्यपि गृहस्थस्य यज्ञादिविधानान्तराणि सन्ति तथापि जायमानस्त्रिभिर्ऋणैरिति वाक्यं बालस्यापि यज्ञादि विधास्यतीत्येतां शङ्कां विमर्शपूर्वमपाकरोति—अथापि विहितं वानूद्येत कामाद् वार्थः परिकल्प्येतेति । न तावत् जायमानो ह वै इति वाक्ये विधिविभक्तिरस्ति । तेन सिद्धान्तानुवादः स्वरसतः प्रतीयते । यदि तु तस्यार्थस्य सिद्धिर्वाक्यान्तराद् वा प्रमाणान्तराद् वा कथमपि न कल्पेत, ततो वचनानि त्वपूर्वत्वात् इति न्यायाद् विधित्वमस्य कल्प्येत । सन्ति तु शतशस्तदर्थविधायकानि वाक्यानि विधिविभक्तिमन्तीति को जातमात्रस्य स्वेच्छामात्रेण विध्यर्थतां कल्पयेत् ? तस्माद् विहितानुवचनमेव न्याय्यमिति जायमानशब्दो जघन्यवृत्तिरिति युक्तमुत्पश्यामः । § 1873

स्यादेतत् । जायमानशब्दोऽनुपचरितार्थः स्वभावतो मातुरुदराद् विभागमाह । स कथंचिदनुवादत्वानुरोधेन जघन्यवृत्तिः कल्पनीयः । तद् वरं मुख्यार्थानुरोधेन विधानमेव कल्प्यताम् । एवं सति श्रुतिरनुरोधिता भवति । अस्ति च बालकस्यापि फलोत्पादनयोग्यता, तदात्मनः फलं प्रति समवायिकारणत्वात् । तेन यद्यपि जातमात्रस्य फलसाधनानुष्ठानयोग्यता नास्ति, तथापि फलोत्पादं प्रति योग्यतास्ति । फलेन च प्रयोजनं न त-

६ सानान्नास्ति ] मोक्षावसरस्तदपाकृतं भवति nvt-C
१७ त्वात् ] जै. सू. ३।१।६
२६ स्य ] जात्वस्यnvt-C
२६ तां ] विधित्वंnvt-C

त्साधनेनेत्यत आह—फलस्य साधनानि हि प्रयत्नविषयो न फलमिति । अयमभिसन्धिः, विधिर्हि स्वव्यापारे कर्तृतया पुरुषं नियुङ्क्ते, प्रयत्नश्चास्य 598/tha व्यापारः स च निर्विषयो न शक्यो निवर्तयितुमिति स्वविषयमपेक्षते । न चास्य साक्षात्फलं विषयो भवितुमर्हति, उद्देश्यतामात्रेण तु भवेत् । न चैतावता प्रयत्नोऽस्य निर्वृणोति यावदयं साक्षादभिनिर्वर्तनीयं न प्राप्नोति । तदुपायश्चास्य साक्षादभिनिर्वर्तनीय इति फलोद्देशप्रवृत्तस्य पुरुषप्रयत्नस्य तदुपायो विषयः । न च बालकस्य तदुपायमविदुषस्तत्र सामर्थ्यमस्ति । असमर्थश्चाकर्ता कथमात्मानं प्रयत्नेन व्याप्नुयात् ? तदव्याप्नुवंश्च कथमधिकारीति जायमानशब्दो जघन्यवृत्तिरेव न्याय्य इति सिद्धम् । विहितं च याजमानमिति ऋणवाक्यात् प्राक्, विधीयते च ऋणवाक्यादूर्ध्वमित्यर्थः ।
§ 1874

यदुक्तं तत्र हि प्रव्रज्या विधीयते इति तदमृष्यमाण आह— प्रत्यक्षविधानाभावादिति चेत् ? शङ्कां निराकरोति—न, प्रतिषेधस्य प्रत्यक्षविधानाभावात् । शङ्कां विभजते—प्रत्यक्षत इति । परमाप्तो भगवानीश्वरोऽनुकम्पया भूतोपदेशाय प्रवृत्तो यद् गार्हस्थ्यमेवाश्रममुपदिशति ततोऽवगच्छामो न सन्त्याश्रमान्तराणि भूतेभ्यो हितानीत्यर्थः । अत एवाहुः ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद् गार्हस्थ्यस्येति निराकरणं विभजते—न प्रतिषेधस्येति । स्मृतीतिहासपुराणानि तावदविवादं विदधति चातुराश्रम्यमुपलभ्यन्ते, यदि तु प्रत्यक्षया श्रुत्या चातुराश्रम्यं निषेध्येत, ततस्तद्विरोधेनौदुम्बरीसर्ववेष्टनवत् तत्राप्रमाणानि स्युः । न च तत्प्रतिषेधः श्रुतेः साक्षादवगम्यते । तस्मात् स्मृत्यादिविहितं चातुराश्रम्यमप्रतिषिद्धं श्रुत्या न शक्यं परित्यक्तुमित्यर्थः ।
§ 1875

न चाविधानेन तत्प्रतिषेधानुमानमित्याह—अधिकाराच्चेति । गार्हस्थ्योपदेशस्याधिकारात्तस्यैव विधानं नाश्रमान्तरस्य, न त्वाश्रमान्तराभावात् । न हि व्याकरणं शब्दं व्युत्पादयत् प्रमाणाद्यभावमाक्षिपति । § 1876
599/tha

अपि च मा भूत् प्रत्यक्षविधानम्, श्रुतौ ससाधनापवर्गाभिधानानि च चातुराश्रम्याभिधानानि च प्रत्यक्षाण्युपलभ्यन्ते वचनानि । तान्यपूर्वत्वाद् विधानानि अपवर्गस्य ससाधनस्य चातुराश्रम्यस्य च भविष्यन्तीत्याह—ऋग्ब्राह्मणं चापवर्गाभिधाय्यभिधीयत इति । मृत्युमिति प्रेत्यभावमित्यर्थः । परं कर्मभ्य इति कर्मपरित्यागमपवर्गसाधनं सूचयति । अमृतत्वमिति चापवर्गो दर्शितः । सूचितं कर्मत्यागमपवर्गसाधनं श्रुत्यन्तरेण विशदयति—न कर्मणा

२ न्धिः ] अभिप्रायःnvt-J
३ यो ] संभवति विषये *for* स च निर्विषयो nvt-C
६ स्य ] °त्नस्य निर्वृणोति यावदुपायो nvt-C
८ मात्मानं ] कथमेनं nvt-J
१० च ] जायमान° nvt-C
१७ स्येति ] गौतमधर्मसूत्रे १. ४. ३५
१९ श्रुत्या ] प्रतिषिध्यन्ते *for* चातु...ध्येत *in* nvt-C

न प्रजयेति । परेण नाकमिति । नाकमित्यविद्यामुपलक्षयति । अविद्यातः परमित्यर्थः । निहितं गुहायाम् इति लौकिकप्रमाणागोचरत्वं दर्शयति । तमसः परस्ताद् इति । अविद्या तमः तस्य परस्तात् । आदित्यवर्णमिति नित्यप्रकाशमित्यर्थः । तदनेनेश्वरप्रणिधानस्यापवर्गोपायत्वमुक्तम् । § 1877

ऋच उदाहृत्य ब्राह्मणमुदाहरति—अथ ब्राह्मणानीति । यज्ञ इत्यादिना गृहस्थाश्रमो दर्शितः, तप एवेति वानप्रस्थाश्रमः, ब्रह्मचारीति ब्रह्मचर्याश्रमः । एषामभ्युदयलक्षणं फलमाह—सर्व एवैत इति । चतुर्थमाश्रममाह—ब्रह्मसंस्थ इति । तथा क्रतुरिति । क्रतुः संकल्पः । कामयमानो य आसीत् स एव अथाकामयमानो भवति । अकामयमानः कामं परिहरन् तत्परिहारसिद्धौ । सोऽकामयं स्तस्य व्याख्यानं— निष्काम इति । आत्मकाम इति कैवल्योपेतात्मकामः । तत्प्राप्त्याप्तकामो भवति । न तस्य प्राणा इति । शाश्वतो भवतीत्यर्थः । प्रकृतमुपसंरति—तत्र यदुक्तमिति । अपरामपि चातुराश्रम्याभिधायिनीं श्रुतिमुदाहरति—ये चत्वार इति ॥ ६० ॥ § 1878

## समारोपणादात्मन्यप्रतिषेधः ॥ ४ । १ । ६१ ॥ § 1879

इतश्च फलार्थिन एष जरामर्यवाद इत्याह—फलार्थिनश्चेति । पृष्ट्वा सूत्रं पठति—कथम् ? समारोप...प्रतिषेधः ॥ आत्मन्यग्नीनां समारोणाद् ऋणानुबन्धेनापवर्गस्याप्रतिषेधः । तदनेन छलेन प्रत्यक्षविधानं प्रव्रज्याया
600/tha अपि दर्शितम् । एषणाभ्यो व्युत्थितस्य विपर्यस्तबुद्धेः अलमाभिरेषणाभिरनर्थहेतुभिरिति कृतबुद्धेः । अत एव निवृत्ते फलार्थित्वे समारोपणमात्मन्यग्नीनां विधीयत इति । § 1880

एवं च ब्राह्मणानीति । यदैषणाभ्यो व्युत्थितस्य प्रव्रज्याविधानं तदा तदभिधायीनि ब्राह्मणान्युपपन्नानीत्यर्थः ॥ ६१ ॥ § 1881

## पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ४ । १ । ६२ ॥ § 1882

प्रमृते खलु यजमाने यज्ञपात्राणि यजमानस्य शरीरे यथावयवं निधायान्त्येष्टिः क्रियते । तत्र जरामर्ये कर्मण्यविशेषेण कल्प्यमाने सर्वस्य पात्रचयान्तानि कर्माणीति प्रसज्येत । मरणपर्यन्तानि कर्माणीति प्रसज्येतेत्यर्थः । नन्विष्यत एव पात्रचयान्तत्वं कर्मणामित्यत आह—तत्रैषणाव्युत्थानमिति । तस्मान्नाविशेषेण कर्तुः प्रयोजकं फलं भवतीति । फलाभाव इत्यस्य सूत्रावयवस्याविशेषेण फलस्य कर्तृप्रयोजनकत्वाभाव इत्यर्थः । तदनेनैषणाव्युत्थानश्रुतिविरोधो दर्शितः । § 1883

तदेवं चातुराश्रम्ये श्रुतिरुक्ता । संप्रति स्मृत्यादयोऽपि चातुराश्रम्यस्योपदेशकाः सन्तीत्याह—चातुराश्रम्यविधानाच्चेति । शङ्कते—तदप्रमाणमिति चेत् । जगन्निर्मातुः परमकारुणिकस्य सर्वज्ञस्यात्रभवतः परमेश्वरस्यागमो भवतु प्रमाणमाप्तोक्तत्वात् । मनुव्यासादीनां त्वाप्तत्वाविनिश्चयात् कथं तत्प्रणीतानां प्रामाण्यविनिश्चय इत्यर्थः । उत्तरं—न, प्रमाणेनेति स्यादेतत्

। भवतु वेदेनाभ्यनुज्ञानादितिहासपुराणप्रामाण्यम्, धर्मशास्त्राणां तु मन्वादिप्रणीतानां कुतः प्रामाण्यनिश्चय इत्यत आह—अप्रामाण्ये चेति । सर्वजनपरिग्रहात् तेषामपि प्रामाण्य—मित्यर्थः । बुद्धादिस्मृतयस्तु वेदनिन्दितैर्म्लेच्छादिभिः परिगृहीता न त्वार्यैरिति न ताः प्रमाणं भवितुमर्हन्तीत्यर्थः । द्रष्टवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः । य एव वेदस्य द्रष्टारोऽनुष्ठातारश्च तदर्थस्य, त एवेतिहासादीनां प्रवक्तारः प्राचेतसकृष्णद्वैपायनमनुप्रभृतयः । अपि च वैदिकानि कर्माणि स्मार्तीमितिकर्तव्यतामपेक्षन्ते, स्मार्तानि च वैदिकानि मन्त्रादीनि । सर्वमेतदप्रामाण्ये धर्मशास्त्राणां नोपपद्यते । यद्यपि च *कृष्णद्वैपायनादयोऽपि धर्मज्ञानवैराग्यैश्वर्यसम्पन्नतया अनुभूयाप्युपदिशन्तीति संभवति, तथापि वेदमूलकत्वमेवेतिहासपुराणादीनामिति युक्तम् । तथा हि 601/tha

> वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
> यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः ।
> स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥§ 1887

इत्यादिभिः स्ववचनप्रपञ्चैः आत्मा बोद्धा वेद एवार्पितस्तैरिति । अथायम् इतिहासादिगोचरोऽर्थ कस्मात्, प्रत्यक्षप्रतीतेन वेदेन नोच्यत इति तदनभिधानादवगच्छामो नूनमयमनभिमतोऽर्थो वेदानां कर्तुरिति निराकृतोऽप्ययं पुनर्निराक्रियते दार्ढ्यार्थं विषयव्यवस्थानाच्चेत्यनेन ॥ ६२ ॥ § 1888

## सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ ४ । १ । ६३ ॥

§ 1889

यदप्युक्तं क्लेशानुबन्धस्याविच्छेदादिति तद् दूषयति—सुषुप्तस्य...अपवर्गः ॥ तद् व्याचष्टे—सुषुप्तस्य खल्विति । लोकसिद्धतया सुषुप्तावस्थोदाहृता । महाप्रलयावस्थायामपि क्लेशमुक्ता एवात्मानः, केवलमसौ न लोकसिद्धेति नोदाहृता । एतावांस्तु मुक्तावस्थाया विशेषः यदस्यां क्लेशवासनापि नास्ति । सुषुप्तावस्थायां प्रलयावस्थायां च क्लेशविच्छेदेऽपि तद्वासनास्तीति ॥ ६३ ॥ § 1890

## न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ४ । १ । ६४ ॥

§ 1891

यदपि प्रवृत्त्यनुबन्धादिति तत्राह—न प्रवृत्तिः...हीनक्लेशस्य ॥ तद् व्याचष्टे—प्रक्षीणेषु रागद्वेषमोहेषु सती अपि प्रवृत्तिर्न प्रतिसन्धानाय । उपपादितमेतदस्माभिर्यथा क्लेशतुषावनद्धाः कर्मतण्डुला जन्माङ्कुराय कल्पन्ते, 602/tha

---

९ *] मन्वादयोऽपिnvt-C
१५ बोद्धा] बद्धाnvt-J
२९ स्य] °स्यदेहिनःnvt-C
३० वृत्तिर्न] स्वप्रति°nvt-C
३१ था] दोषतुषा° nvt-C

न केवला इत्यर्थः । शङ्कते—कर्मवैफल्यप्रसङ्ग इति । वैफल्ये शास्त्रस्य कर्मणां फलसाधनताप्रतिपादकस्याप्रामाण्यप्रसङ्ग इति भावः । निराकरोति—न कर्मविपाकेति । विपाकः फलं तस्य प्रतिसंवेदनं भोगः ॥ ६४ ॥ § 1892

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ४ । १ । ६५ ॥ § 1893

पूर्वपक्षवाद्याह—न क्लेश...त्वात् ॥ ६५ ॥ § 1894

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम् ॥ ४ । १ । ६६ ॥ § 1895

सिद्धान्त्येकदेशी ब्रूते—प्रागु...त्वम् ॥ दध्यादेरुत्पत्तेः प्राक् क्षीरादिषु योऽभावस्तस्यानित्यत्ववदिति योजना ॥ ६६ ॥ § 1896

अणुश्यामतानित्यत्ववद्वा ॥ ४ । १ । ६७ ॥ § 1897

अपरस्त्वेकदेशी भावमेव दृष्टान्तयतीत्याह—अणुश्यामतानित्यत्ववद् वा ॥ यदेतच्छ्यामं रूपं तदन्नस्य इत्यागमः । पार्थिवानां परमाणूनां श्यामतामनादिमाह, अन्नपदेन मृदोऽभिधानादिति भावः । अत्र प्रथममेकदेशिनं दूषयति—सतः खल्विति । द्वितीयमेकदेशिनं दूषयति—अनादिरणुश्यामतेति हेत्वभावादयुक्तम् । अणुश्यामता कार्या पृथिवीरूपत्वात् लोहितादिवदिति प्रत्युतानित्यताहेतुरस्ति । पुरुषप्रयत्नजन्यलोहितादिरूपवैलक्षण्येन त्वस्याप्रयत्न—पूर्वकत्वमात्रेणानादित्वाभिधानमिति नागमविरोधः ॥ ६७ ॥ § 1898
603/tha

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ४ । १ । ६८ ॥ § 1899

तदेवमेकदेशिनौ दूषयित्वा परमसमाधिमाह—अयं तु समाधिरिति । न संकल्प...रागादीनाम् ॥ चकारमनुक्तसमुच्चयार्थं व्याचष्टे—कर्मनिमित्तत्वादितरेतरनिमित्त त्वाच्च । समुच्चयोऽनुक्तस्येति शेषः । तत्र संकल्पनिमित्तत्वादिति विभजते—मिथ्यासंकल्पेभ्य इति । यद्यप्यनुभूतविषयप्रार्थना संकल्पः, तथापि तस्य पूर्वो भागोऽनुभवोऽत्र ग्राह्यः, प्रार्थनाया रागत्वात् । तेन मिथ्यानुभवः संकल्प इत्यर्थः । § 1900

नन्वेकस्मान्मिथ्याज्ञानात् कुतः कार्यवैचित्र्यमित्यत आह—रञ्जनीयकोपनीयमोहनीयेभ्य इति । *भव्यगेयादिषु पाठात् कर्तरि कृत्यः । मोहनीयः संकल्पो मिथ्याज्ञानसंस्कारः । कर्मनिमित्तत्वं रागादीनां विभजते—कर्म चेति । निकायेन जातिरुपलक्ष्यते । इतरेतरनिमित्तत्वं रागादीनामाह—

१३ स्य ] द्र॰ छान्दोग्योप॰ ६. ४
२८ *] *cf* पाणिनिसू॰ ३. ४. ६८

इतरेतरेति । स्यादेतत्, भवन्त्वनित्याः क्लेशाः । तथापि यदेषां निर्वर्तकं मिथ्याज्ञानं तस्य निवृत्तिहेतोरभावात् स एव क्लेशानुबन्धादपवर्गाभाव इत्यत आह—सर्वमिथ्यासंकल्पानां चेति । अपि च अनादिः क्लेशसन्ततिरित्ययुक्तम् । कुतः ? सर्व इमे आध्यात्मिका भावा इति । आत्मानमधिकृत्य प्रवर्तमानाः शरीरेन्द्रियादयो भवन्त्याध्यात्मिका इति । *अथ यद्यनादीनामपि निवृत्तिः, हन्त अनुत्पत्तिधर्मकाणामपि निवृत्तिप्रसङ्ग इत्यत आह—न चैवं सत्यनुत्पत्तिधर्मकं किञ्चिदिति । रागादिनामुत्पत्तिधर्मकाणामेव व्ययधर्मकत्वाभ्युपगमादित्यर्थः । ननु मा भूवन् मिथ्याज्ञाननिमित्ता रागादयो मिथ्याज्ञाननिवृत्तौ, ये पुनरमी कर्मनिमित्तास्तेषां कुतो निवृत्तिः ? न च कर्मनिवृत्तौ रागादिनिवृत्तिः रागादिमतः कर्मनिवृत्तेरभावात् । तस्मान्न मोक्ष इत्यत आह—कर्म च निकायनिर्वर्तकं तत्त्वज्ञानकृतान्मिथ्याज्ञानरूपसंकल्पविघातान्न रागाद्युत्पत्तिनिमित्तं भवति । सर्वत्र रागादीनां मिथ्याज्ञानमेव निमित्तम् । कर्माणि तु निकायनियमेन रागादीन् प्रवर्तयन्तीति कर्मनिमित्तत्वमुक्तमिति भावः । ननु यथा रागादयः सत्यपि कर्मणि मिथ्यज्ञाननिवृत्त्या निवर्तन्ते, एवं सत्यपि कर्मणि मिथ्याज्ञाननिवृत्त्या फलमपि मा भूदित्यत आह—सुखदुःखसंवित्तिफलं तु भवतीति । § 1901 604/tha

*संकल्पाद्यपेक्षं कर्म रागादिकारणमिति । यज्जातीयस्य जन्मनो यत्कर्म कारणं तत् तज्जन्मोचितामेव मिथ्याज्ञानवासनामभिव्यनक्तीति तद्द्वारेण रागादीनां कारणं भवति । चोदयति—सुखादीनामपीति । यथा मिथ्याज्ञानसहायं कर्म रागादिहेतुः, एवं तत्सहायं फलहेतुरिति चरमदेहस्य तत्त्वज्ञानवतः सदपि कर्म फलकारणं न स्यादित्यर्थः । परिहरति—न निरपेक्षत्वादिति । *कर्माशयप्रचयं क्षेतुममूढोऽप्यसक्तोऽप्यद्विष्टोऽपि मूढ इव सक्त इव द्विष्ट इव तत्फलं भुङ्क्ते इति रागाद्यनपेक्षं कर्म स्वफलं जनयति । तेनासौ फलोपभोगो न बन्धहेतुः । मूढादीनां बन्धहेतुः फलोपभोगः । स च तादृशो रागादिसहायैः कर्मभिः क्रियते, न रागादिनिरपेक्षैरित्यवदातम् ॥ ६८ ॥

§ 1902

॥ इत्यपवर्गपरीक्षाप्रकरणम् ॥

॥ इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां चतुर्थाध्याये प्रथमाह्निकम् ॥

# ४.२ चतुर्थाध्याये द्वितीयाह्निकम्

605/tha

५ *] ननुnvt-J
१३ रागादीन्] °र्तन्त इति nvt-J
१७ *] वार्त्तिकमित्यादिकर्मार्थत्वादिति सन्दर्भोऽर्थसंगत्यनुसारं ५९४-५ पत्रयोः सन्निवेशितः ।
२२ *] °शयप्रपशमुच्छेत्तु° nvt-C

## ४.२.१ तत्त्वज्ञानोत्पत्तिप्रकरणम्

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥ ४ । २ । १ ॥ § 1905

तदेवं संशयप्रमाणप्रमेयाणि परीक्षितानि । प्रयोजनादयोऽपि यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः इत्यतिदेशेन परीक्षिता इति षोडशापि प्रमाणादयः परीक्षिताः । तेषां तत्त्वज्ञानं निःश्रेयसाधिगमहेतुरित्युक्तम् । तत्रापि प्रमेयतत्त्वज्ञानं साक्षान्निःश्रेयसहेतुरितरेषां तु तत्त्वज्ञानाङ्गतयेत्युक्तम् । इदमिहेदानीं परीक्ष्यते, किं प्रत्येकमात्मादीनां प्रमेयाणां तत्त्वज्ञानं निःश्रेयसाधिगमोपाय उताहो कस्यचिदेषामेकदेशस्येति । तामिमां परीक्षामवतारयति भाष्यकारः- किं नु खलु भो यावन्तो विषयाः प्रमेयाणि तावत्सु प्रत्येकमिति । प्रतिप्राणभृद्भेदं यावन्त आत्मानः, *यावन्ति शरीराणि, यावन्ति चेन्द्रियाणीत्यर्थः । पार्श्वस्थः पूर्वपक्षिणं पृच्छति—कश्चात्र विशेष इति । पूर्वपक्षिण उत्तरम्—न तावदेकैकत्रेति । समुदायैकदेशाभ्यामनुपपत्तेः प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इत्ययुक्तमिति पूर्वः पक्षः । सिद्धान्तमाह—मिथ्याज्ञानं वै खलु मोह इति । वैशब्दः पूर्वपक्षाक्षमायाम्, खलुशब्दो हेत्वर्थे । अयुक्तः पूर्वपक्षो यस्मान्मिथ्याज्ञानं मोह इति । न तत्त्वज्ञानमज्ञाननिवृत्तिमात्रेण निःश्रेयसोपयोगि, अपि तु संसारनिदानोच्छेदद्वारेण दृष्टेनैव । न च तत्त्वाज्ञानं संसारहेतुरपि तु मिथ्याज्ञानम् । तदुच्छिन्दद्विरोधितया तत्त्वज्ञानमपवर्गहेतुरिति । भवत्वेतत्, तथापि पूर्वपक्षस्य किमुत्तरमित्यत आह—तच्च मिथ्याज्ञानं यत्र विषये प्रवर्तमानमिति । स्वसंबन्धिनो ह्यात्मादयो विपर्ययेण परिच्छिन्नाः
606/tha संसारहेतव इति तद्विषयमेव मिथ्याज्ञानमपनेयम्, नात्माद्यन्तरविषयम् । तेन तत्र मिथ्याज्ञानं मा निवर्त्तिष्ट, निवर्ततां वा स्वात्मादिदृष्टान्तेन न तु तस्य संसारनिवृत्तिं प्रति कश्चिदुपयोगः । यस्य तूपयोगस्तत्र तत्त्वज्ञानं न दुष्करमिति । पृच्छति—किं पुनस्तन्मिथ्याज्ञानम् ? सन्ति खल्वत्र प्रवादिनां नाना विप्रतिपत्तयः । केचिदाहुः विधूतविविधनामरूपप्रपञ्चोपप्लवविशुद्धप्रकाशानन्दघनाद्वैतब्रह्मसाक्षात्कारस्तत्त्वज्ञानमिति । अन्ये तु सत्त्वपुरुषान्यताख्यातिम् । धर्मपुद्गलनैरात्म्यज्ञानमित्यपरे । शरीरेन्द्रियाद्यनित्यव्यतिरिक्तनित्यात्मदर्शनमिति वृद्धाः । तदेवं विप्रतिपत्तेः प्रश्नः । उत्तरम्—अनात्मन्यात्मग्रहोऽहमस्मीति मोहोऽहङ्कारः । न तावदद्वैतानन्दघनात्मज्ञानं तत्त्वज्ञानम् भेदस्य प्रत्यक्षसिद्धस्यासति बाधकेऽपह्नोतुमशक्यत्वात् । न च प्रकाशानन्दावात्मधर्मावात्मातिरिक्तावात्मस्वभावौ भवितुमर्हतः । सत्यं विज्ञानमानन्दं ब्रह्मेति च श्रुतिरान्दचैतन्यशक्त्यभिप्राया । भेद एव च तद्वत्तया कथंचित् सामानाधिकरण्यमुपपद्यते । अभेदे त्वानन्दविज्ञानयोस्तत्पदयोः पर्यायतया सहप्रयोगानुपपत्तिः । न च प्रकृष्टः प्रकाशः सवितेत्यत्रापि प्रकर्षप्रकाशयोरभेदः, अप्रकाश-

९ *] यावन्ति चेन्द्रियाणि चेत्यर्थःnvt-C
१७ स्य] किमायातमि°nvt-C
१९ म्] °षयं ज्ञानम्nvt-C
३२ काशः] प्रकृष्टप्रकाशःnvt-C
३२ भेदः] तेत्यत्र प्रकृष्टप्रकाश°nvt-C

स्यापि प्रकर्षसंभवात्, अप्रकृष्टस्यापि खद्योतादेः प्रकाशसंभवात् । तस्माद् यत्किञ्चिदेतत् । सत्त्वपुरुषान्यताख्यातिस्तु सत्त्वस्यैव प्रकृतेरसंभवात् अयुक्ता सत्कार्यवादमूलत्वात्प्रधानसद्भावस्य तन्निराकरणेनैव निराकरणम् । धर्मपुद्गलनैरात्म्ये तु क्षणभङ्गभङ्गेन नित्यात्मसद्भावकथनेन च निराकृते । तस्मात् सुष्ठूक्तमनात्मन्यात्मग्रहोऽहमस्मीति मोहोऽहङ्कार इति । अत एव सर्वस्यैवमात्माशीः कृमेरपि मा न भूवं भूयासमिति । सोऽयमीदृशोऽभिनिवेशः शरीरादीनामात्मत्वेनाध्यवस्यतो भवति नात्मतत्त्वविदुषः । स खल्वहिनिर्ल्वयनीमिवाहिः ततो व्यतिरिक्तं शरीरादि पश्यन्न तत्र स्निह्यति, स्नेहविरहाच्च न तप्यते नाप्यनुशोचतीति । अतत्त्वज्ञानवतः संसारं दर्शयित्वा तत्त्वज्ञानवतः संसारनिवृत्तिमाह—यस्तु दुःखमिति । तदेवमुक्तेन प्रकारेण मोहतत्त्वज्ञानयोः संसारापवर्गहेतुभावो यतस्तस्मान्मोक्षमाणैः प्रेत्यभावफल दुःखानि च 607/tha परिज्ञेयानि व्यवस्थापयतीत्यादिपूर्वोपसंहारः । आसेवमानस्याभ्यस्यतो भावयत इति पर्यायकथनं भावनादार्ढ्योपदर्शनार्थम् । § 1906

अर्थगतिं परिशोध्यात्रार्थे सूत्रं पठति—दोषनिमित्तानां...निवृत्तिः ॥ शास्त्रार्थसंग्रहोऽनूद्यते शास्त्रतात्पर्यसंग्रहो द्वितीयसूत्रेणानूद्यत इत्यर्थः । किं नु खलु भो इति भाष्यम् । तदनुपपन्नम्, यतो न विषयमात्रतत्त्वज्ञानमपवर्गहेतुः अपि तु प्रमेयतत्त्वज्ञानमित्यत आह वार्त्तिककारः—तत्र विषयान्तराणामिति । यावन्तो विषया इति न विषयमात्राभिप्रायम्, अपि तु प्रमेयाभिप्रायमित्यर्थः । सुगममन्यद् वार्त्तिकम् ॥ १ ॥ § 1907

## दोषनिमित्तं रुपादयो विषयाः सङ्कल्पकृताः ॥ ४ । २ । २ ॥ § 1908

शरीरादिष्वनात्मस्वात्मबुद्धिर्निवर्तनीयेत्युक्तम् । तत्र प्रथमं कस्मिन्नात्मबुद्धिर्निवर्तनीयेत्यपेक्षायामाह—प्रसंख्यानानुपूर्व्या तु खलु । प्रसंख्यानं समाधिजं तत्त्वज्ञानम्, तच्च विषये सुकरमिति तत्रैव प्राथमिकस्य प्रथमं प्रयत्नो युक्तः । § 1909

सूत्रम्—दोषनिमित्तं...संकल्पकृताः ॥ मिथ्याज्ञानं सङ्कल्पः, तेन विषयीकृता इत्यर्थः । कामाः काम्याः ॥ २ ॥ § 1910

## तन्निमित्तं त्ववयव्यभिमानः ॥ ४ । २ । ३ ॥ § 1911

अन्ये खल्ववयविसंज्ञां निवर्तयन्तोऽवयविनमेव प्रत्याचक्षते तान् प्रत्याचक्षाण आह—अतः परं काचिदिति । सूत्रम्—तन्निमित्तं...मानः ॥ *निमित्तसंज्ञेति निमित्तं दन्तत्वादि, तद्विशिष्टा विषयाः संज्ञाः । प्रियायाः कामुको दन्तौष्ठनासिकादीनवयवाननुभावयन् तस्यां प्रसक्तो भवति । व्यञ्जनान्यवय-

११ माणैः ] °माणःnvt-J

३० *] निमित्तसंज्ञेतिnvt-J

608/tha विनोऽवयवास्तैः सहोपालम्भात् तेषामनुव्यञ्जनं तत्तत्सादृश्यं तेन तदारोपः । तथा च स्त्रैणानां व्याहारः,

द्रवत्कनकनिर्मलद्युतिरनङ्गलीलैकभू-
र्महेभकटविभ्रमस्तनभरालसाङ्गी यदि ।
प्रिया न परिरभ्यते तुलितसिद्धसंजीविनी
सहेमहि कुतोऽन्यथा विषमबाणबाणव्यथाम् ॥§ 1916

मदनसरितमेतां गाहमानो जनोऽयं
जघनपुलिननाभीमण्डलावर्तरम्याम् ।
मुखनलिनसनाथामुल्लसद्भ्रूलतोर्मिं
चिरविरहहुताशायासमुज्झां चकार ॥§ 1920

विवेकिनस्त्वशुभसंज्ञां भावयन्त आहुः,

मज्ञामस्थ्नामथ प्लीह्वां यकृतां शकृतामपि ।
पूर्णाः स्नायुशिराः स्यूताः स्त्रियश्चर्मप्रसेविकाः ॥§ 1922

ऋषयोऽप्यूचुः

स्थानाद् बीजादुपष्टम्भान्निष्यन्दान्निधनादपि ।
कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदुः ॥§ 1924

अशुभसंज्ञाभावनाप्रयोजनमाह—तामस्य भावयत इति । तत्किमिदानीमवयव्यनुव्यञ्जनसंज्ञयोर्विषयो नास्ति, अशुभसंज्ञाविषय एव परमस्तीत्यत आह— सत्येव च द्विविधे विषय इति । द्विविध एवासौ कामिनीलक्षणो विषयः तथापि रागादिप्रहाणार्थमवयवादिसंज्ञागोचरत्वं परित्यज्याशुभसंज्ञागोचरत्वमस्योपादीयते वैराग्योत्पादनायेत्यर्थः । अत्रैव दृष्टान्तमाह—यथा विषसंपृक्त इति । न हि तत्र विषमधुनी परमार्थतो न स्तः । अपि तु वैराग्याय विषसंज्ञा तत्रोपादीयत इत्यर्थः ॥ ३ ॥ § 1925

॥ इति तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥

## ४.२.२ प्रासङ्गिकमवयवावयविप्रकरणम्

609/tha

विद्याविद्याद्वैविध्यात् संशयः । ४ । २ । ४ ॥ § 1927

तदेवं स्वमतेन प्रसंख्यानोपदेशमुक्त्वा पराभिमतप्रसंख्यानं निराकर्तुमुपन्यस्यति—अथेदानीमर्थं निराकरिष्यता विज्ञानवादिना अवयविनि निराकरणमुपपाद्यते । अर्थविषये खल्ववयव्यनुव्यञ्जनसंज्ञे । तत्रार्थमात्रस्याभावात्

४ ये ] अर्थविशेषे nvt-C

कुतोऽवयव्यनुव्यञ्जनसंज्ञे ? तन्निराकरणाय प्रथममवयवी निराक्रियते, पश्चात् परमाणुः । ततश्च ज्ञानमात्रमर्थरहितं सिद्धं भवतीत्यभिप्रायः । § 1928

तत्र संशयपूर्वकत्वादुपपादनस्य विचारस्य संशयं प्रथममाह—विद्या... संशयः ॥ उपलब्धिर्विद्या अनुपलब्धिरविद्या । सच्चोपलभ्यते यथा तडागे तोयम्, असच्चोपलभ्यते यथा मरुमरीचिकायामुदकम् । सच्च नोपलभ्यते, यथा चिरनिखातं भूमौ निध्यादि । असच्च नोपलभ्यते, यथा भूतले दृश्यमाने तत्तुल्योपलम्भनयोग्यतो घटादिः । तदेवं विद्याविद्याद्वैविध्यादवयविनि संशयः । यद्यवयव्युपलभ्यते तथापि संशयः, अथ नोपलभ्यते तथापि संशय इत्यर्थः ॥ ४ ॥ § 1929

## तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ४ । २ । ५ ॥ § 1930

अत्र सिद्धान्ती वक्ष्यमाणमप्यवयविनिराकरणहेतुं निराकरिष्यामीत्याशयवानाह—तदसंशयः...त्वात् ॥ अवयविनः । वार्त्तिककारस्तु स्वयं संशयं निराकरोति, न विद्याविद्याद्वैविध्यं संशयस्य कारणमिति ॥ ५ ॥ § 1931

610/tha

## वृत्त्यनुपपत्तेरपि न संशयः ॥ ४ । २ । ६ ॥ § 1932

पूर्वपक्षवाद्याह—वृत्त्यनुपपत्तेरपीति ॥ ६ ॥ § 1933

## कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ४ । २ । ७ ॥ § 1934

वृक्षस्तिष्ठति शाखादिषु शाखादयो वा वृक्ष इति लौकिकीं प्रतिपत्तिमनुरुध्यमानो विकल्पयति वार्त्तिककारः—अवयवा अवयविनि इति । एकद्रव्यश्चावयवः प्राप्नोति । कुतः ? एकावयविवृत्तित्वात् । भवतु को दोष इत्यत आह—न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति । कृतकस्य नित्यत्वप्रसङ्गादिति शेषः । अवयव्येकदेशेनेति । अवयविनो य एकदेशस्तेनावयवोऽवयविनि वर्तत इत्यर्थः । न ह्यस्यावयविनोऽन्येऽवयवेभ्य एकदेशावयवाः सन्तीति ॥ ७ ॥ § 1935

## तेषु चावृत्तेरवयव्यभावः ॥ ४ । २ । ८ ॥ § 1936

एकेनावयवेनारभ्यत इति सततोत्पत्तिप्रसङ्गः । संयोगाय किल चरमभाविने अवयवव्यापारस्तन्निमित्तानि चापेक्ष्यन्ते । एकद्रव्यस्य तूत्पत्तिं प्रति न संयोगापेक्षेति यावदवयवमवयव्युत्पद्येतेत्यवयव्यनवरुद्धो न कदाचिदवयवो दृश्येतेत्यर्थः ॥ ८ ॥ § 1937

---

१ संज्ञे ] अवयवानु° nvt-J
१३ मिति ] वृत्यनुपपत्तेरपि न संशयः इति सूत्रान्तरमिति केचन ।
२२ य ] एकदेशाः nvt-C एकदेशः nvt-J
२३ वेभ्य ] अवयवेषु nvt-C

पृथक् चावयवेभ्योऽवृत्तेः ॥ ४ । २ । ९ ॥ § 1938

अवयवव्यतिरेकेण वर्तमानोऽवयव्युपलभ्येत, न चास्याधारान्तरमुपलभ्यते । दृश्यमानाश्चावयवा नाधिकरणमस्येति भवतैवंवादिना अभ्युपगतमित्यभिप्रायेणाह—नित्यश्च स्यात् ॥ ९ ॥ § 1939
611/tha

न चावयव्यवयवाः ॥ ४ । २ । १० ॥ § 1940

यस्तु मन्येत अवयवानां धर्ममात्रमवयवी न ह्यवयवेभ्योऽत्यन्तं भिन्नोऽभिन्नो वा, भिन्नत्वे गवाश्ववद्धर्मधर्मिभावानुपपत्तेः । अभेदेऽपि धर्मरूपवत् तदनुपपत्तेश्च । तस्मात् कथंचिद् भिन्नः कथंचिदभिन्नो धर्ममात्रमवयवानामवयवीति, तं प्रत्याह—न चा...यवाः ॥ न तावद् भेदाभेदौ परस्पराभावात्मानावेकत्र समाविशत इत्युक्तम् । नाप्यात्यन्तिके अभेदे धर्मधर्मिभावः । तस्माद् यथा आत्यन्तिकभेदेऽपि केषाञ्चिदेव कार्यकारणभावः, तथा केषांचिदेव धर्मधर्मिभाव इत्येषितव्यम् । तथा च दूषणमित्यर्थः । अवयवी चैकदेशेनावयवेषु वर्तते इत्यवयवसमूहमात्रमवयवी प्राप्नोति इति । अस्यायमर्थः । अवयवे हि वर्तमानोऽवयवीत्युच्यते । अवयव्येकदेशाश्चेदवयवेषु वर्तन्ते, एकदेशा एव तर्ह्यवयविनः । ते च नानेत्यवयवसमूहमात्रमवयवी प्राप्नोति । एकस्मिंश्चावयवे एकदेशेन वर्तमानोऽवयवीति न तावदवयवी क्वचिदवयवे वर्तते इति तदेकदेशानां तत्र तत्रावयवे वृत्तेः तावन्मात्रेण चावयविनो ग्रहणमिति यत्रैवास्यैकदेशो वर्तते तत्रैव ग्रहीतव्यः । तथा चैकस्मिन् तन्तौ पटैकदेशो वर्तते इति तन्तावेकस्मिन् पटो दृश्येतेत्यर्थः ॥ १० ॥
§ 1941

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ४ । २ । ११ ॥ § 1942

सिद्धान्तवाद्याह—एकस्मिन्...अप्रश्नः ॥ ११ ॥ § 1943

अववयवान्तरभावेऽप्यवृत्तेरहेतुः ॥ ४ । २ । १२ ॥ § 1944

एकदेशेन चावयवी न स्वावयवेषु वर्तत इत्यत्र प्रतिज्ञार्थे अवयवान्तराभावादित्यहेतुः । कस्मात् ? यद्यप्यवयवान्तरमवयविनो भवति, तथाप्य-
612/tha वयवा न्तराण्येवावयविनोऽवयवान्तरेषु वर्तन्ते किमायतमवयविवृत्तेरिति । एकश्चानेकत्र वर्तत इति प्रतिजानानः किं कार्त्स्न्येन किमेकदेशेनेति नानुयोक्तव्यः । कस्मात् ? उभयेन कार्त्स्न्येन एकदेशेन वा नानात्वेकार्थसमवायिना एकस्यावयविनो व्याघातात् । एतदुपजीव्याह—यद्यवयवी नैकदेशेन वर्तते न कार्त्स्न्येन, अथ कथं वर्तत इति ? § 1945

३ स्येति ] भवतैव वादिना nvt-C

१० त ] समवेतःnvt-C

शङ्कते—रूपाद्यन्तरानिर्देशादिति चेत् ? सोपहासं दृष्टान्तमाह—यथा अचित्रास्तन्तव पटं चित्रमारभन्त इति । नैयायिकैः किलाचित्रैस्तन्तुभिश्चित्रः पट आरभ्यत इत्यभ्युपेयते । तच्चैतदयुक्तम् । न तावच्चित्रं रूपमेकं पटसमवेतं स्ववचनविरोधात् । नाना हि चित्रमुच्यते, तत् कथमेकमिति । तेन यदुक्तं नानैकमिति, तदुक्तं भवति चित्रमेकमिति । यदाहुः

चित्रं तदेकमिति चेदिदं चित्रतरं महत् ।§ 1947

इति । § 1948

न च नीलपीतादयो बहवोऽव्याप्यवृत्तयश्चित्रपदास्पदमिति साम्प्रतम्, रूपादीनां व्याप्यवृत्तित्वात् । तेऽमी विवादाध्यासिता नीलपीतसितादयो व्यापनीया आश्रयवृत्तयो रूपजातीयत्वात् शुक्लपटगतरूपवदिति । उपपन्न उपहासो यथा अचित्रास्तन्तवः पटं चित्रमारभन्त इति । निराकरोति—नोपलभ्यमानरूपाधारत्वात् । अवयविनो रूपं निर्दिश्यतामित्येवं ब्रुवाणेनेति । अवयवोऽस्यास्तीत्यवयवी, अवयवश्च कारणम्, तद्वांश्चावयवी कार्यमिति कार्यकारणभावाभ्युपगमः कृतो भवति, न च प्रसङ्गसाधनं नाम किंचिदस्ति प्रमाणम्, तर्कस्तु भवेत् । न चायं प्रमाणेनेतिकर्तव्यतां विना प्रमाणमर्थं साधयितुमर्हतीत्यभिप्रायः । यदपि त्वयोपहासाभिप्रायेण पटरूपं चित्रं दृष्टान्तीकृतं तत्राभिप्रायस्तावद् भवतु यादृशस्तादृशो वा, वचनात् तावदयं दृष्टान्तः प्रतिभाति । दृष्टान्तश्च वादिप्रतिवादिनोरविवादविषय इति तत्साधनं व्यर्थम् । तथापि उपेत्य चित्रविवादं ब्रूमः त्वां प्रति चित्रं रूपं पटसंबन्धितया साधयामः त्वदभिप्रायप्राप्तोपहासनिराकरणायेत्यर्थः । पटस्य चित्रं 613/tha
रूपमित्यनुभव एवात्राबाधितः प्रमाणमिति भावः । § 1949

बौद्धः स्वाभिप्रायमुद्घाटयति—अनेकत्वप्रसङ्ग इति चेद् इति । निराकरोति—न, चित्रशब्दस्यैकानेकविषयत्वात् । यदि नानैव चित्रमुच्येत स्याद् विरोधः, किं त्वेकस्मिन्नपि चित्रपदं प्रयुज्यते । तस्मान्नैकत्वेनास्य विरोध इत्यर्थः । देशक आह—न, एकस्मिन्नदृष्टत्वात् । एकस्मिंश्चित्रग्राहिणोऽनुभवस्यादृष्टत्वात् । पुरुषविवक्षाधीनप्रवृत्तयस्तु शब्दाः क्व नाम दुर्लभा इति भावः । परिहरति—न, अभ्युपेतहानेरिति न तावदनेकपदपर्यायश्चित्रशब्दोऽनेकं चित्रमित्यनेकपदेन सामानाधिकरण्यं प्रतिपत्तुमर्हति, पर्यायशब्दानां सहप्रयोगानुपपत्तेः । दृश्यते तु प्रयोगोऽनेकं चित्रमिति तस्माद् यथा शुक्लानि नाना तथा चित्राणि नानेत्यभ्युपेयम् । तथा चैकं शुक्लमनभ्युपगच्छतो यथा शुक्लनानात्वाभ्युपगमो हीयते, एवमेकैकं चित्रमनभ्युपगच्छतश्चित्रनानात्वाभ्युपगमो हीयत इत्यर्थः । शङ्कान्तरमाह—अथानेकमचित्रमिति । निराकरोति—एवमपीति । शङ्कते—अथाचित्राणीति । निराकरोति—एवं च न किंचिदिति ।

६ त् ] प्रमाणवार्त्तिकम् २. २००
१४ मः ] कुतोnvt-C
१६ भिप्रायः ] °तीत्यर्थःnvt-C
१७ तु ] तावत् तवnvt-C
३१ मेकैकं ] मेवैकंnvt-C
३३ रोति ] परिहरतिnvt-C

इष्यत एवास्माभिर्यथावयवसमवेतैः सितहरितलोहितादिभिरसमवायिकारणैरवयविनि चित्रं रूपमारभ्यत इति । देशयति—पुटान्तर इति । पुटान्तरं पार्श्वान्तरम् । परिहरति—भवतैवेदमुक्तमिति । एकोऽपि गुण आरभत इति मत्वाशङ्कते—चित्रप्रत्ययस्तत्रेति । निराकरोति—न प्रसक्त इति । ननु यच्चित्राचित्राभ्यामारब्धमवयविनो रूपं तदपि पीतादिवन्निर्दिश्यताम्, न च शक्यं निर्देष्टुम् । तस्मान्नास्तीत्यत आह—एतावदिति । अनिर्वाच्यमप्यनुभूयमानमशक्यापह्नवम् । यथा इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् § 1950

इत्यर्थः । न चावयवरूपादवयविनो ग्रहणं युक्तमिति । न द्रव्यान्तररूपेण द्रव्यान्तरे चाक्षुषत्वं दृष्टम् । न खलु पृथिव्यादिरूपेण वायुश्चाक्षुष
614/tha इत्यर्थः । प्रकृतमुपसंहरति—तस्मादिति । अविकल्पिता अविचारिता इत्यर्थः ॥ १२ ॥ § 1951

**केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः ॥ ४ । २ । १३ ॥** § 1952

सर्वाग्रहणमवयव्यसिद्धेरित्यत्र प्रत्यवस्थितः पूर्वपक्षी अथेदमाहेति—केशसमूहे...तदुपलब्धिः ॥ इत्यादिसूत्रभाष्यवार्त्तिकानि पूर्वपक्षसिद्धान्तयोरतिरोहितार्थानि ॥ १३ ॥ § 1953

**स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ ४ । २ । १४ ॥** § 1954

**अवयवावयविप्रसङ्गश्चैवमा प्रलयात् ॥ ४ । २ । १५ ॥** § 1955

अपि चायं वृत्तिविकल्प आश्रयव्याघातादयुक्त इत्याह—अवय......यात् ॥ १५ ॥ अत्र त्रयः कल्पाः संभवन्ति । योऽयमवयवेषु अवयविवृत्तिविकल्पानुपपत्त्या अवयविनोऽभावप्रसङ्ग आपाद्यते, स आ प्रलयाद् वा निवर्तेत आ परमाणोर्वा, न वा क्वचिदपि निवर्तत इति । तत्र प्रथमद्वितीयविकल्पावाश्रित्येदं सूत्रम् । यथैव वृत्तिविकल्पः स्थूले घटादावेवं तदवयवेषु तदवयवेष्विति तत्तदभावात् प्रलये व्यवतिष्ठेत । न च तदा प्रलयः सर्वोपाख्याविरहितो दर्शनविषयः संभवतीति दर्शनविषयाभावादनाश्रयो विकल्प आत्मानमेव न लभते । उपलक्षणं चैतद् आ प्रलयादिति । आ परमाणोरित्यपि द्रष्टव्यम् । परमाणूनामप्यतीन्द्रियत्वेन दर्शनविषयत्वाभावादनाश्रयता विकल्पस्य तदवस्थैव । तदिदमुक्तं— निरवयवाद् वा परमाणुतो निवर्तेत इति ॥ १५ ॥ § 1956

---

७ त] काव्यादर्शे १. १०२
१५ ब्धिः] उपलब्धेः nvt-C
२२ त्याः] पक्षाः nvt-C

615/tha

न प्रलयोऽणुसद्भावात् ॥ ४ । २ । १६ ॥ § 1957

अथापीति अपि चेत्यर्थः । अपि च प्रलयमभ्युपेत्येदमुक्तम् आ प्रलयादिति । *परमार्थतस्तु—न प्रलयोऽणुसद्भावात् ॥ निरवयवत्वे प्रमाणमाह—निरवयवत्वं तु परमाणोरिति ॥ १६ ॥ § 1958

परं वा त्रुटेः ॥ ४ । २ । १७ ॥ § 1959

अथानन्त एवायमवयवावयविविभागः कस्मान्न भवतीत्यत आह—परं वा त्रुटेः ॥ त्रुटिस्त्रसरेणुरित्यनर्थान्तरम् ।

जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम् ।§ 1961

यदि त्रुटेः परं द्वित्रिपदकेऽवयवविभागो नावतिष्ठेत ततोऽवयवविभागस्यानवस्थानाद् द्रव्याणामसंख्येयत्वात् त्रुटित्वनिवृत्तिः, त्रुटिरपि हि सुमेरुणा तुल्यपरिमाणः स्यात् । न खल्वनन्तावयवत्वे कश्चिद् विशेष इत्यर्थः । § 1962

वार्त्तिकम्—यावद् वा प्रलयोऽनिवृत्तिर्वेति । प्रलयपरमाणुपक्षे विकल्पनिवृत्तिर्नास्ति दर्शनविषयस्तु नास्तीत्यनाश्रयो विकल्पः । अनन्तावयवत्वे तु सर्वस्य विकल्पाघ्रातत्वे दर्शनविषयाभाव इत्यनाश्रयो विकल्प इत्यर्थः । § 1963

संख्योदाहरणम्—इयन्तश्च परमाणवः संहतास्त्रुटिभावमापद्यन्त इति । सावयवत्वे च परमाणुशब्दस्यार्थो वक्तव्यः किमुक्तं भवति परमाणुरिति ? परमत्वविशिष्टो ह्यणुः परमाणुः यतः क्षोदीयो नापरमस्तीति यावत् । तस्मादपि चेत् क्षोदीयोऽन्यदस्ति, नैष परमत्वविशिष्टोऽणुरित्यर्थः । अथ भिन्नपरिमाणाः परमाणोरवयवास्ततो न्यूनपरिमाणा इति यावत् । ततो न परमाणुः प्रतिषिध्यते परमाण्ववयवा एव परमाणवः । ते चानवयवत्वादकार्याः । त्वया च परमाण्वारब्धं कार्यं परमाणुरिति कृत्वा आरोप्य वृत्तिविकल्पेन प्रतिषिध्यत 616/tha
इति ॥ १७ ॥ § 1964

॥ अवयवावयविप्रकरणम् ॥

## ४.२.३ निरवयवत्वप्रकरणम्

आकाशव्यतिभेदात् तदनुपपत्तिः ॥ ४ । २ । १८ ॥ § 1966

अथेदानीमानुलम्भिकः तस्य व्याख्यानं सर्वं नास्तीति मन्वान आह—आकाश...पपत्तिः ॥ आकाशव्यतिभेदात् तस्य परमाणोर्निरवयवस्यानुपपत्तिः

३ *] वस्तुतस्तुnvt-C
१२ म्] ४. २. १५ सूत्रीयमिति शेषः
१३ निवृत्तिर्नास्ति] अस्ति *for*नास्तिnvt-J

। सावयवत्वे तु वृत्तिविकल्पात् तदभाव इति शून्यतैव तत्त्वं भावानाम् । अनाश्रयोऽपि विकल्पो यथालोकप्रतीति कल्पनामात्रनिर्मितस्तात्त्विकीं शून्यतां गमयिष्यति, मिथ्याज्ञानानामपि तत्त्वावगमहेतुत्वदर्शनात् । यथा दूराद् वनस्पतौ हस्तिप्रत्ययप्रवाहो वनस्पतितत्त्वप्रतिपत्तेर्हेतुः । यथा रेखागवयो वा विकल्पितो गवयत्वप्रतिपत्तेरित्यादि बहूत्प्रेक्षितव्यमिति भावः । तदेतद् वार्त्तिककारो दूषयति—आकाशव्यतिभेदादनित्यः परमाणुरित्यभिदधानो व्यतिभेदार्थं प्रष्टव्य इति ॥ १८ ॥ § 1967

आकाशासर्वगतत्वं वा ॥ ४ । २ । १९ ॥ § 1968

अन्तर्बहिरिति कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ॥ ४ । २ । २० ॥ § 1969

617/tha अन्तर्बहिरिति कार्यस्य कारणान्तरवचनमिति । कारणान्तरं कारण विशेषः । तस्य वचनमित्यर्थः । उपेत्य परमाणोरवयवान्न तद्विभागस्याकाशं कारणमिति । आकाशव्यतिभेदादित्याकाशहेतुकं व्यतिभेदं विभागमाह । न चाकाशं विभज्यमानयोर्द्रव्यान्तरयोर्विभागस्य कारणम्, अपि तु कर्मेत्यर्थः । सर्वतोऽव्यवहितस्य यस्य मध्ये अवयवा न सन्तीति तत्सुषिरमिति । सर्वतोऽव्यवहितस्य निरन्तरस्यावयविनः स्वावयवद्वारेण । एतदुक्तं भवति, यस्यावयवाः परितो निरन्तरमवस्थिता मध्ये च न सन्ति तत् सुषिरमिति । यन्मूर्तिमत् तेन सर्वेण संबध्यते । मूर्तिमता सर्वेण संबद्धत्वं सर्वगतत्वं वदतो वार्त्तिककारस्याजसंबन्धस्याभ्युपगमः प्रौढिवादतयैव लक्ष्यते ॥ २० ॥ § 1970

शब्दसंयोगविभवाच्च सर्वगतम् ॥ ४ । २ । २१ ॥ § 1971

अव्युहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ ४ । २ । २२ ॥ § 1972

स्यादेतत् । आकाशं चेत् सर्वगतं ततो मूर्ताणां द्रव्याणां तेन प्रतिबन्धाद् गतिविधारणं व्यूहान्तरापादनं च जलौघस्येव वेगवता नावादिना भवेत् । न चास्ति, तस्मान्न सर्वगतमित्यत आह—अव्यूहाविष्टम्भ…धर्माः ॥ यत एवाव्यूहाविष्टम्भावत एवाप्रत्यूहं विभुत्वमस्येत्यर्थः ॥ २२ ॥ § 1973

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ ४ । २ । २३ ॥ § 1974

---

११ हिरिति ] °ति वचनंnvt-C
१९ मः ] अजसंयोस्यnvt-C
२५ णं ] गतेरावरणम्nvt-C
२५ ता ] वेगवताnvt-J

पुनः शून्यतावादी प्रत्यवतिष्ठते—मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ चस्त्वर्थः सिद्धान्तं निवर्तयति । यद्यपि मूर्तिमतामिति संबन्धित्वमात्रेणोपात्तं सूत्रे, तथापि हेतुपदतया वार्त्तिककार उपादत्ते—सावयवा परमणवो मूर्त्तिमत्त्वाद् घटादिवदिति । प्रयोगान्तरमाह—संस्थानवत्त्वादिति ॥ 618/tha
२३ ॥ § 1975

संयोगोपपत्तेश्च ॥ ४ । २ । २४ ॥ § 1976

सूत्रान्तरमनुवृत्तिसहितं पठति—संयोगोपपत्तेश्च ॥ २४ ॥ § 1977

अनवस्था कारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ ४ । २ । २५ ॥ § 1978

पौनरुक्त्यं देशयति—नन्विदमिति । परिहरति—न चरितार्थमिति । मूर्त्तिर्नामाव्यापिनो द्रव्यस्य षड्विधं परिमाणमिति । परमह्रस्वत्वपरमाणुत्वे परमसूक्ष्म एव द्रव्ये व्यवस्थिते । व्यापि तु गृहीत्वा परममहत्त्वपरमदीर्घत्वाभ्यामष्टविधं परिमाणं भवति । परममहत्त्वपरमदीर्घत्वे च सर्वगतद्रव्यवर्तिनी इति न मूर्तिः । असर्वगतद्रव्यपरिमाणं मूर्तिरिति परमर्षिवचनात् । संस्थानं नाम प्रचयाख्यः संयोगो घटादिवृत्तिर्घटत्वादिजातिव्यक्तिहेतुरिति । संयोगः संयोगमात्रं न त्वप्राप्तिपूर्विका प्राप्तिरिति । तस्मादपौनरुक्त्यम् । तदेतच्छून्यवादिमतमपाकरोति—यत्तावन्मूर्त्तिमत्त्वादिति । शून्यतावादी प्रलयान्तत्वाभिमानेनाह—अथ तावदिति । सिद्धान्त्याह—अन्तो निरवयव इति । प्रलयान्तत्वमधस्तान्निराकृतमिति भावः । नन्वधस्तान्निराकरणान्मा भूत् प्रलयान्तो विनाशः । विभागान्तश्च भविष्यति, किं परमाण्वन्तताग्रहेणेत्याशङ्कते—अथान्तो विभागः । निराकरोति—स न युक्त इति । नास्ति गुणिनि गुणोऽस्तीत्यर्थः । एतावन्तश्च कल्पाः संभविनः तत्र प्रथमे कल्पे अनैकान्तिकव्याघातौ द्वितीये विभागस्यानाधारताप्रसङ्गः । तृतीये तु त्रुटेरमेयत्वप्रसङ्ग इत्याह—एतावच्चैतत् कल्पजातं स्यादिति । परमाण्वन्ततां विभागस्य ब्रुवन्निरवयवं च मूर्तिमन्तं च परमाणुं प्रतिपद्यसे इति । अनन्तत्वे तु त्रुटेरमेयत्वप्रसङ्गो व्याघातः । प्रलयान्तत्वे च विभागस्यानाधार- 619/tha
त्वप्रसङ्गो व्याघातः । सावयवशब्दस्यार्थः समानजातीयारब्धं । न केवलं तदारब्धमपि तु तदाश्रितम् । तन्त्वाद्यारब्धं पटादिद्रव्यं तन्त्वाद्याश्रितं च । नन्वेवमपि कुतः सावयवत्वमित्यत आह—अवयवः तदाधारः तस्य समानजातीयारब्धस्य कार्यद्रव्यस्याधारः । *तस्मात् सावयवत्वं कार्यत्वविशेष इति । तस्मात् सावयवः परमाणुरिति ब्रुवता कार्यविशेषः परमाणुरित्युक्तं भवति

---

१२ स्थिते ] व्यवतिष्ठेतेnvt-C
१४ र्तिनी ] सर्वगतव्यापिनीnvt-C
१४ मूर्तिरिति ] पारमर्ष°nvt-C
२७ ब्धं ] जातीयावयवंnvt-C
३० *] यस्मा…कार्यविशेषःnvt-C
३१ स्मात् ] सावयवाः परमाणव इत्यति°nvt-C

। कार्यविशेषः परमाणुश्चेति व्याहतम्, आनन्त्येन तु त्रुटेरमेयत्वप्रसङ्गात् । सा खल्वनवयवस्य कल्पितस्य परमसूक्ष्मतया परमाण्वाख्या । तेन परमाणुरिति किमुक्तं भवति ? अनवयवोऽकार्यश्चेति । सावयव इति च किमुक्तं भवति ? सावयवः कार्यश्चेति । तस्मात् प्रतिज्ञापदयोर्व्याघात इत्यर्थः । अथ मा भूत् त्रुटेरमेयत्वमित्येकपरमाणुपूर्वकत्वं परमाणोः प्रतिपद्यसे । शेषमतिरोहितार्थम् । § 1979

यदि द्वे द्वे द्रव्ये अधिकृत्याभिधीयत इति । मध्यस्य हि परमाणोरुपर्यधःपार्श्ववर्तिभिः परमाणुभिर्ये संयोगास्तत्र मध्यस्य पूर्वेण परमाणुना यः संयोगो नासौ मध्यपश्चिमपरमान्वाश्रितः । एवं मध्यपश्चिमपरमाणुसंयोगो नैव मध्यमपूर्वपरमाण्वाश्रयः । एवमन्यत्रापि द्रष्टव्यम् । षडपि संयोगा भिन्नदेशा एवेति समानदेशत्वमसिद्धम् । अथ परमाणूनां संबन्धिनं परमाणुं मध्यमधिकृत्योच्यते तदेकाश्रिता हि संयोगाः षडपि भवन्तीति तत्राह—न किञ्चिद् बाध्यत इति । § 1980

स्यादेतत् । संयोगसमानदेशत्वेन परमाणवोऽपि संयुक्ताः समानदेशा इति पिण्डस्याणुमात्रत्वप्रसङ्ग इति परोक्तमनुवदति—यत् पुनरेतदिति । तद् दूषयति— तन्नेति । यत्र यत् समवेतं स तस्य देशो यथा रूपादीनां द्रव्यम् । न च परमाणवः क्वचित् समवयन्ति किं तु तत्संयोगाः । तेन देशवतां संयोगानामस्तु समानदेशता, न तु परमाणूनामदेशत्वादित्यर्थः । देशयति— ननु च कार्यकारणे इति । यथेह कुण्डे बदरमिति यथा बदरं कुण्डदेशमेवं तदवयवास्तदवयवाः । न च समवाय एव देशदेशिभावनिबन्धनमपि तु
620/tha संयोगोऽपि । न हीह कुण्डे बदरमिह पटे शुक्लत्वमिति चाधार्याधारप्रत्ययो विशिष्यते । तस्माद् बहूनां द्रव्याणां समानदेशत्वदर्शनात् नासिद्धो दृष्टान्त इत्यर्थः । तद् दूषयति—एतदनभ्युपगमेन प्रत्युक्तम् । द्रव्याणामेकत्र समवायेन समानदेशतां व्यासेधामो न तु संयोगेन । समवायेन हि समानदेशता स्थौल्यपरिपन्थिनी, यथा गन्धरसरूपस्पर्शाः समानदेशा न स्थौल्यमारभन्ते । तत् कस्य हेतोः ? एषाममूर्तानां समानदेशसमवायात् । मूर्तास्तु स्पर्शवन्तः समवायेनासमानदेशाः परस्परसंयोगिनो यदि स्थौल्यमारभन्ते किं बाध्यते ? तस्मात् संयोगेन समानदेशता न निषिध्यते, समवायेन तु प्रतिषिध्यते । सा हि स्थौल्यविरोधिनीति सिद्धम् । अभ्युपेत्यैवमुक्तं संयोगाः समान देशा इति । परमार्थतस्तु कुण्डबदरसंयोगस्य कुण्डवदरे आश्रयः । तदवयवकुण्डसंयोगस्य तु कुण्डबदरावयवा इति सिद्धं संयोगानामपि भिन्नदेशत्वमित्याह—न च संयोगा अपीति । उपसंहरति—षण्णां समानदेशत्वादिति वाक्यमिति । यत् पुनरुक्तम्, दिग्देशभेदो यस्यास्ति तस्यैकत्वं न युज्यते इति । परमाणोः किल भवदभिमतस्यैकस्य दिग्भागाः षट्, न चैकस्य दिग्भागेऽभेदोऽस्तीति षडेव परमाणवः । एतद् दूषयति—क एवमाह, दिग्देशभेदोऽस्तीति ? स्वरूपेणैका दिक् सर्वगता च । नास्या भेदोऽस्तीत्य-

३१ स्य ] °कुण्डबदर सं°nvt-C

र्थः । यद्येकैव दिक् क्व तर्हि परमाणावस्मादयं परमाणुः पूर्वोऽयं पश्चिम इत्यादयो बुद्धिव्यपदेशभेदा इत्यत आह—दिग्देशभेदाश्च दिशः संयोगाः । *एकत्वेऽपि दिश आदित्योदयदेशप्रत्यासन्नदेशसंयुक्तो यः स इतरस्माद् विप्रकृष्टदेशसंयुक्तात् परमाणोः पूर्वः । एवमादित्यास्तमयदेशप्रत्यासन्नदेशसंयुक्तो यः स इतरस्माद् विप्रकृष्टदेशसंयुक्तात् परमाणोः पश्चिमः । तौ च पूर्वपश्चिमौ परमाणू अपेक्ष्य यः सूर्योदयास्तमयदेशविप्रकृष्टदेशसंयुक्तः स म- 621/tha ध्यवर्ती । एवमेतयोः पूर्वपश्चिमयो र्यौ तिर्यग्देशसंबन्धिनौ मध्यस्य चार्जवेन व्यवस्थितौ पार्श्ववर्त्तिनौ तौ दक्षिणोत्तरौ परमाणू । एवं मध्यन्दिनवर्तिसूर्यसन्निकर्षविप्रकर्षावपेक्ष्य उपर्यधोभावो द्रष्टव्यः । संयुक्तसंयोगाल्पत्वभूयस्त्वे च सन्निकर्षविप्रकर्षौ । पूर्वसंख्यावच्छिन्नत्वं चाल्पत्वं परसंख्यावच्छिन्नत्वं च भूयस्त्वम् । तस्मादेकस्यापि अनवयवस्यापि परमाणोः परमाण्वन्तरसंयोगा अव्याप्यवृत्तय एव भागाः । एवं दिशोऽप्येकस्या अपि संयोगा एव भागाः । सोऽयं परमाणोः षट्केन युगपद्योगो मूर्तत्वमात्रप्रयुक्तो न सावयवत्वप्रयुक्त इति न सावयवत्वं गमयितुमर्हतीति । § 1981

तेन यदुच्यते प्रसङ्गसाधनं परैः, यन्निरवयवं तन्न षट्केन संयुक्तं यथा विज्ञानं तथा च परमाणुरिति व्यापकविरुद्धोपलब्धिरिति, तन्निरस्तम्, मूर्तत्वप्रयुक्तत्वेन षट्कसंयोगस्य सावयवत्वेन व्याप्तेरसिद्धेः । छायातपयोगोऽपि परमाणोरेकस्य संयोगस्याव्याप्यवृत्तित्वेनोपपन्नः । § 1982

नन्वनवस्था नोपपद्यते इत्युक्तं तत् कुत इत्यत आह भाष्यकारः—अनवस्थायां च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात् । § 1983

क्रियावत्त्वादीन् हेतून् सर्वथा विकल्प्य वार्त्तिककारो दूषयति—ये तु क्रियावत्त्वादीति । एतेन घटादिदृष्टान्त इति । एतेन असिद्धत्वेन । न हि घटादिकमवयविनमनभ्युपगच्छतो घटादिरस्तीत्यर्थः । मतुपश्चार्थान्तरे दृष्टत्वाद् विरुद्ध इति । क्रियां परमाणोरर्थान्तरमनिच्छतो मतुप्प्रयोगो विरुद्ध इत्यर्थः ॥ २५ ॥ § 1984

॥ इति निरवयवत्वप्रकरणम् ॥

## ४.२.४ बाह्यार्थभङ्गनिराकरणप्रकरणम्

622/tha

---

३ *] इत ऊर्ध्वंnvt-Cपुस्तके पंक्तिविपर्यासो जातःnvt-Jपुस्तकानुसारेणnvt-Vपुस्तकदृष्ट्या च पाठशोधनं कृतम्nvt-V पुस्तकेऽपि ग्रन्थपातः परत्र शोधितः ।
४ संयुक्तात्] °सयोगात्nvt-C
५ संयुक्तात्] °सयोगात्nvt-C
६ संयुक्तः] संयोगः nvt-C
७ यो] पूर्वपश्चिमयोः nvt-J
१० र्षौ] अपेक्ष्य...विप्रकर्षौ *omitted in*nvt-V.
११ स्यापि] अनवयवस्यापि nvt-J
२२ त्वादीति] °दिभिः *N. Var.*
२२ इति] एतेन...इति nvt-J

**बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ ४ । २ । २६ ॥** § 1986

विज्ञानवाद्याह—यदिदं भवान् बुद्धीरिति । यदि पटस्तन्तुभ्यो भिन्नो भवेत् तन्त्वतिरेकेण गौरिवाश्वातिरेकेणोपलभ्येत । न चोपलभ्यते । तस्मात् पट इति मिथ्याबुद्धिरियम् । एवं तन्तुरित्यपि मिथ्याबुद्धिरंशुभ्यो भेदेनानुपलम्भात् । एवमंशुरित्यपि । तदनेन क्रमेण परमाणुष्वपि बुद्ध्या विविच्यमानेषु याथात्म्यानुपलब्धेर्न बाह्यं वस्तु स्थूलं वा क्षोदीयो वास्तीति सर्वा एव बुद्धयः स्वाकारमबाह्यं बाह्यतया आलम्बमाना मिथ्याभूता इति । § 1987

बुद्ध्या...तदनुपलब्धिः ॥ ननु पटादयः सावयवा भवन्ति, एवं परमाणूनां त्वनवयवत्वाद् बुद्ध्या विवेचनाद् भावानां याथात्म्योपलब्धिरित्यत आह— परमाणवोऽपि भागशो विभज्यमानास्तावद् यावत् प्रलय इति ॥ २६ ॥
§ 1988

**व्याहतत्वादहेतुः ॥ ४ । २ । २७ ॥** § 1989

भवन्तु परमाणवोऽनवयवाः संयोगेभ्यस्त्वस्य षड्भो बुद्ध्या विविच्यमानस्य याथात्म्यमुपलभ्यत इति । तदेतद् दूषयति—व्याहतत्वादहेतुः ॥ यस्य विविच्यमानस्य याथात्म्यानुपलब्धिः, तत् कुतश्चिद् विवेचनीयम् । अवध्यभावे तदनुपपत्तेः । तथा च तेनावधिना क्वचिदवस्थातव्यम् । अनवस्थायां त्रुटेरमेयत्वप्रसङ्गादित्युक्तम् । तस्मात् परमाणुषु वा तत्संयोगेषु वा तेनावस्थातव्यम् । तथा च यतो विविच्यते भावः स एवास्यावधिर्याथात्म्येनोपल-
623/tha भ्यत इति बुद्ध्या विवेचनस्य सर्वभावानुपपत्त्या व्याघात इति सिद्धम् । दूषणान्तरमाह—सर्वभावानुपपत्तिरिति चेति । प्रमाणस्यापि भावान्तर्गतत्वेन तदनुपपत्तौ सर्वभावानुपपत्तेरनुपपत्तिरित्यर्थः ॥ २७ ॥ § 1990

**तदाश्रयत्वादपृथग्ग्रहणम् ॥ ४ । २ । २८ ॥** § 1991

तदा...पृथग्ग्रहणम् ॥ अपृथग्ग्रहणादिति ब्रुवाणः प्रष्टव्यो जायते किं विलक्षणबुद्धिबोध्यत्वाभाव उत देशभेदाभावः उत तन्तुव्यतिरेकेण देशान्तरेऽनुपलम्भ इति । न तावदाद्यः कल्पः, तन्तवो हि भिन्नाभबुद्धिबोध्याः पटस्त्वभिन्नाभबुद्धिबोध्य इति । नापि द्वितीयः, तन्तूनामंशुदेशत्वात् पटस्य च तन्तुदेशत्वात् । तस्मात् तन्तुभ्योऽन्यत्रादर्शनमपृथग्ग्रहणम् । तच्च भेदेऽपि तदाश्रितत्वेनोपपद्यमानं नाभेदं गमयितुमर्हतीत्यर्थः । § 1992

भाष्यं—बुद्ध्या विवेचनात्तु भावानां पृथग्ग्रहणमतीन्द्रियेष्वणुषु । यत्र खल्ववयवावयविनावैन्द्रियकौ तत्र पृथग्ग्रहणमविवेचकानामस्फुटतरम-

---

१० बुद्ध्या ] विवेचनाभावात् न याथात्म्यानुपलब्धिः**nvt-J**
२० स्य ] विक्ष्क्रियमानस्य**nvt-C**
२१ स्यापि ] भावात् तदन्तर्गतत्वेन**nvt-C**
२२ त्तौ ] सर्वभावानुपपत्तिरित्यर्थः**nvt-C**
२५ त्वाभाव ] विलक्षणव्यवहाराभावः**nvt-C**

तीन्द्रियेभ्यस्त्वणुभ्य आनुमानिकेभ्यः प्रत्यक्षदृश्यानां तदाश्रितानामवयविनां पृथग्ग्रहणमित्यतिस्फुटमित्यर्थः ॥ २८ ॥ § 1993

प्रमाणतश्चार्थप्रतिपत्तेः ॥ ४ । २ । २९ ॥ § 1994

संप्रत्यैन्द्रियकेऽप्यवयवेऽवयविनो विविच्यमानस्य याथात्म्येन पृथग्ग्रहणमाह—प्रमाणतश्चार्थप्रतिपत्तेः ॥ इति । यदस्ति पटादिकमवयविद्रव्यम्; यथा च स्वावयवसमवेतत्वेन गुणाधारतया च, यन्नास्ति शशविषाणादि, यथा च कार्यकारणभावेन, तत्सर्वं प्रमाणत उपलब्ध्या सिध्यति । सुगमं 624/tha
भाष्यम् ॥ २९ ॥ § 1995

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ४ । २ । ३० ॥ § 1996

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ४ । २ । ३१ ॥ § 1997

यदुक्तं प्रमाणोपपत्त्यनुपपत्तिभ्यां न सर्वभावानुपपत्तिरिति तत्र प्रत्यवतिष्ठते विज्ञानवादी—स्वप्नविषयाभिमान...मानः ॥ न खलु वास्तवः प्रमाणप्रमेयभावः, किं त्वनादिवासनानिबन्धनकल्पनाधीनः । यथा हि परमार्थतो न स्वप्ने सन्ति विषयाः, अथ च प्रतिभान्ति कल्पनामात्रेण । तथा च सांवृतेनैवापरमार्थसता प्रमाणप्रमेयभावेन बाह्यार्थशून्यता साध्यते परमार्थसती प्रत्ययानाम् । दृष्टा च मिथ्याप्रत्ययानामपि तत्त्वप्रतिपत्तिहेतुतेत्यावेदितं पुरस्तादित्यर्थः । तदेतद् व्याचष्टे वार्त्तिककारः—यथा स्वप्ने न विषयाः सन्तीति ॥ ३१ ॥ § 1998

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ४ । २ । ३२ ॥ § 1999

ननु स्वप्नप्रत्ययानामस्त्वेवंधर्मकत्वम्, ये पुनरमी जाग्रत्प्रत्ययाः स्तम्भ इति वा कुड्यमिति वा, किमायातं तेषामत्यन्तवैलक्षण्यादित्य आह—मायागन्धर्वेति । माया...वा ॥ जाग्रत्प्रत्यया अप्येवंविधा सहस्रशो दृश्यन्ते । न चैते स्तम्भकुड्यादिप्रत्ययास्ततो विलक्षणा इत्यर्थः ॥ ३२ ॥ § 2000

हेत्वभावादसिद्धिः ॥ ४ । २ । ३३ ॥ § 2001

तदेतद् दूषयति—हेत्वभावादसिद्धिः ॥ ३३ ॥ § 2002
625/tha

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ४ । २ । ३४ ॥
§ 2003

१४ तो ] परमार्थतो nvt-J
१५ च ] तस्मात् nvt-J
१६ ते ] सिध्यति nvt-C
१७ पि ] मिथ्याज्ञानानामपि nvt-J
२२ मिति ] कुम्भ इति nvt-C

तद्व्याचष्टे भाष्यकारः—स्वप्नान्ते विषयाभिमानवदिति । अन्तशब्दोऽवयववचनोऽप्याश्रितत्वमात्रेणावस्थायां प्रयुक्तः । तेन स्वप्नावस्थायां जागरितावस्थायामित्यर्थः । एतदुक्तं भवति, स्वप्नविज्ञानस्य मिथ्यात्वमिच्छता बाधकमन्तरेण तदनुपपत्तेर्जाग्रत्प्रत्ययोऽस्य बाधको वक्तव्यः । न चासावसमीचीनस्तद् बाधितुमुत्सहत इति समीचीनत्वं जाग्रत्प्रत्ययस्याभ्युपगन्तव्यम् । तथा च जागरितान्ते विषयोपलब्धिवदित्यनुपपन्नम् । § 2004

वार्त्तिकम्—ख्यातिरिति चेत् । प्रत्ययत्वमेव स्वप्नोदाहरणसहितं प्रमाणप्रमेयाभिमानमिथ्यात्वे हेतुरित्यर्थः । विपर्यये च सामर्थ्याभावादिति । पूर्वं प्रतिबुद्धेनेति विशेषणं विवक्षित्वोक्तम् । अधुना त्वनुपलब्धेरिति विवक्षित्वोच्यत इत्यपौनरुक्त्यम् । अत्र विज्ञानवादी स्वपक्षे प्रमाणमाह—न चित्तव्यतिरेकिणो विषयाः ग्राह्यत्वाद् वेदनावदिति । § 2005

इदमत्राकूतम्, विज्ञानस्य हि बाह्यार्थो ग्राह्यो भवन् निराकारस्य सत्तामात्रेण वा भवेत् कारणत्वेन वा, एकसामग्र्यधीनत्वेन वा विज्ञानाहितफलाधारतया वा ? न तावत् सत्तामात्रेणान्यस्यान्यो विषयः, सत्तामात्रस्य विषयान्तरेष्वपि भावेन सर्वेऽर्थाः सर्वस्य ज्ञानस्य विषया इति सर्वसर्वज्ञतापत्तिः । न च सत्तामात्रमपि विषयव्यवस्थापकम्, असतोऽपि विषयत्वात् । अत+एव न कारणत्वेन विषयभावः । अपि च चक्षुरादयोऽपि विज्ञानस्य कारणमिति विषया रूपविज्ञानस्य प्रसज्येरन् । वर्तमानावमासि च विज्ञानं न भवेत्, क्षणिकत्वेनोत्पादकस्यार्थक्षणस्योत्पाद्यविज्ञानसमयेऽतिपातात् । एकसामग्र्यधीनत्वेन तु विषयत्वे वर्तमानावभासितोपपद्यते । सा तु नोपपद्यते असतोरप्यतीतानागतयोर्ग्रहणेनाव्यापकत्वादतिव्यापकत्वाच्च विज्ञानकालस्य इन्द्रियादिक्षणस्यैकसामग्र्यधीनस्यालम्बनत्वप्रसङ्गात् ।
626/tha विज्ञानाहित फलाधार आलम्बनमिति चेत्, किं पुनर्विज्ञानेनार्थे जन्यते ? प्राकट्यम् । न चैतदर्थधर्मोऽपि शुक्लादिवत् सर्वपुरुषसाधारणं ज्ञानाहितस्यार्थधर्मस्यापि ज्ञानवन्तं प्रत्यसाधारणत्वदर्शनात् । यथा यस्यापेक्षाबुद्धिजनितं द्वित्वमर्थधर्मः, सोऽपेक्षाबुद्धिमन्तमेव पुरुषं प्रत्यसाधारण इति । तन्न, अव्यापकत्वात् । सन्ति खल्वतीतानागतविषयाणि सहस्रशो विज्ञानानि शब्दानुमानजानि सर्वज्ञज्ञानानि च, न चैतान्यर्थे फलमाधातुमुत्सहन्ते, अर्थस्य तदानीमभावात् । न खल्वस्तिसंभवः अप्रत्युत्पन्नो धर्मी धर्मश्चास्याविनश्यन् प्रत्युत्पन्नरूप इति । स्वकारणादात्मानात्मप्रकाशनशक्तियुक्तमुत्पद्यते ज्ञानं तादृशं येन कश्चिदेवास्य विषयो न सर्व इति चेत् ? हन्त भोः शक्तेः शक्यनिष्ठत्वात् किमस्य शक्यमिति वक्तव्यम् । अर्थ इति चेत् ? न । न तावदयमस्य निर्वर्त्यः, अर्थस्यैव ज्ञाननिर्वर्तकत्वात् । न चार्थाधारं फल-

---

३ ता] स्वप्नज्ञानस्यायाथार्थ्यमि°nvt-C
१५ या] सर्वविषयाःnvt-C
१६ म्] विषयव्यापकम्nvt-J
२० तिपातात्] विनिपातात्nvt-C
२२ स्य] विज्ञानकालस्यnvt-J
२८ ज्ञानानि] सर्वज्ञज्ञानानि nvt-J
२९ भावात्] असंभवात् nvt-C
२९ न्नो] असन्ननुत्पन्नरूपो nvt-C

माधत्त इत्युक्तम् । न चासति शक्ये शक्तिसंभवः । तस्मान्निराकारं विज्ञानं बाह्यं गोचरयतीति मनोरथमात्रम् । § 2006

अस्तु तर्हि साकारमेव बाह्यगोचरम् । तथा हि नीलाद्याकारं विज्ञानं नीलाद्यर्थगोचरम्, नीलमस्य स्वरूपं यतः । अत्रैवं वक्तव्यम्, किं सर्वात्मना सारूप्याद् विषय आहो कथंचित् सारूप्यात् ? न तावदर्थस्य जडात्मनो ज्ञानेन प्रकाशात्मना सर्वथा सारूप्यम्, सारूप्ये वा ज्ञानमपि जडं भवेदिति ज्ञानत्वहानिः एकदेशेन च सारूप्ये तत् क्व नाम नास्तीति सर्वं ज्ञानं सर्वं वेदयेत् । अपि च नीलज्ञानात् समनन्तरप्रत्ययादुत्पन्नं ज्ञानं न तथा नीलार्थसरूपं यथा नीलज्ञानसरूपमिति समनन्तरप्रत्यय एवास्योत्पत्तिसारूप्याभ्यां विषयः स्यात्, न चैतदस्ति । तस्मान्न सारूप्यसमुत्पत्ती अपि विषयलक्षणम् । स्तामस्य सारूप्यसमुत्पत्ती मनस्कारेन्द्रियादिभिस्तथापि यमध्यवस्यति सोऽस्य विषयः । अर्थं चाध्यवस्यतीति अर्थ एवास्य विषयो न मनस्कारादीति चेत् ? § 2007

627/tha

अथ कोऽयमध्यवसायः ? न तावद् ग्रहणम् । न खलु द्वावाकारौ गृह्येते, नीलमित्यनुभवो न तु नीले इति । स्वाकारस्य बाह्ये समारोपोऽध्यवसाय इति चेत् ? स किं गृह्यमाणे बाह्ये उतागृह्यमाणे ? न तावद् गृह्यमाणे । न हि नीलद्वयं प्रकाशत इत्युक्तम् । न चारोपविषयमगृह्णन्नारोप्यमारोपयितुमर्हतीति । न ह्यननुभवन् पुरोवर्ति शुक्लभास्वरं रजतमारोपयति । अपि चागृह्यमाणे बाह्ये प्रवृत्तिनियमो न भवेत् । तदितरेषामप्यगृह्यमाणत्वेनाविशेषात् तेष्वपि प्रवृत्तिप्रसंगात् । न च साकारज्ञाननये बाह्यसद्भावे प्रमाणमस्ति अगृह्यमाणत्वात् । ननु नीलाद्याकारस्य कादाचित्कत्वमेव प्रमाणम् । तथा हि यद् यस्मिन् सत्यपि कादाचित्कवत् तत् तदितरापेक्षम् । यथा सत्यपि स्वोपादाने विच्छिन्नगमनवचनप्रतिभासाः प्रत्ययाः सन्तानान्तरापेक्षाः, तथा च सत्यप्यालयसन्ताने षडपि प्रवृत्तिप्रत्यया इति स्वभावहेतुः । वासनापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पाद इति चेत् ? नन्वेकसन्ततिपतितानामालयविज्ञानानां तत्तत्प्रवृत्तिविज्ञानजननशक्तिर्वासना । तस्याश्च स्वकार्यजननं प्रत्याभिमुख्यं परिपाकः । तस्य च प्रत्ययः स्वसन्तानवर्ती पूर्वक्षणो हेतुः सन्तानान्तरापेक्षानभ्युपगमात् । तथा च सर्वेऽपि आलयविज्ञानसन्तानपतिताः परिपाकहेतवः, न वा कश्चिदपि, अविशेषात् । क्षणभेदाच्छक्तिभेदस्तस्य च कादाचित्कत्वात् कार्यकादाचित्कत्वमिति चेत् ? नन्वेकस्यैव नीलविज्ञानजननसामर्थ्यं शक्तिप्रबोधजननसामर्थ्यं चेति । क्षणान्तरस्य तन्न स्यात् । सत्त्वे वा कथं क्षणभेदात् सामर्थ्यभेद इत्यालयसन्तानवर्तिनः सर्वे समर्था इति समर्थहेतुसद्भावे कार्यक्षेपानुपपत्तेः ।

---

४ रूपं ] सरूपवत् nvt-J
६ ना ] अजडेन nvt-J
१० त्तिसारूप्याभ्यां ] प्रत्ययतत्सारूप्याभ्यां nvt-C
२२ हि ] तथापिnvt-C
२३ स्वोपादाने ] सोपानेnvt-C
२३ तिभासाः ] °गमनरचनप्र°nvt-C

स्वसन्तानमात्राधीनत्वे तु निषेध्यस्य कादाचित्कत्वस्य विरुद्धं सदातनत्वम् । तस्योपलब्ध्या तु कादाचित्कत्वं निवर्तमानं हेत्वन्तरापेक्षत्वेन व्यवतिष्ठत इति प्रतिबन्धसिद्धिः । न च सन्तानान्तरनिमित्तानि प्रवृत्तिविज्ञानानि सन्तान्तराणामपि नित्यसन्निधानाद् विज्ञानानामदेशात्मकत्वेन दूरत्वानुपपत्तेर्व्यतिरिक्तस्यानभ्युपगमात् । नापि कालतो विप्रकर्षसंभवः अपूर्वसत्त्वप्रादुर्भावानभ्युपगमात् । 628/tha तदिदमनुमानं सौत्रान्तिकानां बाह्याभ्युपगम इति । तदयुक्तम्, स्वसन्तानमात्रनिमित्तत्वेऽपि नीलादिविज्ञानानां कादाचित्कत्वोपपत्तौ संदिग्धव्यतिरेकित्वेन हेतोरनैकान्तिकत्वात् । ननूक्तं न क्षणभेदः कार्यभेदहेतुरिति, कल्पितस्य सन्तानस्य सर्वसामर्थ्यविरहिणो भेदः कार्यभेदहेतुरिति न तु परमार्थसतः क्षणस्य भेदः कार्यभेदहेतुरिति कोऽन्यो भदन्ताद् वक्तुमर्हति ? ननु यदि क्षणभेदः शक्तिभेदहेतुस्ततो भिन्नानां क्षणानां नैका शक्तिः स्यात् । तथा चैकेन केनचिन्नीलज्ञाने जनिते पुनस्तन्नीलज्ञानं क्षणान्तरान्न स्यात् । यदि भिन्नानां नैकं सामर्थ्यम्, अथ बाह्यार्थवादिनोऽपि कथं भिन्नानां नीलोत्पलसन्तानानामेकनीलोत्पलाकारज्ञानधारा सामर्थ्यम् । यद्युच्यते, अन्यदेव तन्नीलोत्पलविज्ञानं यन्नीलोत्पलसंतानान्तरात् । वयमपि ब्रूमहे, अन्यदेव तन्नीलविज्ञानं यत्क्षणान्तरादिति । तस्मात् स्वकारणभेदात् कश्चिदेव तादृशः स्वलक्षणभेदो जायते, यः कश्चिदेव कार्यभेदं जनयति न कार्यान्तरमिति । तस्मात् साकारस्यापि ज्ञानस्यार्थो न गोचरो न चागोचरः शक्योऽनुमातुमिति । न च प्रत्यक्षवदनुमानमप्यर्थगोचरम् । तस्मात् साधूक्तं वार्त्तिककृता, न चित्तव्यतिरेकिणो विषयाः ग्राह्यत्वाद् वेदनावदिति । नीलादयो हि विषया उभयवादिसिद्धास्तेषां चित्ताद् भेदाभेदयोर्विप्रतिपत्तिः । तत्रैषां ग्राह्यत्वादित्ययं चित्तव्यतिरेकः परैरभ्युपगतः प्रतिषिध्यते । यावांश्च प्रतिषेधः स सर्वोऽनुपलब्धेरिति ग्राह्यत्वादित्ययं हेतुर्विरुद्धव्याप्तोपलब्धिः । प्रतिषेध्यश्चित्तव्यतिरेकः, तद्विरुद्धस्तदव्यतिरेकः । तेन व्याप्तं ग्राह्यत्वम् । तस्योपलब्धिरेव तन्निषेध्यस्यानुपलब्धिरिति । § 2008

अत्र तावदेतद् वक्तव्यम्, ग्राह्यत्वस्याभेदेन व्याप्तौ सिद्धायां भेदं निवर्तयेत् । न त्वभेदेनास्य व्याप्तिः । तथा हि, यदेतन्नीलं स्थूलं विच्छिन्नमनुभूयते तस्यास्य विच्छेदः स्थौल्यं च न ज्ञानस्यात्मा । नानादिग्देशव्यापिता हि स्थौल्यम् । न चैकमदिग्देशात्मकमनवयवं विज्ञानं नानादिग्देशव्यापि संभवति । यथाह, § 2009
629/tha

> तस्मान्नार्थेन विज्ञाने स्थूलाभासस्तदात्मनः ।
> एकत्र प्रतिषिद्धत्वाद् बहुष्वपि न संभवः ॥ इति ॥ § 2011

४ पि ] सन्तत्यधिकतराणामपिnvt-C
१० हेतुरिति ] क्षणस्य कार्यभेदहेतुत्वमि° nvt-C
१४ म् ] ज्ञानाधानसा° nvt-J
२६ व्याप्तौ ] सत्यां nvt-C
२७ ते ] °मुपलभ्यते nvt-C

एवमर्थविच्छेदोऽपि न ज्ञानात्मकः । तस्य तथात्वे परमार्थतोऽर्थाद् विच्छिन्नं ज्ञानं स्यात् । तस्मादयमपि न ज्ञानमित्यसन्नभ्युपगन्तव्यः । न च सदसतोरेकत्वमित्यनात्मापि विज्ञाने प्रकाशते इत्यनिच्छताप्यभ्युपेयम् । तथा च सदपि प्रकाशिष्यते । नन्वनात्मन्यर्थेऽकिञ्चित्करं विज्ञानं कथमर्थप्रकाशकम् ? अथाकिञ्चित्करं ज्ञानं स्थौल्ये कथमस्य प्रकाशकम् ? स्वभावादिति चेत्, अत्राप्यसौ न दण्डवारितः । यद्धि यस्य स्वभावतः, तत्र तस्य नान्यापेक्षा, यथा लिङ्गस्य स्वसाध्यसंबन्धे । स्वभावतश्चार्थस्य विज्ञानमिति न तदीयत्वे अन्यदपेक्षते । असंबन्धात् कथं विज्ञानमर्थस्येति चेत्, अथ संबन्ध एव संबन्धिनोः कथम् ? संबन्धान्तरकल्पने चानवस्था । तस्माद् यथा संबन्ध एव संबन्धान्तरमन्तरेण संबन्धिनोः, एवं ज्ञानमपि संबन्धान्तरमन्तरेणार्थस्येति समानम् । न चातिप्रसंगः । स्वकारणादुत्पन्नस्य कस्यचिद् विज्ञानस्य कश्चिदेव विषयो नान्यः । न च भावस्वभावा नियोगं पर्यनुयोगं वार्हन्ति, एवं भवत मा एवं भूतेति वा कस्मान्न एवमिति वा ? अकिञ्चित्करस्य रूपविज्ञानस्य कथं रूपविषयतेति चेत् ? किं रूपविज्ञानं प्रमाणं विवक्षित्वेदमुच्यते, आहो फलं विवक्षित्वा ? यदि प्रमाणं ततो न तदकिंचित्करं रूपे, तत्र हानोपादानोपेक्षाप्रसवहेतुत्वात् । अथ फलं, तदयुक्तम् । क्व नाम फलं किञ्चित्करम् ? न हि गतिजन्या नगरप्राप्तिश्चैत्रस्य चैत्रनगरसंयोगसमवायाय किञ्चित् करोति । एवमर्थविषयत्वाय स्वाभाविकाय न ज्ञानेन किञ्चिदपरं जनयितव्यम् । अर्थप्रतिबद्धत्वं ज्ञानस्यार्थविषयत्वम् । न हि ज्ञानमनुव्यवसायज्ञानेन निरूप्यमाणमर्थनिरूपणेन विना शक्यं निरूपयितुमित्युक्तम् । कर्मण्यसमवेतं कथं कर्मण इति चेत् ? अथ फलसमवायः कर्मण्यसमवेतः कथं कर्मणः ? तत्पारतन्त्र्यादिति चेत् ? किमिदं तत्पारतन्त्र्यम् ? तन्निरूपनाधीननिरूपणत्वमिति चेत् ? तदिहापि समानमन्यत्राभिनिवेशात् । तस्मादभेदेन ग्राह्यत्वस्याव्याप्तत्वाद् ग्राह्यत्वं विरुद्धव्याप्तं 630/tha न भेदं निवर्तयितुमर्हतीति दूषणे स्थवीयसि सत्येव दूषणान्तरमाह वार्त्तिककारः—वेदना सुखदुःखे चित्तं विज्ञानमिति । अभ्युपेत्याह, अथाभिन्नं विज्ञानं वेदनात इति । यथाङ्गुल्यग्रं न तेनैवाङ्गुल्यग्रेण स्पृश्यते, एवं ज्ञानं न तेनैव ज्ञानेन ग्रहीतुं शक्यम् । ननु न गृहीतिर्ग्राह्या, न ह्यस्याः कर्मभावो विद्यते । क्रियाफलशालि हि कर्म । न चास्यामस्ति फलान्तरम् । अपि तु स्वयमाविर्भूतस्वभावा गृहीतिरपराधीनप्रकाशा ग्राह्येत्युच्यते । यदि चैषा स्वयं न प्रकाशेत, तन्नार्था अपि प्रकाशेरन्, तत्प्रकाशाधीनप्रकाशा हि ते । तथा हि यद् यत्प्रकाशाधीनप्रकाशम्, तत् तस्मिन् प्रकाशमाने प्रकाशते, यथा दण्डप्रकाशाधीनप्रकाशो दण्डिप्रकाशः, ज्ञानप्रकाशाधीनप्रकाशाश्च विषयप्रकाशा इति स्वभावहेतुः । न च ज्ञानादन्यत् स्वसंवेदनं न दृष्टमित्येतावता स्वसंवेदनविज्ञानं न भवति । न हि दर्शनादर्शनाभ्यां हेतुर्गमकः, अपि तु

७ स्य ] स्वभावः तस्य**nvt-C**
२३ किमिदं ] तत्°*Om***nvt-C**
२९ र्म ] °शालितया कर्म भवति**nvt-C**
३४ इति ] प्रकाशश्च विषय इति**nvt-C**

स्वसाध्याविनाभावात् । स च विपर्यये बाधकप्रमाणप्रवृत्त्या सिध्यतीति कृतं दृष्टान्तेनेत्यत आह—न हि कर्म च क्रिया चैकं भवतीति । § 2012

इदमत्राकूतम् । किं पुनरिदमर्थानां संवित्प्रकाशाधीनप्रकाशत्वं नाम ? न हि संवित्प्रकाशेनार्थे प्रकाशान्तरं जन्यते । अपि च लिङ्गप्रकाशाधीनप्रकाशो हि लिङ्गिप्रकाशः । न च लिङ्गे प्रकाशमाने प्रकाशते, किं तु लिङ्गप्रकाशे विनष्टे । यद्युच्येत न ज्ञानादतिरिक्तोऽस्त्यर्थप्रकाशो ज्ञानप्रकाशश्च किं तु ज्ञानमेव स्वसंवेदनमर्थस्य चात्मनश्चेति । एवं तर्हि किमायातम् ? न ह्यात्मैवात्मायत्तः । न च ज्ञानमेवात्मनः परस्य च प्रकाश इति सिद्धम् । अन्यो हि ज्ञानप्रकाशो मानस ऐन्द्रियकश्चार्थप्रकाशः । न च प्रमाणज्ञानप्रकाशाधीनोऽर्थप्रकाशः किं तु प्रमाणज्ञानसत्ताधीनः, फलाधीनं तु न किंचिदित्यावेदितम् । तत्सिद्धमेतत्, विवादाध्यासितं विज्ञानं स्वप्रकाशाद् भिन्नं प्रकाशमानत्वात्, सत्त्वान्तरप्रकाशस्य सत्त्वान्तरविज्ञानवत् । 631/tha तदनेनाभिसन्धिनोक्तम्—न हि कर्म च क्रिया चैकं भवतीति । एतेन सहोपलम्भनियमादभेदो नीलतद्धियोः इति परास्तं वेदितव्यम् । अर्थज्ञानयोरेकोपलम्भयोरेकोपलम्भतैव नास्ति कुतः पुनरस्य नियम इति । अथ यथाश्रुतः सहोपलम्भो हेतुरित्युच्यते ततो विरुद्धः, अभेदे सहार्थासंभवात् । कृतप्रपञ्चश्चायमर्थोऽस्माभिर्न्यायकणिकायाम् । इह तु विस्तरभयान्न प्रपञ्चित इत्युपरम्यते । § 2013

सोऽपि दृष्टं विज्ञानभेदमनुयोक्तव्य इति । न स्वसन्तानमात्रनिबन्धनो विज्ञानभेदो भवितुमर्हति नीलपीतादिरूपः । नापि सन्तानान्तराधिपत्यसन्निधानासन्निधाननिबन्धनः, विज्ञानानामदेशात्मकानां स्वरूपेण देशविप्रकर्षायोगात् । नापि कालविप्रकर्षोऽपूर्वसत्त्वप्रादुर्भावाभावादिति भावः । शङ्कते—स्वप्नवद् विज्ञानभेदमिति । बाह्याभावेऽप्याध्यात्मिको विज्ञानभेदहेतुरस्तीति भावः । निराकरोति—सोऽपीति । स्वप्नज्ञानमपि पारम्पर्येण बाह्यनिबन्धनमित्यर्थः । अबाह्यनिमित्तकत्वं स्वप्नप्रत्ययस्याभ्युपेत्याह—अथ स्वप्नपक्षेऽपि इति । वर्गः पक्षः । न चैकं विज्ञानं चिन्तनीयमपरं चिन्तकमिति वक्तव्यम्, व्यतिरिक्तालम्बनत्वानभ्युपगमादिति भावः । अभ्युपेत्य चाबाह्यनिमित्तत्वं स्वप्नप्रत्ययानामेतदुक्तम् । बाह्यनिमित्तमेव तु यदुक्तं तदेव पारमार्थिकमित्याह—ये चैते स्वप्नप्रत्यया इति । ममापीति । अपिशब्दः संभावनायाम् । मम पक्षे संभाव्यत एतत् यत् सर्व+एव प्रत्यया मिथ्या भवन्तीत्यर्थः । सुगममितरत् । मिद्धो निद्रा विषयमन्तरेण विज्ञानस्य स्पष्टतास्पष्टता च वक्तव्येति । सामान्यविशेषतद्वतां ग्रहणं स्पष्टता । सामान्यमात्रस्य ग्रहणमस्पष्टता । तच्चैतदुभयमसति विषये दुष्करं तदाकारोत्पत्तेरेवाशक्यत्वादित्यर्थः

५ च ] न चnvt-C
७ श्चेति ] स्वात्म°nvt-C
१२ त् ] °प्रकाशवत्nvt-C
३१ मिद्धो ] मिथ्याnvt-C
३२ व्येति ] विज्ञानस्फुटता चावक्तव्येतिnvt-C
३२ ता ] स्फुटताnvt-C
३३ ता ] अस्फुटताnvt-C

। शङ्कते—असत्यर्थे विज्ञानभेदो दृष्ट इति चेत् ? स्वप्नमायागन्धर्वनगरमृग-
तृष्णादिविज्ञानेष्वनुवर्तमानेषु विषयेन्द्रियमनोदोषनिमित्तत्वमस्तु । ये पुनरमी
प्रेतानां सर्वेषामनुवृत्तिमन्तः पूयपूर्णनदीप्रत्यया न ते बाह्यविषया दोषवशाद्भ-
वितुमर्हन्ति, दोषनिबन्धनत्वे बहूनामनुवृत्तेरभावात् अदुष्टेन्द्रियार्थसन्निकर्षजत्वे
वा जलरुधिराकार विरोधात् । तस्मादनादिवासनावैचित्र्यलब्धजन्मतयार्थ- 632/tha
निरपेक्षा एव विचित्राकारा बुद्धय उदयन्ते व्ययन्ते चेति साम्प्रतमिति शङ्कार्थः
। न तत्र नद्यस्तीति स्वमतदार्ढ्येनोक्तं बौद्धेन । निराकरोति—न व्याघातादिति
। § 2014

अयममिसन्धिः । जलरुधिरयो रसवीर्यविपाकादिभेदात् तोयरसवीर्यपरिपाकादिदर्शनात् नद्यास्तोयपूर्णत्वे निश्चिते पूयपूर्णत्वनिश्चयः प्रेतानां मिथ्येति निश्चये तदनुवृत्तेर्दोषानुवृत्तिः कल्पनीया, दोषश्च प्रेतशरीरनिर्वर्तकं कर्मैव । यथोक्तं

तुल्यकर्मविपाकोत्पन्नाः प्रेता इति ।
कर्मणो वासनान्यत्र फलमन्यत्र कल्प्यत इति ।§ 2017

फलं पुत्रपश्वन्नादि । तद् यदि ज्ञानं तदा यत्रज्ञानसन्ताने कर्मवासना तत्रैव पुत्राद्याकारं ज्ञानं फलमिति सामानाधिकरण्यमुपपद्यते । पुत्रपश्वन्नादौ त्वर्थरूपे फले वैयधिकरण्यं स्यात् । तथा चातिप्रसङ्ग इति भावः । निराकरोति—तन्नानभ्युपगमादिति । न पुत्रादि स्वरूपेण फलमपि तु तन्निमित्ता प्रीतिः । तस्या एव चेतनेन काम्यमानत्वात् तल्लक्षणत्वाच्च फलस्येति भावः । मुक्तकेनार्थं साधयित्वा प्रयोगानाह—मदीयाचित्तादिति । यदि चित्तमात्रं पक्षीक्रियेत तदा दृष्टान्तो न स्यादित्यत उक्तं मदीयाचित्तादिति । मदीयाहङ्कारानास्पदत्वे सतीति विशेषणान्न स्वचित्तेन व्यभिचारः । आरोपनिराकरणार्थत्वाच्च हेतूनां नासमर्थविशेष्यतेति ॥ ३४ ॥ § 2018

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ४ । २ । ३५ ॥ § 2019

अपि च मिथ्योपलब्धीनां बाह्यानालम्बनत्वमास्थाय तत्त्वबुद्धीनां
बाह्यानालम्बनत्वं साधनीयम् । तासां च बाह्यानालम्बनत्वं बाधकाधीनम् ।
बाधकं चार्थे समारोपितरजताद्यभिमानं निवर्तयति, न तु पुरोऽवस्थितमर्थ-
सामान्यं शुक्लभास्वरम् । तस्मान्न बाधकानुरोधादपि मिथ्याज्ञानं बाह्यानाल-
म्बनमिति स्वप्नवदिति दृष्टान्तः साध्यविकल इत्याह—एवं च सतीति । 633/tha
मिथ्याज्ञानस्य प्रधानाश्रयत्वे मिथ्योपलब्धेर्विनाशः तत्त्वज्ञानाद् बाधकात् ।
स्वप्नविषयाभिमानप्रणाशवत् प्रतिषेधो, न त्वर्थस्य सामान्यस्यापीति शेषः ।
शेषं भाष्ये । भाष्यं च सुबोधम् ॥ ३५ ॥ § 2020

३२ तिषेधो ] प्रतिबोधःnvt-J

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ४ । २ । ३६ ॥ § 2021

यस्तु माध्यमिको मिथ्याबुद्धिदृष्टान्तेन बाह्यापह्नवं कृत्वा तेनैव दृष्टान्तेन विज्ञानापह्नवं कृत्वा विचारासहत्वं तत्त्वं भावानां व्यवस्थापयां बभूव, तं प्रत्याह—बुद्धे...म्भात् ॥ अर्थे हि निषिद्धे भवेदप्येतत् । तद्व्यवस्थापने तु तद्वदेवाप्रत्यूहं बुद्धिसद्भावोऽपि सिध्यति । न चैवंवादिनः प्रमाणमस्ति, असता च प्रमाणेन विचारासहत्वं भावानां व्यवस्थापयन् श्लाघनीयप्रज्ञो देवानांप्रिय इति । न च कल्पनामात्रनिर्मित उपायस्तत्त्वज्ञानाय पर्याप्तः । न च वनस्पत्यादितत्त्वज्ञानस्य मिथ्याहस्तिज्ञानं निबन्धनम्, अपि तु प्रणिहितमनस इन्द्रियार्थसन्निकर्षविशेषः । न चासौ मिथ्याज्ञानसमये आसीत् । न हि मोहाभ्यासः समीचीनाय ज्ञानाय कल्पते । स हि मोहमेव द्रढयतीति सर्वमवदातम् । सोऽयं माध्यमिकोऽनुभूयमानां मिथ्याबुद्धिं नापह्नोतुमर्हति । तथा च मिथ्याबुद्धिं प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यमित्युक्तम् ॥ ३६ ॥ § 2022

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ४ । २ । ३७ ॥ § 2023

तत्त्व...पत्तिः ॥ मिथ्याबुद्ध्या स्वनिमित्तं लक्ष्यते । तेन मिथ्याबुद्धिनिमित्तस्य द्वैविध्यमित्यर्थः । यत्र स्थाणौ पुरुषज्ञानं भवति तत्र तत्त्वं स्थाणुरिति, प्रधानं पुरुष इति, *यः प्रत्ययः पूर्वं पुरुषेऽभूदित्यर्थः । एवं तावद् रूपवद् द्रव्यविषयबुद्धीः बाह्यालम्बनाः प्रतिपाद्य गन्धादिबुद्धीरपि प्रतिपादयति भाष्य-
634/tha कारः गन्धादौ च प्रमेय इति । प्रकृतमुपसंहरति—तस्मादयुक्तमेतदिति ॥ ३७ ॥ § 2024

॥ बाह्यार्थभङ्गनिराकरणप्रकरणम् ॥

### ४.२.५ तत्त्वज्ञानविवृद्धिप्रकरणम्

समाधिविशेषाभ्यासात् ॥ ४ । २ । ३८ ॥ § 2026

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम्, अथ तत्त्वज्ञानं कथमुत्पद्यत इति । न तावदागमत उपपत्तितो वा तत्त्वज्ञानमहङ्कारनिवृत्तिं कर्तुमुत्सहते दोषनिमित्तेषूत्पन्नतथाभूतज्ञानानामपि पूर्ववदहङ्कारदोषानुवृत्तेः । साक्षात्कारस्तूपायाभावादयुक्त इति । § 2027

अस्योत्तरं सूत्रम्—समा...सात् ॥ समाधिपदं व्याचष्टे भाष्यकारः, स तु प्रत्याहृतस्येन्द्रियेभ्यो मनस इति । अनेन विक्षेपं निवर्तयति ।

३ वं ] नाभावंnvt-C
१८ *] यः पूर्वं पुरुषो°nvt-C
१८ एवं ] तावद् रूपबुद्धीः प्रतिपाद्यnvt-C
४ पि ] °तथाभूत° nvt-J

इन्द्रियेभ्यः प्रतीपमाहृतस्य मनसः क्वचित् हृत्पुण्डरीकादिप्रदेशे आत्मनो निजौकसि विधारकेण प्रयत्नेन धार्यमाणस्यात्मना संयोगो यः स खलु प्रलयावस्थायामप्यस्तीत्यत उक्तं—तत्त्वबुभूत्साविशिष्ट इति । तदभ्यासश्च तद्विषयविधारकप्रयत्नोत्पादपौनःपुन्यम् । तद्वशादादरनैरन्तर्यदीर्घकालताविशिष्टात् तत्त्वबुद्धिरुत्पद्यते ॥ ३८ ॥ § 2028

नार्थविशेषप्राबल्यात् ॥ ४ । २ । ३९ ॥ § 2029

एतदाक्षेपसूत्रमवतारयति—यदुक्तं सति हि तस्मिन्निति ॥ ३९ ॥ § 2030
635/tha

क्षुदादिभिः प्रवर्तनाच्च ॥ ४ । २ । ४० ॥ § 2031

इन्द्रियविषयैरपहृतमनसो न धारणा । तथा च तदभ्यासाभावान्न तत्त्वासाक्षात्कार इति सूत्रार्थः ॥ ४० ॥ § 2032

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ४ । २ । ४१ ॥ § 2033

समाधानसूत्रमवतारयति—अस्त्ये तत्समाधिव्युत्थाननिमित्तमिति । सूत्रम्—पूर्व...त्पत्तिः ॥ पूर्वकृतः समाधिः । तस्य फलं संस्कारः । तस्यानुबन्धः स्थेमा । तस्मादिति सूत्रार्थः । तद् व्याचष्टे भाष्यकारः—पूर्वकृत इति । प्रविविच्यते विशिष्यतेऽनेनेति प्रविवेकः । धर्मश्चासौ प्रविवेकश्चेति धर्मप्रविवेकः प्रकृष्टः संस्कारः, स ह्यात्मधर्म इति । कस्मात् पुनरदृश्यमानः संस्कारः कल्प्यत इत्यत आह—निष्फले हीति । प्रयत्नविशेषा हि विशरारवो बहवोऽपि परस्परमसहभवन्तो न तत्त्वसाक्षात्काराय पर्याप्ता इति तज्जनिताः संस्काराः कल्प्यन्ते । तेषां स्थेम्ना संभवति संभूयकारितेत्यर्थः ॥ ४१ ॥ § 2034

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४ । २ । ४२ ॥ § 2035

प्रचयकाष्ठा प्रचयावधिः, यतः परमपरः प्रचयो नास्ति । तत्सहकारिशालितया प्रकृष्टायां समाधिभावनायां समाधिप्रयत्नः समाधिभावना तस्यामित्यर्थः ॥ ४२ ॥ § 2036

अपवर्गेऽप्येवं प्रसङ्गः ॥ ४ । २ । ४३ ॥ § 2037
636/tha

१ देशे ] °आदि° nvt-J
२ यः ] °गोऽयम् । nvt-C
२ लु ] सुप्तावस्थायाम° nvt-C
१८ न्तो ] °मसंभवन्तो *Alaṅkāra*

पूर्वपक्षवाद्याह—यद्यर्थविशेषप्राबल्यादिति । अप…प्रसङ्गः ॥ स खल्वयमीदृशो बाह्यार्थप्रकर्षस्य महिमा यतः इन्द्रियाद्यनपेक्षादेवात्मनो बुद्धिर्जनिष्यत इत्यभिमानः पूर्वपक्षिणः ॥ ४३ ॥ § 2038

न निष्पन्नावश्यम्भावित्वात् ॥ ४ । २ । ४४ ॥ § 2039

सिद्धान्तसूत्रम्—न, निष्पन्नावश्यम्भावित्वात् ॥ तद् व्याख्यातम् । न खलु तण्डुला अत्यन्तं फलीकृता अपि पिठरोदकदहनसंयोगप्रचयमन्तरेण पुलाकीभवन्तीति भावः ॥ ४४ ॥ § 2040

तदभावश्चापवर्गे ॥ ४ । २ । ४५ ॥ § 2041

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४ । २ । ४६ ॥ § 2042

किं समाधिविशेष एव तत्त्वज्ञानसाधनम् ? मैवम्, किं तु तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ समानमाश्रमिणां धर्मसाधनम् । अहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रह इति यमः । नियमो यस्याश्रमिणो योऽसाधारणो धर्मोपायः । योग इति विषयेण योगशास्त्रं पातञ्जलादि लक्षयति । योगाचारः एकाकिता आहारविशेषः एकत्रानवस्थानमित्यादिः यतिधर्मोक्तः एतेऽपि तत्त्वज्ञानोत्पादक्रमेणापवर्गसाधनमित्यर्थः ॥ ४६ ॥ § 2043

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥ ४ । २ । ४७ ॥ § 2044

637/tha

ननु यद्येते तत्त्वज्ञानविधानक्रमेणोपायाः, कृतं तर्ह्यान्वीक्षिक्येत्यत आह—ज्ञान …संवादः ॥ तद् व्याचष्टे—तदर्थमिति प्रकृतम् । आत्मविद्या आन्वीक्षिकी । अभ्यासः सततक्रिया प्रयत्न इत्यर्थः । प्रयोजनमाह—प्रज्ञापरिपाकार्थम् । परिपाकस्तु संशयच्छेदनम् । किं देहाद्यतिरिक्त आत्मा उत नेति संशयः । तस्य च्छेदनं लौकिकस्य त्वज्ञानमात्मनि तदवबोधः । अध्यवसितं प्रमाणेन, तस्य अभ्यनुज्ञानं तर्केण ॥ ४७ ॥ § 2045

तंशिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात् ॥ ४ । २ । ४८ ॥ § 2046

२ स्य ] बाह्यार्थस्य nvt-C
१५ लादि ] पातञ्जलं nvt-C
१६ र्मोक्तः ] °त्यादि यतिधर्मोक्तम् nvt-C
१६ एतेऽपि ] ज्ञानक्रमोत्पाद° nvt-C
२० मेणोपायाः ] तत्त्वज्ञानोत्पादक्रमेणापवर्गोपायःnvt-C
२२ र्थः ] तत्क्रिया तत्र प्रयत्न इत्यर्थःnvt-J
२४ बोधः ] लोकस्य तत्त्वज्ञानमात्मनि तदवरोधः ।nvt-C

सब्रह्मचारी सहाध्यायी । गुरुशिष्यसहाध्यायिभ्योऽन्यः शास्त्रेणानुशिष्टः शिष्टः । श्रेयोऽर्थिनश्च श्रेयसि मोक्षलक्षणे श्राद्धाः । तेषामपवर्गे श्रद्धादर्शनादस्ति तदुपायाभ्यासः प्राग्भवीय इत्यनुमीत्यते । तेन तेषामपि प्राग्भवीयसंस्कारवशात् प्रतिभोपासनीयेति । अभ्युपेयात् अभिमुखमुपेत्य जानीयात् गुर्वादिभिः सहेत्यर्थः । नीतार्थम् गतार्थम् ॥ ४८ ॥ § 2047

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४ । २ । ४९ ॥
§ 2048

तदनेन गुर्वादिभिर्वादं कृत्वा तत्त्वनिश्चय उक्तः । यदि च मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्य गुर्वादेः । तस्मान्न वादोऽप्युचित इति, तत्रेदं सूत्रमुपतिष्ठते—प्रति...र्थित्वे ॥ § 2049

व्याचष्टे—तमभ्युपेयादिति वर्तते । परतो गुर्वादेः प्रज्ञामुपादित्समानः 638/tha
तत्त्वबुभुत्साप्रकाशनेन आत्मनः शरीरादिभ्यो भेदमहं बुभुत्स इत्यभिदधानः स्वपक्षमनवस्थापयन् स्वदर्शनं गुर्वादिकृताद् विचारात् पूर्वपक्षोच्छेदसिद्धान्तव्यवस्थापनलक्षणात् परिशोधयेत् । अन्योऽन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि । अयुक्तपरित्यागेन युक्तपरिग्रहणेन च परिशोधयेदिति संबध्यते ॥ ४८ ॥ § 2050

॥ इति तत्त्वज्ञानविवृद्धिप्रकरणम् ॥

## ४.२.६ तत्त्वज्ञानपरिपालनप्रकरणम्

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ४ । २ । ५० ॥ § 2052

ननु यत्र वादस्यैव दशेदृशी, तत्र तत्त्वनिर्णये दत्तजलाञ्जली तर्हि जल्पवितण्डे इत्यत आह—स्वपक्षरागेण चैके न्यायमतिवर्तन्ते । तत्र तत्त्वा...वरणवत् ॥ इति सूत्रम् ॥ तद् व्याचष्टे—अनुत्पन्नतत्त्वज्ञानानामिति ॥ ५० ॥
§ 2053

ताभ्यां विगृह्य कथनम् ॥ ४ । २ । ५१ ॥ § 2054

न केवलं तदर्थं घटमानानां जल्पवितण्डे अपि तु विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य । ताभ्य...नम् ॥ इति सूत्रम् । *यश्च कुदर्शनाभ्यासाहितमिथ्याज्ञानावलेपदुर्विदग्धतया सद्विद्यावैराग्याद् वा लाभपूजाख्यात्यर्थितया *वा कुहेतुभिरीश्वराणां जनाधाराणां पुरतो वेदब्राह्म-

---

१४ णात् ] इतः परं स्वदर्शनमिति टीकायामभ्यस्तम् । तत्तु नापेक्षितमिति त्यक्तम् ।
९ *] यस्तु स्वदर्शनविलसितमिथ्या°nvt-C
११ *] वाnvt-J

णपरलोकादिदूषणप्रवृत्तस्तं प्रति वादी समीचीनदूषणमप्रतिभयापश्यन् ज-
639/tha ल्पवितण्डे अवतार्य विजिगीषया तं विगृह्य जल्पवितण्डाभ्यां तत्त्वकथनं करोति विद्यापरिपालनाय । मा भूदीश्वराणां मतिविभ्रमेण तच्चरितमनुवर्तिनीनां प्रजानां धर्मविप्लव इति । इदमपि प्रयोजनं जल्पवितण्डयोः, न तु लाभख्यात्यादि दृष्टम् । न हि परहितप्रवृत्तः परमकारुणिको मुनिर्दृष्टार्थं *परवञ्चनोपायमुपदिशतीति । § 2055

शङ्कावार्त्तिकम्—व्यापकत्वादन्तःकरणस्येति । अस्य वक्षमाणोऽभिसन्धिः । निराकरोति—नोक्तोत्तरत्वात् । सांख्यं दूषयद्भिरित्यर्थः । शङ्किता स्वाभिसन्धिमुद्धाटयति—स्वाङ्गगतीक्षणेति । यावद्धस्तावच्छिन्ने आत्मप्रदेशे प्रयत्नो न जायते, न तावत् तत्र कर्म । न च तत्रात्ममनःसन्निकर्षं विना प्रयत्नः । न च मनस इन्द्रियसंयोगं विनेक्षणम् । न चाणुना मनसा इन्द्रियेण हस्तेन चापर्यायेण संबन्धः । तस्माद् व्यापकं मन इति शङ्कार्थः । निराकरोति—न शरीरात्ममनःसंयोगयौगपद्यात् प्रयत्नदर्शनयोर्युगपदुत्पत्तेः । तत्रात्मशरीरसंबन्धात् स्वाङ्गगतिरिति । पाणिचालनेच्छापेक्षेणात्ममनःसंयोगेन पाणिं चालयामीत्येवमाकारः प्रयत्नो जन्यते । तत्प्रयत्नवदात्ममनःसंयोगात् पाणौ क्रिया जायते । यद्यप्यात्मनः सर्वाङ्गे संयोगो न विशिष्यते तथापीच्छाविशेषादुत्पन्नः प्रयत्नविशेषः पाणावेव कर्म करोति, नान्यत्र । प्रयत्नान्तरवदात्ममनःसंयोगाच्चक्षुषः प्रेरणम् । यद्यपि चानयोः प्रयत्नयोर्न युगपदुत्पादः, तथापि तदत्यन्तसौक्ष्मात् क्षणभेदो न लक्ष्यते । नन्वेकस्मिन्नात्मप्रदेशे वर्तमानः संयोगो वा प्रयत्नो वा कथं प्रदेशान्तरेऽसंयोगिन्यप्रयत्नवति कार्यमारभते इत्यत आह—न चात्मनः प्रदेशाः सन्तीति । परिशिष्टं तु वार्त्तिकं भाष्यव्याख्यया व्याख्यातम् ॥ ५१ ॥ § 2056

॥ इति तत्त्वज्ञानपरिपालनप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां चतुर्थाध्याये द्वितीयाह्निकम् ॥

॥ चतुर्थोऽध्यायः समाप्तः ॥

640/tha

# ५.१ पञ्चमाध्याये प्रथमाह्निकम्

## ५.१.१ सत्प्रतिपक्षदेशनाभासप्रकरणम्

६ *] परपांशुलोपाय° nvt-C
७ म्] ५. २. ३७ संबद्धमिदमिति ज्ञेयम् ।
१० र्षं] सन्निकर्षम् इत्यस्मात् न शरीरात्ममनः इत्यन्तम् पतितम् nvt-J
१५ त्नो] जायते, तत्र nvt-C
१९ सौक्ष्मात्] कालभेदः nvt-C

निवारितानेकनिबन्धमेघ-पंक्तिः स्फुरन्निर्मलदिग्विशेषा
।टीकेयमुद्योतकरप्रसङ्गम्आतन्वती भाति शरद्द्वितीया
॥§ 2061 &
परिहृतदूषणकण्टकमपहतकुनिबन्धपङ्कसम्पर्कम् ।उद्योतकरगवीनां मार्गं
द्योतयति टीकेयम् ॥§ 2062 &

# ५ पञ्चमाध्यायः

641/tha

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्र-
तिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्ध्य-
नित्यनित्यकार्यसमाः ॥ ५ । १ । १ ॥
§ 2064

अथ प्रमाणादयः पदार्था उद्दिष्टा लक्षिता परीक्षिताश्च । तत् किम् अपरमवशिष्यते यदर्थं पञ्चमोऽध्याय आरभ्यत इत्यत आह—साधर्म्य-वैधर्म्याभ्यां प्रत्यस्थानस्य विकल्पाज्जातिबहुत्वमिति भाष्यम् । तस्यार्थमाह वार्त्तिककारः जातेः संक्षेपेणोक्ताया इत्यादि । यद्यपि जातिनिग्रहस्थान-भेदा जातिनिग्रहस्थानसामान्यलक्षणानन्तरं प्रथमेऽध्याये युक्ता लक्षयितुम्, तथाप्येषां बहुतरत्वात् प्रमेयपरीक्षायां विलम्बो मा भूत्, अपेक्षिता चासौ शिष्यैः, संशयादिपरीक्षां तु विना प्रमेयपरीक्षा न शक्यते, तस्मान् मुनिः शिष्यानुरोधेन परीक्षां तावद् वर्तयांबभूव । तदनन्तरमवशिष्टं जातिनिग्रह-स्थानविशेषलक्षणं वर्तयति । जल्पवितण्डापरीक्षा चानन्तरं प्रवृत्ता । तदङ्गं च जातिनिग्रहस्थाने इत्यवान्तरसंगतिरप्यस्तीति सर्वमवदातम् । § 2065

साध...समाः ॥ विशेषोपयोगि सामान्यलक्षणमाह—तत्र जातिर्नामेति प्रतिषेधबुद्ध्या प्रयुक्त इति शेषः । आह्निकारम्भमाक्षिपति—जातेः प्रयोगप्र-तिषेधादिति । परिवर्जनं तु सामान्यमात्रज्ञानादपि भवन्न विशेषज्ञानमपेक्षत इति भावः । समाधत्ते—न आरम्भप्रयोजनस्योक्तत्वात् इति । एतदेव स्मार-यति—स्वयं च सुकरः प्रयोग इति, प्राश्निकैः कतमा जातिरित्युक्ते स्वयं सुकरः प्रयोग इति । अथवा सद्विद्याविद्विषा अधिक्षिप्ते तत्त्वे अह्नाय च तन्निरासहेतावस्फुरति साक्षिणां पुरत एकान्तपराजयाद् वरं सन्देहोऽप्यस्तु कथंचित् परपराजयो वेति बुद्ध्या जल्पवितण्डयोः पांशुभिरिवावकिरन् जातिं 642/tha

० नोऽम्बुजानि ] श्लोकत्रयमिदं जयसलमीरपुस्तके समुपलब्धम् ।

३ योः ] जल्पवितण्डयोःnvt-J

प्रयुङ्क्ते । तेन हि लोके तत्त्वमवस्थापितं भवति । *अन्यथासन्मार्गप्रवृत्तो लोकः स्यात् । न च खटचपेटादिभिर्विद्याविद्वेषिणो निराकरणे तदुत्थापित-कुहेतुनिराकरणधीरस्ति लौकिकानाम् । तस्मान्न खटचपेटादय उपदेष्टव्याः शास्त्रकृतेत्यभिप्रायवानाह—साधुसाधननिराकरणार्थं चेति । अतत्त्वविषय-त्वेन परमार्थतोऽसाध्वपि साधनमह्नाय दूषणस्याप्रतिभासनात् साध्वित्युक्तम् । लाभपूजाख्यातिकामश्चेति अन्वाचये चकारः । प्रसिद्धं तावत् तत्त्वप-रिपालनं प्रयोजनम् । तस्मिन् सत्येवैतदप्यन्वाचीयत इत्यर्थः । § 2066

मतान्तरं निराकर्तुमुपन्यस्यति—असाधुसाधनेति । तत्त्वविषयमपि साधनमसाध्विति विदितवान् वादकाले चाप्रतिभयास्यासाधुत्वोपपादनं न परिस्फुरति । असाध्वेतदिति तु स्मरन्नेवासौ जातिं प्रयुङ्क्ते । तदिदमुक्त-म्—अनभिज्ञतया साधनदोषस्येति । अथवा जानन्नपि जातिं प्रयुङ्क्ते—तस्य साधनस्य दोषप्रदर्शनार्थं प्रसङ्गव्याजेन मदीयं तावद् दूषणाभासमेव । एवं त्वदीयमपि साधनाभासम् । यदि तु तत् सम्यक् साधनं ततो मदीय-मपि सम्यग् दूषणं स्यादिति प्रसङ्गः । तद्व्याजेन साधनं दूषयतीत्यर्थः । तदेतत् परमतं दूषयति—एतच्चेति । जात्यभिधाने हि पर्यनुयोज्योपेक्ष-णं निरनुयोज्यानुयोगश्चेति द्वयं निग्रहस्थानं तस्माद् बुद्धेत्ययुक्तम् । अथ न बुध्यते तत् किमिति जातिं प्रयुञ्जीतेति । यो हि सभादर्शनमात्रात् पूर्वाभ्यस्तमपि विस्मरति तस्य कैव कथा अननुसंहितपूर्वजात्युद्भावनस्येति भावः । एतेन बुद्धा चाबुद्धा वेति विकल्पासंभवेन अनैकान्तिके साध-ने प्रयुक्ते पञ्चानां साधर्म्यसमवैधर्म्यसमविकल्पसमसाध्यसमसंशयसमानां जातीनां प्रयोगः प्रत्युक्तः । पूर्वापरभाव इति । पूर्वस्य युक्तस्य साधनस्य पूर्वं युक्तमुत्तरम् । अपरस्यायुक्तस्य साधनस्यापरमयुक्तमुत्तरमिति । § 2067

ननु साधर्म्यसमादीत्युच्यते, न च वस्तुतः साधर्म्यसमादीनां साम्यमस्ति
643/tha स्थापनया, तथा सत्यजातित्वप्रसङ्गादित्यत आह—समीकरणार्थः प्रयोग इति । आभिमानिकं साम्यं न वास्तवमित्यर्थः । साधर्म्यमेव समं यस्मिन् प्रयोग इति शेषः । तदिदमुक्तं समार्थः सादर्म्यसमार्थः समीकरणार्थः प्रयोगो द्रष्टव्य इति । एवं *साधर्म्यमेव सममित्यत्र विग्रहे स्वरूपेण साम्यमुक्त्वा विशेषहेत्वभावेन साम्यमाह—विशेषहेत्वभावो वेति । ये त्वाहुः सर्वेष्वेवाप-देशेषु सर्वासामेव जातीनां प्रयोग इति, तान् प्रत्याह—न सर्वापदेशव्याप्तिः सर्वजातिप्रयोगस्य । अपदेशो हेतुवचनम् । ये पुनः साधर्म्यसम इत्यादौ स-मशब्दस्तस्य साधनवादिजातिवादिनोस्तुल्यार्थत्वाद् यादृशो जातिवादी तादृशः वाद्यपि साधर्म्येण द्वौ समाविति मन्यन्ते, तान् प्रत्याह—न च वादिप्र-तिवादिनोस्तुल्यता समार्थः । प्रतिवादी जातिवादी विवक्षितः ॥ १ ॥ § 2068

∘ *] इतरथा°nvt-J
∘ च] नखचपेटा°nvt-C
∘ म्] °त्युक्तम्nvt-C
∘ *] वैधर्म्य°nvt-C
∘ यादृशो] वादीnvt-C
∘ तादृशः] प्रतिवाद्यपिnvt-C

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ ५ । १ । २ ॥ § 2069

प्रतिषेधाविति सूत्रपूरणेन पुंलिङ्गं समर्थयते, अन्यथा जातेः प्रकृतत्वात् सामानाधिकरण्येन साधर्म्यवैधर्म्यसमे इति स्यात् । तद्धर्मविपर्ययोपपत्तेः कृते साध्यविपर्ययोपपत्त्यर्थमित्यर्थः । भाष्यम्—निदर्शनं, क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगादिति । अस्ति खल्वात्मनः क्रियाहेतुर्गुणः प्रयत्नो वा, अदृष्टं वा, लोष्टस्यापि क्रियाहेतुर्गुणः स्पर्शवद्वेगवद्द्रव्यान्तरसंयोग इति । एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुत्वात् आकाशवदिति । अत्र च साधनाभासमुत्तरं च न जातिः । विभुत्वस्याक्रियावत्त्वेन स्वभावतः प्रतिबन्धात् । तेनैतदुपेक्ष्य वार्त्तिककार उदाहरणान्तरमाह—यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् । इदं हि सम्यक् साधनम्, उत्तरं त्वस्याभासमिति । साधर्म्योक्ते साधर्म्यसमः, वैधर्म्योक्ते वैधर्म्यसमः । एवं 644/tha साधर्म्योक्ते हेतौ वैधर्म्यसमः । एवं वैधर्म्योक्ते हेतौ साधर्म्यसम इति ॥ २ ॥ § 2070

गोत्वाद् गोसिद्धिवत्तत्सिद्धिः ॥ ५ । १ । ३ ॥ § 2071

कथं पुनरियं जातिः ? अथ प्रकरणसमोद्भावनं सम्यगुत्तरमेव कस्मात् न भवतीत्यत आह—अनयोः साधर्म्यवैधर्म्यसमयोः उत्तरम्—गोत्वाद्...सिद्धिः ॥ भवेदेतदेवं यद्यन्वयव्यतिरेकमात्राद्धेतोर्गमकत्वं स्यात्, ततो विशेषग्रहणाभावात् प्रकरणसमत्वं भवेत् । न त्वेवं भवति, स्वाभाविकसंबन्धभाजो गमकत्वात् । स्वभावसंबद्धं च कृतकत्वमनित्यत्वेन, न त्वमूर्तस्य नित्यत्वेन स्वाभाविकः संबन्धः, बुद्धिकर्मादौ व्यभिचारात् । तस्माद् गृह्यमाणविशेषत्वान्न प्रकरणसमः । यथा गोत्वाद् गौः सिध्यति स्वाभाविकप्रतिबन्धात्, न तु सास्नादिसंबन्धादिति भाष्यम् । सास्नादीत्यतद्गुणसंविज्ञानो बहुव्रीहिः । तेन व्यभिचारिणः शृङ्गादयो गृह्यन्ते । § 2072

वार्त्तिकम्—एकस्यानन्वयादेकस्याव्यावृत्तेः । एकस्य सत्त्वस्य गवाऽनन्वयाद् अश्वादौ चाव्यभिचारादनन्वयः । एकस्य चैकशफत्वादेर्वैधर्म्यस्य गोष्वेवाव्यावृत्तेर्महिष्यादावपि व्यावृत्तेरित्यर्थः ॥ ३ ॥ § 2073

॥ इति सत्प्रतिपक्षदेशनाभासप्रकरणम् ॥

## ५.१.२ साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादिजातिषट्कप्रकरणम्

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ ५ । १ । ४ ॥ § 2075

उभयसाध्यत्वाच्च साध्यसमः । पञ्चानां जातीनां साध्यदृष्टान्तयोर्धर्म-
645/tha विकल्पात् इत्यनेन पञ्चैव लक्षणानि सूचितानि । तानि च जातिसमाख्याभिर्मिथो विशिष्यन्ते । अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयुक्ते यदैवं प्रतिवादी प्रसङ्गेन प्रत्यवतिष्ठते—यदि घटसाधर्म्यात् कृतकत्वादनित्य शब्दः, हन्तास्मादेव घटसाधर्म्यात् कृतकत्वाद् रूपादिमतापि शब्देन भवितव्यम् । न चेद् रूपादिमान्, मा भूत्तथा अनित्योऽपि । न चास्ति विशेषहेतुः । कृतकत्वादनित्येन भवितव्यम् । न पुना रूपादिमतेति । सोऽयं साध्यदृष्टान्तयोर्धर्मविकल्पाद् वैचित्र्याद् यत्रोत्कर्षं प्रसञ्जयति स उत्कर्षसमः प्रतिषेधः । § 2076

एवं तदेव साध्यदृष्टान्तयोर्धर्मवैचित्र्यमपकर्षेण विशिष्यमाणमपकर्षसमस्य लक्षणम् । § 2077

साध्यदृष्टान्तयोर्धर्मवैचित्र्यात् स्वरूपेण साध्यासाधनत्वप्रसङ्गजनने वर्ण्यावर्ण्यसमौ । § 2078

साध्यदृष्टान्तधर्मविकल्पहेतुकवर्ण्यत्वनिबन्धनं तु हेत्वाद्यवयवयोगित्वप्रसञ्जनं साध्यसमः । अत+एवोभयसाध्यत्वादिति साध्यत्वं हेतुमाह साध्यसमस्य सूत्रकारः । भाष्यकारोऽपि हेत्वाद्यवयवसामर्थयोगीति ब्रुवाणस्तत्प्रसञ्जनं साध्यसमं मन्यते । तदेतद् वार्त्तिककृद् आह—घटो वानित्य इत्यत्र को हेतुरिति ? न च यदि समाख्याभेदेन विशिष्यमाणं लक्षणपदं भिन्नार्थं तर्हि समाख्यापदान्येव लक्षणानि सन्तु, कृतं लक्षणपदेनेति वाच्यम्, लक्षणपदसहितानामेव तेषां लक्ष्यभेदप्रतिपादकत्वादिति ॥ ४ ॥ § 2079

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ । १ । ५ ॥ § 2080

आसां षण्णां जातीनां प्रत्याख्यानम्—किञ्चि…षेधः ॥ यस्य धर्मिणः साध्यधर्मेण स्वाभाविकसंबन्धयुक्तः साधको धर्म उपपद्यते उपपन्नो भ-
646/tha वति स धर्मस्तस्य साध्यधर्मस्य साधनं तत्र साध्यधर्मिण्युपसंह्रियते । तथाच शब्देनेति । उपनयपदेनेत्यर्थः । यत् पुनरेतद्विभागजाविभागजविकल्पवन्नित्यानित्यविकल्प इति, तत्राह—यथोत्पत्तिधर्मकत्वमन्वयव्यतिरेकि नैवं विभागजत्वम् । अयमर्थः विकल्पसममुत्तरं वदता हि यथा सत्युत्पत्तिमत्त्वे घटो न विभागजः, शब्दस्तु विभागज इति व्यवस्थितो विकल्पः, एवं तस्मिन् उत्पत्तिमत्त्वे सत्यपि विभागजवच्छब्दो नित्यो भविष्यति घटस्त्वनित्य इत्युक्तम् । अत्र तावदुत्पत्तिधर्मकत्वं यथा सत्यनित्यत्वे घटादौ दृष्टम्, आकाशादिषु चासत्यनित्यत्वे न दृष्टम्, तेनानित्यत्वेन स्वभावप्रतिबद्धमवधारितम्, नैवमुत्पत्तिधर्मकत्वस्य विभागजत्वेनाविभागजत्वेन वा स्वाभाविकः संबन्धो गृहीतो

५ न्तास्मादेव ] °साधर्म्याद्रूपा°nvt-C
२४ युक्तः ] °संबन्धः साधको धर्मnvt-C
२५ नं ] तत्रnvt-J
२९ स्मिन् ] एवं सतिnvt-C

येनोत्पत्तिमत्किञ्चिद्विभागजं किञ्चिदविभागजं न भवेत् । तस्माद् विकल्पसमं जात्युत्तरं वदता ह्यतिनिर्बन्धेन विभागजत्वेन शब्दस्य नित्यत्वं वक्तव्यम् । तत्रेदमुपतिष्ठते—यथोत्पत्तिधर्मकत्वमन्वयव्यतिरेकि अनित्यत्वं प्रति नैवं विभागजत्वं शब्दनित्यत्वं प्रत्यन्वयव्यतिरेकि, किं तर्ह्यसाधारणमित्यर्थः । असाधारण्यमाह—न हि किञ्चित् शब्दादन्यद् विभागाज्जायमानं नित्यमनित्यं वा दृष्टम् । ननु विभागजो विभागोऽनित्यो दृष्ट इत्यत आह—यथोक्तविशेषणमिति कारणमात्रविभागपूर्वकः शब्दो विभागजस्तु विभागः कारणाकारणविभागपूर्वक इति सिद्धं कारणमात्रविभागपूर्वकत्वमसाधारण्यमित्यर्थः ॥ ५ ॥ § 2081

## साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ५ । १ । ६ ॥ § 2082

षण्णां जातीनां प्रत्याख्यानमुक्त्वा वर्ण्यावर्ण्यसाध्यसमानामपरं प्रत्याख्यानमाह—साध्य...पत्तेः । इति, तद् व्याचष्टे—दृष्टान्तः साध्य इति ब्रुवतेति । चतुर्दशविधजातिवादिनामिह दूषणमुपन्यस्यति—यत् त्वत्रोक्तं जातीनां पौनरुक्त्यमिति । लक्षणभेदाभेदाभ्यां किल लक्ष्यभेदाभेदौ लक्षणं चेदमेकमिति न षड्जातयः । तस्माद् विकल्पसमायामेवोत्कर्षसमादीनामन्तर्भाव 647/tha इत्यर्थः । दूषयति—न पौनरुक्त्यम् । तत्तल्लक्ष्यपदसहितानि पञ्च लक्षणानि उभयसाध्यत्वाच्चेत्यनेन सह षडिति । न केवलं लक्ष्यभेदात्, प्रयोगभेददर्शनाच्च । शङ्कते—यदि तत्तल्लक्ष्यभेदाज् जातिभेदः, तत आनन्त्यमिति चेत् ? निराकरोति—न, अनवधारणादिति । न लक्ष्याणामवधारणमस्त्येषामानन्त्यात् । लक्षणोपग्रहेण चतुर्विंशातिर्जातय इत्यर्थः । लक्ष्याणां लक्षणाभेदेऽपि भेदे निदर्शनमाह—तथा हि प्रकरणसमैकेति । सुगममितरत् ॥ ६ ॥ § 2083

॥ इति जातिषट्कप्रकरणम् ॥

## ५.१.३ प्राप्त्यप्राप्तियुगनद्धवाहिविकल्पोपक्रमजातिद्वयप्रकरणम्

## प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्त्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ५ । १ । ७ ॥ § 2085

प्राप्त्यप्राप्तिसमाविति लक्ष्यपदम् । शेषं तु लक्षणम् । असत् साध्यते, न तु सत् । प्राप्तं च सत्, असतः प्राप्त्यसंभवात् तस्मान्न साध्यम् । अपि च यत्र यस्य प्राप्तिः, तेन संभिन्नस्यैक्यमेव । यथा गङ्गा सागरं प्राप्ता सागरेणाभिन्ना, तद्वदेव अभिन्ने चेत् साध्यसाधने, नास्ति साध्यसाधनभावः, तस्य भेदाधिष्ठानत्वादित्यपि द्रष्टव्यम् । अप्राप्तिसमस्तु स्फुट एवेति । न-

४ र्थः ] °रेकीति । तद्यसा°nvt-C
१५ न ] न*Om*nvt-J
२० न्त्यात् ] °मस्त्वेषामानन्त्यम्nvt-J
५ मेव ] येन यस्य...तेन तस्यैक्य°nvt-C

नु प्राप्त्यप्राप्तिसमयोर्मिलितयोः साधनप्रतिषेधस्यैकत्वात् कथं प्राप्त्यप्राप्तिसमौ भिन्नावित्यत आह—अनयोर्भेदोपदेशो विवक्षात इति । साधनप्रतिषेधस्यैकत्वेऽपि प्राप्य वा अप्राप्य वेति विकल्पभेदाद् भेदविवक्षेत्यर्थः । अभेदविवक्षायां त्वेकमेवोत्तरम्, यथा वृक्षाणां बहुत्वं विवक्षित्वा बहु वचनप्रयोगो 648/tha वृक्षा इति । तद्बहुत्वस्य संख्याया एकत्वं विवक्षित्वैकवचनम् एकं वनमिति । § 2086

उदाहरणेन साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति जातिसामान्यलक्षणं मन्वानो देशयति—जातिलक्षणाभावादिति । परिहरति—न, सूत्रार्थापरिज्ञानात् इति । सूत्रे नोदाहरणसाधर्म्यं विवक्षितम्, अपि तु येन केनचित् साधर्म्यं विवक्षितम् । अत्र च येन केनचिद् विद्यमानेनासाध्येन साध्यस्य साधर्म्यम्, अप्राप्तेन वा हेतुना साधर्म्यमिति न सामान्यलक्षणायोग इति ॥ ७ ॥ § 2087

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ॥ ५ । १ । ८ ॥ § 2088

तस्य प्रत्याख्यानम्—घटादि…अप्रतिषेधः ॥ घटादिनिष्पत्तिदर्शनादित्यादि सूत्रम् । तद् व्याचष्टे—मृत्प्राप्तानां दण्डादीनां न गङ्गासागरवद् अविशेषः । मृदवयवाः पूर्वव्यूहपरित्यागेनेति । साध्यं कर्म । तच्च मृदवयवाः । ते च सिद्धा एवेत्यव्यभिचारः । घटस्तु फलं न साध्य इति भावः । कोऽप्राप्त्यर्थ इति । अप्राप्तस्य साधकत्वेऽतिप्रसङ्ग इति भावः । उत्तरम्—परस्परोपश्लेषमन्तरेण साधकत्वमिति । अन्यथा तूद्देशेनासौ प्राप्त एव । यदुद्देशेनाभिचारः श्येनादिना क्रियते तस्यैव प्रत्यवायो भवति, नान्यस्येति नियमः । अत्रापि संयुक्तसंयोगादिः संबन्ध उपेयः । तस्यापि च हेतुत्वं क्रियां प्रति दृष्टम् । यथा पङ्काख्यायां पृथिव्यामिति । सुगममन्यत् ॥ ८ ॥ § 2089

॥ इति प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम् ॥

## ५.१.४ प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम्

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ५ । १ । ९ ॥ § 2091

649/tha

दृष्टान्तस्य कारणं प्रमाणं तस्यानपदेशात् प्रसङ्गसमः । साध्यसमो हि दृष्टान्ते साध्यवद्धेत्वाद्यवयवं प्रसञ्जयति—पञ्चावयवप्रयोगसाध्यतां दृष्टान्तगतस्यानित्यत्वस्य प्रसञ्जयतीत्यर्थः । प्रसङ्गसमस्तु दृष्टान्तगतस्यानित्यत्यस्य प्रमाणमात्रसाध्यतामित्यपौनरुक्तम् । भाष्यम्—साधनस्यापि । दृष्टान्तगतस्य अनित्यत्वस्य साधनं प्रमाणं वाच्यमिति । वार्त्तिकम्—घट एव तावदनित्य

इत्यत्र को हेतुरिति । अत्र किं प्रमाणम् इत्यर्थः । भाष्यं—प्रतिद्रष्टान्त उपादीयते । क्रियाहेतुगुणयुक्तमाकाशम् अक्रियं दृष्टम् । तस्मादनेन प्रतिदृष्टान्तेन कस्मात् क्रियाहेतुगुणयोगो निष्क्रियत्वमेव न साधयत्यात्मन इति शेषः । यदि पुनरियमनैकान्तिकदेशना स्यात्, क्रियाहेतुगुणयुक्तस्याप्यक्रियत्वं दृष्टम्, यथाकाशस्येति, तत्र तत्, सदुत्तरं स्यात् । न त्वेवमेतदिति जातिः । § 2092

शङ्कते—वाय्वाकाशसंयोगस्येति । निराकरोति—न, तत्समानधर्मोपपत्तेः । तत्समानधर्मणो धर्मिणः क्रियावत्त्वोपपत्तेः । यदि तथाभूत एव आकाशेऽपि कस्मान्न करोतीत्यत आह—यस्त्वसाविति । यस्तु मन्यते कार्योत्पादैक्यव्यङ्ग्यमेव कारणं न दृष्टकार्यकारणसाधर्म्यव्यङ्ग्यमपीति, तस्य दूषणान्याह—यदि चेति ॥ ९ ॥ § 2093

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत् तद्विनिवृत्तिः ॥ ५ । १ । १० ॥ § 2094

यदि प्रज्ञापनार्थम् ? उत्तरम्—नाप्रज्ञातो दृष्टान्तः । तत्र लौकिकपरीक्षकाणां बुद्धिसाम्यादिति शेषः ॥ १० ॥ § 2095

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ५ । १ । ११ ॥ § 2096

स च कथमहेतुर्न स्यादिति । कथं हेतुः स्यादिति । अभ्युपगमादिति । मदीयस्य च दृष्टान्तस्याभ्युपगमात् न त्वदीयो दृष्टान्त इत्यर्थः । अथैवं 650/tha
प्रयुंक्ते यथा मदीयो न दृष्टान्तस्तथा त्वदीय इति, तथापि व्याघातान्न दृष्टान्तः । मदीयस्यादृष्टान्तत्वे साध्ये प्रतिदृष्टान्तेन हि तेन मदीयस्यादृष्टान्तता साधनीया । स चेन्न दृष्टान्तः, मदीयस्यादृष्टान्तता साध्येति व्याहतमित्यर्थः ॥ ११ ॥ § 2097

॥ इति प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम् ॥

## ५.१.५ अनुत्पत्तिसमप्रकरणम्

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ ५ । १ । १२ ॥ § 2099

उदाहरणपुरःसरं भाष्यकारो व्याचष्टे—अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्त इति । तदभावात् कारणाभावात् अनित्यत्वस्य कार्यस्याभावे नित्यत्वं प्राप्तम्, नित्यत्वानित्यत्वाभ्यां राश्यन्तराभावादिति ॥ १२ ॥ § 2100

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ ५ । १ । १३ ॥ § 2101

---
५ त्] तदेतत्nvt-C

अस्य प्रत्याख्यानम्—तथा...षेधः ॥ नित्यत्वेन हि शब्दस्य धर्मिणोऽनुपपत्त्या प्रत्यवस्थेयम्, न चानुत्पन्नः शब्द इति च नित्य इति चानुत्पत्तिधर्मेति च संभवति । उत्पन्नस्तूत्पत्तिधर्मा च शब्दश्चानित्यश्चेति नानुत्पत्त्या शक्यं प्रत्यवस्थातुमित्यर्थः । कारणोपपत्तेरिति । प्रयत्नानन्तरीयकत्वस्य ज्ञापकस्योपपत्तेर्न कारणस्य प्रयत्नानन्तरीयकत्वस्य प्रतिषेध इत्यर्थः । यदुक्तं कारणाभावादनित्यत्वस्य कार्यस्याभावे नित्यत्वं प्राप्तमिति, तत्राह वार्त्तिककारः—
651/tha ज्ञापकश्चायं हेतुर्न कारक इति । कारको हि हेतुर्निवर्तमानः स्वकार्यं निवर्तयति न तु ज्ञापकः, तदभावेऽपि भूमौ चिरनिखातानां निध्यादीनामनिवृत्तेरित्यर्थः । § 2102

ततश्च विशेषणमनर्थकं प्रागुत्पत्तेरिति । प्रागसतो हि सत्तासंबन्ध उत्पत्तिः, प्रागपि चेदसावभ्युपगतः प्रागुत्पत्तेरिति विशेषणमनर्थकम् । उत्पत्तेरभावे सदैवानुत्पत्तिधर्मकत्वादित्यर्थः । § 2103

अपरे तु प्रागुत्पत्तेः कारणाभावादित्युक्ते अर्थापत्तिसमैवेयं जातिरिति मत्वास्या उत्तरमाहुः । यदेवमुच्येत प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति तदा अर्थादप्रयत्नानन्तरीयकत्वे नित्यत्वमुक्तं भवतीत्यर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमैवेयं जातिरित्यभिमानः । एवं कृते त एवास्यां जातावुत्तरं ब्रुवते—नायं नियम इति । तदेतत् परेषां मतं दूषयति—एतत्त्विति । शङ्कते—जातिलक्षणाभावान्नेयं जातिरिति चेत् ? साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः । न चानुत्पत्तिसमायाः साधर्म्यं वैधर्म्यं वास्ति केनचिदित्यर्थः । निराकरोति—नानुत्पन्नैरहेतुभिरिति । यथा अनुत्पन्नास्तन्तवो न पटस्य कारणं तथा शब्दोत्पत्तेः प्रागनुत्पन्नं प्रयत्नानन्तरीयकत्वं नानित्यत्वस्य कारणमिति साधर्म्येण प्रत्यवस्थानमस्ति सामान्यलक्षणमित्यर्थः । एतावता चार्थापत्तिसमात अनुत्पत्तिसमाया भेदो दर्शितः । इहानुत्पन्नैरहेतुभिः साम्येन कार्यप्रतिषेधात्, अर्थापत्तिसमायां वाक्यार्थविपरीतार्थान्तरारोपेण प्रतिषेधादिति ॥ १३ ॥ § 2104

॥ अनुत्पत्तिसमप्रकरणम् ॥

## ५.१.६ संशयसमप्रकरणम्

652/tha

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ॥ ५ । १ । १४ ॥ § 2106

२ त्या ] धर्मेनानु°nvt-C
२० हेतुभिरिति ] °भिः सारूप्यादिति nvt-C
२२ स्ति ] °नमित्यस्ति nvt-C
२३ माया ] चार्थोत्पत्तिसमातः अनुत्पत्तिसमायाः nvt-J
२४ मायां ] °विपरीतारोपेण nvt-C

दृष्टान्तः प्रयत्नानन्तरीयकत्वस्य हेतोर्घट इति । यथा हि विशेषधर्मदर्शनं निश्चयस्य कारणमस्तीति निश्चयोत्पत्तिः, एवं सामान्यधर्मदर्शनमात्रमस्ति संशयस्य कारणमिति संशयेनापि भवितव्यमित्यर्थः । सूत्रार्थप्रयोजनमाक्षेपसमाधानाभ्यां स्फुटीकरोति—संशयसमा साधर्म्यसमाया इति ॥ १४ ॥ § 2107

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशये अत्यन्तसंशयो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १ । १ । १५ ॥ § 2108

अस्य प्रत्याख्यानसूत्रम्—साध...षेधः ॥ न सामान्यदर्शनमात्रं संशयस्य कारणमपि तु विशेषादर्शनसहितम्, विशेषदर्शने तु तद्रहितं कारणमिति सूत्रार्थः । उभयथा वेति । साधर्म्यविशेषदर्शनाभ्यामित्यर्थः । नित्त्यत्वानभ्युपगमाच्च सामान्यस्येति । नित्यं संशयकारणत्वानभ्युपगमात् साधर्म्यस्येत्यर्थः ॥ १५ ॥ § 2109

॥ इति संशयसमप्रकरणम् ॥

## ५.१.७ प्रकरणसमप्रकरणम्

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ ५ । १ । १६ ॥ § 2111

653/tha

उपलक्षणं चैतत् उभयसाधर्म्यादिति, उभयवैधर्म्यादित्यपि द्रष्टव्यम् । एतद् व्याचष्टे भाष्यकारः—उभयेन नित्येन चानित्येन चेति । द्वितीयश्च नित्यसाधर्म्यात् प्रतिपक्षं प्रवर्तयति—नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदिति । अथ द्वितीयसाधनप्रवृत्तौ प्रथमस्य साधनस्य किं भवतीत्यत आह—एवं च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येणोच्यमानो न प्रकरणमतिवर्तते । मातिवर्तिष्ट प्रकरणं को दोष इत्यत आह—प्रकरणानतिवृत्तेर्निर्णयानिर्वर्तनम् । निर्णयानिष्पत्तिरित्यर्थः । एवमनित्यसाधनवादिनं प्रत्युत्तरं दर्शयित्वा नित्यसाधनवादिनं प्रत्याह—समानं चैतन्नित्यसाधर्म्येणोच्यमान इति । तदेवं साधर्म्येण प्रकरणसमद्वयमुक्तम् । तथा वैधर्म्येण प्रकरणसमद्वयं नित्यानित्यसाधनवादिनावेव प्रत्याह—समानं चैतदिति । उभयवैधर्म्यादिति नित्याकाशवैधर्म्यात् कृतकत्वादनित्यघटवैधर्म्याच्चास्पर्शवत्त्वादिति । तदेवं प्रकरणसमचतुष्टयम् । § 2112

२ एवं] साधर्म्यद° nvt-C
७ यो] °न्तसंशयप्रसङ्गो नि nvt-C
१० हितं] तद्रहितं न का° nvt-C
९ म्] °नतिवर्तनम्nvt-C

अत्र चोद्यवार्त्तिकम्—*संशयसाधर्म्यसमाभ्यामिति । परिहरतिनोभय-पक्षसाधर्म्यात् तद्भेदोपपत्तिरिति । प्रकरणसमे हि पक्षनिश्चयेन मया वादिपक्षसाधनं दूषणीयमिति बुद्ध्या प्रवर्तते । साधर्म्यसंशयसमयोस्तु वादिसाधनेन साम्यमात्रापादनेन तद्दूषणम्, न तु प्रतिपक्षविनिश्चयेनेति विशेषः । इह तु साम्यमात्रापादनं न साधनेन, किं तु दूषणैरित्येतावता साम्यार्थः प्रयोगः सम इति बोद्धव्यम् ॥ १६ ॥ § 2113

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥ ५ । १ । १७ ॥ § 2114

अस्य प्रत्याख्यानम्—प्रति...पत्तेः ॥ द्वयोः साधनयोस्तदानीमगृह्यमाणविशेषयोः कोऽयमभिमानः प्रतिवादिनो यन्मया स्वपक्षसाधनेनैव वादिनः
654/tha साधनं दूषयितव्यमिति । समानबलयोश्चेदयमात्मीयात् साधनात् स्वपक्षसिद्धिमिच्छति, ततोऽनिच्छन्नपि वादिनोऽपि साधनबलात् साध्यसिद्धिमभ्युपगमयितव्यः । अन्यथा स्वसाधनात् साध्यसिद्धिमुपजीव्य प्रतिपक्षसाधनं दूषयति, न तु तस्मात् प्रतिपक्षसिद्धिमभ्युपगच्छतीति व्यक्तमियं राजकुलस्थितिरिति । एवं व्यवस्थिते सूत्रभाष्ये योजयितव्ये, प्रतिपक्षात् प्रतिपक्षसाधनात् प्रकरणस्य प्रक्रियमाणस्य साध्यस्येति यावत्, सिद्धेः, समानात् स्वसाधनात् प्रतिषेधस्य प्रतिवादिसाधनस्य स्वसाध्यसिद्धिद्वारेण परकीयसाधनप्रतिषेधस्यानुपपत्तिः । कस्मात् प्रतिषेधानुपपत्तिरित्यत उक्तं—प्रतिपक्षोपपत्तेः । फलतः परकीयसाधनस्य समानात् स्वसाधनात् प्रक्रियासिद्धिं स्वसाध्यसिद्धिं ब्रुवता प्रतिपक्षात् प्रक्रियासिद्धिरुक्ता भवति प्रतिवादिना ।
§ 2115

नन्वेवं प्रकरणसमाह्वयो हेत्वाभासो नोद्भावनीयः प्रतिवादिना, जात्युत्तरप्रसङ्गादित्यत आह—तत्त्वानवधारणाच्च प्रक्रियासिद्धिः । स्वसाध्यनिर्णयेन *परसाध्यविघटनबुद्ध्या प्रतिवादिना साधनं प्रयुज्यमानं प्रकरणसमं जात्युत्तरं भवति । सत्प्रतिपक्षतया वादिनः साधनमनिश्चायकं करोमीति तु बुद्ध्या प्रतिपक्षसाधनं प्रयुञ्जानो न जातिवादी सदुत्तरवादित्वात् । सत्प्रतिपक्षतया वादिनो न साधनमितिवादित्वात् । सत्प्रतिपक्षताया हेतुदोषस्यानैकान्तिकादिवदुपपादितत्वात् । तत्त्वानवधारणादित्यनेन प्रकरणसमोदाहरणं दर्शितम् ।
§ 2116

वार्त्तिकम्—विरुद्धाव्यभिचार्येष उक्तेत्तर इति । तुल्यबलयोरेकतरस्मात् स्वसाध्यसिद्धिमभ्युपगच्छतोर्द्वयोरपि फलतोऽव्यभिचारः सिध्यति । न च विरुद्धाव्यभिचारी संभवति । अव्यभिचारो ह्यविनाभावः । स च पञ्च-

१ म्] पूर्वपक्षवार्त्तिकंnvt-C
१ *] संशयसमासाध°nvt-C
२ हि] स्वपक्ष°nvt-C
११ मिति] दूषणीयमिति nvt-C
२४ *] परसाधन° nvt-J
२६ वादित्वात्] सदुत्तरं भवति nvt-J
२७ मितिवादित्वात्] सत्प्रति... वादित्वात् *only in* nvt-J

रूपसंपत्तिः, चतूरूपसंपत्तिर्वा । न च विरुद्धाव्यभिचारिणि सास्तीत्यर्थः ॥ १७ ॥ § 2117

॥ इति प्रकरणसमप्रकरणम् ॥

## ५.१.८ अहेतुसमप्रकरणम्

655/tha

*त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ ५ । १ । १८ ॥ § 2119

सूत्रभाष्यवार्त्तिकानि प्रमाणसामान्यपरीक्षाव्याख्यानेन व्याख्यातानि ॥ १८ ॥ § 2120

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ ५ । १ । १९ ॥ § 2121

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ ५ । १ । २० ॥ § 2122

॥ इति अहेतुसमप्रकरणम् ॥

## ५.१.९ अर्थापत्तिसमप्रकरणम्

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ ५ । १ । २१ ॥ § 2124

उदाहरणपुरःसरं सूत्रं योजयति—अनित्यः शब्द इति । अनित्यसाधर्म्यादनित्यं शब्दं ब्रुवाणो भवाननक्षरं नित्यसाधर्म्यान्नित्यत्वं शब्दस्य ब्रूत इत्यर्थः । न साधर्म्यसमादौ वाद्यभिप्रायवर्णनमित्येतावता भेदः ॥ २१ ॥ § 2125

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वाद् अनैकान्तिकत्वाच्चार्थापत्तेः ॥ ५ । १ । २२ ॥ § 2126

अस्य प्रत्यादेशसूत्रम्—अनुक्त…पत्तेः ॥ तद् व्याचष्टे—अनुपपाद्य 656/tha
सामर्थ्यमिति । तदेव खल्वनुक्तं वचनाल्लभ्यते यत्कल्पनमन्तरेण वचनार्थो न घटते, यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्युक्ते गम्यते रात्रौ भुङ्क्त इति । यथा वा यागेन स्वर्गं भावयेदित्युक्ते गम्यतेऽन्तरा अपूर्वं कृत्वेति

१ *] त्रैकाल्यानुपपत्तेर्हेतो°nvt-J

। वाक्यार्थोपपादने तस्य तस्य सामर्थ्यात् । न त्वव्यभिचारिणः साधर्म्यात् साध्ये साध्यमानेऽर्थादुक्तं भवति व्यभिचारिणापि साधर्म्येण साध्यं साधयितव्यमिति, तस्य वाक्यार्थोपपादनेऽसामर्थ्यात्, तदन्तरेण वाक्यार्थस्योपपत्तेः । यदि पुनरनुपलब्धसामर्थ्यमप्यनुक्तमात्रं गम्येत, ततस्त्वया प्रतिवादिना नित्यत्वापादने शब्दस्योच्यमानेऽनुच्यमानमनित्यत्वं प्रत्येतव्यम् । तथा च भवदभिमतस्य नित्यत्वस्य व्याहतिः । तदिदमाह—अनित्यपक्षस्य अनुक्तस्य सिद्धावर्थादापन्नं नित्यपक्षस्य हानिरिति । विपर्ययेणापि प्रत्यवस्थानसंभवात् । अनैकान्तिकत्वमाह—उभयपक्षसमा चेयमिति । व्यभिचाराद्यानैकान्तिकत्वमाह—न चेयं विपर्ययमात्रादिति । न हि भोजननिषेधादेवाभोजनविपरीतं सर्वत्र कल्पते । घनत्वं हि ग्राव्णः पतनानुगुणगुरुत्वातिशयसूचनार्थं न त्वितरेषां पतनं वारयति । वार्त्तिकं सुबोधम् ॥ २२ ॥ § 2127

॥ इति अर्थापत्तिसमप्रकरणम् ॥

## ५.१.१० अविशेषसमप्रकरणम्

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ ५ । १ । २३ ॥ § 2129

यदि घटसाधर्म्यात् प्रयत्नानन्तरीयकत्वाद् घटेनाविशेषोऽनित्यत्वाख्यः शब्दस्य, अथ सत्त्वात् साधर्म्यात् सर्वेषां सर्वाविशेषप्रसङ्गः । न त्वेवम् । तथा प्रयत्नानन्तरीयकत्वादपि साधर्म्यान्न शब्दघटयोरनित्यत्वमविशेष इति प्रतिषेधः
657/tha अविशेषसमः । अविशेष इत्यस्य विवरणम्—उभयोरनित्यत्व इति । देश्यं वार्त्तिकं साधर्म्यसमातो न भिद्यत इति । परिहारवार्त्तिकं—नैकसमस्तेति ॥ २३ ॥ § 2130

क्वचित्तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः ॥ ५ । १ । २४ ॥ § 2131

अस्य प्रत्यादेशसूत्रम्—क्वचि...भावः ॥ क्वचित् साधर्म्ये प्रयत्नानन्तरीयकत्वादौ सति शब्दादेर्घटादिना सह तद्धर्मस्य घटधर्मस्यानित्यत्वस्योपपत्तेः, क्वचिच्च साधर्म्ये शब्दस्य भावमात्रेण सह सत्त्वादौ भावमात्रधर्मस्यानुपपत्तेः प्रतिषेधाभाव इति योजना । एतदुक्तं भवति, अविनाभावसंपन्नं साधर्म्यं गमकं न तु साधर्म्यमात्रमिति । सद्भावोपपत्तिनिमित्तमिति सद्भावव्यापकमित्यर्थः । अत्रान्तरे वैनाशिकः सत्ताव्यापकमनित्यत्वं मन्यमानो देशयति—अथ मतमनित्यत्वमेव धर्मान्तरमिति । निराकरोति—एवं खलु वै कल्प्यमाने इति । पूर्वपक्षोत्तरपक्षनिर्वाहस्तृतीये प्रपञ्चितः । अपि च, सन्तः

६ तिः ] व्यावृत्तिःnvt-C
१० ग्राव्णः ] °नानुकूलगु°nvt-C
४ त्वेषां ] सर्वथावि°nvt-J

केचन प्रमाणावधृत—नित्यत्वाः, यथाकाशकालदिगात्मपरमाणवः; केचित् प्रमाणविनिश्चितानित्यभावाः, यथा घटादयः, तस्मात् सत्त्वमनैकान्तिकत्वाद-साधकमित्याह—सतश्च नित्यानित्यभावादिति । अपि च यत्प्रतिषेधाय प्र-संगापादनं तदेव प्रतिषेध्यं साधयति, न तु निषेधतीत्याह—सर्वभावानां सद्भावोपपत्तेरिति । § 2132

वार्त्तिकं—क्वचित् साधर्म्यमुपलभ्यत इति । व्याप्यतयेति शेषः । अथ शब्दवर्जमुच्यत इति तत्राह—व्यर्थं वा सर्वभावग्रहणम् । उक्तश्च विशेषोऽन्व-यव्यतिरेकसंपन्नो हेतुरिति प्रयत्नानन्तरीयकत्वम्, न तु उत्तरः, सद्भावोपप-त्तेरित्यन्वतिरेकसंपन्न इति ॥ २४ ॥ § 2133

॥ अविशेषसमप्रकरणम् ॥

## ५.१.११ उपपत्तिसमप्रकरणम्

658/tha

उभयकारणोपपत्तेरुपपत्तिसमः ॥ ५ । १ । २५ ॥ § 2135

यद्यनित्यत्वकारणं प्रयत्नानन्तरीयकत्वमुपपद्यते, तदस्ति शब्दस्य इत्य-नित्यः शब्द इति । प्रकरणसमायां जातौ पक्षप्रतिपक्षसाधनयोः समान-बलत्वेऽपि प्रतिवादी स्वसाधनात् स्वपक्षसिद्ध्या वादिसाधनदूषणे प्रवर्तते । उपपत्तिसमायां तु स्वसाधनेनैवेति विशेषः ॥ २५ ॥ § 2136

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ ५ । १ । २६ ॥ § 2137

अस्य प्रत्यादेशसूत्रम्—उप...षेधः ॥ वाद्यभिमतस्य साधनस्योपप-त्तौ यत्कारणं तस्य प्रतिवादिना अभ्यनुज्ञानादिति भावः । प्रकरणसमप्र-त्याख्यानवदस्यापि प्रत्याख्यानं द्रष्टव्यम् । सुगमे भाष्यवार्त्तिके ॥ २६ ॥ § 2138

॥ इत्युपपत्तिसमप्रकरणम् ॥

## ५.१.१२ उपलब्धिसमप्रकरणम्

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥ ५ । १ । २७ ॥ § 2140

अनित्यत्वकारणस्येति । ज्ञापकस्येत्यर्थः । ननु यद्वृत्तयोगप्राथम्ययोः साधनधर्मो विषयो न तु साध्यधर्मः । स हि तद्वृत्तयोगस्य विषयः ।

१ वः ] °काशदिगात्म° nvt-C °परमाण्वादयः nvt-J

४ नं ] प्रसंगसाधनं nvt-C

एवं हि प्रयुज्यते, यो यः प्रयत्नानन्तरीयकः स सर्वोऽनित्यः । अनेन
659/tha हि प्रयत्नानन्तरीयकत्वमनित्यत्वादन्यतो व्यावर्तितम्, अनित्यत्वं त्वनियमितम् । स यद्यप्रयत्नानन्तरीयके शब्दे वा अन्यत्र वा भवेत्, कः प्रयत्नानन्तरीयकत्वस्यानित्यत्वनियमविरोधः ? एवं हि स भवेद् यदि नित्योऽपि प्रयत्नानन्तरीयको दृश्येत, न त्वेवमस्ति । तस्मादुपलब्धिसमस्योत्थानमेव नास्ति, बीजाभावादित्यत आह वार्त्तिककारः—*सर्वसाध्यारोपेणाव्यापकत्वं *साधनस्येत्युपलब्धिसमार्थः । यद्यपि वर्णात्मकः शब्दोऽनित्यत्वेन साध्यतया विवक्षितः प्रकरणात्, अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदिति, तथापि शब्दमात्रमनेन पक्षीकृतमित्यारोप्य भागासिद्धत्वापादनं साधनस्येत्युपलब्धिसंमार्थः । समारोपमेवोदाहरणान्तरेण दर्शयति—सर्वमनित्यमिति । शब्दोऽनित्य इति प्रतिज्ञायामपि सर्वमनित्यमित्यारोप्येति योजना । भाष्यकारोदाहरणापरितोषश्चोदाहरणान्तरप्रदर्शनबीजम् । यस्त्वनित्यः शब्द इति प्रतिज्ञायां सर्वानित्यत्वारोपो निर्बीज इति न तुष्यति, तं प्रत्याह—श्रूयमाणेति । यद्यप्यनित्यः शब्द इति श्रूयते, तथापि सामर्थ्यादाद्य इति विवक्षितम् । शब्दान्तरोत्पादकत्वं सजातीयोत्पादकत्वमिति । एवं च नायोगव्यवच्छेदेनायं शब्दानित्यत्वे हेतुरव्यापकत्वात्, नाप्यन्ययोगव्यवच्छेदेन, हेत्वन्तरस्यापि विद्यमानत्वादिति जातिवादिनोऽभिसन्धिरिति ॥ २७ ॥ § 2141

## कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ ५ । १ । २८ ॥

§ 2142

अस्य प्रत्याख्यानसूत्रम्—कारणा…षेधः ॥ तद् व्याचष्टे, प्रयत्नानन्तरीयकत्वादिति ब्रुवतेति । कारणतः प्रयत्नाच्छब्दस्योत्पत्तिरियमभिधीयते वर्णानामनित्यत्वं साधयितुम्, न तु कार्यस्य कारणनियमः, प्रयत्नादेव सर्वः शब्दो जायते न तु वायुसंयोगाद् वृक्षशाखाभङ्गादिति नियम उच्यते,
660/tha येनाव्यापकत्वं हेतोः स्यादिति । सूत्रार्थस्तु कारणान्तरादपि ज्ञापकान्तरादपि तद्धर्मोपपत्तेः साध्यधर्मोपपत्तेरप्रतिषेध इति । § 2143

एतदेव वार्त्तिककारो व्याचष्टे, अनित्यः शब्द इति ब्रुवता । प्रयत्नानन्तरीयकत्वेन हेतुनेति शेषः । साध्यान्तराणां शाखाभङ्गजादीनां शब्दानां न कारणान्तरमनित्यत्वज्ञापकं प्रतिषिध्यते । यद्यपक्षीकृतानामपि कारणान्तराद् अनित्यत्वं भवति, कामं भवत्वित्यर्थः । नापि शब्दस्य साध्यस्यानित्यत्वेन कारणान्तरं प्रत्ययभेदभेदित्वादिप्रतिषिध्यते । § 2144

एकदेशिमतमाह—अपरे तु परिहारं ब्रुवते, यदेव प्रयत्नानन्तरीयकमिति । तदेतद् दूषयति—एतत्तु नाविवादादिति । अयमभिसन्धिः, प्रयत्नानन्तरीयक-

२ तो] अनित्याद°nvt-C
२ म्] अनियतम्nvt-C
६ *] °ध्याध्यारोपेणnvt-J
७ *] साधनस्येति*Om*nvt-J
९ नं] °त्वारोपणंnvt-C
१६ त्वात्] °देन शब्दानित्यत्वं
२१ ते] °त्तिनियमोऽभि°nvt-C
२८ ते] शाखाभङ्गजशब्दानां कारणमनित्यत्वज्ञापकं न nvt-C

त्वं हि कोष्ठ्यस्य वायोः क्रियायाः । सा हि प्रयत्नवदात्मसंयोगाज्जायते । वायोः पुनरुरःस्थानादिषु संयोगविभागादयो न प्रयत्नानन्तरीयकाः प्रागेव तु शब्दः । यदा चाद्यस्य शब्दस्येयं गतिः, तदा कैव कथा प्रयत्नानन्तरीयकत्वेऽन्त्यस्य श्रवणविवरसमवायिनः श्रूयमाणस्य शब्दस्य । तस्माद् यः प्रयत्नानन्तरीयकत्वं शब्दस्य विना प्रमाणेन प्रतिपद्यते, न तं प्रति किञ्चित् साध्यते प्रमाणेन । प्रमाणानधीनस्य प्रतिभासमात्रेण प्रमेयसिद्धेः सर्वत्र सुलभत्वादिति । तद- नेनापरितोषबीजमुक्तम् । अभ्युपेत्य शब्दस्य प्रयत्नानन्तरीयकत्वमाह—यदा तु प्रयत्नानन्तरीयकत्वमिति । चोदयति—जातीति । परिहरति—नेति ॥ २८ ॥ § 2145

॥ उपलब्धिसमप्रकरणम् ॥

## ५.१.१३ अनुपलब्धिसमप्रकरणम्

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिस- मः ॥ ५ । १ । २९ ॥ § 2147

661/tha

अनुपलब्धिसमस्य प्रतिषेधस्य लक्षणं दर्शयितुं तत्प्रतिषेध्यं तावदाह भाष्यकारः—न प्रागुच्चारणाद् विद्यमानस्य शब्दस्यानुपलब्धिरिति । क- स्मात् ? उदकादिवद् आवरणादिरस्यानुपलम्भकारणं भवतीत्यत आह— गृह्येत चैतदस्याग्रहणकारणमिति । प्रतिषेधमुक्त्वा प्रतिषेध्यस्य जातेर्लक्ष- णसूत्रमाह—तदनु...... समः ॥ व्याचष्टे—तेषामावाणादीनामनुपलब्धिर्नोप- पद्यते । उपलभ्यमानत्वे उपलब्धिरूपतया अनुपलब्धित्वानुपपत्तेः । त- था चानुपलब्धेरनुपलम्भादनुपलब्धिर्नास्तीति आवरणाद्युपलब्धिसिद्धिरिति । आवरण इवावरणानुपलब्धावप्यनुपलब्धिसमेत्यर्थ ॥ २९ ॥ § 2148

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ५ । १ । ३० ॥ § 2149

अस्य प्रत्यादेशसूत्रम्—अनुप...हेतुः ॥ आवरणाद्यनुपलब्धिरावर- णादीनामभावं गमयति, न त्वात्मनोऽप्यभावमावरणाद्युपलब्धिभावरूपम् । न ह्यसावनुपलब्धिरप्यात्मनः, येनात्माभावं गमयेत् । उपलब्धिरप्युपलभ्यविष- या, नात्मविषया । किं पुनरनुपलब्धिः ? तस्मादनुपलब्धिरुपलभ्याभावे हेतुः, नात्माभावस्य । तथा सति सैव न स्यादिति न स्यादुपलभ्याभावोऽपीत्यावरणं च तदुपलब्धिश्च स्यातामिति । तदिदमाह भाष्यकारः—अनुपलम्भादित्यय- महेतुरिति, कस्मात् ? अनुपलम्भात्मकत्वादनुपलब्धेः । § 2150

१० र्थ ] °नुपलब्धिरप्य°nvt-C

१७ स्य ] °भावहेतुः न हेतुरात्मा°nvt-C

एतद् व्याचष्टे—उपलम्भाभावमात्रत्वादिति । मात्रग्रहणेन जातिवाद्यभिमतामात्माभावरूपतां व्यवच्छिनत्ति । नन्वियमनुपलब्धिर्भवतूपलम्भस्याभावो मा च भूदुपलभ्यस्य, किमायातमावरणाद्यभावस्येत्यत आह—यदस्ति तदुपलब्धेर्विषयः, उपलब्ध्या तदस्तीति प्रज्ञायते । न पुनरनुपलब्धेरनुपलम्भात्मतया तत् *प्रज्ञेयमिति भावः । अनुपलब्धेः प्रज्ञेयमाह—यन्नास्ति 662/tha सोऽनुपलब्धेरिति । ननु प्रज्ञायतां किमेतावताऽपीत्यत आह—सोऽयमावरणाद्यनुपलब्धेरनुपलम्भ इति । त्वया हि जातिवादिना आवरणाद्यनुपलब्धेरनुपलम्भेनावरणोपलम्भमावरणं च प्रसञ्जयता अनुपलम्भस्य स्वविषयालोपेन प्रत्यवस्थेयम् । एवं चेद् वरमस्त्वस्यावरणतदुपलम्भौ विषयौ । एवमनेन भावाभावबुद्धिव्यपदशव्यवहाराः सकललोकयात्रावाहिनोऽनुकुलिता भवन्ति । तदिदमुक्तम्—सोऽयमावरणाद्यनुपलब्धेरनुपलम्भः आवरणोपलम्भस्य निषेधविषयं प्रमाणम् । उपलब्ध्यभावेऽनुपलब्धौ स्वविषये प्रवर्तमानो न स्वविषयम् अनुपलब्धिं प्रतिषेधति अपि तूपलब्धिमेव । जातिवादिनस्तु निषेधात् । तथा च सर्वलोकव्यवहारः समुच्छिद्येतेति भावः । अप्रतिषिद्धा चावरणाद्यनुपलब्धिः आवरणादीनामभावं प्रति हेतुत्वाय कल्पते । ननु च नानुपलम्भमात्रमभावग्रहहेतुः, मा भूच्चन्द्रमसः परभागे हरिणसदसद्भावसंशय इत्यत आह—आवरणादीनि त्विति । उपलभ्यं वोपलब्धिर्वा नानुपलम्भमात्रान्नास्तीति सिध्यति । अपि तु दर्शनयोग्यं सदिति नातिप्रसङ्ग इत्यर्थः । ननूपलब्धेः स्वविषयस्य प्रतिपादिकाया अभावात् आवरणादयो मा नामोलभ्यन्ताम्, अभावस्तु तेषां कुतस्त्य इत्यत आह—अनुपलम्भात् प्रतिषेधकात् प्रमाणादनुपलब्धेर्यो विषयः उपलभ्याभावः, स गम्यते, न सन्त्यावरणादीनि शब्दस्याग्रहणकारणानि इति । तत् किमिदानीं साक्षादेवोपलम्भनिषेधकं प्रमाणमुपलभ्याभावं गमयति ? नेत्याह—अनुपलम्भात् तु उपलब्धिनिषेधकात् प्रमाणात् अनुपलब्धिरावरणस्य सिध्यति । कस्मादित्यत आह—विषयः स तस्य उपलब्धिनिषेधकस्य प्रमाणस्यानुपलब्धिः । ततश्चावरणाद्यभावसिद्धिरिति द्रष्टव्यम् ॥ ३० ॥ § 2151

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥ ५ । १ । ३१ ॥ § 2152

663/tha

न केवलं निषेधविषयप्रमाणगम्यता अनुपलब्धेरुपपत्तिगम्या, अपि तु सर्वजनप्रत्यात्मवेदनीयेत्याह सूत्रकारः—ज्ञान...त्मम् ॥ व्याचष्टे—अहेतुरिति वर्तते । शरीरे शरीर इति । प्रागुच्चारणात् शब्दस्यानुपलब्धेरसत्त्वे साध्यमानेऽनैकान्तिकत्वं स्यात् । यदि तु पश्चाद् विशिष्येत, आवरणाद्यसंभवे सतीति, ततो हेत्वन्तरं नाम निग्रहस्थानं स्यादित्याशङ्क्य वार्त्तिककार आह—

३ स्य ] मा भूत् स्वस्यnvt-J
५ * ] प्रतिज्ञेयम्nvt-C
१४ निषेधात् ] निषेध्येत nvt-C
२० तेषां ] तस्य nvt-J

आवरणाद्यसंभवे सत्त्वाभ्युपगमे च सत्यनुपलब्धेरिति प्रयोगः । सत्त्वाभ्युपगमे चेत्यस्योपादानप्रयोजनमाह—आवरणाद्यसंभवे सत्त्वाभ्युपगमे विपर्ययस्याव्यभिचारात् नार्थापत्तिसमः । अयमर्थः । यद्यावरणाद्यसंभवे सत्यनुपलब्धेरित्युच्यमाने कश्चिदर्थापत्तिसमया जात्या प्रत्यवतिष्ठते, आवरणाद्यसंभवे सत्यनुपलब्धेरित्युच्यमाने अर्थादापतितमावरणादिसंभवे सत्युपलब्धेरिति । यदा तु सत्त्वाद्यभ्युपगम इति विषयविपर्ययः सूच्यते, तदा आवरणाद्यसंभवे सत्यनुपलब्धेरसत्त्वमित्यस्य विपर्यय एव प्रयोक्तव्यः सत्त्वोपगमे त्वावरणाद्यसंभवे सत्युपलभ्येतेति । अस्य विपर्ययस्याव्यभिचारान्नार्थापत्तिसम इत्यर्थः ॥ ३१ ॥ § 2153

॥ इति अनुपलब्धिसमप्रकरणम् ॥

## ५.१.१४ अनित्यसमप्रकरणम्

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ५ । १ । ३२ ॥ § 2155

अस्ति घटनानित्येन सर्वभावानां सत्त्वं साधर्म्यमिति ॥ ३२ ॥ § 2156

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात् ॥ ५ । १ । ३३ ॥ § 2157

664/tha

अस्य प्रत्याख्यानसूत्रम्—साध...र्म्यात् ॥ ३३ ॥ § 2158

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथा भावान्नाविशेषः ॥ ५ । १ । ३४ ॥ § 2159

तदिदं जातिवादिनां साम्यमापाद्य परमार्थप्रतिषेधमाह—दृष्टान्ते...... अविशेषः ॥ साधर्म्यमात्रं चाश्रित्य साध्याविनाभावरहितमिति । देश्यवार्त्तिकम्— अविशेषसमात इति । परिहरति—भिद्यत इति । यच्चाविशेषसम उत्तरमिति । सर्वानित्यत्वं हि प्रसञ्जयता न शब्दानित्यत्वं निषिद्धं भवतीति तत्रोक्तमित्यर्थः । अत्र शङ्कते—नासाधनादिति चेदिति । परिहरति—न, विशेषहेतूपपत्तेरिति । सुगममन्यत् ॥ ३४ ॥ § 2160

॥ इत्यनित्यसमप्रकरणम् ॥

---

२ मे ] सत्त्वोपलब्धे nvt-J
४ माने ] °त्युच्येत अतः nvt-J
७ वे ] तदनुप° nvt-J

## ५.१.१५ नित्यसमप्रकरणम्

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥ ५ । १ । ३५ ॥ § 2162

धर्मस्य सर्वदा भावाद् धर्मिणोऽपि सर्वदा भावः । न ह्यस्ति संभवः सामान्यसमवायातिरिक्तधर्मो नित्यो धर्मी चानित्य इति ॥ ३५ ॥ § 2163

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेःप्रतिषेधाभावः ॥ ५ । १ । ३६ ॥ § 2164

665/tha

अस्य प्रत्यादेशसूत्रम्—प्रति...भावः ॥ नित्यमनित्यभावादिति हेतोरभ्युपगमेऽनभ्युपगमे च दोष इत्यर्थः । उत्पन्नस्य च निरोधादभावः शब्दस्यानित्यत्वम् । तत्र च परिप्रश्नानुपपत्तिः । यदि हि निरोधकादभावोऽनित्यता तथापि प्रश्नानुपपत्तिः । अथाप्यस्मन्मते समवायः, तथापि तदनुपपत्तिः । अनित्यत्वं हि शब्दस्यापरान्तावच्छिन्नसत्तासमवायः । न चासौ शब्दाधेयस्तस्य स्वतन्त्रत्वादेवेत्यर्थः । § 2165

वार्त्तिकम्—पृथग्धर्मत्वेनानित्यत्वस्यानभ्युपगमादिति । अनात्यन्तिकसत्तासमवायो ह्यनित्यता । न चासौ समवायात् पृथग्धर्मो न च समवायोऽपि धर्मोऽनाश्रितत्वात्, पारतन्त्र्येण तु निरूपणात् कथञ्चिद् धर्मीत्युच्यते इति । अपि चानात्यन्तिकसत्तायोगोऽनित्यतेत्युक्ते न युक्तः प्रश्न इति । न हि घटमानयेति प्रेषितः परिवृत्य पृच्छति—किं घट आनेतव्य उत पट इति । तादृशमेतदित्यर्थः । अपि चानित्यता नित्यानित्या वेति विकल्पो नावतरति, विरोधादित्यत आह—आत्यन्तिकानात्यन्तिकभावयोगश्चैकस्येति । शङ्कते—प्रतिषेध्येति । एवमभ्युपगच्छतोऽयं दोष इत्येतत्परमेतत्, न तु स्वपक्षोपवर्णनपरमेतदिति शङ्कार्थः । निराकरोति—न, विकल्पानुपपत्तेरिति । विरोधस्य चोक्तोत्तरत्वादिति । परिप्रश्नानुपपत्तेरित्युत्तरं विरोधस्योक्तमित्यर्थः ॥ ३६ ॥ § 2166

॥ इति नित्यसमप्रकरणम् ॥

## ५.१.१६ कार्यसमप्रकरणम्

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥ ५ । १ । ३७ ॥ § 2168

उदाहरणपूर्वकमस्यार्थं व्याचष्टे—प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति
666/tha । कार्यत्वानित्यत्वे च परस्परासंकीर्णे प्रथम एवाध्याये दर्शिते । उदाहृत्य

४ नित्यो ] धर्मा नित्याः nvt-C

जातिमवतारयति—एवमवस्थिते प्रयत्नकार्यानेकत्वादिति प्रतिषेध उच्यत इति । प्रयत्नानन्तरीयकत्वम्—प्रयत्नानन्तरोत्पादो वा स्यात्, प्रयत्नानन्तरोपलम्भो वा ? न तावत् पूर्वः कल्पोऽसिद्धत्वात् । तस्मात् प्रयत्नानन्तरोपलम्भ आस्थेयः । तत्र कार्यसमं प्रतिषेधमाह—प्रयत्नानन्तरम् उपलभ्यमानानां प्रयत्नानन्तरम् आत्मलाभश्च दृष्टो यथा घटादीनाम्, व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानां मूलकीलकादीनाम् । तत् किं प्रयत्नानन्तरमात्मलाभः शब्दस्य, आहोस्विद् अभिव्यक्तिरिति विशेषो नास्ति । तदेवं कार्याविशेषेण प्रत्यवस्थानं कार्यसमः । § 2169

येन तु कार्यसमा जातिरन्यथैवोक्ता, तद् यथा—अनित्यः शब्दः कृतकत्वाद् घटवदित्युक्ते अन्यद् मृत्पिण्डादिकार्यत्वं घटस्य, अन्यच्च विवक्षाप्रयत्नवायुप्रेरणाभिघातकार्यत्वं शब्दस्य । तस्माच्छब्दकृतकत्वस्य घटादिकृतकत्वाद् भेदान्न साधनं कृतकत्वमनित्यत्वस्येति । सेयं कार्यान्यत्वेन प्रत्यवस्थानात् कार्यसमेति । तदाह,

कार्यत्वान्यत्वलेशेन यत् साध्यासिद्धिदर्शनम् ।§ 2171

तत् कार्यसमम् (Edtext outside numbered paragraph) इति भदन्तेनोक्तम् । कीर्तिरप्याह,

साध्येनानुगमात् कार्यसामान्येनापि साधने ।
संबन्धिभेदाद् भेदोक्तिर्दोषः कार्यसमो मतः ॥§ 2173

इति । § 2174

तदनेन यदीश्वरसाधननिराकरणायोक्तम्—तनुगिरिसागरादीनामन्यत् कार्यत्वम्, अन्यच्च प्रासादाट्टालगोपुरादीनाम् इति, तदपि जात्युत्तरमेवेति उक्तं भवति । न च प्रत्यक्षदृश्यमानं बुद्धिमदन्वयव्यतिरेकानुविधानं सौधादीनामिव तनुभुवनादीनां नास्तीत्येतावता भेदेन कार्यभेदे शब्दमात्राभेद इति साम्प्रतम्, अभूत्वा भावलक्षणस्य कृतकत्वस्य संस्थानवत्त्वस्य वा वस्तुन 667/tha
एवाभेदात् । तस्मादेतदप्ययुक्तम्— § 2175

वस्तुभेदे प्रवृत्तेऽपि शब्दसाम्यादभेदिनः ।
न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशने ॥§ 2177

न चेयं जातिरुत्कर्षापकर्षसमाभ्यां भिद्यते । साध्यदृष्टान्तयोर्धर्मविकल्पेन प्रवर्तमानत्वात् । तस्मात् सूत्रकारोक्त एव कार्यसमोऽसंकीर्ण इति युक्तमुत्पश्यामः ॥ ३७ ॥ § 2178

---

१४ म्] °द्धि चोदनममिति ज्ञानश्रीनिबन्धेषु पाठः ।
१६ तः] प्र. वा १. १६
२५ ने] प्र. वा. १. १४

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ५ । १ । ३८ ॥ § 2179

अस्य प्रत्यादेशसूत्रम्—कार्या…पत्तेः ॥ कार्यस्योत्पत्तिलक्षणस्यान्यत्वेऽभिव्यक्तिलक्षणात् कार्यात् प्रयत्नस्याभिव्यक्तिं प्रति अहेतुत्वम् । कस्मादभिव्यक्तिं प्रति हेतुत्वं न भवतीत्यत आह—अनुपलब्धिकारणस्यावरणादेः उपपत्तेः अभिव्यक्तिहेतुत्वं स्यात्, *तदेव तु नास्तीति व्यतिरेकपरं द्रष्टव्यम् । सति कार्यान्यत्व इति भाष्यं सूत्रवद् योजनीयम् । यत्र प्रयत्नानन्तरमित्यत्र यत्रतत्रयोर्व्यत्यासः, तत्र प्रयत्नानन्तरमभिव्यक्तिर्यत्रानुपलब्धिकारणं व्यवधानमुपपद्यत इति । कस्मादनुपलब्धिकारणोपपत्तेः प्रयत्नाभिव्यङ्ग्यत्वमित्यत आह—व्यवधानापोहाच्च इति चो हेत्वर्थे । प्रयत्नानन्तरभाविन इति विषयेण विषयिणमुपलक्षयति । प्रयत्नानन्तरभाविन इत्यर्थः अनुपलब्धिकारणोपपत्तेरित्यस्य व्यतिरेकप्रधानतामाह— न तु शब्दस्यानुपलब्धीति । § 2180

देश्यवार्त्तिकं—संशयसमात इति । परिहरति—उभयसाधर्म्यादिति । विशेषानुपलब्धौ सत्यामुभयसाधर्म्यात् संशयसमः । इह तु विशेषोपलब्धिमविवक्षित्वेति विशेषः । तदिदमुक्तम्—अयं तु न तथेति । देशयति— साधर्म्यसमात इति । निराकरोति—न, हेत्वध्यारोपणादिति । प्रयत्नान-
668/tha न्तरीयकत्वादित्ययं हेतुः प्रयत्नानन्तरमुपलब्धिरित्यध्यारोप्य प्रतिषिध्यते । साधर्म्यसमे तु नारोपणमित्यर्थः ॥ ३८ ॥ § 2181

॥ इति कार्यसमप्रकरणम् ॥

## ५.१.१७ षट्पक्षीरूपकथाभासप्रकरणम्

प्रतिषेधेऽपि समानो दोषः ॥ ५ । १ । ३९ ॥ § 2183

तदेवं जात्युत्तरवादिनं प्रति साधनवादिना सर्वत्रैव सम्यक् समाधानं स्वसाधनस्य वक्तव्यम् । एवं सति तत्त्वनिर्णये कथा पर्यवसानं भवति । यदि पुनर्वाद्यपि जातिवादिनं प्रति साधनाभासेन प्रत्यवतिष्ठेत, ततः षट्पक्ष्यां सत्यां न तत्त्वनिर्णयावसाना कथा भवेदिति शिष्यहितः सूत्रकारः समाधानाभासवादिनं प्रति षट्पक्षीमवतारयति—प्रति…दोषः ॥ § 2184

तदेतत्सूत्रावतारपरं भाष्यम्—हेतोश्चेदनैकान्तिकत्वमुपपाद्यते प्रतिवादिना, अनैकान्तिकत्वादसाधकः स्यादिति यदि चानैकान्तिकत्वादसाधकं वादिनो वचनम्, प्रतिषेधेऽपि समानो दोषः । योऽयं प्रयत्नकार्यानेकत्वादिति प्रतिषेधो जातिवादिनः, सोऽप्यनैकान्तिकः । एवं ह्यनैकान्तिकः स्याद् यदि सर्वमेव प्रतिषेधेत्, यतस्तु किंचित् प्रतिषेधति किंचिच्च न, तस्मादयमप्यनैकत्वादसाधक इत्यर्थः । § 2185

६ *] एवंnvt-C
११ भाविन] भासिनःnvt-J
१४ ब्धौ] विशेषो°nvt-J
१२ क] °न्तिकः, अतोऽसा° nvt-C

व्याख्यान्तरमाह—अथवा शब्दस्येति । नित्यपक्षोऽभिव्यक्तिर्नोत्पादः, एवमनित्यपक्षे उत्पादो नाभिव्यक्तिरित्ययं विशेषो न सिध्यत्ययं प्रतिषेधेऽपि समानो दोष इत्यर्थः ॥ ३९ ॥ § 2186

सर्वत्रैवम् ॥ ५ । १ । ४० ॥ § 2187
669/tha

न केवलमस्यां जातावयं समाधानाभासो वादिनः, अपि तु सर्वत्रैव जाताविति शिष्यान् शिक्षयति सूत्रकारः—सर्वत्रैवम् ॥ ४० ॥ § 2188

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद् दोषः ॥ ५ । १ । ४१ ॥
§ 2189

अस्मिन् समाधाने प्रयुक्ते वादिना पुनर्जातिवादी प्रत्यवतिष्ठते—प्रति...... दोषः ॥ प्रतिषेधो जातिवादिनस्तस्य विप्रतिषेधो मूलसाधनवादिनः । तस्मिंस्तुल्यो दोष इति जातिवादिनः प्रत्यवस्थानमित्यर्थः ॥ ४१ ॥ § 2190

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ५ । १ । ४२ ॥ § 2191

अथ पञ्चमं पक्षं साधनवादिनश्चतुर्थपक्षवादिनं प्रति मतानुज्ञापादनमाह—प्रतिषेधं...मतानुज्ञा ॥ ४२ ॥ § 2192

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ॥ ५ । १ । ४३ ॥ § 2193

सेयं मतानुज्ञा तृतीये पक्षे पञ्चमपक्षवादिनोऽपि साधनवादिन इति जातिवादी षष्ठे पक्षे स्थित आह—स्वप...दोषः ॥ स्वपक्षेण लक्ष्यते तदुत्थानत्वाज्जातिः, स्वपक्षलक्षणा अनैकान्तिकत्वोद्भावनलक्षणा । तामपेक्ष्य अनुद्धृत्य प्रतिषेधेऽपि जातिलक्षणे समानोऽनैकान्तिकत्वदोष इत्युपपद्यमानं स्वपक्षेऽपि दोषं परपक्षे जातिवादिपक्षे साधनावाद्युपसंहरति । तत्र चानैकान्तिकं हेतुं ब्रूते । तदेवं स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षे यत्स्वयं दूषणं दत्तं तस्याभ्युपगमाद् वादिनोऽपि समानो दोष इति जातिवादिनो वचनं षष्ठे पक्षे स्थितस्य । तदेवं विस्तीर्णं संकलय्याह—तत्र खलु स्थापनाहेतुवादिन इति । सेयं षट्पक्षी समानदोषापादनेनानिर्णायकत्वात् पौनरुक्त्याच्च न तत्त्वनिर्णयाय पर्याप्ता । तस्मात् समाधानाभासेन जातिवादिनं प्रति साधनवादिना न प्रत्यवस्थेयम्, किं तु सम्यक् साधनेन । तथा चेयमुपहता षट्पक्षी नावतरति । तत्त्वनिर्णयपर्यवसाना च कथा भवति । यदि 670/tha

२० पेक्ष्य ] °मभ्युपेत्यnvt-C
२२ चानैकान्तिकं ] °कत्वंnvt-J
२५ देवं ] विस्तीर्य nvt-C

त्वस्य कथंचित् सम्यक्साधनवादिनोऽपि प्रतिभाक्षयात् समाधानं न स्फुरति, ततोऽत्यन्तपराजयाद् वरं संशयोऽपीति न्यायेन समाधानाभासेनापि प्रत्यवस्थेयमेवेत्याशयवानाह—तेषां साध्वसाधुतायामिति । भाष्यव्याख्यया वार्त्तिकमपि व्याख्यातम् । एतास्तु जातयो न तत्त्वविवेकमुपकुर्वन्ति प्रयुज्यमानतया, निराकरणीयतया त्वासामप्युपकार इति ॥ ४३ ॥ § 2194

॥ षट्पक्षीरूपकथाभासप्रकरणम् ॥

॥ इति श्रीवाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां पञ्चमाध्याये प्रथमाह्निकम् ॥

## ५.२ पञ्चमाध्याये द्वितीयाह्निकम्

671/tha

### ५.२.१ प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ ५ । २ । १ ॥ § 2197

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पाद् वैचित्र्यात् निग्रहस्थानबहुत्वम् इति संक्षेपेणोक्तम् । तदिदानीं विभजनीयम् । तत्र य एवमाहुः—सर्वोऽयं साधनदूषणप्रकारो बुद्ध्यारूढो न वास्तव इति, तान् प्रत्याह—पराजयवस्तूनीति । पराजयो वसत्येष्विति पराजयस्थानानीत्यर्थः । काल्पनिकत्वे कल्पनायाः सर्वत्र सुलभत्वात् साधनदूषणव्यवस्था न स्यादिति भावः । निग्रहस्थानानि पर्यायान्तरेण स्पष्टयति—अपराधेति । य आहुः

असाधनाङ्गवचनमदोषोद्भावनं द्वयोः ।
निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यत इति§ 2200

तान् प्रत्याह—सामान्यतो द्वे निग्रहस्थाने । सामान्यविवक्षायां प्रतिज्ञाहान्यादयो द्वाविंशतिरपि न भिद्यन्ते । तत्तु असाधनाङ्गवचनमदोषोद्भाव-

१३ त] वादन्यायः पृ. २

नमिति भवद्भिः संगृहीतम्, ऋषिणा च विप्रतिपत्त्यप्रतिपत्तिभ्याम् इति न कश्चिद् विशेषः । अत्र विचारयति—कर्तृकर्मकरणानामिति । § 2201

तत्रैके वर्णयन्ति—पक्षस्येति । यथा पक्षोद्देशेन साधनं प्रवर्तमानं पक्षस्य, एवं तदुद्देशेन दूषणानि प्रवर्तमानानि पक्षस्यैवेति । एवं चाहुर्दूषणानीति । न्यूनतादयो हि सर्वे पक्षोद्देशेन प्रवर्तमानाः पक्षस्यैवेत्यर्थः । दूषयति—एतत्तु न सम्यगिति । पक्षोद्देशेन प्रवृत्तेः पक्षविषयतां नापजानीमः, साक्षात्तु तद्विषयतां निराकुर्मः, तस्य वस्तुसतस्तादवस्थ्यात् । एवं साधनमपि यत्रासमर्थं तत्र नियुज्यमानं न स्वतो दुष्यति, यत्र तु समर्थं तत् साधयत्येव । तस्मात् कर्तुरेव दोष इत्याह—तस्मादसमर्थयोरिति । न केवलं स्वातन्त्र्यात् कर्तुर्निग्रहः, अपि तु तदाधारत्वाद् विप्रतिपत्त्यप्रतिपत्त्योरित्याह—विप्रतिपत्त्यप्रतिपत्त्योश्चेति । ननु वाक्ये न्यूनतादयो दोषाः, न पुरुषाश्रया इत्यत आह—विप्रतिपत्त्यप्रतिपत्ती चेति । न स्वरूपेण वाक्यं दुष्टं तस्य तादवस्थ्यादित्युक्तम्, किं तु पुरुषस्य विप्रतिपत्त्यप्रतिपत्तिभ्यां तथा प्रतिभाति । तेन वाक्यगतन्यूनतादिदर्शनात् पुरुषे विप्रतिपत्त्यप्रतिपत्ती प्रतीयेते । तेन तद्द्वारेण पुरुषो निगृह्यते, न तु वाक्यम् । § 2202

एतावता च प्रतिज्ञादिदोष इत्युच्यते । न चायमपि नियमो यद् वाक्यद्वारेणैव पुरुषो निगृह्यते, अज्ञानादिषु तदभावादित्याह—कानिचिन्निग्रहस्थानानीति । § 2203

शङ्कते—द्वैविध्यानुपपत्तिरिति । सामान्यं वा विवक्ष्येत विशेषो वा ? सामान्यविवक्षायां निग्रहस्थानमित्येवास्तु, तस्य सर्वत्राविशेषात् कुतो द्वैविध्यम् ? विशेषविवक्षायां तु प्रतिज्ञाहान्यादीनि बहूनीत्ययुक्तं द्वैविध्याभिधानमुभयथापीत्यर्थः । निराकरोति—न, सामान्यभेदविस्तरस्य विवक्षातः प्रवृत्तेरिति । सामान्यविवक्षायामपि निग्रहस्थानमिति नोक्तम्, उद्देशादविशेषप्रसङ्गात् । तस्माल्लक्षणं प्रणयतान्यथा तदसंभवादवान्तरसामान्यद्वैविध्यविवक्षया सामान्यं लक्षितम् । भेदानां तु विस्तरविवक्षया प्रतिज्ञाहान्यादयो विप्रपञ्चिता इत्यर्थः । आन्तर्गणिकानां तु भेदानामानन्त्यमित्याह—उदाहरणमात्रत्वाच्चेति । द्वाविंशतिसंख्यावच्छिन्नो भेद उदाहरणमात्रम् । आन्तर्गणिकभेदस्य तद्भेदविवक्षायां त्वानन्त्यमित्यर्थः । § 2204

673/tha

भाष्यमनुभाष्याक्षिपति—प्रायेण प्रतिज्ञेति । समाधत्ते—न, क्रियावचनदोषद्वारेणेति । वचनदोषद्वारेणेत्येतावन्मात्रे वक्तव्ये क्रियादोषाभिधानं दृष्टान्तार्थम् । नन्वाश्रयार्थोऽप्ययुक्तः पुरुषाश्रयत्वादित्यत आह—न चाधाराधेयभाव इति । § 2205

अपरमपि भाष्यमनुभाष्याक्षिपति—तत्त्ववादिनमतत्त्ववादिनं चेति । समाधत्ते—न, परापदिष्टेति । सम्यक्साधने जात्युत्तरे दत्ते तस्य जातित्वमनुद्भावयंस्तत्त्ववाद्यपि निगृह्यत इत्यर्थः ॥ १ ॥ § 2206

## प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ ५ । २ । २ ॥ § 2207

लक्षणं तु—प्रति...हानिः ॥ तदेतत् सूत्रं भाष्यकारमतेन तावद् व्याचष्टे— प्रति दृष्टान्तस्य यो धर्मस्तं यदा स्वदृष्टान्तेऽभ्यनुजानातीति । तदेतद् भाष्यव्याख्यानमुपन्यस्य वार्त्तिककारोदूषयति—एतत् तु न बुध्यामहे कथमत्र प्रतिज्ञा हीयते इति । अनित्यः शब्द ऐन्द्रियकत्वात्, घटवत् इति साधने प्रयुक्ते प्रतिवादिना चानैकान्तिकत्वे सामान्येनोद्भाविते तृतीयस्थानपतितो वाद्याह—अस्तु तर्हि सामान्यवद् घटोऽपि नित्य इति । तथा सत्यैन्द्रियकत्वमनैकान्तिकं न भवति नित्यमात्रगामित्वाद् घटादीनामपि नित्यताभ्युपगमाद् इत्याशयेन यद्यपि, तथापि साक्षादनैकान्तिकदोषोद्धारमक्षरारूढमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते, नित्यताप्रतिपत्तेश्चासिद्धता दृष्टान्तदोषो भवति । साध्यविकलतेत्यर्थः । सोऽयं दृष्टान्तदोषेण हेतुदोषेण वा विरुद्धत्वेन घटादीनामपि नित्यत्वाभ्युपगमेनैन्द्रियकत्वस्य हेतोः साध्यानित्यत्वविरुद्धेन नित्यत्वेन व्याप्तत्वाद् निग्रहो वादिनो न प्रतिज्ञाहानिः । न खलु अनेन अस्तु शब्दो नित्यः इति प्रतिज्ञा परित्यक्ता, किं तु अस्तु घटोऽपि नित्यः इत्युक्तम् । यदि तु दृष्टान्तपरित्यागेन प्रतिज्ञातार्थस्यासिद्धेः प्रतिज्ञाहानिरुच्येत, ततः
674/tha सर्व एव दोषः प्रतिज्ञाहानिः, सर्वस्मादेव दोषात् प्रतिज्ञाहानेरुपपत्तेः । तस्मात् कथञ्चिद् दृष्टान्तपरित्यागे प्रतिज्ञाहानिरुपचरितव्या । न चासौ प्रधानं प्रतिज्ञाहानिं विना भवितुमर्हतीत्याह—दृष्टान्तं च जहदिति । § 2208

तदेवं भाष्यकारव्याख्यानं दूषयित्वा स्वमतेन व्याचिख्यासुःपृच्छति—कथं तर्हीति । दृष्टश्चासावन्ते निगमने च व्यवस्थित इति दृष्टान्तः । दृष्टान्तप्रतिदृष्टान्तौ पक्षप्रतिपक्षावुच्येते । एतदुक्तं भवति—प्रतिपक्षदृष्टान्तस्य सामान्यस्य यो धर्मो नित्यत्वं तं स्वपक्षे शब्देऽभ्यनुजानातीति । उदाहरणमाह—यथा अनित्यः शब्द ऐन्द्रियकत्वादिति द्वितीयपक्षवादिनि सामान्येन प्रत्यवस्थिते इदमाह तृतीयपदके स्थितो वादी यदि सामान्यमैन्द्रियकं नित्यं शब्दोऽप्येवं भवत्विति एषा प्रतिज्ञाहानिः । अत्र च अनैकान्तिकत्वेन प्रत्यवस्थित इत्युपलक्षणम् । येन केनचित् प्रकारेण स्वप्रतिज्ञातार्थानिर्वाहं पश्यन् प्रतिज्ञार्थं जहत् प्रतिज्ञाहानिमाप्नोतीति परमार्थः । § 2209

यदप्युच्यते—स्वयमेव घटमनित्यमैन्द्रियकमुदाहृत्य घटेऽप्यैन्द्रियकत्वं पश्यन् कथमनुन्मत्तः सन् सामान्यस्य नित्यस्यैन्द्रियकत्वदर्शनमात्रात् शब्दे नित्यत्वमभ्युगपगच्छेत् ? किन्तु उभयत्र दर्शनात् संशयितः स्यादिति । तत्र सर्वं नित्यमिति सांख्यीयराद्धान्तावलम्बनेनापि स्वपक्षनिर्वाहमप-

८ द्] घटादिर्नि°nvt-C
११ ता] दृष्टान्ते दोषःnvt-C
१६ तिज्ञाहानिरुच्येत] °निरित्युच्यतेnvt-C
२२ स्य] प्रतिदृष्टान्तस्य प्रतिपक्षस्य nvt-C
२५ के] °पक्षे nvt-C
२९ त्वं] घट ? शब्द मनि...हृत्य घटस्यैन्द्रि° nvt-C

श्यतोऽनैकान्तिकत्वोद्धाराय प्रेक्षावतोऽपि प्रवृत्तिसंभवात् । न चात्यन्तिकं प्रेक्षावत्त्वमिह ग्राह्यम्, तादृशस्य निग्रहाधिकरणत्वानुपपत्तेः । तस्माद् यथा जडं प्रति विचारो नास्ति, एवं प्रामाणिकमपि प्रति निग्रहावतारो नास्तीति मध्यमो जनो निग्राह्यः, तस्य च संभवन्त्येवंविधाः प्रमादा इति । § 2210

शङ्कते—प्रसङ्गविधानादिति चेत् ? निराकरोति—तच्च न, अत एव तत्प्राप्तेः । हेतुदोषमुद्दिधीर्षुः प्रसञ्जयन्नप्यभ्युपगच्छत्येव । न हि सांख्यीयं राद्धान्तमनभ्युपगच्छन्ननैकान्तिकत्वमुद्धर्तुमर्हतीति भावः । § 2211
675/tha

तदनेन परमतं निराकृतप्रायमपि साक्षान्निराकर्तुमुपन्यस्यति—हेतुदोषेण अनैकान्तिकत्वलक्षणेन चारितार्थत्वान्न प्रतिज्ञाहानिर्निग्रहस्थानमित्यन्ये । यदाह कीर्त्तिः, तस्मादैन्द्रियकत्वस्य नित्यानित्यपक्षप्रतिपक्षवृत्तेर्व्यभिचारादसाधनाङ्गस्योपादानान्निग्रहार्हो, न प्रतिपक्षधर्मस्याभ्यनुज्ञानादिति । निराकरोति—न, अनैकान्तिकत्वदोषपरिहारेण विप्रतिपत्तेस्तदुपपत्तेः । यदा हि सांख्यपक्षावलम्बनेन शब्दनित्यत्वमभ्युपैति तदा प्रतिज्ञाहानिः, न विरुद्धो हेतुः, नाप्यनैकान्तिको विपक्षाभावात् । केवलं प्रतिज्ञार्थहानमेवास्य पराजयस्थानम् । विप्रतिपत्तेः स्वसाध्यविरुद्धप्रतिपत्तेरिति सर्वमवदातम् ॥ २ ॥
§ 2212

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ५ । २ । ३ ॥ § 2213

एतद् व्याचष्टे, प्रतिज्ञातोऽर्थो मीमांसकं प्रति वैशेषिकेण अनित्यः शब्द इति । तस्य साधनम् ऐन्द्रियकत्वाद् घटवद् इति, एवमुक्तेऽस्य प्रतिषेधो मीमांसकेन क्रियते प्रतिदृष्टान्तेन हेतुव्यभिचारः । तमाह—सामान्यमैन्द्रियकं नित्यमिति । तस्मिंश्च प्रतिषेधे मीमांसकेन कृते धर्मविकल्पात् तदर्थनिर्देश इति यावन्नोच्यते तावदर्धोक्त एव धर्मविकल्पाद् इत्यनूद्य व्याचष्टे—दृष्टान्तप्रतिदृष्टान्तयो र्घटसामान्ययोः साधर्म्यमैन्द्रियकत्वं तद्योगे धर्मभेदात् सामान्यमैन्द्रियकं सर्वगतम्, ऐन्द्रियकस्त्वसर्वगतो घट इति धर्मविकल्पात् तदर्थं प्रतिज्ञातार्थसिद्ध्यर्थं शब्दस्यासर्वगत्वं मीमांसकं प्रति प्रतिपादयितुं निर्देशः । तस्य हि शब्दस्यासर्वगतत्वमसिद्धम् । प्रश्नपूर्वकं निर्देशस्वरूपमाह—कथम् ? यथा घटोऽसर्वगतोऽनित्यः, एवं शब्दोऽप्यसर्वगतोऽनित्य इति । इदं हि प्रतिज्ञावाक्यम् अनित्यः शब्द इतिवत् असर्वगतः शब्द इति मीमांसकं विप्रतिपन्नं प्रति निर्देशात्, न तु कृतकत्वा दितिवदुदाहरणसाधर्म्याद्यस्य 676/tha हेतुलक्षणमस्ति । § 2214

साध्यनिर्देशः प्रतिज्ञा इति तु प्रतिज्ञालक्षणयोगात् प्रतिज्ञान्तरमेव । यद्यप्यस्य मनसि द्वयं विपरिवर्तते असर्वगतत्वं साधयित्वा मया असर्वगतत्वे

३० स्य] साधर्म्यादस्यnvt-C

३३ ते] मनसि वर्ततेnvt-C

सतीति ऐन्द्रियकत्वं हेतुर्विशेषणीय इति, तथाप्येतदनेन न कृतं किं त्वस-र्वगतः शब्दो घटवदित्युक्त्वैव विरतः । परार्थे चानुमाने वचनगता गुणदोषा विचार्यन्ते, न तु वचनानपेक्षं वस्तु । § 2215

तदिदमाह—असर्वगतः शब्द इति द्वितीया प्रतिज्ञा हेतुरहिता । अस्य प्रश्नपूर्वकं निग्रहस्थानत्वमाह—तत् कथम् इति । अनर्थकं निष्प्रयोज-नमिष्टार्थसिद्धेरभावादिति । § 2216

वार्त्तिकं—तत्रानित्यः शब्द इति प्रतिज्ञा प्रथमा । अस्यां सामान्येनैन्द्रियकेण हेतोरनैकान्तिकत्वात् प्रतिहतो वादी प्रतिवादिना अस-र्वगतोऽनित्यः शब्द इति प्रतिज्ञान्तरं पूर्वप्रतिज्ञासिद्ध्यर्थं करोतीत्यनुषज्यते । पृच्छति—कथमिति । उत्तरम्— साधनसामर्थ्यापरिज्ञानात् । अनित्यः शब्द ऐन्द्रियकत्वाद् घटवत् इत्येतावदुक्त्वा निराकाङ्क्षो वादी न त्वसर्वगतत्वे सतीति साधनं विशेषितवान् । न चाविशिष्टं साधनमत्रार्थेऽसमर्थम्, विशिष्टं तु समर्थं, तस्य सामर्थ्यमपरिज्ञायाविशिष्टे तदारोप्याविशिष्टं साधनं प्रयुक्त-वान् । तदेवं निराकाङ्क्षो वादी सव्यभिचारहेतुप्रयोगादेव पराजीयते न तु प्रतिज्ञान्तरप्रयोगात् । यदि तु वादिन्यपर्यवसितवाद् एव मध्ये प्रतिवादिना हेतोरनैकान्तिकत्वे उद्भाविते तमेव हेतुमसर्वगतत्वे सतीति विशेष्टुं मीमांसकं प्रति शब्दस्यासर्वगतत्वं प्रतिजानीते, असर्वगतः शब्द इति प्रतिज्ञाय च न हेतुं ब्रवीति, तदानैकान्तिकत्वोद्धाराय प्रतिज्ञान्तरकरणात् नानैकान्तिकत्वेन पराजीयते, अपि तु प्रतिज्ञान्तरादेव । न हि प्रतिज्ञा प्रतिज्ञान्तरं साधयितुम् अर्हतीति । सोऽयं प्रतिज्ञामात्रस्यासाधकत्वाप्रतिपत्त्या असाधकस्यैव वा साधकत्वप्रतिपत्त्या विप्रतिपत्त्या अप्रतिपत्त्या वा पराजीयते । तदेतदाह—न
677/tha च प्रतिज्ञा प्रतिज्ञान्तरं साधयति । तेन प्रतिज्ञा यत्रार्थे समर्था तदपरिज्ञानात् पञ्चावयवसाध्ये च सामर्थ्यारोपणाद् अपरिज्ञानाद् इति हि श्लिष्टनिर्देशेन प्र-सज्यप्रतिषेधपर्युदासौ विवक्षितौ । तेनाज्ञानाद् विपरीतज्ञानाच्च प्रतिज्ञान्तरं निग्रहस्थानमिति वार्त्तिकार्थः । § 2217

यत् पुनरिदमुच्यते परैः अत्यन्तासंबद्धमेतद् यत् प्रतिज्ञा प्रतिज्ञासाध-नायेति । यो हि प्राक् प्रतिज्ञामुक्त्वा हेतूदाहरणादिकं वक्तुं जानाति स कथंचिदनुक्रमं साधनस्य जानात्येव । जानन् कथमविकलान्तःकरणः प्र-तिज्ञामेव प्रतिज्ञासाधनायोपाददीत इति । तत्र ब्रूमः, नायं प्रतिज्ञया मया प्रतिज्ञा साधनीयेति बुद्ध्या प्रवृत्तः, किं त्वसर्वगतत्वं शब्दस्य मीमांसकं प्रति साधयित्वा तेनैन्द्रियकत्वं विशिष्यानैकान्तिकत्वमुद्धरणीयमिति मनोरथेन प्र-वृत्तः प्रतिज्ञां कृतवान्—असर्वगतः शब्द इति । अथास्य प्रतिवाद्यवष्टम्भाद् वा परिषद्दर्शनाद् वा स्तम्भितत्वेन साधनाप्रतिभया तुष्णीं भवतः प्रेक्षाव-

---

१५ योगात्] प्रतिज्ञान्तरे प्रयो°nvt-J
२१ वा] विप्रतिपत्त्या अप्रतिपत्त्या वाnvt-J
२३ णाद्] प्रतिज्ञायाः इति टिप्पनीnvt-J
२५ र्थः] इति श्लिष्टनिर्देशः...निग्रहस्थानमितिnvt-C

तोऽपि प्रतिज्ञान्तरं संभवति निग्रहस्थानम् । अयं च विकलान्तःकरणस्य निग्रहो भवद्भिरप्युक्त एव, तदभ्युपगम्याप्रतिभया तूष्णींभावादिति वदद्भिः । सोऽमीदृशोऽसत्प्रलापो भवद्भिः शास्त्रे निबन्धनीयो न त्वस्माभिरिति व्यक्त-मियं राजकुलस्थितिरिति सर्वं चतुरस्त्रम् ॥ ३ ॥ § 2218

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ५ । २ । ४ ॥ § 2219

अत्र प्रतिज्ञाहेत्वोरिति प्रतियोगिद्वयमात्रोपलक्षणपरम् । तेन दृष्टान्ताद-योऽपि प्रतियोगिन उन्नेयाः । एतदुक्तं भवति—येषां वाक्यगतानां पदार्थानां मिथो व्याघातः प्रतीयते, प्रमाणान्तरं च विरोधकं, स विरोधो नाम निग्रह-स्थानम् । लक्ष्यस्थितस्य प्रतिज्ञाग्रहणस्याप्युपलक्षणार्थत्वात् । न चैवं भाण्ड-लेख्यन्यायः । एकदेशेनाव्यापकेन समुदायसंग्रहे स हि भवति, न तु व्यापकेन संग्रहे । व्यापकं चानवयवेन इदं प्रतियोगिमिथुनयोर्विरोधः । अतो यथाश्रुति तावत् सूत्रं व्याचष्टे वार्त्तिककारः— यत्र प्रतिज्ञा हेतुना 678/tha विरुध्यते इति । द्वयोर्विरोधे यस्य प्रमाणान्तरेणानुग्रहः, तेनेतरद् बाध्यते इति तेन विरुध्यत इत्युच्यते । तद् यत्र प्रतिज्ञया हेतुर्विरुध्यते, तदुदाहरति—यथा गुणव्यतिरिक्तं द्रव्यं भेदेनाग्रहणादिति । अत्र हि भेदेनाग्रहणादित्यनेन ग्रहणप्रतिषेधेन ग्राह्याभाव उपलक्ष्यते । तेनैष हेत्वर्थो भवति गुणव्यतिरिक्तं द्रव्यमव्यतिरेकादिति । सोऽयं प्रतिज्ञाहेतुपदयोर्व्याप्तिस्मरणानपेक्ष एव पर-स्परव्याघातोऽस्तिनास्तिपदयोरिव । न चैवंविधः शब्दे नित्यत्वकृतकत्वयोर्येन कृतकत्ववद्विरुद्धोऽयं हेत्वाभासः स्यात् । तत्र हि कृतकत्वस्य अनित्यत्वेन व्याप्तिमनुस्मृत्य विरोधः प्रतीयते, न त्वयं तथा, अस्ति नास्ति इतिव-त् स्वभावविरोधात् । यद्यप्ययमसिद्धोऽपि हेत्वाभासस्तथाप्यस्यासिद्धिर्बाधकं प्रमाणान्तरमनुसृत्य प्रतिपत्तव्या, प्रतिज्ञाविरोधस्तु उच्चारणमात्रादेव प्रथमत-रमवगम्यत इति । तेनैव दूषिते हेतौ नासिद्धिः पश्चात्तनी दूषणत्वाय कल्पते, भस्मीकृते दहनवत् । प्रतिज्ञाहेत्वोर्विरोधमात्रेणैव निग्रहे सिद्धे सुहृद्भावमात्रेण प्रतिज्ञाया बलवत्तास्मरणम्, प्रतिज्ञायाश्चात्र बलवत्त्वं प्रमाणान्तरानुग्रहात् । तथा हि दर्शनस्पर्शनाभ्यामेकार्थप्रतिसन्धानाद् रूपादिव्यतिरिक्तं द्रव्यं सिध्य-तीति तदनुगृहीता प्रतिज्ञैव हेत्वर्थं बाधत इति । एतेनैवेति लक्षणेन । श्रमणा गर्भिणीति । श्रमणा ब्रह्मचारिणी नान्तर्वत्नी भवितुमर्हति । जितेन्द्रियस्योपस्थ-संयमो हि ब्रह्मचर्यम् । न चासाधनाङ्गस्य प्रतिज्ञाया वचनादेव निगृहीत इति कृतं तद्विरोधोद्भावनेन । निष्पादितक्रिये कर्मण्यविशेषाभिधायिनो दूषणस्य दूषणन्यायातिपातादिति साम्प्रतम्, प्रतिज्ञाया साधनाङ्गत्वस्य प्रथम एवाध्याये दर्शितत्वात् । हेतुविरोधोऽपि । यत्र हेतुना प्रमाणान्तरानुगृहीतेन प्रतिज्ञा बाध्यते, यथा सर्वं पृथगिति प्रतिज्ञा, न किञ्चिदेकमित्यर्थः । हेतुः—समूहे भावशब्दप्रयोगादिति, एकसमुच्चये घटादिशब्दप्रयोगादित्यर्थः । नास्त्येकम्,

२० ते] नित्यत्वेन व्याप्तिस्मरणापेक्ष एव विरोधः प्रतीयते**nvt-C**

२२ मात्रादेव] प्रथमत एव**nvt-C**

एकसमुच्चयश्चेति वचने मिथो विरुध्येते, विनैव व्याप्त्यनुस्मरणमिति । न च
679/tha सर्वनास्तित्ववादिनो नैकसमुच्चयोऽप्यस्तीति वक्तव्यम्, असति हेतौ साध्य-
सिद्धेरयोगात् । न च कल्पितस्य हेतोः साधनाङ्गतेति तत्र तत्र निवेदितम्
। अत्र चैकसमुच्चयस्य प्रमाणानुग्रहान्नैकं किञ्चिदिति प्रतिज्ञा हेतुना बाध्यते
। एतेन लक्षणेन प्रतिज्ञाया दृष्टान्तविरोधोऽपि वक्तव्यः यथा अनित्यः शब्दः
प्रमेयत्वात् । यत्प्रमेयं तन्नित्यं यथा आकाशमिति साधर्म्यदृष्टान्तः । यद्यप्य-
त्र वस्तुतो हेतुरनैकान्तिकः, तथापि दृष्टान्तस्य प्रतिज्ञाविरोधेनैव निगृह्यते,
विरोधस्य वाक्ये प्रथममवगतेः । अनित्यं घटाद्युन्नीयानैकान्तिकत्वप्रतिपत्तेस्तु
जघन्यत्वादिति । हेतोश्च दृष्टान्तादिभिर्विरोध एतेन वक्तव्य इत्यनुषज्यते ।
यथा, अनित्यः शब्द ऐन्द्रियकत्वात् अनैन्द्रियकद्व्यणुकवदिति । अत्राप्यैन्द्रिय-
कत्वानैन्द्रियकत्वयोः शब्दतो विरोधः प्रतीयते, साधनवैकल्यं तु वस्तुस्व-
भावालोचनयेति विशेषः । एवमुपनयेन विरोधोऽनैन्द्रियकश्च शब्द इति ।
अत्रापि वस्तुस्वभावालोचनया अनैन्द्रियकत्वस्यासिद्धिः प्रतीयते, शब्दतस्तु
विरोध इति । प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः । यद्यपि बाधितविषयं
हेत्वाभासान्तर्गतं तथापि इहाप्यस्तीति विरोधहेत्वाभासयोरत्र निग्रहस्थान-
योः समावेशोऽस्तु, न च क्वचिद् विषये समावेशाद् आनर्थक्यम्, विष-
यान्तरे समावेशाभावादर्थवत्त्वात् । दर्शितं चानन्तरमेव भिन्नविषयत्वमिति
। तदेवं साधनवादिनो विरोधं निग्रहस्थानमभिधायोत्तरवादिनोऽपि विरोधो
निग्रहस्थानमनेनैव संगृहीतमित्याह—परपक्षसिद्धेन गोत्वादिनेति । यदा हि
बौद्धेन प्राभाकरं प्रति साध्यते अनित्यः शब्दः श्रावणत्वादिति, यद्यनित्यत्वं
न भवेदश्रावणत्वं स्यादिति, तदा प्राभाकरोऽनैकान्तिकत्वमुद्भावयति श्रावणं
शब्दत्वं नित्यं चेति, तदस्यानैकान्तिकत्वोद्भावनं स्वकीयं शब्दत्वनिराकरण-
विरुद्धमिति । परपक्षसिद्धं गोत्वाद्यपीदृश एव विषये विरुद्धं द्रष्टव्यम् ।
स्वसिद्धान्त विरुद्धं च साधनं विरुद्धमित्याह—स्वपक्षानपेक्षं च । ननु य-
द्यनैकान्तिकोद्भावनमपि विरुद्धं कस्तर्ह्यनैकान्तिकत्वापादनस्य विषय इत्यत
आह—उभयपक्षसंप्रतिपन्नस्त्विति । देशयति—दृष्टान्ताभासा इति । अवय-
680/tha वान्तरं हि प्रतिज्ञाहेत्वादिभ्य उदाहरणम्, तेन हेत्वाभासोक्त्या तस्य संग्रहः ।
पारम्पर्येण तूदाहरणाभासस्य हेतुदूषकत्वेन सर्वमेव हेतुदूषकमविशेषादिति
भावः । परिहरति—हेत्वाभासपूर्वकत्वादिति । हेत्वाभासा इत्यत्र हेतुशब्दः
स्वार्थमपरित्यज्य दृष्टान्तमुपलक्षयति । उपलक्षणे हेतुरुक्तः । हेत्वाभास-
पूर्वकत्वाद् हेत्वाभासप्रधानत्वात् दृष्टान्ताभासेनापि हेतुरेव दूष्यते यतः । न
चैतावता प्रतिज्ञादिदोषोपलक्षणप्रसङ्गः । न हि यत्र यत्र निमित्तमस्ति तत्स-
र्वमुपलक्षणीयम्, किं तु यदुपलक्ष्यते तत्रावश्यं निमित्तं वक्तव्यम् । न च
सूत्रकारस्य सर्वत्र लाघवादरो दृढ इत्युक्तम् । तस्मात् सर्वं रमणीयम् ॥
४ ॥ § 2220

२१ त्वं ] भवेत् श्रावणत्वं नnvt-C

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥ ५ । २ । ५ ॥ § 2221

ऐन्द्रियकत्वस्य हेतोरनैकान्तिकत्वोद्भावनेन शब्दानित्यत्वपक्षे प्रतिक्षिप्ते वादी प्रतिवादिनं प्रति ब्रूयादनैकान्तिकत्वमुद्दिधीर्षुः—कः पुनराहानित्यः शब्द इति । यद्यहमनित्यः शब्द इति प्रतिज्ञामपह्नोतुं शक्नोमि तदा न सामान्येन नित्येन मे हेतुरनैकान्तिको भवतीति बुद्ध्यपहतोऽपह्नुते, सोऽयमेवंवादी न शक्योऽनैकान्तिकत्वेन जेतुम्, अपह्नवस्यापह्नवत्वावेदनेऽनैकान्तिकत्वोद्धारात् । तस्मादनैकान्तिकस्यानैकान्तिकत्वस्थापनायापह्नवस्यापह्नवत्वमुद्भावनीयम् । तत्र किमपह्नवत्वमुद्भाव्यानैकान्तिकत्वं व्यवस्थाप्य निगृह्यताम्, उतापह्नवादेवेति संशये अपह्नवत्वोद्भावनादेव पूर्वापरपराहतेर्निगृह्यते, नानैकान्तिकत्वेन, तत्पूर्वकत्वादनैकान्तिकत्वस्थापनस्य । § 2222

तस्माद् यदुक्तं कीर्त्तिना, किमिदानीं हेत्वाभासादुत्तरप्रतिज्ञासंन्यासापेक्षया तस्य प्रतिवादिनो हेत्वाभास एवाद्यं निग्रहस्थानमिति, तदपास्तम्, प्रतिज्ञासंन्यासस्यैव पूर्वभावित्वात् । यदपि तेनोक्तम्, पक्षप्रतिषेधे तूष्णींभवतस्तूष्णींभावो नाम निग्रहस्थानं प्रलपतश्च प्रलपितं नामेत्याद्यपि वाच्यं स्यादिति, तदप्यसाम्प्रतम् । न हि तूष्णींभावेन प्रलपितादिभिर्वा शक्यमनैकान्तिकत्वमुद्धर्तुम्, यथा प्रतिज्ञार्थापह्नवेन । न चैते हेत्वाभासोद्भावनस्य पुरस्तात्तनाः । तस्मादेतदप्यनिरूपिताभिधानाद् यत्किञ्चिदिति ॥ ५ ॥ § 2223

681/tha

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ५ । २ । ६ ॥ § 2224

व्याख्यातुं निदर्शनमाह—निदर्शनम्, एकप्रकृतीदं व्यक्तं भूतभौतिकेन्द्रियम्, एकप्रकृतीनां विकाराणां परिमाणात् । तद् यथा एकमृत्पूर्वा घटशरावोदञ्चनादयः परिमिता दृष्टाः, यावान् प्रकृतेर्व्यूहः संस्थानं तावान् विकार इति । न चैवमुदाहरणं साधनविकलमित्याह—दृष्टं चेति । उपनयमाह—अस्ति चेदमिति । निगमनमाह— तदेकप्रकृतीनामिति । अस्य परिमितत्वस्य हेतोर्व्यभिचारेण प्रत्यवस्थानं प्रतिवादिनः । नानाप्रकृतीनां घटरुचकादीनाम् एकप्रकृतीनां च घटशरावादीनां दृष्टं परिमाणमिति । एवं प्रत्यवस्थिते प्रतिवादिनि वादी पश्चात्परिमितत्वं हेतुं विशिनष्टि—एकप्रकृतिसमन्वये सति शरावादिविकाराणां परिमाणदर्शनादिति । प्रकृतिः स्वभावः, एकस्वभावसमन्वये सति इत्यर्थः । एकप्रकृतिसमन्वयं स्फुटयति—सुखदुःखमोहसमन्वितं हीदं सर्वं व्यक्तं परिमितं गृह्यते । तथा हि मैत्रदारेषु नर्मदायां मैत्रस्य सुखबुद्धिर्भवति, तत्सपत्नीनां च दुःखबुद्धिः । चैत्रस्य तामविन्दतो रणरणकवतो मोहो विषादः । नर्मदया च भावान्तराणि व्याख्यातानि

२४ न] चैतदुदा°nvt-C

। तदेवं यत्रैकस्वभावसमन्वये सति परिमाणं तत्रैकप्रकृतित्वमेव । तद् यथा
एकमृत्पिण्डस्वभावेषु घटशरावोदञ्चनादिषु । घटरुचकादयस्तु नैकस्वभावाः,
मार्दसौवर्णादीनां स्वभावानां भेदात् । निदर्श्यात्र सूत्रं योजयति—तदिदम-
विशेषोक्ते हेतौ प्रतिषिद्ध इति । अस्य निग्रहस्थानत्वमाह—सति च हेत्व-
न्तरभाव इति । अपि च यदि हेत्वन्तरवचने विश्वमेकप्रकृति साध्यते तदा
निदर्शनं नास्ति, सर्वस्य पक्षे निक्षेपात् । अथ निदर्शनसिद्ध्यर्थं किंचित्प-
क्षाद् व्यतिरिच्यते, ततस्तेनैवानैकान्तिकत्वम् । अन्वितानामपि परिमितानां
भिन्नप्रकृतिकत्वादित्याह—हेत्वन्तरवचने सति यदि हेत्वर्थनिदर्शन इति । हेतुः
682/tha साधनम्, अर्थः साध्यः, तौ हेत्वर्थौ । निदर्शयति व्याप्यव्यापकभावेनेति
निदर्शनः । हेत्वर्थयोर्निदर्शनो हेत्वर्थनिदर्शनो दृष्टान्तः । स यद्युपादीयते, ततो
नेदं व्यक्तमेकप्रकृति भवति, दृष्टान्तस्य प्रकृत्यन्तरोपादानात् । § 2225

वार्त्तिकम्—साधनान्तरोपादाने पूर्वस्येति । दत्तोत्तरावसर एव वादिनि
यदि प्रतिवादी हेत्वर्थं व्यभिचारयति, वादी च तृतीयपदके स्थितस्तं हेतुं
विशेषयति, तदा किं साधनान्तरोपादानात् निगृह्यताम्, उतानैकान्तिकसाध-
नाभिधानात् ? न तावदनैकान्तिकसाधनाभिधानादस्य निग्रहो हेतुविशेषणेन
तस्य समाहितत्वादिति । तस्माद्धेत्वन्तरवचनादेव निगृह्यते । पूर्वस्य व-
स्तुतोऽसमर्थस्यासामर्थ्यख्यापनात्, सामर्थ्ये वा *हेत्वन्तरानर्थक्यादिति सूक्त-
म् ॥ ६ ॥ § 2226

॥ इति प्रतिज्ञाहेत्वन्यतराश्रितनिग्रस्थानपञ्चकविशेषलक्षणप्रकरणम् ॥

## ५.२.२ प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम्

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ॥ ५ । २ । ७ ॥ § 2228

व्याचष्टे—यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे सति वादे जल्पे वितण्ड-
यामित्यर्थः । हेतुतः साध्यसिद्धौ प्रकृतायां वादी साधनं ब्रूयाद् नित्यः
शब्दोऽस्पर्शत्वादिति हेतुः इति । अत्रान्तरे सुखादिभिर्व्यभिचारेण स्वहेतोर-
सामर्थ्यं पश्यन् तत्प्रच्छादनाय प्रसक्तानुप्रसक्त्या तं तमर्थमुपन्यस्यन्नर्थान्तरेण
निगृह्यते । अभिधेयस्य क्रियान्तरयोगात् क्रियाविशेषस्य योगात् विशिष्य-
माणरूपो भिद्यमानरूपः शब्दो नामेति । यथा वृक्षस्तिष्ठति, वृक्षं छिन-
त्ति, वृक्षेण चन्द्रमसं पश्यति, वृक्षायोदकमासिञ्चतीत्यादि । तदेवमभिधेय-
स्य क्रियाविशेषैर्योगाद् विशिष्यमाणरूपो भिद्यमानरूपः शब्दो नामेति ।
683/tha आख्यातस्वरूपमाह—क्रियाकारकसमुदाय इति । विषयेण विषयिणमुप-
लक्षयति । पचति पच्यत इत्यादयः शब्दाः क्रियां कारकं कर्तारं कर्म

१५ नाभिधानात्] साधनोपादानात्nvt-C १७ *] °नर्थक्यमितिnvt-C

वा भिवदन्ति । तदेतल्लक्षणमसिद्धमतिव्यापकं च । न हि कर्ता कर्म वा आख्यातेनाभिधीयते, क्रियाक्षेपेणैव तयोः प्रतिलम्भात्, अनन्यलभ्यस्य च शब्दार्थत्वात् । कर्तृकर्मणोश्च कारकान्तरेभ्यो भावनायामभ्यर्हितत्वेन तत्संख्याभिधाननियमादसिद्धं कारकाभिधानम् । अतिव्यापकं च, पाचकः पाक्य इत्यादेर्नाम्नोऽपि क्रियाकारकसमुदायाभिधायित्वात् । तदस्मिन् लक्षणेऽपरितुष्यन् लक्षणान्तरद्वयेनाख्यातपदान्युपसंगृह्णाति—कारकसंख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातम् । पचति पच्यत इत्यादौ कर्तुः कर्मणो वा संख्यया कालेन वर्तमानादिना विशिष्टा क्रिया प्रतीयते । कालश्च क्वचिदस्तीत्येतावतोक्तो न तु विवक्षितोऽत्र लक्षणे, पचेत यजेतेत्येवमादौ तद्योगाप्रतीतेः । अनेन च लक्षणेन स्थीयते सुप्यते इत्यादीनामाख्यातानामसंग्रहः, कारकतत्संख्ययोरप्रतीतेः । अतस्तत्संग्रहाय द्वितीयं लक्षणमाह—धात्वर्थमात्रं च कालाभिधानविशिष्टम् । अभिधीयते इत्यभिधानम् । प्रयोगेष्विति क्रियान्तरप्रयोगेषु । नाम्नो वा आख्यातस्य वा तदर्थाद् अभिद्यमानरूपा निपाताः । यथा समुच्चयविकल्पादिनामपदैः समुच्चयादयः समुच्चेतव्यान्नामार्थादाख्यातार्थाद् वा भेदेनोच्यन्ते, तत्र षष्ठीप्रयोगात्, एषां समुच्चयो वा विकल्पो वेति । नैवं चवादयः स्वार्थान् नामार्थादाख्यातार्थाद् वा भेदेनाभिदधति । रूप्यन्ते प्रतिपाद्यन्ते रूपाणि । अर्थात् नामार्थादाख्यातार्थाद् वा अभिद्यमानं रूपं प्रतिपद्यमानं येषां निपातानां ते तथोक्ताः । उपसृज्यमानाः समीपे प्राक् प्रयुज्यमानाः । क्रियावद्योतका उपसर्गाः । अवद्योतनं चोपलक्षणम् । अधिकार्था विपरीतार्थाश्चोपसर्गा दृश्यन्ते । यथाभ्यागच्छति प्रतिष्ठत इत्यादिषु । तदस्य निग्रहस्थानत्वं वार्त्तिककार उपपादयति—अभ्युपगतेति । यथा च साधनवादिनोऽर्थान्तरं निग्रहस्थानम् एवमुत्तरवादिनोऽपि द्रष्टव्यम् ॥ ७ ॥ § 2229

684/tha

## वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ५ । २ । ८ ॥ § 2230

वर्णक्रमनिर्देशवद् इति वतिः । अत्र यदा द्राविडः स्वभाषया तद्भाषानभिज्ञमार्यं प्रति शब्दनित्यत्वं प्रतिपादयति, तदा तन्निरर्थकं निग्रहस्थानम् । स खल्वार्यभाषां जानन्नसामर्थ्यप्रच्छादनाय तद्भाषानभिज्ञतया वा स्वभाषया साधनं प्रयुक्तवान् । सोऽयं पूर्वस्मिन् कल्पे विप्रतिपत्त्या निगृह्यते, उत्तरस्मिंस्त्वप्रतिपत्त्या । वस्तुतः साधनसामर्थ्येऽपि मूकवदार्यप्रतिपादकशब्दाप्रतिपत्तेस्तत्प्रतिपादनारम्भवैयर्थ्यात् । अत्रैव च दृष्टान्तमात्रतया वतिना वर्णक्रमो निदर्शितः, न पुनरेतदुदाहरणं निग्रहस्थानस्य, येन कपोलवादित्रादावपि प्रसङ्गः । यथा हि द्राविडस्यार्थभेदविवक्षोत्थापितं वचनं, नैवं वर्णक्रमनिर्देशः कपोलवादित्रं वा । अप्रतिपादकत्वसामान्याद् वर्णक्रम निर्देशवदिति दृष्टान्तः । अत+एवाह भाष्यकारः, एवंप्रकारमिति । न पुनरिदमेवेत्यर्थः । § 2231

४ त्वेन ] °र्हिततमत्वेन nvt-C

२० र्गा ] गृह्यन्ते nvt-C

वार्त्तिकम्—उदाहरणं भाष्य इति । एवं प्रकारोदाहरणमित्यर्थः । साधनानुपादानादिति । परप्रतिपादकं पञ्चावयवं वाक्यं साधनम् । तत्तु न वादिनोपात्तम् तस्य स्वसमयेन प्रतिपादकत्वेऽप्यार्यान् प्रत्यप्रतिपादकत्वादित्यर्थः ॥ ८ ॥ § 2232

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ५ । २ । ९ ॥ § 2233

यद् वाक्यं परिषदा प्रतिवादिना च न विज्ञायते समानसंकेतेन वादिना त्रिरप्यभिहितम् । यावद्भिर्वारैः परिषत्प्रतिवादिनोरर्थप्रत्ययो भवति, स च प्रायेण त्रिभिरिति त्रिरभिहितमित्युक्तम् । ननु समानसंकेतेन वादिना त्रिरभिहितमविज्ञातार्थं चेति न संभवति । संभवे वा परिषत्प्रतिवादिनौ जडौ । न च जडानवबोधे प्रतिपादकस्य कश्चिदपराधः न हि बधिरो गीतं न
685/tha शृणोतीति गायनो निगृह्यते इत्यत आह— श्लिष्टशब्दम् । असति प्रकरणादौ नियामके, यथा श्वेतो धावतीति । अप्रतीतप्रयोगं जर्भरी तुर्फरी तु इति । अतिद्रुतोच्चारितमित्येवमादिना कारणेन, तदविज्ञातार्थम् । अस्य निग्रहस्थानत्वमाह—असामर्थ्येति । वार्त्तिकं भाष्यव्याख्यया गतार्थम् ॥ ९ ॥ § 2234

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् ॥ ५ । २ । १० ॥ § 2235

यत्रानेकस्य पदस्याश्लिष्टस्य प्रतीतयोगस्याद्रुतोच्चारितस्य वाक्यस्य वानेकस्य पौर्वापर्येणार्थयोगः संबन्धो नास्तीति तस्मादसंबद्धार्थता गृह्यते, तदपार्थकं निष्प्रयोजनं निग्रहस्थानम् । कस्मात् ? समुदायार्थस्य वाक्यार्थस्य महावाक्यार्थस्य वापायात् । वाक्यमहावाक्यार्थप्रत्यायनप्रयोजनो हि पदानां वाक्यानां वा प्रयोगः, असति तस्मिन्नपार्थकमित्यर्थः । वाक्यस्य पौर्वापर्यासंबन्धे उदाहरणमाह—यथा दश दाडिमानि षडपूपा इति । पदानां पौर्वापर्यासंबन्धे उदाहरणमाह—कुण्डमजाजिनम् इति । रौरुकं रुरुसंबन्धि । पाय्यं पाययितव्यम् । अप्रतिशीनो वृद्धः । § 2236

वार्त्तिककारः शङ्कते—निरर्थकापार्थकयोरिति । परप्रत्यायनप्रयोजनं हि *वर्णोच्चारणम् । तत्र निरर्थकेनेवापार्थकेनापि न परः प्रतिपाद्यत इति उभयोरभेदः । न च वर्णमात्रमेकत्रानर्थकमन्यत्र तु पदानीत्येतावता भेदेनोपादानं युक्तम् । एकत्र वाक्योपादानमन्यत्र पदोपादानमित्यपार्थकयोरप्यवान्तरभेदवत्त्वे भेदोपादानप्रसङ्गादिति शङ्कार्थः । निराकरोति—भिद्यते इति । पृच्छति—कथम् ? उत्तरम्—तत्र हि निरर्थके वर्णमात्रम् अभिधेयशून्यम्, इह तु

३ म् ] तत्तेन नोपात्तम्nvt-C
१२ शृणोतीति ] गायनस्य कश्चिदपराधःnvt-C
२६ म् ] याज्यं याजयितव्यम्nvt-J
२८ * ] वचनो°nvt-C
२९ च ] वर्णक्रममात्रमेकत्रान्यत्र चnvt-C

अपार्थके पदानि पद्यते गम्यतेऽभिधेयमेभिरिति पदानि वाक्यानि चाभिधेयवन्ति असंबद्धानीति । निरभिधेयनिष्प्रयोजनयोर्निरर्थकापार्थकयोर्महान् विशेषः । न त्वीदृशो वाक्यपदयोर्निष्प्रयोजनयोर्विशेषो येनानयोरवान्तरभेदमाद्रियामहे । परप्रत्यायनप्रयोजनाभावमात्रविवक्षया त्वविशेषे सर्वनिग्रहस्थानाविशेषः, 686/tha सर्वत्र परप्रत्यायनाभावात्, भावे वा निग्रहस्थानानुपपत्तेरिति ॥ १० ॥
§ 2237

॥ प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम् ॥

## ५.२.३ स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम्

अवयवविपर्यासवचनमप्राप्तकालम् ॥ ५ । २ । ११ ॥ § 2239

व्याचष्टे—प्रतिज्ञादीनामवयवानां यथालक्षणमर्थवशात् क्रमः लक्षणानतिक्रमेण क्रमः । उक्तमेतदस्माभिः प्रथम एवाध्याये—यदपेक्षिताभिधायिनो वचनात् परे प्रतिपद्यन्ते, नान्यस्य । तत्र प्रथमं साध्यनिर्देशोऽपेक्षितः परैर्न तु साधननिर्देशः । तद् यद्ययं प्रथमं साधनमेव प्रयुञ्जीत कथमपेक्षितं ब्रूयात् ? अनपेक्षिताभिधायी च कथं प्रतिपादको नाम ? तदेवं सर्वाण्येव हेत्वादिवचनानि अपि क्रमवन्ति, नाक्रमाणि प्रतिपादयितुमर्हन्ति, विपरीतक्रमेभ्योऽप्यनुक्रमानुसरणादेवार्थप्रतिपत्तेः । सोऽयं प्रतिज्ञादीनामर्थ एव वाक्यार्थः । स चैतादृशो य एषामनुक्रममन्तरेण न शक्यो ज्ञातुमिति । अवयवविपर्यासे त्वाकाङ्क्षाया एवाभावात् तत्पूर्वकत्वाच्च पदार्थसंबन्धस्य असंबन्धात् निग्रहस्थानमिति भाष्यार्थः । § 2240

वार्त्तिकम्—नैवमपि सिद्धेरित्येके । यथाहुरत्रापि न कश्चित् क्रमनियम इष्टार्थसिद्धेरुभयत्राविशेषादिति । यद्युच्येत, अर्थशब्दवदयमस्माकं समयो यदनेन क्रमविशेषेणार्थः प्रत्येतव्यो नान्येनेति, अतस्तथैव प्रतीयते न क्रमान्तरेणेत्यत आह—समयानभ्युपगमाच्च । पदेष्वेव समयपूर्वकः प्रत्ययो न वाक्येषु, अभिनवकविरचितात् समयानपेक्षादेव वाक्याद् अर्थप्रतीतेः ।
§ 2241

687/tha

स्यादेतत् । वाक्येष्वपि क्रमनियमो दृष्टः, यथा पाचयां बभूवेति न पुनर्बभूव पाचयामिति । अत आह—प्रयोगाच्चेति । तत्र लौकिकः प्रयोगो नियतः, इह त्ववयवव्यत्ययस्यापि दृष्टः प्रयोग इत्यर्थः । तदेतद् दूषयति—यत् तावन्नैवमपि सिद्धेरिति, तत्रोत्तरम्—प्रयोगापेतशब्दवदेतत् स्यात् । एतदेव विवृणोति—यथा गौरित्यस्य पदस्यार्थे गावीति प्रयुज्यमानं पदं ककुदादिमन्तमर्थं प्रतिपादयतीति । यद्यपि शब्दानामर्थप्रत्यायनं न स्वाभाविकं

---

१६ पेक्षादेव ] °रचिततत्समया° nvt-C

तथापि परमेश्वरसंकेतपूर्वकमद्ययावदनुवर्तते । अत+एव च साधवोऽर्थभेदे शब्दभेदा येषां पारमेश्वरसंकेतः, तदसंकेतात्तु प्रवर्तमाना अप्यर्थेष्वसाधवः शब्दा अपभ्रंशा भवन्ति । तदपेक्षाश्च साधुभिर्भाषितव्यमित्यादयो विधयो धर्मेषु, निन्दार्थवादाश्च— मन्त्रो हीनः स्वरतो वर्णतः इत्यादयः । वेदानां च प्रामाण्यं प्रतिपादितं द्वितीयेऽध्याये । न चायमर्थो ये ये साधवः शब्दास्ते सर्वे धर्महेतव इति, किं तु धर्मानुष्ठाने तदनुरूपे भाषणे प्राप्ते साधुभिरेवेति नियम्यते । तदेवं व्यवस्थिते अविशेषेण गोगाव्यादिशब्दा आर्येण प्रयुज्यमाना दृश्यन्ते, तत्रैते किमविशेषेणैव साधव उत कश्चिदेकः साधुः, तत्पूर्विका चेतरेभ्यः प्रतिपत्तिः । तत्रैकशब्दस्य साधुत्वकल्पनायामितरस्मात् तन्मूलतयार्थप्रतिपत्त्युपपत्तेः न सर्वत्र साधुत्वकल्पना युक्ता । यथाह स्मात्र भगवान् जैमिनिः— अन्यायश्चानेकशब्दत्वम् इति । तत्रापि कतमस्यासाधुत्वमित्येकस्यैतेष्विति जिज्ञासायाम्— तत्र तत्त्वमभियोगविशेषात् स्यात् इति । योऽभियुक्ततमैः इन्द्रपाणिनिप्रभृतिभिः साधुत्वेनाविगानतः स्मर्यते स साधुः, असाधव इतर इति निश्चीयते । तेन यद्यपि लौकिका गाव्यादिशब्देभ्य एव गवाद्यर्थमधिगच्छाम इति दृष्टार्थमात्रव्यवहारिणः प्रतियन्ति, तथापि परीक्षकाणां विचारयतामेष विचारक्रमो यद् वृद्धतमेन गोशब्दे प्रयोक्तव्ये प्रमादाद्
688/tha गावीशब्दः प्रयुक्तः, ततश्च वृद्धतरेण गोशब्दमुन्नीय गोत्वं प्रतीयते । यथाहुः

> अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते ।
> अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥§ 2244

> एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
> तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥§ 2246

पार्श्वस्थस्त्वतोऽनेन मूलशब्दमुन्नीयार्थः प्रतीयते इत्यगृहीत्वैव गावीशब्दादेवायममुमर्थं प्रतीतवान् इति तमेव गोत्वस्य वाचकत्वमवगम्यान्येषां वृद्धो बभूव । ततः प्रभृत्यननुसृतमूलशब्दानामयं वाचकत्वभ्रमोऽपभ्रंशेऽनुवर्तते, तेन वृद्धतरस्योभयवेदिनो मूलशब्दानुसारिणी पदार्थप्रतिपत्तिः, इदानीन्तनानां त्वपभ्रंशादेव । अत+एवान्वाख्यानमपि प्रयोजनवत् । असत्यस्मिन् वाचकादपभ्रंशविभागे ज्ञानाभावात् साधुभिर्भाषितव्यमिति नियमविधेः न म्लेच्छितवै नापभाषितवै इति निषेधस्य च विषयसंशयेन दुरधिगमत्वेन धर्मानुष्ठानस्याशक्यत्वप्रसङ्गात् । यत्रार्थे यस्य शब्दस्य भगवतेश्वरेण संकेतः कृतः स तत्र साधुरसाधुरन्यत्र । यथा य एवाश्वशब्दो दरिद्रेऽसाधुः, स एव साधुर्वाजिनि प्रयुज्यमानः । यथा नकुलदन्ताग्रस्पृष्टा या काचिदोषधिरसौ सर्पविषं हन्ति, एवमीश्वरेण कृतसंकेतः शब्दः साधुर्धर्म उपयुज्यते नान्य

९ त्तिः ] प्रतीतिःnvt-C
११ म् ] मीमांसादर्शन १।३।२६
१२ स्यात् ] तत्रैव १।३।२७
२१ ते ] वाक्यपदीये १।१५३,...नुमीयतेnvt-J

इति । यववराहादिशब्दानां चार्यम्लेच्छयोरर्थविवादे वैदिकाद् वाक्यशेषादार्यसंमतोऽर्थो ग्रहीतव्यो न म्लेच्छसंमतः, तत्र वैदिकवाक्यशेषविरोधात् । येषां तु शब्दानामार्येषु न दृष्टचरः प्रयोगः, केवलैर्म्लेच्छैरेवार्थभेदे प्रयुज्यन्ते, यथा पिकनेमतामरसादयः, वेदे च प्रयुक्तास्तेषां म्लेच्छव्यवहारादेवार्थोऽवधारणीयः, तत्र तेषामभियोगादिति, आर्यव्यवहारापरिपन्थित्वाच्च । तदेवं व्यवस्थिते न्यायमीमांसापरिशीलनविकलानां बाह्यतराः प्रलापा उपेक्षणीयाः । तस्मात् सुष्ठूक्तं—प्रयोगापेतशब्दवदिति । न च शब्दान्वाख्यानं व्यर्थमिति चेति । प्रतिज्ञादीनां क्रमनियमकारणं प्रश्नपूर्वकं दर्शयति—एतत् कथम् ? पूर्वं तावदिति । द्वितीयं देश्यमनुभाष्य परिहरति—यत् पुनरेतत् समयानभ्युपगमादिति । सोऽयमर्थस्यानुपूर्वी प्रतीतिबलप्रवृत्ताम् अन्वाचक्षाणो नाभ्याख्येय इति नोपालभ्यः । शास्त्रे वाक्यान्यर्थसंग्रहार्थमुपादीयन्ते इति । न हि शास्त्रे कृ तृ रा स दिवा दर भूत दिवा इत्यर्थसंग्रहो यथा कथञ्चित् क्रियत इति कथायामपि तथा क्रियतामिति युक्तम्, वादादिषु पक्षप्रतिपक्षवद् वक्तोरपि परीक्ष्यमाणत्वात्, परीक्षतस्य च शास्त्रितत्वादिति ॥ ११ ॥ § 2247

## हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ ५ । २ । १२ ॥ § 2248

प्रतिज्ञादीनां पञ्चावयवानां मिलितानां साधनत्वमुपपादितम् । न्यूनत्वे तु साधनत्वं नास्ति । तदभावे न साध्यसिद्धिः । न हि सामग्रीनिष्पाद्यं कार्यं सामग्र्येकदेशाद् भवतीत्यर्थः । परेषां मतमुपन्यस्यति—एके त्विति । एके तु प्रतिज्ञान्यूनं नाम निग्रहस्थानं नास्तीति ब्रुवते । दूषयति—एतत्तु न युक्तमिति । किं प्रतिज्ञान्यूनं निग्रहस्थानान्तरं न भवति, अथ निग्रहस्थानमेव न भवतीति ? एतदेव आह—किमयं निगृह्यते अथ नेति । प्रथमकल्पे दोषमाह—यदीति । द्वितीये पक्षे दोषमाह—अथ न निग्रह इति । प्रतिज्ञायाः साधनाङ्गत्वमुक्तमित्यर्थः । यच्च ब्रवीषि दिग्नाग, सिद्धान्तपरिग्रह एवेति । एतत्तु दूषयति—एतदपि इति । सिद्धसाध्यार्थयोः सिद्धान्तप्रतिज्ञयोर्महान् भेद इत्यर्थः ॥ १२ ॥ § 2249

## हेतूदाहरणाधिकमधिकम् ॥ ५ । २ । १३ ॥ § 2250

690/tha

तदेतन्नियमाभ्युगम इति भाष्यम् । यत्र कथमेतत् साध्यं सिध्यत्विति जिज्ञासा, तत्रैकेनैव साधनेन साध्यसिद्धेः साधनान्तराभिधानमनर्थकम् । निष्पादितक्रिये कर्मणि अविशेषाभिधायिनः साधनस्य साधनन्यायातिपातात् । यत्र तु प्रतिवादिनः परिषदो वा जिज्ञासा भवति, कति साधनानि संभ-

१२ दिवा ] सन्दर्भस्यास्य पाठोऽर्थश्च न्यायालङ्कारभूमिकायां See → pp. XXVI-XXIX सविस्तरं विमृष्टौ; कृत्स्नासदिवा° nvt-C

वन्त्यस्मिन् साध्य इति, तत्र यावन्ति साधनानि संभवन्ति तानि सर्वाण्येव वाच्यानि, *अन्यतमानभिधानेन निग्रहप्रसङ्गादिति । § 2251

नाधिकं निग्रहस्थानमिति य आहुः तन्मतमुपन्यस्यति—तच्च न, दार्ढ्यात् इति । दूषयति—न, दार्ढ्यार्थेति । यदि निश्चयो दार्ढ्यं तदेकस्मादेव प्रमाणाद् भवति, अनिश्चायकस्याप्रमाणत्वात् । अथ स्फुटत्वम्, तदपि चेन्निश्चयः स दत्तोत्तरः । अथ सामान्यविशेषतद्वतां ग्रहणम्, न तदनुमानसहस्रैरपि, तेषां सामान्यवद्द्रव्यमात्रविषयत्वात् । शङ्कते—अथ ब्रवीषि, द्वे अपि ते ज्ञापके इति । नास्माकमनधिगतार्थगन्तृ प्रमाणम्, येनैकेनाधिगते प्रमाणान्तरमप्रमाणं स्यात्, अपि तु गन्तृमात्रं प्रमाणम् । तच्च द्वितीयस्याप्यविशिष्टमिति शङ्कार्थः । निराकरोति—सत्यं द्वे अपि ज्ञापके इति । पुरुषोऽत्रापराध्यति यो ज्ञातमर्थमजिज्ञासितं ज्ञापयति, न तु प्रमाणम् । तद्धि सामर्थ्येन मेये प्रवर्तते एव । यदि जिज्ञासायां सत्यां प्रवर्तते प्रतिपादयति ज्ञेयम्, नास्य कश्चिदपराध इति । न हि धान्येष्वलूनेषु दात्रमव्रश्चनं भवति । तस्मादनपेक्षितकरणादनवस्थानप्रसङ्गाच्च पुरुषस्य निग्रह इति स्थितम् ॥ १३ ॥
§ 2252

॥ इति स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम् ॥

## ५.२.४ पुनरुक्तनिग्रहस्थानप्रकरणम्

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ ५ । २ । १४ ॥ § 2254

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ ५ । २ । १५ ॥
§ 2255

691/tha

तदनेन सूत्रद्वयेन पुनरुक्तमेकमेव निग्रहस्थानं कथञ्चिदवान्तरभेदविवक्षया त्रिविधमुक्तं प्रपञ्चार्थम् । तदेव पुनरुक्तं क्वचित् शब्दाभ्यासात्, क्वचित् पर्यायान्तरात्, क्वचिदर्थादिति । आक्षिपति—नाबाधनादिति । समाधत्ते—सत्यमिति । जल्पवितण्डयोर्वक्तुर्नैपुण्यं चिन्त्यते । पुनरुक्तप्रयोगे त्वनिपुणः स्यात् । अनपेक्षिताभिधानात् साधनस्य विषयः साध्योऽर्थो न सिद्धः । तस्यापरिज्ञानान्निगृह्यते । वैयर्थ्यं चानर्थक्यं विरुद्धप्रयोजनत्वं वाभिमतम् । तथा हि पुनरुक्तप्रयोगे तत्प्रयोजनानुसरणसमाकुलचित्तः प्रथमाभिधानादापाततः प्रतीतमप्यर्थमप्रतीतमिव मन्यमानो न निश्चेतुमर्हति । ततश्च प्रतिपादनाय

२ *] अन्यतराभिधाने nvt-C

प्रवृत्तो विप्रतिपादयेदिति विरुद्धप्रयोजनवत्त्ववैयर्थ्यं स्यादित्युपपन्नं पुनरुक्तं निग्रहस्थानमिति ॥ १५ ॥ § 2256

॥ पुनरुक्तनिग्रहस्थानप्रकरणम् ॥

## ५.२.५ उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम्

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥ ५ । २ । १६ ॥ § 2258

व्याचष्टे—विज्ञातस्य वाक्यार्थस्येति । निग्रहस्थानत्वेऽस्योपपत्तिमाह—अप्रत्युच्चारयन् किमाश्रयं परपक्षप्रतिषेधं ब्रूयादिति । § 2259

वार्त्तिकम्—नेदं निग्रहस्थानमिति केचित् । उत्तरेण उत्तरगुणदोषनिरूपणेन प्रतिवादिनो मूढत्वामूढत्वआवस्थानात् । एतद्विभजते—उत्तरेण गुणदोषवतेति । तस्मात् किं पुनरुच्चारितेनोच्चारणेनास्ति प्रयोजनमिति शेषः । अस्ति हि कश्चिदिति क्वचित् पाठः । तत्रास्ति हि इति निपातद्वयं वाक्यावतारे द्रष्टव्यम् । पुंसां विचित्रस्वभावत्वात् कश्चिदुत्तरे समर्थो न प्रत्युच्चारणे । नासौ सदुत्तरमभिदधानः तावताननुभाषणमात्रेण निग्रहमर्हति । ननु 692/tha यद्यननुभाषणं न निग्रहस्थानं तदानुभाषितुमुपक्रम्य सर्वमननुभाषमाणो न निगृह्येतेत्यत आह—यस्त्वारभ्य न निर्वाहयेत् सदुत्तरं तु ब्रूयात्, तस्य स्यात् खलीकारमात्रम् असामर्थ्यकृतम्, न तु तत्त्ववादित्वविहतिरित्यर्थः । तमेतं भदन्ताक्षेपं समाधत्ते—नोत्तरविषयापरिज्ञानादिति । दूष्यविषयं हि दूषणम्, असति दूष्याभिधाने न शक्यं वक्तुम् । न खलु प्रतिज्ञाहेतूदाहरणोपनयनिगमनदोषास्तत्स्वरूपमनभिधाय शक्या दोषत्वेनावस्थापयितुमित्यप्रत्युच्चारयन् न दोषमभिधातुमर्हतीति । तदिदमुक्तम्—तदिदं व्याहतमुच्यते नोच्चारयति उत्तरं च ब्रवीतीति । § 2260

स्यादेतत् । न प्रतिवादिना तावत् सर्वं दूषणीयम्, अन्यतमावयवदूषणेनैव साधनस्य दूषितत्वेन दोषान्तराभिधानस्य वैयर्थ्यात् । न खलु मृतो मृत्युना रक्षितो मारयितुं शक्यः, एवं दूषितमपि दूषयितुम् । तस्मात् सत्यपि दूष्यबाहुल्येऽन्यतमं दूषणीयम् । तथा च सर्वानुभाषणे सर्वस्यादूष्यत्वाद् यद् दूषणीयं तत् पुनरनूद्यमिति सर्वानुवादे द्विरनुवादोऽदूष्यानुवादश्चेति दूषकनिग्रहस्थानद्वयम् । तस्मादनुभाषणमेव निग्रहस्थानमिति विपरीतमापतितमित्यत आह—अप्रतिज्ञानाच्चेति । एतद्विभजते—न चेदं प्रतिज्ञायते—पूर्वमेकग्रन्थेन सर्वमुच्चारयितव्यम्, पश्चादुत्तरं यद् दूष्यं तदनुवादेनाभिधेयम्, येन दूष्यानुदो द्विरनुवादश्च दोषौ स्याताम्, अपि तु यथाकथञ्चिदुत्तरं वक्तव्यम् । उत्तरवादपरस्योत्तरमाश्रयाभावे न युक्तमिति तदाश्रययात्रमनुवदितव्य-

१ येदिति ] प्रवृत्तो न प्रतिपादयितेतिnvt-C

१ र्थ्यं ] °प्रयोजनत्वं वै°nvt-J

म्, तदन्तरेणाशक्याभिधानत्वादुत्तरस्येति । तस्माद् युक्तं तन्मात्रस्याप्रत्युच्चारणं
निग्रहस्थानम्, न तु सर्वस्याप्रत्युच्चारणमित्यर्थः । § 2261

नन्वप्रतिभाया निग्रहस्थानत्वविधानेनाननुभाषणस्यापि विदितम्, तस्य त-
द्विशेषत्वात् । न खलु नानुभाषत इत्येतावतैव निगृह्यते, अपि त्वननुभाषमाणो
दूष्यं न बुध्यते । अबुध्यमानश्च तत्रोत्तरं न प्रतिपद्यत इत्यप्रतिभया निगृह्यते
। तदेवमननुभाषणमप्रतिभाविशेष इति अप्रतिभायां विहितं निग्रहस्थानत्वं
693/tha तद्विशेषेऽपि विहितं भवति । यथा गवि सास्नादिमत्त्वं विहितं शाबलेयेऽपि
विहितं भवति, न पुनस्तत्र सास्नादिमत्त्वविधानाय पृथक् प्रयत्नान्तरमार-
भन्ते । अत्र ब्रूमः, न पुनरुत्तराप्रतिपत्तिसामान्यस्य विशेषोऽननुभाषणम्,
पुंसा सामर्थ्यवैचित्र्यात् । कश्चिद् दूष्यं च दूषणं च विदन्नपि नानुभाषितुं
पारयति बहुवचनकुण्ठत्वात् । तस्मात् असत्यामप्यप्रतिभायाम् अननुभाषण-
संभवात् नाप्रतिभाया विशेषोऽननुभाषणं नाम । कश्चित् तु दूषणविषयं वेद,
अनुभाषते च, उत्तरप्रतिपत्तिविकलस्तु स्यात् । सोऽयमप्रतिभया निगृह्यते,
नाननुभाषणेन, तत्र तस्य सामर्थ्यात् । कश्चित् पुनर्दूष्यमेव न जानाति
। सोऽज्ञानेन निगृह्यते । न चाज्ञानेऽननुभाषणमवश्यम्भावि, धारणाव-
तोऽर्थानिरूपणेऽपि वाद्युदीरिताक्षरस्वरूपमात्रपाठसंभवेनानुभाषणोपपत्तेः ।
अप्रतिभा त्ववश्यं भवेत् । न ह्यस्ति संभवो दूष्यं न वेद, अस्य दूषणं तु वेदेति
। तथापि स्वरूपतस्तावद् भेदः । न हि यदेव दूषणविषयमज्ञानमप्रतिभा,
तदेव दूष्यविषयमज्ञानम् । तस्मात् सत्यप्यननु भाषणाप्रतिभाज्ञानानामुत्त-
रानभिधानफलत्वे तुल्ये, अवान्तरभेदविवक्षया भेदेनोपन्यासः । § 2262

त्रिरभिहितस्येति । त्रिरभिधानमेवमप्यप्रतिपद्यमानस्यातिजडतया न वा-
देऽधिकार इत्यभिसन्धिमत इति ॥ १६ ॥ § 2263

## अविज्ञातं चाज्ञानम् ॥ ५ । २ । १७ ॥ § 2264

तद् व्याचष्टे—विज्ञातार्थस्य परिषदेति । निग्रहस्थानसामान्यलक्षणमत्र
योजयति वार्त्तिककारः—अप्रतिपत्तितो निग्रहस्थानमिति ॥ १७ ॥ § 2265

## उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ ५ । २ । १८ ॥ § 2266

तद्व्याचष्टे—परपक्षेति । वार्त्तिकं—श्लोकपाठादिभिरवज्ञांदर्शयन्निति ।
694/tha अर्थान्तरे हि निग्रहस्थाने प्रसक्तानुप्रसक्तं तत्सिद्ध्यर्थताव्याजेनावतारय-
ता न प्रकृतावज्ञानं क्रियते, इह त्ववज्ञानम् एतावता भेदेनोपन्यास इति
। इयं चाप्रतिभासम्यक्साधनोपन्यासे द्रष्टव्या । साधनाभासोपन्यासे तु
पर्यनुयोज्योपेक्षणम् ॥ १८ ॥ § 2267

## कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ ५ । २ । १९ ॥

§ 2268

२ र्थः ] °च्चारणमननुभाषणं न सर्व°…रणमननुभाषणमित्यर्थः ।nvt-C

साधनस्य दूषणस्य चोपन्यासमभ्युपगम्य तदवस्थः प्रतीयमान एव प्रतिवादिनो वादिनो वा दार्ढ्यं सभ्यानां वा कठोरत्वमवगम्याकस्मात् कार्यं व्यासज्याभ्युपगतां कथां व्यच्छिनत्ति, तत्र विक्षेपो नाम निग्रहस्थानं भवति । तदनेनाभ्युपगम्याप्रतिभया तूष्णींभावोऽपि संगृहीतो वेदितव्यः । कार्यव्यासङ्गस्याभ्युपेतकथाविच्छेदमात्रोपलक्षणपरत्वात् । § 2269

न चेदमर्थान्तरम्, तत्र प्रकृतमेव साधयामीति व्याजेन प्रसक्तानुप्रसक्तावतारेण कथाविच्छेदाभावात् । इह तु कथाविच्छेदात् । न चास्य हेत्वाभासेष्वन्तर्भावः । न हि विक्षेपस्यान्यतमलिङ्गधर्मानुविधानम्, नापि प्रकृतसाध्यसिद्धये प्रयोगो येन हेत्वाभासः स्यात् । न च वादिनो विक्षेपो हेत्वाभासः, उपन्यासानन्तरं कथामभ्युपेत्यैव हेतुमनभिधायापसरणात् । यदि चायं सम्यञ्चं हेतुमभिधाय तत्समर्थनासमर्थोऽपसरेत्, किमेतावता न निगृह्येत, हेत्वाभासोपन्यासेन वा निगृह्येत, किं तु व्यासङ्गादेव । अनर्थकापार्थकाभ्यां तु भेदोऽस्य स्फुटतर एव । न ह्यत्रासमानसंकेतः प्रतिपादको येनानर्थकः स्यात् । नापीहार्थप्रतिपादकानि पदानि वाक्यानि वा पौर्वापर्येणासंबन्धानि येनापार्थकः स्यात् । न चात्रावज्ञानं येनाप्रतिभा भवेत् । तस्माद्विक्षेपः पृथङ् निग्रहस्थानमिति सिद्धम् ॥ १९ ॥ § 2270

॥ इति उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ॥

## ५.२.६ दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम्

695/tha

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ ५ । २ । २० ॥ § 2272

व्याचष्टे—यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्य, कथं ज्ञायते अभ्युपगम्यत इत्यत आह—अनुद्धृत्येति । अनभ्युपगमेऽसाबुद्धरेदिति भावः । § 2273

वार्त्तिकम्—किं तु परस्वेनानतिसृष्टेनादत्तेनेत्यर्थः । प्रसङ्गविधानान्न निग्रहस्थानमित्यन्य इति । यदि पुरुषत्वाचौरोऽहं ततो भवानपि चौरः स्यात् । न च भवत एवमिष्टम् । तस्मात् त्वयैवानैकान्तिकत्वात् नायं हेतुरिति प्रसङ्गविपर्ययः । तस्मान्नात्मनश्चौरत्वमनेनाभ्युपगतमिति न मतानुज्ञा निग्रहस्थानमित्यर्थः । निराकरोति—एतत् तु न । कस्मात् ? अत एव । कुतः ? यत एवासौ उत्तरे वक्तव्ये प्रसङ्गं करोति अत+एव निगृह्यते । यदि हि वादी प्रतिवादिनं ब्रूयात्—सत्यमहं चौर एवेति, तदा किमनैकान्तिकं शक्नुयात् कर्तुम् ? तस्मात् पुरुषत्वं न चौर्ये हेतुः, अपि तु

१० र्थः ] °मिति मतानुज्ञा नासौ नि°nvt-C

१३ नैकान्तिकं ] °न्तिकत्वंnvt-C

१३ हेतुः ] चोरत्वहेतुःnvt-C

परस्त्वेनादत्तेन संबन्ध इत्युत्तरे कर्तव्ये यदुत्तराभासमाह, तेन ज्ञापयति, नूनमयं सम्यगुत्तरं न जानाति इत्युत्तरापरिज्ञानान्निगृह्यते । तच्चोत्तरापरिज्ञानं मतानुज्ञाद्वारेणोद्भाव्यमानं मतानुज्ञेत्युच्यते ॥ २० ॥ § 2274

## निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ ५ । २ । २१ ॥ § 2275

व्याचष्टे—पर्यनुयोज्यो नामेति । निग्रहस्योपपत्तिः प्रमाणतः सिद्धिस्तया इत्यर्थः । एतत्तु न तावद् वादिनोद्भावनीयम्, न ह्यसौ स्वसाधनावद्यमनुन्मत्त उद्भावयति । नापि प्रतिवादिना, न ह्यनुन्मत्त आत्मनात्मानं निगृह्णाति
696/tha । अपि तु पर्यनुयोज्यं जानानः कस्मादुपेक्षते ? तस्मात् सभापतिना वादिप्रतिवादिभ्यां वा पर्यनुयुक्तया वा परिषदा तन्निग्रहस्थानमुद्भावनीयम् । अत्र च तत्त्वनिर्णयावसाने वादे द्वयोरपि निग्रहात् परिषदेव विजयते । जल्पवितण्डयोस्तु तत्त्वानपेक्षपुरुषसामर्थ्यपरीक्षणप्रवृत्तयोः प्रतिवादी निगृह्यते, साधनाभासवादिनापि वादिना स्फुरता प्रतिवादी स्तम्भितो यतः । सम्यक्साधनोपन्यासे विहिते वादिनः प्रतिवादिन उत्तराप्रतिपत्तिरप्रतिभा । साधनाभासोपन्यासे च उत्तराप्रतिपत्तिः पर्यनुयोज्योपेक्षणमिति विशेषः ॥ § 2276

वार्त्तिकम्—नान्यवचनादित्येके । यत्र प्रतिवादी तूष्णीं भवति तत्र तूष्णींभावेनैव वादिन उत्तरानर्हतां दर्शयन्नस्य साधनाभासवादितां सूचयति । यत्रास्य दोषोद्भावनं सम्यग्दोषमनुक्त्वा करोति, तत्राप्यसौ दुष्टमुत्तरं ददत् तत्साधनदोषमेव सूचयति । उपदिशन्ति हि वृद्धाः, दुष्टे हि साधने दुष्टमुत्तरं देयमिति । तस्मादवचनेऽन्यवचने वा न पर्यनुयोज्योपेक्षणं नाम निग्रहस्थानमुभयथाप्यनुपेक्षणादित्यर्थः । दूषयति—तच्च नेति । साधनस्य हि सम्यञ्चं दोषं जानानः तमेव ब्रूयात् । सोऽयं प्राप्तावसरोऽब्रुवन् विब्रुवन् वा नूनं न सम्यञ्चं दोषं विजानाति । विनिश्चितप्रमाणभावस्य हि पुरुषस्येङ्गितादिभिरभिप्रायः सूच्यते, न त्वनिश्चितप्रमाणभावस्य । यथाहुः

*श्रुतिस्मृत्यतिरेकेण युक्तजल्पाकभाषितम् ।
तद्यथाश्रुति दुष्टं चेद् दुष्टमेवावधार्यताम् ॥ § 2279

इति । तस्मात् सुष्ठूक्तं—जानानो ह्यसौ किमर्थमन्यद् ब्रवीतीति ॥ २१ ॥ § 2280

## अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २२ ॥ § 2281

१ न्ध ] तु अदत्तादानम्nvt-J
२५ न ] तु विनिश्चियमानप्र°nvt-J
२६ * ] °रिक्तं च यत्तु जल्पाक° °दुष्टत्वे° nvt-C °धार्यते ॥nvt-J
२८ जानानो ] ह्ययंnvt-C

न चायमप्रतिभातो न भिद्यते । सा ह्युत्तराप्रतिपत्तिः, इयं त्वनुत्तर-स्यैवोत्तरत्वेन विपरीतप्रतिपत्तिरिति महान् विशेषः । अनेन च सर्वा एव 697/tha
जातयो निग्रहस्थानत्वेन संगृहीता भवन्ति । न च हेत्वाभासानामितो न भेदः, ते हि वादिनो निग्रहस्थानम्, अयं तु प्रतिवादिन इति महान् विशेषः । अत+एव भवतामपि गाथा,

असाधनाङ्गवचनमदोषोद्भावनं द्वयोः ।
निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते ॥§ 2284

अप्रतिभाया एव प्रसज्यप्रतिषेधात्मिकाया अस्या निरनुयोज्यानुयोग-स्य भेदं दर्शयति भाष्यकारः—निग्रहस्थानलक्षणस्य मिथ्याध्यवसायात् स-मारोपादित्यर्थः । सुगमं वार्त्तिकम् ॥ २२ ॥ § 2285

॥ इति दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम् ॥

## ५.२.७ कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम्

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ ५ । २ । २३ ॥ § 2287

सिद्धान्तमभ्युपेत्य इत्यस्य व्याख्यानम्—कस्यचिदर्थस्य तथाभावं प्र-तिज्ञायेति । प्रतिज्ञातार्थविपर्ययादिति—अभ्युपगतार्थविपर्ययात्, सिद्धान्तविप-र्ययादिति यावत् । तदेतद् अनियमात् इत्यस्य व्याख्यानम् । § 2288

अत्र सांख्यीयं सिद्धान्तमाह—यथा न सदिति । तस्य पर्यायान्तरेण कथनम्—न सतः इति । नासदात्मानम् इत्यस्य पर्यायान्तरेण विवरणम्—नासदुत्पद्यते इति । सोऽयं सिद्धान्तः सांख्यानाम् । तमभ्युपेत्य तद्विपर्य-यात् कथाप्रसङ्गमाह—स्वपक्षं व्यवस्थापयति । पक्षावस्थानं दर्शयति, एका प्रकृतिर्व्यक्तस्योपलभ्यमानस्यार्थजातस्य युक्ता इति प्रतिज्ञा । विकारणाम् इति व्यक्तस्यैवानु वादः । अन्वयदर्शनात् इति हेतुः । मृदन्वितानाम् 698/tha
इति साधर्म्योदाहरणम् । तथा चायं व्यक्तभेदः सुखदुःखमोहान्वितो गृह्य-ते इत्युपनयः । निगमनमाह—तस्मात् समन्वयदर्शनात् विश्वस्य व्यक्तस्य, कैरित्यपेक्षायाम् उत्तरम्—सुखादिभिरिति । एकप्रकृतिः सर्वो विकार इति सेयं कथा । सिद्धान्तमभ्युपेत्यैवमुक्तवान् सांख्यो नैयायिकेन अनुयुज्यते दूषणाय पृच्छ्यते—अथ प्रकृतिर्विकार इति कथं लक्षितव्यमिति । स एवं नैयायिकेन पृष्टः सांख्य उत्तरमाह—यस्यावस्थितस्य मृदादेर्धर्मान्तरनिवृत्तौ शरावविनाशे यद् धर्मान्तरं मणिकादि प्रवर्तते असदेव जायते सा प्र-कृतिर्मृत्सुवर्णादिः । यत् तद् धर्मान्तरं निवर्तते प्रवर्तते वा, स विकार इति

३ यो ] अनेनैव सर्वा जातयःnvt-C    ७ ते ] वादन्याये पृः २

। अस्मिन्नुदाहरणेऽपसिद्धान्तं योजयति—सोऽयं प्रतिज्ञातार्थस्य सिद्धान्तस्य वादी विपर्यासादनियमात् कथां प्रसञ्जयति । प्रतिज्ञातं खल्वनेन सिद्धान्तिना नासदाविर्भवति उत्पद्यते । न सत्तिरोभवतीति न विनश्यतीति । तथापि कस्मादनेन सिद्धान्तो बाध्यते, अथ सिद्धान्तेनैव कस्मान्न बाध्यत इत्यत आह—सदसतोश्चेति । इदं हि लौकिकं प्रमाणसिद्धम्, सिद्धान्तस्त्वभ्युपगममात्रसिद्धो न प्रामाणिकः । तस्मादनेन सिद्धान्तो बलवता बाध्यते । तदेतन्मृद्धर्माणामपि न स्यादिति । न केवलं प्रेक्षावतां कर्तॄणाम्, अपि तु मृद्धर्माणामप्युत्पादविनाशौ प्रवृत्त्युपरमौ दृश्यमानौ न स्यातामित्यर्थः । एवं प्रत्यवस्थितः सांख्यो नैयायिकेन पृष्टो यद्यसत आत्मलाभं सतश्चात्महानमभ्युपैति, ततोऽस्यापसिद्धान्तो भवति । अथ नाभ्युपैति, पक्षोऽस्य न सिध्यतीति । विकारा हि अनेन पक्षीकृता एकप्रकृतिकत्वेन, तत्र विकारलक्षणाभावेन विकाराणामनिरूपणात् तदभावे न प्रतिज्ञार्थो न च हेत्वर्थः, आश्रयासिद्धत्वात् । § 2289

नन्वेवं प्रतिज्ञातार्थविरोधित्वात् सतो निरोधस्य असतश्चोत्पादस्य हेत्वाभास एव निग्रहस्थानं भवेत्, प्रतिज्ञाविरोधो वेत्याशङ्क्य वार्त्तिककार
699/tha आह—प्रतिज्ञातार्थ व्यरिरेकेणेति । न ह्यत्रैकप्रकृतयो विकारा एकप्रकृतिकत्वादिति हेतुः साध्यविरुद्धेन व्याप्त उद्भावितो येन विरुद्धो भवेत् । नाप्येकप्रकृतिकत्वं विकाराणां शब्दतो विरुद्धं समन्वयेन हेतुना, येन प्रतिज्ञाविरोधो भवेत् । वैभवमात्रेण च प्रतिज्ञाहेत्वोर्विरोध इत्यत्रोक्तं वार्त्तिककृता स्वसिद्धान्तस्य गोत्वादेर्नित्यत्वविरोधाद् विरोध इति । अपि च तत्र बलवता सिद्धान्तेनानैकान्तिकदेशना बाध्यते । इह तु सिद्धान्त एव बाध्यते दुर्बल इत्युदाहरणपौनरुक्त्यमपि नास्ति । तस्माद् यत्र प्रतिज्ञार्थेन विरोधः तत्र विरुद्धो हेत्वाभासः प्रतिज्ञाविरोधो वा । इह तु प्रतिज्ञार्थव्यतिरेकेणाभ्युपगमान्तरेण विरोध इति पुरुषस्य पूर्वापरविरुद्धार्थाभिधायिनोऽसामर्थ्यान्निग्रहस्थानं जल्पवितण्डयोरिति सिद्धम् ॥ २३ ॥ § 2290

## हेत्वाभासाश्च यथोक्ताः ॥ ५ । २ । २४ ॥ § 2291

व्याचष्टे—हेत्वाभासाश्चेति । यद्यनुक्तमपि किंचिदवशिष्यते निग्रहस्थानं तत् चकारेण समुच्चेयम् । यथोक्ता इति सूत्रावयवनिराकरणीयां शङ्कामाह—किं पुनर्लक्षणान्तरयोगात् हेत्वाभासा निग्रहस्थानतामापद्यन्ते, यथा प्रमाणानि प्रमेयत्वम्, तेषामेव प्रत्यक्षादीनामुपलब्धिसाधनत्वेन लक्ष्यमाणानां प्रमाणानां प्रमाणत्वम्, प्रमाव्याप्यतया तु प्रेमयत्वमिति, लक्षणान्तरेण प्रमाणानि प्रमेयत्वं प्रतिपद्यन्ते इति शङ्कायाः संभवात् । अत आह भगवान् सूत्रकारः—यथोक्ता इति । § 2292

---

२ सिद्धान्तिना ] प्रतिज्ञातः सिद्धान्तः खल्व°nvt-C
८ तु ] सद्धर्माणा°nvt-C
१४ स्य ] इतः परम् विरुद्धो हेत्वाभास इति इत्यधिकम्nvt-J
१७ त्वादिति ] अन्वितप्रकृतिकत्वा°nvt-J
१९ तिज्ञाहेत्वोर्विरोध ] न्या. सू. ५।२।४
२० विरोध ] विरुद्धःnvt-C